
# सुबोधिनी

## श्रीभागवतप्रथमस्कन्धीया

(अध्याय ९-१९ पर्यन्ता)



### श्रीवल्लभाचार्यविरचिता

श्रीमद्वल्लभाचार्यप्रादुर्भावितायां

श्रीमद्भागवत-

# सुबोधिन्यां

प्रथमस्कन्धः

टिप्पणी-प्रकाश-लेखसमेतः च

नवमाध्यायम् आरभ्य समाप्तिपर्यन्तः

*श्रीमद्भागवत-प्रथमस्कन्ध-सुबोधिनी (अध्याय ८-१८)*

**श्रीमद्वल्लभाचार्यविरचिता**

वि.सं. २०७८, श्रीवल्लभाब्द ५४४

३०० प्रति.

प्रकाशक :
श्रीवल्लभविद्यापीठ-श्रीविठ्ठलेशप्रभुचरणाश्रम ट्रस्ट
वैभव को-ऑपरेटिव सोसायटी,
पूना-बेंगलोर रोड, कोल्हापुर,
महाराष्ट्र - ४१६००८.

संगणकाटंकन :
श्रीवल्लभाचार्य ट्रस्ट - मांडवी.

मुद्रक :
पूर्वी प्रेस, राजकोट.

**E-book available on : www.Pushtimarg.net**

**Also on App : Pushtividya**

। श्रीकृष्णाय नमः ।

# सम्पादकीय

पूर्वप्रकाशित मूल श्रीसुबोधिनी और टीकाओंको पुनःप्रकाशित करनेकी शृंखलामें यह प्रथमस्कन्धके अवशिष्ट अर्धांशका प्रकाशन हो रहा है.

इससे पहले प्रकाशित किये पूर्वांशके सम्पादकीयमें हमने विस्तारसे बताई हुई बातोंका यहाँ पुनरावर्तन न करते हम पाठकोंसे उसे पढ़ लेनेका अनुरोध करते हैं.

प्रथमपरिशिष्टमें अतिरिक्त संबद्ध साहित्य— कारिकार्धसूचि, श्लोकार्धसूचि, उपन्यस्तवाक्यसूचि, श्रीमदाचार्यवाङ्मौक्तिकानि आदि— का निवेश इस प्रकाशनको सांगोपांग बनाता है. भागवतार्थनिबन्ध, श्रीपुरुषोत्तमसहस्रनाम, प्रकरणविभागसूचिका एवं अध्यायार्थ तथा आद्यसम्पादकोंकी प्रस्तावनाओंको हमने पूर्वार्धमें प्रकाशित कर ही दिये हैं.

द्वितीयपरिशिष्टमें अद्यावधि अप्रकाशित तृतीयस्कन्धसुबोधिनीपर श्रीलालूभट्टजीकी टिप्पणी हम इदम्प्रथमतया सहर्ष प्रकाशित कर रहे हैं. बड़ौदामें स्थित श्रीपुरुषोत्तमजीके वंशज सम्प्रदायके मूर्धन्य विद्वान दिवंगत श्रीचन्द्रगोपालजीके संग्रहमेंसे इसकी हस्तप्रतिकी झॅरॉक्सकोपी उपलब्ध करवानेके लिये उनके श्रीमती व्रजलताजीके हम आभारी हैं.

हमारी पहलेकी शैलीको यथावत् निभाते हुए हमने हमारे द्वारा प्रस्तावित पाठ (!) रूपमें दिये हैं; तथा श्रीसुबोधिनीपाठके अनुसार श्रीभागवतके श्लोकोंके संशोधनका भी प्रयास किया है. हमारी पादटिप्पणियाँ '-सम्पा.'संकेतसे पहचानी जा सकती है; अन्य सब पादटिप्पणी आद्यसम्पादकोंकी हैं. हमने शब्दोंके उपर लिखे अंक पादटिप्पणीका स्थल सूचित करते हैं, जबकि वे ही अंक कोष्ठक( )में होनेपर गद्यमेंकी किसी योजनाको उजागर करते हैं.

इस ग्रन्थके सम्पादनकार्यमें हमारे सहयोगी श्रीअनिलभाई भाटिया, श्रीपरेशभाई-श्रीमती मनीषा शाह, श्रीधर्मेन्द्रभाई-श्रीमती पद्मिनी झाला, श्रीराजेशभाई, श्रीप्रवीणभाई, श्रीपीयूषभाई, श्रीमती ख्याति आदिके हम कृतज्ञ हैं.

हम सभीकी पाठकगणसे ये ही अपेक्षा है कि वे इस वाङ्मयके अध्ययनद्वारा हमें चिरकृतज्ञ बनायें. इसकी सोफ्टकॉपी भी हमारे अन्य प्रकाशनोंकी तरह पुष्टिवाङ्मयकी वेबसाईटपे उपलब्ध है.

*जयति श्रीवल्लभार्यो जयति च विट्ठलेश्वरः प्रभुः श्रीमान्।*
*पुरुषोत्तमश्च तैश्च निर्दिष्टा पुष्टिपद्धतिर्जयति॥*

*श्रीवल्लभाब्द ५४४* — ***गोस्वामी श्याममनोहर***
*मकरसंक्रान्ति* — ***असित शाह***

# विषयानुक्रमणिका


| | विषयाः | पृष्ठानि |
|---|---|---|
| | (१) उर्वरित-प्रथमस्कन्धः | १–४४० |
| १. | **नवमोऽध्यायः** | १ – ४३ |
| | भीष्ममुक्तिवर्णनम् . | |
| २. | **दशमोऽध्यायः** | ४४ – ८६ |
| | पाण्डवानां ऐहिके सर्वसुखं, | ४४-४९ |
| | भगवतो हस्तिनापुरतः निर्याणोत्सवञ्च. | ५०-८६ |
| ३. | **एकादशोऽध्यायः** | ८७ - १३१ |
| | द्वारकायां भगवतो प्रत्यापत्तिः. | |
| ४. | **द्वादशोऽध्यायः** | १३२ – १५२ |
| | परीक्षितो जन्मोत्सवः वर्धनञ्च. | |
| ५. | **त्रयोदशोऽध्यायः** | १५३ – १९९ |
| | धृतराष्ट्रमुक्तिवृत्तान्तः. | |
| ६. | **चतुर्दशोऽध्यायः** | २०० – २१७ |
| | युधिष्ठिरस्य भगवद्गमनशङ्का, द्वारकातः आगतम् अर्जुनं प्रति प्रश्नकरणञ्च. | |
| ७. | **पञ्चदशोऽध्यायः** | २१८ – २७२ |
| | पाण्डवमुक्तिवर्णनम् . | |
| ८. | **षोडशोऽध्यायः** | २७३ – ३०४ |
| | परीक्षित्कृता आधिभौतिकाध्यात्मिकभूमि-धर्मरक्षा, आधिदैविकभूमि-धर्मसंवादश्रवणञ्च. | |
| ९. | **सप्तदशोऽध्यायः** | ३०५ – ३४३ |
| | परीक्षिता धर्म-पृथिवीसान्त्वनं, कलेः शिक्षा स्थानदानञ्च. | |
| १०. | **अष्टादशोऽध्यायः** | ३४४ – ३९३ |
| | परीक्षिते मुनिकुमारशापः. | |
| ११. | **एकोनविंशोऽध्यायः** | ३९४ – ४४० |
| | परीक्षितो गङ्गातटे प्रायोपवेशनम्, ऋष्याणां समागमः, श्रीशुकागमनं, राज्ञः तं प्रति प्रश्नकरणञ्च. | |

| | | |
|---|---|---|
| | (२) परिशिष्टे | ४४१ – ४९५ |
| १. | **सूचयः** | **४४१-४७१** |
| | उद्धरणसूचिः, | ४४१-४५१ |
| | कारिकार्धसूचिः, | ४५२-४५४ |
| | मूलश्लोकार्धसूचिः, | ४५५-४६७ |
| | श्रीमदाचार्यवाङ्मौक्तिकानि | ४६८-४७१ |
| २. | **प्रकीर्णस्वतन्त्रलेखः** | **४७२-४९५** |
| | श्रीलालूभट्टानां तृतीयस्कन्धटिप्पणी | |

# ॥ अथ नवमोऽध्यायः ॥

लोकप्रतीत्या कृष्णस्य यदा कार्यसमापनम् ॥
तदा भागवतश्रोतुर्देहरक्षा निरूप्यते ॥(१)॥
ऐहिकामुष्मिकफले[1] भक्तानां स्थान-भार्ययोः ॥

प्रकाशः

अथ नवमाध्यायं विवरिषवः सङ्गतिं वक्तुम् अष्टमादिचतुर्षु परीक्षिद्रक्षायाः अनिरूपणे हेतुं सपरिकरं त्रिभिः वदन्तो अग्रे तन्निरूपणे हेतुम् आहुः **लोक** इत्यादि. कार्यं स्फुटीकुर्वन्ति **ऐहिके**त्यादि. कथम्

लेखः

अथ नवमाध्यायं व्याचिख्यासवः पूर्वम् उपोद्घातत्वेन चिन्तयन्ति **लोक** इत्यादिभिः. अयम् अर्थः— पूर्वाध्यायारम्भे ब्रह्मास्त्रप्रसङ्गेन परीक्षिच्छरीरस्य ब्रह्मास्त्रतो वा रक्षार्थं स्वमायया गर्भवेष्टनम् उक्तं, तेन परीक्षिद्रक्षा सामान्यतः उक्ता. ततः कुन्तीस्तुतिनिरूपणम् आरभ्य एकादशाध्याय-समाप्तिपर्यन्तं मध्ये कथान्तरम् उपक्षिप्य ततो द्वादशे पुनः परीक्षिद्रक्षादि निरूप्यते. अतः प्रकरणं त्यक्त्वा किमिति पश्चाद्रक्षानिरूपणं, किमर्थं वा मध्ये कथान्तरोपक्षेपः इति आशङ्कायाम् अष्टमाध्यायादि-द्वादशाध्यायान्तस्य अर्थस्य सङ्गतिम् आहुः **लोक** इति. तथाच अष्टमादिषु चतुर्षु तत्कार्यम् उक्त्वा द्वादशे **भागवतश्रोतुः देहरक्षा निरूप्यते** इति अर्थः (१).

तदध्यायचतुष्टयप्रतिपाद्य-भगवत्कार्यं दर्शयन्ति **ऐहिक** इत्यादि. **भक्तानाम् ऐहिकफलं** राज्यादिप्राप्तिः, **आमुष्मिकं** भक्तिः ; ते फले अष्टमाध्याये "साधयित्वा अजातशत्रोः" (भाग.पुरा. १।८।५) इत्यादिना, कुन्तीस्तुत्या च निरूपिते ज्ञेये. तथा नवमाध्यायेऽपि भीष्मोपदेशेन पाण्डवानां ज्ञानप्राप्तिः **ऐहिकफलं,** तेन भक्तिसिद्धिः **आमुष्मिकफलं** च उक्तं ज्ञेयम्. दशमैकादशयोः आहुः **स्थान** इत्यादि. **स्थानं** कुशस्थली, **भार्याः** भगवद्भार्याः,

---

१. फलै इति ख.

सर्वेष्टापूरणं चैव भगवत्कार्यसङ्ग्रहः ॥(२)॥
श्रीमद्भागवतश्रोतृ[१] रक्षापूर्वक्रियाखिला[२] ॥
निरूपिता ततो मध्ये भगवत्कार्यवर्णनम् ॥(३)॥

एवं परीक्षितः शरीररक्षाप्रस्तावे रक्षापूर्वकार्यं मायावेष्टनम्[३] उक्त्वा इतरकार्यानिरूपणे[४] ऐकाग्र्येण[५] रक्षाऽसम्भवाद् मध्ये भगवत्कार्यं निरूपणीयम्.

प्रकाशः

एवम् अतः आहुः **श्रीत्यादि. निरूपिता** इति, अष्टमे निरूपिता. **मध्ये** इति नवमादित्रये. तथाच व्यासोक्तौ सूतोक्तौ च अङ्गाङ्गीभावो निर्वाहकत्वं च इति समानैव सङ्गतिः इति अर्थः (१-३).

**ऐहिकेत्यादि**-कारिकोक्तम् अर्थं व्याकुर्वन्ति **एवम्** इत्यादि. तेन

लेखः

तयोः **सर्वेष्टानाम् आसमन्तात् पूरणं** क्रमेण अध्यायद्वयार्थः इति भावः (२).

एवं **भगवत्कार्यसङ्ग्रहमुखेन** अध्यायचतुष्टयार्थम् उक्त्वा अध्याय-चतुष्टय-प्रतिपाद्यार्थस्य अग्रिमाध्यायेन परीक्षिद्रक्षानिरूपकेण सङ्गत्यर्थम् आहुः **श्रीमद्** इति. **श्रीमद्भागवत-श्रोतृरक्षायाः पूर्वं क्रिया** पूर्वाङ्गः सा **अखिले** अष्टमे **निरूपिता** इति अर्थः. **ततो** अग्रिमाध्यायत्रयेण रक्षापूर्वक्रिया-रक्षणयोः **मध्ये भगवत्कार्यवर्णनम्** इति अर्थः. तथाच एककार्य... सति इदं निरूपणम् इति भावः (३).

तदेतत् कारिकार्थं प्रपञ्च्य दर्शयन्ति **एवम्** इत्यादिना. **मायावेष्टनम्** इति. ''स्वमाययाऽऽवृणोद् गर्भम्'' (भाग.पुरा. १।८।१३) इति वाक्ये तथैव उक्तत्वाद् इति अर्थः. **इतरकार्य** इति, आवश्यक-भगवत्कार्यानिरूपणे इति अर्थः. **एकाग्रेण** इति. भगवता एकचित्तत्वेन रक्षा कृता इति न ज्ञापितं स्यात्. भगवत्कार्यनिरूपणानन्तरं तद्रक्षानिरूपणे तु भगवतो निर्व्यग्रत्वज्ञानात् तद्रक्षाकृतेरपि तथा ज्ञापितं भवति इति तथैव उक्तम्

१. श्रीमद्भागवतः श्रोतुरिति क-ग-ङ. २. अखिले इति लेखकृतां पाठः –सम्पा. ३. मायाचेष्टनमिति ख. ४. इतरकार्यनिरूपणे इति ग. ५. ऐहिकाग्रेणेति ख. एकाग्रेणेति ग-लेखे - सम्पा.

तच्च कार्यं चतुर्विधं— सर्वभक्तानाम् ऐहिकसर्व-फलदानपूर्वकं भक्तिदानम् ऐहिकामुष्मिकयोः एकसम्बन्धाय निर्वेदः च प्रथमं, [1]ज्ञानसन्देशपूर्वक-परमभक्ति-प्रादुर्भावेन मुक्तिः द्वितीयं, [2]सर्वभक्तचित्तसमाधानपूर्वक-स्वस्थानप्राप्तिः[3] तृतीयं, तत्रत्यानां सर्वसुखदानोपसंहारः चतुर्थम्. तत्र मुक्तिदानमेव उत्तम-तत्कार्यम्[4], ऐहिकफलदानादि[5] तत्पूर्वाङ्गम् इति निश्चित्य[6] रक्षापूर्वाङ्गेन सह एकस्मिन् अध्याये अष्टमे निरूपितम्. नवमे द्वितीयं कार्यं निरूप्यते.

नवमे स्वस्य भिन्नत्वं प्राप्तस्याभावसंशये ॥

---

प्रकाशः

एककार्यत्वं सङ्गतिः फलिष्यति. **रक्षापूर्वाङ्गेन** इति मायावरणेन.

ननु ऐहिकामुष्मिकयोः एकसम्बन्धाय पाण्डवमुक्तिरेव निरूप्या ; भीष्ममुक्ति-कथनस्य कः प्रसङ्गः इत्यतः आहुः **नवमे** इत्यादि. **स्वस्य** इति. स्वकीयस्य **भिन्नत्वं** "यः तान् द्वेष्टि स मां द्वेष्टि" (महाभा. ५।९१।२८) इति उद्योगे भगवद्वाक्यात् पाण्डवद्वेषेण अभगवदीयत्वं **प्राप्तस्य**

लेखः

इति भावः. **एकसम्बन्धाय** इति. भक्तानाम् ऐहिकमपि फलं प्राकृतवत् लौकिकसुखोपयोग्येव इति न किन्तु आमुष्मिकफलोपकार्येवेति उभयोः उपकार्योपकारकत्व-सम्बन्धज्ञापनाय तत्र अनासक्तिं बोधयितुम् "अहो मे पश्यताऽज्ञानम्" (भाग.पुरा. १।८।४८) इत्यादिना **निर्वेदश्च** प्रथमाध्याये निरूपितः इति अर्थः. द्वितीये **ज्ञानसन्देश** इति. भीष्मोक्तज्ञानेन पाण्डवानां **भक्तिः** भीष्मस्य च **मुक्तिः** इति अर्थः. भीष्मस्यैव वा ज्ञेयम्. **सर्व** इति, पाण्डवादि-**सर्वभक्त** इति अर्थः. **तत्रत्यानां** कुशस्थलीस्थानाम्. **उत्तमकार्यम्** इति, मुख्यं कार्यम् इति अर्थः. अतएव स्वातन्त्र्येण वर्णनम् इति भावः. **पूर्वाङ्गम्** इति. ऐहिकसुखभोगम् अन्तरा वासनानाम् अक्षयाद् मुक्तिपूर्वाङ्गम् इति अर्थः. **नवमे** इत्यादिकारिकार्थः श्रीपुरुषोत्तमैः व्याख्यातो ज्ञेयः ॥१॥

---

१. ज्ञानसन्देशपूर्वकं परमेति ख. २. सर्वभक्तिचित्तेति ख. ३. प्राप्तिमिति ख. ४. उत्तमकार्यमिति क-ख-ङ-लेखे - सम्पा. ५. दानादिति तत्पूर्वेति ख. ६. कश्चित् पररक्षापूर्वाङ्गेनेति क.

स्वच्छन्दमृत्योस्तच्छान्त्यै मुक्तिर्भीष्मस्य वर्ण्यते ॥(४)॥
पुरस्कृतोऽघमुत्सृज्य जह्याद् देहमितीरितः ॥
राज्ञो मोहप्रसङ्गाय निवृत्तिश्चोपदेशतः ॥(५)॥
भक्तोऽपि भगवद्द्रोहमाचरन्नरकं व्रजेत् ॥
इति दर्शयितुं भीष्मशरपञ्जर-संस्थितिः ॥(६)॥
तस्याप्युद्धारकः कृष्णो निजदत्तधिया स्तुतः ॥
इति स्तुतिस्तथाप्यस्य तादृग्रूपेण वर्ण्यते ॥(७)॥

सङ्गतिम् आह.

**॥ सूतः उवाच ॥**

**इति भीतः प्रजाद्रोहात् सर्वधर्मविवित्सया ॥**
**ततो विनशनं प्रागाद् यत्र देवव्रतोऽपतत् ॥१॥**

**इति भीतः** इति, जातेऽपि प्रजाद्रोहे "किम् अस्मत्कृतं न वा, अधर्मजनकत्वम् अस्ति न वा" इति सन्देहात् **प्रजाद्रोहस्य** भयहेतुत्वम्. अतएव सर्वज्ञस्यैव सर्वसन्देहनिवृत्तिरिति सर्वतत्त्वज्ञानार्थं ( **सर्वधर्मविवित्सया** ! ) सर्वेषां धर्माणां वेदितुम् इच्छया **ततो** हस्तिनापुराद् **विनशनं** कुरुक्षेत्रं

---

प्रकाशः

**मुक्त्यभावसंशये तच्छान्त्यै** संशयशान्त्यै **वर्ण्यते** इति अर्थः. ननु तथापि तत्र भगवद्गमनादिरूपस्य भीष्मपुरस्कारस्य कथनं कुतः इति आकाङ्क्षायाम् आहुः **पुरस्कृतः** इत्यादि. **पुरस्कृतो** भीष्मो **अघं** द्रोहरूपं भगवदपराधम् **उत्सृज्य देहं जह्याद् इति** हेतोः पुरस्कारः **ईरितः**. तथाच भक्तेन कृतेऽपि द्रोहे भगवान् तन्निवर्तनार्थं स्वयमेव प्रतिबन्धं दूरीकरोति इति ज्ञापयितुं तदुक्तिः इति भावः. प्रासङ्गिकं प्रयोजनान्तरम् आहुः **राज्ञः** इत्यादि. **राज्ञो** युधिष्ठिरस्य यो **मोहः** तस्यापि ( **प्रसङ्गाय** ! ) अनुपेक्षणीयत्वाय **उपदेशतो निवृत्तिः ( च ! )** अपि वक्तव्या. अन्यथा क्लेशे विद्यमाने "अन्ते या मतिः सा गतिः" ( लौ.न्या.साह. १६६ ) इति न्यायाद् राज्ञोऽपि मुक्तिप्रतिबन्धः स्यात्. अतः तदर्थमपि पुरस्कारोक्तिः इति अर्थः. शेषं स्फुटम्. **तथापि** इति उद्धार्यत्वेऽपि. **तादृग्रूपेण** इति आततायुद्धारकरूपेण (४-७). ॥१॥

**प्रागात्**. तत्रापि **यत्र देवव्रतो अपतत्**. देववद् व्रतं यस्य – भगवतो यथा प्रतिज्ञा – ब्रह्मचर्यादि, सोऽपि भगवतो अद्भुतचरित्रत्वाद् अपतत् ॥१॥

तदा भीष्मपुरस्कारार्थं सर्वे गताः इति आह.

**तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः ॥**
**अन्वगच्छन् रथैर्विप्रा व्यासधौम्यादयस्तथा ॥२॥**
**भगवानपि विप्रर्षे रथेन सधनञ्जयः ॥**
**स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ॥३॥**

**तदा ते** इति. ये **भ्रातरः** प्रजाद्रोहादिः कृतवन्तः **ते** इति. **सर्वे** अन्येऽपि. **विप्राः** अपि गताः ; ते वेद**व्यास**-पाण्डवकृतपुरोहित-**धौम्यादयः**. भगवानपि मुक्तिदानार्थम् अवश्यगमनेऽपि युधिष्ठिरप्रियार्थं सहैव गतः इति आह **भगवानपि** इति. **विप्रर्षे** इति सम्बोधनं भगवतो अनुवृत्तिः लीलात्वाद् न दोषाय इति ज्ञापनार्थम्. **रथेन सधनञ्जयः** इति गरुडध्वजम् आरुह्य अर्जुनेन सारथिना **अन्वगच्छद्** इति लक्ष्यते. तेषां भ्रात्रादीनां गमनेऽपि राज्ञो बहिरेव सुखं, न अन्तः[१] इति आह **स तैः** इति. **नृप**त्वात् परं **तैः** रोचनं, वस्तुतस्तु अन्तः अरोचनं ; सदृष्टान्तम् आह यथा **गुह्यकैः** सह **कुबेरः**. कुत्सितं वेरम्[२] अक्षि[३] यस्य. अनेन बहिः प्रकाशो महान्, अन्तस्तु अन्धतुल्यः. तथा अयमपि शोकग्रस्तः इति अर्थः ॥२-३॥

एवं सर्वैः सह गमनम् उपपाद्य सम्भाषणव्यतिरेकेणैव दर्शनमात्रेण[४] नमस्कारं कृतवन्तः इति आह **दृष्ट्वा** इति.

---

प्रकाशः

**भगवान्** इत्यत्र. **भगवतो अनुवृत्तिः** इति भगवत्कर्तृकानुवृत्तिः ॥३॥

लेखः

**कुवेर** इत्यत्र **कुत्सितो वेर** इति. ... ॥३॥

---

१. नाऽन्तरमित्याहेति क-घ. २. द्रष्ट. रामायण उत्तरकाण्ड सर्ग १३।श्लो. ३१ - सम्पा.

३. बेरं = वेरं = शरीरम् इति 'अक्षि' इति व्यंग्यार्थो नतु वाच्यार्थः - सम्पा. ४. दर्शनमात्रेणैवेति क-घ-ङ.

**दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरम् ॥**
**प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणा ॥४॥**

पतितस्यापि महती कान्तिः इति सदृष्टान्तम् आह. **भूमौ** तस्य स्पर्शएव अयुक्तः, किं पुनः पातः! तथा भीष्मस्य पराजयएव अशक्यः, किं पुनः एवम्भावः! तादृशोऽपि[१] देवो मनुष्याणां नमस्करणीयः. तथा भीष्मोऽपि भगवद्विरोधाचरणेऽपि नमस्करणीयः. यथा (**दिवश्च्युतम् इव अमरं!**) देवः स्वपदच्युतोऽपि अन्येषां भजनीयः, बुद्ध्यादीनां विद्यमानत्वात्, तथा **भीष्मो** अपगतदेहोऽपि ज्ञानपूर्णत्वाद् नमस्करणीयः इति अर्थः. **पाण्डवाः** इति भ्रात्रेयपुत्रत्वात् नमस्कारयोग्यता सूचिता. भीष्मोपदिश्यमान-धर्मस्य सर्वेषां ग्रहणसिद्ध्यै[२] समागतानां सर्वेषां नमनम् इति **सानुगाः** इति.

आगत्य नमनं यत्तु लोकाद् भक्तस्तथा न चेत् ॥
विपरीतत्वमापन्नः कथमेवं भवेद् इति ॥(८)॥

---

प्रकाशः

**दृष्ट्वा** इत्यत्र. **यादृशः** इति, यादृशः तादृशः इति अर्थः. **आगत्य** इत्यादि. **आगत्य यद् नमनं** तत् **तु लोकात्** लोकम् आश्रित्य, लोकसङ्ग्रहार्थम् इति अर्थः. लोकसङ्ग्रहस्वरूपम् आहुः **भक्तः तथा** नम्यः **न चेद्** यदि भक्तो न स्याद् **विपरीतत्वं** द्रोग्धृभावम्[३] **आपन्नः** प्राप्तः **कथम् एवं** नम्यो **भवेद् इति** अयं यादृश-तादृशभक्तस्य नम्यत्वबोधनरूपो लोकसङ्ग्रहः इति अर्थः ॥४॥

लेखः

**दृष्ट्वा निपतितम्** इत्यत्र. **भ्रात्रेयपुत्रत्वाद्** इति. ... . ननु भगवतः सर्वेश्वरत्वाद् भीष्मस्य च भक्तत्वात् कथं तन्नमनं भगवतो घटते इत्यतः आहुः **आगत्य नमनम्** इत्यादि. अत्र **आगत्य यद् नमनं** भगवता कृतं तत् **तु लोकात्** लोकमर्यादां पुरस्कृत्य इति अर्थः. तेन न काचित् भीष्मस्य प्रौढिः, न वा भगवतो अपकृष्टता इति भावः.

---

१. यादृशोपीति क-ग-घ-प्रकाशे - सम्पा. २. सिद्धौ इति ख.

३. दोग्धृभावम् इति मुद्रितपाठस्तु अशुद्धएव. कि.पाठे तु एवम् - सम्पा.

सर्वैः सह नमस्कारः ततो भगवता कृतः ॥

**चक्रिणा** इति पदं घातकरूपज्ञापनार्थम्[१] अद्भुतकर्मत्वाय ॥४॥

सर्वज्ञाः ऋषयो "भीष्मो गूढं तत्त्वं वक्ष्यति" इति समागताः इति आह **तत्र** इति.

**तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तमाः ॥**
**राजर्षयश्च तत्रासन् द्रष्टुं भरतपुङ्गवम् ॥५॥**

**ब्रह्मर्षयो** भृग्वादयः, **देवर्षयो** नारदादयः, **राजर्षयो** मन्वादयः —ते हि त्रिविध-धर्ममन्त्रद्रष्टारः[२]. (**सत्तमाः**!) सर्वथा देहेन्द्रियादिस्वास्थ्ये शुद्धो धर्मादिः[३] स्फुरति न अन्यथेति धर्मतत्त्वं ज्ञात्वा भीष्मे धर्मः परिनिष्ठितो न वा इति **द्रष्टुम्** आगताः. (**भरतपुङ्गवम्**!) "दौष्यन्तिः अत्यगान् मायाम्" (भाग.पुरा. ९।२०।२७) इति भरतस्य मायापगमनाद् देहदृष्ट्या धर्मं न वक्ष्यति तद्वंशोद्भवश्रेष्ठत्वात्, स्वार्थदर्शनाच्च भवति सन्देहः.

---

प्रकाशः

**तत्र** इत्यत्र. **स्वार्थदर्शनाद्** इति. काले मनःसङ्गः स्वार्थः, तद्दर्शनाद्

लेखः

अन्यथा हि बाधकत्वमेव भवेद् इति आशयेन आहुः **तथा न चेद्** इति. यदि एवं न मन्येत तदा **भक्तो** भीष्मो **विपरीतत्वं** दुष्टभावम् **आपन्नः** सन् **कथमेवं भवेत्** सकलानम्यो ज्ञानाद्युपदेशार्हो भगवत्स्तुत्याद्यर्हश्च न भवेद् इति अर्थः. श्रीपुरुषोत्तमैः व्याख्यातं यथा तथा वा ज्ञेयम्. **सर्वैः** इति. युधिष्ठिरादिप्रभृतिभिः **सहैव नमस्कारः कृतः**, **भगवता** तु पृथगेव (**ततो**!) पश्चाद् इति अर्थः, पश्चाद् निर्दिष्टत्वाद् इति भावः ॥४॥

**तत्र** इत्यत्र. **त्रिविधधर्म** इति. श्रौतः पौराणिको लौकिकश्च इति त्रिविधः. इदम् अत्रैव अग्रे स्फुटीभविष्यति. **स्वार्थदर्शनाच्च** इति. ऋषीणां ज्ञानादिप्राप्तिरूप-स्वार्थदर्शनात् सन्देहेऽपि प्रवृत्तेः इति अर्थः. **अतएव** इति, वक्ष्यमाण-राजसादि-गुणवत्त्वाद् हेतोरेव इति अर्थः ॥५॥

---

१. ज्ञानार्थमिति ग-घ. २. त्रिविधमन्त्रद्रष्टार इति ग. ३. धर्मादि इति क्लीबम् क-ख-ग.

अतएव ऋषीणां मतेषु बाधकविषयत्वम् ॥५॥

राजसादिविभेदेन एते भेदाः. तान् गणयति त्रिभिः.

सात्त्विकाः प्रथमं प्रोक्ता राजसास्तदनन्तरम् ॥(९)॥
तामसाः दोषनिर्हारात् तुल्यास्ते राजभिर्मताः ॥

**पर्वतो नारदो धौम्यो भगवान् बादरायणः ॥**
**बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥६॥**
**वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः ॥**
**कक्षीवान् गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥७॥**
**अन्ये च मुनयो ब्रह्मन् ब्रह्मरातादयोऽमलाः ॥**
**शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः ॥८॥**

**पर्वतः** इति. न देवर्षित्वमात्रं ; **भगवान्** इति उक्तम्. **रेणुकासुतः** परशुरामः, सोऽपि **सशिष्यः**. एते सप्त सात्त्विकाः देवर्षयः. **वसिष्ठादयो** दश राजसा ब्रह्मर्षयः, वस्तुतस्तु नवैव. **अथ** इति भिन्नक्रमेण[१], सुदर्शनस्य[२] अग्रे कथनात्. **सुदर्शनः अन्ये च** राजर्षिभेदाः, ब्राह्मणाअपि तत्त्वेन निर्दिष्टाः. **ब्रह्मरातः** शुकः. तेषां तामसत्वादि-दोषाभावम् आह **अमलाः** इति, बहिरेव ते तामसाः अन्तस्तु निर्गुणाः इति. तन्मध्ये ब्रह्मरातादयः श्रेष्ठाः, **कश्यपादयो** मध्यमाः. **आङ्गिरसो** बृहस्पतिः. अत्र उत्तमाधिकारे धर्मनिर्णये तदुक्तेषु तरतमभावज्ञानार्थं गणना. एवं त्रयः समागताः — पाण्डवाः भगवान् ऋषयश्च इति ॥६-८॥

---

प्रकाशः

इति अर्थः. **बाधकविषयत्वम्** इति. बाधकस्य [३]तत्तद्धर्म-मुख्यत्वसाधक-युक्त्यादेः विषयत्वम् इति अर्थः ॥५॥

**पर्वतः** इत्यत्र. **न देवर्षित्वमात्रम्** इति, अतः इति शेषः ॥६॥

लेखः

**सात्त्विकाः** इति ऋषिगणनकारिकायां **दोषनिर्हाराद्** इति. निर्गुणत्वकथनेन तेषाम् इति भावः (९ १/२).

---

१. भिन्नप्रक्रमेणेति क-घ. २. सुदर्शनाग्रे इति क.

३. तद्धर्म- इति मुद्रितपाठः कि.पाठानुरोधात् संशोधितः - सम्पा.

तत्र ऋषिषु कृतम् आह **तान् समेतान्** इति.

**तान् समेतान् महाभाग उपलभ्य वसूत्तमः ॥**
**पूजयामास धर्मज्ञो देशकालविभागवित् ॥९॥**

**महान् भागो यस्य** इति ; धर्मज्ञानादिसमूहो **भागः**. **वसूत्तमो** भीष्मः. भूमौ[१] हि वसवो मोच्यन्ते, तथा अन्ये अन्यत्र तद्गृहे. पुष्टिभक्तत्व-व्यावृत्त्यर्थम् आह **देश-कालयोः विभागः, देशकालविभागाः** वा प्राकृतत्वाद्[२] ऋषीणाम्. अनुत्तमस्यापि[३] पूर्वस्य प्रथमं पूजनम् इत्यादि. **विधानविद्** इति पाठेऽपि सएव अर्थः ॥९॥

एवं मुनीन् मनसा वचसा धर्मोपयोगित्वेन पूजयित्वा भगवन्तमपि तथैव पूजितवान् इति आह **कृष्णं च** इति.

**कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम् ॥**
**हृदिस्थं पूजयामास माययोपात्तविग्रहम् ॥१०॥**

ननु भगवन्तं कथं पूजितवान् इति आकाङ्क्षायाम् आह **तत्प्रभावज्ञः**

लेखः

**तान् समेतान्** इत्यत्र. **वसवो** इति. धान्यादीनि वसूत्तमानि **भूमौ** एव स्थाप्यन्ते, **अन्येतु** पटादयो **अन्यत्र तद्गृहे** तत्तत्स्थानेएव **मोच्यन्ते** इति अर्थः. अतएव अस्य भूशयनम् उचितमेव इति भावः. ननु स पूर्वं भगवतो न पूजयामास इति आशङ्कायां – मर्यादाप्रधान-भक्तत्वमेव अस्य, नतु पुष्टिभक्तत्वम्, अतः पूर्वं नमनं न इति आशयेन – **देशकाले**त्यादि-विशेषणार्थम् आहुः **पुष्टि** इत्यादि. ननु मर्यादाविचारेऽपि भगवतएव पूजादि पूर्वं कर्तव्यं भवति, भगवतः सर्वोत्तमत्वाद् इत्यतः आहुः **अनुत्तमस्याऽपि** इति. अपूर्वत्वात् प्रथमं पूजनम् इति अर्थः ॥९॥

**कृष्णं च** इत्यत्र. **कथं पूजितवान्** इति, सम्बन्धे भगवतो अवरत्वाद् इति भावः. भगवद्बुद्ध्या लोकदृष्ट्या वा पूजितवान् इति प्रकारप्रश्नो

१. भौमो हीति ख. २. प्रकृतत्वादिति ख. ३. अनुत्तमस्याऽप्यपूर्वस्येति क-घ-लेखे. ''लौकिकं वैदिकं वापि तथाऽऽध्यात्मिकमेव वा, आददीत यतो ज्ञानं तं पूर्वम् अभिवादयेत्'' (मनुस्मृ. २।११७) इत्येतदाशयवती पङ्क्तिरियम् इति भाति - सम्पा.

इति. पूर्वोक्तान् उत्थितानेव दर्शनमात्रेण पूजितवान्, भगवन्तन्तु **आसीनम्**. पूजायां भावनया सर्वोत्तमत्वप्रकारं ज्ञापयितुं **जगदीश्वरम्** इति उक्तम्. **हृदिस्थम्** इति अन्तर्यामिणम्. तस्य बहिर्भाने हेतुः **माययोपात्तविग्रहम्** इति, मायया शक्त्या स्वीकृतो विग्रहो येन. प्राकृतगणेन इन्द्रियादिना अहङ्कारेण च जीवानां देहग्रहणं, भगवतस्तु स्वशक्त्यैव देहनिर्माणमपि ; मायात्वाद् अन्यथा भासयति. बीजसम्बन्धित्वेन[१] पुत्रत्वादिना केचिद् बीजमेव[२] मायया गृहीतम् इति आहुः. एवं लोकानुसारेण भीष्मबुद्ध्यनुसारेण स भगवान् निरूपितः, वस्तुतस्तु यथा भगवान् तद् उत्तरत्र निरूपयिष्यते ॥१०॥

एवम् उभयोः पूजनम् उक्त्वा – प्रथमोक्तान् पाण्डवान् अपूजयित्वैव स्वोक्तार्थग्रहणसिद्धये शोकापनोदनपूर्वक-स्वदोषाभावकथनेन[३] सह भगवन्तं निरूप्य – फलं प्रार्थयते **पाण्डुपुत्रान्** इत्यादि चतुर्दशभिः.

प्रकाशः

**कृष्णं च** इत्यत्र. **कथं पूजितवान्** इति, सम्बन्धित्वेन वा ज्ञातित्वेन वा ईश्वरत्वादिना वा इति अर्थः. मायया देहग्रहणोक्तौ मायावादिवत् "काल्पनिको देहः" इति शङ्का स्यात्, तन्निवृत्त्यर्थम् आहुः **प्राकृते**त्यादि. **निरूपितः** इति सूतेन निरूपितः. **उत्तरत्र** इति दशमाध्याये कौरवेन्द्रपुरस्त्री-वाक्येषु. तस्य वास्तवत्वं तु "यस्यामतं तस्य मतम्", "अविज्ञातं विजानतां विज्ञातम् अविजानताम्" (केनोप. २।३) इत्यादिश्रुत्या ज्ञेयम् ॥१०॥

लेखः

वा ज्ञेयः. **बीजजमेव** इति, वसुदेवपुत्रत्वमेव मायया इति आहुः इति अर्थः. एतत्पक्षाङ्गीकारे वसुदेवतपो भगवद्वरदानादि सर्वम् असङ्गतं स्याद् इति **केचिद्** इत्यनेन सूचितम्. **लोकानुसारेण** इति. जगदीश्वरत्वं मायया उपात्तविग्रहत्वादिज्ञानं भीष्मस्य यदुक्तं सूतेन तत् लोकप्रसिद्ध्या, नतु एतावदेव ज्ञानं भीष्मस्य किन्तु यथा एतस्य ज्ञानं तद् भीष्मवाक्ये स्तुतौ **निरूपयिष्यते** इति अर्थः ॥१०॥

---

१. जीवसम्बन्धित्वेनेति क-ग-घ-ङ.	२. केचिद् बीजजमेवेति क-ग-घ-ङ-लेखे - सम्पा.

३. स्वशोकेति घ-ङ.

**पाण्डुपुत्रान् उपासीनान् प्रश्रयप्रेमसङ्गतान् ॥**
**अभ्याचष्टानुरागास्रैरन्धीभूतेन चक्षुषा ॥११॥**

**(पाण्डुपुत्रान्!)** भ्रातृपुत्र (? / पौत्र!) त्वेन स्नेह-शिक्षायोग्यता. **उपासीनान्** इति धर्मयुक्तान्. **प्रश्रयप्रेमसङ्गतान्** इति ज्ञानोपदेशे हेतुः ; विनीतेषु स्निग्धेषु हि ज्ञानम् उपदिश्यते. भगवद्दर्शनात् क्रूरभावे अपगते स्निग्धभावेन वदति इति आह **(अभ्याचष्ट!) अनुरागास्रैः** इति. **अन्धीभूतेन चक्षुषा** सहितो, लक्षितो वा. स्निग्धः इति स्वक्लेशेन सहितं परदुःखं[१] रोदने हेतुः. "सर्वे हि भगवता व्यामोहिताः ; एतेऽपि क्लेशं प्राप्तवन्तो, वयमपि" इति भावः ॥११॥

तेषां क्लेशम् अनुवदति द्वयेन.

**॥ भीष्मः उवाच ॥**

**अहो कष्टमहोऽन्याय्यं यद् यूयं धर्मनन्दनाः ॥**
**जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥१२॥**

**अहो कष्टम्** इति. **अहो** इति आश्चर्ये— तेषां वनवासक्लेशं स्मृत्वा निरन्वयम् एतत्प्राप्तम् इति **अहो कष्टम्!** हेलन-कचग्रहणादिकं[२] स्मृत्वा **अहो अन्याय्यम्** इति पूर्ववत्.

बीज-स्वभाव-क्षेत्राणां धर्माधर्मैस्तथा[३] पुमान् ॥(१०)॥
सुःखं दुःखं च लभते कर्ममार्गेण नान्यथा ॥

तत्र यद् भवद्भिः प्राप्तं दुःखं, क्लेशात् शारीरम् अन्यायात् मानसं, तत् कर्मजन्यं न भवति, **(यद्!)** यस्माद् **यूयं धर्मनन्दनाः**. यद्यपि युधिष्ठिरएव धर्मपुत्रः तथापि तत्प्राधान्येन स्थितेति सर्वे तत्त्वेन व्यपदिश्यन्ते. अतो बीजदोषाभावाद् दुःखं[४] न युज्यते. किञ्च **विप्रधर्माच्युताश्रयाः**. भवत्सु स्वाभाविको दोषो नास्ति. स्वभावदुष्टाः हि त्रेधा धर्मं न आश्रयन्ते.

---

प्रकाशः

**अहो कष्टम्** इत्यत्र. **निरन्वयम्** इति प्रसिद्धहेतुरहितम् ॥१२॥

---

१. पुरदुःखमिति ख. २. हेलनं कचग्रहणादिकमिति क-घ. ३. पुमांस्तथेति ग.

४. अतो दुःखमिति क.

धर्मो हि त्रिविधः — नीत्यविरुद्धः[१] स्वभावशुद्धः ईश्वरसम्बन्धी च. तत्र विप्राश्रितानां सर्वनीतिज्ञानात् नीतिविरोधाभावः. धर्मः च स्वाश्रितं शुद्धे स्थापयति. अच्युताश्रयत्वात् च ईश्वरसम्बन्धी धर्मः स्फुरति. एकैकाश्रितोऽपि न क्लेशं प्राप्नोति, किमुत त्रितयाश्रितः! त्रयाणाम् एकभावात्. धर्ममार्गे च इयं व्यवस्था ; कालमार्गेण भिन्नतया वक्ष्यति, भगवन्मार्गेण च ॥१२॥

एवं स्वभाव-बीजदोषौ परिहृत्य क्षेत्रदोषाभावाय आह **संस्थिते** इति.

**संस्थितेऽधिरथे पाण्डौ वृथा बालप्रजा वधूः ॥**
**युष्मत्कृते बहून् क्लेशान् प्राप्ता तोकवती मुहुः ॥१३॥**

**संस्थितिः** शरीरत्यागः. **अधिरथे** इति शौर्यं क्षत्रियधर्मः. **पाण्डुः** इति राजत्वम्. **बालाः प्रजा यस्याः,** अनेन रक्षकान्तराभावः सूचितः. **वधूः** इति स्वधर्मपरिपालनं सूचितम्. अतएव **युष्मत्कृते** धर्ममार्गेण भवद्रक्षार्थं[२] **बहून् क्लेशान् प्राप्तवती.** माद्रीपुत्रौ **तोकौ** यमलजातौ अतिबालकौ, पदचलनेऽपि अशक्तौ. अतएव **मुहुः**. तस्मात् सर्वथा स्वधर्मपरिपालनाद् न क्षेत्रदोषः. दृष्टन्तु अदृष्टसापेक्षम् इति अदृष्टाभावे दृष्टमपि अस्मदादिरूपं न हेतुः इति ज्ञापितम् ॥१३॥

अकारणक[३]-कार्योत्पत्त्यभावात् किं कारणम् इति आकाङ्क्षायाम् आह.

**सर्वं कालकृतं मन्ये भवतां यद्यदप्रियम् ॥**
**सपालो यद्वशे लोको वायोरिव घनावलिः ॥१४॥**

**सर्वं कालकृतम्** इति. **सर्वम्** आध्यात्मिकादि अस्मत्कृतम् अन्यकृतं

---

लेखः

**अहो कष्टम्** इत्यत्र. **इयं व्यवस्था** इति. तथाच धर्मे विचार्यमाणे दुःखप्राप्तिः न घटते इति भावः. तर्हि तत्प्राप्तौ का उपपत्तिः इत्यतः आहुः **कालमार्गेण** इति. ''सर्वं कालकृतं मन्ये'' (श्लो. १४) इत्यनेन दुःखप्राप्तिकारणं वक्ष्यति इति अर्थः. **भगवन्मार्गेण च** इति. ''एष वै भगवान् साक्षाद्'' (श्लो. १८) इत्यादिना भगवन्मार्गेण वक्ष्यति इति अर्थः ॥१२॥

---

१. नित्यविरुद्ध इति ग. २. भवदर्थमिति ख. भगवद्रक्षार्थमिति ग-घ. ३. अकारणकार्येति घ.

वा सर्वं **कालकृतं** कालकर्तृकम्. ननु निमित्तमात्रत्वं कालस्य, ज्योतिःशास्त्रे तथैव प्रतिपादनात्. ननु बहूनां हेतुत्वेन प्रतिपादनात् लोक-काल-कर्म-स्वभावेश्वराणां मध्ये कथं कालस्यैव हेतुत्वम्? तत्र आह **मन्ये** इति, मम एवं प्रतिभाति, "प्रमाणम् अन्तःकरणप्रवृत्तयः[1]" (अभि.शाकु. १।२०) इति वाक्यात्; स्वमनसि निश्चितं, यद् एतेषां कालएव दुःखहेतुः, ज्योतिःशास्त्रसंवादात् लोक-कर्मणोः निराकरणाच्च[2]. ज्ञानिनोऽपि क्लेशात् स्वभावान्तःपाति न मायादि हेतुः. ईश्वरस्य च सहवृत्त्या भक्तत्वाच्च[3] न ईश्वरकृतं दुःखम्. अतः पारिशेष्यात् कालकृतमेव मन्ये. **यद्यद्** इति प्रसिद्ध्या न एतादृशं कर्म **भवतां** जन्मान्तरेऽपि इति सूचितम्. प्रकृतोपयोगाय कालस्य सामर्थ्यम् आह **सपालः** इति. स्वाधारवश्यत्वात् लोकानां, वयसा च व्याप्तत्वात् कालाधीनत्वं[4], कालमित्या भोगाच्च. ब्रह्माण्डस्थितिरपि कालमिता. **सपालो लोकः** इन्द्रादिसहितो[5] लोकः. न केवलम् उत्पत्तौ कालवशत्वं किन्तु[6] स्थिति-कार्यकरण-नाशेऽपि[7] इति दृष्टान्तम् आह **वायोः** इति. यथा **वायोः वशे (घनावलिः!)** घनपङ्क्तिः. सर्वमासेषु समागच्छन्तोऽपि[8] मेघाः वायुनैव भवन्ति, न भवन्ति च ॥१४॥

कालकृते, पूर्वोक्त-कर्मादिनिराकरणे च तर्कम् आह.

---

प्रकाशः

**सर्वं कालकृतम्** इत्यत्र. **बहूनाम्** इत्यादि. "ईश्वरो वा भवेत् कर्ता पुरुषो वापि भारत, हठो वा विद्यते लोके कर्मजं वा फलं स्मृतम्" (महाभा. १२।३२।१२) इति राजधर्मे अन्यत्र लोकादीनां कर्तृत्वप्रतिपादनाद् इति अर्थः. **निराकरणाद्** इति. "धर्मनन्दन"पदेन (श्लो. १२) कर्मणः, "धर्माश्रय"पदेन लोकस्य च निराकरणाद् इति अर्थः. **सहवृत्त्या** इति वक्ष्यमाणया सहवृत्त्या. वश्यत्वे हेतुः **वयसा** इत्यादि. **कालमित्या** इति, कालमानेन इति अर्थः ॥१४॥

---

१. "सतां हि सन्देहपदे हि वस्तुनि प्रमाणमन्तःकरणप्रवृत्तयः" - सम्पा. २. चो नास्ति ख-घ.

३. चो नास्ति घ. ४. कालाधीनत्वमिति नास्ति घ. ५. इन्द्रादिसहिता लोका इति क-ग-ङ.

६. किन्त्विति नास्ति क. ७. कारणेति घ. ८. अपिर्नास्ति घ.

**यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥**
**कृष्णोऽस्त्री गाण्डीवं चापं सुहृत्कृष्णस्ततो विपत् ॥१५॥**

**यत्र** इति. सर्वा दृष्टसामग्री वर्तते दुःखाभावहेतुः. **धर्मः**[१] पुत्रं पालयति, सच **राजा** स्वयं पालितो अन्यान् पालयेत्! **वृको** दशविधः प्राण **उदरे यस्य,** स च बलाधिष्ठात्री देवता **गदापाणिः** ससाधनः. **कृष्णो** अर्जुनः, नाम्ना समानधर्मत्वं[२] प्राप्तः **अस्त्री गाण्डीव**धनुषा ब्रह्मास्त्रादि-प्रयोगसमर्थः. **चाप**स्य अक्षयत्वं नाम्ना सूचयति, अन्यत्तु नाशयोग्यम्. (**कृष्णः**!) भगवांश्च **सुहृद्** हितान्वेषी. एतेएव विचार्यमाणे दुःखहेतवो जाताः. तथाहि[३] — पाण्डुना पूर्वमेव पुत्रं[४] पार्श्वे स्थापयित्वा राज्यत्यागः[५] कृतः चेत्, तदा न दुःखशङ्का! भीमस्य वा महाबलत्वाभावे न दुःखं भवेत्! अर्जुनस्य वा राधावेधाद्यकरणे मात्सर्याभावाद् न दुःखं भवेत्! अग्निना वा साधनानि न दत्तानि चेद्, इन्द्रेण सह कलहाभावाद् देवद्रोहो न भवेत्! भगवता साहाय्यं न कृतं स्यात् तदा दीनदयया दुःखदातृभिः दुःखं न दत्तं स्यात्! (**ततो विपत्**!) तस्मात् सुखसाधनत्वेन ये गृहीताः तैः चेद् दुःखं, तदा कालकृतम् इत्येव निश्चयः ॥१५॥

ननु एवं सति कालस्य बलिष्ठता सूचिता, तथाच कथं भगवन्तं कालो अतिक्रामेत्[६]? तत्र आह.

**न ह्यस्य कर्हिचिद् राजन् पुमान् वेद विधित्सितम् ॥**
**यद्विजिज्ञासया युक्ता मुह्यन्ति कवयोऽपि हि ॥१६॥**

**न हि अस्य** इति. अस्य भगवतो **विधित्सितं** (**कर्हिचित् पुमान्**!)

---

लेखः

**यत्र धर्मसुतो** इत्यत्र. **राधावेधाद्यकरणे** इति. **राधा** धन्विनां लक्ष्यविशेषः. तदुक्तं विश्वे ''राधा वैशाखमासि स्याद् राधा गोप्यां च विद्युति, विष्णुक्रान्ता ... चित्रभेदे च धन्विनाम्'' (विश्वकोश । । ) इति ॥१५॥

---

१. धर्मपुत्रमिति ग. पुत्रमित्येतावन्मात्रं घ. २. समो न धर्मत्वमिति ग. ३. तथाहीति नास्ति ख. न हि इति क-ग. ४. पुत्रमुपार्ज्येति क-ख-ग. ५. राज्ये त्याग इति क-ख-ग. ६. अतिक्रमेदिति क-ख-ग.

कोऽपि **न वेद**. यद्यपि कालो भगवदाज्ञाकारित्वाद् भगवदिच्छायां सत्यां न प्रवर्तते, परं भगवदिच्छैव ज्ञातुम् अशक्या. भगवान् न सुख-दुःखहेतुः, तथा सति सर्वत्र सर्वस्य स्यात्. किन्तु भगवदिच्छा सा कार्यैकोन्नेया ; न कार्यात् पूर्वम् अवगन्तुं[१] शक्या. ननु एवं सति भगवान् कथं विश्वसनीयः ? तत्र आह **यद्विजिज्ञासया** इति. भगवान् पाण्डवेभ्यः किं दुःखं दत्तवान् निर्वेदार्थं, वा सुखं दत्तवान्, भगवत्परिपालितत्वज्ञानेन भक्तिं वा दत्तवान्, कौरवाणां वा हितं कृतवान्? इति विचारे क्रियमाणे सर्वत्र (**युक्ता**!) युक्तिसम्भवात्. अतएव **कवयोऽपि मुह्यन्ति**. अवाङ्मनोगोचरे युक्तिः न प्रवर्तते[२] इति **हि**शब्दार्थः ॥१६॥

तर्हि अतः परं कः प्रतीकारः इत्यतः आह.

**तस्मादिदं दैवतन्त्रं व्यवस्य भरतर्षभ ॥**
**तस्यानुविहितोऽनाथा नाथ पाहि प्रजाः प्रभो ॥१७॥**

**तस्माद्** इति. यस्मात् सर्वं कालाधीनं, स च कालो भगवान्, तदेव च **दैव**शब्दवाच्यं, कालातिक्रमश्च प्रकारान्तरेण न सम्भावनीयः **तस्माद्** एतद**नुविहितः** एतदाज्ञाकारी सन् **अनाथाः प्रजाः पाहि**. आज्ञाकरणेन (**भरतर्षभ**!) स्वधर्मेण च भगवान् परितुष्यति इति मर्यादा. यद्यपि विशेषतः प्रमेयबलविचारेण भगवान् केन तुष्यति इति न ज्ञायते तथापि प्रमाणबलविचारेण[३] एतद् उक्तम्. पूर्वं दुर्योधनादयो नाथाः स्थिताः, इदानीम् अनाथाः प्रजाः. अथवा त्वयि **नाथे**ऽपि (**अनाथाः**!) नाथत्वाभिमानाभावाद्

लेखः

**न ह्यस्य** इत्यत्र. **किं दुःखं दत्तवान्** इति. **निर्वेदार्थं किं दुःखं दत्तवान्** इति अर्थः. **किं सुखम्** इति, विषयोपभोगार्थम् इति शेषः. प्रकारान्तरम् अत्रैव तर्कयन्ति **भगवत्परिपालितत्व** इति. सुखदाने भगवतएव प्रयोजकत्वाद् अतः तद्द्वारा माहात्म्यस्मारणेन भक्त्युत्पादनार्थं वा सुखं दत्तवान् इति अर्थः. **हितम्** इति. परलोकबाधक-राज्याद् दूरीकृत्य मोक्षं वा दत्तवान् इति अर्थः ॥१६॥

१. पूर्वमेव गन्तुमिति घ.  २. वर्त्तत इति घ.  ३. प्रमाणवद्विचारेणैव तदुक्तमिति घ.

दयया केवलं ताः प्रजाः पालनीयाः[१], (**प्रभो!**) समर्थत्वात् ॥१७॥

ननु ''तस्यानुविहित'' (श्लो. १७) इति पूर्वपरामर्शात्, पूर्वं कालस्य निरूपितत्वाद् ''दैवतन्त्रम्'' इत्यनेन, ततोऽपि पूर्वं कृष्णस्य निरूपितत्वात् कस्य अनुविहितो भवेद् इति सन्देहे, कालस्य सर्वाधीनत्वकथनात् तदधीनत्वम्[२] अनूद्य प्रजापालनं विधीयते इति आयाति. ''न ह्यस्य'' (श्लो. १६) इति वाक्ये च पूर्वं कृष्णस्य[३] निरूपणात् कालाधीनत्वे निरूपिते तन्निवारणार्थं तद्विधित्सित-सन्देहो निरूपितः. तत्र किं कृष्णः कालाधीनो न भवति

प्रकाशः

**तस्माद्** इत्यत्र. **''दैवतन्त्रम्'' इत्यनेन कालस्य निरूपितत्वाद्** इति सम्बन्धः. **सर्वाधीन (त्व!) कथनाद्** इति. अत्र बहुव्रीहिः बोध्यः ॥१८॥

लेखः

**एष वै** इत्यस्य आभासे **ननु तस्याऽनुविहित** इत्यादि. **पूर्वं कालस्य** इति, ''सर्वं कालकृतं मन्ये'' (श्लो. १४) इत्यनेन पूर्वं कालस्य निरूपितत्वात्. **ततोऽपि पूर्वम्** इति, कालनिरूपणतोऽपि अव्यवहितपूर्वं कृष्णस्य निरूपणाद् इति अर्थः. **कालस्य सर्वाधीनत्व** इति. यद्यपि ''व्यवहिताऽव्यवहितयोः अव्यवहितं बलीयः'' इति अतिन्यायविचारेतु दैवानुविहितो भवेद् इति आयाति तथापि ''सर्वं कालकृतम्'' इत्यत्र 'सर्व'पदात् तदधीनत्वमेव युक्तम् इति आशयः. **सर्वाधीनत्व** इति, सर्वम् अधीनं यस्य इति तथा इति अर्थः. **न ह्यस्येति वाक्ये** इति. **''न ह्यस्ये''ति वाक्ये तद्विधित्सितसन्देहो निरूपितः** इति योजना. **पूर्वम्** इति. इतः पूर्वं ''सुहृत्कृष्ण'' (श्लो. १५) इति निरूपणात् तथा इति अर्थः. ननु पूर्वं कालाधीनं सर्वं निरूपितमेव, पुनः ''न ह्यस्य'' (श्लो. १६) इत्यनेन भगवदधीनत्वनिरूपणं किमर्थम् अतः आहुः **कालाधीनत्वे** इति. **तन्निवारणार्थम्** इति, भगवतः कालाधीनत्व-निवारणार्थम् इति अर्थः. एवम् उभयोः कारणत्वनिरूपणेन सिद्धं संशयत्रयम् आहुः **तत्र किम्** इत्यादिना. **किं**शब्दः त्रिष्वपि वाक्येषु सम्बध्यते ॥१८॥

१. परिपालनीया इति ग. २. तदधीनमिति ख. ३. कृष्णनिरूपणादिति क-ग-घ.

इति निरूप्यते, कालकारणत्वं वा निवार्यते, काल-कृष्णयोः वा सहभावेन[१] दुःखकारणत्वं निरूप्यते? त्रिष्वपि पक्षेषु कालात् कृष्णस्य भेदः समायाति. ततः च कालपक्षः पूर्वापरविरुद्धः इति आशङ्क्य तन्निराकरणार्थं कालएव कृष्णः, स च भगवान् इति कृष्णस्य भगवत्त्वं विस्तरेण निरूपयति.

**एष वै भगवान् साक्षाद् आद्यो नारायणः पुमान् ॥**
**मोहयन् मायया लोकं  गूढश्चरति वृष्णिषु ॥१८॥**

**एष वै भगवान्** इति. **एषः** कालरूपः कृष्णः **वै** निश्चयेन उपचाराभावेन ज्ञानद्वाराभावेन[२] च **साक्षाद् भगवान्**. ननु किम् अस्य कृष्णस्य कालरूपस्य भगवत्त्वे? तत्र आह **आद्यो नारायणः पुमान्** इति. यः **आद्यः** पुरुषोत्तमः सएव **नारायणो** ब्रह्माण्डविग्रहः ; स **पुमान्** स्वराट्. अनेन कालस्य कृष्णत्वं, कृष्णस्य भगवत्त्वं, भगवतः पुरुषोत्तमत्वं, पुरुषोत्तमस्य नारायणत्वं, नारायणस्य स्वराट्पुरुषत्वम् इति. स च स्वशरीरे भारप्रतिभाने[३] तन्निवारणार्थं समागतो (**वृष्णिषु**!) यदुषु प्रविष्टो वर्तते. (**गूढः**!) यथा आत्मानं कोऽपि न जानाति तथा **मायया** नरचेष्टाभिः **लोकं व्यामोहयन्** सर्वथा भगवत्त्वं सङ्गोप्य सर्वान् भक्षयितुं **चरति** इति अर्थः ॥१८॥

ननु कथम् अयम् एवम्? कथं वा कोऽपि न जानाति? इत्यतः आह **अस्यानुभावम्** इति द्वाभ्याम्.

**अस्यानुभावं भगवान् वेद गुह्यतमं शिवः ॥**
**देवर्षिर्नारदः साक्षाद् भगवान् कपिलो नृप ॥१९॥**

अयम्[४] एवमेव. एतस्य एवंविधस्य एवम् **अनुभावः** सर्वमारणलक्षणः[५] (**गुह्यतमः**!) सर्वगोप्यः[६]. तं (**भगवान्**!) शिवएव (**वेद**!) जानाति, यः तं स्मरन् सर्वान् भक्षयन्नपि **शिवः** कल्याणरूपो भवति. तथा[७]

---

१. सहाभावेनेति ख.  २. ध्यानद्वारेत्यादि पाठान्तरम् ख.  ३. भारप्रतिभानेनेति क.

४. अयमेव चेति घ-ङ.  ५. सर्वमारण इति घ.  ६. सर्वागोप्य इति घ.

७. तथाचेति क-ग-घ.

**देवर्षिः नारदः** सर्वत्र प्रविश्य सर्वान् मारयन् सर्वहितत्वेन प्रतिभातः. तथा **साक्षाद् भगवान् कपिलो,** यः[1] प्रकृतेरेव कारणत्वं निरूप्य पुरुषकारणत्वं निवार्य सर्वहेतुः सन् सर्वहेतुत्वं निवारयति. अतः सात्त्विकेषु राजसेषु तामसेषु गुणातीतत्वेन उक्ताः त्रयएव जानन्ति ॥१९॥

अन्ये तु बहुधा श्रुत्वापि न जानन्ति, यथा भवन्तः[2] इति आह.

**यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम् ॥**
**अकरोः सचिवं दूतं सौहृदाद् रथसारथिम् ॥२०॥**

**यं मन्यसे** इति, वसुदेवगृहे अवताराद् मातुलपुत्रं मन्यसे. किञ्च **प्रियं** प्रीतिविषयं **मन्यसे** सम्बन्धेन आत्मीयत्वेन, **मित्रम्** उपकारित्वेन, गुह्य-निरन्तरोपकारित्वेन[3] द्रौपद्यादिदानात् **सुहृत्तमं** च. सुहृत्[4] सद्भावयुक्तः कदापि अकपटः परोक्षे प्रत्यक्षे च साक्षात् परम्परया च तद्धितमेव विचारयति. न केवलं ज्ञानमात्रं किन्तु अयुक्तानि बहून्येव कृतवान्. तद् आह **अकरोः**[5] **सचिवम्. सचिवो** मन्त्री. **दूतो** हीनतया कार्यसाधकः. व्यवहारे समस्यापि हीनत्वकरणं (**सौहृदात्!**) सौहार्दात्. अतएव **रथस्य सारथिं** कृतवान्. रथस्य रक्षकः सारथिः नियतः, [6]केवलसारथ्यव्यावृत्त्यर्थः ॥२०॥

---

लेखः

**अस्याऽनुभावम्** इत्यत्र. **सर्वान् मारयन्** इति, सर्वान् जीवान् मोक्षयन् इति अर्थः. नराणां समूहो नारं जीवसमूहं, तं द्यति खण्डयति इति व्युत्पत्तेः इति भावः. एवञ्च यत्र भगवदनुभावः तत्र एवं भवति इति तत्त्वं द्योतितम्. **सर्वहेतुत्वं निवारयति** इति. पुरुषः पुष्करपलाशवत् निर्लेपः इति न्यायाद् अयं निर्णयः इति भावः. **अतः सात्त्विकेषु** इत्यादि. "स्वयम्भूर्नारदः शम्भुः कुमारः कपिलो मनुः, प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम्" (भाग.पुरा. ६।३।२०) इति षष्ठे यमवाक्ये द्वादशानां मध्ये त्रयः इमे निर्गुणाः, अग्रे नवः सगुणभेदाः इति भावः ॥१९॥

---

१. यः इति नास्ति घ. २. भवानिति घ-ङ. ३. गुह्यमिति घ-ङ.

४. सुहृद्भावयुक्त इति ग. ५. अकरोत्सचिवमिति क-ख-घ. ६. केवलमिति क-ग.

ननु अन्ये भगवन्तं मा जानन्तु, भगवांस्तु[१] आत्मानं जानन् कथं हीने कर्मणि प्रवर्तते ? तत्र आह.

**सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः ॥**
**तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥२१॥**

**सर्वात्मनः** इति, सर्वस्मिन् आत्मा यस्य. अनेन स्वार्थमेव करोति, कथं वैषम्यं स्यात्! वेदादिप्रणेतृत्वात् च (**समदृशो**!) शत्रुमित्रोदासीनेषु समबुद्धिः, अतोऽपि न वैषम्यम्. किञ्च भेददर्शने सति एवं भवति, तस्य तु सर्वत्र[२] आत्मैव भासते अतो (**अद्वयस्य**!) न विद्यते द्वैतं यस्य तादृशस्य कथं वैषम्यम्!

स्वरूपेण प्रमाणेन प्रमेयेण निराकृतम् ॥(११)॥
वैषम्यम् अवतारे तु निरहङ्क्रियया तनौ ॥

(**अनहङ्कृतेः**!) न विद्यते अहंकृतिः यस्य. **तत्कृतम्** उच्च-नीचकर्मकृतम् सर्वमेव किञ्चित् कर्तव्यम् इति करोति, नतु उत्कृष्टम् इति. ननु हीनकर्मणा कथं न (**मतिवैषम्यं**!) दोषः स्यात्? अत आह **निरवद्यस्य** इति, अपहतपाप्मनः इति अर्थः. अपहतपाप्मत्वं न देशकालावच्छिन्नम् इति आह **न क्वचिद्** इति ॥२१॥

"तस्माद् अयमेव सर्वभक्षको, अज्ञानाद्[३] उपचरितः एवं कृतवान्" इति उक्ते भयम् असेव्यता च प्रतिभाता. तन्निराकरणार्थम् आह.

**तथाप्येकान्तभक्तेषु पश्य भूपानुकम्पितम् ॥**
**यन्मेऽसूंस्त्यजतः साक्षात् कृष्णो दर्शनमागतः ॥२२॥**

**तथापि** इति. यद्यपि एवमेव **तथापि** एकः तस्मिन् असाधारणो गुणो अस्ति, यद् (**एकान्तभक्तेषु अनुकम्पितं**!) भक्तकृपा ; भजनीयत्वे हेतुः अभये कारणं च, स च अव्यभिचारी नित्यफलश्च. **भूप** इति सम्बोधनं राज्ञामपि एवं कदाचिद् भवति इति संवादार्थम्. कृपायाः अव्यभिचारित्वं स्वदृष्टान्तेन आह **यन्मे** इति. नहि मत्सदृशो अपराधी कश्चिद् अस्ति, अवहेलनकर्ता भक्तद्रोही द्विष्टपक्षपाती च. **तथापि** कदाचित्

१. भगवान् स्वात्मानमिति क-घ. २. सर्वमात्मैवेति घ. ३. प्रज्ञानादिति घ.

नामग्रहणाद् भक्त्याभासं पुरस्कृत्य (**असूंस्त्यजतः !**) प्राणत्यागसमये "भक्तो न मुक्तो भवेद् दुष्टः" इति शङ्कया (**कृष्णो आगतः !**) स्वयम् आगत्य (**साक्षाद्दर्शनम् !**) आत्मसाक्षात्कारं कारयित्वा कृतार्थं कृतवान् इति अर्थः. तस्माद् अन्ये भक्ताः कृतार्थाः भविष्यन्ति इति किं वक्तव्यम् इति भावः ॥२२॥

ननु दूरे भगवत्साक्षात्काराद् मुक्तिः इति, भगवदाविर्भाव-व्यतिरेकेणापि भगवदङ्गैः मानसरूप-नामभिः मुक्तिः भवति इति आह **भक्त्यावेश्य** इति.

**भक्त्यावेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन् ॥**
**त्यजन् कलेवरं योगी मुच्यते कामकर्मभिः ॥२३॥**

**भक्त्या** इति विहितभक्त्यधिकारिणः प्रति उक्तं, वस्तुतस्तु यथाकथञ्चिद् मनोनिवेशनमेव मुक्तिहेतुः. (**वाचा यन्नाम कीर्तयन् !**) इन्द्रियव्यापारमपि भगवन्नाम्ना कुर्वन् पूर्वं (**योगी !**) योगाभ्यासरतोऽपि इदानीं भक्तिमार्गेण (**कलेवरं त्यजन् !**) शरीरं त्यजन् काय-वाङ्-मनोभिः तामस-राजस-सात्त्विकमपि कर्म कुर्वन् पूर्वं **कामकर्मभिः**[1] कृतैः **मुच्यते**. एभिः **कर्मभिः** (**मुच्यते !**) तानि कर्माणि स्वभावं प्रापितानि मुक्तिहेतवो[2] भवन्ति इति वा[3] अर्थः ॥२३॥

एवं भजनीय-भगवद्गुणान् उक्त्वा स्वस्य मानसीमूर्ति-कल्पनाशक्तेः अन्तिमोच्छ्वासपर्यन्तं भगवत्स्थितिमेव प्रार्थयते.

**स देवदेवो भगवान् प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम् ॥**
**प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानपथश्चतुर्भुजः ॥२४॥**

**स देवदेवः** इति. अस्मत्कृपायाम् अन्योऽपि हेतुः अस्ति, न केवलम् इदानीन्तना भक्तिः, यतो **देवानां** वस्वादीनां **देवः** सर्वदा पूज्यः. किञ्च

---

लेखः

**भक्त्याऽऽवेश्य** इत्यत्र आभासे **ननु दूरे भगवत्साक्षात्कार** इति. अत्र **ननु** निश्चयार्थको ज्ञेयः ॥२३॥

---

१. कर्मभिरिति ख. कामकर्मक इति घ-ङ. २. मुक्तिहेतूनीति क-ख. ३. भवन्तीत्यर्थः इति क-घ.

स्वतः च पूर्णः **भगवान्** इति **स यावद् इदं (कलेवरं!)** शरीरं **(अहं हिनोमि!)** मया त्याज्यं तावत् **(प्रतीक्षतां!)** तिष्ठतु, नतु मध्ये शरीरं गृह्णातु मारयतु वा. **इदम्** इति जीर्णम्. **अहम्** इति सामर्थ्यम्. "ये यथा मां प्रपद्यन्ते" (भग.गीता ४।११) इति वाक्यानुसारेण मा तिष्ठतु किन्तु **प्रसन्नहासः अरुणे च लोचने** ताभ्याम् **उल्लसन् मुखाम्बुजं यस्य.** हासस्य[1] प्रसन्नत्वात् न मायामोहः. लोचनयोः अरुणत्वात्[2] मत्पापदूरीकरणम्. तयोरपि प्रसादे विशेषणे (सति!) मयि सर्वगुणनिधानं— **मुखाम्बुजस्य** तादृशत्वेन स्वपदप्राप्तिः, **ध्यानपथ**त्वेन अणिमादयः, **चतुर्भुज**त्वेन पुरुषार्थचतुष्टयसिद्धिः. एवं सर्वपुरुषार्थदानाय सर्वाभिव्यक्तिं कुर्वन् विषयान्तर-सञ्चाराभावाय (**प्रतीक्षतां!**) प्रकटः तिष्ठतु इति प्रार्थना ॥२४॥

मध्ये सावकाशं ज्ञात्वा युधिष्ठिरः स्वसन्देहं वारयितुं पृष्टवान् इति आह.

**॥ सूतः उवाच ॥**

**युधिष्ठिरस्तदाकर्ण्य शयानं शरपञ्जरे ॥**
**अपृच्छद् विविधान् धर्मान् ऋषीणाम् अनुशृण्वताम् ॥२५॥**

**युधिष्ठिरः** इति. ननु युधिष्ठिरः पूर्वोक्तं ज्ञात्वा सर्वं भगवता कृतम् इति अवगत्य स्वस्य कारणत्वाभावाद् वधादिदोषाभावं विनिश्चित्यापि कथं पृच्छति? इत्यतः आह **तदाकर्ण्य** इति **शरपञ्जरे शयानम्** इति. यदि भगवानेव करोति, किमिति भीष्मः शरपञ्जरे पतितः तिष्ठति? नहि अकृतं भोजयति भगवान्, तथा सति अतिप्रसङ्गः स्यात्! दुःखस्य च सार्वजनीनत्वाद् भगवतः सर्वकर्तृत्वस्य च श्रौतत्वात् सर्वेषामेव ऋषीणां सन्देहः, अतः तेषामपि सन्देहनिवृत्त्यर्थम् **ऋषीणाम्** एवम् **अनुशृण्वतां** पृष्टवान् इति अर्थः. धर्माणामेव नानाविधत्वात्[3] प्रबल-दुर्बलभावो[4] अस्ति राज-सेवकवद् नवा इति सन्देहादपि प्रश्नः ; तद् आह **विविधान्** इति ॥२५॥

---

१. हास्यस्येति ख.  २. अरुणात्वान्नेति घ.

३. नानाविधित्वादिति ख.  ४. प्रबलदुर्बलताभावोऽस्तीति क-ग-घ.

धर्माः त्रिविधाः — श्रौताः, पौराणिकाः, पुरुषार्थसाधनत्वेन अन्वयव्यतिरेकसिद्धाः लौकिकाश्च. तान् सर्वान् भीष्मः क्रमेण आह इति आह **पुरुषस्वभावे**ति त्रिभिः.

**पुरुषस्वभावविहितान् यथावर्णं यथाश्रमम् ॥**
**वैराग्यरागोपाधिभ्याम् आम्नातोभयलक्षणान् ॥२६॥**
**दानधर्मान् राजधर्मान् मोक्षधर्मान् विभागशः ॥**
**स्त्रीधर्मान् भगवद्धर्मान् समासव्यासयोगतः ॥२७॥**
**धर्मार्थकाममोक्षांश्च सहोपायान् यथा मुने ॥**
**नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥२८॥**

तत्र वैदिकाः त्रिविधाः — शरीराधिकारेण प्रवृत्ताः, वर्णाश्रमरूपेण[१] बाह्यधर्मेण च प्रवृत्ताः, वैराग्याद्यान्तरधर्मेण च. तत्र **पुरुषस्वभावविहिताः** स्वतन्त्राः रक्षादयः, **वर्ण**धर्माः ज्ञानादयः, **आश्रमधर्माः** अध्ययनादयः, **रागोपाधयः** पूर्वकाण्डोक्ताः, **वैराग्योपाधयः** उत्तरकाण्डोक्ताः. **दानधर्माः**[२] पौराणिकाः गोदानादयः, तुलापुरुषादयो वा[३]. **राजधर्माः** चारादिभिः हेत्वादिदर्शनादयः[४]. **मोक्षधर्माः** मौनानीहादयः, (**विभागशः**!) तेषाम् अवान्तरभेदाश्च. **स्त्रीधर्माः** पातिव्रत्यादयः. **भगवद्धर्माः** कार्तिकव्रतादयः.

समासव्यासकथनाद् बुद्धिर्भवति वै स्थिरा ॥(१२)॥

अतः सङ्क्षेप-विस्ताराभ्याम् आह **समासे**ति. पुरुषार्थचतुष्टय-साधनीभूत-धर्मान् आह **धर्मे**ति. पुरुषार्थानां स्वरूपं (**सहोपायान्**!) साधनानि प्रकाराश्च **यथा** यथावत्. **मुने**[५] इति सम्बोधनाद् न विस्तरेण उच्यते मननविघ्नत्वाद् इति. **आख्यानं** शब्दप्रधानं "तैः एवम् उक्तम्" इत्यादि. **इतिहासः** पुरावृत्तं "तैः एवं कृतम् एवं जातम्" इति पुराणार्थवादसिद्धं लौकिकं, न केवलभ्रान्तप्रतिपन्नम् इति अर्थः. सर्वेषां (**तत्त्ववित्**!) तत्त्वं जानाति इति तथा निःशङ्ककथने हेतुः. एतावता सर्वे[६] सन्देहाः निवारिताः इति

---

१. वर्णाश्रमरूपेण वा इति ख. २. दानधर्मादय इति क-ग-घ-ङ. ३. वेति नास्ति ख.
४. हेयत्वादीति ख. हेत्वादेर्दर्शनादय इति क. ५. मुनय इति ग. ६. सर्वसन्देहा इति ख.

उक्तं भवति. सगुणकर्मणा बन्धः, निर्गुणकर्मणा मोक्षः ; लोके कर्मणः[१] एव फलसाधकत्वं ज्ञातं[२] भवतु इति. यम् अधः उपरि वा निनीषति तम् असाधु साधु वा कर्म कारयति इति ईश्वरस्य सर्वकर्तृत्वं, जीवस्य दुःखाद्यनुभवश्च उक्तो[३] भवति ॥२६-२८॥

धर्मप्रवचनादिकं[४] कालविलम्बादेव, नतु अनेन पुरुषार्थसिद्धिः इति समागते काले सर्वम् उपसंहृतवान् इति आह **धर्मं प्रवदतः** इति द्वाभ्याम्.

**धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः ॥**
**यो योगिनश्छन्दमृत्योर्वाञ्छितस्तूत्तरायणः ॥२९॥**

उत्तरायणकालस्य उत्तमत्वेऽपि पूर्वकालस्य निकृष्टत्वात् तद्दोषसम्बन्धे[५] निर्दुष्टता न भवेद् इति तद्व्यावृत्त्यर्थं **धर्मं प्रवदतः** इति उक्तम्. (**यो कालः योगिनः वाञ्छितः स उत्तरायणः प्रत्युपस्थितः!**) योगिनाम् उत्तरगतेः नियतत्वात् सूर्यमण्डलमध्यस्थ-मार्गत्वाद् उत्तरायणेएव सूर्ये गन्तुं शक्यते. **छन्दमृत्योः** इति. योगजधर्मेण कालस्यापि[६] वशीकृतत्वात् स्वच्छन्दमृत्युत्वम् ॥२९॥

**तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसङ्गं(?) मन आदिपूरुषे ॥**
**कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थितेऽमीलितदृग् व्यधारयत् ॥३०॥**

तस्मिन् काले यत् कर्तव्यं तद् आह **तदा उपसंहृत्य** इति. सर्वपरित्यागेन भगवच्चिन्तनं कर्तव्यम्. तद् मौनेन, मनसः चाञ्चल्यपरिहारेण, अक्रियया च भवति. तत्र शरीरक्रियाभावः पूर्वमेव सिद्धः, वाङ्नियमनम् आह **गिर उपसंहृत्य** इति. **सहस्रणीः = सहस्रं** योधान्[७] युद्धेन वचनेन वा **नयति** स्वाधीनान् करोति इति स्वधर्मोत्कर्षः उक्तः. मनसो विनियोगम् आह **विमुक्तसङ्ग**[८] इति, विशेषेण मुक्ताः अन्तर्बहिःसङ्गाः[९] येन. **आदिपुरुषे व्यधारयद्** इति उक्ते मानस्यां प्रतिमायां व्यवधारणम् उक्तं

१. कर्मणः फलसाधकत्वादिति क. कर्मणा फलसाधकत्वमिति ग. २. ज्ञानमिति क-ग-घ.

३. उक्तं भवतीति क-ख-ग. ४. धर्मप्रतिवचनादिकमिति क-ग.

५. तद्दोषसम्बन्धेन दुष्टता भवेदिति ख. ६. कालस्य वशीकृतत्वादिति घ. ७. योद्धानिति क-ग.

८. विमुक्तेत्यादि नास्ति ख. ९. संयोगा इति ग.

भवति, तन्निराकरणाय अलौकिकप्रकारम् आह **कृष्णे पुरःस्थिते** इति. "कश्चिद्धीरः प्रत्यगात्मानमैक्षद्" (कठोप. २।१।१) इति चक्षुः अन्तर्नीत्वा तेन द्रष्टव्यं पश्यति, इह तु विपरीतं— मनः चक्षुर्द्वारा[१] बहिः आनीय तेन भगवन्तं पश्यति इति. **कृष्णः** आविर्भूतो भगवान्. बहिःस्थितत्व-ज्ञापनार्थं वस्त्रादिपरिकरम् आकारं च आह **लसत्पीतपटे चतुर्भुजे** इति. लसत्पीतता दाहोत्तीर्ण-सुवर्णरूपता[२]. देवकीप्रार्थनया यत् प्राकृतं रूपं कृतं तत्परित्यागेन सहजमेव रूपं प्रदर्शितवान् इति अर्थः. **पुरःस्थिते** इति कल्पनाक्लेशाभावः. **अमीलितदृग्** इति निमेषादिना व्यवधानं निराकृतम् ॥३०॥

**विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधव्यथः ॥**
**निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजन् जनार्दनम् ॥३१॥**

सा[३] मनसो **धारणा** सर्वावयवस्थिता अतएव **विशुद्धा,** अपहतपाप्मविषयत्वात्. तयैव (**हताशुभः!**) सर्वपापक्षयः. भगवदपराध-जनकमपि पापम्, अपराधेन जनितं, प्रतीकाराकरणेन उपेक्षाजनितं च ; तत्सर्वं शुद्धसेवकभावेन निवारितम्. भगवति[४] च शुद्धभावे भगवानपि कृपया वेदनां दूरीकृतवान् इति आह **तदीक्षया** इति. **तस्य** भगवतो (**ईक्षया!**) दोषनिवर्तकदृष्ट्यैव **गता आयुधव्यथा यस्य. निवृत्ताः सर्वेन्द्रियवृत्तिषु विभ्रमाः[५] यस्य.** अनेन अन्तर्बहिः दोषाभावः उक्तः. **जन्यं** प्राकृतसमूहम्. जनां = प्रकृतिम् अर्दयति इति **जनार्दनः,** यावत् प्रकृतिः न पीडिता स्यात् तावत् स्वकार्यं न निवर्तयेद् इति ॥३१॥

मर्यादानुसारेण अन्ते भगवति यत् कर्तव्यं तद् अत्र विनिरूप्यते. तत्र प्रथमं सर्वसमर्पणं, ततो माहात्म्यज्ञानपूर्विका भगवति रतिः, ततः आत्मसमर्पणम् इति. आद्यन्तयोः एकैकं, मध्ये माहात्म्यभक्तौ नवः (इति एकादशश्लोकाः!). तत्र प्रथमं सर्वसमर्पणं निरूपयति.

---

लेखः

भीष्मस्तुतेः एकादशश्लोकानाम् अर्थं प्रवदन्ति **तत्र प्रथमम्** इत्यादिना.

---

१. मनश्चतुर्धेति ग. २. दाहोत्तीर्णरूपतेति घ-ङ. ३. रूपं स मनस इति ग.

४. भगवति च शुद्धभावे इत्ययमंशो नास्ति ख. ५. भ्रमा इति घ.

**॥ भीष्मः उवाच ॥**

**इति मतिरुपकल्पिता वितृष्णा भगवति सात्त्वतपुङ्गवे विभूम्नि ॥**
**स्वसुखमुपगते क्वचिद् विहर्तुं प्रकृतिमुपेयुषि यद् भवप्रवाहः ॥३२॥**

इतीति. इतिशब्दः समाप्तिवाचकः. परमेश्वराद् विभक्तस्य अनन्तकोटिजन्मभिः यत्कृतं, यद् अस्ति वा, तद् विचार्यमाणे मतिरेव अस्मदीया तावद्विषयिणी "मया कृतं, मदीयम्" इति, पदार्थास्तु भगवदीयाः सर्वे. अतो अस्मदीया बुद्धिरेव भगवति समर्पणीया. तद् आह **इति मतिः** इति. अन्तिमोच्छ्वासपर्यन्तं या अस्माभिः सम्पादिता बुद्धिः सा[१] **भगवति**[२] **उपकल्पिता.** फलार्थत्वं निवारयति **वितृष्णा** इति. यद्यपि एवं मतिसमर्पणे[३] न किञ्चित् फलं शास्त्रसिद्धं तथापि "अहम् एतत् समर्पयामि, मम एतत्फलं भविष्यति" इति स्वयमेव तृष्णा[४] भवति, अतः तामेव निषेधति. **भगवति** ब्रह्मणि, **सात्त्वतपुङ्गवे** यादवश्रेष्ठत्वेन आविर्भूते, (**विभूम्नि!**) विगतो भूमा यस्माद् = अक्षरात् परस्मिन् पुरुषोत्तमे. ननु पुरुषोत्तमस्य भगवतः कथं सात्त्वतपुङ्गवत्वम्? तत्र आह **स्वसुखम् उपगते** स्वपरमानन्दं प्राप्तएव **क्वचित्** कदाचित् स्थानविशेषे "लोकवत्तु लीला कैवल्यम्" (ब्रह्मसूत्र २।१।३३) इति न्यायेन **विहर्तुं** स्वस्यैव स्वभावरूपां **प्रकृतिं** साङ्ख्यादिन्यायेन विश्वजननीं स्वयं पिता (**उपेयुषि!**) उपगच्छति[५] तादृशे. ननु तदपि कुतः? तत्र आह **यद् भवप्रवाहः**

लेखः

**एकैकम्** इति. आद्यश्लोके सर्वसमर्पणम् अन्तिमे आत्मसमर्पणम् इति अर्थः. **मध्ये** इति. तयोः मध्ये माहात्म्यभक्तिविषयकाः नवश्लोकाः इति अर्थः. ननु "सर्वपदार्थसमर्पणे मतिरेव भगवति उपयुक्ता" इत्यत्र किं तात्पर्यम्? इति आशङ्कायां सकलपदार्थाः भगवदीयाएव परं बुद्धिदोषाद् "मदीयाः" इत्यादिभानं भवति ; सा बुद्धिः समर्पिता चेत् सर्वं समर्पितमेव इति आशयेन आह **परमेश्वराद्** इत्यादि. **न किञ्चित्फलम्** इति, **वितृष्णापद**-तात्पर्यम् इदम्. **बीजाङ्कुरवद्** इत्यादि. उत्पत्तिहेतोः **अस्य**

१. सा चेति ग. २. भवतीति ख. ३. भगवतीति घ. ४. वितृष्णेति घ. ५. अपगच्छतीति ख.

इति, **यस्माद्** भगवतः प्रकृतिसम्बन्धाद् **भवस्य** विश्वस्य **प्रवाहः** बीजाङ्कुरवत् परम्परा. ''न घटत उद्भव'' (भाग.पुरा. १०।८४।३१) इत्यस्य विवरणम्. तथासृष्ट्यर्थं यथा करोति तथा अस्मन्मुक्त्यर्थमपि एवं कृतवान् इति अर्थः ॥३२॥

इदानीं रतिं प्रार्थयते.

**त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ॥**
**वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥३३॥**

**त्रिभुवनकमनम्** इति. कदाचिद् अभेदाद् अन्तर्यामिणि[१] स्वरूपे वा रतिं प्रार्थयेद् इति आशङ्क्य आह **वपुः दधाने** इति. यत्र प्राकृतानामपि प्रतीतिः ''शरीरी'' इति तादृशेएव **मम**[२] **रतिः अस्तु**. प्रमाणबलम् अनपेक्ष्य[३] केवलं प्रमेयबलेनैव मम यत् कार्यं भवति तदेव भवतु इति केवलं प्रतीत्या यद् मतं तदेव अनुवदति **वपुः दधाने** इति. विषयसौन्दर्येणैव चित्तं प्रविशतु इति रूपवर्णनम्. **त्रिभुवने** त्रैलोक्ये तदेव **कमनं** लोकदृष्ट्यैव सुन्दरं, नतु शास्त्रसंस्कारेण प्रतीत्या[४] तथाविधम्. तथा सति बुद्ध्या फलं, तद् अल्पं ; लौकिके तु वस्तुनः शक्त्या फलम्. **तमालवर्णम्** इति, तमालवद्[५] वर्णो यस्य ; औत्पत्तिको निरतिशयः सदा एकविधः

---

प्रकाशः

**इति मतिः** इत्यत्र. अभेदेऽपि शक्तिरूपत्वेन भिन्नाभिन्नतया प्रकृतिस्वरूपे विवृते तस्याः उद्भवो न आयाति, तत्संयोगाद् अन्यस्यैव तु आयाति इति आशयेन आहुः **न घटते** इत्यादि ॥३२॥

**त्रिभुवन** इत्यत्र. **स्वरूपे** इति जीवात्मरूपे. **तथा सति** इति शास्त्रसंस्कारेण सौन्दर्ये सति. **औत्पत्तिक** इत्यादि. एतेन ''श्यामाच्छबलं

लेखः

प्रकृतिरूपस्य **विवरणं** विशेषेण वरणम् अङ्गीकरणम् इति अर्थः. **एवम्** इति. पुरुषोत्तमोऽपि सात्त्वतपुङ्गवो जातः इति अर्थः ॥३२॥

---

१. अन्तर्यामिस्वरूपे वेति ग. २. मयीति ग. ३. अपेक्ष्येति ग.

४. प्रीत्येति क-ग-घ-ङ. ५. तमालवर्णो यस्येति ख.

तमालवृक्षेषु[1] नीलवर्णः. अनेन वर्णेन एतद् ज्ञापितं— सर्वथा परहितजनकम् इति. **रविकर-गौरवराम्बरम्** इति, रविकरवद् गौरं[2] वरम् अम्बरं यस्य. भगवतः सर्वमुक्त्यर्थं प्रादुर्भूतस्य पीताम्बरम् आच्छादकम् इति दुष्टत्वम् आशङ्क्य तन्निवृत्त्यर्थम् आह **रविकरे**ति. सूर्यरश्मयो घटादौ पतिताः प्रकाशयन्त्येव, नतु आच्छादकाः[3] भवन्ति. तथा पीताम्बरं परमानन्दं[4] प्रकाशयत्येव, नतु आच्छादयति. तथा वेदो[5] अर्थं प्रकाशयत्येव. **गौरम्** ईषद्रक्तपीतं, नीलो[6] वर्णो वर्णान्तरेण प्रकाश्यते इति. वेदानां प्रार्थनायाः[7] – "अस्मदावेष्टितो भगवान्[8] तिष्ठतु" इति – "अस्तु" इति उक्ते पीताम्बरत्वम् आपन्नाः भगवन्तम् आच्छाद्य तिष्ठन्ति इति वेदरूपम्[9] अम्बरम्.

प्रकाशः

प्रपद्य" (छान्दो.उप. ८।१३।१) इति श्रुत्युक्तरूपता निबन्धोक्तरीत्या स्मारिता. **अनेन** इति वृक्षसम्बन्धिना. पीताम्बरस्य मायारूपत्वे प्रकाशकत्वासम्भवाद् विशेषणबलाद् विवक्षितं स्वरूपम् आहुः **तथा वेदः** इत्यादि. सूर्यो हि त्रय्यात्मा रूपात्मना घटादीन् प्रकाशयति तथा इति अर्थः. पीताम्बरस्य वेदत्वन्तु "वासश्छन्दोमयं पीतम्" (भाग.पुरा. १२।११।११) इति द्वादशस्कन्धवाक्याद् बोध्यं स्वरूपाच्छादकत्वेन. **उक्ते** इति वरे उक्ते.

लेखः

स्वरूपैकदेशाच्छादकत्वेन पीताम्बरस्य मायात्वेऽपि भगवत्प्रकाशकत्व-साधिकां मुख्यां युक्तिम् आहुः **तथा वेदः** इति. "वासः छन्दोमयं पीतम्" इति वाक्याद् अस्य वेदरूपत्वात् तदर्थरूप-तत्प्रकाशनं युक्तमेव इति भावः. पीताम्बरस्य वरत्वं व्यवस्थापयन्ति **नीलो** इत्यादिना. अत्र वरत्वं न उत्कृष्टरूपत्वं किन्तु आशीरूपं प्रार्थनया लभ्यं लोके वरत्वेन प्रसिद्धं यत् तदेव ग्राह्यम्. तत् स्पष्टयन्ति **वेदानां प्रार्थनया** इत्यादि. निरावरणदर्शने सकलमुक्तिरेव स्यादिति स्वसेवार्थं वा वेदप्रार्थना इति भावः. **अनेन** इति, व्यापकस्य

१. तमालो वृक्षेष्विति घ. २. यद्गौरमिति क-ख-ग. ३. तदाच्छादका इति घ. ४. आनन्दमिति ख. ५. वेदार्थमिति क-ग. ६. नीलवर्ण इति ख. ७. प्रार्थना या इति मुद्रितपाठः. प्रार्थनयेति क-ग-घ-ङ-लेखे. खपाठे तु एवम् - सम्पा. ८. भवानिति क-ग-घ. ९. वररूपमिति क-ग.

अनेन व्यापकतापि उक्ता, अप्राकृतत्वं च. **रविकरैः** वा **गौरवरम्**[१] **अम्बरम्** आकाशः **वपुः** इति आकाशशरीरं ब्रह्म इति उक्तं भवति. पूर्वविशेषणद्वयम् आकाशपक्षेऽपि स्पष्टमेव. **अलककुलावृताननाब्जम्** इति. **अलकाः** चूर्णकुन्तलाः, तेषां **कुलैः आवृतम् आननाब्जं** मुखकमलं यस्य. **अलम्** अत्यर्थं **ककुलैः** आनन्दसमूहैः **आवृतम्** आसमन्ताद्[२] वेष्टितं करचरणादिरूपेण स्थितम् **आननम्** आसमन्ताद् ननं सद्रूपं **अब्जं** सूर्य-चन्द्र-नक्षत्र-लक्ष्मी-विद्युन्मेघादिरूपम्. आनन्दावयवे आकाशशरीरे ब्रह्मणि दन्त-नेत्र-भावापन्नानि सूर्यादीनि अस्य इति उक्तं भवति. वम् अमृतं पुष्णाति सर्वेभ्यः प्रयच्छति इति **वपुः** परमानन्दस्वरूपम्. **अलम्** अत्यर्थं **कं** येषां ते ब्रह्मविदः तेषां **कुलैः** वा. ते एव वा ते, तैः **आवृतम्** अग्नि-ब्राह्मणरूपम् **आननम् अब्जम्** आसनकमलं यस्य. सनकादिभिः ब्राह्मणैः देवैः

प्रकाशः

**अनेन** इति भगवदावरकत्व-कथनेन. **स्पष्टम्** इति, अवकाशदानेन प्रतीत्या च स्पष्टम् इति अर्थः. **ननम्** इति. न विद्यते नः निषेधो यस्य इति ननम्. **ते एव वा ते** इति. **ते** ब्रह्मविदएव वा ते **कुलाः** कुं संस्कृतपृथिव्यात्मकं

लेखः

भगवतोऽपि आवरकत्व-कथनेन इति अर्थः. **उक्ता** इति, पीताम्बरस्य उक्ता इति अर्थः. **अलमत्यर्थम्** इति. "अल भूषण-पर्याप्तिवारणेषु" (पाणि.धा.पा.भ्वा.प.से. ५१६) इति धातोः पचाद्यचि 'अल'शब्दः सिद्ध्यति. एवञ्च **अत्यलम्** 'अल'शब्दस्वरूपम् अत्यर्थकम् इति अर्थः. **ककुलैरानन्दसमूहैः** इति. कम् आनन्दवाचकम् इति भावः. **ननं सद्रूपम्** इति. न विद्यते न निषेधो यस्य इति व्युत्पत्त्या सद्रूपम् इति अर्थः. तथाच **अलम्** अतिशयेन **ककुलैः** आनन्दसमूहैः **आवृतं आसमन्ताद् ननं** सद्रूपम् **अब्जं यस्य** इति विग्रहः इति ज्ञेयम्. अत्र अब्जस्य केवलयौगिकार्थमेव ग्रहीतुं सूर्यादयः उच्यन्ते इति आशयेन आहुः **सूर्य** इत्यादि. **अग्निब्राह्मणरूपम्** इति. "मुखमग्निरिद्धः" (भाग.पुरा. २।१।२९)

१. गौरवमम्बरमिति ख. २. समन्ताद्वेष्टितकरचरणादिरूपेणेति घ.

ज्ञानादिभिश्च पत्रेषु स्थितैः आवृतं कर्णिकारूपम् आसनम् इति उक्तं भवति. **अब्ज**पदेन च सूर्यादिवेष्टनसहितत्वं लक्ष्यते. एतादृशं **वपुः दधाने.** तादृशोऽपि भक्तवत्सल इति **विजयसखे,** सख्यपर्यन्तं दत्तवान् इति. **विजयो** अर्जुनः, विशिष्टो जयो येषाम्, अन्तःकरणादि-जेतारः ; ते सखायो यस्य, तेषां वा सखा. तत्र **रतिः** प्रीतिः **अनवद्या** अलौकिकी. परमा प्रीतिः अलौकिकी सर्वदुर्लभा भगवदेकनिष्ठा [1]तत्त्वेएव भवति इति न उत्तरत्र विरोधः. एवं सत्त्वमिश्र-सत्त्वावस्था उक्ता ॥३३॥

प्रकाशः

शरीरं लान्ति गृह्णन्ति इति अर्थः. **अग्निब्राह्मणरूपम्** इति, अग्निरूपं ब्राह्मणरूपञ्च इति अर्थः. अग्नेः आसनत्वं च "रविमध्ये स्थितः सोमः सोममध्ये हुताशनः, वह्निमध्ये स्थितं सत्त्वं सत्त्वस्यान्तः स्थितोऽच्युतः" (मैत्राय.उप. ६।३८) इति मैत्रायणीयश्रुतौ, "वह्निमध्ये स्मरेद् रूपं ममैतद्ध्यानमङ्गलम्" (भाग.पुरा. ११।१४।३७) इति एकादशस्कन्धे सिद्धम्. ननु अनवद्य-रतिप्रार्थनस्य उत्तमाधिकारे सम्भवात् तथात्वे "मम निशित" (श्लो. ३४) इत्याद्युत्तरग्रन्थविरोधः इत्यतः आहुः **भगवदि**त्यादि. **तत्त्वे** इति अन्तःकरणादिजेतृत्वे. तथाच तदानीं तदभावाद् न विरोधः इति अर्थः. ननु तदानीं तदभावे इदानीं कथम् ईदृशो भावः इत्यतः आहुः **एवम्** इत्यादि. तथाच भगवदवस्थाभेदादेव एवं भावः इति अर्थः. एतस्याः सात्त्विक-सात्विकीत्वन्तु सर्वकमनीयतया सुखजनकत्वेन प्रकाशकत्वेन च सत्त्वकार्यकारणाद् ज्ञेयम् ॥३३॥

लेखः

इति अग्नेः मुखत्वम्. "ब्राह्मणोऽस्य मुखमासीद्" (ऋक्संहि. १०।९०।१२) इति मुखस्य तथात्वम्. अनयोः भगवदासनत्वम् एकादशे "भद्रपूजापदानि मे" (भाग.पुरा. ११।११।४२) इति वाक्येन ज्ञेयम्. तयोः आसनत्वेऽपि कमलाकारत्वं कथम् अतः आहुः **सनकादिभिः** इत्यादि. **भगवदेकनिष्ठा** इति. भगवत्त्वे ज्ञातएव भगवदेकनिष्ठता भवतीति सर्वावस्थासु

१. 'आत्मनो भगवत्त्वे इति अर्थः' इति भा.पाठीया पादटिप्पणी - सम्पा.

रजोमिश्ररजो अवस्थाम् आह **युधि** इति.

**युधि तुरगरजोविधूम्रविष्वक् - कचलुलितश्रमवार्यलङ्कृतास्ये ॥**
**मम निशितशरैर्विभिद्यमानत्वचि विलसत् कवचेऽस्तु कृष्ण आत्मा ॥३४॥**

सर्वावस्थासु रतिः प्रार्थ्यते. **युधि** युद्धे **तुरगाणाम्** अश्वानां खुराग्रविक्षत-**रजोभिः विशेषेण धूम्राः** धूसरवर्णाः **विष्वक्** परितो ये **कचाः** तैः **लुलितं** यत् **श्रमवारि** तेन **अलङ्कृतम् आस्यं यस्य.** नीले मुखाब्जे मुक्ताफलसदृशाः बिन्दवः शोभातिशयं कुर्वन्ति! **मम** भीष्मस्य. **त्वक्** चर्मादि, युद्धविशेषणं वा. राजस-राजसावस्थायाः शोभैव सा. अथवा (**युधि!**) युद्धार्थम् इन्द्रियादिभिः सह **तुरगाणां** वेदानां सूर्यादीनां वा यद् **रजः** कामो रजोगुणो वा, तेन[१] **विधूम्राः** विशेषेण धूसराः ये सकामाः – कालवशाद् वा[२] वेदवशाद् वा सकामाः ; कालपरिच्छेदकाः हि अग्न्यादयः, "अग्निर्वा अर्वा" (तैत्ति.ब्रा. १।३।६।४) इत्यादिश्रुतिभिः

प्रकाशः

**युधि** इत्यत्र. भक्तश्रवण-कटुकत्वाद् दूरान्वयेन प्रकारान्तरम् आहुः **युद्धे**त्यादि. ननु रजोधूसरत्वादिकं शोभाजनकत्वाभावात् न रतिजनकम् इति कुतः तद्वर्णनम् अत्र इति आकाङ्क्षायाम् आहुः **राजसे**त्यादि. परोक्षवादेन कालरूपत्वबोधनाय च पक्षान्तरम् आहुः **अथवा** इत्यादि. सूर्यादीनां तुरगत्वे मानम् आहुः **अग्निः** इत्यादि. श्रुतिस्तु "अग्निर्वा अर्वा वायुः सप्तिः आदित्यो वाजी एताभिरेवास्मै देवताभिर्देवरथं युनक्ति" इति ब्राह्मणप्रथमकाण्डीय-

लेखः

भगवतो रतेः युक्तत्वाद् युद्धादौ राजस-राजस्यावस्थायामपि भगवद्ध्यानं तादृशं युक्तमेव इति "मम निशितशरैः" (श्लो. ३४) इत्याद्युक्तिः न बाधिका इति अर्थः ॥३३॥

**युधि** इत्यत्र. **त्वक् चर्मादि** इति. विभिद्यमानयोद्धॄणां त्वचोपेत-युद्धकर्मणि त्वग्विभेदेन विलसन्ति कवचानि यत्र इति वा इति अर्थः. ननु तेषां स्तुतिः का इत्यतः आहुः **राजस** इत्यादि.

१. तेनेति नास्ति ख.　२. वेत्यव्ययं नास्ति ग.

तेषां तुरगत्वं, वेदानां च त्रिपुरदाहादौ – ते च ते **विष्वक्काः** च ब्रह्मविदः सूर्यादिमार्गगामिनो भिन्ना वा तदा तेषां **च**[१] समुच्चयः इतरेतरयोगो वा, तेन **लुलिताः** मिलिताः ऐक्यभावं वा प्राप्ताः, ते च ते **श्रमवार्यलङ्कृताः** च गङ्गाजलपूताः ब्रह्म-शिवादयः, तेऽपि (**आस्ये!**) आनने यस्य इति, आसमन्तात् सद्रूपे वा. अनेन महासामर्थ्यं सूचितं, कालरूपत्वं च. किञ्च **मम** अहङ्कारविशेषः तेन या **निश्** निशा ताम् **इताः** अहङ्कारेण

प्रकाशः

तृतीयप्रपाठक-षष्ठानुवाके वाजपेयप्रकरणे अस्ति. **ते च ते** इत्यादि. "यदि प्रयास्यन्" (भाग.पुरा. २।२।२२) इत्यादिना उक्ताः क्रममुक्त्यधिकारिणः इति अर्थः. **भिन्ना वा** इति, सकामाः ब्रह्मविदश्च इति अर्थः. **च समुच्चय** इति. चः अत्र न निपातरूपः, समुच्चये अव्ययत्वस्य वैकल्पिकत्वात्. "चश्चन्द्रदस्युशोभासु पुंसि पक्षे समुच्चये, अथार्थे वाक्यविस्तारे प्रसङ्गे पादपूरणे, अन्योन्यार्थे समाहारे मर्यादायामनुक्रमे, पुनरर्थेऽव्ययं पक्षाद् उत्तरेषु व्यवस्थितः" (एकाक्षरकोश ) इति एकाक्षरकोशे तथा उक्तत्वात्. इतरयोगार्थत्वपक्षे यद्यपि अव्ययत्वं कोशे उक्तं तथापि " 'तु'ना", " 'अपि'ना" इत्यादिवद् अत्र नामत्वमेव 'च'स्य विवक्षणीयम्. **आनने यस्य** इति, भक्ष्यभूता यस्य इति अर्थः. **सद्रूपे** इति. अस्मिन् पक्षे बाहुलकात् तकारस्य यकारः, अकारात् पूर्वभावश्च बोध्यः. **महासामर्थ्यम्** इति. "यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतं, महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति" (कठोप. २।३।२) इति कम्पनाधिकरण-विषयवाक्य-

लेखः

**त्रिपुरदाह** इति. "वेदान् कृत्वा स तुरगांश्चतुरश्वो महेश्वरः" (महाभा. द्रोणपर्व. । । ) इति द्रोणपर्वणि तत्त्वरूपम् आयातम्. **विष्वक्काश्च** इति. विश्वक् कं सुखं येषां ते विश्वक्काः ब्रह्मविदः इति अर्थः. **तदा तेषाम्** इति. ... . **तेऽपि आनने यस्य** इति. तेन सकामाः प्रवृत्तिनिष्ठाः ज्ञानिनो ब्रह्मादयश्च यन्मुखे सन्ति इति कोऽहं वराकः इति

१. चः समुच्चये इति क.

अज्ञानं प्राप्ताः इति यावत्, ते च ते **शराः** च परभेदकाः, तैः **विशेषेण भिद्यमानाः त्वचः** छन्दांसि यस्य इति. यस्माद् वा, पाषण्डप्रवृत्तौ कलौ वा सञ्जाते गत्यन्तराभावात्[१]. भगवतः च तद्दोषाभावे[२] हेतुः **विशेषेण लसत् कवचं** धर्मादिरूपं[३] यस्य. एतादृशे **कृष्णे आत्मा** अन्तःकरणम् अस्तु. भक्तिः हि अन्तःकरणसाध्या आत्मसाध्या वा ; तद् उभयं भगवति चेत् तदा भक्तिः तत्र भवति. अतः पूर्वश्लोकार्थे अयं हेतुः ॥३४॥

तृतीयावस्थाम् आह **सपदि** इति.

**सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ॥**
**स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥३५॥**

**सपदि** तत्क्षणमेव. **सखिवचो** अर्जुनस्य वचः "सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत" (भग.गीता १।२१) इति. **निज-परयोः** सेनयोः **मध्ये.** पक्षपातो, अन्यार्थे अन्यघातनं च तृतीयो गुणः[४]. **परसैनिकानाम् आयुश्च अक्ष्णा** कालदृष्ट्या. (**पार्थसखे!**) पृथायाः पुत्रस्य च सखा. पूर्ववद् **रतिः**[५] **अस्तु** ॥३५॥

सत्त्वमिश्ररजोवस्थाम् आह **व्यवहितेति.**

**व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद् विमुखस्य दोषबुद्ध्या ॥**
**कुमतिमहरद् आत्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥३६॥**

---

प्रकाशः

श्रावितं तद् इति अर्थः. **पूर्वश्लोकार्थे** इति अनवद्यभक्तिप्राप्तिरूपे ॥३४॥

**सपदि** इत्यत्र. **तृतीयो गुणः** इति तमोगुणः. **पूर्ववद्** इति, तादृशत्वेऽपि भक्तवत्सलः इति अर्थः ॥३५॥

लेखः

माहात्म्यम् इति अर्थः. **त्वचः छन्दांसि** इति. ... . तेन ये अहंकारिणः ते वेदवेदान्तवेद्यं भगवन्तं न जानन्ति इति भावः ॥३४॥

---

१. मत्यन्तराभावादिति ख. २. दोषाभावे इति घ. ३. धर्मादित्रयमिति घ.

४. गुणा इति ख. ५. मतिः इति मुद्रितपाठः अशुद्धः - सम्पा.

**व्यवहिते** दूरे स्थिते ये **पृतने**. विशेषेण अवहिताः यत्र[१] इति वा. अव इति वा निषेधार्थः ; अहिताः[२] इति यावत्. विहिताः अवहिताश्च इति वा. **मुखम्** अग्रिमभागः, तत्र बान्धवाएव तिष्ठन्ति. तद्वधव्यतिरेकेण न[३] साधारणवधोऽपि सम्भवति, अतः स्वजनवधम् अकृत्वा निवृत्तः, परहिंसादोष इति. नापितेन क्षौरवद् अत्र समाधानं— भारायमाणाः क्षत्रियाः श्मश्र्वादिरूपाः, अर्जुनः च नापितरूपः. **आत्मविद्या** स्वस्य विद्या, ममैव[४] क्रियेति मम च हितम्. तेषामपि (**कुमतिम् अहरद्!**) जडांशएव दूरीक्रियते मुक्तिदानार्थम् इति, तस्माद् एवंविधे न दोषः. अतएव गुरुत्वात् **चरणरतिं** प्रार्थयते. परो मीयते अनेन इति **परमः**. **तस्य** इति. सएव परः, तदवस्थां प्राप्तस्य इति वा ॥३६॥

प्रकाशः

**व्यवहिते**त्यत्र. **विहिता** इति विशेषेण हिताः. आत्मविद्यास्वरूपम् आहुः **ममैव क्रिये**त्यादि. ''मत्तः सर्वं प्रवर्तते'' (भग.गीता १०।८), ''यदा यदा हि धर्मस्य'' (भग.गीता ४।७), ''वासांसि जीर्णानि'' (भग.गीता २।२२) इत्यादिवाक्यानि अत्र उदाहरणत्वेन बोध्यानि. अस्य परमत्वे परः को वा इत्यतः आहुः **सएव परः** इत्यादि. तथाच परत्वेऽपि परमत्वं प्राप्तस्य इति अर्थः. अत्रापि ''मत्तः परतरं नान्यद्'' (भग.गीता ७।७), ''मत्तः स्मृतिर्ज्ञानमपोहनं च'' (भग.गीता १५।१५) इत्यादि द्रष्टव्यम्. एवं रूपभेदइव आयातीति अरुच्या पक्षान्तरम् आहुः **तदवस्थां प्राप्तस्य**

लेखः

**व्यवहित** इत्यत्र. **अवहिताः यत्र** इति, विशेषेण अवहिताः युद्धादौ सावधानाः पुरुषाः यत्र इति अर्थः. अव इत्यस्य अर्थान्तरम् आहुः **अवेति वा** इति. तथाच विशेषेण अहिताः यत्र इति अर्थः. उपसर्गद्वयस्यापि पृथक्-साक्षात्क्रियासम्बन्धेन पक्षान्तरम् आहुः **विहिताः अवहिताश्च** इति ॥३६॥

१. अत्रेति वेति घ-ङ. २. अवहिता इति ङ. ३. नेति नास्ति ग.

४. मयैव क्रियते इति मुद्रितपाठः. क-ख-प्रकाशे तु एवम् - सम्पा.

तमोमिश्ररजोवस्थाम् आह.

**स्वनिगममपहाय मत्प्रतिज्ञाम् ऋतमधिकर्तुमवप्लुतो रथस्थः ।।**
**धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ।।३७।।**

**स्वनिगमम् अपहाय** इति. **स्वस्य निगमः** प्रतिज्ञा शस्त्रसंन्यासः. दन्तवक्त्रे सभ्रातरि हते भगवता[१] शस्त्रसंन्यासः कृतः. तत्पुनः तृतीयदिनयुद्धे नवमे च भीष्मवधार्थं (**धृतरथचरणः!**) चक्रं गृहीतम्! युद्धागमनसमये[२] च प्रतिज्ञा कृता "अयुध्यमानो अहम् एकतः" इति. मया च प्रतिज्ञातं "सर्वथा शस्त्रं ग्राहयिष्यामि" इति. तत्र **मत्प्रतिज्ञाम् ऋतं कर्तुं रथस्थ**एव सन् **अवप्लुतः** अधिका च प्रतिज्ञा कृता[३]. शस्त्रमेव गृहीतं, नतु मारितवान् इति अर्थः. रथस्यैव चक्रे सुदर्शनस्य[४] आवेशः. भगवतः प्रतिज्ञात्यागे भूमेः कम्पो जातः, तद् आह **चलद्गुः** इति. **चलन्ती गौः** भूमिः यस्य. दृष्टान्तेन दोषाभावम् आह यथा **हरिः** सिंहः **इभम् इव,** "यस्य

प्रकाशः

इति. आत्मविद्योपदेशेन युद्धकारणेन च अस्याः अवस्थायाः सात्त्विक-राजसत्वं ज्ञेयम् ।।३६।।

**स्वनिगमेत्यत्र. अधिका च** इत्यादि. "अहं भक्तपराधीनः" (भाग.पुरा. ९।४।६३) इत्येवम् अधिका कृता इति अर्थः. **रथस्यैव चक्रे** इति. तेन भारते क्षुरान्त-तीक्ष्णाग्रत्व-कथनमपि सुदर्शनावेशाद् इति बोधितम्. **दोषाभावम्** इति प्रतिज्ञात्यागेऽपि दोषाभावम्. भक्षणाय प्रवृत्तत्वेन

लेखः

**स्वनिगम** इत्यत्र. **दन्तवक्त्रे** इति. अयं शस्त्रसंन्यासः पुराणान्तरे निरूपितः. श्रीमद्भागवतेऽपि "एवं योगेश्वरः कृष्णः" (भाग.पुरा. १०।७५।१६) इति उपसंहारात् सूचितो ज्ञेयः. ... . **अधिका च** इति. यथा मया प्रतिज्ञातं तदन्यूनानतिरिक्तं न मम प्रतिकृतम् इति अर्थः. तत्स्वरूपम् आहुः **शस्त्रमेव** इत्यादि. यदि भीष्मो मारितः स्यात् तदा तत्प्रतिज्ञा

१. भगवतः इति ख. २. युद्धागमनसमयञ्चेति ख.
३. प्रतिज्ञां कृत्वेति ग. ४. सुदर्शनावेश इति घ.

ब्रह्म च क्षत्रं च उभे भवत ओदनः[१]'' (कठोप. १।२।२५) इति श्रुतेः. सायुज्यदानार्थं भीष्मम् अन्तःप्रवेशयितुं भगवान् प्रवृत्तः, तावता (**गतोत्तरीयः!**) उत्तरीयं पतितम् उपरि आच्छादनार्थम्[२], (तेन!) अर्जुनो रक्षितः. स भूमौ आगत्य पतितः, ततो[३] वधो न जातः इति. उत्तरीयाभावे

श्रीगोकुलनाथानां टिप्पणी

**स्वनिगमम्** इत्यत्र. **उपर्याच्छादनार्थम्** इति. इदम् **अर्थः** प्रयोजनं यस्य स भगवान् इति अर्थः ॥३७॥

प्रकाशः

फलावधारणवत् मारणार्थत्वाभावाद् इति. **उपरि आच्छादनार्थम्** इति. भारते ''व्यालम्बिपीतान्तपटः'' (महाभा. ६।५९।९९) इति विशेषणेन उत्तरीयस्य पीतान्तत्वकथनाद् रविकरगौरवत्त्वाभावेन न वेदरूपता इति मायारूपत्वात् तदर्थम् इति अर्थः. आच्छादनस्वरूपम् आहुः **अर्जुनो रक्षितः** इति. मुक्त्यर्थताम् आच्छाद्य अर्जुनरक्षार्थता प्रकटीकृता इति अर्थः. द्वितीयम्

लेखः

न सर्वात्मना सिद्ध्येत्. भीष्मेण शस्त्रग्रहणमेव प्रतिज्ञातं, नतु मारणमपि इति तथा इति भावः. ननु तृतीयदिनयुद्धे साक्षाद् उत्तरीयपातस्य भारते अनुक्तत्वाद् अत्र तदुक्तिः कथम् इत्यतः तं परोक्षवादेन प्रकारान्तरेण व्याकुर्वन्ति **उपरि** इत्यादि. अत्र इदं प्रतिभाति— उत्तरीयं हि स्वशरीरे भवति, गोपनीयपदार्थान्तरस्य च आच्छादकं भवति. एवम् अर्जुनोऽपि रथित्वात् सारथिभावापन्नस्य भगवतः आच्छादकं भवति, सारथिरक्षायाः रथिक्रियाधीनत्वात्. तथाच ''केचिद्विलग्नाः दशनान्तरेषु'' (भग.गीता ११।२७) इति न्यायेन भगवतैव मारिताः सन्ति सर्वे. तच्च लोके प्रकटं मा भूद् इति अर्जुनद्वारा सर्वं कारितवान्. अतएव ''पार्थव्याजाह्वय-'' (भाग.पुरा. २।७।३५) इति वाक्यम्. एवञ्च भगवता यद् गोपनीयत्वेन अभिप्रेतः क्षत्रादिवधः तस्यापि आच्छादको भवति अर्जुनः. **स च भूमौ**

१. ओदनमितीति क-ग-घ. २. उपर्याच्छादनार्थं उत्तरीयं पतितम् इति अन्वयो भाति - सम्पा.

३. अत इति क-ग-घ.

च भोजनं निषिद्धम् . तदा हि भीष्मो अहङ्कारयुक्तः अतः तस्य ज्ञानस्फूर्त्यभावात् तदा न मारितः इति भावः. अत्र रतिप्रार्थनाभावो भगवतएव रतिकार्यकर्तृत्वात् ॥३७॥

रजोमिश्रतमोवस्थाम् आह.

**शितविशिखहतो विशीर्णदंशक्षतजपरिप्लुत आततायिनो मे ॥**
**प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुन्दः ॥३८॥**

**शितेति.** नवमदिनस्य इदं रूपं, पूर्वश्लोके तु तृतीयदिनस्य इति न पुनरुक्तिः. **शिताः** तीक्ष्णाः **विगतशिखाः** पाषण्डिनो **हताः**[१] येन. **विशीर्णदंशक्षतजपरिप्लुतः**[२] विशीर्णा दंशा यस्मिन् काले वर्षाव्यतिरिक्तकाले

प्रकाशः

आहुः **स** इत्यादि. **स** इति उत्तरीयपटः. **रतिकार्यकर्तृत्वाद्** इति मुक्तिदानकर्तृत्वात् . अत्र स्वप्रतिज्ञात्यागः तामसो, अभियानं राजसम् इति तामस-राजसत्वम् अवस्थायाः ज्ञेयम् ॥३७॥

**शितेत्यत्र.** अत्र **आततायिनो मे** इति सम्बन्धषष्ठी, तेन मत्सम्बन्धी सन् मद्वधार्थम् अभिससार इति अर्थो भवति. तथा सति शितविशिख-हतत्वादिकं राजसं, वधार्थम् अभिसरणम् (तामसम्!) इति अवस्थायाः राजस-तामसत्वम् ॥३८॥

लेखः

**आगत्य पतितः** भगवच्चरणनिकटे पतितः. तद् उक्तं ''पार्थस्तु विष्टभ्य बलेन पादौ भीष्मान्तिकं तूर्णमभिद्रवन्तम्'' (महाभा. ६।५९।१०१) इति तृतीयदिनयुद्धे. एवञ्च स चरणाग्रे पतितो यतः **ततः तद्वधो न जातः,** अन्यथा अर्जुनस्य आच्छादकत्वं व्यपगच्छेद् इति भावः. सूचितार्थम् आहुः **उत्तरीयाभावे** इति ॥३७॥

**शितविशिख** इत्यत्र. **विगतशिखाः** इति, लुंचितकेशाः इति अर्थः. **विशीर्णाः** इति. ''दंशस्तु वनमक्षिका'' (अमरको. २।५।२६) इति कोशात् दंशाः वनमक्षिकाः, ते विशीर्णाः विरलाः, स्वल्पाः इति यावत्,

१. हता इति नास्ति क-ग-घ-ङ. २. विशीर्णदंशः क्षतजपरिप्लुत इति क-ख-ग.

मासाष्टकं तत्र क्षता[1] जाता येषां ते क्षतजाः परिव्राजिनः क्षत्रियोत्तमा वा तैः परितो व्याप्तः. अधर्मनिवारको धर्मरक्षकः इति उक्तं भवति. अतएव **आततायिनं** पापिष्ठं ( **मद्वधार्थं!** ) मां हन्तुं **प्रसभम् अभिससार.** अयुद्ध्यमानयुद्धात् पापिनमपि यो मोचयितुं प्रवृत्तः **स भवतु मे भगवान् गतिः** प्राप्यः. नहि स मां मारयितुं प्रवृत्तः किन्तु मुक्तिदानार्थम् इति आह **मुकुन्दः** इति ॥३८॥

सत्त्वमिश्रतमोवस्थाम् आह.

**विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ॥**
**भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपम् ॥३९॥**

**विजयरथकुटुम्ब** इति. अर्जुनस्य रथः सर्वथा परिपाल्यः, अतएव तस्य रथः कुटुम्बं यस्य. विविधो जयो, विगतो वा जयो यस्य इति **विजयः** अर्जुनः. जयद्रथवधे हि युद्धे अशक्य ( ? / क्त! ) इव जातः. तदा स्वयं ( **आत्ततोत्रे धृतहयरश्मिनि!** ) तोत्रं गृहीत्वा अश्वानां[2] रश्मींश्च गृहीत्वा उत्थितः सन्, कर्णादीनाम् अस्त्राणि रथचालनेनैव दूरीकुर्वन् ( **तद्!** ) तदानीन्तनश्रिया **ईक्षणीयः** अतिसुन्दरः. तादृशे **मुमूर्षोरेव रतिः**[3] **अस्तु,**

प्रकाशः

**विजयेत्यत्र.** ईक्षणीयतया सुखजननं सात्त्विकं, हतानां स्वरूपप्रापकत्वं तामसम् इति अवस्थायाः तथात्वम् ॥३९॥

लेखः

यस्मिन् काले. स च कालो वर्षातिरिक्त-मासाष्टकात्मकः, चातुर्मास्ये दंशानां बाहुल्यात्. तथाच **विशीर्णदंश**पदेन चातुर्मास्यातिरिक्त-कालः उक्तो भवति. तस्मिन् अवर्षाकाले क्षताः = व्रणादयो जाताः येषां ते परिव्राजकाः क्षत्रियोत्तमाश्च. तत्र परिव्राजकानां मासाष्टकं यात्रास्मरणात् तेन क्षतादि जायते. क्षत्रियाणामपि चातुर्मास्ये युद्धनिषेधात् तत्रैव काले क्षतादि इति भावः. तन्निषेधस्तु ... ॥३८॥

॥ इति श्रीप्रथमस्कन्धे सुबोधिन्यां लेखे नवमोऽध्यायः समाप्तः ॥

१. क्षताज्जाता इति ख. २. अश्वानाञ्चेति क-ख. ३. मतिरस्त्विति ख-ग-घ-ङ.

नतु[१] पूर्ववद् मरणानन्तरम्. रतेः कैमुतिकन्यायेन फलम् आह **यम् इह निरीक्ष्य** इति. **इह** अस्मिन् अवसरे अन्तकाले **यं (स्वरूपं निरीक्ष्य गताः!)** दृष्ट्वैव मुक्ताः तत्र अन्तकाले स्नेहे सति किं वक्तव्यम् इति अर्थः ॥३९॥

तमोमिश्रसत्त्वावस्थाम् आह.

**ललितगतिविलासवल्गुहास - प्रणयनिरीक्षणकल्पितोरुमानाः ॥**
**कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्य गोपवध्वः ॥४०॥**

**ललितेति. ललिता** या **गतिः** तत्र यो **विलासः** हंस-गज-गतिवत् पादचलनं[२], (**वल्गुः!**) मनोहरः च **हासः**, (**प्रणयः!**) स्नेहपूर्वकञ्च **निरीक्षणं** — तमो-रजः-सत्त्वभाव-कार्याणि. तैः **कल्पितः उरुः**[३] अधिको, भगवन्माहात्म्यमपि[४] अविचार्य प्रवृत्तो, **मानो** यासाम्. किञ्च न केवलम् अन्तःस्थितएव दोषः किन्तु त्रिदोषकार्यमपि बहिः[५] कुर्वन्ति इति आह **कृतम् अनुकृतवत्यः** इति. **कृतं** भगवच्चरित्रं पूतनापयःपानादि, तद् अनुकुर्वन्ति इति. एवमपि सति लौकिकमपि ज्ञानं निवृत्तम् इति आह **उन्मदान्धाः** इति. **उद्गतेन मदेन** भगवदारोहणार्थमपि यतन्ते इति **अन्धाः** सर्वथा अचिकित्स्य-त्रिदोषाः[६]. तत्रापि **गोपवध्वः** जात्या स्वभावेन च दुष्टाः. ताअपि **यस्य** सम्बन्धात् **प्रकृतिं** स्वरूपम् **अगमन्**[७]. न अत्र सन्देहः कर्तव्यः, **किल** इति प्रसिद्धे ॥४०॥

---

श्रीगोकुलनाथानां टिप्पणी

**विजयरथ** इत्यत्र. **नतु पूर्ववद्** इति. ''विलसत्कवचेऽस्तु कृष्ण आत्मा'' (श्लो. ३४) इत्यत्र इव न इति अर्थः ॥३९॥

प्रकाशः

**ललितेत्यत्र. उन्मदान्ध**पदोक्त-मोहजनकत्वं तामसं, निरीक्षणं च सात्त्विकं, तदेव उक्तकार्यजनकत्वात् मुख्यम् इति अवस्थायाः सात्त्विक-तामसत्वम् ॥४०॥

---

१. ननु इति ख-ग. २. पदचालनमिति घ. ३. उरु इति क-ग. ४. भवन्माहात्म्यमिति ख.

५. बहिर्बहिरिति घ. ६. अचिकित्सेति ख-घ. ७. अगन्निति ग.

रजोमिश्रसत्त्वावस्थाम् आह.

**मुनिगणनृपवर्यसङ्कुलेऽन्तःसदसि युधिष्ठिरराजसूय एषाम् ॥**
**अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥४१॥**

**मुनिगणेति.** मुनीनां गणाः **नृपश्रेष्ठाश्च** सात्त्विकाः राजसाश्च, नतु तामसाः. **अन्तःसदसि** सभामध्ये सर्वतो मध्यस्थाने (**युधिष्ठिरराजसूये!**) आभिषेचनिके अहनि सदस्यपूजायां "यः सर्वोत्तमः स पूजनीयः" इति अस्मदादिभिः उक्ते कृष्णं पुरुषोत्तमं मत्वा **एषां**[1] सर्वेषामेव **अर्हणम्** – सर्वेषामेव सम्भावितत्वाद् अतः सर्वेषां पूजां स्वयमेव – (**उपपेद!**) गृहीतवान्. तदा च सर्वेषामेव **ईक्षणीयो** जातः स इदानीं **मम दृशिगोचरः** तत्सौन्दर्यं साम्प्रतं पश्यामि. तस्य प्रकटात्मत्वम् आह **आविरात्मा** इति. सोऽपि (**एषः!**) अयमेव, नतु एतस्मिन् ॥४१॥

एवं स्वदृष्ट्या[2] सर्वावस्था अनुवर्ण्य गुणातीतायाम् अवस्थायां विद्यमाने भगवति स्वात्मसमर्पणम् आह.

**तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम् ॥**
**प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ॥४२॥**

**तम् इमम्** इति. पूर्वं यः सर्वोत्कृष्टधर्मवत्त्वेन[3] उक्तः स[4] एव अयं हृदयम् आरभ्य बहिःपर्यन्तम् अनुस्यूततया स्थितः. स च न देहादिरूपः, तद् आह **अजम्** इति. यथा मम अयम् अन्तर्बहिः तिष्ठति तथैव सर्वप्राणिषु इति आह **शरीरभाजां हृदि हृदि धिष्ठितम्** इति. शरीरं भजन्ते इति **शरीरभाजो** जीवाः. स्वस्य समानाकृतिं शरीरं पुरुषरूपं सम्पाद्य स्वसेवां त्याजयित्वा तत्सेवायां नियुक्ताः. तत्र च अन्यभजनं मा भवतु

प्रकाशः

**मुनीत्यादि. नतु एतस्मिन्** इति. नतु एतच्छरीरान्तवर्ति इति अर्थः. अत्र राजसूयस्य राजकर्तृकत्वे राजसत्वात् तत्सम्बन्धितया अर्हणीयत्वस्य राजसत्वं, ज्ञानोत्तरं निश्चयात् सात्त्विकत्वं ; सा अवस्था तादृशी ज्ञेया ॥४१॥

१. येषामिति घ. २. स्वदृष्टा इति ख-ङ. ३. धर्मत्वेनेति ग-घ. ४. स चायमिति घ.

इति स्वयमेव **हृदि हृदि**[१] प्रत्येकपर्यवसायित्वेन **धिष्ठितम्** अधिष्ठाय स्थितम् अधिष्ठातृदेवतात्वेन, नतु जीववत्. ननु के ते जीवाः? तत्र आह **आत्मकल्पितानाम्** इति, आत्मनैव[२] कल्पिताः. ''अवस्थितेरिति काशकृत्स्नः'' (ब्रह्मसूत्र १।४।२२) इति भगवतो अवस्थाविशेषो जीवः. प्राकृतभोगार्थं ताम् अवस्थां सम्पादितवान् इति अर्थः. ननु एकएव कथम् अनेकस्थानेषु अनुस्यूततया[३] दृश्यते? तत्र आह **प्रतिदृशम् इव न एकधा अर्कम् एकम्** इति, चक्षुषो अधिष्ठात्री देवता सूर्यः एकएव[४] प्रतिदृशं तिष्ठति. अथवा बहिःस्थितएव अयं सूर्यः सर्वेषां दृष्टौ ''अस्मदर्थे एव अयम् उदितः'' इति प्रतिभाति, ''तस्मात् सर्वएव मन्यते मां प्रत्युदगाद्'' (तैत्ति.संहि. ६।५।४।२) इति श्रुतेः. तस्मात् महताम् अचिन्त्यसामर्थ्यात् न अत्र सन्देहः कर्तव्यः. तस्माद् एवंविधं परमात्मानं **सम्यग्** [५]**अधिगतो अस्मि** प्राप्तो अस्मि, योगेन आत्मानं तत्र योजितवान् इति अर्थः. सर्वोऽपि भगवन्निकटे तिष्ठति तथापि मायायाः स्वतः कार्यात् च यौ धर्मौ उद्गतौ मोह-भेदौ तयोः प्रतिबन्धकत्वात् न भगवता सह मेलनमिति मया तौ निवारितौ इति आह **विधूतभेदमोह** इति. इदानीं वा समधिगमनानन्तरं भेद-मोहौ अपगतौ ॥४२॥

एवं स्वमनसि स्फुरितं प्रमेयम् अनूद्य, अन्ते स्वकृतम् आत्मसमर्पणं च अनूद्य शरीरं त्यक्तवान् इति आह.

---

प्रकाशः

**तम् इमम्** इत्यत्र. **नतु जीववद्** इति, नतु अभिमानितया इति अर्थः. **के** इति भिन्नाः अभिन्नाः वा ॥४२॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे नवमाध्यायविवरणम् ॥

---

१. इदं नास्ति ग.　　२. आत्मनेवेति ख.　　३. अननुस्यूततयेति क-ग.

४. एक इति नास्ति ख.　　५. सम्यगधिस्थितोऽस्मीति क-ग-घ.

॥ सूतः उवाच ॥

**कृष्णे एवं भगवति मनोवाग्देहवृत्तिभिः ॥**
**आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् ॥४३॥**

**कृष्णे** इति. **कृष्णे भगवति** मूलाविर्भावरूपे **एवं कायवाङ्मनोवृत्तयो** योजिताः. तैः सह आत्मापि योजितः. तेषान्तु भेदेन योजनम्, आत्मनस्तु[१] **आत्मन्येव** योजनम्. "इहैव समवनीयन्ते प्राणाः" (नृसिंहो.ता.उप. ५) इति अर्थः उक्तो भवति. **अन्तःश्वासः** अन्तरेव श्वासो यस्य सो **उपारमद्** देहं त्यक्तवान् ॥४३॥

तदा[२] च सर्वेषाम् अपि तथा प्रतीतिः[३] जाता इति आह.

**सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ॥**
**सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥४४॥**

**सम्पद्यमानम्** इति. अन्तःस्थितो भगवान् प्रकटीभूतः, तत्र अस्य सायुज्यं वृत्तम्. तदा[४] महती काचित् प्रभा निर्गता, तया (**आज्ञाय!**) सर्वैः ज्ञातं **भीष्मो ब्रह्मणि** सङ्गतः इति. तदा (**निष्कले!**) परमपुरुषार्थे विघ्नो मा भूद् इति **सर्वे तूष्णीं (बभूवुः!)** भूताः, श्रोत्रेन्द्रियस्य अनावृतत्वाद्, विषयैः इन्द्रियद्वारा मनसः आकर्षणसम्भवात् तद्द्वारा च जीवस्य, यथा सुषुप्तौ. **वयांसि इव** इति. यथा (**दिनात्यये!**) सन्ध्यापगमे तत्तत्स्थाने स्थिताः पक्षिणः अश्वस्तनत्वाद्[५] विचारशून्याः पूर्वानुसन्धानरहिताश्च निद्राभावेऽपि[६] तूष्णीं भवन्ति तथा सर्वसन्देहाभावं श्रुत्वा दृष्टान्तं च[७] दृष्ट्वा[८] [९]वक्तव्याभावाद् ब्रह्मभूताएव[१०] तूष्णीं जाताः इति अर्थः ॥४४॥

देवानां सर्वज्ञत्वाद् "अस्मदीयो वसुः मुक्तः" इति वाद्यवादनं चक्रुः इति आह.

---

१. आत्मनः स्वात्मन्येवेति ख.    २. तथाचेति क-घ.    ३. प्रीतिरिति ख-ग.

४. तत्रेति ख-ग.    ५. अश्वस्तनद्वादिति घ.    ६. अपिर्नास्ति घ.

७. दृष्टान्तञ्चेति नास्ति ख.    ८. दृष्ट्वेति नास्ति ग.    ९. तं वक्तव्याभावादिति घ.

१०. एवमिति घ.

**तत्र दुन्दुभयो नेदुर्दिवि[१] देवप्रचोदिताः ॥**
**शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥४५॥**

वादन-प्रशंसा-पुष्पवृष्टयः तामस-सात्त्विक-राजसरूपा उत्तमाः. **राज्ञां** मध्ये ये[२] **साधवः**, अनेन तत्रापि दुष्टाः सन्ति इति ज्ञापितम् ॥४५॥

"भस्मान्तं शरीरम्" (ईशावा.उप. १।१७) इति श्रुतेः शरीरप्रतिपत्तिं[३] चक्रुः इति आह.

**तस्य निर्हरणादीनि सम्परेतस्य भारतः ॥**
**युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥४६॥**

**तस्य** इति. **निर्हरणं** ज्वालनं **सम्परेतस्य** शरीरस्य ; भीष्मात्मानं गृहीत्वा भगवति तिरोहिते. **भारतो युधिष्ठिरः** मोहाभावाय **कारयित्वा** इति, पट्टाभिषिक्तस्य स्वतः[४]करणम् अनुचितम्. मुहूर्तखेदो वैधः ॥४६॥

भीष्मोक्तं कृतं[५] च सर्वेषां हृदये समागतम् इति अभिप्रायेण आह.

**तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ॥**
**ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः ॥४७॥**

**तुष्टुवुः** इति. **तद्गुह्यनामभिः** अद्भुतकर्मत्वादिभिः **कृष्णं हृदये** निवेश्य सर्वे गताः इति आह **ततः ते** इति. **पुनः** इति, केचन भगवद्दर्शनार्थं – स्वाश्रमे गत्वापि – समागत्य कृष्णं दृष्ट्वा **पुनः (प्रययुः!)** गताः इति अर्थः ॥४७॥

युधिष्ठिरस्य तु ज्ञानं वृत्तम् इति आह **ततः** इति.

**ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् ॥**
**पितरं सान्त्वयामास गान्धारीञ्च तपस्विनीम् ॥४८॥**

स्वयं (**सहकृष्णो!**) विशोकः शोकम् अन्येषां दूरीकरोति. **पितरं** धृतराष्ट्रं, **तपस्विनीं** सन्तप्तां, **चकाराद्** अन्यांश्च[६] ॥४८॥

---

१. देवगन्धर्वचोदिता इति क. देवमानववादिता इति ग. देवदानववादिता इति घ.

२. ये इति नास्ति ग. ३. प्रपत्तिमिति घ. ४. स्वतःकारणमिति घ. ५. स चेति ख.

६. अन्याश्च इति मुद्रितपाठः. अन्याञ्चेति ख. गृहीतस्तु ग-घपाठानुसारेण -सम्पा.

ततो भगवत्कृपया तस्य राज्यप्राप्तिः इति आह **पित्रा च** इति.

**पित्रा चानुमतो राजा वासुदेवानुमोदितः ॥**
**चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥४९॥**
॥ इति श्रीभागवत-प्रथमस्कन्धे नवमोऽध्यायः ॥

अधिकृतैः मन्त्रिभिः **पित्रा च अनुमतः**, स्वभावतएव **राजा**, मुख्यतया **वासुदेवानुमोदितः**, **पितृ-पैतामहम्** आवश्यकं, **विभुः** समर्थः —अनेन सर्वे गुणाः सर्वदोषाभावश्च उक्तः ॥४९॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे नवमो अध्यायः ॥

## ॥ इति नवमोऽध्यायः ॥

# ॥ अथ दशमोऽध्यायः ॥

नैश्चिन्त्यसिद्धये विष्णोः[१] भीष्ममुक्तिर्निरूपिता ॥
ऐहिके सर्वसौख्यं तु दत्तवांस्तन्निरूप्यते ॥(१)॥
पाण्डवानां यदूनां च तदध्यायद्वयेन हि ॥
निरूप्यं प्रथमं तत्र पाण्डवानां तदुच्यते ॥(२)॥
कृष्णाधीनं सुखं यस्य स सुखीति निगद्यते ॥
अतः कृष्णपरं चित्तं सर्वेषामत्र वर्ण्यते ॥(३)॥

पूर्वाध्यायान्ते युधिष्ठिरस्य राज्यप्राप्तिः उक्ता. तत्र राज्यकरणं ज्ञानाज्ञानाभ्यां न घटते इति राज्यस्थितिं पृच्छति शौनकः.

---

प्रकाशः

अथ दशमाध्यायं विवरिषवः पूर्वाध्यायार्थम् अनुवदन्तः प्रस्तुतस्य अर्थम् आहुः **नैश्चिन्त्ये**त्यादि. **निरूप्यते** इति, नैश्चिन्त्यसिद्धये निरूप्यते. एतेन सर्वभक्तसमाधानपूर्वक-स्वस्थानप्राप्तिरूपं तृतीयकार्यं यत् प्राग् उक्तं तेन अस्य अर्थस्य[२] सङ्गतिः बोधिता. तत्प्रकारम् आहुः **पाण्डवे**त्यादि. ननु पाण्डवसुखदानन्तु आदावेव षड्भिः उच्यते, शेषे तु अध्याये सर्वेषां भगवत्परत्वमिति तस्य कथम् अध्यायार्थेन सङ्गतिः इत्यतः आहुः **कृष्णे**त्यादि. तथाच शेषं हेतुतया उच्यतेइति सैव सङ्गतिः इति अर्थः. एतेन पूर्वम् अध्यायार्थत्वेन उक्तं सर्वमुक्तिदातृत्वमपि समर्थितम् (१-३).

एवं सर्वम् अर्थं सङ्गृह्य व्याख्यातुं कथासङ्गतिं वदन्तः श्लोकम् अवतारयन्ति **पूर्वाध्याये**त्यादि. **राज्यस्थितिम्** इति, राज्ये युधिष्ठिरस्य स्थितिप्रकारम्. कौरववधस्तु घटते इति बोधयितुम् आहुः **अवध्ये**त्यादि. प्रकारान्तरेणापि तेषाम् अधर्मित्वबोधनाय आहुः **अस्वे**त्यादि. ननु एवं

लेखः

दशमाध्यायस्य सङ्गतिं वक्तुं पूर्वोक्तम् अर्थं स्मारयन्ति **नैश्चिन्त्य** इत्यादि. उत्तानार्थम् इदम् (१).

---

१. विष्णाविति घ.  २. कि.पाठानुरोधेन. अर्थसङ्गतिः इति मुद्रितपाठः - सम्पा.

**।। शौनकः उवाच ।।**

**हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ।।**
**सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत् ततः ।।१।।**

**हत्वा (स्वरिक्थस्पृधः!)** इति. स्वरिक्थे स्पर्धन्ते[१] इति तथा. **रिक्थं** धनम् अतएव **आततायिनः** धनापहान्[२]. अवध्यवधे[३] हेतुः आततायित्वम्. **अस्वरिक्थे** वा **स्पर्धा** येषाम् ; अनेन धनार्थिनो हत्वा धनं गृहीत्वा तेन राज्यकरणम् अनुचित्तम् इति ज्ञापितम्. ननु एवमेव प्राकृताः कुर्वन्ति! ततः[४] आह **धर्मभृतां वरिष्ठः** इति. न धर्मज्ञानमात्रं कृतिमात्रं वा किन्तु ये धर्ममेव गृहीत्वा तिष्ठन्ति तेषां मध्ये श्रेष्ठः. **अनुजैः सह** इति सर्वत्र – शत्रुवधे धर्मज्ञाने राज्यप्राप्तौ च – किञ्चिद् भ्रातृणाम् ऐकमत्यम् अस्ति न वा इति सम्बन्धः[५]. **प्रत्यवरुद्धं भोजनं** यस्य – **भोजनं** पालनम् अभ्यवहरणं वा – पूर्वम् आततायिभिः प्रत्यवरुद्धं भोजनम् ; इदानीं वा अवरोधस्य प्रतिकूलत्वे प्राप्तभोजनत्वं सिद्ध्यति.

श्रीगोकुलनाथानां टिप्पणी

दशमे अध्याये **हत्वा** इत्यत्र. **अवरोधस्य** इति. **अवरोधः** प्रतिबन्धः,

प्रकाशः

वधे दोषाभावे राज्यकरणस्य कथं दुष्टता इत्यतः आहुः **अनेन** इति, **रिक्थस्पृधपदेन. इति सम्बन्धः** इति. एवं सन्देहबोधनाय सर्वत्र शत्रुवधादौ सम्बन्धः इति अर्थः. **सन्देहः** इति तु पाठः प्रतिभाति. **इदानीं वा**

लेखः

**हत्वा** इत्यत्र. **धनापहान्** इति. "शस्त्रपाणिर्धनापहः[६]" (वसि.स्मृ. ३।१२) इति वाक्याद् इति भावः. **अस्वरिक्थे** इति. अनेन परधनलुब्धत्वेन अन्यायवर्तित्वं सूचितं भवति इति भावः ।।१।।

---

१. स्पर्धन्तीति इति क-ख-ग.　२. धनावहानिति घ-ङ.　३. अवध्यवधहेतुरिति ख. अवध्ये वधहेतुरिति क-घ-ङ.　४. तत्राहेति घ.　५. 'सन्देहः' पाठः प्रकाशकारैः सूचितः - सम्पा.

६. "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः, क्षेत्रदारहरश्चैव षडेते आततायिनः, आततायिनम् आयान्तमपि वेदान्तपारगं, जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्" (वसि.स्मृ. ३।१२-१३) - सम्पा.

अतः तुच्छे राज्ये सर्वज्ञस्य कथं प्रवृत्तिः, सन्तोषेण च राज्ञो राज्ये स्थातुम् अशक्तत्वात्[१]? ततो राज्यं प्राप्य पुनः कलहादि अन्यद् वा कृतम् इति प्रश्नः ॥१॥

तत्र[२] स्वेच्छया युधिष्ठिरेण न किञ्चित् कृतं किन्तु भगवदिच्छया इति – तस्य न राज्ये दोषो गुणो वा किन्तु भक्तत्वाद् भगवदिच्छया राज्यं कृतवान् इति – वक्तुं भगवान् तस्मै राज्यं दत्वा तुष्टो जातः इति आह.

**॥ सूतः उवाच ॥**

**वंशाङ्कुरं वंशदवाग्निनिर्हृतं संरोहयित्वाऽभवभावनो हरिः ॥**
**निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥२॥**

**वंशाङ्कुरम्**[३] इति. द्वयं कृत्वा भगवान् (**प्रीतमना बभूव**!) प्रीतो जातः — [४]वंशाङ्कुर-परीक्षिद्रक्षणं, युधिष्ठिराय राज्यदानं च. ततः तत्र भगवतः तादृशेन कार्येण किम्? इति आशङ्क्य (आहुः!) स्वभक्तानां वंशरक्षा सर्वथा कर्तव्या. तदभावे प्रवृत्तिमार्गनिष्ठता अयुक्ता, ऋणित्वाद् वैषयिकसुखाभावाच्च. दैत्यांशैः हि भगवदीयानां द्वयं दूरीक्रियते, तत्र भगवतैव प्रतिविधातव्यम्. स्वतः प्रतीकाराभावाय आह **वंशदवाग्निनिर्हृतम्** इति. **वंशे दवाग्निः**, **वंशाद्** वा उत्पन्नो अन्योन्यसङ्घर्षणेन. (**अङ्कुरं**!)

श्रीगोकुलनाथानां टिप्पणी

तस्य **प्रतिकूलत्वम्** अभावः, तस्मिन् प्राप्ते जाते सति इति अर्थः ॥१॥

**वंशम्** इत्यत्र. **तदभावे** इति, वंशाभावे इति अर्थः. **वैषयिक** इति, राज्याभावे इति शेषः ॥२॥

प्रकाशः

इति 'वा'शब्दः एवकारार्थो वाक्यालङ्कारे. **प्रतिकूलत्वे** इति पूर्वावरोध-प्रतिकूलत्वे ॥१॥

**वंशम्** इत्यत्र. **अन्योन्ये**त्यादि. तथाच स्वयंकृतत्वात् स्वयं प्रतीकाराभावः

१. अयुक्तत्वादिति क-ख. २. तत इति क-ग. ३. वंशमितीति क-ख-ग. ४. वंशाङ्कुरमिति ग.

**संरोहयित्वा** इति नूतनम् अङ्कुरम् उत्पाद्य. तथा करणे हेतुः **अभवो** मोक्षः तं **भावयति** इति. ''नाऽपुत्रस्य लोकोऽस्ति इति तत्सर्वे पशवो विदुः'' (ऐत.ब्रा. ७।१३), ''ऋणानि त्रीणि अपाकृत्य मनो मोक्षे निवेशयेत्'' (मनुस्मृ. ६।३५) इत्यादिश्रुति-स्मृतिवाक्यैः वंशाभावे पितॄणाम् आक्रोशात् मुक्तिः न स्यात्. किञ्च **हरिः** सर्वदुःखहर्ता (**अभव**!) अपुत्रकृत-क्लेशमपि दूरीकरोति इति अर्थः. **भवभावनः** इति वा, उद्भवमेव भावयति; अभिवृद्धिभावनकर्ता इति अर्थः. (**निजराज्ये**!) राज्यन्तु पूर्वमेव सिद्धम्[१], अन्यथा सर्वेभ्यो भक्तेभ्यो राज्यदानं प्रसज्येत! अतो[२] **निवेशनमेव** कृतवान्. तत्र हेतुः **ईश्वरः** इति, स्वयम् ईश्वरो अन्यानपि ईश्वरान् कृत्वा सुखी भवति. अथवा **ईश्वरः** समर्थः, असमर्थो हि[३] प्रमाणमुखनिरीक्षकः, सर्वं त्याजयित्वा मुक्तिं प्रयच्छति, अयन्तु न तथा इति अर्थः. **ह** इति निश्चये ॥२॥

ईश्वरधर्माविर्भावाभावे तुच्छत्वे स्वस्मिन् स्फुरति राज्याद् भयं, तद् युधिष्ठिरस्य[४] ज्ञानाद् अपगतम् इति आह.

**निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृद्धविज्ञानविधूतविभ्रमः ॥**
**शशास गाम् इन्द्र इवाजिताश्रयः परिध्युपान्ताम् अनुजानुवर्तितः ॥३॥**

**निशम्य** इति. ''आवश्यकन्तु कर्तव्यमेव, न तेन किञ्चित् नश्यति'' इति **भीष्म**वाक्यश्रवणादेव राज्यभयं निवृत्तम्. **अथ** भिन्नप्रक्रमेण ईश्वरविचारेण

---

श्रीगोकुलनाथानां टिप्पणी

**निशम्य** इत्यस्य आभासे **अज्ञानाद्** इति. अज्ञानाद् हेतोः यद् भयं तद् अपगतम् इति अर्थः ॥३॥

प्रकाशः

इति अर्थः. **अभिवृद्धीत्यादि**. तथाच वंशवृद्ध्यर्थं संरोहितवान् इति भावः. ननु मोक्षदानार्थम् उद्यतः तद्विरुद्धे राज्ये कथं निवेशितवान् इति आकाङ्क्षायाम् आहुः **अथवा** इत्यादि ॥२॥

---

१. सिद्ध इति ख. २. तत इति क-ग. ३. हीति नास्ति ख.

४. युधिष्ठिरस्याऽज्ञानादिति ख-ग-टिप्पण्याम् - सम्पा.

"नारायणपराः सर्वे न कुतश्चन बिभ्यति" (भाग.पुरा. ६।१७।२८) इति न्यायेन नारायणपरस्य भगवद्वाक्यमेव कर्तव्यं, नतु विषयजन्यं भयमपि सम्भावनीयम् इति **अच्युतोक्तम्**. एवं मर्यादा-पुष्टिभ्यां सर्वोऽपि शास्त्रार्थो अवगतः. ततः[१] **प्रवृद्धविज्ञानेन विधूता** दूरीकृता **विशिष्टा भ्रमा यस्य गां** पृथिवीम् (**शशास!**) आज्ञापूर्वकं पालितवान्. अन्यो[२] हि राजा दैवाद् वृष्टौ सञ्जातायां सस्ये सम्पन्ने चौरादिभिः परं पालयति, अयन्तु वृष्टिमपि निष्पाद्य स्वधर्मेण पुष्टान् कृत्वा पालयति इति आह **इन्द्र इव** इति. मनुष्यस्य एवंपालनसामर्थ्ये हेतुः **अजिताश्रयः** इति, न केनापि जितो = भगवान् आश्रयो यस्य. **परिधिः** समुद्रः **उपान्ते** यस्याः ; यद्यपि अन्ये राजानः सन्ति तथापि एतदाज्ञाकारिणइति तथा उक्तम्. **अनुजैः अनुवर्तितः** प्रथमतो भ्रातरएव कुर्वन्ति पश्चात् तत् स्वयं करोति. भ्रातृभिः सेवितो वा ॥३॥

तस्य धर्मेण पोषितस्य राज्यस्य गुणान् आह त्रिभिः **कामं ववर्ष** इति.

आधिदैविकसौख्यं हि तथा चैवाधिभौतिकम् ॥
आध्यात्मिकं च तद्राज्ये कृष्णेच्छातः क्रमोदिताः ॥(४)॥

**कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ॥**
**सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा ॥४॥**
**नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः ॥**
**फलन्त्योषधयः सर्वाः काममन्वृतु तस्य वै ॥५॥**
**नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः ॥**
**अजातशत्रावभवन् जन्तूनां राज्ञि कर्हिचित् ॥६॥**

**कामम्** इच्छानुसारेण. क्षेत्रविशेषं[३] सस्यापेक्षम्. पृथोः इव (**मही!**)

---

प्रकाशः

**कामम्** इत्यत्र. **क्रमोदिताः** इति, त्रिविधसौख्यरूपाः गुणाः इति शेषः (४).

---

१. तत इति नास्ति ख. २. अन्योऽपीति ग. ३. क्षेत्रविशेषे इति ख. क्षेत्रं विशेषमिति घ.

पृथिवी **सर्वतः कामदुघा** जाता. **गाव ऊधस्वतीः** स्थूलक्षीराशयाः "धर्मात्मा अयं राजा अस्मत्परिपालको जातः" इति **मुदा पयसा व्रजान् एव सिषिचुः** यावद् दोग्धा भाण्डं च समायाति तावत् क्षीराधिक्याद् भूमिम् एव सिषिचुः. पर्जन्यः-पृथ्वी-गावो देवताः. **नद्यः-समुद्राः** जलमिथुनं, (**वनस्पति-वीरुधः!**) वृक्षाः लताश्च अपरं स्थलमिथुनम् —एतद्द्वयम् अन्नातिरिक्तसर्वहेतुः. **ओषधयो** व्रीह्यादयः (**फलन्ति!**) —सर्वेषां सजीवत्वाद् भूतत्वम्. **कामम्** इच्छानुसारेण. इच्छायामपि सत्याम् अकालफलने दोषनिमित्तत्वेन कदाचिद् भयं भवेत्, तन्निवृत्त्यर्थम् आह **अन्वृतु** ऋतुम् [१]अनतिक्रम्य. अध्यात्मनि[२](?) गुणानां स्वतःसिद्धत्वाद् दोषाभावाय रोगाद्यभावम् आह **आधिः** मानसी व्यथा, **व्याधिः** शरीरस्य. **क्लेशाः** अविद्यादयः. इन्द्रियस्राव-गर्भपात-व्यभिचारादयोऽपि[३] **दैवभूतात्महेतवः क्लेशाः न** भवन्ति, राजधर्मेणैव सर्वसमाधानात्. आदिमध्यावसानेषु राज्यम् एकविधम् इति आह **कर्हिचिद्** इति ॥४-६॥

एवं सामान्यतः सर्वसौख्यम् उक्त्वा प्रेमसौख्य-निरूपणार्थं भगवतो निर्याणोत्सवम् आह **उषित्वा** इत्यादि यावद् अध्यायसमाप्ति[४].

---

श्रीगोकुलनाथानां टिप्पणी

**कामं ववर्ष** इत्यत्र. **देवता** इति. अतः प्रथमश्लोके आधिदैविकनिरूपणम् इति भावः ॥४-६॥

लेखः

**नद्यः समुद्रा** इत्यत्र. **सजीवत्वाद् भूतत्वम्** इति. **फलन्ति** इत्यनेन स्वतन्त्रभवनम् उक्तं, तच्च जडानां न संगच्छते अतः आह तेषाम् **सजीवत्वाद्** इत्यादि. **भूतत्वम्** इति, स्वतः उत्पन्नत्वम् इति अर्थः. **नाऽऽधयो व्याधयः** इत्यादिना दोषाभावएव उक्तः, गुणस्तु न उक्तः, तत्तात्पर्यम् आहुः **स्वतःसिद्धत्वाद्** इति. दोषाभावोक्तौ गुणानाम् अर्थतः सिद्धिः इति भावः ॥४-६॥

---

१. ऋतुमतिक्रम्येति ख. २. अध्यात्मनिर्गुणानामिति घ.

३. व्यभिचारेति नास्ति ख. ४. समाप्तिरिति ख.

वृथैव जीवनं लोके भक्तिज्ञानोत्सवैर्विना ॥
कृष्णैकतानचित्तत्वं मुक्तेरप्यधिकं मतम् ॥(५)॥

**उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः ॥**
**सुहृदां च विशोकाय स्वस्वसुः प्रियकाम्यया ॥७॥**
**आमन्त्र्य चाभ्यनुज्ञातः परिष्वज्याभिवाद्य च ॥**
**आरुरोह रथं कैश्चित् परिष्वक्तोऽभिवादितः ॥८॥**

**हस्तिनापुरम्** इति अलुक्तृतीया-समासः, हस्तिना निर्मितं पुरम् इति मध्यमपदलोपात्[१]. हस्ती राजा, हस्तिनः सम्बन्धी इति **हास्तिनम्** अण्प्रत्ययः.

हस्तिनिर्मिते ( / कृते ! ) पुरे वासस्तद्वंश्यानां विमुक्तये ॥

---

प्रकाशः

**उषित्वा** इत्यादीनां तात्पर्यम् आहुः कारिकया **वृथैव** इत्यादि. भक्तिः च ज्ञानं च तत्कृता उत्सवाः च इति समासः. ननु अन्ते मुक्तिं विनापि वैयर्थ्यमेव इति तन्निवृत्तये आहुः **कृष्णे**त्यादि. ‘‘विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः’’ ( पद्मपुरा. ६।२२९।५९ ) इत्यादिवाक्यात् तथा इति अर्थः (५).

हस्तिनापुरे भगवतो या स्थितिः सा मथुरादिस्थितेः विलक्षणा इति बोधनाय तत्तात्पर्यम् आहुः **हस्तीत्**यादि. **वासः** इति भगवतः स्थितिः. **निरन्तरस्थितिः** मथुरादि-सम्बन्धिनी. कालवशादेव स्थितवान्, न स्वेच्छया

लेखः

**उषित्वा** इत्यत्र. प्रकृतम् अर्थं कारिकया उपनिबध्नन्तः तद्राद्धान्तम् आहुः **वृथैव** इति. भक्तिः, भगवज्ज्ञानं, भगवद्यात्राद्युत्सवश्च पाण्डवानां यदि न स्यात् तदा राज्यभोगादिकं प्राप्तमपि प्रत्युत विपरीतफलाय स्याद् अतः तत् निरूपितम् इति भावः. ननु यदि एवं तदा मुक्तिरेव कुतो न दत्ता इत्यतः आहुः **कृष्णैकतान** इति. अनेकसुखदानैः तदेकचित्तत्वं यत् तत् मुक्तेरपि अधिकं, तेन न अत्र अन्यथा शङ्कनीयम् इति भावः (५).

---

१. मध्येति ख-ग.

निरन्तरस्थितिर्या तु [१]भूमिर्मुक्तिप्रदेति च ॥(६)॥
कालस्याकारणत्वाय तदंशाः परिकीर्तिताः ॥
[२]बहुत्वाद् गणनाभावात् तेषां चाहेतुता मता ॥(७)॥
स्थित्वा शोकापनोदे तु गमने स्मरणाद् भवेत् ॥
स्नेहस्ततः कृतार्थत्वम् इति भावो हरिर्मतः ॥(८)॥

**सुहृदां च विशोकाय,** चकाराद् राज्ञः प्रियार्थं, **स्वस्वसुः** सुभद्रायाः पुत्रशोकापनोदः ( **प्रियकाम्यया!** ) पौत्रोत्पत्त्या इति भगवत्स्थितिः प्रीतिवर्धिका. **आमन्त्र्य** इति लौकिकं, चकाराद् वरदानादिः. ( **परिष्वज्य!** ) आलिङ्गनं सर्वदोषनिवृत्तये, **अभिवादनं** बहिर्मुखत्वेऽपि दोषाभावाय, चकाराद् उचितं दानादि. **कैश्चिद्** इति. सख्यपर्यन्तम् आगतैः, प्रेम्णा स्निग्धैः वा कैश्चिद् इति तादृशाः दुर्लभाः इति द्योतितम् ॥७-८॥

**सुभद्रा द्रौपदी कुन्ती विराटतनया तथा ॥**
**गान्धारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥९॥**

श्रीगोकुलनाथानां टिप्पणी

**उषित्वा** इत्यत्र. **पुरे वासः** इति भगवतः इति शेषः. **निरन्तरस्थितिः** इति, **तद्वंश्यानाम्** इत्यस्य अत्रापि अन्वयः (६).

प्रकाशः

इति वारयितुम् आहुः **कालस्य** इत्यादि. स्थितेः कथं मुक्तिहेतुत्वम् इति आकाङ्क्षायां तत्प्रकारम् आहुः **स्थित्वा** इत्यादि. **भावः** आशयः (६-८).

लेखः

ननु यदि गन्तव्यमेव तदा पूर्वमेव कुतो न गतं भगवता, किमिति पार्थादिप्रार्थनया अत्र स्थितः इदानीं पर्यन्तम्, इति तदाशयम् आहुः **स्थित्वा** इत्यादि. स्थित्वा निरुद्विग्नं शोकापनोदादौ भगवता कृते सति यदि भगवतो गमनं तदा गमनसमये भगवद्धितोपदेश-**स्मरणात् स्नेहो भवेत्**, तेन च **कृतार्थता इति भावो** इत्यभिप्रायो ( **हरिः!** ) **भगवन्मतः** सम्मतः इति. तथाच एतदाशयेन भगवान् अत्र स्थितः इति भावः (८).

१. भुक्तिमुक्तिप्रदेति घ. २. बहुत्वगणनाभावादिति क-ग-घ-ङ.

**वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः ॥**
**न सेहिरे विमुह्यन्तो विरहं शाङ्गर्धन्वनः ॥१०॥**

**सुभद्रादयो न सेहिरे विरहम्** इति सम्बन्धः. देहसम्बन्धपुरःसरः स्नेहः स्त्रीणाम् अधिक इति आद्यन्तयोः ग्रहणम्. **विराटतनया** उत्तरा.

यथा भर्ता तथा पुत्रो मारणे रक्षणेऽपि च ॥
गान्धार्या उत्तरायाश्च तथेति समता मता ॥(९)॥

राजार्जुनयोः उत्सवासक्त्या न विरहस्फूर्तिः, **धृतराष्ट्रः च** इति **चकारेण** वा ग्रहणम्. अन्यथा **चकारो** धृतराष्ट्रस्य भक्तिबोधकः, तस्य भक्तिः दुर्लभा इति. **युयुत्सुः** धृतराष्ट्रस्य भोगस्त्री-पुत्रः. **गौतमः** कृपः, गौतमवंशोत्पन्नत्वात्. **यमौ** नकुल-सहदेवौ. **वृकोदरः च** इति **चकाराद्** अनुक्त-सर्वक्षत्रिय-ग्रहणं, **धौम्यश्च** इति पुरोहितग्रहणाद् अनुक्तब्राह्मण-ग्रहणम्. **स्त्रियः** तेषाम्. **मत्स्यसुता** सत्यवती. पूर्वोक्तायाः वा उत्तरायाः कार्यार्थम् अनुवादः. **विमुह्यन्त** इति एकशेषात् पुनर्निर्देशः. **शाङ्गर्धन्वन** इति कालरूपं धनुः हस्ते स्थापयति इति तद्विरहे कालग्रासः शङ्कितः ॥९-१०॥

विरहासहनं लौकिकं सर्वथा न भवति इति अलौकिकज्ञाने सति भगवतो अन्तर्यामित्वेन विरहाभावाद् अयुक्तं विरहवर्णनम् इति आशङ्क्य

---

श्रीगोकुलनाथानां टिप्पणी

**सत्सङ्गान्** इत्यस्य आभासे. **विरह** इति, विरहजं दुःखम् इति

प्रकाशः

गान्धार्यां विराटतनयाऽतिदेशस्य तात्पर्यम् आहुः **यथा** इत्यादि. उत्तरायाः भर्ता मारितः पुत्रो रक्षितः, गान्धार्याः पुत्रो मारितः भर्ता रक्षितः इति एकैकमारण-रक्षणसाम्यात् **तथा इति** अतिदेशोक्तिः इति अर्थः. विरहासहनोक्त्यवसरे राजाऽर्जुनौ कुतो न उक्तौ इत्यतः आहुः **राजे**त्यादि. **एकशेषाद्** इति, "पुमान् स्त्रिया" (पाणि.सूत्र १।२।६७) इति सूत्रोक्ताद् एकशेषात् ॥९-१०॥

**सत्सङ्गान्** इत्यत्र. **लौकिकम्** इत्यादि. भगवत्प्रभावादिना भगवति अलौकिकत्वस्य ज्ञातत्वात् (**सर्वथा!**) सर्वप्रकारेण **लौकिकं न भवति**

ज्ञानसत्त्वेऽपि प्रकारविशेषेण परमसुखदानाद् विरहो युक्तः इति आह **सत्सङ्गान्** इति सार्धेन.

**सत्सङ्गान्मुक्तदुःसङ्गो हातुं नोत्सहते बुधः ।**
**कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥**
**तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथम् ॥११॥**

भगवद्विरहकथा दूरे, भगवत्सेवकानामपि विरहो दुस्त्यजः. उपदिष्टेऽपि ज्ञाने, अन्तर्यामितया भगवत्स्फूर्तावपि यो रसः सत्सङ्गाद् उत्पद्यते, बहिः भगवत्सम्बन्धेन वा, स न ज्ञानादिभिः भवति, मानस-दैहिक-स्त्रीसम्बन्धयोः वैलक्षण्यात्. स्त्रियाः च स्वतः सुखं स्यात्, सर्ववस्तुनिष्ठ-रसस्य

---

श्रीगोकुलनाथानां टिप्पणी

अर्थः. व्याख्याने **विरहो दुस्त्यजः** इति. ज्ञानसत्त्वेऽपि **विरहो** विरहजं दुःखं **दुस्त्यजः** जायतेएव इति अर्थः. अतः तद्भिया तान् हातुं न उत्सहते इति अर्थः. **स्वनिष्ठदोष** इति, दोषाः बुभुक्षादयः.

प्रकाशः

इति अर्थः. विरहस्य दुःसहत्वं समर्थयितुं विरहानुभवं व्युत्पादयन्ति **उपदिष्टे**त्यादि. **उपदिष्टेऽपि** इत्याद्युक्त-दशाद्वये **सत्सङ्गाद्** इत्यादिकं यथायथं रसोत्पत्तौ हेतुद्वयम्. सत्सङ्गादिजन्यस्य रसस्य ज्ञानादिना अभवने हेतुम् आहुः **मानसे**त्यादि. तथाच तद्वैलक्षण्येन तयोः सकाशाद् जायमानस्य सुखस्यापि वैलक्षण्ये हेतुभेदाद् यथा तत्र रसवैजात्यं, तथा अत्रापि रसवैजात्यम् इति ज्ञानादिना सत्सङ्गादिजन्य-रसाभवने सिद्धे अन्तर्यामित्वेन सत्ता ज्ञानदशायामपि बहिः तदभावाद् विरहो युक्तएव इति अर्थः. ननु सुखाद्युपादानम् आत्मा वा मनो वा, अतः तयोः विद्यमानत्वेन तत्र सत्ताज्ञाने विद्यमाने निमित्तमात्रवैजात्येन कार्यवैजात्यं न युक्तम् इति ज्ञानादिनापि तादृशरसः सम्भवदुक्तिकः इति विरहो अनुपपन्नः इति शङ्कायाम् आहुः **स्त्रिया** इत्यादि. **स्यात्** पुंसः.

लेखः

**सत्सङ्गान्** इत्यत्र **लौकिकं न** इति, अनेकसुखदानैः तदेकचित्तत्वम्. व्याख्याने **स्वतः सुखं स्याद्** इति. यदि मानसमपि सुखं तत्समानं स्यात् तदा पुरुषनिरपेक्षतया स्वतएव सुखम् अनुभूतं स्याद् इति अर्थः.

स्वनिष्ठ-दोषस्फूर्त्यैव[१] अभिव्यक्तिदर्शनात्. सायुज्यज्ञानादावपि यद् आत्मसुखम् अभिव्यक्तं भवति तत्रापि भिन्नतया स्थितं[२] ज्ञानं प्रवेशेच्छा च दोषः, अन्यथा फलोत्तरं तदपगमो न स्यात्. ननु तयोः गुणत्वम् इति चेत्,

प्रकाशः

**दोषस्फूर्त्या** इति दोषपूर्विकया स्फूर्त्या. तथाच स्रक्-चन्दन-वनितादिषु पर्यायेण द्वेषेच्छादि-दर्शनात् तत्**तन्निष्ठरसस्य स्वनिष्ठ**कामादि**दोष**कृतया प्रियत्वादि-**स्फूर्त्या अभिव्यक्तिः** दृश्यतेइति तस्याः उत्कटकामतया तस्यां कामस्य सार्वदिकत्वात् तस्याः स्वतः सुखं सदा स्यात्, तथा सति विरहदुःखं न तस्याः स्यात्. तच्च दृश्यते. अतो निमित्तवैजात्ये कार्यवैजात्यम् अवश्यम् अङ्गीकार्यम्. तथा सति बहिःसम्बन्धजन्यस्य रसस्य कामादिदोषेणैव अभिव्यक्तेः ज्ञानादिना अभवनाद् विरहो युक्तएव इति अर्थः. ननु रसस्य सुखविशेषरूपत्वात् तदभिव्यक्तिं प्रति स्वनिष्ठदोषस्फूर्तेः कारणता न युक्ता, सायुज्यादौ अभिव्यक्तस्य आत्मसुखस्य दोषं विनैव अभिव्यक्तेः व्यतिरेकव्यभिचाराद्, अतो यथा तत्र तथा भगवद्रसाभिव्यक्तावपि इति ज्ञानादिना रसाभिव्यक्तेः विरहो न युक्तः इत्यतः आहुः **सायुज्ये**त्यादि. **भिन्नतया स्थितज्ञानम्** इति ''भिन्नतया स्थितः'' इत्याकारकं ज्ञानम्. तथाच कामाद्यभावेऽपि दोषान्तरस्य तत्र सत्त्वाद् न व्यभिचारः इति इहापि तेनैव अभिव्यक्तिः इति ज्ञानेन रसाभावाद् विरहो युक्तएव इति अर्थः. भिन्नत्वज्ञानादेः[३] दोषत्वे युक्तिम् आहुः **अन्यथा** इत्यादि. भिन्नत्वज्ञानादेः दोषत्वे शङ्कते **ननु** इत्यादि. कार्यदुष्टत्वस्य कारणे दोषताप्रयोजकत्वात्, प्रकृते च कार्यस्य भक्तिप्राचुर्यादि-बोधकतया अदुष्टत्वाद् विरहकारणस्य भिन्नत्वज्ञानादेः गुणत्वमेव अङ्गीकार्यं, नतु दोषत्वम् इति अर्थः. तद्

लेखः

**स्वनिष्ठदोषस्फूर्त्या** इति. ''मया इदं सुखं केवलेन पूर्वं न अनुभूतं किन्तु तत्सङ्गादेव'' इत्यादि स्वस्मिन् न्यूनतादिदोषस्फूर्त्या इति अर्थः.

१. स्वनिष्ठदोषस्फूर्त्यै चेति ख. २. भिन्नतया स्थितज्ञानमिति पाठः प्रकाशे - सम्पा.

३. भिन्नज्ञानादेः इति मुद्रितपाठः अशुद्धः - सम्पा.

सत्यं, लोके बुभुक्षादीनामपि गुणत्वकथनाद्, अन्यथा[१] तदर्थम् उद्यमो न स्यात्. तस्माद् भिन्नतया बहिःस्थितएव विषयो रसजनकः. अतएव योगिनोऽपि कृष्णाख्ये वस्तुनि प्रकटीभूते समाधिं परित्यज्य तदेव पश्यन्ति,

प्रकाशः

उक्तम् उपगम्य परिहरन्ति **सत्यम्** इत्यादि. तथाच यद्यपि त्वदुक्तयुक्त्या गुणत्वम् उचितं तथापि यथा "क्षुत् खलु वै मनुष्यस्य भ्रातृव्यः" (तैत्ति.संहि. २।४।१२।६), "अशनया मृत्युरेव" (तैत्ति.ब्रा. ३।९।१५।२) इत्यादिश्रुत्या बुभुक्षादीनां दोषत्वकथनाद् अप्रयोजकं तथा "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुत" (तैत्ति.आर. ८।७) इत्यादिश्रुत्या भिन्नत्वज्ञानादेः दोषत्वकथनाद् एतयोरपि गुणत्वम् अप्रयोजकम् इति अर्थः. ननु बुभुक्षादीनां लोकेऽपि दोषत्वात् तद्दृष्टान्तेन अत्र गुणत्वत्यागो न उचितः इति शङ्कायां लोके तेषां दोषत्वं परिहरन्ति **अन्यथा** इत्यादि. तथाच यथा लोके तेषां गुणत्वं शास्त्रे दोषत्वम्, एवम् एतयोरपि भक्तौ गुणत्वं शास्त्रे दोषत्वम् इति अर्थः. सिद्धम् आहुः **तस्माद्** इत्यादि. रसस्य दोषाभिव्यङ्ग्यत्व-नियमात् तथा इति अर्थः. एतादृशस्य रसजनकत्वे, शास्त्रीयदशापेक्षया एतादृशदशायाः उत्तमत्वे च मानम् आहुः **अतएव** इत्यादि. तथाच अस्य दर्शनस्य दोषजन्यत्वेऽपि इदमेव अधिकं, "गोविन्दभुजगुप्तायां द्वारकायां कुरूद्वह, अवात्सीत् नारदोऽभीक्ष्णं कृष्णोपासनलालसः" (भाग.पुरा. ११।२।१) इत्यादिवाक्याद्, अतो अनेन ज्ञानोपमर्दाद् विरहो युक्तः इति अर्थः.

लेखः

**अन्यथा** इति. ... . **सत्यम्** इति. तथाच सर्वत्र सर्वदा सर्वस्य गुणत्वं दोषत्वं वा न साहजिकं किन्तु कार्यविशेषविवक्षा-मात्रोन्नेयम्, अतो न पुरःस्फूर्तिकार्थमात्रम् आदाय निर्णेतव्यम् इति भावः. अत्र उपष्टम्भाय आहुः **लोके बुभुक्षादीनाम्** इति. तथाच लोके क्षुदादीनाम् उद्यमपर्यवसायित्वाद् गुणत्वेन प्रसिद्धावपि परमार्थतो विचार्यमाणे दोषएव, "क्षुत् खलु वै मनुष्यस्य भ्रातृव्यः", "अशनया मृत्युः" इत्यादि निन्दाश्रवणात्. तस्मात्

१. अन्यथोद्यमे पर्य्यवसानं न स्यादिति ग.

अन्यदा तु समाधिः. किञ्च देहादीनां दोषत्वश्रवणात् प्रलये तदभावात् मुक्तियोग्यान् जीवान् भगवान् देहसम्बद्धान् न कुर्यात्. किञ्च परमकृपालुत्वात् सृष्टिमेव न कुर्यात्. अतो दोषोऽपि क्वचिद् गुणः क्वचिद् दोषः, गुणोऽपि तथा, इति बहिर्व्यवहारपुरःसरमेव सर्वे वेदाः सर्वाणि शास्त्राणि प्रवृत्तानि. [१]बाह्यव्यवहारस्य मुख्यत्वाद् ज्ञानेऽपि सति भगवद्विरहासहनं युक्तम् उत्पश्यामः. **सतां सङ्गान्**[२] – एकस्मिन् सङ्गे विद्यमानेऽपि सङ्गान्तरमपि त्यक्तुं न शक्यते इति बहुवचनं ; सतामपि बहुत्वम्, एकस्मिन्नपि बहुधा रसजननात्, तेषामेव कृपया **मुक्तो दुष्टैः सह सङ्गो**[३] **येन,** तदनन्तरं तत्कृपयैव **बुधः** ज्ञानसम्पन्नोऽपि जातः, तथापि[४] पूर्वसिद्धान् सत्सङ्गान् – चिन्तामणिवद्

प्रकाशः

आधिक्ये मानान्तरम् आहुः **किञ्च** इत्यादि. तथाच अस्मादेव विशेषाद् मुक्तेषु देहसम्बन्धं, मुक्तानां सृष्टिं च करोति इत्यतो ज्ञानादिदशापेक्षया इयमेव अधिका इति अर्थः. तेन सिद्धम् आहुः **अतः** इत्यादि. यतो भगवान् "क्वचिद् गुणोऽपि दोषः स्याद् दोषोऽपि विधिना गुणः" (भाग.पुरा. ११।२१।१६) इतिवत् तत्तत्कार्यार्थं तत्तत् तथा तथा व्यवस्थापयतीति तथा इति अर्थः. श्लोकव्याख्याने **सत्सङ्गपदं** पञ्चम्यन्तमपि सम्भवति इति आशयेन आहुः **तदनन्तरम्** इति. ननु भगवद्विरहासहन-प्रस्तावे

लेखः

प्रसिद्धिमात्रेण न निर्णेतुं योग्यम् इति भावः. पुनः प्रकारान्तरेणापि प्रसिद्धिदुर्बलत्वाय युक्तिम् आहुः **किञ्च** इति. **दोषत्वश्रवणाद्** इति, लोके वेदे च इति अर्थः. **तदभावाद्** देहाद्यभावात्. **देहसम्बद्धान्** इति, सृष्टिकाले इति शेषः. **न कुर्याद्** इति. वस्तुतस्तु मोक्षाधिकसुख-जनकीभूत-स्वदास्यकरणार्थमेव देहग्राहणात् न दोषरूपः इति भावः. अन्यथा तु दोषत्वमेव इत्यपि ध्येयम्. अत्र अन्यथानुपपत्तिमपि प्रमाणयन्ति **किञ्च परम** इति. ननु एवं को वा निर्णयः सिद्धः इत्यतः आहुः **अतो दोषः** इत्यादि. तथाच विषयव्यवस्थयैव गुणत्वादिकं, न स्वाभाविकम् इति निष्पन्नम् इति अर्थः ॥११॥

१. वाक्यव्यवहारस्येति ग. २. सतां सङ्गादिति ग-घ.

३. संयोगेनेति क-घ-ङ. ४. तथा सतीति क-ग-घ.

(**हातुं न उत्सहते!**) त्यक्तुम् इच्छामपि न करोति इति अर्थः. यदर्थम् इदं निरूपितं तद् आह **कीर्त्यमानम्** इति. अत्यागे वा सत्सङ्गस्य गुणम् आह **कीर्त्यमानम्** इति. उभयार्थम् इति एके. **यस्य** भगवतः (**यशो!**) कीर्तिं सद्भिः **कीर्त्यमानां सकृद् आकर्ण्य सत्सङ्गान्**[१] (**हातुं!**) त्यक्तुं **न उत्सहते** इति सम्बन्धः. कीर्तेः[२] (**रोचनं!**) रुचिजनकत्वात्, सत्सङ्गस्य च तद्धेतुत्वात्, यशःश्रवणाद् वा **तस्मिन् न्यस्तधियः**. यथा समीचीनां पेटिकां दृष्ट्वा स्वस्य उत्कृष्टं वस्तु सर्वे स्थापयन्ति तथा भगवतः कीर्तिं श्रुत्वा बुद्धिरत्नं भगवति स्थापयन्ति इति अर्थः. सामान्यग्रहणं[३] वैदिक-लौकिक-सर्वबुद्धिग्रहणार्थम्. किञ्च **पार्थाः** पृथायाः पूर्वम् उक्तत्वात् तद्वचनेनापि (**तस्मिन्!**) भगवति **न्यस्तधियः कथं विरहं सहेरन्!** असहनात्[४] तत्र गच्छेयुः, प्रतिबन्धकं शरीरं वा त्यजेयुः इति भगवत्प्रचलनम्[५] अयुक्तम् इति भावः ॥११॥

तर्हि प्रचलिते[६] भगवति किं जातम्? तत्र आह.

**दर्शनस्पर्शनालाप-शयनासनभोजनैः ।**
**सर्वे तेऽनिमिषैर्नेत्रैस्तमनुद्रुतचेतसः ॥**
**वीक्षन्तः स्नेहसम्बद्धा विचेरुस्तत्र तत्र ह ॥१२॥**

---

श्रीगोकुलनाथानां टिप्पणी

**उभयार्थम्** इति. आद्ये इदम् अर्धम् उत्तरान्वयि, द्वितीये पूर्वान्वयि, **एके** इति पक्षे आवृत्त्य उभयत्रापि अन्वेति इति अर्थः ॥११॥

प्रकाशः

सत्सङ्गत्यागाशक्ति-निरूपणं कुत्र उपयुज्यते इति आकाङ्क्षायाम् आहुः **यदर्थम्** इत्यादि. तथाच भगवत्सम्बन्धादेव तत्त्यागानिच्छेति तद्विरहासहन-प्रस्तावे तदुक्तिः उचितैव इति अर्थः. प्रकारान्तरेणापि उपयोगम् आहुः **अत्यागे** इत्यादि. सिद्धम् आहुः **कीर्तेः** इत्यादि. **पूर्वम् उक्तत्वाद्** इति स्तुतिप्रस्तावे पूर्वाध्याये उक्तत्वात् ॥११॥

---

१. सत्सङ्गादिति क-घ. २. कीर्तिरुचीति ख. ३. सामान्यं ग्रहणमिति ख-घ.
४. असहमानास्तत्रेति क-घ-ङ. ५. भगवत्प्रवचनमिति क-ग-घ-ङ. ६. चलिते इति घ.

**दर्शनस्पर्शेति**. दर्शनादयः षट्क्रिया भगवद्योग्याः. ते च भगवत्सहभावेन पाण्डवनिष्ठाः. आलापादयस्तु सहैव[१], दर्शन-स्पर्शनयोस्तु विषयत्वमपि, सहभावाभावे विषयत्वासम्भवात्. एवं सहभावेन अभ्यस्तैः एतैः वशीकृताः सर्वे स्वचित्तं भगवति दत्तवन्तः. शयनादिभिः वा तस्मिन् अनिमिषदृष्टयो[२] जाताः. दृष्ट्यातु ( **तं** ! ) भगवन्तम् **अनुद्रुतं चित्तम्**. एवं काय-वाङ्-मनोवृत्तयो भगवति उक्ताः. विवेक-धैर्यादिकं न उत्पन्नम् इति अर्थः. ततः किं

---

लेखः

**दर्शनस्पर्शन** इत्यत्र. **भगवद्योग्याः** इति. भगवान् व्यवहितोऽपि सर्वान् पश्यति, स्पृशद्, आलापयति, शेते, आस्ते, भुङ्क्ते ; न तथा पाण्डवानां बहुकालं नैरन्तर्येण भगवत्सहभावम् अन्तरा भगवत्कर्मकदर्शनादि-योग्यता. अतो भगवत्सहभावत्यागः परमदुःसहः इति भावः. तदेतद् आहुः **ते च** इति. **ते** दर्शनादि-षट्व्यापाराः इति अर्थः. इदानीं षण्णामपि सर्वथा भगवत्सहभावाऽविनाभावित्वं प्रदर्शयन्तः पाण्डवानां भगवद्विरहासहनं युक्तमेव इति आशयेन आहुः **आलापादयस्तु** इत्यादि. यद्यपि दर्शन-स्पर्शने माहात्म्यबुद्ध्या सामान्यन्यायेन वा यदाकदाचित् सहभावेऽपि सम्भवतः, गुरु-देवतामूर्त्यादौ तथा दर्शनाद्, आलाप-शयनादयस्तु स्फुटतरमेव सर्वथा निरन्तरसहभावेनैव सङ्गच्छते इति तुशब्देन सूचितम्. **सहैव** इति, सहभावेनैव भवति इति अर्थः. तर्हि उक्तन्यायेन दर्शन-स्पर्शनयोः न तथात्वम् इति चेद्, न इति आहुः **दर्शन** इत्यादि. नहि अत्र माहात्म्येन सामान्यन्यायेन वा दर्शनादि उच्यते, येन पूर्वोक्त-दृष्टान्तावसरः सम्भाव्येत, किन्तु विषयरूपत्वेन स उच्यते. तत्त्वं च यदाकदाचित् सहभावजन्यत्वमेव इति अर्थः. तदेतद् आहुः **विषयत्वमपि** इति. विशेषेण सिनोति बध्नाति इति विषयः ; **तत्त्वम् अपि सहैव** इति पूर्वेण अन्वयः. अत्र हेतुः **सहभावा** इति. कदाचित् सहभावः स्यात् कदाचित् न स्यात् तदा तयोः तत्त्वाभावाद् इति अर्थः. **एवम्** इति, अनुपदोक्तरीत्या इति अर्थः ॥१२॥

---

१. सदैवेति ख.   २. तस्मिन्ननिमिषा दृष्टय इति क-ग-घ.

जातं तद् आह **वीक्षन्तः** इति. विरहो गमनस्मरणाद् उत्पन्नोऽपि[१] भगवद्दर्शनादिना[२] विस्मृतः. "यदा विरहः तदा तथा भविष्यति, व्यर्थम् इदानीं परमानन्दानुभवं परित्यज्य उद्वेगः" इति विचारयन्तइव देहेन्द्रियान्तःकरण-वृत्तीः भगवति योजितवन्तः. तत्र ईक्षणम् इन्द्रियवृत्त्युपलक्षणं, **स्नेहेन सम्बद्धाः** इति अन्तःकरणस्य. स्नेहो हि भगवन्तम् उपस्थापयति हृदये, बहिःस्थिते वा भगवति जीवम् आनयति ; उभयथापि अत्र न विरोधः. **विचेरुः** इति शरीरक्रिया ; भगवद्गमनोपयोगि-कार्यार्थं **तत्र तत्र** शरीरं चालितवन्तः इति अर्थः ॥१२॥

अतः परं[३] या शरीरस्थितिः सा अद्भुतकर्मलीलया[४] भगवतः. अतएव महति रोदने कर्तव्ये भगवदिच्छया अल्पमपि रोदनं न कृतवत्यः इति आह.

**न्यरुन्धन्नुद्गलद्बाष्पम् औत्कण्ठ्याद् देवकीसुते ॥**
**निर्यात्यगारान्माऽभद्रमिति स्याद् बान्धवस्त्रियः ॥१३॥**

**न्यरुन्धन्** इति. पूर्वस्थित्या **उद्गलदपि बाष्पं देवकीसुते ( अगारात् निर्याति ! )** गृहात् निर्गच्छति सति **अभद्रम्** अमङ्गलसूचकं **मा** भूद् **इति** नेत्रेष्वेव स्तम्भितवत्यः. एवं हि भगवदिच्छा प्रबला. स्वयं कुतः शरीरादिकं त्यक्ष्यन्ति, यतः **प्रेमौत्कण्ठ्याद् उद्गतं बाष्पमपि** निवारयन्ति. **देवकीसुते** इति युक्तमेव भगवद्गमनं, यतो महत्तपस्यया देवक्या पुत्रत्वेन प्रार्थितः पुत्रो जातः, कथं तां द्रष्टुं न गच्छेत् ? अतएव अस्माभिः अपशकुनं न विधेयम् इति भावः. **अगाराद्** इति, अस्मद्गृहे भगवान् समागतः, कृतः च उपकारः ; तादृशस्य स्वगृहगमने अपशकुनकरणम्

---

प्रकाशः

**वीक्षन्तः** इत्यत्र. **न विरोधः** इति, सम्बन्धस्य न विरोधः इति अर्थः ॥१२॥

---

१. अपिर्नास्ति ख. २. दर्शनादिति घ-ङ. ३. परम्परयेति घ. ४. क्रमलीलयेति घ.

अयुक्तं[१] **स्याद् इति** हेतोः **बान्धवस्त्रियो न्यरुन्धन्** इति सम्बन्धः. बन्धुत्वमपि स्फुरितम् इति भावः ॥१३॥

भगवतो निर्याणोत्सवे दशविधवाद्यानि वादितवन्तः इति आह **मृदङ्ग** इति.

**मृदङ्गशङ्खभेर्यश्च वीणापणवगोमुखाः ॥**
**धुन्धुर्य्याऽऽनकघण्टाद्या नेदुर्दुन्दुभयः समम् ॥१४॥**

तत्र **मृदङ्ग-भेरी-पणवाऽऽनक-दुन्दुभयः** पञ्च आनद्धभेदाः, **शङ्ख-गोमुखौ** सुषिरभेदौ, **वीणा** एका ततरूपा, **घण्टाधुन्धुर्यौ** घनभेदौ — एवं चतुर्विधमपि वाद्यम् उद्गतम्. एतेषां लक्षणानि वाद्याध्याये ( संगीतरत्ना. ६ ) प्रसिद्धानि ॥१४॥

उत्सवे स्त्रीणां दर्शनं वर्णनीयम् इति पुष्पवृष्टिसहितं तद् आह.

**प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ॥**
**ववृषुः कुसुमैः कृष्णे प्रेमव्रीडास्मितेक्षणाः ॥१५॥**

**प्रासादेति. शिखरम्** अन्तिमगृहम्. **कुरुनार्य** इति, कुलस्त्रीणां बहिर्गमनाभावः. पुष्पवृष्टौ सत्यां भगवान् आत्मानं पश्येद् इति ( **दिदृक्षया!** ) **कुसुमैः ववृषुः. प्रेम-व्रीडा-स्मितानि** गुणकार्याणि[२] **ईक्षण**सहकारीणि. प्रेमादिपूर्वकम् ईक्षणं यासां ; भक्ति-धर्म-ज्ञानप्रकारैः बहुविधैः भगवान् दृष्टः

प्रकाशः

**मृदङ्गेत्यत्र.** भेर्याः आनद्धभेदे गणना "ताड्यमानसु भेरीषु" ( महाभा. ७।८८।१ ) इति भारते प्रयोगाद् ज्ञेया ॥१४॥

**प्रासादेत्यत्र. भक्तिधर्मज्ञानेत्यत्र धर्म**पदेन स्त्रीस्वभावरूपो धर्मो गृह्यते ॥१५॥

लेखः

**न्यरुन्धन्** इत्यत्र. **अयुक्तं न स्याद्** इति, **अयुक्तम् अपशकुनकरणं** मा भूद् इति अर्थः. 'नः' इति पाठे तु **नः** अस्माकम् इदं करणम् **अयुक्तं स्याद्** इति अर्थः ॥१३॥

१. अयुक्तं न स्याद् इति पाठः लेखे - सम्पा.	२. सत्त्वरजतमोगुणकार्याणि इति अर्थः - सम्पा.

इति अर्थः ॥१५॥

पुरुषाणां कृत्यम् आह त्रिभिः.

**सितातपत्रं जग्राह मुक्तादामविभूषितम् ॥**
**रत्नदण्डं गुडाकेशः प्रियः प्रियतमस्य ह ॥१६॥**
**उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ॥**
**विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि ॥१७॥**

**सितातपत्रम्** इति. आरक्तो दण्डः, श्वेतं छत्रं, मुक्तादामानि परितो लम्बन्ते. **गुडाका** निद्रा तस्याः **ईशः** गतभ्रमो अर्जुनः.

उपचारेषु सर्वेषु महाराजत्वम् उत्तमम् ॥
तस्य चिह्नं [१] सितच्छत्रम् अर्जुनस्तेन बुद्धिमान् ॥(१०)॥

**प्रियः** प्रीतिविषयः, अनेन भगवता बहु कृतम् इति सूचितम्. **प्रियतमस्य** भगवतः ; स्व-युधिष्ठिराद्यपेक्षयापि भगवान् प्रियतमः अतो महाराजयोग्यं स्वस्य हीनत्वमपि बोधयित्वा (**जग्राह!**) धृतवान् इति अर्थः. **ह** इति आश्चर्ये, लौकिकत्यागात्. **व्यजने** चामर-व्यजने **परमाद्भुते** स्वतएव शीतलसुगन्ध-वायुजनके. **पथि** (**कुसुमैः!**) पुष्पैः **विकीर्यमाणो** गृहादिस्थितैः [२] **रेजे** परमशोभां प्राप्तवान्. सर्वाण्येव पुष्पाणि पुष्पवृष्टौ समागतानीति वसन्तेएव अयं भगवान् आविर्भूतः इति **मधुपतिः** इति उक्तम्. विष्णुपूजा वा तैः सर्वैः कृता, न अल्पार्थे पुष्पाणि विनियुक्तानि इति **मधुपतिः** इति उक्तं, "विष्णोः पदे परमे मध्व उत्स" (ऋक्संहि. १।१५४।५) इति श्रुतेः. सिंहासनोपवेशनापेक्षयापि पथि परमा शोभा जाता ॥१६-१७॥

एवम् अन्यवर्णानां कृत्यम् उक्त्वा ब्राह्मणानाम् आह.

---

प्रकाशः

**उद्धवः** इत्यत्र. **विष्णोः पदे** इत्यादि. अस्यां श्रुतौ मधुनः आनन्दादेः भगवत्पदाधिकरणकत्व-कथनात् तेषां तादृशज्ञानवत्ताज्ञापनाय 'मधु'पदम् उक्तम् इति अर्थः ॥१७॥

---

१. हि तच्छत्रमिति क-ग-घ. २. हट्टादिस्थितैरिति ग.

**अश्रूयन्ताऽऽशिषः सत्यास्तत्र तत्र द्विजेरिताः ॥**
**नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥१८॥**

**अश्रूयन्त आशिषः** इति. ब्राह्मणानाम् अयं जातिधर्मो यद् ईश्वरे आशीर्दानम् अविद्यमानार्थस्य आशंसनरूपम्. तदैव तेषां वाक्यं प्रमाणं स्याद्, अनधिगतार्थगन्तृत्वात्. प्रकृतेतु तदभावः, आशिषां सिद्धत्वेन अनुवादात्, तथापि यथादृष्टार्थत्व-पर्यवसानात्[1] **सत्याएव आशिषः**. अतएव श्रुताएव, न गृहीताः. अनुवादांशे **अनुरूपाः** आशंसायाम् **अननुरूपाः**, उभयोः समासः. **च**कारात् प्रत्येकरूपाश्च. प्रत्येकरूपत्वे हेतुः **निर्गुणस्य गुणात्मनः** इति, **निर्गुणस्य अननुरूपाः गुणात्मनो अनुरूपाः** अन्ये **च** तद्विपरीताः. सर्वभवनसमर्थत्वाद् भगवतः सर्वाएव आशिषः सत्याः अतः श्रुताः[2] इति अर्थः. **द्विज** इति वारद्वयजन्मना व्यग्राः सन्तो निर्धार्य वचने अशक्ताः इति सूचितम् ॥१८॥

एवं सर्वेषां कृत्यम् उक्त्वा – विरहादिसहनम् एवङ्क्रिया च, भगवत्सान्निध्येऽपि[3] बहिर्मुखत्वं च भगवदिच्छयैव, न अज्ञानाद्[4] इति वक्तुं – तासां ज्ञानम् आविष्करोति.

**अन्योन्यमासीत् सञ्जल्प उत्तमश्लोकचेतसाम् ॥**
**कौरवेन्द्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥१९॥**

---

प्रकाशः

**अश्रूयन्त** इत्यत्र. **तथापि** इति, अनुवादत्वेन अप्रामाण्यत्वेऽपि इति अर्थः. **गृहीताः** इति, प्रमाणत्वेन गृहीताः ॥१८॥

लेखः

**अश्रूयन्त** इत्यत्र. **अन्ये च** इति. केचन ब्रह्मणा अनुरूपा-ऽननुरूपाऽऽशीर्भ्यो विपरीताः आशिषोऽपि श्रावितवन्तः, ताअपि सत्याएव इति अर्थः. ताः “चिरं जीव” इत्यादि निर्गुणस्यापि अननुरूपाः भवन्ति, ताएव गुणात्मनः अनुरूपाः इति तद्विपरीतत्वम् ॥१८॥

---

१. यथादृष्टार्थत्वेन पर्य्यवसानादिति ख. २. शुभा इति ग.

३. अपिर्नास्ति घ-ङ. ४. ज्ञानादिति घ.

**अन्योन्यम् आसीद्** इति. यत्र स्त्रीणाम् एवं ज्ञानं तत्र किं वक्तव्यम् अन्येषाम् इति भावः. **सम्यक् जल्पः** स्वपक्षस्थापनपूर्वक-परपक्षदूषणवाक्सन्दर्भो जल्पः ; यद्यपि कथारूप-जल्पस्य मध्यस्थाद्यपेक्षा तथापि विचाररूप-जल्पस्य न अन्यसापेक्षत्वम् इति सुष्ठुत्वम्. "अपि चक्रुः प्रवचनमेकम्" (भाग.पुरा. १०।८४।११) इति न्यायो न अत्र किन्तु **अन्योन्यं** सर्वे श्रोतारः सर्वे वक्तारश्च इति. एतादृशकथने हेतुः **उत्तमश्लोकचेतसाम्** इति. यथा लौकिके स्त्रीणां निपुणता भवति तच्चित्तानां तथा भगवत्यपि इदमित्थतया ज्ञानं युक्तमेव[१]. किञ्च **कुरोः** महापुरुषस्य धर्मत्वेन परिणतस्य वंश्याअपि धर्मत्वेन[२] ज्ञानवन्तः. तत्रापि अयं युधिष्ठिरः (**कौरवेन्द्रः**!) परमैश्वर्यं प्राप्तः पूर्णज्ञानादिमान्. तस्य **पुरस्त्रीणां** भगवत्परत्वं युक्तमेव. ननु "अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्यः उपासते" (भग.गीता १३।२५) इति न्यायेन तासां ज्ञानम् अस्तु, नतु सञ्जल्पः. तत्र आह **सर्वश्रुतिमनोहरः** इति. **सर्वासां श्रुतीनां** वेदानां[३] **मनः** तात्पर्यं **हरति** इति, **सर्वेषां** वा **श्रुति-मनसी** स्ववशे करोतीति तथा. नहि एतादृशः सञ्जल्पो यथाकथञ्चिद् भवति किन्तु भगवच्चेतसामेव भवति ॥१९॥

तं सञ्जल्पम् आह दशभिः.

॥ **स्त्रियः ऊचुः** ॥

**स वै किलाऽयं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ॥**
**अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ॥२०॥**

**स वै किल अयम्** इति. "यस्मिन् विदिते सर्वम् इदं विदितं भवति" (शाण्डिल्योप. २।२) इति श्रुत्या मूलं भगवान् ज्ञातव्यः. तत्र को भगवान् इति अपेक्षायां यत्सान्निध्यमात्रेणैव उपासनोपदेश-विचारव्यतिरेकेण अस्माकं सर्वज्ञता **स** भगवान् अतो **अयमेव** भगवान्. किञ्च न केवलम् अस्मदुपपत्तिः[४] अपितु (**किल**!) सर्वलोकवेदप्रसिद्धिः[५] **वै** निश्चयेन.

---

१. युक्तमिवेति ग-घ-ङ. २. धर्मत्वमिति घ. ३. देवानामिति ख. घपुस्तके तु किमपि नास्ति. ४. अस्मदुत्पत्तिरिति घ-ङ. ५. वेदेति नास्ति ख.

तत्र स्वानुभवेन युक्तिः उक्ता. ननु✻ तथापि वेदादिप्रमाणेन, ''आत्मैव इदमग्र आसीत् पुरुषविधः'' (बृहदा.उप. १।४।१), ''पूर्वमेवाहम् इहासमिति तत्पुरुषस्य पुरुषत्वम्'' (तैत्ति.आर. १।२३।४), ''पुरुषो ह वै नारायणो अकामयत'' (नारायणाथर्व.उप. १) इत्यादिश्रुतिषु, पुरुषात् सृष्टिः उक्ता. ''जन्माद्यस्य यतः'' (ब्रह्मसूत्र १।१।२) इति न्याये च यो जगत्कर्ता स आत्मा, स भगवान्, तद् ब्रह्म इति. नच अत्र 'पुरुष'शब्दः आकृतिवाची, येन इदानीन्तनैः[१] अतिव्याप्तिः भवति, किन्तु पुरातनत्वेन = यत्किञ्चिद् मनसा वचसा निरूप्यं तस्मात् सर्वस्मादपि पुरातनत्वेन. तथाच व्यासस्माधौ[२] ''अपश्यत् पुरुषं पूर्णम्[३]'' (भाग.पुरा. १।७।४) इति. तस्माद् यः सनातनः पुरुषः स भगवान् न अन्यो[४] भवितुम् अर्हति ✻इति आशङ्क्य आह

प्रकाशः

**स वै किलेत्यत्र. प्रमाणे न** इति. अत्र **प्रमाणे** इति सप्तम्यन्तं, **न** इति भिन्नं पदं बोध्यम्. (अयं!) प्रतिपाद्यते इति शेषः[५]. तत्र गमकम् आहुः **आत्मा** इत्यादि. ''**पूर्वमेव**'' इत्यादिश्रुतिस्तु आरुणकेतुक-ब्राह्मणस्था. तथाच स पुरुषः पुराणो भविष्यति, न अयम् इति अर्थः. **अत्र** इति उक्तश्रुतिषु. **इदानीन्तनैः** इति ब्रह्म-विष्णु-महेशादिभिः. ननु अस्मदाद्यपेक्षया पुरातनत्वं तेषाम् अस्ति इति अतिव्याप्तिः दुर्वारा इत्यतः आहुः **यत्किञ्चिद्** इत्यादि. **कयाचिद्** इति. ''पूर्वमेव'' इति श्रुतेः

लेखः

**स वै किलाऽयम्** इत्यत्र. **येनेदानीन्तनैः** इति, सामान्यपुरुषाकृतिमद्भिः जीवैः इति अर्थः. **पुरातनपदेन** तादृशजीवानाम् अलक्ष्यत्वज्ञापनाद् इति

१. एतेन शङ्ककमते इदानीन्तन-ब्रह्माविष्णुमहेशादिषु सदातनब्रह्मलक्षणस्य अतिव्याप्तिः इति अर्थः -सम्पा. २. व्यासः समाधाविति घ. ३. पूर्वमिति ख. ४. अन्यः = इदानीन्तनः कौरवेन्द्रपुरस्त्रीभिः दृश्यमाणः द्वारकां जिगमिषुः कृष्णो न भवितुम् अर्हति -सम्पा.

५. अत्र 'प्रमाणेन' इति अथवा 'प्रमाणे न (अयं पुरुषः प्रतिपाद्यते)' इति वा —एवं द्वेधापि पाठः सम्भाव्यतेएव. तथापि 'प्रमाणेन' इति तृतीयान्तपदाङ्गीकृतौ न अध्याहारकल्पनाक्लेशः. 'प्रमाणे न (अयं प्रतिपाद्यते)' इति सप्तम्यन्तपदे तु अध्याहारकल्पनाक्लेशः स्पष्टएव -सम्पा.

**अयं पुरुषः पुरातनः**[१] इति. यो भवद्भिः उक्तः सो अयमेव. ''यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः, अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः'' ( भग.गीता १५।१८ ) इति अयमेव आह. ननु अस्य वैकुण्ठवासिनो मायाद्यनेकसचिवस्य कयाचिद्[२] उपपत्त्या पुरुषत्वं भवतु नाम, नतु भगवत्त्वम् इति आशङ्क्य आह **य एक आसीद्** इति. **यः** इति प्रसिद्धौ ; ''सदेव सौम्येदमग्र आसीत्, एकमेवाद्वितीयम्[३]'' ( छान्दो.उप. ६।२।१) इति **यः** श्रुत्या सजातीय-विजातीय-स्वगत-भेदराहित्येन निरूपितः **सो**ऽपि **अयमेव**. यतो **अयमेव एकः आसीत्**. ननु कथम् एतद् घटते, अधिकरण-काल-स्थिति-क्रियादि-सापेक्षत्वात् ? अतः आह **अविशेषे आत्मनि** इति. नहि अयं क्वचिद् अन्यत्र स्थितः[४] किन्तु **आत्मन्येव**. ननु तथापि आधारत्वादि-धर्मपुरस्सरे[५] आत्मनि स्थितो वक्तव्यः, ततः च पूर्वोक्तदोषः[६] इति ! तत्र आह **अविशेषे** सर्वाधारादि-धर्मविशेषरहिते. अनेन कालादीनामपि सत्त्वं तदानीं निवारितम्. ननु 'अग्रे', 'तदानीम्' इत्यादिशब्दाः कालवाचकाएव ! सत्यम्. तदानीं प्रमाणाभावाद् वक्त्राद्यभावाच्च केवलं[७] रूपं निरूपयितुं न शक्यते, पश्चात् कालादिनिरूपण-पुरस्सरं

प्रकाशः

कूर्मवाक्यत्वेन कूर्मस्य अवतारत्वरूपया मायाभर्तृत्वरूपया वा इति अर्थः. **एतद्** इति एकस्य सत्त्वम्. **अग्रे, तदानीम्** इति ''सदेव सौम्येदमग्रे'', ''नासदासीन्नो सदासीत् तदानीम्'' ( ऋक्संहि. १०।१२९।१ ) इत्यादि श्रौतशब्दोक्तिः. **प्रमाणाभावाद्** इत्यादि, विशेष्यान्वित-'एव'कारेण सदसन्निषेधेन च तदभावात्. **पश्चाद्** इति

लेखः

भावः. **इत्ययमेवाऽऽह** इति. एतत्परिदृश्यमानरूपएव अयं गीतायां साक्षाद् आहेति अयमेव पुरातनः पुरुषश्चेति न अत्र संशयः इति अर्थः. **सापेक्षत्वाद्**

१. पुरातनत्वेनेति इति ख. २. कथञ्चिदुपपत्त्येति घ. ३. एकमेवादिनायमितीति ख.

४. आस्थित इति ख. ५. धर्मपुरस्सर इति प्रथमैकवचनान्तः पाठः घ.

६. पूर्वोक्तिदोष इति ख. ७. केवले इति ख.

तज्जातम् इति इदानीन्तनं[१] व्यवहारम् आश्रित्य 'तदानीम्' इति उक्तम्. नतु कालसत्त्वं प्रतिपाद्यते, उभयप्रतिपादने वाक्यभेदप्रसङ्गात्. ततः पूर्वं[२] प्रमाणान्तरेण[३] असिद्धत्वात् न अनुवादः. "एकमेव[४] अद्वितीयम्" (छान्दो.उप. ६।२।१) इति विरोधश्च, कथं वा स्वयं स्वगतादि-भेदं निराकुर्वन् कालम् अनुवदेत्! तस्माद् इदानीं बोधनसमयानुसारेण[५] वाग्व्यवहारात् लोकप्रतीत्यर्थं सर्वाधारतया प्रतीयमान-कालोपरञ्जनतया[६] निरूपणं "तदानीम्" इति. आसनक्रियापि स्वरूपमेव. तस्मात् सुष्ठूक्तम् **अविशेषे आत्मनि**

प्रकाशः

"रेतोधा आसन्" (ऋक्संहि. १०।१२९।५) इत्यादिश्रुत्युक्त-वक्त्राद्युत्पत्त्यनन्तरम्. **तदानीन्तने**त्यादि. पाश्चात्य**व्यवहारम् आश्रित्य** ततः पूर्वस्थितिबोधनार्थं तथा **उक्तम्** इति अर्थः. अत्र गमकम् आहुः **उभये**त्यादि. तथाच "सदासीद्, अग्रे आसीद्" इत्येवम् उभयसत्ता-प्रतिपादने तथा इति अर्थः. ननु तत्र कालसत्ता अनूद्यतएव, नतु प्रतिपाद्यतइति न वाक्यभेदः इत्यतः आहुः **ततः पूर्वम्** इत्यादि. "सदेव" इत्यादिश्रुतिः सर्वतः पूर्ववृत्तान्तं वदन्ती 'एव'कारेण च इतरं व्यवच्छिन्दन्ती प्रमाणान्तरस्यापि[७] असत्तां पूर्वं बोधयति इति तदभावाद् न अनुवादः शक्यवचनइति कालप्रतिपादकत्वमेव आदरणीयं, तथा सति दोषः तदवस्थः इति अर्थः. कालप्रतिपादकत्वे दूषणान्तरम् आहुः **एकम्** इत्यादि. पूर्वं कालसत्ताप्राप्तौ तद्भ्रमनिरासाय अत्र वाक्यशेषे 'एक'पदम् अन्ययोगव्यवच्छेदपूर्वकम् उक्त्वा 'एक'पदस्य वाचकत्वाद् मुख्येतर-व्यवच्छेदएव वाक्यार्थइति भ्रमनिरासाय 'अद्वितीय'पदस्य अत्र श्रावणात् तद्विरोधः इति अर्थः. एतद् व्याकुर्वन्ति **कथम्** इत्यादि. **निराकुर्वन्** इति 'अद्वितीय'पदेन निराकुर्वन्. **बोधनसमयानुसारेण** इति बोधनमर्यादानुसारेण. ननु मा अस्तु कालः तथापि आसनक्रियायाः विद्यमानत्वात्

१. तदानीन्तनव्यापारमिति क-घ. इदानीन्तव्यापारमिति ग. तदानीन्तनव्यवहारम् इति प्रकाशे - सम्पा.

२. पूर्णमिति ख. ३. प्राणान्तरेण सिद्धत्वादिति ग. ४. एकमेवादिनायमिति ख.

५. बोधेति घ. ६. प्रतीयमानकालः परञ्जनतयेति ख.

७. कि.पाठानुरोधात्. प्रमाणान्तरस्थापि इति मुद्रितपाठस्तु अशुद्धः प्रतिभाति - सम्पा.

**एकएव आसीद्** इति.

एवं श्रौतप्रकारेण निरूप्य पुराणादिप्रकारेण निरूपयति **अग्रे गुणेभ्यः** इति. **गुणेभ्यः** सत्त्वरजस्तमोरूपेभ्यः **अग्रे** प्रथमम्. तदा गुणरूपेण स्वयं न आविर्भूतः इति अर्थः. अथवा ''पूर्ववद् वा'' (ब्रह्मसूत्र ३।२।२९) इति सिद्धान्तानुसारेण भगवान् स्वधर्मरूपः प्रथमं भवति, पश्चात् शक्तिरूपः कार्यरूपश्च. तद् आह **अग्रे गुणेभ्यः** इति, स्वधर्मनिर्माणात् पूर्वम् इति अर्थः. ननु असतः सत्तायाः अनङ्गीकाराद् जगतः पूर्वं सत्त्वम् अङ्गीकर्तव्यम्? अतः आह **जगदात्मनि** इति. कालनिराकरणार्थम् आह **ईश्वरे** इति.

---

प्रकाशः

कथम् एकसत्तासिद्धिः इत्यतः आहुः **आसने**त्यादि. **''पूर्ववद् वा'' इति सिद्धान्तानुसारेण** इति. ''पूर्ववद् वा'' इति अधिकरणे यः सिद्धान्तः तदनुसारेण. **जगदात्मनि** इति. अनारोपितानागन्तुकं रूपम् 'आत्म'पदेन उच्यते. तथाच जगतो अनारोपिता-ऽनागन्तुकरूपे इति अर्थः. **काले**त्यादि. कालस्यापि क्वचिद् उपादानत्वकथनात् तादृशः कालो भविष्यतीति कथम् एतदेकसत्तासिद्धिः इति आशङ्कायां तन्निराकरणार्थम् इति अर्थः. **ईश्वरे** इति. ''प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः, सतोऽभिव्यञ्जकः कालो ब्रह्मतत्त्रितयं त्वहम्'' (भाग.पुरा. ११।२४।१९) इति वाक्यात् सर्वेषामपि

लेखः

इति. एतस्य तत्सापेक्षत्वदर्शनात् पूर्णस्य तदपेक्षायाः अभावात् कथं सजातीयादि-भेदत्रितय-राहित्यं घटते इति अर्थः. **नाऽऽविर्भूतः इति अर्थः** इति. एवञ्च सृष्टिपूर्वकालिकावस्था उक्ता इति भावः. अत्र सृष्टेरेव कथनाद् अरुच्या पक्षान्तरम् आहुः **अथवा** इत्यादि. **पूर्ववद्** इति. अयं न्यायः तृतीयाध्यायद्वितीयचरणे अस्ति. अस्य अर्थः— ''अरूपवदेव हि, तत्प्रधानत्वाद्'' (ब्रह्मसूत्र ३।२।१४) इत्यादि पञ्चसूत्र्यां **पूर्वम्** उक्तो यः सिद्धान्तः तद्**वद् वा** ब्रह्म अस्तु इति. तत्र हि पूर्वं ब्रह्म अरूपवदेव अस्ति इति ''अरूपवदेव'' इति सूत्रेण उक्त्वा ततः ''प्रकाशवच्च अवैयर्थ्याद्'', ''आह च तन्मात्रम्'' (१५-१६) इति सूत्रद्वयेन स्वस्वरूपाभिन्न-स्वधर्मरूपेण जायते इति उच्यते. ततः (१७-१८) सूत्रद्वयेन प्रपञ्चरूपेण जायते इति

जीवनिराकरणार्थम् आह **निमीलितात्मन्** इति. **नितरां मीलिता** जीवरूपेण न प्रकटा आत्मानो यस्मिन्[१], लुप्तसप्तम्यन्तं पदम्. स्वशक्तिव्यावृत्त्यर्थम् आह **सुप्तशक्तिषु** इति, सुप्तासु शक्तिषु सतीषु[२] इति अर्थः. अनादिः अयं संसारप्रवाहः. नच महाप्रलयः एकएव, ब्रह्माण्डभेदानां सृष्टिभेदानां च श्रुत्यादिसिद्धत्वात्. अतो यस्यां कस्याञ्चित् सृष्टौ वक्तव्यायां[३] पूर्वावस्था वक्तव्या, ततोऽपि पूर्वं सृष्टिः आसीद् इति ज्ञापयति **सुप्तासु शक्तिषु** इति. पूर्वसृष्टिः शक्तिभिः उपसंहृता, ततो ब्रह्मणो अन्तिमदिवसस्य समाप्तौ (**निशि!**) रात्रिकाले च उपगते[४] ब्रह्माण्डभङ्गात् तत्त्वानामपि लयाद् दिवसोद्गमाभावेन रात्र्यपगमाभावात् स कालो रात्रित्वेन व्यपदिष्टः. शक्तयः च सुप्त-प्रतिबुद्धन्यायेन[५] (लौकि.न्या.साह. ४७०) भगवति उद्गच्छन्ति, सुप्तानां च भगवत्त्वमेव. अतः शक्तिशयनम् आरभ्य गुणोत्पत्तेः प्राग्

---

प्रकाशः

मूलरूपः स्वयमेव इति अर्थः. **जीवे**त्यादि. ननु तथापि ''नित्योऽनित्यानाम्'' (कठोप. २।२।१३) इत्यादिश्रुतौ जीवानां नित्यत्वनिरूपणात् तत्सत्तायां कथम् एतदेकसत्ता इति शङ्कायां जीवनिराकरणार्थम् इति अर्थः. **नितराम्** इत्यादि. ''सर्व एव आत्मानो व्युच्चरन्ति'' (शतपथब्रा. १४।५।१।२३) इति श्रुत्या व्युच्चरणोत्तरमेव अंशानां जीवरूपेण प्राकट्यात् ततः पूर्वम् अप्राकट्ये न तत्सिद्धिः इति अर्थः ॥२०॥

लेखः

उत्पत्त्या तत्र विचारितं, तथा इति अर्थः. ननु **निशि सुप्तशक्तिषु** इति **निशि** इति अयुक्तं कथम् उक्तं, महाप्रलयस्य हि ब्रह्मणः शतवर्षीयाहोरात्रस्य अपगमएव सम्भवात् तदानीमेव ब्रह्माण्डनाशसम्भवाद् इत्यतः आहुः **दिवसोद्गमाभावेन** इति. तथाच न अत्र सर्वात्मना निशैव उच्यते अपितु निशेव निशा इति सृष्टिदिवसोद्गम-पूर्वकालएव अत्र निशा इति भावः ॥२०॥

---

१. यस्मिंस्तस्मिन्निति ख. २. सत्स्वित्यर्थ इति क-घ. ३. वक्तव्यापीति घ.

४. चाऽऽगत इति क. चापगत इति ग-घ-ङ. ५. यथा पूर्वेद्युः आचार्याद् वेदम् अधीत्य सुप्त्वा परेद्युः प्रबुद्धो गुरुनिरपेक्षएव वेदं पठति इति सुप्तप्रबुद्ध / प्रतिबुद्धन्यायः - सम्पा.

भगवान् **एकएव आसीद्** इति उक्तं भवति ॥२०॥

एवं पूर्वावस्थां निरूप्य भक्तिसहिताम् इदानीन्तन-सृष्ट्यवस्थां वक्तुम् आदितः प्रकारम् आह.

**स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षतीम् ॥**
**अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत् ॥२१॥**

**सएव भूयः** इति. **सएव** पूर्वोक्तएव **भूयः** इति पूर्वमपि एवं सृष्टिं कृतवान्. तत्र प्रथमं (**निजवीर्य-!**) स्ववीर्यरूपं कालं सृष्टवान्, तेन कालेन **चोदितां** सुप्तां मुख्यां मायाशक्तिं कालः प्रेरितवान्. सा च माया द्विविधा : स्वप्रतिकृत्या सम्बद्धं भगवन्तं जगद्रूपेण करोति, स्वेच्छया प्रादुर्भूतान् जीवांश्च व्यामोहयति. तदा इयं सृष्टिः जीवार्था भवति. अतो मायायाः इदानीन्तनायाः[१] **जीवमाया** इति नाम. तया सृष्टिप्रकारम् आह **प्रकृतिं सिसृक्षतीम्** इति. यद्यपि प्रकृति-पुरुषौ सृष्टौ तथापि पुरुषो भगवद्भागे पतितइति **प्रकृतिं सिसृक्षतीम्** इति उक्तम्. तादृशीं मायां भगवान् **अनुससार** तद्व्यापारानन्तरं स्वयं तदनुकूलतया पितेव मिलितवान् इति अर्थः. अस्यां सृष्टौ विशेषप्रयोजनम् आह **अनामरूपात्मनि रूपनामनी**

प्रकाशः

**सएव** इत्यत्र. **तत्र** इति सृष्टिकरणे. **कालं सृष्टवान्** इति, तृतीयस्कन्धे कालनिरूपणे "पुरुषस्तदुपादानम् आत्मानं लीलयाऽसृजद्" (भाग.पुरा. ३।१०।११) इति वाक्याद् इति अर्थः. **द्विविधा** इति, वक्ष्यमाण-कार्यद्वयकरणाद् द्विविधा. **प्रतिकृत्या** इति पूरितपात्रसञ्चायकतुल्य-रूपया. **स्वेच्छया** इति अविद्या-काम-कर्मभिः भ्रमणात् स्वकामेन. **तदा** इति एवं कार्यद्वयकरणे. **जीवार्था** इति जीवपुरुषार्थसिद्ध्यर्था, केवलया तया सृष्टिकरणे मोक्षप्रतिबन्धाद् इति. **इदानीन्तनायाः** इति जीवसृष्टिकाल-सम्बन्धिन्याः. जगद्रूपेण भवनार्थं भगवतः तत्सम्बन्धप्रकारम् आहुः **तद्व्यापारे**त्यादि. "सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः, तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता" (भग.गीता १४।४) इति वाक्याद् इति अर्थः. वेदकरणप्रयोजनम् आहुः

१. तदानीन्तनाया इति ख.

**विधित्समानः** इति. पूर्वसृष्टौ न भगवतो अवतारो न नामानि रूपाणि[१] च, इदानीं सृष्टेः भक्तिप्रधानत्वाद् भगवतो अवतार-रूप-नामानि अपेक्ष्यन्ते. अतः पूर्वम् **अनामरूपात्मनि** स्वस्मिन् इदानीं **रूपनामनी विधित्समानः** इति. अतो जीवार्थमेव स्वस्यापि रूप-नामानि करोति इति अर्थः. किञ्च **शास्त्रकृत्** वेदकर्ता. केवलनाम-रूपकरणे[२] युगपदेव सर्वमुक्तिप्रसङ्गात् सृष्टिकालह्रासः प्रसज्येत! उत्पादिते तु वेदे स्वभाव-गुणभेदेन भिन्नेन[३] तेन व्यामोहितेषु कश्चिदेव मुच्यते इति क्रमेण सर्वमुक्तौ सृष्टिकालस्य न[४] ह्रासो[५] भवेद् इति अर्थः ॥२१॥

एवं पूर्वावस्थां सृष्टिं च उपपाद्य यदर्थम् इयं सृष्टिः तत्प्रयोजनं[६] साधनपरम्पराक्रमेण[७] निरूपयति.

**स वै अयं यत्पदमत्र सूरयो जितेन्द्रिया निर्जितमातरिश्वनः ॥**
**पश्यन्ति भक्त्युत्कलितामलात्मना नन्वेष स त्वं परिमार्ष्टुमर्हति ॥२२॥**

**स वै अयम्** इति. ननु केषाञ्चिद् मते सगुणादपि सृष्टिः सम्भवति, ब्रह्मविदाम् उपास्यः स[८] न भवति, तस्माद् ब्रह्मविदुपास्यत्वेनैव ब्रह्मत्वनिश्चयः, सच समाधिना उपास्य आन्तरः[९] आत्मा नतु बाह्यः इति आशङ्क्य

प्रकाशः

**केवलेत्यादि. तेन व्यामोहितेषु** इति. ''यन्नामभिर्ध्यायति धीरपार्थैः'' (भाग.पुरा. २।२।२) इति वाक्यात् तथा इति अर्थः ॥२१॥

लेखः

**सएव भूयः** इत्यत्र. **पूर्वसृष्टौ** इति. **भूयः**पदेन पूर्वसृष्टेः सूचनात् तत्सृष्टेः एतत्सृष्टेश्च वैलक्षण्यज्ञापनात् च तथा इति अर्थः. **अतो जीवार्थम्** इति, जीवानां भक्तिरसानुभवार्थम् इति अर्थः. नामरूपाद्यन्तरेण श्रवणादेः कर्तुम् अशक्यत्वाद् इति भावः. इदं स्त्रीभिः स्वानुभावानुसारेण उक्तम् ॥२१॥

---

१. न रूपाणि चेति क. न रूपाणीति ख.	२. केवलमिति ख.	३. भिन्ने इति ख-घ-ङ.
४. नेति नास्ति घ.	५. ह्रासाविति क.	६. तत्प्रयोजनपरम्परामिति घ-ङ.
७. साधनपरम्परां क्रमेणेति क-ग.	८. सन् स इति ग.	९. अन्तर इति ख-घ.

सएव अयम् इति आह. **सएव**[1] **वै** निश्चयेन **अयम्**. बाह्याभ्यन्तरदोषाभावः पूर्वमेव निरूपितः. बहुकालं समाधौ स्थित्वा, तत्र भगवन्तम् अनुपलभ्य, "कुत्र अयम् आत्मा भगवान् प्रकटः ?" इति विचार्य, योगजधर्मेण अवगत्य, भगवान्[2] साम्प्रतं कृष्णरूपेणैव प्रकटो न अन्यत्र इति निश्चित्य, समाधिफलं[3] (**यत्पदं!**) भगवच्चरणारविन्दम् **अत्रैव** आगत्य **पश्यन्ति**. अतः तद्वाक्याद् अवगम्यते "अयमेव भगवान्" इति. ननु तेषां पूर्णसाधनाभावात् समाधौ न आत्मसाक्षात्कारः इति चेत्, तत्र आह **सूरयो जितेन्द्रियाः निर्जितमातरिश्वनः** इति. ते हि उपनिषदर्थं विचारपूर्वकं[4] गुरुमुखात् सम्यग् अवगत्य **सूरयो** भूत्वा, पश्चाद् ब्रह्मचर्यादिना **जितेन्द्रियाः** भूत्वा, अपहतपाप्मानो यमादिक्रमेण **निर्जितो मातरिश्वा यैः** तादृशाः. तस्माद् न तेषां साधनाभावः. ननु चक्षुर्ग्राह्यः कथं भगवान्? तत्र आह **भक्त्युत्कलितामलात्मना** इति. नहि ते चक्षुषा भगवन्तं पश्यन्ति किन्तु अन्तःकरणेन. यथा आत्मसाक्षात्कारे "पराञ्चि खानि व्यतृणत् स्वयम्भूः तस्मात् पराङ् पश्यति नान्तरात्मन्, कश्चिद्धीरः प्रत्यगात्मानमैक्षद् आवृत्तचक्षुरमृतत्वमिच्छन्" (कठोप. २।१।१) इति श्रुतौ प्रत्याहारेण अन्तर्नीतेन चक्षुषा हृदयं प्रविष्टेन स्वात्मानं पश्यति, तथा बहिःस्थिते भगवति **भक्त्या उत्कलितेन (अमलात्मना!)** अन्तःकरणेन ऊर्ध्वं कलितेन बहिः आगतेन चक्षुःप्रविष्टेन भगवन्तं **पश्यन्ति**[5] इति अर्थः. ननु तथापि "तत्त्वमस्यादि"वाक्यैः (छान्दो.उप. ६।८।७) अनुपदिश्यमानः कथम् आत्मा भवेत्? तत्र आह

---

प्रकाशः

**स वै अयं यत्पदम्** इत्यत्र. ननु ब्रह्मविद्भिः समाधिना अन्तरात्मा उपास्यतइति बहिः विद्यमानस्य अस्य कथं तथात्वम् इति आकाङ्क्षायाम् आहुः **बाह्येत्यादि**. **पूर्वम्** इति, "स वै किलायम्" (श्लो. २०) इति श्लोके 'यः एक आसीद्' इत्यनेन इति अर्थः. **तद्वाक्याद्** इति, "आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा, असितो देवलो

---

१. स चेति घ.	२. भगवानिति नास्ति ख.	३. फलमिति नास्ति ख.

४. विचारपूर्वकमिति नास्ति ख.	५. पश्यतीत्यर्थ इति घ.

**ननु एष स त्वम्** इति. **ननु** इति कोमलसम्बोधने. **एषएव स**[१] आत्मत्वेन उपदिष्टः इति अर्थः. कुतः एतत्? तत्र आह **स त्वम्** इति. सएव त्वम्[२] इति अर्थः. ननु एवं जीवात्मत्वेन भगवति उपदिष्टे किं प्रयोजनं? तत्र आह **परिमार्ष्टुम् अर्हति** इति. आत्मनि प्रकृतिसम्बन्धेन यो अयम्[३] अनात्मवर्गः उल्लिखितः तं **परितः** सर्वतः सवासनं **मार्ष्टुं** दूरीकर्तुम् **अर्हति.** आत्मत्वेन उपदिष्टो भगवान् सवासनं[४] प्रकृतिकार्यं नाशयति इति अर्थः ॥२२॥

एवं सर्वप्रकारेण साक्षाद् भगवानेव अयम् इति उक्ते प्रपञ्चकर्तृत्वेन भोक्तृत्वादिभावापत्तौ जीवतुल्यता स्याद् इति आशङ्क्य आह **स वा अयम्** इति.

**स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ॥**
**य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ॥२३॥**

कर्तृत्वसमानाधिकरणं भोक्तृत्वं क्वचिदेव यत्र स्वार्थं क्रियते, भगवांस्तु जीवार्थं करोति इति न भोक्तृत्वम्. जीवरूपेणैव भोक्तृत्वं, तेन रूपेण दोषसम्बन्धे न दोषः. नहि दन्त-केशादीनां शुभ्रत्वादिसम्बन्धे अंशिनो देहस्य काचित् क्षतिः भवति. अंशेषु तु स गुणएव, न दोषः, तदर्थमेव तथा

प्रकाशः

व्यासः" (भग.गीता १०।१३) इति तेषां वाक्यात्. **त्वम्** इति, 'त्वम्'पदवाच्यत्वेन उपदिष्टः इति अर्थः ॥२२॥

**स वा अयं सखीत्यत्र. जीवतुल्यता स्याद्** इति, अहन्ता-ममताभ्यां संसारासक्तिः स्याद् इति अर्थः. **दोषसम्बन्धे** इति सप्तमी, **न** इति भिन्नं पदम्. **क्षतिः** इति सौन्दर्यहानिः. एतेन "तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगद्" (श्वेताश्व.उप. ४।१०) इत्यादिश्रुत्युक्तो अवयवावयविभावो जीव-ब्रह्मणोः बोधितः. **स** इति श्वैत्य-श्यामत्वादि-सम्बन्धवद् भोक्तृत्व-सम्बन्धः. गुणत्वे हेतुम् आहुः **तदर्थम्** इत्यादि. जीवार्थमेव प्रपञ्चस्य

१. " 'तत्'पदार्थः इति अर्थः" इति भा.पाठे पादटिप्पणी -सम्पा. २. " 'त्वं'पदार्थः इति अर्थः" इति भा.पाठे पादटिप्पणी -सम्पा. ३. न योऽयमिति ख. ४. सवासन इति ग-घ.

निष्पत्तेः. अंशांनान्तु[१] न स्वतो जगन्निर्माणसामर्थ्यं, पालकानामिव. ननु "प्रयोजनम् अनुद्दिश्य न[२] मन्दोऽपि प्रवर्तते" (लौकि.न्या.साह. ३५९) इति स्वप्रयोजनाभावे केवलं परार्थं कथं कुर्यात्? तत्र आह **सख्यनुगीतसत्कथः** इति. हे **सखि, अनु** पश्चात् = करणानन्तरं[३] **गीता** रागपुरस्सरम्[४] अभिव्यक्ता **सद्भिः कथा यस्य.** भगवतः प्रयोजनं "तथा कृते सन्तः कीर्तयन्ति" इति. **सखिभिः** वा[५] सख्यपर्यन्तं प्राप्तैः **अनुगीता** भगवन्निरूपणानन्तरं रागपूर्वकम् उक्ता[६] **सद्**रूपा भगवद्रूपा **कथा यस्य.** जीवानां मुक्तिदानार्थं[७] तथा करोति इति अर्थः. अस्मिन् पक्षे कृपया परदुःखदूरीकरणार्थं प्रवृत्तिः इति उक्तम्. ननु अत्र किं प्रमाणम्? नहि भगवान् स्वयम् आगत्य कथयति किन्तु कविनिबद्धवक्तृत्वमेव इति आशङ्क्य आह **वेदेषु गुह्येषु च गुह्यवादिभिः** इति. **गुह्येषु वेदेषु** परमोपनिषत्सु "विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे" (शतपथब्रा. ३।७।१।१७), "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" (बृहदा.उप. २।४।५) इति, "अम्भस्यपारे" (महाना.उप. १।१) इत्यारभ्य सर्वान् तत्तत्प्रकरणे स्थितान् भगवद्गुणान् अनूद्य "य एनं[८] विदुः अमृताः ते भवन्ति" (श्वेताश्वतरोप. ४।२०) इत्यन्ते भगवत्स्वरूपगुणज्ञानानन्तरं भगवत्स्वरूपं प्रतिपादितम्. तथा "भक्त्या मामभिजानाति" (भग.गीता १८।५५), "शृण्वन्ति

## प्रकाशः

भोग्यत्वेन निष्पन्नतया भोग्यत्वरूप-तत्स्वभावाभिव्यञ्जकत्वाद् इति अर्थः. ननु कर्तृत्व-भोक्तृत्वयोः साहचर्यस्य लोके दृष्टत्वात् तर्हि कर्तृत्वमपि अस्तु इति चेत्, तत्र आहुः **अंशानाम्** इत्यादि. तथाच व्याप्त्यभावे साहचर्यमात्रम् अप्रयोजकमिति न तत्सिद्धिः इति अर्थः. त्रिपदबहुव्रीहेः क्वाचित्कत्वाद् व्याख्यानान्तरम् आहुः **सखिभिः वा** इत्यादि. **अत्र** इति अनुगीतत्वे. **वक्तृत्वम्** इति, कविनिबद्धायाः कथायाः सखीनां वक्तृत्वम्.

१. न त्विति घ. २. एष नकारो "मन्दोऽपि न प्रवर्तते" इत्यन्यथोपन्यस्तः घ.

३. कारणानन्तरमिति ख-घ. ४. पुरस्सरमग्रेऽभिव्यक्त इति घ-ङ. ५. वेति नास्ति ख.

६. उक्त्वेति ख-ग. ७. मुक्तिदानायेति क-घ. ८. एवमिति घ.

गायन्ति''( भाग.पुरा. १।८।३५ ), ''सभाजयन्ते मम पौरुषाणि'' ( भाग.पुरा. ३।२५।३४ ) इत्यादिवाक्यैः च[1] गुह्यमेव कथयन्ति इति विशकलिततया निरूपितम्. ननु नानाप्रकरणेषु निरूपितो[2] भगवान् प्रकरणभेदाद् भिन्नो भवेत्, शब्दान्तराभ्यासवत् प्रक्रियायाअपि भेदकत्वात्! तत्र आह **य एकः** इति, सर्वप्रकरणेषु उक्तो भगवान् **एक**एव. ''सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषाद्'' ( ब्रह्मसूत्र ३।३।१ ) इत्यत्र निरूपितं, ''सर्वत्र प्रसिद्धोपदेशाद्'' ( ब्रह्मसूत्र १।२।१ ) इत्यत्र च. एकस्य सर्वत्र उपदेशे हेतुम् आह **ईशः** इति. ईशो हि सर्वैः अनुवर्तिभिः निरूप्यते. जगतो निर्माणे क्लेशाभावम् आह **आत्मलीलया** इति, ईश्वरलीलया. अन्येषां दुष्करत्वेऽपि भगवतस्तु सा लीला. **अत्ति** संहरति, आत्मनि स्थापयति वा[3]. यद्यपि गुणानुकथनद्वारा सज्जते तथापि **तत्र न सज्जते** ॥२३॥

एवं सर्वप्रकारेण भगवत्त्वे निरूपिते तादृशस्य अत्र आगमने को हेतुः इत्यत्र आह.

**यदा ह्यधर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्वतः किल ॥**
**धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद् युगे युगे ॥२४॥**

**यदा**[4] इति. स्थितिः हि भगवत्कार्या [5]सामान्य-विशेषभेदेन द्विविधा.

प्रकाशः

**विशकलिततया** इति भिन्नतया. **प्रक्रियायाः** इति प्रकरणस्य. **सर्ववेदान्तप्रत्यया**धिकरणं साधनाध्याय-तृतीयपादारम्भे. **सर्वत्र प्रसिद्धोपदेशा**धिकरणं प्रथमस्य द्वितीयपादारम्भे. **तत्र** इति सर्गादिषु ॥२३॥

**यदा हि** इत्यत्र. **सामान्य-विशेषभेदेन** इति. लोकस्थिति-

लेखः

**यदा** इत्यत्र. **स्थितिर्हि** इति. भगवतः कर्तुं योग्या या स्थितिः सा द्विधा इति अर्थः. तत्र सृष्टेः पूर्वं या स्थितिः सा विशेषस्थितिः, सृष्ट्यनन्तरं प्रपञ्चरूपेण आविर्भूय या स्थितिः सा सामान्या इति भागः.

१. चेति नास्ति घ. २. निरूपितमिति ख. ३. वेति नास्ति ख.

४. यदा ह्यधर्मेणेतीति ख. ५. सा सामान्येत्यादि ग.

तत्र सत्त्वादयो गुणाः अधिकृताः. ते च "रजस्तमश्चाभिभूय सत्त्वं भवति" (भग.गीता १४।१०) इत्यादौ [१]अन्योपमर्देनैव प्रादुर्भूताः. तत्र यदा सत्त्वं तिरस्कृत्य रजस्तमसी प्रादुर्भवतः तदा स्थितौ अधिकृतं सत्त्वं स्वतो दुर्बलं सद् भगवन्तं[२] निवेद्य समानयति, रजस्तमसोः सकार्ययोः उपमर्दनार्थम्. तदा (**सत्त्वतः!**) सत्त्वेन **रूपाणि धत्ते.** सत्त्वस्य शरीरसमवायित्वं वा, शरीरबोधकत्वं[३] वा, शरीरत्वं वा, प्रादुर्भावनिमित्तत्वं[४] वा भवति. तदा सत्त्वस्य अवयवाअपि पृथक्[५] पृथक् रूपाणि बिभ्रति[६]. सर्वयुगेषु एवं व्यवस्था. अतः सत्त्वसहायार्थं भगवदागमनम् इति अर्थः. **यदा** इति नैमित्तिकम् उक्तम्. निमित्ते सञ्जाते नैमित्तिकस्य आवश्यकत्वम् इति **हि**शब्दार्थः. धर्मस्य प्रतिच्छायारूपो अधर्मः सघृत-कज्जलवत् प्रत्यहम् उपचीयमानः सर्वासां प्रजानां राजनि वर्तुलं भवति. ततः च **अधर्मेण** बुद्ध्यावरकेण[७]

प्रकाशः

लौकिकस्थितिभेदेन. **तत्र** इति स्थिति-सर्ग-संहारेषु. **इत्यादीति** वाक्याद् इति शेषः. **तत्र यदा** इति उपमर्देन प्रादुर्भावे विशेषस्थितिकाले. **स्थितौ** इति लौकिकस्थितौ. **निवेद्य** इति स्वदौर्बल्यं निवेद्य. **नैमित्तिकम् उक्तं** 'यदा'पदेन कालविशेषबोधनाद् भगवदागमनं नैमित्तिकम् उक्तम् इति अर्थः. **वर्तुलम्** इति लोष्टवद् निबिडम्. **निमित्तम्** इति अवतरणे निमित्तम्.

लेखः

**निवेद्य समानयति** इति, स्ववृत्तान्तं भगवति निवेद्य तं **समानयति** प्रादुर्भावयति इति अर्थः. सत्त्वस्य सहकार्यत्वं कथम् इति आकाङ्क्षायां पक्षान् आहुः **सत्त्वस्य शरीरसमवायित्वं वा** इत्यादि. **पृथक्** इति. सपरिकरएव भगवान् अत्र समागच्छति इति तथा इति अर्थः. **घृतकज्जलवद्** इति. प्रत्यहमुपचीयमानमपि ज्ञानैः वृद्ध्या तद् यथा न ज्ञायते, कालेन वृद्धिगमितं

१. इत्यादि अन्योन्योपमर्देनेति घ-प्रकाशे. अन्योपमर्देनैव इति मुद्रितपाठः. गृहीतस्तु भा.पाठानुरोधाद् -सम्पा. २. भगवतीति ख. ३. शरीरशोधकत्वमिति घ. ४. प्रादुर्भवति मित्तत्वं वेति ख. प्रादुर्भावनिमित्तं वेति घ. ५. पृथग्रूपाणीति घ. ६. "राजसु निविशन्ते इति अर्थः" इति भा.पाठे पादटिप्पणी -सम्पा. ७. बुद्ध्या विवेकेनेति क-घ.

भ्राम्यमाणचक्षुषा परिदृश्यमानघटादिवत् पापव्याप्तदृष्ट्या वस्तूनां[१] याथात्म्यं न प्रकाशते. तदा हि (**तमोधियो जीवन्ति!**) अन्धाइव पदार्थान् गृह्णन्ति केवलं जीवनार्थम्. राजानो हि पालने[२] भगवदंशाः, तेषाम् अन्धत्वेन जीवनं निमित्तम्. (**नृपाः!**) नॄन् पान्ति इति पालितानामपि अधर्मनिष्ठता सूचिता. एवं सर्वतोऽपि अधर्मः उत्थितः. **तत्र** तन्निराकरणार्थम् **एषएव** परमात्मा, सगुणस्य तत्र सामर्थ्याभावात्. **किल** इति "यदा यदा हि धर्मस्य" (भग.गीता ४।७) इति वाक्यानि प्रमाणानि. **रूपाणि दधद्** वा सत्त्वेन **भगादि धत्ते. भगादि** वा **दधत्** सत्त्वेन **रूपाणि धत्ते.** एतद्व्याख्यानद्वयेऽपि भगादीनां कथनं व्यर्थम् इति चेद्, न, रूपाणि दधद् यदि भगं न धत्ते तदा उत्पन्नो भगः ऐश्वरो[३] भावो अधर्मेण

---

प्रकाशः

"**यदा यदा**" इत्यादि. तथाच अस्मिन् वाक्ये 'अहम्' इति पदाद् अस्यैव तत्कार्यं, न सगुणस्य विष्णोः इति अर्थः ॥२४॥

लेखः

च ज्ञायते तथा इति दृष्टान्तार्थः. **जीवनार्थम्** इति. यथा अन्धः सकलस्वव्यवहारात् परिभ्रष्टो जीवनमात्रव्यापारपरएव तिष्ठति तथा इति अर्थः. ननु राज्ञां भगवदंशत्वस्मरणात् कथमेवं निन्दा इत्यतः आहुः **राजानो** इति. यत्र स्वधर्मेण प्रजापालनं तत्रैव राजनि भगवदंशो, न सर्वत्र इति अर्थः. तथाच तदंशत्वं कार्यैकोन्नेयम् इति भावः. **निमित्तम्** इति. अन्धत्वेन यद् जीवनं तदेव अधर्मे निमित्तम् इति अर्थः. ननु एवं सति नृपत्वोक्तिः अनुपपन्ना इत्यतः आहुः **पालितानाम्** इत्यादि. **सूचिता** इति. **यदा ह्यधर्मेण** इत्यादिसमभिव्याहारात् सूचिता इति अर्थः. **ऐश्वरो भावः** इति, रूपनिष्ठम् ऐश्वर्यम् इति अर्थः. यद्यपि स्वरूपे ऐश्वर्यं नित्यमेव अस्ति "इमे चान्ये च भगवन् नित्याः यत्र महागुणाः" (भाग.पुरा. १।१६।२९) इत्यादिवाक्यात्, तथापि तन्न प्रकटयेत् चेत् तदा तथा इति अर्थः.

---

१. वसूनामिति ख. २. मालभते इति ख. ३. ईश्वरो भाव इति ख-ग-घ-ङ.

गृहीतो विपरीतफलः स्यात्. यदा वा भगं गृहीत्वा रूपाणि न गृह्णीयात् तदा राज्ञां वधो न स्यात्, मूलभूतत्वात् च तेषाम्. अतो अधर्मनिराकरणार्थं भगादीनां ग्रहणं, राजनिराकरणार्थं च रूपाणाम्. **भगस्तु** भगवदैश्वरो भावः ईश्वरधर्मः प्रमेयबलपोषकः. **ऋतम्** अनुष्ठीयमानो धर्मः पूर्वकाण्डार्थः प्रवृत्तिस्वभाव-प्रमाणबलपोषकः. **सत्यं** प्रमीयमाण उत्तरकाण्डार्थो निवृत्ति-प्रमाणबलपोषको ज्ञानरूपः. **दया** लौकिको धर्मो व्यवहारपोषकः. **यशः** तु भक्तिप्रतिपादकः पुष्टिधर्मः. एते हि पञ्चांशाः विद्यायाः[१]— भगवदिच्छा, धर्मो[२], ज्ञानं, दया, भक्तिः इति पूर्वोक्तानाम् उद्भवाय ॥२४॥

एवं भगवदवतारप्रयोजनम्[३] उक्त्वा प्रासङ्गिकानां फलम् आह **अहो** इत्यादि पञ्चभिः.

**अहो अलं श्लाघ्यतमं यदोः कुलम् अहो अलं पुण्यतमं मधोर्वनम् ॥**
**यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चङ्क्रमणेन चाञ्चति ॥२५॥**

अवतीर्णो हि क्वचिद् वंशे भवति, क्वचिद् देशे क्वचित् तिष्ठति, कैश्चित् सह व्यवहरति, तथापि न तेषु तात्पर्यं ; तेषान्तु भगवत्सम्बन्धमात्रेणैव कृतार्थता. तत्र प्रथमं जन्माधिकरणयोः वंश-देशयोः आह. **अहो** इति आश्चर्ये— कुत्र **यदुः** पित्रा शप्तो लोकैः निन्दितः, कुत्र अयम् उत्कर्षः (यदु!) भगवति अवतीर्णे तद्वंशीयं स्मृत्वा लोको नमस्यति! **अलं** पूर्णम् ; एतस्माद् उत्कर्षाद् अन्योत्कर्षो न वक्तव्यः [४]अधिकशौर्यादिहेतुकः. **श्लाघ्यतमम्** इति. अन्येषां हि वंशानां धर्माद्यर्थं कदाचिद् निरूपणम् आयाति, भगवतस्तु सर्वेषाम् अपेक्षितत्वात् तन्निरूपणार्थं यदुवंशः सर्वदा

लेखः

एतेन भगादेः आवश्यकत्वम् उक्तम्. रूपस्य तद् आहुः **यदा भगम्** इति. **न स्याद्** इति. ऐश्वर्यादिप्राकट्येन लोके माहात्म्यप्रचारेऽपि भगवत्प्राकट्यम् अन्तरा महासुराणां व्यामोहासम्भवाद् भगवद्द्वेषासम्भवात् तेषामपि माहात्म्यश्रवणे वधः न स्याद् इति भावः ॥२४॥

१. "सत्त्वकार्यत्वाद् विद्यात्वम्" इति भा.पाठे पादटिप्पणी - सम्पा. २. धर्मज्ञानं यदा भक्तिरितीति ख.
३. भगवताऽवतारेत्यादि ख. ४. आधिक्य- इति मुद्रितपाठः. गृहीतस्तु भा.पाठानुरोधात् - सम्पा.

स्तुतो भवति इति. एवं **मधोरपि वनम्**. सतां निवासाभावात् न मथुरा निर्दिष्टा. मधोः दैत्यस्य वनं, पश्चात् पुत्रादिभ्यो विभागः, अतो वृन्दावनादिकमपि मधुवनमेव. तस्य देशस्य **पुण्यतम**त्वेऽपि दैत्याक्रान्तत्वाद् अधमत्वं, वनत्वाद् भयानकत्वम्. दैत्य-भयाक्रान्ते भगवत्स्मरणमपि दूरे, कुतो भगवान्! **अलम्** इति, नहि एतस्माद् अन्यः उत्कर्षः सम्भवति. देवर्ष्यधिष्ठाने[१] हि देशस्य पुण्यतमत्वं भवति, तत्र सर्वदेवर्षीणां[२] भर्तरि भगवति किं वक्तव्यं? तत्र वंशस्य सर्वोत्कर्षे हेतुः **यद्** यस्मात् कारणात् **पुंसाम् ऋषभः स्वजन्मना अञ्चति** पूजयति गच्छति वा. अन्ये हि स्त्रीणां भर्तारः, पुरुषोत्तमस्तु पुंसाम्. तथाच जगति सर्वे[३] स्त्रीसहिताः पुरुषाः एतस्य भवन्ति, अतः तस्य पूजने सर्वैः पूजितं भवति, तद्गमने वा सर्वैः गतं भवति. मधुवनस्य उत्कर्षे हेतुः (**यद्!**) यस्माद् **एष श्रियः पतिः चङ्क्रमणेन अञ्चति,** चकाराद् जन्मना च. वनं हि सुन्दरसुवर्णाद्यभावाद् न श्लाघिष्ठं भवति, भगवति तु समागते लक्ष्मीरपि[४] समागतेति लौकिकीम् अलौकिकीं च शोभां प्राप्नोति इति अर्थः. चङ्क्रमणं च [५]अलसगतिः. श्रीपतित्वेन गोपिकाक्रीडापि सूचिता ॥२५॥

इदन्तु अत्याश्चर्यं यत्[६] कुशस्थल्याः उत्कर्षः. तद् आह.

**अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः ।**
**पश्यन्ति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥२६॥**

**अहो बत** इति. **अहो** इति पूर्ववद्, अधिको अत्र विशेषो **बत** इति. देश-प्रान्त-भूमिः[७] दोषाक्रान्ता सिकतामयी च. सा **स्वर्यशसः तिरस्करी** जाता तिरस्करणशीला. स्वर्गे हि देवाः तिष्ठन्ति, द्वारकायान्तु

---

प्रकाशः

**अहो अलम्** इत्यत्र. **सताम्** इति भगवदीयानां यादवानाम्. **तस्य पूजने** इति तत्कृते पूजने. **सर्वैः** इति देवैः ऋषिभिश्च ॥२५॥

---

१. देव ऋष्यधिष्ठाने इति ग-घ. २. सर्वदेवतर्षीणामिति ख. सर्वदेवऋषीणामिति घ.

३. सर्वस्त्रीसहिता इति ख. ४. लक्ष्म्यपीति क-ग-घ-ङ.

५. वाऽलसेति ख. बालगतिरिति घ. ६. यत इति क. ७. दिशः प्रान्तभूमिरिति ख.

देवाधिदेवः. स्वर्गेतु अप्सरसः, अत्रतु लक्ष्मीः. तत्रत्याः पतन्ति, अत्रत्याः मुच्यन्ते. सभापारिजातादयस्तु ततएव आनीताः ; अपकृष्टाद् उत्कृष्टे हि समानीयन्ते. इत्यादि अनन्तोत्कर्षः[१]. किञ्च **भुवोऽपि पुण्ययशस्करी**[२]. यथा देहे चक्षुः एकदेशोऽपि सर्वस्य ऐहिकामुष्मिकं फलं प्रयच्छति तथा[३] द्वारकया[४] सम्बद्धा सर्वापि भूः, धन्या पृथिवी यस्यां द्वारका वर्तते इति. तिष्ठतु दूरे अयम् उत्कर्षः, समाधिहृदयापेक्षयापि[५] इयम् उत्कृष्टा. तद् आह **पश्यन्ति** इति. समाधौ कश्चिदेव कदाचिद् आत्मानं पश्यति, अत्रत्यः सर्वदा सर्वोऽपि[६]. समाधौ स्थितिः अतिकठिना, वायु-मनसोः चञ्चलत्वात् प्रयासाधिक्यात् च, द्वारकायान्तु भगवदनुग्रहेण स्थितिः. अनुग्रहः च सुखात्मा स्थिरः. (**नित्यं यदनुग्रहेषितं!**) तद्दर्शनार्थमेव भगवान् तत्र स्थितः. **स्मितावलोक** इति भक्ति-ज्ञानप्रदत्वं सर्वेन्द्रियाह्लादकत्वं च. **स्वपति**त्वेन निश्शङ्कता दोषाभावः च. **प्रजा**पदेन च पाल्यता. **पति**पदेन च तदेकगतित्वम् ॥२६॥

एवम् अचेतनानाम् उत्कर्षम् उक्त्वा चेतनानां मध्ये भगवत्पत्नीनाम् अत्युत्कर्षम्[७] आह त्रिभिः **नूनम्** इति. स्त्रियो हि द्विविधा— मर्यादया पुष्ट्या च तदीयाः जाताः. तासाम् उभयासां यत्[८] सर्वपुरुषार्थनाशकम्

प्रकाशः

**अहो बत** इत्यत्र. **स्थितिः** इति भगवत्स्थितिः तत्रत्यानां वा ॥२६॥

लेखः

**नूनम्** इत्यत्र. **पुरुषार्थनाशकम्** इति. विवाहितानां स्वधर्मप्रकारेणापि अत्यन्तकामसेवनं सर्वपुरुषार्थनाशकम् इति लोकसम्प्रदायः. **असाधनम्** इति, विरुद्धार्थको अत्र नञ्, विरुद्धं साधनम् इति अर्थः. व्रजस्थानाम् अविवाहितानां

---

१. इत्याद्यनेकोत्कर्ष इति क. २. पुण्ययशस्तिरस्करीति क-ग-घ. ३. तथेति नास्ति क-ग-घ-ङ. ४. द्वारकाया सम्बद्धेति ख-ग. ५. अपिर्नास्ति घ. ६. सर्वाऽपीति क. ७. अप्युत्कर्षमिति क-ग-घ. ८. "तृतीयश्लोकोक्तं स्त्रीत्वम् इति अर्थः" इति भा.पाठीया पादटिप्पणी - सम्पा.

असाधनं च तदेव सर्वपुरुषार्थसाधकं जातम्. [१]एवं स्वरूपे भेदद्वयं साधने च एकम् इति (त्रिभिः!).

**नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः ॥**
**पिबन्ति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः सम्मुमुहुर्यदाशयाः ॥२७॥**

**अस्य गृहीतपाणिभिः नूनं (ईश्वरः समर्चितो!)** हरिः अर्चितः. गार्हस्थ्यफलं धर्मसाध्यं, भगवत्फलं भक्तिसाध्यं, तद् उभयम् एकीभूतम्. तत्र प्राधान्यं गार्हस्थ्यस्य, गोपिकावाञ्छितार्थभोगात्. अतो धर्महेतून् प्राधान्येन निर्दिशति. **व्रतं** तामसं, **स्नानं** राजसं, होमः सात्त्विकः. **आदिशब्देन** त्रयाणां भेदाः. एभिः कृत्वा पूर्वजन्मनि अयमेव भगवान् **ईश्वरः सम्यग् अर्चितः. हि** इति युक्तो अयम् अर्थः ; फलेन कारणानुमानं युक्तं, कारणेन कार्यानुमानं व्यभिचरत्यपि. यद्यपि एतैः भगवान् प्रीणाति तथापि[२] महापुरुषपूजायाः सिद्धिः कापि[३] आनुषङ्गिकी पूजैव उक्ता. अथवा व्रतादौ पूजा विहिता, तत्र व्रतम् अङ्गत्वेन कृत्वा पूजामेव मुख्यत्वेन कृतवत्यः. तत्र पूजा-व्रतयोः धर्म-भक्तित्वाद् भगवतः पतित्वेन सम्बन्धः. ननु कथम् एवम् अवगम्यते ''अयमेव ईश्वरः पूजितः'' इति? तत्र आह **याः** हे [४]**सखि! (मुहुः!) अधरामृतं पिबन्ति.** अमृतपानं हि

प्रकाशः

**नूनम्** इत्यत्र. **एवम्** इति. मर्यादा-पुष्टिभेदेन स्त्रीणां **स्वरूपे भेदद्वयम्. एकम्** इति गृहीतपाणित्वम्. **भगवत्फलम्** इति भगवत्सम्बन्धि-फलम्. ''सुपां सुलुग्'' (पाणि.सूत्र ७।१।३९) इति लुप्तविभक्तिकं 'सखि'पदम् इति आशयेन आहुः **हे सख्यः** इति ॥२७॥

लेखः

विरुद्धं साधनं च इति अर्थः. **भेदद्वयम्** इति. मर्यादा-पुष्टिभेदेन फलद्वयप्राप्तौ साधनत्वेन उच्यते इति अर्थः. **प्राधान्यम्** इति. कौरवेन्द्रपुरस्त्रीणां मर्यादायामेव अङ्गीकाराद् इति भावः ॥२७॥

१. ''श्लोकत्रयार्थः'' इति भा.पाठीया पादटिप्पणी - सम्पा. २. अपिर्नास्ति ख. ३. कार्य्यानुषङ्गिकीति - घ.४. सख्यः इति मुद्रिते प्रकाशे च पाठः. गृहीतस्तु भा.पाठानुरोधाद् - सम्पा.

ईश्वराराधनपूर्वक-धर्मकार्यम्, अधरामृतन्तु ततोऽपि. तद् अग्रे वर्णयिष्यामः. हे **सखि** इति स्पृहया[१] तुल्यदुःखत्वम् अस्माकमपि इति बोधितम्. अधरामृतम् अग्रे वर्णयिष्यामः. ननु धर्म-भक्तिफलमेव[२] एतद् अस्तु, किम् एतदाराधनेन इति आशङ्क्य प्रकारान्तरे व्यभिचारम् आह **व्रजस्त्रियः** इति. गोप्योऽपि कात्यायनीव्रते भक्त्या गानपूर्वकं व्रत-स्नान-पूजादिकं कृतवत्यः, परम् अर्चनं कात्यायन्याः कृतं, तेन तासाम् इच्छा न पूर्णा. यतः (**यद्!**) यस्मिन् अधरामृते **आशयो यासां** ताः केवलं (**सम्मुमुहुः!**) मोहमेव प्राप्तवत्यः ॥२७॥

अस्तु आसां भाग्यम्, इतोऽपि रुक्मिण्यादीनां महद्भाग्यं, या हि कालवशात् प्रवाहे पतिता अन्यत्र नीयमानापि बलाद् भगवान्[३] स्वयम् उद्यम्य आत्मसात् कृत्वा अमृतं पाययति, स्वसदृशान् पुत्रांश्च प्रयच्छति. तासाम् ईश्वरपूजनं महद् इति आहुः.

**या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः ॥**
**प्रद्युम्नसाम्बाम्बसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः ॥२८॥**
**एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ॥**
**यासां गृहात् पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥२९॥**

**या वीर्यशुल्केन** इति. **वीर्यमेव शुल्कं** कार्यनिर्वाहकं द्रव्यं, तेन **हृताः**. तेन राक्षसो विवाह उक्तः. **स्वयंवरे** इति गान्धर्वः. ''गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ'' (भविष्यपुरा. १।७।२०) इति मुख्यविवाहेन परिगृहीताः. ननु अन्यस्मै दीयमानाः कथं हृताः? तत्र आह **प्रमथ्य** इति. **चैद्यः** शिशुपालः, तत्**प्रमुखान्** जरासन्धादीन् **शुष्मिणः** कामुकान्. अयम् अर्थः— क्षत्रियाणां युद्धजयेनापि सत्त्वम्[४] उत्पद्यते,तेन धर्मादिकमपि सिद्ध्यति. स्त्रियो हि धर्म-भक्तियोग्याः, स्वयञ्च शिशुपालादयो दुरात्मानः कामुकाः ब्राह्मणवत् प्रतिग्रहेण प्राप्तुम् इच्छन्ति, अतो युक्तं भगवता हृता इति. **प्रद्युम्नः साम्बः अम्बश्च सुताः यासां**

१. स्पृहाया तुल्यदुःखित्वमिति ख. २. धर्मः भक्तीति ख.

३. भगवता स्वयमिति ख. ४. स्वत्वमिति क-ख-ग.

रुक्मिणी-जाम्बवती-मित्रविन्दानाम्. महांसएव अम्बः ; महान् अंसो यस्य इति यौगिकएव शब्दः तत्र गृहीतः. **याः च (सहस्रशः!)** षोडशसहस्रं **भौमवधे** जाते **आहृताः**. तासां गणना ऋषिभिरेव ज्ञायते[१] न अन्यैः इति **सहस्रशः** उक्तम्. तासां भगवदाराधने साधनं **स्त्रीत्वमेव**, तदपि (**अपास्तपेशलं**!) न[२] भगवतो भोगयोग्यम्[३], भगवत्सौन्दर्यापेक्षया तासाम् अपेशलत्वात्. शापेन, बन्ध्या, अन्यपरिग्रहेण च **निरस्तशौचं** शुद्धिरहितम्. **बत** इति खेदे, अस्मदादीनाम् एतदभावेऽपि[४] न भगवत्प्राप्तिः. अतो यथा भगवतः सामर्थ्यम् अतिनिकृष्टमपि उत्कृष्टं करोति[५] स्वेच्छया तथा **एताअपि** अत्यन्तनिकृष्टं **स्त्रीत्वं परं साधु कुर्वते.** साधुत्वं सत्सु सनकादिषु वर्तते, तदपेक्षयापि **परम्** उत्कृष्टं **कुर्वते.** तत्र हेतुः **यासां गृहाद्** इति.

---

लेखः

**प्रद्युम्न** इत्यत्र. ननु “वृको हर्षो अनिलो गृध्रो वर्धनोन्नाद एव च, महांस पवनो वह्निर्मित्रविन्दात्मजासूचिः” (भाग.पुरा. १०।५८।१६) इति मित्रविन्दासुतेषु अम्बस्य अश्रवणात् कुत्रत्य अयम् अम्बः इति आशङ्कायाम् आहुः **महांसएव अम्बः** इति. तत्र यो वै ‘महांसः’ इति नाम्ना गणितः सएव अत्र **अम्ब**पदेन उच्यते इति आशयः. ननु शब्दान्तरेण कथं तद्ग्रहणम् अतः आहुः **यौगिक** इति. अम्बो वृक्षविशेषः. स शब्दः स्थूलस्कन्धत्वादि-वृक्षधर्मपुरःसरम् अत्र प्रवृत्तइति मूलेऽपि ‘महांस’ इति यौगिकएव अभिप्रेतइति तथा इति अर्थः. एतेन **महांस** इत्यत्र ‘महांश’ इति क्वचित्पुस्तके पाठः प्रामादिकएव इति ज्ञेयम्. **शापेन बन्ध्या** इत्यादि. ता आदौ हि अप्सरसो देवतात्वात् तद्रूपेण क्रीडार्थं जाताः. ता आदौ अष्टावक्रं स्तुत्वा पश्चाद् उपहसितवत्यइति तच्छापाद् रोधः इति तथा. इदं पुराणादौ निरूपितम् ॥२८-२९॥

---

१. जायत इति ख. २. नेति नास्ति घ. ३. भोगभोग्यमिति ग.

४. तदभावेऽपीति ग-घ. ५. करोतीति नास्ति घ.

सन्तो हि भगवद्गृहे समागत्य कदाचिदेव पश्यन्ति, आसान्तु विपरीतं— भगवान् आसां **गृहात्** कदाचिदपि **न** अपगच्छति. प्रत्युत ( **जात्वपैत्याहृतिभिः साधु कुर्वते!** ) पारिजाताद्याहरणैः मानापनोदनमपि करोति. ननु तर्हि दोषमेव सम्पादयति, न गुणं, ततः किं तासां भाग्यम् इति आशङ्क्य आह **हृदि स्पृशन्** इति. तासां हृदि भगवान् स्थित्वा ताः स्पृशन्. तासां हृदि भगवान् अस्ति इति न तासां दोषः ॥२८-२९॥

**॥ सूतः उवाच ॥**

**एवंविधा गदन्तीनां स गिरः पुरयोषिताम् ॥**
**निरीक्षणेनाभिनन्दन् सस्मितेन ययौ हरिः ॥३०॥**

एवं भगवद्रूपं प्रासङ्गिकं च फलं[१] भगवान् – श्रुत्वा, ( **अभिनन्दन्!** ) सम्मत्या सत्यवादित्वं स्थिरीकृत्य, ( **सस्मितेन निरीक्षणेन!** ) मन्दहासेन च ताः वशीकृत्य भक्तिं च – दत्वा, तासां वचनं सत्यं कुर्वन् द्वारकाम् अगमद् इति आह. **एवंविधा** इति. अयम् एकः प्रकारः, एवम् अन्येऽपि प्रकाराः सन्ति, स्त्रीसमूहानां बहुत्वात्. सर्वाएव **गिरो** भगवता श्रुताः. ( **गदन्तीनां!** ) उच्चैः कथने हेतुः **पुरयोषिताम्** इति. **अभिनन्दनं** सत्यम् उक्तम् इति ॥३०॥

राज्ञो हि ज्ञानाद् भक्तिः अधिका इति ज्ञापयितुम् आह.

**अजातशत्रुः पृतनां गोपीथाय मधुद्विषः ॥**
**परेभ्यः शङ्कितः स्नेहात् प्रायुङ्क्त चतुरङ्गिणीम् ॥३१॥**

**अजातशत्रुः** इति नामविपरीतं कार्यं भगवदिच्छया. ज्ञानवत् स्वभावोऽपि

---

प्रकाशः

**एवंविधा** इत्यत्र. **पुरयोषिताम्** इत्यनेन तासां धाष्टर्यबोधनम् उच्चैः कथने हेतुः बोध्यः. अभिनन्दने हेतुः सत्यकथनं बोध्यम् ॥३०॥

लेखः

**अजातशत्रुः** इत्यत्र. **नामविपरीतम्** इति. 'अजातशत्रुः' इति नामविपरीतकार्यं सञ्जातशत्रुभिया भगवतो रक्षार्थं सेनादिप्रेषणादि-रूपम्.

---

१. फलमिति नास्ति ख.

तथा. **गोपीथाय** रक्षणार्थम्[१]. **मधुद्विषः** इति शङ्काभावाय[२]. **परेभ्यः** हतबन्धुभ्यः. **चतुरङ्गिणीं** हस्त्यश्व-रथ-पदाति-रूपाम् ॥३१॥

एतावत्कालं कौरव-यादवाः मिलिताः स्थिताः. अथ उभये पश्चाद् भिन्नतया गताः इति आह **अथ** इति.

**अथ दूरागतान् शौरिः कौरवान् विरहातुरान् ॥**
**सन्निवर्त्य दृढं स्निग्धान् प्रायात् स्वनगरीं प्रियैः ॥३२॥**

उभयत्रापि भगवानेव हेतुः. **दूरपर्यन्तम् आगतान्**. **शौरिः** इति [३]लोकव्यवहारदार्ढ्यं सूचितं— शूरः पाण्डवानां मातामहो भगवतः पितामहः, अतः उभये एकएव. न दूरागमनेन **आतुराः** किन्तु **विरहेण**. तथापि नहि आतुरैः सह गमनम् उचितम् अतः **आतुरान् निवर्त्य प्रियैः** सह (**प्रायाद्!**) अगमत्. कौरवाः स्वमनस्येव "वयं सह न गमिष्यामः" इति विरहातुराः, अतो भगवता निवर्तिताः. ननु "अत्यन्तम् आतुराः गृहेऽपि न गच्छेयुः" इति न आशङ्कनीयं, यतः ते **दृढं स्निग्धाः**. नहि दृढं स्निग्धः शीघ्रं नश्यति ॥३२॥

---

प्रकाशः

**अथ** इत्यत्र. **उभयत्र** इति, मिलने भिन्नतया गमने च इति अर्थः ॥३२॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे दशमाध्यायविवरणम् ॥

लेखः

ननु भगवन्माहात्म्यं पश्यतः क्षात्रधर्मे वर्तमानस्य तन्निमित्तं भयं कथम् अतः आहुः **ज्ञानवद्** इति. यथा भक्त्युद्रेकाद् ज्ञानं तिरोहितम् एवं स्वभावोऽपि इति भावः ॥३१॥

---

१. रक्षणार्थे इति क-घ. २. शङ्काभाव इति घ-ङ.

३. लौकिकव्यवहारेत्यादि ख. लोकव्यवहारार्थं दार्ढ्यमिति घ-ङ.

मार्गस्थदेशान् श्लोकद्वयेन निर्दिशति.

**कुरुजाङ्गलपाञ्चालान् शूरसेनान् सयामुनान् ॥**
**ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान् सारस्वतान् अथ ॥३३॥**
**मरुधन्वम् अतिक्रम्य सौवीराभीरयोः परान् ॥**
**आनर्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्विभुः ॥३४॥**

**कुरुजाङ्गले**ति. **कुरुजाङ्गल**देशो हस्तिनापुरदेशः [१]पाञ्चालादि-देशैकदेशः. तदा न एवं विभागेन मार्गे[२] स्थित[३] इति तान् उद्दिशति. **पाञ्चाल**देशः कम्पिलादेशः. **शूरसेनान्** वटेश्वरदेशान्. अन्यांश्च (**सयामुनान्!**) यमुनातीरदेशान् परपारस्थान्. ततः **कुरुक्षेत्र**देशः. सरस्वती-दृषद्वती-मध्यदेशो **ब्रह्मावर्तम्. मत्स्य**देशो विराटदेशः. ततः (**सारस्वतान्!**) सरस्वतीतीरदेशो अम्बिकावरादिः. **मरुः** अल्पोदकदेशः, **धन्वो** अनुदकदेशः[४]. भूमि-सिकताभेदनिरूपणाय **अथ**शब्दः. **सौवीर**देशः सुराष्ट्रदेशः. **आभीर**देशः कुन्तीपुरदेशः. ततोऽपि **परान् आनर्तान्** द्वारकादेशान्. मध्ये देशनामभिः उद्विग्नं सम्बोधयति हे **भार्गव** इति ; युक्तमेव भृगुवंशस्य तथात्वम्. किन्तु भगवानेव तान् देशान् **उपागात्**. एकेनैव दिवसेन तावद्दूरगमनेऽपि **मनाग्** एव **श्रान्तवाहो** जातो, न तु सर्वथा. किमिति एकेनैव दिवसेन गतः इत्यत्र हेतुः **विभुः** इति ॥३३-३४॥

---

लेखः

**मरुधन्वम्** इत्यत्र. **मध्ये देशनामभिरुद्विग्नम्** इति. लौकिकोचितं व्यासज्येत इति अभिप्रायेण उद्विग्नम् इति अर्थः. **तथात्वम्** इति, साक्षाद्भगवत्कथाम् अन्तरेण उद्विग्नत्वम् इति अर्थः ॥३३-३४॥

॥ इति श्रीप्रथमस्कन्धसुबोधिन्यां दशमाध्यायविवरणम् ॥

---

१. पञ्चालादीत्यादि क-ख-घ. २. मार्गे इति नास्ति ग. ३. स्थिति इति घ.

४. धन्वो तुरगदेश इति ख. धन्वोऽनुकदेश इति ग.

मध्ये तत्र[१] तत्र भगवत्पूजाम् आह.

**तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ॥**
**सायं भेजे दिशं पश्चाद् गविष्ठो गां गतस्तदा ॥३५॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे दशमोऽध्यायः ॥

**तत्र तत्र** इति. ह इति निश्चये ; कोऽपि देशो भगवत्पूजारहितो न जातः इति अर्थः. **प्रत्युद्यतम् अर्हणं यस्य** पूर्वमेव "भगवान् आयास्यति" इति मार्गएव पूजासाधनानि स्थापितवन्तः इति अर्थः. एवं पूजितो भगवान् **सायं**काले **पश्चाद्दिशं** पश्चिम-समुद्रतीरं **भेजे** तत्र विश्रामं कृतवान्. गोधूलिकायां नगरप्रवेशः कर्तव्यइति भगवान् यदा सन्ध्याप्रतीक्षया स्थितः तदा सूर्येण न विलम्बः कृतः इति आह **गविष्ठो गां गतः तदा** इति. गवि किरणे अवस्थिते[२] बिम्बमात्रं दृश्यते इति अर्थः. तादृशः सूर्यो **गां गतः** जले[३] प्रविष्टः, "अद्भ्यः वा एषः प्रातः उदेति अपः[४] सायं प्रविशति" (ऐत.ब्रा. ४।२०।९६) इति श्रुतेः. सुमुहूर्तं जातम् इति अर्थः ॥३५॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे दशमो अध्यायः ॥

## ॥ इति दशमोऽध्यायः ॥

---

१. तत्र पूजामाहेति घ.  २. अधि स्थिते इति ख.  ३. जलं प्रविष्ट इति घ.

४. अय इति ग-घ.

# ॥ अथ एकादशोऽध्यायः ॥

एवं कौरवभक्तानां सर्वसौख्यं निरूपितम् ॥
द्वारकास्थितभक्तानामेकादश उदीर्यते ॥(१)॥
प्रवेशे च प्रविष्टस्य स्थितस्याप्युत्सवस्त्रिधा[१] ॥
प्राकृतानामिव स्नेहः शास्त्रार्थं जानतामपि ॥(२)॥
कृष्णेच्छातस्तदित्युक्त्वा प्रत्यापत्तिर्निरूप्यते ॥

पूर्वाध्यायान्ते भगवतो द्वारकाप्रवेशार्थं सुमुहूर्तं निरूपितम्. अत्र प्रथमं प्रवेशे मङ्गलम् आह.

शङ्खनादस्तथा स्निग्धदर्शनं स्तोत्रमेव च ॥(३)॥

---

प्रकाशः

अथ एकादशाध्यायं विवरिषवो अवसररूपां सङ्गतिं बोधयितुं पूर्वाध्यायार्थम् अनुवदन्तः प्रस्तुतार्थम् आहुः **एवं कौरवे**त्यादि. कथम् उदीर्यते इति आकाङ्क्षायां तद्धेतून् अवान्तरार्थान् आहुः **प्रवेशे च** इत्यादि. एवं[२] त्रिधा उत्सवकथनेन कथं सर्वभक्तसौख्यम् अतः आहुः **प्राकृते**त्यादि. तथाच तेषां सात्त्विकादिभेदेन त्रैविध्यात् तेन तथा इति अर्थः. शास्त्रार्थं जानतां कथम् एवम् अत आहुः **कृष्णेच्छातः तद्** इति. **प्रत्यापत्तिः** पूर्वसजातीयसुखस्य पुनःप्राप्तिः. तथाच **एवं सर्वसौख्यं निरूप्यते** इति अर्थः. प्रवेशे उत्सवो मङ्गलात्मेति तानि गणयन्ति **शङ्खनादः** इत्यादि. **स्निग्धदर्शनं** स्निग्धविषयकं भगवत्कृतं दर्शनम्. **तदन्ते** इति तत्पुरोभागे (१-५).

लेखः

अथ एकादशाध्यायं विवरिषवः पूर्वोत्तरयोः सङ्गत्यर्थं पूर्वम् अनूद्य अध्यायार्थं प्रतिजानते **एवम्** इत्यादिना. **त्रिधा** इति प्रवेशकालीनः तदुत्तरकालीनः स्थितिकालीनः ... . **प्रत्यापत्तिः** इति द्वारकायां पुनर्भवः, पुनरागमनम् इति अर्थः (१-५).

---

१. उत्सवास्त्रिधेति ग.   २. ननु इति कि.पाठे - सम्पा.

दूरान्मङ्गलमेतद्धि कलशादिस्तथान्तिके ॥
दुःखिते[1] नगरे कृष्णो न प्रवेशमिहार्हति ॥(४)॥
अतः शङ्खनिनादेन सुखिनस्तान् करोति हि ॥
द्वारका जलदुर्गं हि तदन्ते नगरं महत् ॥(५)॥
आनर्ताख्यं तत्प्रवेशः पूर्वं पश्चात् पुरस्य हि ॥

अतो भगवान् आनर्तपुरनिकटे गत्वा पाञ्चजन्यध्वनिं कृतवान् इति आह.

**॥ सूतः उवाच ॥**

**आनर्तान् स उपव्रज्य स्वृद्धान् जनपदान् स्वकान् ॥**
**दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥**

**आनर्तान्** इति बहुवचनम् अवान्तर-ग्रामाभिप्रायम्. **स्वृद्धान्** सुष्ठु ऋद्धान् सस्य-धनादिभिः[2]. **स्वकान्** स्वकीयान् द्वारकानिवेशानन्तरं[3] वासितान्. ''यस्य ध्वनिर्दानवदर्पहन्ता[4]'' (विष्णुपञ्चा.स्तो. २) इति अमङ्गलरूप-दैत्यानां निराकरणार्थं **दरवरं** शङ्खश्रेष्ठं (**दध्मौ**!) वादितवान् ॥१॥

भगवता वाद्यमानः शङ्खः केनचिद्[5] वर्णितः सोऽपि उपनिबद्धः.

**स उच्चकासे धवलोदरो दरोऽप्युरुक्रमस्याधरशोणशोणिमा ॥**
**दाध्मायमानः करकञ्जसम्पुटे यथाब्जषण्डे कलहंस उत्स्वनः ॥२॥**

**स उच्चकासे** इति, ऊर्ध्वम् = अत्यन्तं चकासे. **धवलम् उदरं यस्य** एतादृशो **दरः**. **उरुक्रमस्य अधरशोणेन** रूपेण **शोणिमा** शोणयुक्तः. करकमलद्वयस्य मध्ये **सम्पुटे**. **यथा** (**अब्जषण्डे उत्स्वनः कलहंसः**!) कमलसमूहे ऊर्ध्वं शब्दायमानो हंसो भवति ॥२॥

पाञ्चजन्यध्वनिं श्रुत्वा सर्वे देश-नगरवासिनो निश्चयेन भगवन्तम् आगतं ज्ञात्वा परमानन्दनिर्वृताअपि दर्शनार्थम् अग्रे गताः इति आह.

---

श्रीगोकुलनाथानां टिप्पणी

एकादशे अध्याये **तदन्ते** इति, तत्समीपे जलाद् बहिः इति अर्थः (५).

---

१. दुःखित इति ख. २.स्वस्येति ख. ३.द्वारकाप्रवेशानन्तरमिति क-ख.

४. विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ता, तं पाञ्चजन्यं शशिकोटिशुभ्रं शङ्खं सदाहं शरणं प्रपद्ये (श्रीविष्णुपञ्चायुधस्तोत्र २) - सम्पा. ५. केनचिदष्मितिरिति ख.

तमुपश्रुत्य निनदं जगद्भयभयावहम् ॥
प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥३॥
तत्रोपनीतबलयो रवेर्दीपमिवादृताः ॥
आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥४॥
प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ॥
पितरं सर्वसुहृदमवितारमिवार्भकाः ॥५॥

**तम् उपश्रुत्य** इति. यस्मिन् श्रुते मृत्युभयमपि गच्छति, किम् अन्यद् भयम् इति आह **जगद्भयभयावहम्** इति. पाञ्चजन्यं हि आयुधं शत्रुवधार्थं निष्पादितं घातकस्वभावं, तद् अत्र मङ्गले कथम् उपयुज्यते इति आशङ्क्य अत्रापि घातकरूपेणैव मङ्गलत्वम् इति जगतो यद् भयं तस्य भयम् आवहति इति उक्तम्. **प्रत्युद्ययुः** अन्योन्यं **प्रति**कूलतया **उद्** ऊर्ध्वम् अग्रे **ययुः**[१], "या[२] प्रापणे" (पाणि.धा.पा.अदादि.प.से. १०७४), अन्योन्योपमर्देन अहमहमिकया अग्रे गताः इति अर्थः. **सर्वाः** इति न अत्र अवान्तरजातिः नियामिका, भर्तृत्वस्य तुल्यत्वात्. शास्त्रार्थपरिपालनाय सर्वे (**उपनीतबलयोः**!) उपायनपाणयः समागताः. **तत्र** उच्चावचत्वसिद्धये दरिद्राअपि सम्भवन्ति, तेषाम् उपायनं[३] भगवतः क्व उपयोगाय इति आशङ्क्य आह **रवेः दीपम्** इति. **बलिः** पूजासाधनद्रव्यम्. कयाचित् क्रियया हि भिन्नो भगवति सम्बध्यते तदैव हि परमानन्दः. तत्र दृष्ट्या

श्रीगोकुलनाथानां टिप्पणी

**कयाचिद्** इति. भेदं प्राप्य आस्थितः पुरुषः **कयाचित् क्रियया भगवति सम्बध्यते तदा परमानन्दो** भवति इति अन्वयः.

प्रकाशः

**तत्र उपनीते**त्यत्र **तत्र** इति मूलस्थपदस्य भगवन्निकटे इति अर्थः.

लेखः

**तत्रोपनीत** इत्यत्र. **कयाचित्क्रियया** इति. सृष्टिम् आरभ्यैव भगवतो वियुक्तो हि जीवः **कयाचित्** परम्परयापि **क्रियया सम्बध्यते तदैव**

१. अयुरिति घ. २. अयगताविति घ. ३. उपादानमिति ग.

इन्द्रियसम्बन्धेऽपि देहसम्बन्धसिद्ध्यर्थम् उपायनानयनम्[१]. सूर्योद्देशेन दीपदानं विहितम्. नहि दीपेन सूर्यस्य किञ्चित् कार्यं सिद्ध्यति तथापि "त्वत्परोक्षे वयम् अनेन जीवामः" इति दैन्यख्यापनेन दयोत्पत्तौ हेतुः भवति. तथा भगवत्यपि स्वविद्यमानद्रव्येण उपढौकनम्. तदा भगवता ताः **सर्वाः आदृताः** आदरेण सुखिताः कृताः. तेषां पूर्णमनोरथानां यत्कार्यं तद् आह **आत्मारामम्**

श्रीगोकुलनाथानां टिप्पणी

**देहसम्बन्ध** इति. उपायनं स्वहस्तेन गृह्णीयाद् इति भावः.

प्रकाशः

**सूर्योद्देशेन** इत्यादिना **उपढौकनम्** इत्यन्तेन व्याख्यानेन इदानीन्तनैरपि एवम्भावेन उपढौकनं कार्यम् इति शिक्षा बोधिता. **कार्यम्** इति भगवता कार्यम्. तथाच **निजलाभेन** भगवल्लाभेन **आत्मारामं पूर्णकामं** यथा स्यात् तथा **आदृताः** इति योजना बोध्या इति अर्थः. एवं श्लोकद्वयस्य प्रत्येकवाक्यत्वपक्षे द्वितीयश्लोके तिङन्तक्रियाविरहेण क्लिष्टमिव मन्वानाः युग्मवाक्यत्वम् अङ्गीकृत्य पक्षान्तरम् आहुः **अथवा** इत्यादि. ननु **आदृताः** इत्यन्तम्

लेखः

**परमानन्दः** इति अर्थः. **देहसम्बन्धसिद्ध्यर्थम्** इति. भगवदुपायनानि हस्ते गृहीत्वा साम्मुख्यगमनेन देहसम्बन्धो जातः इति भावः. **अनेन** इति, दीपेन इति अर्थः. **यत्कार्यम्** इति. भगवता तेषां मनोरथे पूरिते तैरपि भगवति आत्मारामत्वादि-पूर्णगुणकत्व-ज्ञानपुरःसरं निरुपधि-स्तवनमेव कर्तव्यम् इति स्तवनोद्यमम् आह इति अर्थः. एवञ्च **तमुपश्रुत्य** इत्यादिसार्धेन भगवत्साम्मुख्यवर्णनं तथा **आत्मारामम्** इत्यादिसार्धेन स्तुत्युद्यमनिरूपणम् इति सिद्ध्यति. एवञ्च **आत्मारामं पूर्णकामं** भगवन्तं **प्रीत्युत्फुल्लमुखाः प्रोचुः** इति सम्बन्धः इति भावः. अस्मिन् पक्षे **आत्मारामादिपदानां** यो अर्थः सो अत्रैव स्पष्टीभविष्यति **स्तोत्रपक्षे** इत्यादिग्रन्थेन. अथवा श्लोकं भक्त्या उभयतः सम्बन्धे क्लेशाद् द्वाभ्यामेव साम्मुख्यवर्णनम् अस्तु, **प्रीत्युत्फुल्ल** इति एकेन च स्तोत्रोद्यमः इति आशयेन पक्षान्तरम् आहुः

१. उपायनमिति ख.

इति. अथवा पूर्वमेव **आदृताः आत्मारामं प्रत्युद्ययुः** इति सम्बन्धः. स्तोत्रोपक्रमस्तु **प्रीत्युत्फुल्ले**ति. उत्कृष्टैरपि उपनीते उपायने भगवतो अपेक्षा नास्ति इति वक्तुं तं विशिनष्टि **आत्मारामं पूर्णकामम्** इति. उभये हि विषयान् न अपेक्षन्ते— येषां विषयापेक्षैव नास्ति, ये वा पूर्णविषयाः. तत्र विषयापेक्षाभावः "परं दृष्ट्वा निवर्तते" (भग.गीता २।५९) इति वाक्याद् भगवति प्राप्ते भवति. भगवांस्तु प्राप्तभगवान्[१] आत्मारामः, अतएव पूर्णकामः, "आत्मरामः[२] आप्तकामः" (बृहदा.उप. ४।३।२१) इति श्रुतेः.

प्रकाशः

एकं वाक्यम् **आत्मे**त्यादि **अर्भकाः** इत्यन्तम् अपरम् —इत्येवम् आदरणीयं दूरान्वयदोषाभावाद्, इति आशङ्कायाम् आहुः **स्तोत्रे**त्यादि. तथाच एवम् अन्वयाङ्गीकारे कर्माकाङ्क्षायाः पूर्वार्धेन पूरणात् **पितरम्** इत्याद्यर्धस्य असङ्गतिः, पुनः आदाने समाप्तपुनरात्तत्वं दूरान्वयश्च, इत्यतः न अयं पक्षो युक्तः, किन्तु पूर्वोक्तएव युक्तः इति अर्थः. अस्मिन् पक्षे प्रतिर्लक्षणे कर्मप्रवचनीयः, तद्योगे इयं द्वितीया इति आशयेन द्वितीयान्तानाम् अर्थम् आहुः **उत्कृष्टैः** इत्यादि. अवान्तरप्रकरणविचारे उक्तश्रुतेः जीवप्रकरणस्थत्वेन

लेखः

**अथवा** इत्यादि. **पूर्वमेव** इति पूर्वस्थित्या इति अर्थः. यद्वा अवतारात् **पूर्वमेव** अन्तर्यामिरूपेण सर्वे जीवा **आदृताएव** इति तादृशा**त्मारामं प्रति उद्** उत्सुकतया **ययुः** इति अर्थः. इदमेव ज्ञापयितुम् **आत्माराम**पदम् इति भावः. **स्तोत्र** इति. अस्मिन् पक्षे स्तोत्रोपक्रमस्तु **प्रीत्युत्फुल्ल** इति एकेनैव अस्तु इति अर्थः. **परं दृष्ट्वा** इति. "विषया विनिवर्तन्ते निराहारस्य देहिनः, रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते" (भग.गीता २।५९) इति गीतावाक्याद् निराहारादिना इन्द्रियशुष्कतायां विषयाः रसाभिलाषं वर्जयित्वैव विनिवर्तन्ते, तथा रसोपि. रसस्तु परं दृष्ट्वैव निवर्तते इति विषयाभिलाषाभावो भगवति प्राप्ते सति अन्यस्य भवति इति भगवतः

१. प्राप्तमिति ग. २. आत्मकाम इति क-ग-घ. खपुस्तके तु संशोधितः पाठ आत्मराम इति. मूलसंवादीति स एवेहाऽऽदृतः.

अथवा कामस्तु पूर्वं सृष्ट्यर्थं[१] भगवति उत्पन्नः, स सर्वसृष्टपदार्थान् व्याप्य स्थितः 'पूर्ण' इति उच्यते. स जीवेषु कदाचित् न पूर्णो भवति, सर्वजीवार्थत्वाद् विषयाणाम्. भगवतस्तु सर्वं[२] प्राप्तम् इति पूर्णत्वम्. उभयथापि हेतुः **निजलाभेति**. निजं स्वरूपं, निजाः वा सर्वे[३] प्रापञ्चिकाः पदार्थाः. **नित्यदा**[४] इति तिरोभावानुत्पत्तिदशायामपि[५], अव्यक्तादिनिधनत्वात्. अव्यक्तस्य[६] च भगवत्त्वाद् विषयपक्षे 'सदा' इति उक्तम्.

श्रीगोकुलनाथानां टिप्पणी

**कदाचिद्** इति, कदाचिदपि इति अर्थः ॥४॥

प्रकाशः

अनुपष्टम्भकत्वम् इति अरुच्या पक्षान्तरम् आहुः **अथवा** इत्यादि. **तिरोभावानुपपत्तिदशायाम्** इति, द्वन्द्वान्ते श्रूयमाणस्य **दशा**शब्दस्य प्रत्येकम् अभिसम्बन्धः. **अव्यक्तादिनिधनत्वाद्** इति, अव्यक्तम् आदिनिधनयोः येषां पदार्थानां तादृशत्वाद् इति व्यधिकरणपदो बहुव्रीहिः. **उक्तम्** इति, व्याख्यातम्

लेखः

तदभावे किं वाच्यम् इति अर्थः. **सर्वजीवार्थत्वाद्** इति. सर्वे हि विषयाः न एकजीवादृष्टेन कल्पिताः किन्तु सर्वजीवभोगार्थम्, अतो न प्रत्येकं जीवेषु स कामः पूर्णो भवति अतः भगवानेव पूर्णकामः इति अर्थः. **प्रापञ्चिकाः** इति, तेषामपि आत्मत्वाद् इति भावः. **तिरोभाव** इति. तिरोभावेन कृत्वा या अनुत्पत्तिदशा, अर्थात् प्रापञ्चिकपदार्थानां, तस्यामपि दशायां प्रापञ्चिकपदार्थलाभेन आत्मारामम् इति अर्थः. अत्र हेतुं पूरयन्ति **अव्यक्तादि** इति. **विषयपक्षे** इति, **निज**पदेन प्रापञ्चिकपदार्थग्रहणपक्षे इति अर्थः. स्वरूपग्रहणपक्षे तु आशङ्कायाएव अनुदयात् **नित्यदा** इत्यस्य अनतिप्रयोजनत्वम् इत्यपि **पक्ष**पदेन सूचितं ज्ञेयम्. पूर्वमेव उपन्यस्ते स्तोत्रपक्षे **आत्माराम**त्वादि विशेषणार्थसङ्गतिः न प्रदर्शितेति तत्र पक्षे तदर्थम् आहुः

१. सृष्ट्यर्थमिति नास्ति ग. २. सर्वं भगवतः प्राप्तमिति क-ग-घ. ३. सर्वे इति नास्ति ख. सर्वे पदार्था इति क. सर्वपदार्था इति ख. ४. सर्वे नित्यदेति ग-घ-ङ. ५. तिरोभावानुपपत्तीत्यादि ग-घ-प्रकाशे - सम्पा.. ६. अव्यक्तस्तस्य चेति ख. अव्यक्तस्य भगवत्त्वादिति ग.

अवतीर्णदशायामपि स्वरूपेएव स्थितत्वात् **नित्यदा** इति. स्तोत्रपक्षे समागतस्य क्लिष्टत्वम् आशङ्क्य तथात्वे स्तोत्रासम्भवात् तन्निवृत्त्यर्थम् उक्तम् **आत्मारामादि**. स्नेहम् उद्गिरन्त्यः स्तोत्रं कुर्वन्तीति तासां स्वरूपम् अनुवदति भगवत्प्रीत्यर्थं **प्रीत्युत्फुल्लमुखाः** इति. प्रीत्या हि उत्फुल्लमुखत्वं लोकसिद्धम्. येषां यद् विरहेण मुकुलता मुखस्य तेषां तद्दर्शनेन उत्फुल्लता. तदा हि मुखे स्थितं माधुर्यं प्रकटीभवति. ततः तत्सहितानि वाक्यानि मिष्टानि भवन्ति. किञ्च **हर्षगद्गदया गिरा** इति. स्तोत्रं हि गानात्मकं वेदे प्रसिद्धं स्थिरमनसां कर्मोपयोगि, नतु भक्तानां प्रेम्णा ससम्भ्रमचित्तानाम्, अतो **गिरा** इति उक्तम्. तत्रापि यो **हर्ष** आनन्दोद्गमः तेन **गद्गदया. गद्गद**शब्दो अनुकरणशब्दः शब्दे तथा ध्वनियुक्तत्वं वदति. ''गद व्यक्तायां वाचि'' (पाणि.धा.पा.भ्वादि.प.से.५२) इति 'गद'धातुः द्विरुक्तः आदरं बोधयति. एवं हर्षादराभ्यां परिगृहीता वाणी यथाकथञ्चित् निस्सरति. सा श्रोतर्यपि हर्षम् आदरं च जनयति. तद् उक्तं **गद्गदया** इति. धाष्टर्यदोषं वारयति **पितरम्** इति. यथा प्रोषिते पितरि समागते ''महाराजाधिराज[1]'' इति तत्पुत्राः उद्गच्छन्ति. अत्र तथा विकलत्वं नास्ति इति दृष्टान्तान्तरम् आह **सर्वसुहृदम्** इति. **सर्वसुहृद्** गौः, ''गौर्वाव सर्वस्य मित्रम्'' (तैत्ति.संहि. २।५।२।६) इति श्रुतेः. तां यथा तद्वत्सः सन्ध्यापर्यन्तं क्षुधितः स्वजातिशब्दं कुर्वन् उपधावति. अत्र अपि दीनतमत्वाभावाद् दृष्टान्तान्तरम् आह **अवितारम्** इति. यथा अरण्यादौ भयस्थाने चौरादिभिः मार्यमाणाः

प्रकाशः

इति अर्थः. **निज**पदस्य स्वरूपवाचकत्वपक्षे अर्थम् आहुः **अवतीर्णे**त्यादि. अन्यैः आदृतत्वाद्, उत्तरार्धे दृष्टान्तवाक्यत्वाङ्गीकारेण दोषाभावात् च तृतीयामपि योजनाम् अङ्गीकृत्य तस्मिन् पक्षे अर्थम् आहुः **स्तोत्रे**त्यादि ॥५॥

लेखः

**स्तोत्रपक्षे** इत्यादि. अनेन व्याख्यानद्वयमपि तुल्यबलम् इति सूचितम् ॥४॥

१. महाराजाधिराजेऽपीति क-ख-ग.

**अर्भकाः** पूर्वपरिचितं रक्षणसमर्थं दृष्ट्वा उद्गच्छन्ति, वदन्ति च स्वखेदं, तद्वद् इति अर्थः ॥३-५॥

सर्वाः प्रजाः चतुर्विधाः (१-४) — (४) स्त्री-पुम्भेदेन प्रथमं द्विविधाः, पुरुषाः त्रिविधाः (१-३) ज्ञानि-विषयि-भक्तभेदेन. तत्र आद्यानां ज्ञानिनां वचनम् आह.

**नताः स्म ते नाथ सदाङ्घ्रिपङ्कजं विरिञ्चिवैरञ्च्यसुरेन्द्रवन्दितम् ॥**
**परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत् परप्रभुः ॥६॥**

**नताः स्म** इति. **ते अङ्घ्रिपङ्कजं नताः स्म.** "नमो नम इत्येतावत् सदुपशिक्षितम्" (भाग.पुरा. ५।३।४) इति सिद्धान्ताद् भगवति दृष्टे नमनमेव कर्तव्यं, सर्वज्ञत्वेऽपि भिन्नतया स्थापितत्वात् "किमासनं ते गरुडासनाय" (गरुडपुरा. ३।७।३६) इति वाक्यात् च. ननु किं फलार्थं नमनम्? तत्र आह हे **नाथ** हे पालक भर्तः. स्वतएव सर्वकामनापूरकत्वाद्[१] नित्यएव अयं नमस्कारः, न काम्यः[२] इति ज्ञापयति **सदा** इति. प्रवेशोऽपि न अपेक्ष्यते इति अभिप्रायः. ननु कथं ब्रह्मलोकादिगमन-फलपरित्यागेन सदा नमनेन[३] एवं स्थितिः प्राथ्यर्ते? तत्र आह **विरिञ्चि-वैरञ्च्येति. विरिञ्चिः** ब्रह्मा **वैरञ्च्यो** महादेवः **सुराः**

प्रकाशः

**नताः स्म** इत्यत्र. **तत्र आद्यानाम्** इति पुरुषेषु आद्यानाम्.

लेखः

**नताः स्म** इत्यत्र. **सर्वज्ञत्वेऽपि** इति. ज्ञानिपुरुषाणां हि इयं स्तुतिः, तेषां च सकलमाहात्म्यज्ञानवत्त्वेन विचित्रचरित्रादि-स्तुतिकरणमपि युक्तं, तथापि "नमो नम" इति सिद्धान्तस्य भिन्नतया सर्वोपरित्वेन स्थापनात् नमनमात्रमेव उचितम् इति भावः. वाक्यान्तरसम्मत्यापि अयमेव युक्तः सिद्धान्तः इति आहुः **किमासनम्** इति. **प्रवेशोऽपि** इति. "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" (भग.गीता १८।५५) इति वाक्याद् ज्ञानानन्तरं प्रवेशः फलं, तदपि दास्याग्रे न अपेक्ष्यतइति तथा इति अर्थः.

१. सर्वकामनापूर्वकत्वादिति ख. २. कामत इतीति ग. ३. नमनेनैवैवमिति क.

देवाः अन्ये **इन्द्रः** च —एभिः चतुर्विधैः उत्कृष्टैरपि **वन्दितम्**. तत्र गतानामपि एतदेव कार्यं, ततो दूरापेक्षया निकटेएव स्थित्वा नमनं वरम्! ननु[१] यद्यपि ज्ञानिनाम् ऐहिकामुष्मिक-फलविरागो भवति, भगवत्सायुज्यं च भक्तिरसाद् न अपेक्ष्यते, तथापि भगवता सह गमनसामर्थ्यं स्थानच्च्युतिहेतु-प्रतिबन्धाभावः [२]स्थित-ज्ञानादिसंरक्षणञ्च अपेक्ष्यतेएव, ततः तदर्थं कथं[३] न नमनम् इति आशङ्क्य आह **परायणम्** इति. **इह** संसारप्रवाहे **परं क्षेमम् इच्छतां** यत् **परायणम्** आश्रयभूतं, रक्षकम् इति यावत्. चरणारविन्दमेव सर्वसाधकं **क्षेमम् इह इच्छताम्** इति पदत्रयेण उक्तम्. तत्र **क्षेमपदेन** ज्ञानादिरक्षा, **इह** इति स्थानाद् अप्रच्च्युतिः, **इच्छताम्** इति सह गमनेच्छायां तत्सामर्थ्यदानं च. यद्यपि वाक्यार्थो न भवति तथापि पदार्थः. ननु देहस्य कालप्रवाहजातत्वाद् नमनसिद्ध्यर्थमपि देहस्थितिः काम्या इति चेत्, तत्र आह **न यत्र काल** इति. **यत्र** नमने स्थितौ भगवति नम्रत्वाद् भगवत्सेवकस्य कालस्य **न प्रभवः**. **परो** वासुदेवः **प्रभुः यस्य** ॥६॥

विषयपराः आहुः.

**भवाय नस्त्वं भव विश्वभावन त्वमेव माताऽथ सुहृत् पतिः पिता ॥**
**त्वं सद्गुरुर्नः परमञ्च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥७॥**

**भवाय नः त्वम्** इति. हे **विश्वभावन** सर्वानेव विषयसम्बन्धेन भावयसि = अधिकान् करोषि, अतो (नः!) अस्माकमपि उद्**भवाय भव.**

---

प्रकाशः

**वाक्यार्थो न भवति** इति, समभिव्याहारलभ्यो न भवति इति अर्थः. अत्र नमनमात्रवाक्यं स्त्रीणां, तत्पूर्वकं सर्वं ज्ञानिनाम् इति बोध्यम् ॥६॥

**भवाय** इत्यत्र- **उद्भवाय** इति. तथाच **भवाय भव** इति प्रार्थनमेव

लेखः

**तत्र गतानाम्** इति ब्रह्मलोकादिगतानाम् इति अर्थः ॥६॥

---

१. ननु ज्ञानिनां यद्यप्यैहिकामुष्मिकेत्यादि ख. २. स्थितिज्ञानादीति ख. स्थिताज्ञानादीति घ.

३. कथनं नमनमिति ख.

**नः त्वम्** इति वा हेतुः ; यतो अस्माकं त्वं स्वामी. सर्वप्रार्थनायाम् अनुचितत्वाभावाय भगवति षड्धर्मत्वं[1] प्रतिपादयति **माता** इत्यादि. **त्वम् एव नो माता,** त्वद्गर्भादेव निर्गतत्वाद्, उदरस्थानां जीवानामेव बहिः सृष्टेः, ब्रह्माण्डाख्ये च उदरे साम्प्रतमपि स्थितेः. लोकप्रतीत्या तु या माता सा जरायुवत् पोषकवद् वा, अतः त्वमेव माता. अतो रोदनेन बलाद् वा त्वमेव प्रार्थनीयः. किञ्च **अथ सुहृद्.** अविवेकदशायां यथा त्वं प्रार्थनीयः **अथ** तदनन्तरं विवेकदशायामपि त्वमेव प्रार्थ्यः यतः **त्वं सुहृद्** मित्रं, "द्वा सुपर्णा सयुजा सखाया" (मुण्डकोप. ३।१।१) इति श्रुतेः. सुष्ठु[2] हृदयं यस्य सः सुहृद्, एकस्मिन्नेव हृदये उभयोः स्थितत्वात्. सुष्ठु हरति इति वा, सर्वफलभोक्तृत्वात्. अतएव युक्त्यापि भवानेव[3] प्रार्थनीयः, सर्वफलदातृत्वात्. किञ्च असेवाद्यपराधेन दण्डनेऽपि भवानेव[4] प्रार्थनीयः इति आह **पतिः** इति. न हि अन्या गतिः अस्माकम् अस्ति. यथा स्वयम् अनलङ्कृतोऽपि भार्याम् अलङ्करोति बहुभिः आभरणैः, अलङ्कृते तु सन्देहएव नास्ति. अतः त्वं महान् अस्मान् अलङ्कुरु इति अर्थः. किञ्च **त्वम् (नः!)** अस्माकं **पिता** अतो जन्ममात्रेणैव

---

प्रकाशः

वक्तृणां विषयित्वगमकं ज्ञेयम् इति अर्थः. **जरायुवद्** इत्यादि. तथाच त्वन्निष्ठमातृता-निर्वाहकत्वाद् गौण्या वा तस्याः मातृत्वमिति न तया तव

लेखः

**भवाय** इत्यत्र. **अथ सुहृद्** इत्यत्र 'अथ'शब्दस्य भिन्नप्रक्रमार्थतां वक्तुं पूर्वम् उपक्रान्तं स्मारयितुम् आहुः **अविवेकदशायां यथा त्वम्** इति. मातृभावेन प्रकटः त्वं यथा रोदनाद्यविवेकेनापि प्रार्थ्यः तथा सुहृद्रूपत्वेन विवेकदशायामपि त्वमेव प्रार्थ्यः इति अर्थः. **सन्देहएव न** इति. स्वयम् अनलङ्कृतोऽपि स्वल्पधनोऽपि यदा भार्याम् अलङ्करोति तदा सर्वगुणनिधानः त्वम् अस्माकं पतिः इति अस्मदलङ्कारे कः सन्देहः इति अर्थः.

---

१. षट्कर्मत्वमिति घ-ङ.    २. सुष्ठु हृदये यः सुहृदिति क-ग. सृष्टुहृदयः सुहृदिति घ.

३. भगवानेवेति क-ग-घ-ङ.    ४. भगवानेवेति क-ग-घ.

वयं ते दायभागिनः[१], जगत्कर्तृत्वेनैव भवतः[२] श्रवणात्. एवम् ऐहिकसर्वफलदानार्थं चतूरूपत्वम्[३] उक्त्वा पारलौकिक-सर्वदानार्थम् आह **त्वं सद्गुरुः नः परमं च दैवतम्** इति. प्रक्रियान्तरत्वात् पुनः **त्वम्** इति ग्रहणम्. परलोकस्तु तदर्थविहित-कर्मज्ञानभक्तिभिः भवति. तत्र अज्ञानाद् अन्यथाज्ञानाद् मोहनार्थं वा पाखण्डादि बहवो मार्गाः जाताः. तत्र सन्मार्गवक्ता दुर्लभः, सन्देहेन विश्वासाभावात् च. ''त्वं त्वव्ययं ज्ञानम्'' (भाग.पुरा. ८।२४।५१) इति वचनात् त्वमेव गुरुः. जीवास्तु असद्गुरवः, **त्वमेव सद्गुरुः** इत्यतो ''गुरुशुश्रूषया[४]'' (भाग.पुरा. १०।७७।३४) इति वाक्यात्

श्रीगोकुलनाथानां टिप्पणी

**भवाय नस्त्वम्** इत्यत्र. **तदर्थविहित** इति. परलोकार्थं विहितं यत्कर्म तेन इति अर्थः ॥७॥

प्रकाशः

मातृत्वहानिः इति अर्थः. **तदर्थविहित** इति, भगवदर्थविहित इति अर्थः. **तत्र** इति कर्म-ज्ञान-भक्तिषु. **मोहनार्थं वा** इति 'वा'शब्दः एवकारार्थः, ''छागो वा मन्त्रवर्णाद्'' (जैमि.पूर्वमी.सूत्र ६।८।३१) इत्यादिवत्. **तत्र** इति तेषु पाषण्डादिमार्गेषु जातेषु. तर्हि भगवति कथं सद्गुरुत्वम् इत्यतः आहुः **त्वम्** इत्यादि. इदम् अष्टमस्कन्धसमाप्तौ मत्स्यावतारस्तुतौ सत्यव्रतवाक्यं— ''जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः, त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम्'' इति, तस्मात् तथा इति अर्थः. **''गुरुशुश्रूषया'' इति वाक्याद्** इति.

लेखः

**त्वं त्वव्ययम्** इति. अष्टमसमाप्तौ इदं वाक्यम्. अत्र पूर्वार्धे ''जनो जनस्यादिशतेऽसतीं मतिम्'' इत्यादि साधनगुरुं निन्दयित्वा उतरार्धे भगवतएव गुरुत्वम् उच्यते ''त्वं त्वव्ययं ज्ञानममोघमञ्जसा'' इत्यादि. इतः पूर्वश्लोकेऽपि ''अचक्षुरन्धस्य यथा गुणीकृतः तथा जनस्याविदुषोऽबुधो गुरुः'' इति पूर्वं प्राकृतगुरुं निन्दयित्वा भगवतएव गुरुत्वम् उच्यते उत्तरार्धेन ॥७॥

१. दायभाजिन इति क-ग. २. भगवत इति घ. ३. भगवद्रूपमिति घ. ४. गुरुशुश्रूषया यथेति ख.

स्वसेवामेव शिक्षय इति अर्थः. एवं कर्मणां फलम् इति पक्षे गुरुसेवयैव कृतार्थता. देवताफलदानपक्षे, ''फलमत उपपत्तेः'' (ब्रह्मसूत्र ३।२।३८) इति [१]ब्रह्मफलदानपक्षेऽपि, त्वमेव फलदाता इति आह **परमं च दैवतम्** इति. देवतादानपक्षेऽपि न अङ्गदेवताः फलं प्रयच्छन्ति किन्तु सहकारिणो भवन्ति अतः **परमम्** इति उक्तम्. मध्ये **च**काराद् ब्रह्मपक्षेऽपि परमा[२] देवता भवानेव, देवानां त्वदंशत्वाद् ब्रह्मरूपत्वात् च. अतः तव आराधनमेव अस्माकं कर्तव्यम्, अन्यत् तु स्वतएव भविष्यति इति आह **यस्यानुवृत्त्या** इति. कृतम् अस्य अस्ति इति **कृती.** भगवदनुवृत्तिव्यतिरेकेण कृतेन अन्येन धर्मादिना न कृतित्वं भवति, ''धर्मः क्षरति कीर्तनाद्'' ( . । । ), ''कृतघ्ने नास्ति निष्कृतिः'' (महाभा. १२।२७१।११) इति. अतः तव अनुवृत्त्यर्थं तथा सम्पादय यथा **कृतिनो बभूविम** इति अर्थः ॥७॥

भक्ताः आहुः **अहो** इति.

**अहो सनाथा भवता स्म यद् वयं त्रैविष्टपानामपि दूरदर्शनम् ॥**
**प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम् ॥८॥**

**अहो** इति आश्चर्ये ; वयं त्वद्भक्त्यैव पूर्णमनोरथाः, इदानीं त्वमपि

---

प्रकाशः

''नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा, तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा'' इति वाक्ये साधनान्तरापेक्षया तस्याएव स्वतोषसाधनत्व-कथनात् तथा इति अर्थः. **अङ्गदेवता** इति अङ्गकर्मदेवता आवरणदेवताः च. **कृती** इति अनष्ट-सत्कर्मा. **''धर्मः क्षरति''** इत्यादि. ययातिवत् कथञ्चित् कथनेऽपि नाशसम्भवात्, तत्र प्रायश्चित्ताभावबोधनेन पुनः कर्मान्तरेण पुनः तत्सम्पादनाशक्तेः च इति अर्थः. द्वितीयवाक्यस्थस्य 'कृत'शब्दस्य उपकारवाचकत्वपक्षेऽपि ''न ते माम् अङ्ग जानन्ति'' (भाग.पुरा. ११।२१।२८) इति वाक्येन भगवत्कृतोपकाराज्ञाने तद्धननात् तथा इति बोध्यम्. **बभूविम** इति. प्रार्थनायां लिट् छान्दसः ॥७॥

---

१. ब्रह्मदानेत्यादि घ.     २. परमात्मेति घ.

मिलितः इति आश्चर्यम्. अथवा अल्पीयसी भक्तिः कृता अस्माभिः, फलं तु महद् जातम् इति आश्चर्यम्. **भवता वयं सनाथाः**. "नारायणपराः सर्वे न कुतश्चन बिभ्यति" (भाग.पुरा. ६।१७।२८) इति न्यायेन भक्तानाम् अपेक्षाभावाद् नियन्ता न अपेक्ष्यते, भगवतस्तु भक्तिविषयत्वेनैव ग्रहणम्. एवमपि भगवानेव स्वयम् उद्यम्य पालनादिकं करोति चेत्, तदा ते सनाथाः भवन्ति. तत्तु आश्चर्यकरं भवति. इह तु **भवता वयं सनाथाः** स्वयम् आगत्य सर्वकार्यं निर्वाहयसि इति अर्थः. किञ्च इदं पुनः सर्वजनीनं ; गुप्ततया भक्तानां भगवान् स्वयं किञ्चित् करोति इति श्रूयते, अत्र तु साक्षात् सर्वजनीनं सर्वं करोति इति **स्म** इति उक्तम्. किञ्च **यद् वयं** सर्वदा **पश्येम**. न हि सर्वदा भगवान् सर्वैः साक्षात्क्रियते. सात्त्विकैः क्रियते इति यदि, तदा आह **त्रैविष्टपानामपि दूरदर्शनम्** इति. त्रिविष्टपे = स्वर्गे भवाः, तिष्ठन्ति इति वा. तत्र भूमिष्ठानां[1] दर्शनशङ्कैव नास्ति. किञ्च कदाचिद् देवानाम् आपदायां कृपया भगवत्साक्षात्कारो भवति तथापि न

प्रकाशः

**अहो सनाथाः** इत्यत्र. **अपेक्षाभावाद् नियन्ता न अपेक्ष्यते** इति. सापेक्षो हि अधिकं गृह्णातीति तादृशवारणार्थं नियन्त्रपेक्षा. भगवत्पराणां तु अपेक्षायाएव अभावाद् ग्रहणं दूरापेतम् अतो न अपेक्ष्यते. तथाच तदभावादेव तेषां सर्वतो भयाभावः इति भावः. **ते** इति भगवत्पराः. **वयम्** इति अल्पभक्तियुक्ताः. **इदं पुनः** इति, आश्चर्यान्तरम् इति अर्थः. पुनः ततो अन्यद् आश्चर्यान्तरम् आहुः **किञ्च** इत्यादि.

लेखः

**अहो सनाथाः** इत्यत्र. **तत्त्वाश्चर्यकरम्** इति. "नारायणपराः" इति वाक्येन भक्तानां स्वतएव अपेक्षितसर्वसामग्र्याः सिद्धत्वेऽपि यद् एतत्कृपातिशयेन स्वयमेव साक्षात् सर्वेष्टसाधकत्वेन पालनं तदिदं "त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम्" (भाग.पुरा. ८।२४।५०) इति महदाश्चर्यकरम् इति अर्थः. अपूर्वएव अयम् अस्मासु अनुग्रहः इति

१. भूमिस्थानामिति क-ग-घ.

एवं रूपं पश्यन्ति इति अभिप्रायेण आह **प्रेमस्मितस्निग्ध-निरीक्षणाननम्** इति. प्रेम्णा[१] स्मितेन च स्निग्धं यद् निरीक्षणं तत्सहितम् आननं यस्य इति. "ये यथा मां प्रपद्यन्ते" (भग.गीता ४।११) इति प्रेमभक्तेषु भगवतोऽपि प्रेम, ज्ञानेन मुक्ताः[२] कालान्तरे स्वसेवार्थं भक्ताः क्रियन्ते तेन मोहिताइव एते इति स्मितम्. अथवा भगवद्भक्तेषु मोहनम् अल्पं ; भगवद्गुणरूपयोरेव मोहः, न अन्यत्र इति मायारूप-हासस्य मन्दत्वम्. अनेन दया निरूपिता भवति. प्रेम-दयाभ्यां हि सर्वं वस्तु स्निग्धं भवति. मूर्तानां तैलादि स्नेहहेतुः, अमूर्तानां स्नेह-दये आत्मसम्बद्धानाम्. तेन भगवद्दृष्टिः उभाभ्याम् अतिस्निग्धा. प्रथमतो भगवद्दर्शनमेव दुर्लभं, तत्रापि सन्मुखतया, तत्रापि (**निरीक्षणाननं!**) भगवद्दृष्टिः स्वस्मिन् पतति तदा हि भगवद्दृष्ट्या गृहीतो भगवति प्रविष्टएव. तत्रापि स्निग्धया दृष्ट्या गृहीतः कदापि न विश्लेषम् एति. तत्रापि हेतुपूर्वकं स्निग्धया, हेतुष्वपि दया, सापि स्नेहेन सम्बद्धा —न अस्माद् अन्यः कश्चिद् उत्कर्षो अस्ति भगवदीयानां भगवति. किञ्च एतादृशमपि **रूपं (सर्वसौभगं!)** सर्वसौभाग्ययुक्तं भवति स्वापेक्षित-सर्वविषयभूतम्. एतावता न अत्र विषयत्यागोऽपि अपेक्षितः,

---

प्रकाशः

**अनेन** इति **स्मितपदेन**. **उभाभ्याम्** इति उक्त-व्यञ्जिताभ्यां स्नेह-दयाभ्याम् ॥८॥

लेखः

भावः. **इदम्** इति वक्ष्यमाणम्. **ज्ञानेन युक्ताः कालान्तरे** इति. इदं **त्रैविष्टपानामपि दूरदर्शनम्** इति विशेषणसूचितो अर्थो ज्ञेयः. **तेन मोहिताइव** इति. सर्वसाधनशून्यानाम् अस्माकं प्रेमभक्तिः अनिशम् अनुभावयति, ये वै साधनविशिष्टाः तेषाञ्च कालविशेषेएव इति आश्चर्यम् एषां भगवान् स्मितेन कारयति इति अर्थः. किञ्चिद् अस्वरसं मन्वानाः पक्षान्तरम् आहुः **अथवा** इति. **मूर्तानाम्** इति, देहादीनाम् इति अर्थः. **स्नेहहेतुः** इति, स्निग्धतायां हेतुः इति अर्थः. **अमूर्तानाम्** इति, चित्तमनआदीनाम् इति अर्थः ॥८॥

---

१. प्रेमस्मितेन चेति घ.  २. युक्ता इति ग-लेखे - सम्पा.

विषयरूपोऽपि स्वयमेव जातइति. तस्माद् एतद् महदाश्चर्यम् इति ॥८॥

स्त्रियः स्त्रीप्रधानाः च आहुः. एताः हि[१] न भगवन्तं न वा गुणान् जानन्ति अपितु स्वानुभवम्. तत्र वस्तुसामर्थ्याद् यद् जायते तद् अनुवदन्ति.

[२]**यर्ह्यम्बुजाक्षाऽपससार नो भवान् कुरून् मधून् वाऽथ सुहृद्दिदृक्षया ॥**
**तत्राब्दकोटिप्रतिमः क्षणो भवेद् रवेर्विनाक्ष्णामिव नस्तवाच्युत ॥९॥**

**यर्हि अम्बुजाक्ष** इति. हे कमलनयन! दृष्ट्यैव अमृतं पाययति इति तथा सम्बोधनम्. **नः** अस्मान् अनादृत्य "किम् एता (?) मत्स्वरूपाविदो (?) अतः तत्र गमिष्यामि यत्र मां जानन्ति[३]" इति **अपससार भवान्** इति गमनसमयेऽपि वयं सम्मुखतया[४] न दृष्टाः. **कुरून्** हस्तिनापुरदेशं, **मधून्** मथुरादेशम्, **अथ** तत एव प्रक्रियान्तरेण (**सुहृद्दिदृक्षया!**) भीष्मादिदर्शनार्थं कुरुक्षेत्रम्. **तत्र** तस्मिन् समये एकः **क्षणो अब्दकोटिप्रतिमो भवेत्**. यातनासु एवं श्रूयते— "क्षणमध्ये वर्षसहस्रं कृत्वा भोजयन्ति" इति. तथैव अस्माकम् अनुभवः. ननु सुखेऽपि श्रूयते "क्षणमात्रेण कल्पभोगान् भुङ्क्ते" इति, तत्र आह **रवेः विना अक्ष्णाम् इव**. विषयसंस्कारकत्वेन[५] अधिष्ठातृत्वेन[६] च यदा रविः प्रविशति तदा विषयग्रहणसमर्थं चक्षुः भवति. तथा अस्माकम् अन्तर्बहिः चेद् भवान्[७] तिष्ठति तदा सर्वकार्यक्षमत्वम्.

लेखः

**यर्हि** इत्यत्र. **किमेताः** इति, द्वारकास्थाः प्रजाः इति अर्थः. **इत्यपससार** इति. अनेन दैन्यं प्रकटितं भवति इति भावः. **न दृष्टाः** इति. अपितु मानमात्रमेव गच्छति इति तथा इति अर्थः. **रवेर्विनाऽक्ष्णाम्** इत्यत्र **अक्षिपदेन** अस्मदादिसाधारण-चक्षुर्ग्रहणे मुख्यार्थबाधः स्याद् अतो विवक्षितार्थम् आहुः

१. हीति नास्ति घ. २. एतदग्रे "कथं वयं नाथ चिरोषिते त्वयि प्रपन्नतृष्णाखिलतापशोषणम्, जीवेम ते सुन्दरहासशोभितमपश्यमाना वदनं मनोहरम्" इति श्लोको दृश्यते आदर्शपुस्तकेषु. स च न केनाऽपि व्याख्यात इति मूले उपेक्षितः. ३. जानन्तीतीत्यपससारेति ग. ४. सन्मुखतयेति ख. ५. विषयसंस्कारत्वेनेति ख. एतदग्रे एव च 'अधिष्ठानतश्च बहुकोटिवर्षानन्तरमुन्मेषण' इत्येतान्यक्षराण्यसम्बद्धानीव दृश्यन्ते क. ६. अधिष्ठानत्वेनेति ख. ७. भगवानिति क-ग-घ.

अयम् अर्थः — यथा योगिनः समाधौ प्रत्याहारेण चक्षुर्निमीलनं कृत्वा देवतां स्ववशे स्थापयित्वा तिष्ठन्ति, ततः च बहुकोटिवर्षानन्तरम् उन्मेषण-निमेषणकर्ता सूर्यः उन्मेषणं करोति, एवं कोटिवर्षे एको निमेषो भवति. तथा त्वदीयानाम् अस्माकं – त्वन्निमित्तत्वाद् [1]अस्मदायुषः त्वत्कार्याभावे – एकोऽपि क्षणो न अपगच्छति, क्षणे क्षणे मूर्च्छिता भवाम इति. जीवनन्तु **अच्युत** इति सम्बोधनाद् यथा त्वम् अच्युतः तथा वयमपि अस्मिन्नंशे जाताः इति द्योतितम् ॥९॥

एवं चतुर्विधानां वाक्यं भगवान् सत्यत्वेन समर्थयित्वा सत्यवाक्यश्रवणं[2] मङ्गलम् अनुभूय पुरं प्राविशद् इति आह **इति** इति.

**इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥**
**शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन् प्राविशत् पुरीम् ॥१०॥**

**चकाराद्** अन्यानि अपि बहुविधानि. **प्रजानाम्** इति न अत्र वचने दोषग्रहणम्. तदा भगवतो महती कृपा उद्गता इति बोधयति **भक्तवत्सल** इति. यथा गौः वत्सं दृष्ट्वा व्याकुला भवति तथा भगवान् जातः इति अर्थः. **दृष्ट्या अनुग्रहं वितन्वन्** तथा तासु दृष्टिः पतिता ; भगवान् ज्ञानादिसम्पन्नो यथावत् तासां हृदये प्रविष्टः येन सुखिता न किञ्चिद् उक्तवत्यः. ततः **पुरीं** द्वारकां **प्रकर्षेण** महता सम्भ्रमेण **अविशत्** प्रविष्टवान् ॥१०॥

तां पुरीं वर्णयति पञ्चभिः **मधुभोजेति,** विद्या यथा तथा पुरी इति विज्ञापयितुम्.

---

लेखः

**अयमर्थः** इत्यादि ॥९॥

**मधुभोज** इत्यत्र. **विद्या यथा तथा पुरी** इति. वैराग्यादि-पञ्चधर्मयुक्ता यथा विद्या तथा इयम् इति ज्ञापयितुं पञ्चधर्माभिज्ञापकैः पञ्चभिः श्लोकैः तां पुरीं वर्णयति इति अर्थः. तत्प्रतिपाद्य-पञ्चधर्मान् आहुः **अधिष्ठाने**

---

१. त्वन्निमित्तत्वादायुष इति क-घ. २. सत्त्ववाक्येति ख.

अधिष्ठाने बहिश्चोर्ध्वमन्तश्चाङ्गविभेदतः[१] ॥
सुन्दरं भगवद्योग्यं स्थानं नान्यत् कथञ्चन ॥(६)॥

तत्र अधिष्ठातॄन् वर्णयति **मधुभोजेति.**

**मधुभोजदशार्हार्ह - कुकुरान्धकवृष्णिभिः ॥**
**आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥११॥**

षड्विधा यादवाः — **मधवो**[२], **भोजाः**, **दशार्हेषु अर्हाः**, **कुकुराः**, **अन्धकाः**, **वृष्णयः** च, तैः **गुप्ताम्**. सत्त्वरूपम् अन्तःकरणं यदा षडिन्द्रियैः संरक्ष्यते तदा भगवत्प्रवेशयोग्यं भवति, "इन्द्रियैर्विषयाकृष्टैः" (भाग.पुरा. ४।२२।३०) इति वाक्यात् तैरेव नाशश्रवणात्. पुरी च गृहभेदे नश्यति. **आत्मतुल्यबलैः** यथा **आत्मा** देहः तत्तुल्यं बलं येषाम्. **आत्मा** वायुः

प्रकाशः

**मधुभोजे**त्यत्र. पञ्चसु श्लोकेषु वर्णनीयान् अर्थान् सङ्गृह्णन्ति **अधिष्ठाने**त्यादि. एतेषां **सुन्दरम्** इत्यादिना अन्वयः. **अङ्गविभेदतः** इति. **अङ्गानां** द्वारादीनां **विभेदतः** अलङ्कारकृत-वैशेष्याद् इति अर्थः. **अधिष्ठातॄन् वर्णयति** इति. विद्यातुल्यत्वं व्युत्पादयितुं सा यथा अधिष्ठातृशुद्धौ स्थिरा भवति तथा इयम् इति बोधनाय तान् वर्णयति इति अर्थः. षड्विधैः गुप्तत्वकथने कथं स्थैर्ये तौल्यम् इत्यतः व्युत्पादयन्ति **सत्त्वे**त्यादि, **पुरी च** इत्यादि. तथाच इन्द्रियैः गोपने यथा सत्त्वरूपान्तःकरणस्य अनाशः तथा तैः गोपने पुर्या इति तथा इति अर्थः. ननु देहं विना इन्द्रियैः न सत्त्वरक्षा इत्यतः तत्कार्यकारित्वं विशेषणेन बोधयन्ति **यथात्मा देहः** इत्यादि. ननु अत्र गुणतो रक्षा विवक्षिता, सा तु न एवं सिद्ध्यति

लेखः

इत्यादि. **गृहभेदे** इति, आत्मवर्गीयभेदे सति इति अर्थः. **आत्मतुल्यबलैः** इत्यत्र 'भगवत्तुल्यबलैः' इति अर्थस्य बाधितत्वाद् 'आत्म'पदं प्रकारान्तरेण व्याकुर्वन्ति **यथा आत्मा देहः** इति. तथाच यथाकायमेव सर्वेषां बलं, नतु स्थूलकायत्वं प्रदर्शनमात्रम् इति अर्थः. अस्मिन् पक्षे प्रचण्डदेहानामेव

१. अन्तश्चांशेति ख. अन्तश्चान्तरिति ग.　　२. माधवा इति क-ख-ग.

वा, "अहं मनुरभवं सूर्यश्च" (बृहदा.उप. १।४।१०) इति सूक्ते अहंदेवतायाः वायुभेदत्वात्, मण्डलमध्यत्वाद् अस्य सूक्तस्य[१]. **बलं** सेना वा, भगवत्तुल्यसेनाः. [२]सर्वाप्रवेशने दृष्टान्तः **नागैः** इति. शरीरमिव वा **नागैः**

प्रकाशः

इति पक्षान्तरम् आहुः **वायुः वा** इति. 'आत्म'पदेन कथं वायुलाभ इत्यतः उपपादयन्ति **अहं मनुः** इत्यादि. तथाच यद्यपि बृहदारण्यके अस्याः श्रुतेः वायुपरत्वं न सिद्ध्यति तथापि बह्वृचसंहितायां सिद्ध्यति इति अर्थः. ननु वायुः अत्र कौष्ठ्यो विवक्षितः, स तु एवमपि न आयाति इत्यतः आहुः **मण्डले**त्यादि. तथाच मण्डलानां दशत्वेन "दश वै पशोः प्राणाः" (तैत्ति.संहि. ६।३।७५) इति श्रुत्युक्त-प्राणसमान-सङ्ख्याकत्वात् तया तल्लाभाद् अर्थोपपत्तिः इति अर्थः. अत्र व्याख्यानक्लेशाद् **आत्म**पदस्य भगवत्परत्वम् अङ्गीकृत्य पक्षान्तरम् आहुः **बलं सेना वा** इत्यादि. तथाच यथा अन्तर्यामिणा सन्मार्गप्रेरणेन अन्तःकरणसत्त्वं रक्ष्यते तथा एतैः गृहरक्षणेन पुरी इति तथा इति अर्थः. **सर्वप्रवेशने** इति, सर्वेषां यादवानां पुर्यां प्रविश्य स्थितौ. तथाच यथा वासुकिप्रभृतिभिः प्रविश्य स्वपुरी भोगवत्याख्या रक्ष्यते तथा इति अर्थः. अस्मिन् दृष्टान्ते प्राणाः न आयान्ति इति पक्षान्तरम् आहुः **शरीरम्** इत्यादि. तेषां पुर्याः **भोगवती** इति नाम

लेखः

बलवत्त्वं सिद्ध्यति, नतु सुकुमाराणाम्, अतः सर्वसङ्ग्रहार्थम् आहुः **आत्मा वायुर्वा** इति. वायुदेवतायाः सर्वतः प्रबलत्वं प्रकटमेव. अतएव "वायुकोटिमहाबलः" (पुरु.नामसहस्र. ४।५१) इत्यादौ दृष्टान्तत्वम् उपयुज्यते. ननु वायोः 'आत्म'पदवाच्यत्वम् अप्रसिद्धम् अतः श्रौतीं प्रसिद्धिम् आहुः **अहम्** इत्यादि. **भगवत्तुल्यसेना** इति, भगवदनुरूपसेना इति अर्थः. **सर्वप्रवेशने** इति. यथा सर्वनागकुलैः भोगवत्याख्यां पुर्यां निविश्यते तथा इति अर्थः. अरुच्या पक्षान्तरम् आहुः **शरीरमिव** इति. अस्मिन् पक्षे 'नाग'पदार्थम्

१. सूत्रस्येति ग-घ-ङ. २. सर्वा इति सविसर्गः पाठः क-घ. प्रवेशेनेति क-घ. सर्वप्रवेशने इति पाठः प्रकाशे लेखे च - सम्पा.

प्राणैः. **भोगवती** तनुः ; प्राणायामैः संरक्षितां योगितनुं यथा भगवान् प्रविशति. **भोगवती** गङ्गाप्रवाहो वा. रक्षाभावे देवैरपि सा ह्रियेत ॥११॥

एवम् अधिष्ठातृभिः सुरक्षितत्वम् उक्त्वा बहिः शोभातिशयम् आह.

**सर्वर्तुसर्वविभव - पुण्यवृक्षलताश्रयैः ॥**
**उद्यानोपवनारामैर्वृतां पद्माकरश्रियम् ॥१२॥**

**सर्वर्त्विति. सर्वेषु ऋतुषु सर्वे विभवाः** पुष्पादिसम्पत्तयो येषाम्, एतादृशाः च ते (**पुण्याः!**) धर्मजनकाः च, ते च ते **वृक्षाः लताः** च, तेषाम् **आश्रयो** येषु ते **उद्यानादयः. उद्यानं** पुष्पप्रधानवाटिका, **उपवनं** फलप्रधानम्, **आरामाः** क्रीडास्थानानि. **उद्यानानि उपवनानि आरामाः** च तैः सर्वतः **आवृताम्**. पद्माकराणां श्रियो यस्यां सा **पद्माकरश्रीः** ॥१२॥

उपरि शोभातिशयम् आह.

**गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् ॥**
**चित्रध्वजपताकाग्रैरन्तःप्रतिहतातपाम् ॥१३॥**

**गोपुरेति.** पुरबहिर्द्वारं **गोपुरम्**, अन्यानि **द्वाराणि, मार्गाः** हट्टमध्योपरिभागाः. तेषु **कृतानि कौतुक-तोरणानि** यस्याम्. विचित्राः ध्वजाः पताकाश्च. गरुडादिचिह्निता **ध्वजाः**, जययन्त्राङ्किताः[१] **पताकाः**, तेषाम् **अग्रैः** लम्बायमान-विचित्रपटैः **अन्तः प्रतिहत आतपो** यस्याम्.

प्रकाशः

तथा न प्रसिद्धम् इति पक्षान्तरम् आहुः **गङ्गाप्रवाहो वा** इति ॥११॥

लेखः

आहुः **नागैः प्राणैः** इति. ननु **भोगवतीपदेन** कथं शरीरग्रहणम् अत आहुः **भोगवती तनुः** इति. उपभोगसाधनत्वात् तथा इति भावः. **गङ्गाप्रवाहो वा** इति. तदुक्तम् उत्तरार्धे राजसप्रकरणारम्भे नारदवाक्यं "यस्यामलं दिवि यशः प्रथितं रसाया" (भाग.पुरा. १०।६७।४४) इति ॥११॥

**चित्रध्वज** इत्यत्र. ननु ध्वजस्य सर्वस्यापि आतपवारकत्वसम्भवाद्

१. जयपत्राङ्किता इति ख.

मध्याह्ने ध्वजादेः छायाऽजनकत्वाद् **अग्रैः** इति उक्तम्. यद्यपि अन्तः तापो निवार्यते तथापि शोभा बहिरेव. फलांशेन तु उत्तराङ्गम् ॥१३॥

अन्तःशोभाम् आह.

**सम्मार्जितमहामार्ग - रथ्यापणकचत्वराम् ॥**
**सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥१४॥**

**सम्मार्जितेति. महामार्गो** राजमार्गः **रथ्या** अन्याः **आपणकः** पण्यवीथी **चत्वरम्** अङ्गणम् —एतानि **सम्मार्जितानि** यस्याम्. **गन्धजलैः सिक्तां** सन्निधानात् पूर्वोक्तस्थानेषु, अविशेषेण सर्वत्र वा. मङ्गलार्थं **फलानि पुष्पाणि अक्षता यवाङ्कुराः** च तैः **उप्ताम्**. आम्रफलसहितशाखा भूमौ निखाताः, तथा पुष्पगुच्छानि, तथा अक्षता ऊर्ध्वं निखाताः, तथैव अङ्कुराः च, तत **उप्ताम्** इति उक्तम् ॥१४॥

अङ्गालङ्कारम् आह.

---

श्रीगोकुलनाथानां टिप्पणी

**गोपुर** इत्यत्र. **फलांशेन** इति. आतपप्रतिघातरूप-फलविचारेण तु इदमपि अर्धम् **उत्तरस्य** अन्तःशोभानिरूपक-श्लोकस्य **अङ्गम्** इति अर्थः ॥१३॥

प्रकाशः

**गोपुरेत्यत्र. उत्तराङ्गम्** इति. उत्तरश्लोके वक्ष्यमाणा या अन्तःशोभा तदङ्गम् इदं विशेषणम् इति अर्थः ॥१३॥

लेखः

**अग्रैः** इति कथनस्य किं प्रयोजनम् इत्यतः आहुः **मध्याह्ने** इति. **छायाजनकत्वाद्** इत्यत्र 'अजनकत्वाद्' इति नञ्प्रश्लेषो ज्ञेयः. एवञ्च मध्याह्ने सूर्यस्य मध्यवर्तित्वेन अन्तर्गृहादिषु सकलध्वजच्छाया न पतति इति वायुवशाद् उद्धृतैः ध्वजपटाग्रैरेव तथा इति भावः. **बहिरेव** इति. अतो बाह्यवर्तित्वेन उपरितन-शोभाङ्गत्वेनैव गणना इति शेषः. प्रकारान्तरेण तु उभयाङ्गत्वमपि अविरुद्धम् इति आशयेन आहुः **फलांशेन** इति. अन्तःतापनिवारणरूप-फलांशेन **तु उत्तरं** वक्ष्यमाणा या अन्तःशोभा तदङ्गत्वम् इति अर्थः. शोभारूपकार्यविचारे तु पूर्वाङ्गमेव इति भावः तुशब्देन सूचितः ॥१३॥

**द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः ॥**
**अलङ्कृतां पूर्णकुम्भैर्बलिभिर्धूपदीपकैः ॥१५॥**

**द्वारि द्वारि** इति. **चकारात्** सभा-हट्ट-नगरद्वारेष्वपि. **गृहग्रहणं** मार्गस्थादृष्टतया अलङ्काराभाव-शङ्कानिवृत्त्यर्थम्. **दधि** पात्रस्थम्, **अक्षता** राशीभूताः, **फलानि** च, अतो न पुनरुक्तिः. **इक्षवः** च उभयतः स्थापिताः. तैः, **पूर्णकुम्भादिभिः** च **अलङ्कृताम्**. **द्वारि द्वारि अलङ्कृताम्** इति अवयवालङ्कारेणापि अलङ्कृताम् इति बोधितम्. उत्सवार्थम् एवं करणं, सूर्यवत् सर्वत्र भगवत्तेजसो व्याप्तत्वाद् वा, अन्तःस्थैरपि भगवान् अन्तर्नीतः इति ॥१५॥

येषां दर्शनार्थं स्वयं गच्छेत् ते पित्रादयः स्वयम् आगताः इति सम्बन्धज्ञानापेक्षया भगवज्ज्ञानमेव[1] तेषां बलिष्ठम् इति प्रदर्शयन् आह **निशम्य** इति सार्धैः त्रिभिः.

**निशम्य प्रेष्ठमायान्तं वसुदेवो महामनाः ॥**
**अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥१६॥**
**प्रद्युम्नश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ॥**
**प्रहर्षवेगोच्छ्वसित - शयनासनभोजनाः ॥१७॥**
**वारणेन्द्रं पुरस्कृत्य ब्राह्मणैः ससुमङ्गलैः ।**
**शङ्खतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥**
**प्रत्युज्जग्मू रथैर्ब्रह्मन् प्रणयागतसाध्वसाः ॥१८॥**

अतएव सम्बन्धिशब्दम् अनुक्त्वा **प्रेष्ठम्** इति उक्तम्. (**महामनाः** !) मनसो महत्त्वं देहादिविस्मरणपूर्वक-भगवद्ग्रहणात्. **उग्रसेनो** राजा. भक्तेः

प्रकाशः

**द्वारि द्वारि** इत्यत्र. **अन्तर्नीतः** इति, स्वहृदये गृहे नीतः इति अर्थः ॥१५॥

लेखः

**निशम्य** इत्यत्र. **प्रेष्ठमित्युक्तम्** इति. भक्तसाधारणसम्बन्धाभिज्ञापक-

१. भगवद्ध्यानमेवेति ग-घ.

मुख्यत्वाद् न लौकिकमहत्त्वं क्रमनियामकम्. सर्वत्र **चकारः** तद्वर्गग्राहकः. ननु रामस्य कथम् उद्गमनं, जामात्रादिवधं कृत्वा भगवतः समागतत्वाद् इति आशङ्क्य[१] तद् युक्तमेव इति आह **अद्भुतविक्रमः** इति. न अयं रामः प्राकृतः. भगवतइव अस्यापि अद्भुतएव पराक्रमः. कौरवेषु स्नेहं ख्यापयन्, गदायुद्धादिकमपि शिक्षयन्, तदिष्टमिव वदन्, दुर्योधनादीन् स्वयमेव मारितवान् इति युद्धबोधनात् प्रतीकाराद् अवगम्यते. लोकप्रतीतिस्तु अन्यथा. **जाम्बवतीसुतः** इति. स्त्रीणामिव अलङ्करणम् अस्य प्रियम् इति यत्र तादृशालङ्कारेण गच्छति तत्र व्यासः तं तथा विशिनष्टि.

पिता सम्बन्धिनश्चैव पुत्राश्च परिकीर्तिताः ॥

भगवदागमनं श्रुत्वा यो **हर्षो** जातः तस्य **वेगेन** जातेन महाप्रयत्नेन **उच्छ्वसिताः** श्वासवत् त्यक्ता गमनव्यतिरिक्ता अन्या[२] अवस्थाः **शयनासनभोजनादयः** तमःसत्त्वरजोरूपाः यैः. मङ्गलार्थं **वारणेन्द्रं** हस्तिश्रेष्ठं **पुरस्कृत्य. सुमङ्गलद्रव्यसहितैः**[३] **ब्राह्मणैः** इति यथा एतेषां तदेकमनस्त्वं तथा ब्राह्मणानामपि इति विज्ञापितम्. भगवता सह सर्ववाद्यानां समागमनेऽपि **तूरीशङ्खयोः** मङ्गलार्थं सम्मुखतया नयनं, नतु स्वमहत्त्वख्यापकम्. मङ्गल**घोषो** वेदपाठः, **चकारात्** मङ्गलाष्टकादि. **आदृताः** पूर्वमेव सम्मुखतया गताः. **रथयानैः** गमने हेतुः **प्रणयेन आगतसाध्वसाः** प्रणयेन आगतं साध्वसं = भयादि येषाम्. लौकिकपदार्थसहित-भगवत्स्मरणे हर्षः, पश्चात् केवलस्मरणे साध्वसम् इति विवेकः ॥१६-१८॥

---

प्रकाशः

**प्रणयागतसाध्वसाः** इत्यत्र. **लौकिकपदार्थ**पदेन सम्बन्धः उच्यते ॥१८॥

लेखः

तत्पदम् उक्तम् इति अर्थः. अन्यथा 'पुत्रम्' इति पदमेव वदेद् इति भावः. **जामात्रादि** इति. रामस्य जामाता दुर्योधनः ॥१६॥

---

१. इत्याशङ्क्याऽऽहेति ग. "इत्याशङ्क्य – न अयं रामः ... अन्यथा – तद् युक्तमेव इति आह अद्भुतविक्रम इति" इति मुद्रितपाठः. अन्वयक्लेशनिवृत्तये अस्माभिः एवं योजितम् - सम्पा.

२. अनोत्सवस्था इति घ. अन्यावस्था इति क. ३. सुमङ्गलसहितैरिति घ.

केवलवैषयिकसुखजनकाः अन्तर्बहिर्भेदेन ये जीवाः ते तु भगवन्तं प्रत्युज्जग्मुः इति आह.

**वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ।।**
**लसत्कुण्डलनिर्भात - कपोलवदनश्रियः ।।१९।।**
**नटनर्तकगन्धर्वाः सूतमागधबन्दिनः ।।**
**गायन्तश्चोत्तमश्लोकचरितान्यद्भुतानि च ।।२०।।**

**वारमुख्याः च** इति. वराणां समूहो वारं, तदेव मुख्यं यासाम् इति वेश्याः. चकाराद् अन्याअपि प्रगल्भाः[१]. तासु अवान्तरभेदो अस्ति इति ख्यापनाय **शतशः** इति उक्तम्. तासाम् अपि यानानि. यानानां प्रयोजनम् आह **तद्दर्शनोत्सुकाः** इति. बाहुल्येन नरयानानि. स्वस्थानस्थितावपि दर्शनं सम्भवति तथापि उत्सुकतया गमनं पुरस्कारार्थम्. मङ्गलत्वख्यापनाय तासाम् अलङ्कारवर्णनं **लसत्कुण्डले**ति. लसत्कुण्डलैः नितरां भाताः कपोलयुक्तवदनानां श्रियो यासाम्. **नटाः** शास्त्रानुसारनर्तकाः, **नर्तका** लौकिकाः, **गन्धर्वा** गायकाः, **सूताः** पौराणिकाः, **मागधा** वंशशंसकाः परिहाराः, **बन्दिनो** वैतालिकाः प्रस्तावसदृशोक्तयः ; सर्वेऽपि **गायन्तः**, चकारात् स्मरन्तः च. **अद्भुतानां** कथनं स्पष्टतया लोके वक्तुम् अयुक्तं, तदपि गायन्तः इति **चकारार्थः** ।।१९-२०।।

**भगवांस्तत्र बन्धूनां पौराणामनुवर्तिनाम् ।।**
**यथाविध्युपसङ्गम्य सर्वेषां मानमादधे ।।२१।।**

लौकिकप्रभुवत् कृष्णे गतानां न पाक्षिकफलत्वम् अपितु सर्वे सफला इति आह **भगवान्** इति. सर्वे हि समुदायेन त्रिविधाः— बान्धवाः पुरवासिनः सेवकाः च इति. पुरवासित्वम् अविशिष्टम् इति मध्ये वचनम् ।।२१।।

---

प्रकाशः

**भगवान्** इत्यत्र. **न पाक्षिकफलत्वम्** इति न कादाचित्क-सत्कारविषयत्वम् ।।२१।।

---

१. प्रागुक्ता इति घ.

तेषां सम्मुखतया यथा गमनम् उचितं तथा (स्वयमपि यथोचितं!) कृतवान्. तद् आह

**प्रह्वाभिवादनाश्लेष - करस्पर्शस्मितेक्षणैः ॥**
**आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥२२॥**

**प्रह्वे**ति. **प्रह्वो** नम्रीभावः पित्रादिषु, **अभिवादनं** ब्राह्मणेषु, **आश्लेषो** मित्रेषु, **करस्पर्शो** मुख्यसेवकेषु, **स्मितेक्षणानि** सर्वत्र. **आश्वासनं** स्वविरहखेद-निराकरणेन, **चकारात्** निवेदितदुःख-निराकरणेन. **श्वपाकाः** चाण्डालाः. **वराः** साधनेन अप्राप्याः विषयाः **चकाराद्** अन्येऽपि[१] विषयाः. सर्वदाने हेतुः **विभुः** इति ॥२२॥

**स्वयञ्च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥**
**आशीर्भिर्युज्यमानोऽन्यैर्बन्धुभिश्चाविशत् पुरम् ॥२३॥**

ननु जीवेभ्यः कथं भगवान् विषयान् प्रयच्छति? तत्र आह **स्वयञ्च** इति. स्वयञ्च तैः मानितः. [२]स्वसम्माननार्थमेव तेभ्यः प्रयच्छति इति भावः. **गुरवो विप्राः अन्ये** च, विप्राः च गुरवः अन्ये च. **सदारैः** इति सर्वत्र विशेषणम्. **स्थविरैः अन्यैरपि** वृद्धैः **आशीर्भिः युज्यमानः ;** कर्तृ-करणयोः तृतीये. सन्तोषाद् अभिनन्दनरूपा आशीः **अन्यैरपि बन्धुभिः** कृता इति आह. अथवा (**अन्यैः!**) नूतनतया सम्बद्धैः

प्रकाशः

**प्रह्वे**त्यत्र. **कृतवान्** इति. "ये यथा मां प्रपद्यन्ते" (भग.गीता ४।११) इति प्रतिज्ञानाद् उचितं कृतवान् इति अर्थः. **करस्पर्शः** शिरसि हस्तस्थापनम् ॥२२॥

**स्वयञ्च** इत्यत्र. **प्रयच्छति** इति विषयान् प्रयच्छति. तथाच विषयाणां बन्धकत्वाभावेन तद्दाने दोषाभावः इति भावः. **अन्यशब्दस्य** अर्थान्तरम् आहुः **नूतने**त्यादि. ननु पुरि प्रवेशस्य पूर्वम् उक्तत्वात् पुनः तत्प्रवेशो व्यावर्तकत्वेन वक्तव्यः "पुरम् आविशन् आशीर्भिः बन्धुभिश्च युज्यमानो जातः" इति, तत् कुतः पुनः तत्प्रवेशकथनम् इत्यतः आहुः **अत्र** इत्यादि.

१. अपीति नास्ति घ.   २. स्वयमिति घ.

पुत्र-श्वशुरादिभिः **युज्यमानः पुरम् अविशत्**. अत्र क्रियैव सर्वोत्कृष्टा इति न व्यावर्तकत्वेन निरूप्यते. केवलं भक्तिप्रधानत्वात् च स्तोत्र-तत्त्वादि-निरूपणम्[१] ॥२३॥

मर्यादास्थित-स्त्रीणां कृत्यम् आह.

**राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥**
**हर्म्याण्यारुरुहुर्विप्रास्तदीक्षणमहोत्सवाः ॥२४॥**

**राजमार्गम्** इति. स्त्रियोऽपि मार्गस्था भगवानपि मार्गस्थः इति दर्शनम् उचितम् इति भावः. **विप्राः** इति सम्बोधनं भगवता द्वारकायामपि सर्वे मार्गाः रक्षिताः इति ज्ञापयितुम्. **तदीक्षणमेव महान् उत्सवो** यासाम्. अनेन सर्वाभरणभूषितत्वम् अन्यदर्शनकृत-दोषाभावः च निरूपितः[२] ॥२४॥

ननु दर्शनस्य कथम् उत्सवत्वं, नित्यत्वाद् इति आशङ्क्य आह.

---

श्रीगोकुलनाथानां टिप्पणी

**स्वयञ्च** इत्यत्र. **अत्र क्रियैव** इति. अस्मिन् पक्षे **आशीर्भिः** इत्यस्य अत्र न अन्वयः ॥२३॥

**राजमार्गम्** इत्यस्य आभासे. **मर्यादास्थितस्त्रीणाम्** इति, पत्यादिभिः मर्यादायां स्थापितानाम् इति अर्थः ॥२४॥

प्रकाशः

तथाच अत्र आनर्तपुर्या द्वारकायाः च सत्त्वेन पूर्वम् आनर्तप्रवेशस्य उक्तत्वेऽपि अत्र द्वारकाप्रवेशक्रियायाएव सर्वोत्कृष्टत्वात् तथा उच्यते इति अर्थः. ननु तावतैव[३] सर्वोत्कृष्टत्वे स्तोत्रादिनिरूपण-वैयर्थ्यं स्याद् इत्यतः आहुः **केवलम्** इत्यादि. **आदिपदेन** स्वप्रार्थनम् ॥२३॥

**राजमार्गम्** इत्यत्र. **मर्यादास्थितस्त्रीणाम्** इति, आवरणे तिष्ठन्तीनाम् इति अर्थः ॥२४॥

**नित्यम्** इत्यत्र. **कथम् उत्सवत्वम्** इति. अतिशयितानन्दजनकत्वं हि उत्सवत्वं, तत् च **दर्शनस्य नित्यत्वाद्** अतिशयाजनकत्वेन **कथं** केन प्रकारेण **इति आशङ्क्य आह** तदुपपादनाय नेत्रतृप्त्यभावं तद्धेतुत्वेन

---

१. स्तोत्रत्वादीति ख. २. निवारित इति क-घ-ङ. ३. तावता इति मुद्रितपाठः. कि.पाठेतु एवम् - सम्पा.

**नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम् ॥**
**न वितृप्यन्ति हि दृशः श्रियो धामाङ्गमच्युतम् ॥२५॥**

**नित्यम्** इति. नित्योत्सवत्वाद् भगवतो, न भगवद्दर्शनस्य धारावाहिकज्ञानत्वं, प्रतिक्षणम् अलौकिकार्थबोधात्. पूर्व-पूर्वदर्शनस्य रुच्युत्पादकत्वमेव[1], न विषयित्वं[2], भगवतो विषयत्वाभावात्. रुचिः तु

प्रकाशः

आह इति अर्थः. अत्र मूले उत्सवहेतुत्वेन दृगवितृप्तिः उच्यते, तस्याअपि हेतुत्वेन भगवदङ्गानां स्वाधीनत्वाभावः उच्यते. **यद्यपि निरीक्षमाणानां द्वारकौकसां नित्यम्** अर्थाद् दर्शनं तथापि तेषां **दृशो न वितृप्यन्ति,** हि यतो हेतोः **अङ्गं श्रियो धामे**त्यादिः न स्वाधीनं, त्वस्माद् इति वचनव्यक्तेः. ताम् उपपादयन्ति **नित्योत्सवत्वाद्** इत्यादि. प्रतिक्षणम् अन्यान्यविधरूप-प्रदर्शनेन अन्यान्यानन्द-जनकत्वात् तथा इति अर्थः. तृतीयस्कन्धे ''तया विभ्रंशितज्ञाना'' (भाग.पुरा. ३।४।१) इत्यत्र ज्ञानस्य चिरकालस्थायितायाः व्यवस्थाप्यत्वेन अत्र धारावाहिकत्वकथनं मतान्तरीय-प्रसिद्ध्यभिप्रायेण. तथाच उत्तरोत्तरज्ञानेन पूर्वपूर्वज्ञानतिरोभावाद् धारावाहिक-तुल्यैकज्ञानत्वं न इति अर्थो बोध्यः. ननु मा अस्तु ज्ञानस्य धारावाहिकत्वं तथापि तत्तद्रूपदर्शनजनितानन्देन दृशां तृप्तेः सम्भवाद् अवितृप्तिः कुतः इति आकाङ्क्षायाम् आहुः **अलौकिके**त्यादि. ननु अस्तु रुचिः तथापि भगवतो विषयत्वात् तदंशे तु तृप्तिः स्यादेव इति कथं विशेषतः तदभावः इत्यतः आहुः **न विषयत्वम्** इत्यादि. तथाच ''पराञ्चि खानि'' (कठोप. २।१।१) इति श्रुतेः भगवद्दर्शने प्रमाणानाम् असामर्थ्यात् तत्र भगवत्सामर्थ्येन दर्शने ''अहं पश्यामि'' इति अभिमानमात्रम्. तथा सति उचितैव अतृप्तिः इति अर्थः. ननु तथापि तटस्थस्य रुच्युत्पादकत्वादर्शनाद् रुच्यनुरोधेन भगवत्सामर्थ्याद् भगवतो ज्ञानविषयत्वम् अत्र उपेयं, तथा सति न अवितृप्तिः

लेखः

**विषयसामर्थ्याद्** इति व्युत्पादकसामर्थ्यात् ॥२५॥

१. तु व्युत्पादकत्वमेवेति क-ग-घ. २. विषयत्वम् इति मुद्रितपाठः प्रकाशे च. भा.पाठेतु एवम् - सम्पा.

विषयसामर्थ्याद्[1], औषधवत्. अतएव न कदापि तृप्तिः भगवद्दर्शने. दोषात् परम् अग्रहणं, यथा महादोषे औषधमपि गृहीतुं न[2] शक्यते. तत्र दृष्टेः तेजस्त्वाद् विषयदोषेणैव दुष्टता, परमार्थनिर्णये धर्ममार्गे तु कर्तृधर्मसम्बन्धेऽपि. स च विषयदोषो द्वारकावासिनां नास्ति इति आह **द्वारकौकसाम्** इति.

प्रकाशः

इत्यतः आहुः **रुचिः** इत्यादि. सकृत् पूर्वं दृष्टविषयस्य असामर्थ्याद्[3] इति अर्थः. **अतएव** इति सकृद् दर्शनादेव. ननु एवं रुच्युत्पादकत्वे सर्वैः भक्त्या भगवान् कुतो न गृह्यते, भक्त्या दर्शनप्रकारस्य पूर्वाध्याये स्थापितत्वाद् इत्यतः आहुः **दोषाद्** इत्यादि. भगवत्पराङ्मुखत्वेन भक्त्यभावरूप-दोषात् तथा इति अर्थः. तद् वक्ष्यते "तमयं मन्यते लोकः" (श्लो. ३७) इत्यत्र. स दोषः किं निष्ठो येन अग्रहणम् इति आकाङ्क्षायां तदधिकरणम् आहुः **तत्र** इत्यादि. अग्रहणप्रयोजके दोषे विचारणीये **दृष्टेः तेजस्त्वात्** "दीपश्चक्षुश्च रूपञ्च ज्योतिषो न पृथग् भवेद्" (भाग.पुरा. १२।४।२४) इत्यादिवाक्यैः तेजोरूपत्वात्, तस्य च "तत्तेजो विद्धि मामकम्" (भग.गीता १५।१२) इति वाक्येन भगवदीयत्वात् तत्र तदभावे **विषयदोषेण** तद्ग्राह्यविषयस्य प्राकृतत्वात् तत्सम्बन्धेनैव चण्डालाग्निवद् **दुष्टता**. तथाच तद्ग्रहणस्वाभाव्याद् भगवद्ग्रहणासामर्थ्यम्. मार्गणं मार्गः, **धर्ममार्गे** धर्मविचारे तु **कर्तृधर्मसम्बन्धेऽपि** कर्ता जीवो अन्तःकरणं वा, तद्धर्मः साधारणत्वेन यो भगवति अध्यासः, तत्सम्बन्धेऽपि **दुष्टता** इति तेन अग्रहणम् इति अर्थः. एवं दोषं निश्चित्य द्रष्टृषु तदभावं स्फुटीकुर्वन्ति **स च** इत्यादि. **द्वारकौकसाम्** इति. द्वारं कायति वदति इति द्वारका. तथाच तयैव वासेन भक्तिरूपदर्शन-साधनोपदेशात् प्राकृतत्वरूप-विषयदोषस्य अध्यासरूप-कर्तृदोषस्य च सम्बन्धाभावात् स नास्ति इति अर्थः. **सर्वे** इति मोक्षादिफलप्रतिबन्धकाः. ननु द्वारकावासमात्रेण सर्वदोषनिवृत्तौ[4] निरीक्षणस्य

१. विषयासामर्थ्याद् इति पाठः प्रकाशे - सम्पा.  २. न गृहीतुं शक्यत इति क-ग.

३. सामर्थ्याद् इति कि.पाठे - सम्पा.

४. सर्वदोषनिरीक्षणस्य इति मुद्रितपाठस्तु दोषग्रस्तो भाति. कि.पाठे तु एवम् - सम्पा.

अनेनैव वा[१] सर्वे दोषाः निवारिताः. "पराञ्चि खानि व्यतृणद्" (कठोप. २।१।१) इति औत्पत्तिकदोषो भगवद्दर्शनेन निवार्यते, अनन्यशक्यत्वाद्, अन्ये तु द्वारकादिभिः इति निर्णयः. ननु भगवतो रसात्मकत्वाद् अमृतौषधवत् कथं न उभयसाधकत्वं? तत्र आह **न वितृप्यन्ति** इति. विशेषेण न तृप्यन्ति. **हि** युक्तो अयम् अर्थः. यदा हि दृश्यते भगवान् तदा तृप्ता भवन्ति. द्वितीयक्षणे पूर्वक्षणस्थ-दर्शनेन[२] रुचेः उत्पादितत्वात् – यद्यपि विषयएव रुचिम् उत्पादयति तथापि ज्ञानद्वारा इति ज्ञानप्राधान्यं, ज्ञानं तु विषयद्वारा तृप्तिं जनयतीति तृप्तौ विषयप्राधान्यम्, अतो विषयाद् ज्ञानं प्रबलमिति – न विशेषेण तृप्यन्ति इति अर्थः. **दृशः** इति स्त्रीबहुत्वनिर्देशादपि एकस्माद् भगवद्रूपाद् अवितृप्तिः सूचिता. किञ्च **यदपि**[३] एकं रूपम् अनुभवयोग्यं तदपि **श्रियो धामाङ्गं** लक्ष्म्याः स्थानरूपम् अङ्गम्, अतः तया सहितो न अन्यस्त्रीणां तृप्तिजनको भवति. किञ्च स्वस्मिन्[४] प्रविष्टे हि पुरुषे तृप्यन्ति स्त्रियः, तद् अत्र प्रकृते नास्ति इति आह **अच्युतम्** इति. न विद्यते च्युतं यस्य. अतो विषयविचारेणापि दृष्टीनां न तृप्तिसम्भावना ॥२५॥

---

प्रकाशः

अवितृप्तिहेतुता न उच्येत इत्यतः आहुः **पराञ्चीत्यादि**. **उभयसाधकत्वम्** इति, दोषनिवृत्तिः तृप्तिः च इति उभयोः साधकत्वम्. **दृश्यते** इति द्वितीयक्षणे दृश्यते. तथाच द्वितीयक्षणे पूर्वक्षणस्थदर्शनेन रुचिः, द्वितीयक्षणस्थेन तु अलौकिकबोधः, पुनः अग्रिमे तत्र रुचिः —इत्येवं रुचिप्राचुर्ये युक्तैव अवितृप्तिः इति अर्थः. ननु उक्तं तटस्थस्य रुच्यनुत्पादकत्वम् अतः तदापि विषयसम्बन्धः उपेयः, तथा सति तृप्तिः अवर्जनीया इत्यतः आहुः **यद्यपि** इत्यादि. एवम् अतृप्तौ हेतुं समर्थयित्वा अत्यन्तातृप्तौ हेत्वन्तराणि स्फुटीकुर्वन्ति **दृशः** इत्यादिना ॥२५॥

---

१. वेति नास्ति घ. २. नष्टदर्शनेनेति घ.

३. यद्यपीति घ-ङ-प्रकाशे -सम्पा. ४. यस्मिन्निति क-घ.

ननु अङ्गान्तरदर्शनेन तृप्यन्ताम्, [१]उरःस्थानमात्रं हि लक्ष्म्याः, तत्र आह.

**श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् ॥**
**बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम् ॥२६॥**

**श्रियो निवासः** इति. कोऽपि भागः तादृशो भगवति नास्ति यो लक्ष्म्यादिभिः न परिगृहीतः. तत्र उपरिभागो लक्ष्म्याएव गृहीतः स्थान-दर्शनाभ्याम्. तद् आह. **श्रियो निवासो यस्य उरः** वक्षःस्थलं, तस्याएव **दृशां** भगवन्**मुखं पानपात्रम्**. लक्ष्म्याः स्वरूपे निविष्टत्वाद् भिन्नतया स्थित्यभावाद् भोक्तृत्वाभावात् लक्ष्मीनयनाभ्यां निर्गता दृष्टयएव भोक्त्र्यो[२] जाताः. तासां करणापेक्षायां यत्रैव लावण्यामृतं तिष्ठति तदेव करणम्. तत्र मुखस्य पानपात्रत्वं श्रुतिसिद्धम्, ‘‘अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः’’ (बृहदा.उप. २।२।३) इति श्रुतेः. **पात्र**पदप्रयोगाद् विहितत्वम्. बहूनाम् एकपात्रत्वात् तासामेव तृप्तिः दुर्लभा, कुतो अन्यासाम् इति भावः. तर्हि अङ्गान्तरे दृष्टिः निवेश्यताम् इति आशङ्क्य आह— सन्ति **बाहवः** आलिङ्गनयोग्याः, परम् अन्यैः पुरुषैः आक्रान्ताः. न च ते दूरीकर्तुं शक्याः, बहुत्वात् पुरुषत्वात् च. एका स्त्री यत्र निवारयितुम् अशक्या स्थानद्वयम् आक्रम्य तिष्ठति तत्र **लोकपालाः** कथं शक्याः! आवश्यकाः च ते, लोकपालत्वात्. तर्हि ततोऽपि अर्वागवयवेषु दृष्टिः पातनीया इति आशङ्क्य आह **सारङ्गाणाम्** इति. मध्ये ये अवयवाः ते वस्त्रादिभिरेव वेष्टिता दर्शनयोग्याः[३] न भवन्ति, अतः परम् अवशिष्यते चरणद्वयम्. तत्रापि एकः चरण उपरिगतो ब्रह्मादिभिरेव गृहीतो लोकस्थित्यर्थं तत्रैव स्थितो, गङ्गया च गृहीतो ब्रह्माण्डबिले तिष्ठति, अन्यथा जलेन ब्रह्माण्डपूरणेन सर्वनाशः स्यात्. अथ अवशिष्यते एकः चरणः. स च बहुभिः आक्रान्तः.

लेखः

**श्रियो निवासो** इत्यत्र. **अर्वाग्बिलश्चमस इति श्रुतेः** इति. ... ॥२६॥

१. उदरस्थानमात्रमिति ग. २. भाक्त्यो या इति ख. ३. दर्शनयोग्या एवेति क-ग-घ.

सारं गच्छन्ति इति **सारङ्गाः** सदाचाराः कर्मनिष्ठाः. पुनः च सरति इति सरः, तस्य समूहः सारं – रससमूहम् इति यावद्, अक्षरव्यत्यासेन वा – ते कर्मफलार्थिनो विषयिणो योगिनो वा. पुनः सारं गच्छन्ति जानन्ति इति **सारङ्गाः** ज्ञानिनः. पुनः सारं गायन्ति इति **सारङ्गाः** भक्ताः. पुनः अर-सहितं सुदर्शनसहितं सारं = भगवन्तं सुदर्शनं वा कालेन भीताः सन्तो गच्छन्ति गायन्ति वा ते **सारङ्गाः** सात्त्वताः. सर्वेषाम् एकशेषः, समानरूपत्वात्. एवं बहवो बहुविधाः. तेषां **पदाम्बुजम्** एकम् आश्रयः. **पदत्वादेव** ते ततो न गच्छन्ति. समुदायशक्त्या च तेएव रसं जानन्ति. **अम्बुजत्वात्** सर्वेएव रसार्थिनः. तस्माद् दृष्टीनां स्वतन्त्रस्थानाभावाद्[१] अतृप्तिः युक्ता इति अर्थः ॥२६॥

एवं सामान्यतः पुरीं तत्स्थान् भक्तांश्च निरूप्य भगवान् कथं विशेषतया न वर्णितः इति आकाङ्क्षायाम् "उपमानाभावाद्" इति उक्ते भक्तानां बुद्ध्या अभूतोपमया[२] वर्णनीयः इति सिद्धान्तं वक्तुम् आह.

**सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ॥**
**पिशङ्गवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥२७॥**

**सितातपत्रे**ति. सितातपत्रं च व्यजने च **सितातपत्रव्यजनानि. प्रसूनवर्षैः** सर्वतः प्रवृत्तैः. प्रसूनभेदात् पुरुषभेदाद् वा बहुवचनम्. (**पिशङ्गवासा!**) पीताम्बरं नित्यमपि रूपवद्वर्णनायां[३] हेतुत्वेन निरूप्यते. **वनमालया** उपलक्षितः

---

प्रकाशः

**सारङ्गाणाम्** इत्यत्र. **सारङ्गपदे** अतिपरोक्षवृत्त्या वर्णागमो बोध्यः, 'हंस' इतिवत्. **पुनः च** इति निर्वचनान्तरविचारे. **सरः** इति, द्रवद्द्रव्यम् इति अर्थः. **ते** इति रससमूहप्राप्तारः. एतेषां पदाम्बुजसम्बन्धे "तपस्विनो दानपराः" (भाग.पुरा. २।४।१७) इति वाक्यं प्रमाणत्वेन बोध्यम्, एवम् अन्यत्रापि. **समुदायशक्त्या** इति, कोशान्तरे 'सारङ्ग'शब्दस्य भ्रमरे शक्त्या ॥२६॥

---

१. स्वतन्त्रस्थानां भावादिति घ. २. अभूतोपमाया वर्णनायेति घ.

३. वर्णनीयानामिति ग-घ.

सहितो वा. एवं सर्वसामग्र्यां सत्यां **वनमालया एव बभौ** इति वा. यथा मध्ये (**घनो**!) नीलो मेघो भवति, उपरि (**अर्कः**!) सूर्यः, परितो (**उडुपः**!) द्वौ चन्द्रौ लोलौ, स्थिरा **विद्युत्** कटितटे, (**चापः**!) इन्द्रधनुः द्वयम् उभयतो मिलितं तदा भगवानिव भवेद् इति अभूतोपमा[१] ॥२७॥

एवं वर्णनां समाप्य सम्बन्धिनां स्नेहातिशयम् आह.

**प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ॥**
**ववन्दे शिरसा सप्त देवकीप्रमुखास्तदा ॥२८॥**

**प्रविष्टः** इति. तुशब्दः पूर्ववर्णनां व्यावर्तयति. **पित्रोः** इति. मातृत्वेन सर्वाः मातरः एकाः, अपृथग्धर्मशीलत्वात्. सर्वासां, पितुः च एकं **गृहं,** भेदे कारणाभावात् च. प्रवेशमात्रेणैव भगवत्क्रियातः पूर्वं ताएव परिष्वङ्गादिकं कृतवत्यः इति आह **परिष्वक्तः** इति. “ये यथा मां प्रपद्यन्ते” (भग.गीता ४।११) इति वाक्याद् मातॄः प्रति बालकएव प्रतिभाति. भगवद्धर्मापेक्षया लौकिकधर्मस्य बहिरङ्गत्वात् नमस्कारापेक्षया परिष्वङ्गः प्रथमः. **स्वमातृभिः** इति. पितुरपि मातरः सन्ति अतः **स्वमातृभिः** इति उक्तम्. **सप्त** देवकी-भगिन्यः, एकादशा अपराः. एकजातासु कन्यासु एकस्मै वराय बहूनां दानम् अपृथग्धर्मशीलत्वेनैव वरस्य. कन्यानां च तदैव पत्नीत्वम्,

प्रकाशः

**प्रविष्टस्तु** इत्यत्र. **भेदे कारणाभावाद्** इति. स्त्रीणां पृथग्धर्मशीलत्वं हि गृहान्तरस्थितौ कारणं, तदभावात् ॥२७॥

लेखः

**ववन्दे शिरसा सप्तः देवकीप्रमुखाः** इत्यत्र. **तदैव** इति. “भूमौ च ते भुवनमङ्गल दिग्वितानां, मन्दाकिनीति दिवि भोगवतीति चाधौ, गङ्गेति चेहचरणाम्बु पुनाति विश्वम्” (भाग.पुरा. १०।६७।४४) इति वर-कन्ययोः अपृथग्धर्मशीलत्वेएव इति अर्थः. अत्र उपपत्त्यर्थम् आहुः

१. इत्यद्भुतोपमेति ग. यस्य उपमानं भवितुं नार्हति किञ्चन तस्य अत्यसाधारणं वैलक्षण्यम् अभूतोपमया वर्ण्यते - सम्पा.

अन्यथा न अर्धत्वं[1], "यास्ते शीलमनुव्रता" (भाग.पुरा. ३।१४।१३) इति वाक्यात्. अयमेव हेतुः पतिबहुत्वेऽपि. अतएव **देवकीप्रमुखाः सप्तः** एकस्वभावाद् 'मातरः' इति उच्यन्ते. एकदा सर्वा **ववन्दे शिरसा** इति भगवद्धर्मत्वम्. शब्देन सर्वासां सकृद् वन्दनं सम्भवति, नतु कायिकम्, अतः **शिरसा. तदा** इति भगवद्धर्मप्राकट्याय ॥२८॥

नमस्कारानन्तरं भगवति बालत्वमेव प्रकटमिति बालकपुत्रे यत् कर्तव्यं तत् चक्रुः इति आह.

**ताः पुत्रमङ्कमारोप्य स्नेहस्नुतपयोधराः ॥**
**हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥२९॥**

**ता** इति सर्वाएव **पुत्रम् अङ्कम् आरोप्य** बालक**स्नेहस्नुतपयोधराः** जाताः, नतु तस्य पयसः कश्चन विनियोगो जातः. भगवतो महत्त्वं प्रौढत्वं जानन्त्योऽपि **हर्षेण विह्वलितात्मानः** – पूर्वसंस्कारस्य[2] दृढत्वात् – **नेत्रजैः जलैः** शिखाः **सिषिचुः** ॥२९॥

भार्याणाम् अवस्थाम् आह **अथ** इति.

**अथाविशत् स्वभवनं सर्वकामम् अनुत्तमम् ॥**
**प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥३०॥**
**पत्न्यः पतिं प्रोष्य गृहानुपागतं**
**विलोक्य सञ्जातमनोमहोत्सवाः ॥**

---

लेखः

**अन्यथा** इति. व्यधिकरणधर्माश्रयत्वे इति अर्थः. **नाऽर्धत्वम्** इति. तथाच समानधर्मशीलत्वाभावे अर्धत्वाभावात् पत्नीत्वमपि न वक्तुं शक्यम् इति अर्थः. "अर्धो वा एषः आत्मनो यत् पत्नी" (तैत्ति.संहि. ६।१।८।५) इति, "पत्युर्नोयज्ञसंयोगे" (पाणि.सूत्र ४।१।३३) इत्यादि प्रमाणस्वारस्याद् इति भावः. **भगवद्धर्म** इति. नमस्कारकालेऽपि भगवत्त्वं प्रकटमेव, नतु तिरोहितम्, अतः **तदा** इति उक्तम् इति अर्थः. यद्वा परिष्वङ्गादिना पित्रादिषु भगवद्धर्मप्राकट्ये सत्येव भगवन्नमनम् इति ज्ञापनाय **तदा** इति उक्तम् ॥२८॥

---

१. नाऽर्थत्वमिति घ-ङ.    २. पूर्वसंस्कारसदृशत्वादिति क-ग-घ-ङ.

**उत्तस्थुरारात् सहसासनाशयात्**

**साकं व्रतैर्व्रीडितलोचनाननाः ॥३१॥**

एकस्मिन्नेव **भवने** विश्वकर्मणा **षोडशसहस्रं प्रासादाः** कृताः स्वचातुरी-ख्यापनार्थम्. अतएव **अनुत्तमं** न विद्यते उत्तमं यस्मात्. **सर्वे कामा** यस्मिन्, सर्वकामनापूरक[१]-पदार्थ-सद्भावो यस्मिन् वा. यथा मातृषु पुत्रत्वेन स्वयं प्रविष्टः तथा पत्नीष्वपि प्रविष्टः पतित्वेन, न प्रभुत्वेन. अतः तासां साधारणपतित्वेन कृत्यं युक्तम्. दूराद् आगच्छन्तं **पतिं विलोक्य सम्यग् जातो मनसि महान् उत्सवो** यासाम्. **आराद्** दूराद् एव [२]**उत्तस्थुः**. **सहसा** इति न सावधानभूताः ; यथैव स्थिताः तथैव उत्तस्थुः. देहः आत्मा च आसने चिन्तायां निमग्नौ स्थितौ, तद् इदानीं द्विरूपा **आसनाद् आशयाद्** अपि **उत्तस्थुः**. परं **व्रतानि** स्थितान्येव, विशेषालङ्कार-रहितत्वाद्[३] इति भावः. अतएव **व्रीडया** मुकुलितानि **लोचनाननानि** यासाम् ॥३०-३१॥

ताभिः कृतां भगवत्पूजाम् आह **तम् आत्मजैः** इति.

**तमात्मजैर्दृष्टिभिरन्तरात्मना**

**दुरन्तभावाः परिरेभिरे पतिम् ॥**

**निरुद्धमप्यास्रवदम्बु नेत्रयोः**

**विलज्जतीनां भृगुवर्य विक्लवात् ॥३२॥**

**तम्** आगच्छन्तमेव ताः सर्वा युगपदेव कायेन मनसा च आलिङ्गनं कृतवत्यः. तत्र प्रकारभेदम् आह **आत्मजैः दृष्टिभिः अन्तरात्मना** इति. (**आत्मजैः**!) पुत्रान् हस्ते प्रयच्छन्त्यइव निकटसम्बद्धाः कायेन **परिरेभिरे**.

---

लेखः

**पत्न्यः पतिम्** इत्यत्र. **आसनादाशयाद्** इति. आसनाद् देहः आशयाद् आत्मा च उत्तस्थौ इति अर्थः. **व्रतानि** इति, प्रोषितभर्तृकानां व्रतानि इति अर्थः. तानि आहुः **विशेष** इति ॥३१॥

---

१. पूर्वकेति ख. २. दृष्ट्वोत्तस्थुरिति क-ग-घ. ३. विशेषालङ्काररहितत्वादि इति क-ख.

तथा **दृष्टिभिः** दृष्टिं दृष्ट्या योजयन्त्यः परिरम्भण[१]-भावोद्गिरणेन अलसवलितादिभिः **परिरेभिरे. अन्तरात्मना** भगवति प्रविष्टेन मनसा च **परिरेभिरे.** तासां परिरम्भणेएव मनोरथः समाप्तः, न बाह्यं कृत्यं कृतवत्यः. तत्र हेतुः **दुरन्तभावाः** इति, दुष्टः अन्तो यस्य भावस्य[२]. भावस्तु आन्तरः, तस्मिन् हि समाप्ते बहिःक्रिया भवति. स च मानापनोदनावधिः. अतो (**विक्लवाद्!**) वैक्लव्याद् मानापनोदनात् पूर्वमेव अश्रु समागतम्. तत् मानवतीभिः **निरुद्धमपि आस्रवद्** ईषत् सुस्राव. ननु (**विलज्जतीनां!**) मानवतीनाम् एतद् अनुचितम्! तत्र आह हे **भृगुवर्य.** भगवन्माहात्म्याद्[३] इति उक्तं भवति. प्रत्युत तासामेव वैक्लव्यं जातम् ॥३२॥

एवं तासाम् अतिभावं भगवति निरूप्य आश्चर्यम् इति शङ्कायां हेतुम् आह.

**यद्यप्यसौ पार्श्वगतो रहोगतः**
**तथापि तस्याङ्घ्रियुगं नवं नवम् ॥**

---

प्रकाशः

**तमात्मजैः** इत्यत्र. भृगुणा भगवन्माहात्म्यस्य अनुभूतत्वात् तद्वंशे प्रधानस्य तवापि एतन्माहात्म्यज्ञानं भविष्यति इति आशयेन आहुः **भगवन्माहात्म्येत्यादि** ॥३२॥

लेखः

**तमात्मजैः** इत्यत्र. **भावस्त्वान्तरः** इति. शृङ्गाररसपोषकाः ये विषाद-गर्वादयो भावाः नायिकानां हि प्रोषिते पत्यौ भवन्ति ते यदा विनिवर्तन्ते तदा बहिःक्रिया सम्भवति. ते च सर्वथा अनुनयादि-मानापनोदनान्ताः असाध्याः अतो दूरं गताः. तादृशाअपि स्नेहातिशयज-विक्लवात् स्वनिवर्तकव्यापारतः पूर्वमेव निवृत्ताः, तदभिज्ञापकः च अश्रुपातः इति भावः ॥३२॥

---

१. परिरम्भणम्भावोद्गिरणेनेति ख. परिरम्भणाभावोद्गिरणेनेति ग.

२. भा.पाठे एवमधिकं, मुद्रितपाठे नास्ति -सम्पा. ३. भगवन्माहात्म्यादियुक्तमिति घ.

**पदे पदे का विरमेत तत्पदात्**

**चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥३३॥**

**यद्यपि असौ** इति. **यद्यपि** रोदनम् अनुचितं – वस्तुनो अलाभे तद् भवति ; स च **पार्श्वगतः** तत्रापि ( **रहोगतः** ! ) एकान्ते, भावनानुसारेणैव[1] भगवता कृतत्वात् – **तथापि तस्य अङ्घ्रियुगं ( नवं** ! ) नूतनम्. तासां हि मनोरथः "चरणद्वयं हृदये स्थाप्यम्" इति. स च अत्यन्तं रसाविर्भावे बन्धादिभिः[2] जाते कर्तुं शक्यः. प्रथमं च भक्त्या धर्मेण वा लोकतो वा चरणक्षालने कृते संवाहने च कृते पूर्वोक्तो भवति. ततः च भगवतः चरणारविन्दस्य नित्यनूतनत्वात् प्रथमक्रिययैव जन्मसमाप्तिः अतो रोदनम् [3]उचितम् इति आह. **पदे पदे** क्षणे क्षणे, प्रतिपदं वा ( **नवं नवं** ! ) नूतनादपि नूतनमेव. अतः **का** वा स्त्री मनोरथपूर्त्यभावात् सकृदपि ( **विरमेत** ! ) विरता भवेत्! अथवा **तत्पदाद्** भक्तिविषयात् प्रथमसेवातो विरता भवेत् तदा हि अग्रिम-मनोरथारम्भः, अतो रोदनम् [4]उचितम् इति भावः. अत्र अर्थे निदर्शनम् आह **चलापि** इति. वस्तुतः **श्रीः चला** तथापि एकस्मिन् कार्ये समाप्ते अन्यत्र गच्छेत्. तद् भगवति एकमपि कार्यं न समाप्नोति, नित्यनूतनत्वाद्, अतो भगवन्तं कदाचिदपि **न जहाति** ॥३३॥

यथा एवम्प्रकारेण लक्ष्मीम् अन्याश्च भार्याः अपरिसमाप्तकार्याएव स्थापयति, ताः च न जानन्ति, एवमेव भूभारहरणार्थं प्रवृत्तो भगवान् एकक्रिययैव मध्ये असमाप्तया कार्यं समापितवान् इति आह.

---

प्रकाशः

**यद्यपि** इत्यत्र. **कृतत्वाद्** इति पार्श्वगतेः कृतत्वात्. **स च अत्यन्तम्** इति, स मनोरथो अत्यन्तम् इति अर्थः. **पूर्वोक्तः** इति मनोरथः. **श्रीः** इति. इयं देवीरूपा ज्ञेया, चिच्छक्तेः बलवद्भगवन्निष्ठत्वात् ॥३३॥

---

१. भावनानुसारेण भगवतैव कृतत्वादिति क-ग-घ. २. सम्बन्धादिभिरति क-ग-घ-ङ.

३. रोदनमनुचितमिति घ. ४. रोदनमनुचितमिति घ.

**एवं नृपाणां क्षितिभारजन्मनाम् अक्षौहिणीभिः परिवृत्ततेजसाम् ॥**
**विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥३४॥**

**एवं नृपाणाम्** इति. यथा स्त्रियः स्वयमेव तिष्ठन्ति क्षणान्तरकार्यार्थं न प्रार्थ्यन्ते एवं भूभारहरणे प्रथमकार्ये समारब्धे अन्तिमपर्यन्तं तदेव अनुवर्तते. यथा प्रथमम् अग्निसम्बन्धे सर्वदाहपर्यन्तं स्वयमेव अनुवर्तते एवम् अयम् अद्भुतकर्मा, न लोकसदृशः. (**क्षितिभारजन्मनां!**) भूभारार्थं जन्म येषाम्. स्वतः[१] कार्यं[२] भूभारजननं, तत्रापि **अक्षौहिणीभिः** अक्षौहिणी-सङ्ख्यासेनाभिः **परिवृत्तं** द्विगुणीभूतं **तेजो** येषाम्. तत्र भगवत्कार्यम् आह **विधाय वैरं मिथो** वैरं विधाय. तस्य वैरस्य सामर्थ्यम् आह **श्वसनो यथानलम्** इति. वायुः निमित्तम्, अग्निरेव दाहकः. स तु वंशघर्षणेन जातः सर्वं दहति. तथा अयमपि **मिथो वधेन** सम्पन्नेन **उपरतः** मिथो वधं कृत्वा उपरतः इति अर्थः. जीवत्सु तेषु न उपरमेद् इति भावः. **निरायुध** इति निर्गतानि आयुधानि यस्य. तस्य हि अन्योन्यमेव आयुधम्, अग्नेः इन्धनमिव ॥३४॥

एवं सर्वसंहर्ता भगवान् महान् अयम् अद्भुतकर्मा. तस्य सर्वं कार्यं समाप्तम्. अतः परं भक्तोद्धारक-भागवताधिकारि-देहनिष्पादनम् अवशिष्यते, तद् उत्तरत्र वक्ष्यते. मध्ये तस्य विरुद्धधर्माश्रयत्वं वक्तुं शृङ्गारक्रीडाम् आह.

---

प्रकाशः

**एवं नृपाणाम्** इत्यत्र. **न लोकसदृशः** इति. अतः स्वयमेव अनुवर्तते इति शेषः. **तत्रापि** इत्यादि. तथाच इदं तेषाम् आगन्तुकं कार्यम् इति अर्थः. **तत्र** इति तेषां तादृशे कार्यद्वये तैः जाते. **निमित्तम्** इति सहकारि ॥३४॥

लेखः

**एवम्** इत्यत्र. **यथा स्त्रियः** इति. ... ॥३४॥

---

१. स्वत इत्यादिस्तेजो येषामित्यन्तो ग्रन्थो नास्ति ग-घ-ङ.  २. कार्यार्थमेवेति क.

**स एव नरलोकेऽस्मिन्नवतीर्णः स्वमायया ॥**
**रेमे स्त्रीरत्नकूटस्थो भगवान् प्राकृतो यथा ॥३५॥**

**स एव** इति. **सएव** संहारकएव कालात्मा (**अस्मिन् नरलोके!**) भक्ष्येषु नरेषु स्वयमपि तद्रूपेण **अवतीर्णः** यथा कोऽपि न जानाति तथा **स्वमायया** रमणनिमित्ते[१] **स्त्रीरत्नकूटे** सुन्दरस्त्रीसमूहे[२] स्वयमेव विद्यमानो **भगवान्** तद्वशम् [३]अनापन्नः (**प्राकृतो यथा रेमे!**) प्राकृतवद् रतिं कृतवान्, यावद् रसे न प्रविष्टः तावत् तस्य रसं न जानाति इति कामशास्त्रं, स्ववशे स्थितस्य न रसः इति ॥३५॥

एवं भगवत्कृत्या ''अङ्गीकृता ग्लानिः न दोषाय'' ( ) इति न्यायेन भगवद्रमणं, नतु विषयधर्मेण तथात्वम् इति प्रतिपादयितुम् आह.

**उद्दामभावपिशुनामलवल्गुहास-**
**व्रीडावलोकनिहतो मदनोऽपि यासाम् ॥**
**सम्मुह्य चापमजहात् प्रमदोत्तमास्ता**
**यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः ॥३६॥**

**उद्दामेति.** यद्यपि स्त्रियो अतिसमर्थाः तथापि भगवन्मनो जेतुं न शक्ताः. तासां सामर्थ्यम् आह **उद्दामः** त्यक्तशृङ्खलो यो **भावः** – लज्जा-भयादयो दामानि, तदभावे उद्दामत्वं – तस्य **पिशुनः** सूचकः **अमलो वल्गुः** यो **हासः**. अज्ञापनीये ज्ञापयति इति पिशुनत्वम्, असमये अस्थाने च. एवमपि सन् **अमलः** स्वाभाविकत्वाद् निर्दुष्टः स्वच्छो वा, सूचितस्य

लेखः

**स एव** इत्यत्र. **इति कामशास्त्रम्** इति, एवंप्रकारिका तच्छास्त्रमर्यादा इति अर्थः ॥३५॥

**न दोषाय** इति. तथा पराधीनत्वाद् इति भावः. ''अहं भक्तपराधीनः'' (भाग.पुरा. ९।४।६३) इति वाक्यम् अत्र अनुसन्धेयम्. **उद्दाम** इत्यत्र. **अज्ञापनीये** इति, अज्ञापनीये सत्यपि इति अर्थः.

१. मारणनिमित्तस्त्रीरत्नकूट इति ख. मारणनिमित्ते इति मुद्रितपाठः. भा.पाठे तु एवम् - सम्पा.

२. सुन्दरेति नास्ति ग. ३. तद्वशमापन्न इति ग.

हितकरणात्. तत्र सामर्थ्यं **वल्गुः** मनोहरः, पुरुषस्य मनो हरति इति. एतादृशो[१] **हासः**[२] प्रथमं प्रवृत्तः, ततः कार्यानन्तरं **व्रीडा,** स्वतः प्रवृत्तत्वात्, ततः (**अवलोक!**) स्ववञ्चितत्व-सूचकदर्शनम्. तेनापि **निहतो मदनः** कन्दर्पः सर्वव्यामोहनार्थं प्रवृत्तो दृष्टिबलं ज्ञात्वा स्वयं **चापम् अजहात्,** "मत्कार्यम् एताएव करिष्यन्ति इति किं चापेन" इति, "यत्र मामपि मोहयन्ति तत्र कथम् अन्यो न मुग्धो भवेद्" इति. एवं कामादपि अधिका[३] कामपृतना **ता (प्रमदोत्तमा !)** एव एताः भगवत्स्त्रियः. अथापि **यस्य** भगवतः **इन्द्रियं** मनो **विमथितुं** वशीकर्तुं **कुहकैः** अनेकविधकपटैः **न शेकुः** न समर्थाः जाताः. दृष्टिमात्रेणैव मदनो जितः, कुहकैरपि तस्य मनो जेतुं न शक्ताः इति अर्थः. पितामहत्वाद् युक्तम् इति भावः ॥३६॥

एवमपि स्वयं पराजिता अशक्ताअपि अज्ञानात् स्वधर्मं भगवति आरोपयन्ति इति आह.

**तमयं मन्यते लोको ह्यसङ्गमपि सङ्गिनम् ॥**
**आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥३७॥**

**तम् अयम्** इति. **लोको** भ्रान्तो **असङ्गमपि** भगवन्तं **सङ्गिनं मन्यते (आत्मौपम्येन!)** स्वदृष्टान्तेन[४]. "भगवान् सङ्गी, विषयसहचरितात्मत्वाद्, देवदत्तवद्" इति अनुमानेन उपाध्यग्रहणसहितेन[५] भगवन्तमपि सङ्गिनं मन्यते. तत्र विचारकाणामपि उपाध्यग्रहे हेतुः **मनुजं** [६]**व्यापृण्वानम्**

लेखः

**पितामहत्वाद्** इति मनसः कामपितामहत्वात् ॥३६॥

**तमयम्** इत्यत्र. **उपाध्यग्रहणसहितेन** इति. ननु इदम् असङ्गतं, जीवत्वरूपोपाधेः जागरूकत्वाद्, नहि विषयसहचरितात्मत्वं सङ्गित्वव्याप्यम्, अलौकिक-नानाविषय-भोक्तरि वैकुण्ठस्वामिनि तत्सत्त्वे अस्य सङ्गित्वाभावस्य सकलप्रमाणसिद्धत्वात्. अतो यत्र यत्र जीवत्वं तत्र तत्र सङ्गित्वम् इति

१. तादृश इति ख. २. यो हास इति क-ख. ३. अधिकाः इति सविसर्गः पाठः ख-ङ.
४. स्वदृष्टान्ते इति ख. ५. उपाधिग्रहणसहितेनेति घ. ६. व्यावृण्वानमिति ख-ग.

इति, आत्मानं मनुजं यथा लोको मन्यते तथा विशेषचेष्टाकर्तारम्. अतः तात्पर्यापरिज्ञानाद् अज्ञत्वादिबोधने, विद्यमाने उपाधौ जीवत्वरूपे तदज्ञानात् च, तथा मन्ता **अबुधः** इति अर्थः ॥३७॥

ननु* बोधनक्रियायाः यथाऽज्ञानजनकत्वं तथा स्वाश्रयस्य निकृष्टत्व-सम्पादकत्वमपि, लोके तथैव व्याप्तेः. "अज्ञानादिकं जीवत्वसमानाधिकरणं, दोषजन्यत्वात्, मूर्च्छादिवद्" इति निष्प्रत्यूहानुमानेन जीवत्वमपि ज्ञापयति.

---

प्रकाशः

**तम् अयम्** इत्यत्र. **आत्मानम्** इति स्वस्वरूपं, भगवत्स्वरूपम् इति यावत्. **तात्पर्यापरिज्ञानाद्** इत्यादि. भगवता स्वस्मिन् **अज्ञत्वादिबोधने** अन्येषां कृते तत्तात्पर्यापरिज्ञानाद् इति अर्थः. **तथा मन्ता** इति सङ्गित्वमन्ता ॥३७॥

**एतदीशनम्** इत्यत्र. **बोधनक्रियायाः** इत्यादि. स्वस्मिन् अज्ञत्वादि-बोधनरूपायाः भगवत्क्रियायाः यथा जीवाज्ञानजनकत्वम् इति अर्थः. **ज्ञापयति**

लेखः

साध्यव्यापकतासिद्धेः, भगवति च जीवत्वाभावादेव न सङ्गित्वसिद्धिः इत्यतः आहुः **अज्ञत्वादिबोधने** इति. भगवान् स्वस्मिन् अज्ञत्वादि बोधयति इति विपरीतबोधे **विद्यमाने** सति **जीवत्वरूपे उपाधौ** साध्यव्यापकत्वाद् **अज्ञानात् च तथा मन्ता अबुधः**. यद्वा **तदज्ञानाच्च** इति, उपाधित्वाज्ञानात् च इति अर्थः. अयम् अर्थः— यदि भगवति अलौकिकत्वं जानीयुः तदा तत्र सङ्गित्वस्य बाधस्फूर्त्या जीवत्वाद्युपाधिं कल्पयेयुः. तत्तु भगवतैव अज्ञानस्थापनाद् दुर्लभम् इति उपाध्यस्फूर्तिः इति ॥३७॥

तर्हि मा अस्तु अयं प्रयोगः. अनुमानान्तरेण ननु इदं किल अस्मदनुकूलं, यतो अज्ञत्वादिबोधनेन सुतरां जीवत्वसिद्धेः, तत्सिद्धौ च सङ्गित्वस्यापि सुवचत्वमेव, इति आशयेन पुनः प्रत्यवतिष्ठते **ननु बोधन** इत्यादि. अज्ञत्वादि-बोधनक्रियायाः यथा भगवति विपरीतज्ञानजनकत्वं तथा अज्ञानाद्याश्रयस्य भगवतो जीवत्वसम्पादकत्वमपि इति अर्थः. स्वम् = अज्ञानादि, तदाश्रयस्य इति अर्थः. ननु कोऽयं नियमः इत्यतः आहुः **लोके तथैव** इति. व्याप्तिम् आह **अज्ञानादिकम्** इति. **जीवत्वमपि ज्ञापयति** इति.

भ्रमजनकत्वेन प्रतारकत्वात् च जीवत्वम्. न च जीवत्वे प्रतारणं व्यर्थम् इति वाच्यं, मुक्तजीवानामपि[१] तथाकरणदर्शनात्. स्वबन्धभयादेव तत्र तथाकरणं दृश्यते, न अन्यथा ❋इत्येवम् आशङ्क्य जीववैलक्षण्यं वदन् विषयसम्बन्धस्य न जीवत्वबोधकत्वम् [२]इति आह.

---

प्रकाशः

इति. अज्ञानादिकं भगवति जीवत्वं ज्ञापयति इति अर्थः. ''विमतम् अज्ञानादिकं न दोषजन्यम्, अयोग्यप्रतारणार्थत्वाद्, भरतीय-जडत्वादिवद्'' इति अनुमानेन पूर्वोक्तहेतोः साध्यसमत्व-शङ्कायां हेत्वन्तरम् आहुः **भ्रमे**त्यादि. तथाच ''विमतो जीवः, भ्रमजनकत्वेन प्रतारकत्वाद्, जडभरतादिवद्'' इति अनुमानेन जीवत्वम् इति अर्थः. **एवम् आशङ्क्य** इति ईदृशानुमानेन ज्ञानिजीवत्वम्

लेखः

उपदर्शितानुमानेन अज्ञानादेः जीवत्व-सामानाधिकरण्ये निश्चिते ''भगवान् जीवः, जीवत्वसमानाधिकरणाज्ञानादि-मत्त्वाद्, देवदत्तवद्'' इति अनुमानेन तत्त्वं सिद्ध्यति इति अर्थः. जीवत्वसाधक-हेत्वन्तरम् आह **भ्रमजनकत्वेन** इत्यादि. तथाच ''भगवान् जीवः, पूर्णज्ञानत्वेऽपि अज्ञत्वादिप्रदर्शनेन प्रतारकत्वाद्, अस्मदादिवद्'' इति प्रयोगः. ननु अयं वदतोव्याधातः—पूर्वोक्तानुमानेन जीवत्वे निश्चिते पूर्णज्ञानादिमत्त्वस्य वक्तुम् अशक्यत्वाद् अज्ञत्वादि-दर्शनस्य तात्त्विकत्वमेव सिद्ध्यति, न प्रतारकत्वम् ; यदि च प्रतारकत्वसिद्ध्यै पूर्णज्ञानादिमत्त्वं तदा सिद्धम् ईश्वरत्वम् इति आशङ्क्य निरस्यति **नच** इति. **व्यर्थम्** इति, न वक्तुं शक्यम् इति अर्थः. **तथाकरण** इति, प्रतारकव्यापारदर्शनाद् इति अर्थः. एवञ्च मुक्तचिरजीवेषु सांसारिकलोकप्रतारणा-दर्शनात् तद्वद् जीवविशेषत्वमेव भगवतः सेत्स्यति, न तु ईश्वरत्वमपि इति भावः. ननु मुक्तानां कापट्ये सांसारिकतुल्यत्वापत्तिः अतः आह **स्वबन्धभयादेव** इति. एवम् अत्रापि कश्चन प्रकारो भविष्यतीति जीवएव, न भगवान् —इति पूर्वपक्षनिष्कर्षः. **ननु बोधनक्रियायाः** इत्यारभ्य **एतदीशनम्** इत्यस्य अवतारिका ज्ञेया. **एतदीशनम्** इत्यत्र व्याख्याने

---

१. मुक्तजीवानामितीति ख. २. इत्याशङ्क्याऽऽहेति ग.

**एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ॥**
**न युज्यते सदात्मस्थैर्यथाऽबुद्धिस्तदाश्रया ॥३८॥**

**एतद् ईशनम् ईशस्य** इति. विपरीतम् एतद् उच्यते ''विषयसम्बन्धेन जीवत्वम्'' इति. भ्रमादेव विषयसम्बन्धे तथात्वम्. अयन्तु ईश्वरत्वबोधकः, नियतकार्यजनकस्य तत्र कार्याजननाद्, जीवधर्माणाम् अप्रतिबन्धकत्वात्. मणि-मन्त्रादेरपि अलौकिकत्वाद् भगवच्छक्तिमत्त्वम्. अतः **प्रकृतिस्थोऽपि** विषयेषु रममाणोऽपि **तद्गुणैः** [१]कर्तृवशत्वापादकत्व-स्वरूपप्रच्युति-दोषजनकत्वादिभिः न[२] युज्यते. ननु आपाततो अग्निस्पर्शे दाहो न जातइति नियतसम्बन्धेऽपि न जायते, तथा भगवत्यपि भविष्यति इति आशङ्क्य

प्रकाशः

आशङ्क्य. **भ्रमाद्** इति विषयेषु आनन्दजनकत्वोत्कृष्टत्व-भ्रमात्. तथाच ''विमतो विषयसम्बन्धः न जीवधर्मः, दोषाजन्यत्वाद्, दत्तादिकृत-सुरापानादिवद्'' इति प्रत्यनुमानेन बाधितत्वाद् इति अर्थः. **ईश्वरत्वबोधक** इति. ''विमतः सम्बन्धः ईशधर्मः, नियतकार्यजनक-कार्यप्रतिबन्धकत्वाद्, दत्तीय-सुरापानादिवद्'' इति प्रयोगात् तथा इति अर्थः. अत्र च नियतविषयासक्तिरूप-कार्यजनकं मनः, तत्कार्यासक्ति-प्रतिबन्धकत्वं सङ्गस्य इति ईश्वरधर्मत्वम्. एवं योगि-स्वैराचरणस्यापि ईशधर्मत्वमेव, योगजत्वाद्, अतो न हेतौ दोषः. ननु ''विमतो न ईशधर्मः, नियतकार्यजनक-कार्यप्रतिबन्धकत्वाद्, मणि-मन्त्रादिनिष्ठ-दाहप्रतिबन्धकधर्मवद्'' इति दृष्टान्तान्तरेण हेतोः साधारणत्वम् इति चेत्, तत्र आहुः **मणी**त्यादि. तथाच एवं हेतोः साधारणत्वेऽपि तस्य[३] जीवधर्मे व्यभिचाराभावेन उक्तहेतौ 'चेतनधर्मत्वे सति' इत्येवं विशेषिते साधारण्य-परिहारात् तस्य ईश्वरधर्मत्वे सिद्धे ईश्वरत्वबोधकता निःप्रत्यूहा इति अर्थः. तदेतद् हृदि कृत्वा आहुः **अतः**

लेखः

**नियतसम्बन्धेऽपि न जायते** इति काकूक्तिः ज्ञेया. **तथा** इति, आपाततो

१. कर्तृवश्यत्वेति घ.  २. नेति नास्ति घ.

३. तत्तज्जीवधर्मे इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

आह **सदा आत्मस्थैः** इति. सर्वाश्रयत्वाद् भगवतः, संयुक्तसमवायेन वा, सदा आत्मन्येव ते धर्माः वर्तन्ते[१]. ते[२] यदि[३] स्वाश्रये स्वकार्यं सम्पादयेयुः, भगवदाश्रिताः न भवेयुः. भगवतो वा सर्वाश्रयत्वं धर्मो न भवेत्. तथाच यम् अनाश्रित्यैव भ्रमात् तदीयत्वेन ज्ञाता भवन्ति तेएव सङ्गित्वं वा जीवत्वं वा बोधयन्ति, न नियताश्रिताः. अन्याश्रयैरेव अन्यत्र दोषजनकत्वं चोरादिषु भोगेषु[४] च लोके सिद्धम्. अत्र दृष्टान्तम् आह

प्रकाशः

इत्यादि. **सर्वाश्रयत्वाद्** इति. तच्च ब्रह्मवादे स्वरूपेण तादात्म्येन वा, मतान्तरे तु संयोगादिनापि इति बोध्यम्. तस्माद् हेतोः ते सदा भगवति वर्तन्ते इति अर्थः. **संयुक्ते**त्यादि. जीवात्मसंयुक्तं मनः, तत्र समवायः सङ्गादीनां, तेन सम्बन्धेन ते सदा परमात्मन्येव वर्तन्ते इति अर्थः. **ते** इति प्रकृतिगुणाः. **न भवेयुः** इति. कार्यसम्पादने भगवत्त्वभङ्गाद् जीवाश्रिताएव भवेयुः, तथाच सर्वस्य भगवदाश्रितत्वानुरोधात् स्वकार्यासम्पादकानामेव आश्रितत्वम् अङ्गीकार्यम् इति अर्थः. ननु कार्यासम्पादने तत्सत्तायां प्रमाणाभावाद् मा अस्तु तदाश्रितत्वम् इत्यतः आहुः **भगवतः** इत्यादि. सिद्धम् आहुः **तथाच** इत्यादि. **अनाश्रित्य** इति नियमतो अनाश्रित्य. अन्याश्रितानां व्यधिकरणत्वात् कथम् अन्यत्र दोषजनकत्वम् इत्यतः: आहुः **अन्याश्रयैः** इत्यादि. **चौरादिषु रोगेषु च** इति. यथा अन्याश्रित-धनस्य

लेखः

विषयसम्बन्धेन सङ्गित्वाभावेऽपि सर्वथा तत्सम्बन्धे तु तत्त्वं भविष्यत्येव इति अर्थः. **न नियताश्रिताः** इति. एवञ्च "लोकवत्तु लीला कैवल्यम्" (ब्रह्मसूत्र २।१।३३) इति न्यायोक्तिदिशा सर्वेषाम् अलौकिकानाम् अप्राकृतस्वरूपभूतानामेव धर्माणां लोकाः स्वसजातीयधर्मत्व-भ्रमादेव स्वकीयप्राकृतानेव धर्मान् आरोप्य प्राकृतस्वसजातीयत्वं कल्पयन्ति इति अर्थः. **अन्याश्रयैरेव** इति. जीवाश्रयैरेव धर्मैः भ्रमाद् भगवति आरोपितैरेव

१. प्रवर्तन्त इति घ. २. ते इति नास्ति घ.

३. बहिरिति ग. ४. चौरादिषु रोगेषु चेति क-प्रकाशे-लेखे. लोकेषु चेति ग - सम्पा.

**यथाऽबुद्धिः तदाश्रया** इति. महाराजसमीपे शस्त्र-पाशादिकं न स्वाश्रये किञ्चित् करोति, अन्यार्थत्वेनैव तस्य सङ्ग्रहात्. "श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट्येलयोर्जया, विद्ययाऽविद्यया शक्त्या मायया च निषेवितम्" (भाग.पुरा. १०।३६।५५) इति, "विद्याविद्ये मम तनू" (भाग.पुरा. ११।११।३) इति च वाक्ये भगवदाश्रयत्वेन अमतिः अविद्या निरूपिता. मतिः विद्या, तत्प्रतिस्पर्धिनी सपत्नीः अमतिः अविद्या. यथा अविद्या भगवति स्वकार्यं न करोति तथा एतेऽपि विषयाः इति अर्थः. "एकस्यैव ममांशस्य जीवस्यैव महामते, बन्धोऽस्याऽविद्ययाऽनादिर्विद्यया च तथेतरः" (भाग.पुरा. ११।११।४) इति वाक्यात् न विषयाणां [१]स्वाश्रयदुष्टत्व-सम्पादकत्वम्. इदानीं रमणस्य तु[२] ईश्वरत्वबोधकत्वम्. अविद्यावद् अज्ञानादीनामपि दैत्यव्यामोहकत्वम्.

प्रकाशः

स्त्र्यादेः च अन्यत्र जिघृक्षादिकार्यजनने[३] तत् चौर्य-लाम्पट्यदोषजनकत्वं, यथा च अन्यत्र विद्यमानस्य कुष्ठादिरोगस्य "कुष्ठी यावत्प्रपश्यति" ( . । । ) इति वाक्याद् दर्शनविषय-दोषजनकत्वं तथा इति अर्थः. **अत्र** इति नियताश्रितस्य दोषाजनकत्वे. एवम् उपपाद्य सर्वम् अर्थं सङ्गृह्णन्ति **एकस्यैव** इत्यादि. **अविद्यावद्** इति. अविद्या यथा जीवव्यामोहिका

लेखः

सङ्गित्वादि-**दोषजनकत्वम्** इति अर्थः. यदि भगवदीयाः धर्माः अलौकिकाः स्वस्वरूपभूताः अप्राकृताः भिन्नाएव इति जानीयुः तदा तु न दोषजनकत्वम् इति भावः. अन्यस्थलीयानां स्थलान्तरीयत्वे दोषजनकत्वम् इत्यत्र प्रसिद्धप्रमाणं **चौरादिषु** इति. यः चौरः सोऽपि स्वगृहे साधुरेव इति व्यवह्रियते, परगृहे गतः "चौरः" इति उच्यते. एवं स्वस्वस्थाने स्थिता वायु-पित्त-कफाः आरोग्यजनकाः, तेएव स्वस्थानत्यागेन स्थानान्तरं प्राप्ताः "रोगाः" इति उच्यन्ते इति अर्थः. **दोषनिराकरणार्थम्** इति. ... ॥३८॥

॥ इति प्रथमस्कन्धे एकादशाध्यायः ॥

१. स्वाश्रये इति ख. स्वाश्रयदुष्टत्वसम्पादकत्वञ्चेति ग. २. तुर्नास्ति क-ग-घ.

३. कामजनने च इति स्यात्. अत्र पाठः सन्दिग्धः.

दोषनिराकरणं[१] तु सद्धर्मएव. अतो दुष्टानां प्रतारणं सद्धर्मएव. तस्मात् निर्दोषपूर्णगुणो हरिः ॥३८॥

किञ्च लोकाः भ्रान्ताः भवन्त्येव, नियतसम्बद्धापि[२] भ्रमन्ते इति आह.

**तं मेनिरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः ॥**
**अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥३९॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे एकादशोऽध्यायः ॥

**तं मेनिरे** इति. **अबला** ज्ञानजनक-क्रियाकरणे असमर्थाः, अत एव **मूढा** ज्ञानरहिताः अन्यार्थं भगवत्कृतं भगवदर्थं मन्यन्ते. तद् आह **स्त्रैणम्** इति, स्त्रीलम्पटं, **चकारात्** तद्वशमपि. तत्र हेतुः **रहः अनुव्रतम्** इति, एकान्ते अनु व्रतं यस्य. यदैव एकान्तस्थानं तत्रैव भगवान् सन्निहितः अतो निरन्तरम् एकान्तशीलत्वात् **स्त्रैणं मेनिरे.** ननु एवमेव स्याद् इत्यतः आह **अप्रमाणविदो भर्तुः** इति, **भर्तुः** भगवतः प्रमाणं न जानन्ति इति. यथा अन्धाः हस्तिनं मन्यन्ते स्पर्शेन ; स हि चक्षुषैव ज्ञेयः. तथा भगवच्छास्त्रेणैव भगवान् विज्ञेयः नतु अवस्थाविशेषेण क्रियामात्रेण. तथाकरणमपि भर्तृत्वाद् – "अप्रमत्ता रक्षत[३] तन्तुमेनम्" (आप.धर्मसूत्र २।६।१३।६) इति श्रुतेः भगवानेव श्रुत्यर्थप्रतिपादकः अतो भर्तृत्वाद् – एकान्तशीलत्वम्. स्त्रीरक्षार्थं तु भगवान् तथा करोति, स्त्रीणान्तु

---

श्रीगोकुलनाथानां टिप्पणी

**तं मेनिरे** इत्यत्र. **प्रमाणम्** इति, भगवत्प्रमाजनकं शास्त्रम् इति अर्थः ॥३९॥

प्रकाशः

तथा इति अर्थः. **दोषनिराकरणार्थम्** इति, "अज्ञानिनः सुरवरे समधिक्षिपन्तः" (गरुडपुरा. १।२२७।३५) इति न्यायेन भगवदस्मरणरूप-दोषनिराकरणार्थम् ॥३८॥

---

१. दोषनिराकरणार्थं तु इति ग-प्रकाशे-लेखे - सम्पा.

२. नियतसम्बन्धा इति मुद्रितपाठः. भा.पाठे तु एवम् - सम्पा.	३. चक्षतेति क-ग.

तदज्ञानम्. तत्र दृष्टान्तम् आह **ईश्वरं मतयो यथा** इति. **यथा मतयो** दर्शनज्ञानानि भगवतैव प्रवर्तितानि स्वयुक्त्या[१] **तमेव** अन्यथा मन्यन्ते— ईश्वरएव नास्ति इति केचिद्, अन्ये[२]=यज्ञादयएव ईश्वरः इति अपरे, कर्ता केवलम् इति अन्ये, जीवविशेषएव इति केचित्. सर्वेषाम् एतेषां मूलप्रमाणाज्ञानात्[३] स्वोत्प्रेक्षया तथात्वं, तथा[४] एतासामपि इति अर्थः ॥३९॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे एकादशो अध्यायः ॥

---

प्रकाशः

**तं मेनिरे** इत्यत्र. **दर्शनज्ञानानि** इति, न्यायादिदर्शन-सिद्धानि ज्ञानानि. **केचिद्** इति निरीश्वरकापिलाः, **अन्ये** इति बाह्याः, **अपरे** इति जैमिनीयाः, **अन्ये** इति वैशेषिकाद्याः, **केचिद्** इति साङ्ख्यैकदेशिनः. **मूलप्रमाणाज्ञानाद्** इति. ब्रह्मणि मूलप्रमाणं वेदः, तदर्थाज्ञानाद् इति अर्थः. **मूलकारणे**ति पाठे ब्रह्मज्ञाने मूलकारणं वेदः इति सएव अर्थः ॥३९॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे एकादशाध्यायविवरणम् ॥

## ॥ इति एकादशोऽध्यायः ॥

---

१. सुयुक्त्येति ख. २. अन्येऽपीति क-ग-घ.

३. मूलकारणाज्ञानादिति क-ग-ङ. ४. तथैवाऽऽसामपीति क-ग-घ.

# ॥ अथ द्वादशोऽध्यायः ॥

एवम् [१]एकाग्र्यसिद्ध्यर्थं[२] सर्वं कार्यं निरूपितम् ॥
अधुना श्रोतृदेहस्य रक्षणं विनिरूप्यते ॥(१)॥
[३]यथा वेदान्तविज्ञाने पञ्चाग्नौ देहसम्भवः ॥
तथा भागवतज्ञाने ब्रह्माग्नौ बोधसंयुते ॥(२)॥

प्रकाशः

अथ द्वादशाध्यायं विवरिषवः पूर्वसङ्गतिनिरूपणपूर्वकं तस्य अर्थम् आहुः **एवम्** इत्यादि. **एवम्** इति पञ्चाध्याय्युक्तप्रकारेण. **अधुना** इति द्वादशाध्याये. ननु एवं दाहाद्यनन्तरं किमिति रक्षा कृता, पूर्वमपि करणे भगवतः सामर्थ्याद् इत्यतः आहुः **यथे**त्यादि द्वयम्. तथाच एतदर्थम् एवं रक्षा इति अर्थः (१-२).

लेखः

सङ्गत्यर्थं अनुवदन्ति **एवम्** इत्यादि. **निरूपितम्** इति, पूर्वतनैः चतुर्भिः अध्यायैः निरूपितम् इति अर्थः. **पञ्चाग्नौ** इति. पञ्चाग्निविद्याप्रकारेण देहसम्भवः छान्दोग्ये सप्तमप्रपाठके(?) (छान्दो.उप. ५।२।३-१०) वर्णितः. तद्यथा प्रवहणाख्यस्य राज्ञः सभाप्रविष्टं श्वेतकेतुं पञ्चाग्निविद्याप्रकारं जानन्नेव पप्रच्छ "वेत्थ यथा पञ्चम्याम् आहुतौ आपः पुरुषवचसो भवन्ति" इति. एवं पृष्टः श्वेतकेतुः पितरं गौतमम् आसाद्य प्रोवाच "एवं राज्ञा पृष्टोऽहं तदुत्तरं न जानामि" इति. स च गौतमः स्वयम् अज्ञः सन् राजसमीपं गत्वा "तां विद्यां ब्रूहि" इति उवाच. एवम् उक्तस्य राज्ञो गौतमं प्रति पञ्चाग्निविद्योपदेशः. तथाहि "असौ वाव द्युलोको गौतमाग्निः तस्य आदित्यएव समिद् रश्मयो धूमो अहरर्चिः चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिंगाः तस्मिन् एतस्मिन् अग्नौ देवाः श्रद्धां जुह्वति. तस्याः आहुतेः सोमो राजा सम्भवति". चन्द्रमाः सोममण्डलाः, सोमो राजा तदन्तर्वर्ती इति विभेदः. एवञ्च सोमरूपं यजमानशरीरं पूर्वं भवति इति अर्थः.

१. एकाग्रेति ग-घ. २. सिद्धार्थमिति घ. ३. यथेत्ययं श्लोको नास्ति घ.

सर्वलक्षणसम्पन्नः सर्वदोषविवर्जितः ॥
बीजसंस्कारसहितः श्रोता भागवते नृपः[१] ॥(३)॥

व्यवहितत्वात् शौनकः पूर्वकथां स्मारयति.

**॥ शौनकः उवाच ॥**

**अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥**
**उत्तराया हतो गर्भ ईशेनाऽऽजीवितः पुनः ॥१॥**

---

प्रकाशः

अतः परं व्याख्यातुकामाः शौनकप्रश्नतात्पर्यम् आहुः **व्यवहितेत्यादि** ॥१॥

लेखः

एवम् अग्रेऽपि ऊह्यम्— "पर्जन्यो वा गौतमाग्निः तस्य वायुरेव समिद् अभ्रं धूमो विद्युद् अर्चिः अशनिः अङ्गाराः ह्लादनयो विस्फुलिंगाः तस्मिन् एतस्मिन् अग्नौ देवाः सोमं राजानं जुह्वति. तस्याः आहुतेः वर्षं भवति" वृष्टिरूपं यजमानशरीरं भवति इति अर्थः. "पृथिवी वा गौतमाग्निः तस्याः संवत्सरएव समिद् आकाशो धूमो रात्रिः अर्चिः दिशो अङ्गाराः अवान्तरदिशो विस्फुलिंगाः तस्मिन् एतस्मिन् अग्नौ वर्षं जुह्वति. तस्या आहुतेः अन्नं सम्भवति. पुरुषो वा गौतमाग्निः तस्य वागेव समित् प्राणो धूमो जिह्वा अर्चिः चक्षुः अङ्गाराः श्रोत्रं विस्फुलिंगाः तस्मिन् एतस्मिन् देवाः अन्नं जुह्वति. तस्याः आहुतेः रेतः सम्भवति. योषा वै गौतमाग्निः तस्याः उपस्थाएव समिद् यद् उपमन्त्रयते स धूमो योनिः अर्चिः यदन्तःकरोति ते अङ्गाराः अभिनन्दाः विस्फुलिंगाः तस्मिन् एतस्मिन् अग्नौ देवा रेतो जुह्वति. तस्या आहुतेः गर्भः सम्भवति" इति पञ्चम्याम् आहुतौ "आपः पुरुषवचसो भवन्ति" = 'पुरुष'पदवाच्याः भवन्ति इति अर्थः. एतस्य देहस्य विज्ञानोपयोगित्वं साधनाध्याय-प्रथमाधिकरणे सिद्धम्. **ब्रह्माग्नौ** ब्रह्माधिष्ठिताऽस्त्राग्नौ **बोधसंयुते** तत्रैव भगवद्दर्शनेन तत्प्रत्यक्षज्ञान-समकालीनः इति अर्थः (१-२).

---

१. मत इति क-ग-घ.

**अश्वत्थाम्नोपसृष्टेन** इति. त्वद्वाक्यानां[१] समभिव्यव ( / व्या ? ) हाराद् अस्माभिः एवम्[२] अवगतम्— अश्वत्थाम्नो[३] ब्राह्मणोत्तमत्वात् तेन ( **उपसृष्टेन!** ) निरूपितस्य[४] ( **ब्रह्मशीर्ष्णोरुतेजसा!** ) ब्रह्मास्त्रस्य च अमोघत्वाद् **उत्तरायाः गर्भो हतः,** पश्चाद् **ईशेन आजीवितः.** स्वसामर्थ्यात् पूर्वमपि[५] दुर्विभाव्याभिः स्वशक्तिभिः बीजे तं प्रवेश्य आजीवितवान्, इदानीमपि दग्धे बीजे पुनः तं प्रवेश्य आजीवयति इति **पुनः**शब्दार्थः ॥१॥

अनुवादांशम् उक्त्वा श्रोतव्यांशम् आह **तस्य जन्म** इति.

**तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः ॥**
**निधनञ्च यथैवासीत् स प्रेत्य गतवान् यथा ॥२॥**
**तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे ॥**
**ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥३॥**

**महाबुद्धेः** इति पूर्वमेव तस्य ज्ञानं सिद्धम्. **महात्मनः** इति शुभानि **कर्माणि.** जन्मकर्मावदातस्य मृत्युसम्भावनाभावाद् गर्भेएव च मृत्योः निवर्तितत्वात् पश्चात् केन प्रकारेण **निधनम्** इति प्रश्नः. किञ्च यथा पूर्वजन्मनि ज्ञानादिषु सिद्धेष्वपि एतद्देहसम्बन्धो जातः एवम् उत्तरत्रापि भविष्यति इति आशङ्क्य पृच्छति **स प्रेत्य गतवान् यथा** इति. **प्रेत्य** शरीरं त्यक्त्वा. **यथा** इति प्रष्टव्यार्थः. **तत्** पूर्वोक्तं त्रयम् उत्पत्ति-स्थिति-प्रलयाख्यम् **इदं** च परलोकगमनं शास्त्रार्थसन्देहात् **श्रोतुम् इच्छामि.** बहुकालनिर्बन्धात् क्लेशेऽपि **यदि** सर्वथा एतद् वक्तव्यम् इति **मन्यसे** तदा ( **नः श्रद्दधानानां!** ) श्रद्धायुक्ताः वयं श्रोतुम् इच्छामः. इच्छया कथने भगवच्चरित्रम् अत्र अस्ति इति अवगम्यते, अतः एवम् आह **गदितुं यदि मन्यसे** इति. अन्यकथात्वेऽपि भगवदीयत्वात् श्रद्धा, अन्यथा ( **यस्य शुकः ज्ञानम् अदाद्!** ) शुकस्य ज्ञानदानं न सम्भवेत्. अतः तस्य चरित्रं कथय इति अर्थः ॥२-३॥

---

१. तद्वाक्यानामभिव्यवहारादिति ग. २. एव नाऽवगतमिति ग.

३. अश्वत्थाम्नो भगवतो ब्राह्मणत्वादिति क. ४. निरूपितस्य चेति ग. ५. पूर्वमभीति ख.

जन्मनिरूपणार्थं वंश-काल-देशानाम् उत्तमत्वम् आह त्रिभिः.

**॥ सूतः उवाच ॥**

**अपीपलन्महाराजः पितृवद् रञ्जयन् प्रजाः ॥**
**निस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥४॥**

**अपीपलद्** इति, अपालयद् इति अर्थः.

स्वधर्म-विष्णुभक्तिभ्यां महान् सर्वो न चान्यथा ॥
विषयेषु च वैतृष्ण्यं सेवार्थं भक्तिसूचकम् ॥(४)॥

तत्र राज्ञः प्रजापालनं धर्मः. **पितृवद् रञ्जयन् प्रजाः** इति ज्ञानसहितत्वम् उक्तम्, अन्यथा भगवद्दृष्ट्यभावे रञ्जनं न स्यात्. **निस्पृहः** इति नैरपेक्ष्यम्. **कृष्णपादानुसेवा** शास्त्रानुसारेण फलजननात् सम्यक्कृता इति ज्ञायते. अनेन[१] राज्ञः उत्तमत्वाद् तद्राज्यं[२], स कालो, वंशश्च उत्तमः इति राजधर्ममेव प्रजाः कुर्वन्तीति तद्राज्ये सर्वत्र [३]कृष्णसेवैव प्रसृता अतो देशः उत्तमः. ज्ञान-भक्ति-कर्मणां धर्माणां तस्मिन् काले विद्यमानत्वात् कालोत्कर्षः ॥४॥

ननु वैराग्यं कुत्र उपयुज्यते, तस्य च राज्यस्य च विरुद्धत्वाद् इति आशङ्क्य न साधनत्वेन अत्र वैराग्यं किन्तु भक्तेः आनुषङ्गिकम् इति तद् निरूपयति.

**सम्पदः क्रतवो विप्रा महिषी भ्रातरो मही ॥**
**जम्बूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम् ॥५॥**
**किं तेऽकामाः सुरस्यार्हा मुकुन्दमनसो द्विजाः ॥**
**अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥६॥**

**सम्पदः** इति. राज्यधनाश्वादीनां सम्पत्तये आधिक्यम्. **क्रतवो** राजसूयादयः. **विप्राः** इति सम्बोधनम् अस्मिन् अर्थे संवादार्थम्. **महिषी** द्रौपदी. **भ्रातरो** भीमादयः. **मही** सर्वापि. राजत्वात् शास्त्रतो **मही,** पौरुषेण

---

प्रकाशः

**अपीपलद्** इत्यत्र. शास्त्रानुसारेण फलजननं कृष्णसेवायाः सम्यक्कृतत्वज्ञाने हेतुः ॥४॥

---

१. अन्येनेति घ.  २. तद्राज्ये इति घ.  ३. वैष्णवसेवैवेति घ-ङ.

**आधिपत्यम्** इति भेदः. अर्जुनेन इन्द्रोऽपि [१]उपकृतः इति **त्रिदिवं गतं यशः**. एते भगवत्कृपया स्वतः सिद्धाः अतएव **अकामाः**. हृदये न आगताः इति **ते** इति उक्तम्. वस्तुतः एते विषयाः (**सुरस्य अर्हाः**!) देवयोग्याः मनुष्यस्य काम्याः भवन्ति, नतु विष्णुभक्तस्य ; यस्तु बहु कामयते बहु वा प्राप्तो भवति तस्य न क्षुद्रेषु कामना प्राप्तेष्वपि. (**मुकुन्दमनसो**!) मुकुन्दे मनो यस्य. मोक्षेएव यस्य मनः तस्यापि एतद् भवति, किमुत तद्दातरि! **द्विजाः** इति पूर्ववत् सम्बोधनम्. **किं मुदम् अधिजह्वुः** अपितु न कृतवन्तएव इति अर्थः. विषयाणां स्वधर्माजनने दृष्टान्तम् आह **क्षुधितस्य** इति. **इतरे** स्त्र्यादयः ॥५-६॥

एवं राज्ञो माहात्म्यम् उक्त्वा तद्वंशे स्वभावतएव अयम् एतादृशः इति [२]विशेषमाहात्म्यमेव आह.

**मातुर्गर्भगतो वीरः स तदा भृगुनन्दन ॥**
**ददर्श पुरुषं कञ्चिद् दह्यमानोऽस्त्रतेजसा ॥७॥**

**मातुः गर्भगतः** इति. **मातुः** इति असमासाद् गृहइव भिन्नतया स्थितिः[३] उच्यते अतो गर्भगतक्लेशो निवारितः ; पूर्वमेव ज्ञानादिसहितः केवलं गर्भं प्राप्तः. **वीरः** इति दाम्ना न बद्धः ; पराक्रमसहितएव तिष्ठति, भगवतः साक्षात् परब्रह्मणो दृष्ट्या देवैः दाम्ना बन्धनस्य अकृतत्वात्. अत्र "देवा वै राजन्याद्" (तैत्ति.संहि. २।४।१३।१) इति श्रुत्यर्थो अनुसन्धेयः. **वीरः स** इति सम्बन्धः. अत्र विश्वासार्थं

---

प्रकाशः

**किं ते अकामाः** इत्यत्र **अकामाः** इति, अकामिताः इति अर्थः. **पूर्ववद्** इति, संवादार्थम् इति अर्थः ॥६॥

**मातुः** इत्यत्र. ननु देवैः बन्धनस्य क्वचित् सिद्धौ अत्र तदकरणं युज्येत, तत्तु अप्रसिद्धम् इति शङ्कायाम् आहुः **अत्र** इत्यादि. "देवा वै राजन्याद् जायमानाद् अबिभयुः" इति तैत्तिरीयसंहिताश्रुतौ भयस्य उक्तत्वात् तेन बन्धनमपि युज्येत इति न अप्रसिद्धिः इति अर्थः.

---

१. इन्द्रोऽपि जित इति घ. २. विषयमाहात्म्यमिति घ. ३. स्तुतिरिति क-ग-घ.

(**भृगुनन्दन!**) सम्बोधनम्. **तदा दह्यमानएव ब्रह्मास्त्रतेजसा वीरत्वात्** तद् [१]अविगणय्य **कञ्चित् पुरुषं ददर्श.** भगवान् सर्वं कार्यं निष्पाद्य सर्वदैत्याप्रवेशाय सर्वतत्त्वसहितः तद्रक्षार्थम् उदरे प्रविष्टः परिभ्रमति. स्वोपकारज्ञापनाय तं प्रति[२] आत्मानं प्रदर्शितवान्. वेदे प्रसिद्धानि यानि रूपाणि तत्र यत् प्रथमं, भावयितुमपि अशक्यं, तेन रूपेण प्रकटः[३] इति (**दह्यमानः!**) तपःस्वधर्मसहितो **ददर्श,** "अतप्ततनूर्न तदामोश्नुते" (ऋक्संहि. ९।८३।१) इति श्रुतेः. **कञ्चिद्** इति विशेषाकारेण न निर्वचनीयम् ॥७॥

तद्रूपम् अनुवर्णयति.

**अङ्गुष्ठमात्रममलं　　स्फुरत्पुरटमौलिनम् ॥**
**अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ॥८॥**
**श्रीमद्दीर्घचतुर्बाहुं तप्तकाञ्चनकुण्डलम् ।**
**क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम् ॥**
**परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ॥९॥**
**अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥**
**विधमन्तं सन्निकर्षे पर्यैक्षत क इत्यसौ ॥१०॥**

**अङ्गुष्ठमात्रम्** इति, "अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः, ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुग्" (महाना.उप. १६।३)

प्रकाशः

**तपःस्वधर्मसहितः** इति. अस्त्रदह्यमानत्वमेव तपः, कृच्छादिवत् सन्तापात्मकत्वात्, स्वधर्मो वीरत्वं ; ताभ्यां सहितः इति अर्थः ॥७॥

लेखः

**मातुर्गर्भे** इत्यत्र. **देवा वै राजन्याद् इति श्रुतिः** इति. "देवाः वै राजन्याद् जायमानाद् अबिभयुः तम् अन्तरेव सन्तः अपोभनत् स वा एषो अपोब्धो जायते यद् राजन्यः. यद्वा एषो अनपोब्धो जायेत वृत्रान् घ्नंश्चरेद् यं कामयेत" इत्यादि तैत्तिरीयद्वितीयाष्टकचतुर्थप्रश्ने श्रूयते ॥७॥

---

१. अवगणय्येति क-ग-घ.　　२. प्रीत्या इति भा.पाठः -सम्पा.　　३. प्रकटयतीति क.

इति श्रुतेः. ब्रह्मत्वादेव **अमलम्** अतिस्वच्छम्. गर्भे हि विद्यमानस्य तन्मलसम्बन्धः सम्भवति, तद्व्यावृत्त्यर्थम् उक्तम्. **स्फुरत्पुरटमौलिनम्** इति दाहोत्तीर्णसुवर्ण-मुकुटयुक्तम्. अनेन ऐश्वर्यं ज्ञापितम्. **अपीच्यदर्शनम्** अपीच्यरूपं दर्शनं यस्य, "प्रियः स्त्रीणामपीच्य" ( . । । ) इति श्रुतेः. सौन्दर्यपरीक्षायां सर्वस्त्रीदर्शनस्य निकषत्वाद् अपीच्यवद् दर्शनं यस्य इति सर्वसुन्दरः. अनेन लक्ष्म्याश्रयत्वं[१] प्रतिपादितम्. **श्यामम्** इति वैष्णवसिद्धान्तसिद्धम्. अनेन भक्ताश्रयत्वं निरूपितम्. **तडिद्वाससम्** स्थिरविद्युन्निभ-वस्त्रम्. अनेन पूर्वविशेषणसहितेन[२] सर्वकामवर्षकत्वं[३] सूचितम्. **अच्युतम्** परिभ्रमणेऽपि सर्वदेशसम्बन्धसहितं, शङ्ख-चक्रादिसहितं वा. अनेन रक्षायां सामर्थ्यं ज्ञापितम्. **श्रीमद्दीर्घचतुर्बाहुम्** श्रीमन्तो दीर्घाः चत्वारो बाहवो यस्य. सूक्ष्मरूपे आकारः सम्यग् अभिव्यक्तो न भवेद् इति शङ्कया एवम् उक्तम्. आजानुबाहुत्वम् उक्तं भवति. पुरुषार्थचतुष्टयदानाय चतुर्णां प्रदर्शनम्. गतिपर्यन्तं क्रिया इति दीर्घत्वम्. उभयोः[४] लक्ष्मीसहितयोरेव कार्यनिर्वाहात् श्रीमत्त्वम्. अनेन ऐहिकामुष्मिक-फलदानं सूचितम्. **तप्तकाञ्चनकुण्डलं** तप्तकाञ्चनवर्णे कुण्डले यस्य इति साङ्ख्य-योगयोः

प्रकाशः

**अङ्गुष्ठमात्र** इति. (श्रुतेः!) अर्थस्तु— एतावत्परिमाणकोऽपि **अङ्गुष्ठं** पादावयवं, **चकाराद्** आलोमनखाग्रं च, **सम्यग्** व्याप्य **आश्रितः** आसमन्तात् तत्र तत्र कार्यं कुर्वन् स्थितः इति. शेषं स्फुटम्.

लेखः

**अङ्गुष्ठमात्रम्** इत्यत्र. **अनेन** इति. **सूचितम्** इति, सविद्युत्-सजलमेघ-साजात्यसूचनेन सूचितम् इति अर्थः. एवमादिस्थले व्यञ्जितव्यञ्जना ज्ञेया, 'उच्चनिच्चल' इत्यादिवत्. **शङ्खचक्रे**ति. अस्मिन् पक्षे स्वरूपपरिकरात् च्युतं रहितं न इति अर्थः. **श्रीमद्** इत्यत्र **गतिपर्यन्तम्** इति. गतिसाधनीभूत-जानुपर्यन्तं क्रियासाधनीभूताः बाहवः इति अर्थः. अतएव भगवान् स्वयम् आगत्य रक्षां कृतवान् इति भावः. **उभयो**ः इति. ... .

१. लक्ष्माश्रयत्वमिति घ. २. विशेषेणेति ख. ३. वर्षत्वमिति ग-घ-ङ. ४. उभययोरिति घ.

कुण्डलत्वात् सर्वविद्याप्रदत्वं सूचितम्. **तप्तकाञ्चन**पदात् सन्तप्तदशायामेव ज्ञानप्राप्तिः इति सूचितम्. **क्षतजाक्षं** क्षतजवत् लोहितवद् अक्षिणी नेत्रे यस्य. बाधकदूरीकरणाय प्रकटितक्रोधलेशयुक्तम्. अनेन भक्तरक्षायाम् आसक्तिः सूचिता, उग्रत्वाद् वा सावधानत्वं सूचितम्. **गदापाणिं** "ओजःसहो बलयुतं मुख्यं तत्त्वं गदां दधद्" (भाग.पुरा. १२।११।१४) इति वाक्याद् आसन्ययुक्तम्. अनेन तस्य प्राणगमनभयाभावः सूचितः. किञ्च तेजोग्रासे वायुतत्त्वमेव समर्थम्. अतएव तेजोग्रासार्थे वायुमेव गदां हस्ते गृहीत्वा तिष्ठति, "आधिक्ये निर्वापयिष्यामि" इति. **आत्मनः सर्वतोदिशं परिभ्रमन्तं** "जीवस्य सर्वत्र अहम्" इति ज्ञापयितुम्, रक्षां च. प्रकृते[१] विशेषम् आह **उल्काभां गदां भ्रामयन्तम्** इति. स्वस्य[२] तेजोहेतुत्वं ज्ञापयन्ती गदा स्वान्तःस्थं[३] तेजो अप्रकटयत्[४] अतः उल्काभा[५] दृश्यते. दैत्यनिवारणार्थं **मुहुः गदां भ्रामयन्तम्** . किञ्च **अस्त्रतेजः स्वगदया** इति. जननपर्यन्तं ब्रह्मास्त्रं चेत् तिष्ठेत् तदा निर्गमनसमये दैत्याद्युपोद्बलनात् कदाचिद् दहेद् अतः इदानीमेव (**विधमन्तं!**) स्वरूपतो नाशयति. अग्निवद् नाशनेऽपि तदंशभूतं भस्म तिष्ठेद् अतो निरंशनाशनज्ञापनार्थं[६] **नीहारमिव गोपतिः** इति उक्तम्.

प्रकाशः

श्रुतिस्तु तैत्तिरीये बृहन्नारायणोपनिषदि. **गदापाणिम्** इत्यत्र **तेजोग्रासे** इत्यादि. तेजसो वायुकार्यत्वेन तस्य वायावेव लयात् तथा इति अर्थः. **अप्रकटयद्** इति प्रकटं करोति इत्यस्मिन् अर्थे "तत्करोति तदाचष्टे" (पाणि.सूत्र का.३।१।२६) इत्यनेन णिच् ॥८-९॥

लेखः

**तेजोग्रासे** इति. वायुकार्यत्वेन तेजसः तत्रैव लयाद् इति भावः. **आत्मनः** इति, परीक्षिदात्मनः इति अर्थः. **रक्षां च** इति. अस्य **ज्ञापयितुम्** इति पूर्वेण अन्वयः. **प्रकृतेऽपि** इति, भ्रमणेऽपि इति अर्थः ॥८-९॥

१. प्रकृतेऽपि इति पाठः लेखे - सम्पा. २. स्वयमिति क-ग-घ.

३. स्वान्तरस्थमिति ग. ४. प्रकटयदिति घ. ५. उल्काभावेति घ.

६. निरंशज्ञानज्ञापनार्थमिति ख. निरशनाशनज्ञापनार्थमिति ग. निरंशनाशनार्थमिति घ.

कुहरं सूर्यइव दर्शनसमयेएव एतत् कुर्वाणम्. **सन्निकर्षे** इति तस्मिन् स्नेहः प्रदर्शितः. तदा जिज्ञासा अभूत् तस्य "को अयम्" इति. ततो ज्ञानार्थं (**पर्यैक्षत!**) परीक्षां कृतवान्. तत्र परीक्षायां विषयम् आह **कः** इति. निश्चयम् आह **असौ** इति. यो असि सो असि इति ॥८-१०॥

एवं सर्वं कार्यं कृत्वा स्वाभिप्रेतार्थसिद्धौ मध्ये भोगार्थम् अन्तर्धानं प्राप्तवान् इति आह.

**विधूय तदमेयात्मा भगवान् धर्मगुब्विभुः ॥**
**मिषतो दशमास्यस्य तत्रैवान्तर्दधे हरिः ॥११॥**

**विधूय** इति. **तत्** तेजो **विधूय.** तर्हि परीक्षिता कथं न रक्षितः इति आशङ्क्य आह **अमेयात्मा** इति. मनसापि ज्ञातुम् अशक्यः केन रक्षितुं शक्यते इति अर्थः. **भगवान्** इति अप्राकृतत्वाय. अन्तर्धाने (**धर्मगुप्!**) धर्मरक्षा हेतुः. ननु एतावतैव कथं सर्वं कार्यं सेत्स्यति इति आशङ्क्य आह **विभुः** इति. सर्वसमर्थो यथैव इच्छति तथैव करोति इति अर्थः. दशमासपर्यन्तं स्थित्वा पश्चाद् अन्तर्हितः. **दशमासस्य, दशमास्यस्य** इति वा पाठः. **मिषत** इति अन्यत्र गमनशङ्का वारिता. अन्यतो भगवान् न आगतः किन्तु तत्रैव प्रकट इति ज्ञापयितुं **तत्रैव अन्तर**धीयत. पूर्णज्ञानस्य[1] उत्पत्तौ बन्धूनां दुःखं स्याद् इति शुकतुल्यएव अयं प्राकृतइव कृतः इति आह **हरिः** इति ॥११॥

एवं भगवत्कृपां प्राप्य मुख्येन अधिकारिदेहेन महापुरुषत्वज्ञापनार्थं

---

लेखः

**विधूय** इत्यत्र. **धर्मरक्षा** इति. अन्तर्धानाभावे सर्वदा दृश्यत्वे "अदृश्यत्वादिगुणको धर्मोक्तेः" (ब्रह्मसूत्र १।२।२१) इति न्यायोक्त-सर्वादृश्यत्वरूपैश्वरधर्मरक्षा न स्याद् अतः तत्सिद्ध्यर्थं तद् इति अर्थः. यद्वा परीक्षितो बहिरपि तद्रूपदर्शने मोक्षएव स्याद् इति कलिनिग्रहादिना धर्मोऽपि रक्षितो न स्याद् इति अर्थः ॥११॥

---

१. पूर्णज्ञानोत्पत्ताविति क-घ.

मुख्ये काले प्रादुर्भूतः इति आह.

**ततः सर्वगुणोदर्के सानुकूलग्रहोदये ॥**
**जज्ञे वंशधरः पाण्डोर्भूयः पाण्डुरिवौजसा ॥१२॥**

**ततः** इति. **सर्वे गुणा उदर्के** उत्तरफले यस्य तादृशे काले. कालस्य हि बहवो गुणाः, ते कदाचिद् उपकुर्वन्ति. अस्य तु अग्रे उपकरिष्यन्ति इति अर्थः. **सानुकूलग्रहोदये**[१] अनुकूल-लग्नसहितानां ग्रहाणाम् उदयो यत्र. अनेन ग्रहफलादपि भावि तस्य सर्वफलं ज्ञातुं शक्यम् इति उक्तम्. **वंशधरः** एतस्य अग्रे पुत्रा भविष्यन्ति इति ज्ञापितम्. **पाण्डोः वंशो** गतएव स्थितो अनेन धृतः इति नित्यसापेक्षत्वाद् असमर्थसमासः. यथा पाण्डू राजकामनायामेव अवतीर्णः, अन्धस्य ज्येष्ठस्य राज्यानर्हत्वात्, तथा पाण्डवानां भगवता सह वैकुण्ठगमनावश्यकत्वाद् राजत्वाय अयम् अवतीर्णः इति अर्थः. **ओजसा** अपि अयं (**पाण्डुरिव!**) पाण्डुतुल्यः ॥१२॥

तस्य प्रासङ्गिकं कृत्यम् आह.

**तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः ॥**
**जातकं कारयामास वाचयित्वा च मङ्गलम् ॥१३॥**

**तस्य** इति. यद्यपि गार्भिक-बैजिकैनो नास्ति तथापि अपूर्वपक्षम् आश्रित्य अष्टाचत्वारिंशत्-संस्कारान् वदन् जातकर्म आह. मूर्धाभिषिक्तस्य स्वतःकरणायोगाद् **विप्रैः** इति उक्तम्. **धौम्यः** पाण्डवपुरोहितः. **कृपः** परम्परागतः. **जातकं** कर्मनामधेयम्. **मङ्गलं** पुण्याहवाचनम् ॥१३॥

---

प्रकाशः

**तस्य प्रीतेत्यत्र. अपूर्वपक्षम्** इति नैमित्तिकम् आत्मसंस्कारपक्षम् ॥१३॥

लेखः

**ततः** इत्यत्र. **नित्यसापेक्षत्वाद्** इति. ... ॥१२॥

**तस्य** इत्यत्र. **अपूर्वपक्षम्** इति. ... . **अष्टाचत्वारिंशद्** इति. ... ॥१३॥

---

१. सानुकूले ग्रहोदये इति घ.

जन्मोत्सवम् आह.

**हिरण्यं गां महीं ग्रामान् हस्त्यश्वान् नृपतिर्वरान् ॥**
**प्रादात् स्वन्नञ्च विप्रेभ्यः प्रजातीर्थे सतीर्थवित् ॥१४॥**

**हिरण्यम्** इति. **महीं** वृत्तिकरीं भूमिम्. **वरान्** अभिमतार्थान्. **स्वन्नम्** आमं गोधूमादि. **प्रजातीर्थे** "देवाश्च पितरश्च" ( . । । ) इति वाक्यात् पुत्रजन्मसमये[१] सर्वदेवतासान्निध्यात् **प्रजातीर्थे**[२] इति उक्तम्. वैदिके कर्मणि ज्ञानादेव फलम् इति अस्य तीर्थत्वेन अप्रसिद्धत्वात् फलं न भवेद् इति आशङ्क्य आह **सतीर्थविद्** इति. तीर्थविद्भिः सहितो अतः तदुपदेशाद् ज्ञात्वा कृतवान् इति अर्थः ॥१४॥

अधिकसन्तोषार्थं जातकम् आह **तम् ऊचुः** इति.

**तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयानतम् ॥**
**एष ह्यस्मिन् प्रजातन्तौ कुरूणां पौरवर्षभ ॥१५॥**
**दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ॥**
**रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥१६॥**
**तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः ॥**
**भविष्यन्ति न सन्देहो महाभागवतो महान् ॥१७॥**

अस्मिन्[३] बालके द्वेधापि उत्कर्षो अस्ति— भगवत्कृतः कालकृतश्च. तत्र भगवत्कृतं ये वसिष्ठादयो **ब्राह्मणाः** सर्वज्ञाः ( **तुष्टाः** ! ) अतिदानेन

---

लेखः

**देवाश्च पितरश्च इति वाक्याद्** इति. "देवाश्च पितरश्चेहागच्छत सुप्रतिष्ठिता वरदा भवत" इति श्रुतिवाक्याद् इति अर्थः. श्रीधरोक्तं वाक्यं[४] वा अनुसन्धेयम्. **ज्ञानादेव फलम्** इति. "यदेव विद्यया करोति" ( छान्दो.उप. १।१।१० ) इति श्रुतेः इति भावः ॥१४॥

---

१. पुत्रजन्मनीति घ. २. द्रष्ट. "त एते पितरो देवाः देवाश्च पितरः च ह, अन्योन्यं पितरो ह्येते देवाश्च पितरश्च ह" हरिवंशपुरा. १।१७।२०-४२. - सम्पा. ३. तस्मिन्निति क-ग-घ-ङ.

४. "देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्, आयान्ति हि नृपश्रेष्ठ पुण्याहमिति चाब्रुवन्" - सम्पा.

सन्तुष्टाः (**प्रश्रयानतं राजानं!**) विनयेन नम्रं गुह्यम् **ऊचुः. एषः** इति प्रथमं निर्दिशति[१]. यस्य गुणाः अग्रे वक्तव्याः स "एषः" इति निर्दिश्यते, यथा "एषा यत् सोमक्रयणी[२]" (तैत्ति.संहि. ६।१।७।२) इति. इमम् अर्थं ज्ञापयति[३] **हि** इति. **अस्मिन्** इति राजानं बालकं वंश्यांश्च निर्दिश्य **प्रजातन्तौ** पुत्र-पौत्रादिरूपे वंशे. **कुरूणाम्** इति कुरोः भगवदीयत्वेन तद्वंशसंस्थायाः अनुचितत्वात् [४]प्रधानसंस्थायामेव संस्थाव्यपदेशात् च, **पौरवर्षभ** इति पितृभक्तत्वात् च पुरोः तस्यापि वंशसंस्था अनुचिता इति उपघातहेतुम् आह **दैवेन** इति, वंशजनकानाम् अदृष्टं समाप्तम् इति. (**अप्रतिघातेन!**) विच्छेदकादृष्टेन वा. प्रसवजनकादृष्टस्य विच्छेदकप्रतिबन्धकस्य च अभावात् संस्था अवश्यं भाव्या. अदृष्टं च नास्ति, भगवांश्च वर्तते. किम् अत्र भविष्यति इति आशङ्कायां यथाकथञ्चिद् वंशेन

---

लेखः

**एष हि** इत्यत्र. **निर्दिश्यते यथा** इति. अयं प्रसङ्गः तैत्तिरीयषष्ठाष्टक-प्रथमप्रश्ने अस्ति ॥१५॥

**दैवेन** इत्यत्र. **उपघातहेतुम्** इति, वंशोपघातहेतुं पूर्वार्धेन इति अर्थः. एवञ्च उपघातहेतौ विद्यमानेऽपि यद् वंशरक्षणं तद् अत्यनुग्रहः इति भावः. **विच्छेदक** इति, **गर्भविच्छेदकादृष्टेन** इति अर्थः. **प्रसव** इति. **प्रसवजनकादृष्टस्य** यो **विच्छेदकं** तत् **प्रतिबन्धकादृष्टस्य अभावाद्** इति एकदेशान्वयो ज्ञेयः. प्रतिषष्ठ्यन्त-द्वयान्ते **अभावाद्** इति पदं वा योजनीयम्. **नास्ति** इति. अन्यथा किमिति संस्थाम् उपेयाद् इति तथा इति भावः. पुण्य-पापक्षयाद् वा तन्नास्ति इति. तर्हि सर्वथा कारणाभावात् संस्था इयं भविष्यति इत्येवं निश्चेयम् इति आशङ्कायाम् आहुः **भगवांश्च** इति. एवञ्च पाण्डवानां सर्वहितकारकस्य भगवतः स्थितत्वात् सर्वथा संस्था अनुचिता इति भावः. **उभयं** निमित्ताभावः तत्सत्त्वं च इति

---

१. निर्दिशन्तीति ग. २. सोमविक्रयिण्येषेतीति क-ग. सोमविक्रय एष इति घ. "वाग्वा एषा यत् सोमक्रयणी चिदसि" - सम्पा. ३. ज्ञापयन्तीति घ. ४. प्रदानेति ख.

उभयं समाहितं भविष्यति इति आशङ्क्य तन्निषेधार्थं **शुक्ले** इति उक्त्वा (?) ''दैवबलं बलम्''(भाग.पुरा. ९।६।२९) इति वाक्यात् **संस्थाम् उपेयुषि** सति[१]. अदृष्टे कालादीनाम् अनुकूलत्वात्. केवलं भगवान् पुष्टिमार्गम् आश्रित्य (**वो!**) भवताम् **अनुग्रहार्थाय** पूर्वं यो भवत्सु अनुग्रहः कृतः तस्य अर्थः प्रयोजनम् इदम् इति, ''न अपुत्रस्य लोको अस्ति'' (ऐत.ब्रा. ७।१३ ) इति श्रुतेः. अमृतत्व-सम्पादकत्वात् च भगवतः – सामान्यामृतत्वाद्[२] वंशस्य, ''प्रजामनु प्रजायसे तदुते मर्त्यामृतम्'' (तैत्ति.ब्रा. १।५।५।६) इति श्रुतेः – (**विष्णुना रातो!**) भगवता अयं रक्षितः. किञ्च स्वार्थमपि अयं रक्षितो (**प्रभविष्णुना!**) भागवतादिरूपेण प्रकर्षेण उद्भविष्णुना, सर्वेषु भगवद्भक्तेषु[३] भागवतद्वारा[४] आविर्भावैकरसेन. (**तस्मात्!**) अतो अर्थप्रतिपादकं नाम भवति[५] इति सञ्ज्ञाशब्दापेक्षया यौगिकशब्दस्य अजहत्स्वार्थेन मुख्यत्वात् **नाम्ना विष्णुरात इति लोके भविष्यति**[६] प्रसिद्धो भविष्यति इति अर्थः. कारणोत्कर्षम् उक्त्वा कार्योत्कर्षम् आह **बृहच्छ्रवाः** इति. भवदाद्यपेक्षयापि अधिककीर्तिमान्— नहि भवन्तः एवं रक्षिताः, न कालो निगृहीतः, नवा भागवतं प्राप्तम् इति. संस्थाप्रापक-कालादेः प्रतिबन्धकत्वात् कथम् एवं भविष्यति इति आशङ्कायाम् आह **न सन्देहः** इति. तत्र हेतुः **महाभागवतः** इति. भागवतस्य महत्त्वं भगवत्प्रियत्वेन, तद् अस्मिन् लक्षणादिना अवगम्यते. अतएव कालादीनां न अत्र [७]अपकारजनकत्वम्. तद् उत्तरत्र प्रश्नोत्तराभ्यां निरूपयिष्यते.

लेखः

उभयम्. **तन्निषेधार्थम्** इति. न हि अत्र यथाकथञ्चिद् वंशोत्पत्त्या पूर्ववंशीयानां कृतार्थता कीर्तिः वा भवति प्रत्युत अपकीर्तिरेव ; अतएव तद्वंशस्य निर्मलत्वादि-सकलगुणज्ञापनार्थं **शुक्ले** इति विशेषणम् उक्तम् इति अर्थः ॥१६॥

१. सत्यदृष्टकालेति घ. २. सामान्यभूतत्वादिति घ.

३. भागवततद्भक्तेष्विति घ. ४. भगवद्द्वारेति घ.

५. भगवतीति ग-घ. ६. भविष्यतीति नास्ति ग-घ. ७. नात्रोपकारेत्यादि घ.

किञ्च यथा कालादिभ्यो भगवता बलं दत्तं ततोऽपि अस्मै बहु दत्तमिति न अस्मिन् शङ्का विधेया इति आह **महान्** इति ॥१५-१७॥

एवं महद्भिः अर्थे[१] निरूपिते कालाद् भयं मन्यमानः "सर्वं कालकृतं मन्ये" (भाग.पुरा. १।९।१४) इति उक्तत्वात् कालज्ञान् पृच्छति.

**॥ राजा उवाच ॥**

**अप्येष वंश्यान् राजर्षीन् पुण्यश्लोकान् महात्मनः ॥**
**अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥१८॥**

**अप्येष** इति. भगवत्कृपाव्यतिरेकेणापि यथा कालेन अस्मद् वंश्याः[२] रक्षिताः यशस्विनश्च कृताः तथा अयं किं भविष्यति इति प्रश्नः. वंश्येष्वपि[३] ये **पुण्यश्लोकाः** पुरूरवस्प्रभृतयः, तत्रापि ये **महात्मानः** कुरुसदृशाः. **यशः** सर्वजनीनं, **साधुवादः** सद्भिरेव क्रियमाणः. चरित्र-स्वभावोत्कर्षौ वा **यशः-साधुवाद**शब्दाभ्याम् उक्तौ. वेदार्थसर्वज्ञाः **सत्तमाः** ॥१८॥

तत्र सर्वमेव कालोत्कर्षम् आहुः[४] **पार्थे**ति.

**॥ ब्राह्मणाः ऊचुः ॥**

**पार्थ प्रजाविता साक्षाद् इक्ष्वाकुरिव मानवः ॥**
**ब्रह्मण्यः सत्यसन्धश्च रामो दाशरथिर्यथा ॥१९॥**
**एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः ॥**
**यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम् ॥२०॥**
**धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः ॥**
**हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥२१॥**
**मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवानिव ॥**
**तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव ॥२२॥**
**पितामहसमः साम्ये प्रसादे गिरिशोपमः ॥**

---

प्रकाशः

**अप्येष** इत्यत्र. **चरित्रस्वभावोत्कर्षौ** इति, चरित्रोत्कर्षः स्वभावोत्कर्षश्च इति अर्थः ॥१८॥

---

१. अर्थैरिति ग-घ-ङ.  २. वंशा इति क-ग.  ३. वंशेषु इति घ.  ४. आहेति ग-घ-ङ.

**आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥२३॥**
**सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः ॥**
**रन्तिदेव इवोदारो ययातिरिव धार्मिकः ॥२४॥**
**धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः ॥**
**आहर्त्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥२५॥**
**राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम् ॥**
**निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ॥२६॥**

यद्यपि भगवता एवं रक्षिते सन्देहो अनुचितः तथापि हे **पार्थ,** अयं **साक्षात् प्रजाविता** न मन्त्रिद्वारा, स्वयमेव इष्टादिकरणात्. यद्यपि मनोः बहवः पुत्रा जाताः तथापि अयं[१] वंशकृद् **इक्ष्वाकुः इव**[२] जातः ; तस्य यथा प्रजापालनम् अविच्छिन्नम् एवम् अस्यापि. शत्रु-मित्रादिषु समो वा, शशाद् अनिष्कासनात् सर्वज्ञत्वाद् वा तथा वदन्ति. **मानवो** वैवस्वतमनोः

---

लेखः

**पार्थ** इत्यत्र. **सन्देहोऽनुचितः** इति. इदञ्च **पार्थ** इति सम्बोधनतात्पर्यं ज्ञेयम्, आक्षेपेणैव सम्बोधनस्य आदावेव उक्तत्वाद् इति भावः. **शशादनिष्कासनाद्** इति. इदं नवमे षष्ठाध्याये[३] अस्ति. **इन्द्राऽग्निसंवादे** इति. इन्द्राग्नी कदाचिद् एतद्धर्मपरीक्षार्थं कपोत-श्येनरूपौ भूत्वा तत्र श्येनाद् भीतः कपोतो राजाङ्के दीनः सन् निपपात. ततः क्षणान्तरे श्येनः तन्मांसकामः आगत्य उवाच "मम भक्षम् ईश्वरेण निर्मितम् इदं मह्यं देहि" इति. ततो बहुसंवादे "मम मांसं ग्रहाण" इत्युक्तः श्येनो "न अहम् अधर्मवर्ति, कपोतपरिमितमेव मांसं ग्रहीष्यामि" इति उवाच. राजापि तच्छ्रुत्वा भोजनपात्रे कपोतं निधाय स्वमांसं (तावत्परिमाणं तस्मै दत्तवान्!) ... ततः तद्धर्मेण प्रसन्नौ स्वात्मानं प्रदर्शितवन्तौ इति भारतादौ[४] प्रसिद्धम् ॥१९-२०॥

---

१. अन्तवंशकृदीति क. आन्तवंशकृदिति मुद्रितपाठः. खपाठो गृहीतः - सम्पा.

२. एव इति मुद्रितपाठः मूलानुरोधात् संशोधितः - सम्पा.

३. भाग.पुरा. ९।६।७ - सम्पा. ४. द्रष्ट. महाभा. ३।१९७।११-२७ - सम्पा.

पुत्रः. **ब्रह्मण्यो** ब्राह्मणभक्तः, सर्वस्वदानात्. **सत्यसन्धः** सत्यप्रतिज्ञः वनवासगमनात् **दाशरथी** रघुनाथः. कालस्य अपकारजनकत्वं स्वेच्छया भगवत्यपीति भगवद्दृष्टान्तः. **शरण्यः** शरणागतरक्षकः. **चकारात्** प्रत्येक-समुदायाभ्यां कीर्तिमान्. (**औशीनरः!**) उशीनरवंशोत्पन्नः **शिबिः**, तस्य समुदायकीर्तिरेव प्रसिद्धा इन्द्राग्निसंवादे. **दौष्यन्तिः** भरतः सर्वस्यापि सोमवंशस्य (**यशो वितनिता!**) यशःप्रदः **यज्वनां** च, [१]शताधिकाश्वमेध-करणात्. सर्वत्र **चकारे** पूर्वोक्तसम्बन्धो दृष्टान्ते दार्ष्टान्तिके च अवगन्तव्यः. **धन्विनां** धनुर्धराणाम्. **अर्जुनः** पितामहः, कार्तवीर्यो **अर्जुनः** च. **चकाराद्** अधिकश्च कालनिग्रहात्. **हुताशो** अग्निः. **धर्षणम्** अतिक्रमः, आज्ञोल्लङ्घनम् इति यावत्. **दुस्तरः** युद्धे सेनायाः स्वस्य वा जयाभावो[२] अतरणं, तद्वान् इति अर्थः. **विक्रान्तः** पराक्रमवान्, देहापेक्षया अधिककौशलबलवान्. **मृगेन्द्रः** सिंहः. **निषेव्यो** देवादीनामपि आश्रयः, यथा[३] **हिमवान्** महादेवादेः. निर्दोषस्थानाद् वा, अतएव ऋषिवासः तत्रैव. गुणेष्वेव दृष्टान्ताः सर्वत्र. **तितिक्षुः** अतिक्रमसहनवान्. **वसुधा** सर्वंसहा. **सहिष्णुः** तद्दोषसहनशीलः. स्वस्मिन् अपराधसहनं पृथ्वीवत्, तस्यैव अनुचितसहनं पितृवत्. **पितामहो** ब्रह्मा. **साम्यं** देव-दैत्य-नरेषु तुल्यता. **प्रसादे** अविचारितदाने **गिरिशो** महादेवः. **आश्रयः** आधारः, अवलम्बनम् इति यावत्, सर्वार्थेषु **यथा** (**रमाश्रयः देवः!**) लक्ष्म्या भगवान् तथा (**सर्वभूतानां देवः!**) सर्वेषां भगवान्. (**एषः!**) निदर्शनं स्पष्टार्थं ; तथा अयम् इति अर्थः. धर्मादीनामपि रक्षकत्वात् **सर्वे** यावन्तः **सद्गुणाः** सत्य-शौचादयः तेषां

---

प्रकाशः

**दौष्यन्तिरिव यज्वनाम्** इत्यत्र. ननु अत्र चकाराभावाद् यज्वनां भिन्नो सम्बन्धो न युक्तः इत्यतः आहुः **सर्वत्र** इत्यादि. **सर्वत्र** अनुक्तचकारे वाक्येऽपि **चकारः पूर्वोक्तसम्बन्धः** प्रत्येक-समुदायाभ्यां कीर्तिसम्बन्धो **दृष्टान्ते दार्ष्टान्तिके च** प्रमाणसिद्धो दृष्टान्तीय-गुणवशेन अर्थादेव बोध्यः इति अर्थः. **जयाभावः** इति परेण जेतुम् अयोग्यत्वम्. मूले **सर्वसद्गुणमाहात्म्यपदं**

---

१. शताश्वमेधेति ग. २. पराजयाभाव इति घ. गलिताक्षरञ्चेह ख-पुस्तकम्. ३. यत् यथेति ग.

**माहात्म्यं** परमोत्कर्षः तदर्थं **कृष्णं** भगवन्तम् **अनु व्रतं यस्य** उपासनया कृपया तत्तुल्यः इति अर्थः. **रन्तिदेवो** नवमस्कन्धे वक्ष्यते, यस्तु पुल्कसाय[१] जलं दत्वा सन्तुष्टः. **उदारो** अत्यन्तदातृस्वभावः. यथा **ययातिः** देवयान्यां शुक्रदुहितरि अयुक्तायामपि मनस्तु तद्गतं बुद्ध्वा "धर्मो अयम्" इति अङ्गीकृतवान्. (**धृत्या!**) धैर्ये **बलिसमः**. स च अष्टमे वक्ष्यते. **सद्ग्रहो** भक्तिः, समीचीनो[२] ग्रहो वा. **यज्वनाम्** इत्यत्र यागान्तैरपि तथात्वसम्भवाद् **अश्वमेधाहरणं** पृथग् उक्तम्. स्वस्य सर्वापेक्षयापि अधिकगुणत्वेऽपि न गर्वः इति आह **वृद्धानाम्** इति. [३]पुत्रादिद्वारापि उत्कर्षः— **राजर्षीणां** जनमेजयादीनां **जनयिता**. पुत्रमपि दण्डयेद् इति तदनन्तरं शासनम् उक्तम्. (**उत्पथगामिनां शास्ता!**) असकृन्मर्यादोल्लङ्घने दण्डः, शासनं शिक्षापूर्वकदण्डः. (**कलेः!**) **निग्रहीता** निग्रहं करिष्यति, **भुवो धर्मस्य** च **कारणात्**. चरित्रे स्पष्टं भविष्यति ॥१९-२६॥

वैराग्यम् अन्ते निकटे फलपर्यवसायि भविष्यति इति आह.

**तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् ॥**
**प्रपत्स्यत उपश्रुत्य मुक्तसङ्गः पदं हरेः ॥२७॥**
**जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ ॥**
**हित्वेदं नृप गङ्गायां यास्यत्यद्धाकुतोभयम् ॥२८॥**

**॥ सूतः उवाच ॥**

**इति राज्ञ उपादिश्य विप्रा जातककोविदाः ॥**
**लब्धोपचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥२९॥**

**तक्षकाद्** इति. **आत्मनो** देहस्य **मृत्युं** नाशम्. **द्विजपुत्रः** शृङ्गी. **उपसर्जितात्** प्रेषितात्. **उपश्रुत्य मुक्तसङ्गः** कृतसंन्यासः[४]. (**प्रपत्स्यते!**)

---

प्रकाशः

सप्तम्यन्तम् इति आशयेन आहुः **तदर्थम्** इति. "चर्मणि द्वीपिनं हन्ति" इतिवद् अत्र तादर्थ्ये सप्तमी इति अर्थः ॥२०-२४॥

---

१. पुष्कसाय इति मुद्रितपाठः भागवतीय-रन्तिदेवकथासन्दर्भात् संशोधितः -सम्पा. २. समीचीनाग्रहो वेति क-ग-घ. ३. पुत्र- इति मुद्रितपाठः. भा.पाठे तु एवम् -सम्पा. ४. कृतन्यास इति क.

हरेः **पदं** गङ्गातीरसत्सभाम्. तत्र हि भगवत्पदम् अभिव्यक्तम्. **व्याससुतात् मुनेः** शुकाद् **जिज्ञासितः** सम्यग् विचारपूर्वकं ज्ञातः **आत्मनो** भगवतः स्वस्य च **याथात्म्यम्** इदमित्थतया निर्णयः. **असौ** इत्यन्ते प्रतिनिर्देशः [१]प्रत्यापत्त्यर्थः — एतावत्कालं मध्ये कार्यार्थं भगवता रक्षितः पुनः अन्ते ब्रह्मास्त्रेणैव ब्राह्मणप्रेषित-तक्षकरूपेण उपसंहृतः इति. **इदं** शरीरम्. **नृप** इति सम्बोधनं राज्ञां युद्धनिष्ठानाम् अमोहत्वज्ञापनाय. **अद्धा** निश्चयेन **(यास्यति!) अकुतोभयं** भगवच्चरणारविन्दम्. उपादेशनम् = एकान्ते राजमात्रज्ञापनम्. तेषां ज्ञाने हेतुः **जातककोविदा** इति. **जातकं** ज्योतिश्शास्त्रैकदेशः. प्रकृतोपयोगित्वाद् एतद् उक्तं, वस्तुतः (**विप्राः!**) सर्वांशविदः. **लब्धा उपचितिः** प्रत्युपकारो धनादिः यैः ते. **सर्वे** पूर्वोक्ताः एते च. पूर्णमनोरथत्वात् **स्वगृहानेव** गता, न अन्यत्र. भगवत्परितुष्टे पुरुषे कालादिना = भगवत्सेवकेन एतावत् क्रियते इति उक्तम् ॥२७-२९॥

क्रमात् तदुक्तस्य संवादम् आह.

**स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः ॥**
**पूर्वदृष्टमनुध्यायन् परीक्षेत नरेष्विह ॥३०॥**

**स एषः** इति. यो भगवता रक्षितः **स** इदानीम् अग्रिमकथार्थम् अनूद्यते **एषः** इति. **परीक्षिदिति विख्यातः**. ननु " 'विष्णुरात' इति विख्यातो भविष्यति" इति सर्वज्ञानां वचनं, तत्कथं **परीक्षिदिति लोके विख्यातः** इति? तत्र आह **यत्प्रभुः** इति, यस्मात् कारणाद् अयं प्रभुः. भगवता स्वसामर्थ्यदानाद् भगवद्रूपो जातइति पूर्वं भगवत्करणापेक्षयापि इदानीन्तन-भगवत्कृत्यं सन्निहितत्वाद् आदरणीयम्.

---

प्रकाशः

**जिज्ञासितात्मयाथात्म्यः** इत्यत्र. **प्रत्यापत्त्यर्थः** इति, ब्रह्मास्त्रस्य पुनः प्राप्त्यर्थः. तदेव विवृण्वन्ति **एतावदित्यादि** ॥२८॥

**इति राज्ञः** इत्यत्र. **इति उक्तम्** इति. अनेन सन्दर्भेण अयमर्थः उक्तः इति अर्थः ॥२९॥

---

१. प्रत्यायेत्यर्थ इति ग. जीवात्मनो प्रत्यापत्तिः इति प्रतिभाति - सम्पा.

पूर्वस्य च फलम् इति 'विष्णुरात'नाम्ना प्रसिद्धोऽपि परीक्षित्त्वेनैव प्रसिद्धः. तत्र निमित्तम् आह **पूर्वदृष्टम्** इति. इदं हि नाम तस्य क्रियोद्बोधकं[१]— परीक्षितम् = आत्मानं श्रुत्वा परितो भगवन्तम् ईक्षते, परितः ईक्षाम्[२] इतः परीक्षितः. अथवा **इद्** इति इवार्थे अव्ययं "सर इन्मुखं ते" (भाग.पुरा. ५।२।१३) इत्यत्र प्रसिद्धम्. परितः "ईक्ष्[३] दर्शनम्" (पाणि.धा.पा.भ्वादि.-आ.से. ६११) अविभक्तिक-धातुनिर्देशः. परितो दर्शनमिव अयम् इति तकारान्तः. तेन एतत्सङ्गे अन्यस्यापि परितो दर्शनं भवति इति ज्ञापितम्. **नरेषु** इति "आविस्तरां प्रपश्यन्ति" (भाग.पुरा. ११।७।२१) इति वाक्याद् भगवद्दर्शनाधिकारः सूचितः. अथवा **परीक्षिदिति विख्यातः** तत्र हेतुः (**यद्**!) यस्मात् **प्रभुः** भगवान् एवं ज्ञातवान् "अयं बालको अग्रे **नरेषु पूर्वदृष्टं** रूपम् **अनुध्यायन् परीक्षेत**" परीक्षां कुर्याद् इति. "अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलाद्" (महाभा. ३।२९८।१७) इति जीवोऽपि अङ्गुष्ठमात्रो भवति, परम् इतरसामग्रीरहितः. अनेन वैलक्षण्येन जीवस्वरूपाद् भिन्नं भगवत्स्वरूपं जानातु इति एतदर्थं नाम इति अर्थः. **इह** संसारे, अत्र आगतस्य बुद्धिभ्रंशः प्रायेण भवति इति! ॥३०॥

प्रकाशः

**स एषः** इत्यत्र. **पूर्वस्य च फलम्** इति, रक्षणस्य फलम् इति अर्थः. **परितः ईक्षाम् इतः** इति. अत्र पृषोदरादित्वेन अकारनाशः. इतृजन्तस्य अर्थकथनं वा इति ज्ञेयम्. **इतरसामग्रीरहितः** इति. "शब्दादेव प्रमितः" (ब्रह्मसूत्र १।३।२४) इत्येतत्-सूत्रविषयवाक्योक्त-धर्मरहितः इति अर्थः ॥३०॥

लेखः

**स एषः लोके** इत्यत्र. **पूर्वस्य च फलम्** इति. विष्णुरक्षणस्य फलं परितो भगवदीक्षणम् इति अर्थः. प्रथमान्तं निरुच्य तकारान्तं व्युत्पादयन्ति **इद्** इति. **प्रसिद्धम्** इति, इदं "उद्विग्नमीनयुगलं द्विजपंक्तिशोभिरासन्नभृंगनिकरं सर इन्मुखं ते" इति पञ्चमे द्वितीये आग्नीध्रवाक्यम् अप्सरसं प्रति. **आविस्तरां प्रपश्यन्ति इति वाक्याद्** इति. इदम् एकादशे सप्तमाध्याये अस्ति ॥३०॥

१. क्रियोद्धोषकमिति ग. २. ईक्षमित इति घ. ३. ईक्ष इति सस्वरपाठः ख-ग-घ.

दग्धशरीरत्वात् क्षीणताम् आशङ्क्य आह.

**स राजपुत्रो ववृध आशु शुक्ल इवोडुपः ॥**
**आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम् ॥३१॥**

**स राजपुत्रो ववृधे** इति. **शुक्ले** शुक्लपक्षे[1]. **उडुपः** इति स्त्रीवेष्टितत्वम् उक्तं ; ता एव हि पोषणाभिज्ञाः. **पितृभिः आपूर्यमाणः** सर्वाभीष्टपदार्थदानात्. **( अन्वहं! ) काष्ठाभिः** कलाभिः. प्रत्यहं वैलक्षण्यदर्शनार्थं दृष्टान्तः ॥३१॥

एवं तस्य चरित्रं सर्वम् उक्त्वा पूर्वं भगवन्मानसकृतम् अश्वमेधं पुनः काले केवलं भगवतैव सम्पादितम् इति वक्तुं प्रकारम् आह.

**यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया ॥**
**राजालब्धधनो दध्यावन्यत्र करदण्डयोः ॥३२॥**
**तदभिप्रेतमालक्ष्य भ्रातरः कृष्णचोदिताः ॥**
**धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥३३॥**
**तेन सम्भृतसम्भारो धर्मपुत्रो युधिष्ठिरः ॥**
**वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिम् ॥३४॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे द्वादशोऽध्यायः ॥

**यक्ष्यमाणः** इति. करदण्डादिकन्तु अकर्तव्यं, द्रोहपरिहारार्थत्वाद् अश्वमेधस्य. उचितकरादेस्तु राज्यनिर्वाहकत्वम्. अतो **राजा अलब्धधनः** कथं धनं प्राप्स्यामि इति **दध्यौ. कर-दण्डयोः** उक्तो विनियोगः. राजत्वादेव न प्रतिग्रहः. देवताधिष्ठानाद् न मेर्वादेः समानयनम्. पूर्वं राज्यवर्णने यः उत्कर्षः उक्तः स प्रजानाम् अर्थे. राज्ञस्तु कुतोऽपि याचनम् अयुक्तम्

---

लेखः

**यक्ष्यमाणः** इत्यत्र आभासे **पूर्वं भगवन्मानसकृतम्** इति. "याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः तद्यशः पावनं दिक्षु शतमन्योरिवातनोद्" ( भाग.पुरा. १।८।६ ) इत्यष्टमाध्याये यद् उक्तं तद् भगवत्संकल्पमात्रम्, अन्यथा पुनरुक्तं स्याद् इति भावः. **सम्पादितम्** इति, सत्यसंकल्पत्वात् सम्पादितम् इति अर्थः ॥३२॥ इति श्रीद्वादशाध्यायव्याख्या ॥

---

१. शुक्लपक्षे चेति क-ग-घ-ङ.

अतः चिन्ता. भगवानपि न याचितो, अन्यथा नूतनमेव दद्यात्. किन्तु **तदभिप्रेतम् आलक्ष्य भ्रातर** एव समानीतवन्तः. तेऽपि चिन्ताकुलिताः (**कृष्णचोदिताः!**) भगवतैव प्रेरिताः. अनेन भक्तानाम् अल्पचिन्तामपि भगवान् न सहते इति सूचितम्. **प्रहीणं** बहु ; अतिनिन्दितं वा, ब्राह्मणानां तद् इति. आनयनं भगवत्प्रेरणात्. [1]**द्रोहः** तेषां पीडा. ब्राह्मणादीनां दुःखदूरीकरणार्थं प्रवृत्तो अश्वमेधो ब्राह्मणानामेव द्रव्यैः उचितः. **उदीच्यां दिशि** मरुत्तयज्ञे[2] दक्षिणात्वेन प्राप्तं द्रव्यं भारात् नेतुम् अशक्यम् उत्तरदेशे (**भूरिशः!**) बहु परित्यक्तम् अस्ति, तद् आनीतम् इति अर्थः. **तेन सम्भृतसम्भारः** धनेन सम्भृताः आज्यं[3] पशवः पुरोडाशीयादयः सम्भाराः येन. तस्य अयुक्तत्वं निराकरोति **धर्मपुत्र** इति, त्यक्तं भूमौ राजकीयम् इति. युधि[4] स्थिरत्वाद् अश्वमेधसिद्धिः. अश्व**मेधैरेव यज्ञैः**. "यज्ञेन यज्ञमयजन्त" (तैत्ति.आर. ३।१२।७) इति श्रुत्यर्थख्यापनार्थम् एवम् उक्तम्. **हरिम्** इति ब्राह्मणानामपि दुःखदूरीकर्तारम्, अतो न पूर्वोक्तविरोधः. "आहूतः" इति श्लोकद्वयं[5] प्रक्षिप्तम् ॥३२-३४॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे द्वादशो अध्यायः ॥

---

प्रकाशः

**यक्ष्यमाणः** इत्यत्र. **देवताधिष्ठानाद्** इति भावप्रधानो निर्देशः, हेतुनिर्देशो वा. **पूर्वम्** इति दशमाध्यायारम्भे. **तदभिप्रेतेत्यत्र. तद्द्रोहः तेषां पीडा** इति. पूर्वश्लोके व्याख्याततत्वाद् अत्र तदर्थकथनम् ॥३२-३३॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे द्वादशाध्यायविवरणम् ॥

## ॥ इति द्वादशोऽध्यायः ॥

---

१. तद्द्रोहः इति पाठः प्रकाशे - सम्पा. २. मरुन्तेति सर्वत्र पाठः. ३. राज्यमिति क-ग. साज्यमिति घ. ४. युधिष्ठिरत्वादिति क-घ-ङ. ५. तच्चेदम्— "आहूतो भगवान् राज्ञा याजयित्वा द्विजैर्नृपम् । उवास कतिचिन् मासान् सुहृदां प्रियकाम्यया ॥ ततो राज्ञाऽभ्यनुज्ञातः कृष्णया सह बन्धुभिः । ययौ द्वारवतीं ब्रह्मन् सार्जुनो यदुभिर्वृत ॥" इति श्लोकद्वयं सम्बन्धोक्तिकारेण व्याख्यातम् इति क्रमसन्दर्भे - सम्पा.

# ॥ अथ त्रयोदशोऽध्यायः ॥

एवं भागवतश्रोतुर्देहोत्पत्तिर्निरूपिता ॥
पुरुषत्रयमुक्तिर्हि तन्मुक्त्यर्थं निरूप्यते ॥(१)॥
पिता पितामहश्चैको धृतराष्ट्रस्ततः परः ॥
प्रपितामहमुक्तिर्हि पूर्वं तत उदीर्यते ॥(२)॥
ततोऽध्यायद्वयेनैव द्विरूपत्वात् पितामहे ॥
सनिमित्तां मुक्तिमाह हेतुकार्यविभेदतः ॥(३)॥

---

प्रकाशः

अथ त्रयोदशाध्यायं विवरिषवः पूर्वप्रकरणसमाप्तिं बोधयन्ति **एवम्** इत्यादि. सपरिकर-हेतुनिरूपणपूर्वकं निरूपिता इति अर्थः. अग्रिमायां वैराग्यषडध्याय्यां तावतां प्रयोजनं सार्धैः चतुर्भिः वदन्तः पूर्वं त्रयाणाम् आहुः **पुरुषत्रयेत्यादि**. **द्विरूपत्वाद्** इति, मुक्तेः **हेतु-कार्यविभेदतो द्विरूपत्वात्**. हेतुः भगवत्प्रयाणं, कार्यं नियामक-लयभावनादिकं, तद्भेदतो द्विरूपत्वात्. **सनिमित्तां** प्रयाणसूचकोत्पातदर्शनादिरूप-निमित्तसहितां ताम् अध्यायद्वयेन **आह** इति अर्थः (१-३).

लेखः

सङ्गत्यर्थं पूर्वाध्यायार्थम् अनुवदन्ति **एवम्** इति. **निरूपिता** इति, हेतुनिरूपक-षडध्यायैः निरूपिता इति अर्थः. एवञ्च अतः परं वैराग्यः षडध्याये निरूप्यते इति ज्ञेयम्. अध्यायषट्के वैराग्यं प्रदर्शयन्तः तावदध्यायद्वयार्थं वदन्ति **पिता** इत्यादि. ननु अत्र पितुः अभिमन्योः मुक्तिः न उक्ता इति कथं प्रतिज्ञातसिद्धिः अतः आहुः **एकः** इति. समानस्वभावधर्मत्वेन प्रपितामहानां मुक्त्युक्त्या पितुरपि उक्ता भवति इति अर्थः. अतएव **धृतराष्ट्रः परो** विरुद्धस्वभावः तस्मात् तस्य मुक्तिः पार्थक्येन पूर्वमेव अध्यायेन उच्यते इति आहुः **प्रपितामह** इति. **ततः** इति, धृतराष्ट्रमुक्ति-निरूपणानन्तरम् इति अर्थः. **द्विरूपत्वाद्** इति, **हेतु-कार्यविभेदतो** मुक्तेः द्विरूपत्वाद् इति अर्थः. हेतुः भगवन्निर्याणश्रवणं, कार्यं मुक्तिस्वरूपं, तद् अध्यायद्वयेन उच्यते इति अर्थः. तत्र भगवन्निर्याणस्य मुक्तिहेतुत्वम्

अमुक्तपितृका मुक्तिं नाप्नुवन्तीति वार्यते ॥
अतो निश्चिन्ततासिद्ध्यै चित्तशुद्धिरिहोच्यते ॥(४)॥
ततो द्वयेनेन्द्रियाणां राज्यशौर्यादिवर्णनैः ॥
ततो वैराग्यसत्सङ्गावधिकारः फलोन्मुखः ॥(५)॥
ततो भवति पुष्टोऽपि नान्यथेत्यग्रिमा कथा ॥

---

प्रकाशः

ननु पुरुषत्रयमुक्तेः कथम् एतन्मुक्त्यर्थता इत्यतः आहुः **अमुक्तपितृके**-त्यादि. **वार्यते** इति. अमुक्तिः तेषां वार्यते **अतः** तन्मुक्तेः सकाशाद् राज्ञो **निश्चिन्ततासिद्ध्यै इह** अस्मिन् अध्यायत्रये राज्ञः **चित्तशुद्धिः उच्यते.** सा मुक्तौ उपकारिणीति तत्प्रयोजकतया पुरुषत्रयमुक्तेः तन्मुक्त्यर्थता इति अर्थः (४).

शेषाणां चतुर्णाम् अर्थम् आहुः **ततः** इत्यादि. **न अन्यथा** इति

लेखः

अग्रिमाध्यायारम्भे कारिकायां स्पष्टं, स्वरूपं च तदग्रिमे अध्याये "वाचं जुहाव मनसि" (भाग.पुरा. १।१५।४१) इत्यादिना वक्ष्यते. **इति वार्यते** इति. अमुक्तपितृकाणां मुक्तिः न भवति इति यद् तद् अत्र वार्यते, यतो धृतराष्ट्रस्य = पितुः मुक्तत्वाद् एतेषामपि मुक्तेः अवश्यम्भावाद् इति अर्थः. **निश्चिन्तता** इति, स्वमुक्तिविषये निश्चिन्ततासिद्ध्यै इति अर्थः. **चित्तशुद्धिः** इति. मुक्तौ सन्दिहानत्वे चित्ते कलीलात् स्वोत्पत्तौ अशुद्धता स्यात् ; तदभावेएव धृतराष्ट्रमुक्ति-निरूपणेन निरूप्यते इति अर्थः. यद्वा पूर्वोक्तदिशा पितृ-पितामह-प्रपितामहानां मुक्तत्वज्ञानात् परीक्षितो **निश्चिन्तता-सिद्ध्यै चित्तशुद्धिः इह** अध्यायत्रयेण **उच्यते** इति अर्थः. अर्थस्तु पूर्वोक्तएव. एतावता अध्यायत्रयार्थः उक्तो भवति (१-४).

अग्रिमाध्यायार्थम् आहुः **ततो द्वयेन** इति. परीक्षिद्**राज्यशौर्यादिवर्णनैः इन्द्रियाणां शुद्धिः उच्यते** इति अर्थः. **ततः** इति. ततो अष्टादशाध्याये **वैराग्य-सत्सङ्गोपयोगिनौ** गर्ह्यकर्म-शापौ निरूप्येते इति अर्थः. **ततो** वैराग्य-सत्सङ्गाभ्यां **फलोन्मुखो अधिकारः पुष्टो** भवेद् **न अन्यथा इति** एकोनविंशाध्याये वैराग्यः सत्सङ्गश्च निरूप्येते इति अर्थः. इदमेव

तत्र प्रथमं धृतराष्ट्रमुक्तिः उच्यते. सा ज्ञानसाध्येति ज्ञानसिद्ध्यर्थं विदुरप्रसङ्गः उच्यते. विदुरो अवान्तरव्यापारः, धर्मराजत्वेन गुरुः वा. भगवता स्मृतइति तस्य[१] दोषनिवृत्तिः. विदुर-मैत्रेयकथां स्कन्धद्वये वक्ष्यति[२] ;

प्रकाशः

सत्सङ्गं विना. तथाच सत्सङ्गस्य आवश्यकत्वबोधनार्थम् **अग्रिमा** सपरिकर-वैराग्यानन्तरभाविनी ऊनविंशाध्यायस्य **कथा** इति अर्थः (५ १/२).

**अवान्तरव्यापारः** इति. पूर्वं सनत्सुजातादि-कृतोपदेशस्य निर्वेदोत्पादनादिना स्मारणात् तथा इति अर्थः. बहुकालव्यवहितस्य सनत्सुजातीयस्य पुनःकथनाभावे स्मरणायोगात्, कथने च गुरुत्वस्यैव सिद्धिरिति अरुच्या पक्षान्तरम् आहुः **धर्मराजत्वेन गुरुः वा** इति. अयं पक्षः "एवं राजा" (श्लो. २८) इति श्लोकस्थाद् 'बोधित'पदात् सिद्ध्यति, प्रथमस्तु ततः पूर्वग्रन्थात्. ननु धर्मराजत्वस्य प्रागपि सत्त्वात् तदानीम् उपदेशकर्तृत्वप्राप्तावपि स्वस्य अनधिकारकथनपूर्वकं तदकरणमिति तस्य इदानीमपि सत्त्वात् कथं गुरुत्वं युज्यते इत्यतः आहुः **भगवते**त्यादि. स्मरणं "यस्य ज्ञानोपदेशाय" (भाग.पुरा. ३।५।२१) इति वाक्ये स्फुटिष्यति. अतो द्वितीयः पक्षोऽपि युक्तएव इति अर्थः. तर्हि तदर्थं तत्कथैव पूर्वं कुतो न उक्ता इत्यतः आहुः **विदुरे**त्यादि. तथाच तस्याः पुराणलक्षणग्रन्थे प्रविष्टत्वाद् बहुत्वाच्च न इदानीं सा उक्ता किन्तु गुरुत्वरूप-प्रयोजनसिद्ध्यर्थं तदुत्तरैव कथा

लेखः

उक्तम् **अग्रिमा कथा** इत्यनेन (५ १/२).

**अवान्तरव्यापारः** इति. नहि अत्र "तज्जन्यत्वे सति[३]" इत्यादिलक्षणको व्यापारो अभिप्रेतः किन्तु सहकारिमात्रत्वम्. इदमेव अरुचिबीजं हृदिकृत्य पक्षान्तरम् आहुः **गुरुर्वा** इति. **भगवता स्मृतः** इति, "आख्यानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितम्" (भाग.पुरा. ३।४।३५) इति तृतीये चतुर्थाध्याये ॥१॥

१. तस्येति नास्ति ख. २.वक्ष्यत इति क-घ.

३. द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वम् इति हि व्यापारलक्षणम् - सम्पा.

तदग्रिमकथा अत्र प्रयोजनार्थं निरूप्यते **विदुरः** इति.

**॥ सूतः उवाच ॥**

**विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् ॥**
**ज्ञात्वागाद्धास्तिनपुरं तया [१]चात्मविवित्सितः ॥१॥**

**तीर्थयात्रायां** समाप्तायां चित्तशुद्धौ उद्धवोपदेशाद् **मैत्रेयं** प्राप्य **आत्मनो** भगवतो **गतिं** चेष्टां, लीलाम् इति यावत्, तां **ज्ञात्वा** ज्ञानसम्पन्नो **हस्तिनापुरम् अगमत्**. भगवत्क्रिययैव तस्य आत्मयाथात्म्यं स्फुरितं, तद् आह **तया च [२]आत्मविवित्सितः** इति. **तया** गत्या **विवित्सितो** विशेषेण ज्ञातः. अयम् अर्थः — मैत्रेयसमीपे गत्वा स्वस्य सर्वज्ञतासिद्ध्यै बहु पृष्टवान्. तत्र "यस्मिन् विदिते सर्वम् इदं विदितं भवति" (शाण्डिल्योप. २। २) इति न्यायेन भगवच्चरित्रे ज्ञाते सर्वं ज्ञातं भवति इति तच्चरित्रं स्कन्धद्वयेन अवगतम्. तत्र एवम् अर्थः सम्पन्नः — सर्वं भगवदधीनं ; स यथा करिष्यति तथा भविष्यति इति केवलं तदाश्रयतया स्थातव्यम्, यथा प्रेरयति तथा स करोति इति कर्तव्यम्. तत्र मध्ये भगवदिच्छया धृतराष्ट्रमुक्त्यर्थं प्रेरितो अग्रिमचरित्रम् अज्ञात्वापि फलज्ञानात् शीघ्रं पुनः नगरे समागतः इति ॥१॥

---

प्रकाशः

उक्तेति न उक्तार्थे सन्देहः इति अर्थः.

एवं मुक्त्युपोद्घातत्वेन प्रसङ्गम् उपपाद्य व्याकुर्वन्ति **विदुरः** इत्यादि. मूले **आत्मविवित्सितः** इत्यत्र बहुव्रीहौ "आहिताग्न्यादिषु" (पाणि.सूत्र २।२।३७) इति 'आत्म'पदस्य पूर्वनिपातः, 'विवित्सित'पदं च विशेषज्ञाने रूढम् इति अवगन्तव्यम्. विशेषेण ज्ञानस्य आकारं फलोक्तिमुखेन विवृण्वन्ति **अयम् अर्थः** इत्यादि. तथाच तया लीलया साङ्ख्यसिद्धइव साक्षी इति न ज्ञातः किन्तु भगवद्दासत्वादि-वैशिष्ट्येन उपनिषत्सिद्धरूपेण ज्ञातः इति अर्थः. **अग्रिमचरित्रम्** इति पञ्चमादि-स्कन्धान्तरोक्तम्. **फलज्ञानाद्** इति.

---

१. तयाऽवाप्तविवित्सित इति प्रायः पाठः. अस्ति त्वेवमपि. टीकानुरोधी चाऽयम्.

२. तयाऽवाप्तविवित्सित इति ग-घ-ङ.

अतएव पूर्वं ये बहवः पदार्थाः पृष्टाः तान् अश्रुत्वैव[१] समागतः इति आह.

**यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः ॥**

**जातैकभक्तिर्गोविन्दे तेभ्यश्चोपरराम ह ॥२॥**

**यावतः** इति. **क्षत्ता** अन्तःपुराध्यक्षः, अनेन अतिनिपुणत्वं बोधितम्. **कौषारवः** कुषारोः पुत्रो मैत्रेयः. उत्तमाधिकारित्वात् (**गोविन्दे!**) चरित्रैकदेशश्रवणेऽपि **भक्तिः जाता**. अतः फलस्य जातत्वात् **तेभ्यः** प्रश्नेभ्यः (**च!**) उत्तरम् अश्रुत्वापि **उपरराम** (**ह!**) ! ॥२॥

एवं तस्य ज्ञानवत्त्वाय पूर्वकथाम् अनूद्य, समागतस्य – अग्रिमकृत्यं वदन् समयप्रतीक्षार्थं स्थितिसिद्धये तस्य – सत्कारम् आह **तं बन्धुम्** इति एकादशभिः सर्वेन्द्रिय-प्रीतिनिमित्तम्.

**तं बन्धुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः ॥**

**धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥३॥**

**गान्धारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी ॥**

**अन्याश्च जामयः पाण्डोर्ज्ञातयः ससुताऽऽस्त्रियः ॥४॥**

**प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम् ॥**

**अभिसङ्गम्य विधिवत् परिष्वङ्गाभिवादनैः ॥५॥**

**मुमुचुः प्रेमबाष्पौघं विरहौत्कण्ठ्यकातराः ॥**

**राजा तमर्हयाञ्चक्रे कृतासनपरिग्रहम् ॥६॥**

बध्यते अनेन इति **बन्धुः**. सुख-दुःख-ज्ञान-मोक्षैः यथाधिकारं निर्णयः.

---

प्रकाशः

फलम् अनुपदोक्तरीतिक-स्वस्वरूपावस्थानरूपं, तस्य ज्ञानात्. इदमेव विशेषतो ज्ञानम् ॥१॥

एतन्निगमनाय अग्रिमश्लोकं विवृण्वन्ति **अतएव** इत्यादि ॥२॥

**यथाधिकारं निर्णयः** इति बन्धुत्वनिर्णयः. ज्ञान-मोक्षाभ्यां बन्धनं सत्त्वगुणवद् ज्ञेयं, ताभ्यामपि गुरुत्वेन आसक्तिजननाद् इति. **मुमुचुः** इत्यत्र.

---

१. तान् श्रुत्वेति क-घ.

**आगतं दृष्ट्वा** अन्यार्थम् आगतत्वाद् न दूराद् ज्ञापनं, येन उद्गच्छेयुः. **सूतः** सञ्जयः[१]. **शारद्वतः** कृपः, शरस्तम्बे जातत्वात्. **ब्रह्मन्** इति सम्बोधनं स्त्रीणां गणनायां विकाराभावाय. **कृपी** द्रोणपत्नी. **जामयः** कुलस्त्रियः. देवरे लज्जाभावार्थं **पाण्डोः** इति. **ज्ञातयः** पुरुषाः. **सुतैः आ** सर्वतः **स्त्रीभिश्च सहिताः,** सकुटुम्बाः ज्ञातयः इति अर्थः. **प्रत्युज्जग्मुः** सम्मुखतया गताः. **तन्वइव** कर-चरणादयइव. **अभिसङ्गम्य** मिलित्वा **विधिवत्** शास्त्रानुसारेण यथायोग्यम्. कैश्चिद् **अभिवादनम्. (मुमुचुः प्रेमबाष्पौघं!)** प्रेम्णा बाष्पसमूहम्. **विरहे** यद् **औत्कण्ठ्यं** प्रेमातिभरत्वं तेन **कातरा** दीनाः. पूर्वं तस्मिन् गते यत्प्रेम जातं – भगवतः प्रेमैव[२] आनन्दरूपं न[३] भवति इति – तेन प्रेम्णा दीनाः, विषयालाभात्. एवं सर्वेषु स्थितेषु मुख्यस्य पूजाधिकाराद् **राजा तं (अर्हयाञ्चक्रे!)** पूजयामास. दत्ते आसने स्वीकृतम् **आसनं** येन. अनेन पूजायां निषेधाभावः सूचितः ॥३-६॥

प्रकाशः

**भगवतः प्रेमएव** इत्यत्र 'प्रेमइव' इति पाठः प्रतिभाति. **निषेधाभावः** इति "पूजा न मया ग्राह्या" इति निषेधस्य अभावः. कुलक्षयप्रयोजकत्वात् निषेधः सम्भाव्यते अग्रिमवाक्य-कथनानुसारात्, तदभावाय एतद् उक्तम् ॥३-६॥

लेखः

**तं बन्धुम्** इत्यत्र. **उद्गच्छेयुः** इति, दूरं सन्मुखं गच्छेयुः इति अर्थः. **सूतः सञ्जयः** इति. ... . **स्तम्बे** इति. इदं नवमे एकविंशाध्याये[४]. **जामयः कुलस्त्रियः** इति, **देवरे लज्जा** इति. लज्जाभावस्य औचितीज्ञापनार्थं पाण्डुसम्बन्धज्ञापनेन देवरत्वं ज्ञापितम् इति अर्थः. **राजा तमर्हयाञ्चक्रे** इत्यत्र **अनेन** इत्यादि. तद्दत्तासनग्रहणेन सर्वापि पूजा विदुरेण अङ्गीकृता, नतु क्वचित् निषेधोऽपि कृतः इति अर्थः. एतावता पाण्डवेषु अतिस्निग्धत्वं ज्ञापितं भवति इति भावः ॥३-४॥

१. जयन्त इति ग. २. प्रेमेवेति क. ३. न भवतीति इति क-ख-भा.पाठानुरोधात्. मुद्रितपाठे नकारो नास्ति -सम्पा. ४. द्रष्ट. भाग.पुरा. ९।२१।३६ -सम्पा.

**तं भुक्तवन्तं विश्रान्तम् आसीनं सुखमासने ॥**
**प्रश्रयावनतो राजा प्राह तेषाञ्च शृण्वताम् ॥७॥**

"गतश्रमं पृच्छेद्" ( ) इति धर्मशास्त्रात् श्रमापनोदनम् आह **तं भुक्तवन्तम्** इति. प्रत्येकप्रश्नव्यावृत्त्यर्थं **तेषां च शृण्वताम्** इति उक्तम्. **चकाराद्** मध्ये आगताः पूजानन्तरम् आगताश्च परिगृह्यन्ते ॥७॥

प्रथमतो दयाम् उत्पादयति.

॥ **युधिष्ठिरः उवाच** ॥

**अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ॥**
**विपद्गणाद् विषाग्न्यादेर्मोचिता यत् समातृकाः ॥८॥**
**कया वृत्त्याः वर्तितं वश्चरद्भिः क्षितिमण्डलम् ॥**
**तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥९॥**

**अपि स्मरथ** इति. **युष्मत्पक्षच्छायासमेधितान् नः** अस्मान् – **अपि** इति सम्भावनायां – **स्मरथ?** पूर्वं वयं भवद्भिरेव परिपालिताः. **पक्षः** पक्षपातः, तस्य **छाया** हिताचरणम्. पक्षिणाम् एषा व्यवस्था— मातरं पितरं पुत्रं वा कालान्तरे ते न परिचिन्वन्ति ; तदर्थं **पक्षा**दिपदप्रयोगः. स्मरणार्थं पालनविशेषं ज्ञापयति **विपद्गणाद् मोचिताः** इति, आपदां समूहात्. तमेव गणयति **विषाग्न्यादेः**[१] इति. विषमोदकदानं लाक्षागृहदाहश्च प्रत्येक-समुदायनाशकौ[२]. **समातृकाः** इति, स्त्रीणामपि वधे शत्रूणां न विचिकित्सा! सरक्षकाः मोचिता इति वा. एवं दयाम् उत्पाद्य – क्लेशजनितं दुःखम् अनुवादेन गच्छति इति – वृत्तिप्रश्नः. **वृत्तिः** जीविका.

प्रकाशः

**तदर्थम्** इति. लोके हि नानादेशयात्रां कुर्वाणाः स्वस्य पक्षित्वं वदन्ति "वयं पक्षिणः" इति, तदा स्मरणं न सम्भवतीति तन्निवृत्तये इति अर्थः. **अर्थ**पदम् अत्र निवृत्तौ, "मशकार्थो धूमः" इतिवत्. **विचिकित्सा** इति. अयं शब्दो ग्लानौ रूढो जुगुप्सावत् प्रयोगवशाद् ज्ञेयः. **क्लेशजनितम्**

१. विषाग्न्यादेरितीति नास्ति ख. २. प्रत्येकं समुदायेत्यादि ख.

वर्णाश्रमविभागविहितया, यादृच्छिकया[१] वा[२] इति. **वः** युष्माभिः. जीवनस्य अनभिप्रेतत्वात् तत्प्रति[३] स्वातन्त्र्याभावाद् न कर्तरि तृतीया अपितु सम्बन्धमात्रे षष्ठी. भूपर्यटने तु विवक्षितत्वात् कर्तृत्वम् अतः **चरद्भिः** इति उक्तम्. **क्षितिमण्डलम्** इति अत्यन्तसंयोगे द्वितीया, तेन सर्वत्र एकविधान्नाभावात्[४] परित्यागभावनां कृत्वा अपरित्यागभावनां वा कृत्वा जीवितम् इति प्रश्नार्थः. द्वितीयपक्षे अतः परम् अत्र स्थास्यन्ति इति मनोरथः. **क्षेत्राणि मुख्यानि** यत्र. जलप्रधानं **तीर्थं,** स्थलप्रधानं **क्षेत्रं ;** क्वचिद् उभयम् एकीभवत् प्रयाग (त्रि!) वेणीवद् इति. तानि **इह भूतले सेवितानि.** मुख्यानां सेवितत्वाद् अतः परं न गन्तव्यम् इति भावः ॥८-९॥

ननु फलस्य असिद्धत्वात् सम्यक्-चित्तशुद्धिपर्यन्तं तीर्थाटनं कर्तव्यम् इति चेत्, तत्र आह.

**भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो ॥**
**तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता ॥१०॥**

**भवद्विधाः** इति, न हि भवतां तीर्थाटनेन कश्चिद् गुणो भवति. तत्र अधिकारिणस्तु अन्ये. ननु अस्मद्विधाअपि तीर्थेषु पर्यटन्ति इति आशङ्क्य आह **भवद्विधाः** इति. सत्यं, पर्यटन्ति नतु स्वार्थं किन्तु तीर्थकृपया[५]. "हरन्त्यघं तेऽङ्गसङ्गात् तेष्वास्ते ह्यघभिद्धरिः" (भाग.पुरा. ९।९।६) इति वाक्यात् **स्वयमेव** ते **तीर्थभूताः**. पापिनां स्पर्शदोषाद् दुष्टानि **तीर्थानि** – तेषां दोषं स्वयं गृहीत्वा स्वग्रहणात् पूर्वम् अतीर्थानि – **तीर्थीकुर्वन्ति.**

प्रकाशः

इति पूर्वानुभूत-क्लेशजनितम्. षष्ठ्यन्तपदं तृतीयया कथं व्याख्यायते इति शङ्कानिवृत्तये आहुः **जीवनेत्यादि. परित्यागभावनाम्** इति जीवनस्य इति शेषः ॥९॥

लेखः

**कया वृत्त्या** इत्यत्र. ... ॥९॥

१. यादृष्टिकयेति ख. २. चेतीति ग. ३. तं प्रतीति ख-ग-घ.

४. विधात्रा भावादिति ग. विधानाम्नानाभावादिति घ. विधानान्नाभावादिति ङ. ५. तीर्थं कृपयेति ख.

तर्हि तेषां का गतिः इत्यतः आह **स्वान्तःस्थेन गदाभृता** इति. तेषां हृदये भगवान् गदां गृहीत्वा प्रकटः तिष्ठति. अतो गदायाः आसन्यरूपत्वाद्, भगवान् साधनं च अपहतपाप्मरूपं, "अथ ह इमम् आसन्यं प्राणम् ऊचुः" (बृहदा.उप. १।३।७) इत्यत्र यथा सर्वपापनाशः[१] तथा प्रकृतेऽपि इति. तीर्थानामपि पापं भगवत्समीपं प्राप्य गच्छति इति अर्थः. अनेन भगवदाज्ञायामेव तीर्थाटनं कर्तव्यम्, अन्यथा भगवतः प्रयासजननाद् न[२] कर्तव्यम् इति भावः. अतो अत्रैव स्थातव्यम् इति फलति ॥१०॥

एवम् आगतं कुशलं पृष्ट्वा[३] भगवद्भक्तत्वाद् अयं भगवद्वृत्तान्तं ज्ञास्यति इति पृच्छति.

**अपि नः सुहृदस्तात बान्धवाः कृष्णदेवताः ॥**
**दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ॥११॥**
**इत्युक्तो धर्मराजेन तत्सर्वं समवर्णयत् ॥**
**यथानुभूतं क्रमशो विना यदुकुलक्षयम् ॥१२॥**

**अपि नः** इति. विदुरेण सह[४] तथा सम्बन्धाभावेऽपि अस्माभिः सह सम्बन्ध इति **नः** इति उक्तम्[५]. विदुरमपि आत्मत्वेन स्वीकृत्य वा. **सुहृदो** मित्राणि. **तात** इति स्नेहेन सम्बोधनं तेष्वपि स्नेहबोधनाय. **कृष्णदेवता** इति सुखवासे हेतुः. अतएव त्वया **दृष्टाः**? बन्धुत्वेन लज्जया चेद् न दृष्टाः तर्हि भगवदीयत्वात् **श्रुताः**? **स्वपुर्यां** द्वारकायां, स्वस्थाने अल्पेनापि विषयेण **सुखं** भवति इति. **यदवः** इति भक्तवंशत्वादपि

प्रकाशः

**भवद्विधाः** इत्यत्र. **प्रयासजननाद्** इति तीर्थपापनाश-प्रयासजननात्. इदमेव सूचितं विवेकधैर्याश्रयग्रन्थे "विशेषतश्चेदाज्ञा स्याद्" (वि.धै.आ. ३) इति पद्येन ॥१०॥

**अपि नः** इत्यत्र. **ज्ञास्यति** इति सम्भावनायां लृट्. **लज्जया** इति अवधूतवेशकृत-लज्जया ॥११॥

१. सर्वपाप्मेति क-ग-घ. २. तन्नेति ख. ३. अपृष्ट्वेति ग.
४. तथा सहेति ख. ५. इत्युक्तं भवतीति क-ग-घ.

सुखं सम्भावितम्. अनेन त्रिविधमपि दुःखं निवारितं— कृष्णदेवतत्वात्[१] न आधिदैविकं, यदुत्वात् न आध्यात्मिकं, स्वपुर्याम् इति न आधिभौतिकम्. एवं सम्भावितकुशलाः भवन्मुखाद् निश्चिताः[२] चेत् तदा अस्माकं सुखम् इति प्रश्नाभिप्रायः. एवं स्मरणादि-कुशलान्तैः प्रश्नैः पृष्टः **सर्वमेव यथानुभूतं सम्यग् अवर्णयत्**[३], परं (**यदुकुलक्षयं विना!**) मौसलव्यतिरेकेण ॥११-१२॥

"अब्रुवन्[४] विब्रुवन् वापि नरो भवति किल्बिषि" (मनुस्मृ. ८।१३) इति सभारूपे समाजे धर्मराजेन पृष्टः कथं न उक्तवान् इति आशङ्क्य आह.

**नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितम् ॥**
**नावेदयेत् सकरुणो दुःखितान् द्रष्टुमक्षमः ॥१३॥**

**ननु अप्रियम्** इति. सर्वं पृष्टमेव वक्तव्यं नतु अप्रियं, "सत्यं ब्रूयात् प्रियं ब्रूयाद् न ब्रूयात् सत्यमप्रियं, प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातन" (मनुस्मृ. ४।१३८) इति वाक्यात्. पृष्टेऽपि सत्यमपि **अप्रियं न** वक्तव्यं, तत्रापि **दुर्विषहं** यस्मिन् श्रुते श्रोतापि म्रियेत. अतो धर्मिनाशकं श्रवणं न कारणीयम् इति. तर्हि कथम् अग्रिमकार्यसम्पत्तिः? अतः आह **नृणां स्वयम् उपस्थितम्** इति. स्वतएव जनमुखादेव ज्ञास्यन्ति, किं स्ववचनेन इति. किञ्च (**सकरुणो न आवेदयेत्!**) करुणावान् सर्वथा न वदेद्, दुःखितं दृष्ट्वा स्वस्यापि दुःखसम्भवात्. नहि कश्चित् स्वदुःखार्थं यतते. अतो धर्मशास्त्राद् नीतिशास्त्राद् युक्तेश्च परस्मै दुःखं

लेखः

**नन्वप्रियम्** इत्यत्र. **तर्हि कथम् अग्रिम** इति, धृतराष्ट्रवैराग्योत्पादन-तन्मुक्त्यादिकार्यसिद्धिः. नहि कटुवचनम् अन्तरा तस्य वैराग्यं भवति, तदभावे वा प्रव्रजनं सङ्गच्छते इति आक्षेपाभिप्रायः. **धर्मशास्त्राद्** इत्यादि. "सत्यं

१. कृष्णदेवतात्वादिति क-ग-घ. २. निश्चिन्ता इति ख. ३. अनुवर्णयदिति क-ग. अनुवर्णयतीति घ-ङ. ४. अकरन् विकरन् वापि इति ग. अक्ररन् विक्ररन् वापीति ङ. प्रतीकपर्य्यन्तोऽयं ग्रन्थ एव नास्ति ख.

न वदेद् इति भावः, यतो **दुःखितान् द्रष्टुम् अक्षमः** ॥१३॥

''स्वकार्यं ते मा जानन्तु'' इति गुप्तभावः स्वावसरप्रतीक्षया तत्रैव स्थितः इति आह.

**कञ्चित्कालमथावात्सीत् सत्कृतो देववत्सुखम् ॥**
**भ्रातुर्ज्येष्ठस्य श्रेयस्कृत् सर्वेषां प्रीतिमावहन् ॥१४॥**

**कञ्चित्कालम्** इति. **अथ** प्रश्नसमाप्त्यनन्तरम्. **देववत्** यथैव वदन्ति कुर्वन्ति तदेव मन्यते. विश्वासार्थं स्वसुखं ज्ञापयन् पूजितः तिष्ठति इति अर्थः. स्थितौ हेतुम् आह **भ्रातुः ज्येष्ठस्य** धृतराष्ट्रस्य **श्रेयस्कृद्** वैराग्यादिसम्पादनेन मोक्षसाधकः. **सर्वेषां प्रीतिम् आवहन्** इति विश्वासार्थं, सम्भावित-दुःखदूरीकरणधर्मार्थं[१] वा ॥१४॥

ननु अस्य कनिष्ठस्य अयथाजातस्य कथं मोक्षसाधकत्वम् अनधिकारात्? तत्र आह.

**अबिभ्रदर्यमा दण्डं यथावदघकारिषु ॥**
**यावद्दधार शूद्रत्वं शापाद् वर्षशतं यमः ॥१५॥**

**अबिभ्रद्** इति. उत्तरोत्तराज्ञानात् पूर्वबलिष्ठता इति देहेन्द्रिय-प्राणान्तःकरणात्मनां[२] व्यवस्था. तत्र यदि आत्मा ज्ञायते ''अयम् अहम्''

प्रकाशः

**ननु अप्रियम्** इत्यत्र. **स्वकार्यम्** इति विदुराभिप्रेतं कार्यम् ॥१४॥

लेखः

ब्रूयात् प्रियं ब्रूयाद्'' इति धर्मशास्त्रम्. इदं मनुवाक्यम्. स्वदुःखजनकं न आचरणीयम् इति **नीतिः**. यत्श्रुते श्रोतुः मरणं तत् न वक्तव्यं, श्रवणस्यैव बाधाद् इति **युक्तिः** ॥१४॥

**स्वकार्यम्** इति धृतराष्ट्रज्ञानोपदेशरूपम्. मौसलोक्तौ तु विदुरस्य आगमने असम्भावितत्वं विज्ञाय ततः तत्कार्यमपि कल्पयेयुः इति भावः ॥१४॥

**अबिभ्रद्** इत्यत्र. **उत्तरोत्तराज्ञानाद्** इति. तथा च सर्वोत्तरः आत्मा,

१. दुःखदूरीकरणार्थमिति घ-ङ. २. देहेन्द्रियप्राणान्तःकरणानामिति ख-ग-घ-ङ.

इति तदा अन्ये धर्माः दुर्बलाः. अतएव कुटुम्बादेरपि[१] उपदेष्टृत्वम्. पूर्णज्ञानवानपि सर्वत्र अविचारितान्नभक्षणात् काकत्वं प्राप्तः, देहत्यागसमयेऽपि काकचर्यया वा. तस्मात् न अयं कनिष्ठभ्राता न वा शूद्रः किन्तु **यमः**. ''माण्डव्यशापाद् भगवान् प्रजा संयमनो यमः, भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुताद्'' (भाग.पुरा. ३।५।२०) इति वक्ष्यति. तर्हि क इदानीं यमलोके अधिकारी इति आशङ्क्य आह **अबिभ्रद्** इति. ''विवस्वानर्यमा पूषा'' (भाग.पुरा. ६।६।३९) इत्यादि द्वादशादित्याः, तत्र द्वितीयो **अर्यमा.** स **यावत् शूद्रत्वं दधार** माण्डव्य**शापाद् वर्षशतं** तावद् **अर्यमा (दण्डम् अबिभ्रद्!)** अधिकारं कृतवान् **यथावत्** पापकारिषु. शतवर्षानन्तरन्तु न शूद्रत्वम् अतः उपदेशेऽपि न दोषः ॥१५॥

युधिष्ठिरस्य विदुरविस्मरणार्थं कञ्चिद् राज्यभोगम् आह.

**युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलन्धरम् ॥**
**भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥१६॥**
**एवं गृहेषु सक्तानां प्रमत्तानां तदीहया ॥**
**अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥१७॥**

---

लेखः

तदनुसन्धाने देहादीनां दुर्बलता इति पर्यवसितम्. तथा च विदुरस्य आत्मस्फूर्त्या देहाद्यालम्बनः शूद्रत्वादयो दुर्बलत्वाद् अप्रयोजकाइति सुखेन उपदेष्टृत्वम् इति भावः. अत्र अर्थे उपष्टम्भाय आहुः **अतएव** इति. आत्मस्फूर्त्या देहधर्माणां निष्प्रयोजकत्वादेव इति अर्थः. **कुटुम्बादेरपि** इति. कुटुम्बादिकर्मकोपदेष्टृत्वं तादृशगुरोः संगच्छते इति शेषः. तदुक्तं नारदपञ्चरात्रे ''विष्णुतत्त्वं परिज्ञाय एकं चाऽनेकभेदगं, दीक्षयेद् मेदिनीं सर्वां किं पुनश्चोपसन्नतान्'' (नार.पञ्च. जयासंहि. १६।९-१०) इति. तर्हि तादृशस्य आत्मनः कथम् अभिभवः इति आशङ्कायाम् अविद्यया नीचधर्मसङ्गादेव इति आशयेन आहुः **पूर्णज्ञानवानपि** इत्यादिना, **काकचर्यया वा** इति. **द्वादशाऽऽदित्याः** इति. ... ॥१५॥

---

१. भुर्कुटादेरिति घ-ङ. गपुस्तके त्वक्षराण्येव न शक्यन्तेऽनुवाचयितुम्.

**युधिष्ठिरः** इति. **राज्यं लब्ध्वा पौत्रं** च ( **कुलन्धरं!** ) राज्ययोग्यं **दृष्ट्वा भ्रातृभिः** ( **लोकपालाभैः!** ) इन्द्रादितुल्यैः सहितः **श्रिया परया** इन्द्रदुर्लभया ब्रह्मतुल्यया[१] वा **मुमुदे.**

राज्यं वंशो भ्रातरश्च धनं चाज्ञानहेतवः ॥(६)॥

ततः किम् अतः आह **एवं गृहेषु** इति. ते हि भगवति विद्यमानेएव पौत्रे प्रौढे जाते भगवन्तं पृष्ट्वा[२] पौत्रं राज्ये प्रतिष्ठाप्य निरन्तरं भगवच्चिन्तकाः भगवत्सत्रदीक्षिताः भवितुं युक्ताः. तत्तु तेषां न राज्यदोषाद् वृत्तम् इति आह **एवं गृहेषु सक्तानाम्** इति. षड्विंशतिवर्षपर्यन्तं[३] राज्यं कृतं, षोडशवर्षानन्तरमेव राज्ययोग्यः पौत्रः ; तथापि **एवं** पूर्वोक्तप्रकारेण **गृहेषु आसक्तानां** ( **तदीहया!** ) गृहे अतिकर्तव्यतया च **प्रमत्तानां** स्वकार्ये असावधानानाम् **अज्ञातएव कालो** ( **परमदुस्तरः अत्यक्रामद्!** ) गतः. तैः ज्ञातम् "अद्यैव राज्ये उपविष्टम्" इति ॥१६-१७॥

एतत्स्वरूपं कियत्कालवासेन विदुरो ज्ञातवान्— एते स्वार्थे प्रमत्ताः कालग्रस्ताः भविष्यन्ति इति. अन्यथा चेद् – एते भक्ताः भवेयुः तदा – अयोध्यावत् सर्वमेव नगरं वैकुण्ठं गच्छेत्, तदा धृतराष्ट्रस्य कर्तव्यं न अवशिष्येत[४]. तत्तु नास्ति इति निश्चित्य, कलिप्रवेशे बुद्धिभ्रंशे अन्योन्यमारणेन धृतराष्ट्रस्य च भीमेन महद्भयं भविष्यति इति आशङ्क्य धृतराष्ट्रबोधार्थं प्रवृत्तः इति आह.

**विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत ॥**

**॥ विदुरः उवाच ॥**

**राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ॥१८॥**

---

प्रकाशः

**एवं गृहेषु** इत्यत्र. **भगवन्तं दृष्ट्वा** इति, द्वारकायां गत्वा तत्र दृष्ट्वा ॥१७॥

**अन्यथा चेद्** इति. यदि स्वार्थे प्रमत्ता न भवेयुः इति अर्थः.

---

१. ब्रह्मदुर्लभयेति क. २. दृष्ट्वा इति पाठः प्रकाशे - सम्पा. ३. षट्त्रिंशतीति क-ग-घ.

४. नावशिष्यत इति घ.

**विदुरः** इति. कालस्य परमदुस्तरत्वकथनात् तादृशानामपि कालांशानां बहूनाम् अतिक्रमात् (**तद्!**) सर्वनाशक-कालमध्ये पतितो धृतराष्ट्रः इति **अभिप्रेत्य** तं प्रति **अभाषत**[१] **राजन् निर्गम्यताम्** इति. राजानो हि कालस्य शीघ्रं भक्ष्याः, राज्येन अधर्मबाहुल्यात्. **शीघ्रनिर्गमने** हेतुः **पश्य इदं भयम् आगतम्** इति. यथा भगवतो अधिकारी कालः तथा कालस्य 'भय'नामा कश्चित् [२]चतुर्थस्कन्धे वक्तव्यः. स इदानीं भगवति निर्गते तदीयानां स्वतो अनिर्गमने अयम् अधिकारी सर्वान्[३] भक्षयति पत्नीरिव. अथवा ये पूर्वं भक्ष्यत्वेनैव उपस्थिताः भगवद्दृष्ट्या च न भक्षिताः तान् इदानीं भक्षयितुम् आगतः. अग्रे [४]वैधदीक्षान्यायेन ज्ञानसञ्चारसामर्थ्यं बोधयितुं स्वसामर्थ्यबलेन तं प्रदर्शयन् आह **आगतम्** इति ॥१८॥

---

प्रकाशः

**विदुरः** इत्यत्र. **कालस्य** इति कलियुगरूपस्य. तत्र लिङ्गं परमदुस्तरत्वं बोध्यम्. **राजन्** इत्यत्र. **पत्नीरिव** इति अष्टावक्रशप्ता भौमाहृताः कुशपत्नीरिव. तासां तथात्वं पाद्मोत्तरखण्डे प्रसिद्धम्. **पूर्वम्** इति. विश्वरूपप्रदर्शनावसरे "अमी च त्वां सुरसङ्घा विशन्ति केचिद् भीताः प्राञ्जलयो गृणन्ति" (भग.गीता ११।२१) इति भयलिङ्गात्. **वैधदीक्षान्यायेन** इति. यथा वैधदीक्षायां गुरुणा स्वनिष्ठं ज्ञानं शिष्ये सञ्चार्यते – यथा उपकोसलविद्यायां "ब्रह्मविद इव सौम्य ते मुखं भाति, को नु त्वानुशशास" (छान्दो.उप. ४।१४।२) इत्यादि – यथा च तान्त्रिकदीक्षायां गुरुणा देवता स्वस्मिन् सन्निधाप्य शिष्ये सञ्चार्यते, तेन न्यायेन इति अर्थः ॥१८॥

लेखः

**राजन्** इत्यत्र. **चतुर्थस्कन्धे** इति पुरञ्जनोपाख्याने[५]. **पत्नीरिव** इति. ... ॥१८॥

---

१. प्रत्याहेति क-ग-घ. २. स चतुर्थस्कन्ध इति क-ख-घ. ३. सर्वानिति नास्ति ख.

४. अग्रे वेधदीक्षेत्यादि मुद्रितपाठः. अग्नेर्वेधदीक्षेत्यादि घ. क-प्रकाशे तु एवम् -सम्पा.

५. द्रष्ट. भाग.पुरा. ४।२८।१ -सम्पा.

तर्हि पूर्ववद् इदानीमपि प्रतीकारः कर्तव्यः इति आशङ्क्य आह

**प्रतिक्रिया न यस्येह कुतश्चित् कर्हिचित् प्रभो ॥**
**स एव भगवान् कालः सर्वेषां नः समागतः ॥१९॥**

**प्रतिक्रिया**[१] इति. भगवति गते अन्यस्मात् **कुतश्चिदपि यस्य प्रतिक्रिया न** अस्ति. पूर्वमपि एवं व्यवस्था! तदा आह **कर्हिचिद्** इति. **प्रभो** इति सम्बोधनेन अन्यत्र प्रभुत्वं चलति, न अत्र इति उपहासः. तर्हि किम् अस्मानेव भक्षयितुम् आगत उत सर्वान्? अन्त्ये[२] यथा सर्वे न प्रतीकारं कुर्वन्ति तथा अस्माभिरपि न कर्तव्यः. द्वितीये तु अन्याश्रयणं कर्तव्यं, कथं न प्रतीकारः इति आशङ्क्य आह **सएव** इति. यः पूर्वं कृष्णाख्यः त्वत्पुत्रादीन् उपसंहृतवान् **सएव** इदानीं त्वाम् उपसंहर्तुम् आगतः. नच स गतः इति मन्तव्यं, **भगवत्त्वात्**. पूर्वम् अन्येन रूपेण स्थितः, साम्प्रतम् अन्येन. नाम-स्वरूपे[३] तेएव, आकृतिमात्रं भिद्यते इति आह **कालः** इति. कलयति = सर्वान् आकलयति इति. ननु "पूर्वं यथा पाण्डवाः उर्वरिताः तथा इदानीमपि उर्वरिताः भविष्यन्ति, ततः च तदाश्रयेण वयमपि जीविष्यामः" इति आशङ्क्य आह **सर्वेषां नः समागत** इति पूर्वस्माद् वैलक्षण्यम्. इदानीं मामपि ग्रहीष्यति इति[४] **नः** इति आह ॥१९॥

तर्हि किं विधेयम् इति आशङ्क्य येन दोषेण[५] स ग्रसति स दोषः परिहार्यः इति वक्तुम् अहन्तां ममतां त्यजेद् इति अभिप्रायेण आह.

**येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि ॥**
**जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥२०॥**

**येन चैव अभिपन्नो अयम्** इति. कालस्तु आत्मानं वस्तुतो

---

प्रकाशः

**अन्यत्र** इति पाण्डववञ्चनादौ. **द्वितीये** इति आद्ये ॥१९॥

---

१. प्रतिक्रियेतीति नास्ति क-ग-घ. २. आद्ये इति ख-ग-घ. ३. नामस्वरूपत एवेति ग.

४. इतीति नास्ति क-ग-घ-ङ. ५. दोष इति क-ख-ग-ङ.

न ग्रसति आत्मत्वात्, परं स्वनिष्पादिते[१] यदि प्रविशति तदा पेश्यकीटवत् तमपि भक्षयति. ततः च देहेन्द्रियादौ अहन्तादिः त्याज्यः. ननु एते रक्षकाः कथं त्याज्याः इति आशङ्क्य आह **प्राणैः** इति. यावत् स न आगतः तावद् एवं व्यवस्था, तस्मिन् आगतेतु सर्वदा रक्षकाः प्रियाः प्राणाअपि त्यज्यन्ते! **चैव** इति रोगादिसामग्री अवश्यगमनं[२] च उक्तम्. अत्यन्तं प्रियाः प्राणाअपि त्यज्यन्ते, यन्मूलकाः सर्वे[३] तेषां[४] त्यागे को विचारः इति आह **किमुत** इति. तस्मिन् आगते पूर्वं[५] महता प्रयासेन पोषिताअपि एते त्यक्त्वा गच्छन्ति इति अर्थः ॥२०॥

ननु तदैव त्यक्तव्यं, किम् अन्तरा गमनेन, "विमुञ्चेद् मुच्यमानेषु" (भाग.पुरा. ७।१४।४) इति न्यायात्, तत्र आह.

**पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः ॥**
**आत्मा च जरया ग्रस्तः परगेहमुपासते ॥२१॥**

**पितृभ्रात्रिति.** एवं स वदेद् यस्य समीचीना विषया भवेयुः, तव तु जीवनाद् मरणम् उत्तमम्. "रोगी[६] चिरप्रवासी परान्नभोजी परावसथशायी, यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः" (शाङ्र्गधरपद्धतिः २५१४) इति वाक्यात् तव इदानीमेव त्यागः उचितः. कथम्? तद् उपपादयति. **पिता** भीष्मः, **भ्रातरो** भूरिश्रवआदयः, शल्यादयः **सुहृदः**, **पुत्रा** दुर्योधनादयः. एकोऽपि यत्र हन्यते तत्र सलज्जो न तिष्ठति, किमुत सर्वे! **(विगतं!) वयः** आयुः, **(जरया ग्रस्तश्च!) आत्मा** देहः. **जरा** कालकन्या.

प्रकाशः

**येन चैव** इत्यत्र. **स्वनिष्पादितः** इति कालनिष्पादितः ॥२०॥

लेखः

**येन चैव** इत्यत्र. **विमुञ्चेन्मुच्यमानेषु** इति. इदं सप्तमे चतुर्दशाध्याये अस्ति ॥२१॥

१. स्वनिष्पादितः इति पाठः प्रकाशे -सम्पा. २. आवश्यादीति क. अवश्यादीति ग-घ-ङ.

३. सर्व इति नास्ति ख. ४. सर्वेषामिति ख.

५. सर्वमिति ख. ६. चिरप्रवासी रोगीत्यादिः सर्वत्र पुस्तकेषु पाठः. पठन्ति त्वेवम्.

एवमपि **परेषां** शत्रूणां **गेहं** गृहपालवद् **उपासते**[१] इति ग्लानिप्रदर्शनम् ॥२१॥

सामान्यकथनेन विशेषम् आह.

**अहो महीयसी जन्तोर्जीविताशा यया भवान् ॥**
**भीमेनाऽऽवर्जितं पिण्डमादत्ते गृहपालवत् ॥२२॥**

**अहो** इति. येन पुत्रस्य रुधिरं पीतम् – अर्थात् स्वस्यैव – तेन (**भीमेन आवर्जितं पिण्डं!**) अवज्ञया दत्तं बहिः बलिदानपिण्डवत्, तत्रापि अन्यः समायास्यति इति भयात् तद्गृह**पाल**ः श्वा शीघ्रं भक्षयति तद्वद्, **आदत्ते**[२] ॥२२॥

ननु निरभिमानस्य एतद् उचितम्! तत्र आह.

**अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ॥**
**हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥२३॥**

**अग्निः निसृष्टो दत्तः च** इति. स्याद् एवं, यदि भवद्भिः अपकारः कृतो न स्यात्. अतो भवद्भिरेव शत्रुत्वस्य स्थिरीकृतत्वाद् युक्तं भीमकृतं, न त्वत्कृतं[३], "न द्विषतोऽन्नमश्नीयाद् द्विषन्तं नैव भोजयेद् (महाभा. ५।९१।२७), "द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम्" (मनुस्मृ. ३।१४४) इति स्मृतेः. **अग्निः निसृष्टो** लाक्षागृहे, (**दत्तश्च रोगः!**). (**गरोः!**) विपरीतकथनं सामान्यविशेषाभावात्[४]. (**दूषिताः!**) **दाराः** द्रौपदी, **च**कारात् तेऽपि, वल्कलादि-परिधानात्. (**येषां धनं हृतं!**) **क्षेत्रम्** इति स्थितिस्थानमपि. अतः (**तद्दत्तैः असुभिः!**) एवम् अपकृतैः जीवरक्षणं लोक-शास्त्रविरुद्धं **कियद्** इति न तज्जीवनेन

---

प्रकाशः

**अग्निः** इत्यत्र. **सामान्यविशेषभावाद्** इति. लाक्षागृहे समातृकाणां पञ्चानाम् अपकारात् तत् समानं, विषमोदके तु भीमस्यैव अपकाराद् विशेषः इति पश्चात् तद्ग्रहणम् इति अर्थः. **तेऽपि** इति दूषिताः इति शेषः ॥२३॥

---

१. उपासस इति ख.  २. आदत्स इति क-ग-घ.

३. अयमंशो नास्ति ख-ग-घ-ङ.  ४. सामान्यविशेषभावाद् इति पाठः प्रकाशे - सम्पा.

किञ्चित् प्रयोजनं सेत्स्यति इति भावः ॥२३॥

एवमपि सर्वविरोधेन पोषितो देहः स्वयमेव न तिष्ठति इति आह.

**तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः ॥**
**परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥२४॥**

**तस्यापि** इति, एवं ग्लानिम् अनुभवतोऽपि **कृपणस्य** दीनस्य, "कृपणः स तु विज्ञेयो योऽनालोचितयाचकः" (          ) इति भीमयाचकस्य[1] वा, **जिजीविषोः** जीवितुम् इच्छोः **(तव देहः!) परैति** अपगच्छति. तत्र हेतुः **जरया जीर्णः** इति. अव्यवह्रियमाणेऽपि परिधानोत्तरीये **वाससी (इव!)** स्पर्शमात्रेणैव जीर्णे गच्छतः. प्रक्षालनेनापि नश्यति इति अर्थः ॥२४॥

तर्हि किं कर्तव्यम् इत्यत्र आह.

**गतस्वार्थमिमं देहं विरक्तो मुक्तबन्धनः ॥**
**अविज्ञातगतिर्जह्यात् स वै धीर उदाहृतः ॥२५॥**

**गतस्वार्थम् इमम्** इति. विषयदोषदर्शनेन वैराग्य-विवेकोत्पत्तौ अग्रिमबाधाभावाय – वृक्षधर्मत्वाद् – अयं देहः तत्र त्यक्तव्यो यत्र त्यक्तं कोऽपि न जानाति, अपरित्यागदशायामेव अस्य अपकारजनकत्वात्. परित्यागो

---

प्रकाशः

**तस्यापि** इत्यत्र. **अनालोचितयाचकः** इति अनालोचितं यथा स्यात् तथा याचकः. वस्तु-याच्य-स्व-दातॄणां चतुर्णाम् अन्यतमस्य वा स्वरूपादिकम् अविचार्य यो याचते तादृशः इति अर्थः ॥२४॥

लेखः

**गतस्वार्थम्** इत्यत्र. **बाधाभावाय** इति, पुनः देहसम्बन्धाभावाय इति अर्थः. **वृक्षधर्मत्वाद्** इति. यथा नष्टोऽपि वृक्षो बीजसत्तायां पुनः उत्पद्यते तथा वासनाक्षयाभावाद् देहोऽपि इति अर्थः. **परित्यागो हि** इति. "दैवादपेतम् उत दैववशाद् उपेतम्" (भाग.पुरा. ११।१३।३६) इति प्रकारकपरित्यागः इति अर्थः. योगेन त्यागो वा ॥२५॥

---

१. धृतराष्ट्रस्य इति अर्थः, यथोक्तं २२तमे श्लोके - सम्पा.

हि भर्जनवद् बीजस्य अङ्कुरोत्पत्तौ प्रतिबन्धकः. तावद् अयं देहो रक्ष्यो यावत् स्वस्य कार्यं सिद्ध्यति ; सिद्धे कार्ये त्यक्तव्यः इति **गतस्वार्थम्** इति उक्तम्. जातस्वार्थम् इति अर्थः. अथवा पूर्वोक्तन्यायेन[१] **गतः[२] स्वार्थो** ज्ञान-धर्मादयो येन, अतो अपकारिणम् **इमम्. (विरक्तो मुक्तबन्धनः!)** अस्मिन् रागं परित्यज्य तस्य शृङ्खलारूप-पुत्रादिभिः विमुक्तः सन् दुष्टत्वाद् अस्य देहस्य **जह्याद् इमं देहं** परित्यजेत् – **(अविज्ञातगतिः!)** न विज्ञाता गतिः यस्य – शृङ्खलानां पुनः सम्बन्धाभावाय. किं ततः स्यात्? तत्र आह **स वै धीर उदाहृतः** इति, धीरस्य यत्फलं तत्फलं भवेत्[३]. "द्वौ सम्मताविह मृत्यू दुरापौ" (भाग.पुरा. ६।१०।३३) इति धैर्यफलम्. ननु तादृशमेव धैर्यं[४] तत्फले प्रयुज्यते[५] इत्यतः आह **वै** निश्चयेन **(उदाहृतः!)** यत्र फलार्थं धैर्यगणना कृता तत्र एतादृशमपि धैर्यं गणितं निश्चितफलत्वेन. तस्माद् यथा तयोः धैर्ययोः फलं तथा अस्यापि इति अर्थः ॥२५॥

एवम् एकेन प्रकारेण देहपरित्यागः उक्तः. प्रकारान्तरमपि आह.

**यः स्वकात् परतो वापि जातनिर्वेद आत्मवान् ॥**
**हृदि कृत्वा हरिं गेहात् प्रव्रजेत् स नरोत्तमः ॥२६॥**

**यः स्वकाद्** इति, स्वकीयाद् बन्धोः हितकर्तुः **परतः** शत्रोः ; वक्तृगत-गुणदोषराहित्येन **यो[६] (जातनिर्वेदः!)** अस्मिन् अर्थे कार्यदृष्टिः सन् जातवैराग्यः **(आत्मवान्!)** देहेन्द्रियादिकम् अज्ञानाद् अन्यार्थं विनियुज्य[७] – तैः सर्वस्वनाशे तत्त्यागः प्रथमः पक्षः – प्रथमतएव भोगार्थम् अकृत्वा यादृशैरपि तादृशैः वाक्यैः तृष्णाभावाय जातवैराग्यः तेन देहादिना **(हरिं!)** भगवन्तं सपरिकरं ज्ञात्वा तं **हृदि (कृत्वा!)** संस्थाप्य देहत्यागेच्छां परित्यज्य तेन दुर्लभं भगवत्स्मरणं कुर्वाणो गृहस्य बाधकत्वात् पुनः

१. पूर्वोक्तत्यागेन इति मुद्रितपाठः. भा.पाठे तु एवम् - सम्पा. २. गतस्वार्थ इति क-ख-ग. गताः स्वार्था इति घ. तत्र पूर्वेषु विसर्गविभ्रंशसम्भावनया प्रतिभातः पाठो निवेशितो मूले.

३. लभेदिति घ. ४. धैर्यं फलं तत्फले इति क. फलं तत्फले इति ग-घ.

५. युज्यत इति ङ. ६. य अस्मिन्नर्थे इति क-ग-घ. ७. विनियुज्यते इति घ.

सम्बन्धाभावाय **(गेहात्!) प्रव्रजेत्** संन्यस्य गच्छेत् **स नरोत्तमः** सर्वेभ्यः प्राणिभ्यः उत्तमः इति अर्थः ॥२६॥

तर्हि मया किं कर्तव्यं? तद् आह.

**अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् ॥**
**इतोऽर्वाक् प्रायशः कालः पुंसां गुणविकर्षणः ॥२७॥**

**अथ** इति. भवतस्तु[१] अन्यएव मार्गः ; न देहपरित्यागो न वा अन्यत्र विनियोगाभावः. तस्माद् एतत्स्थानपरित्यागएव उत्तमः. ननु अनुभयरूपत्वात् किम् एवं परित्यागेन? तत्र आह **उदीचीं दिशं यातु** इति. [२]महापथप्रस्थानमपि एको मार्गः उक्तः, "अपदोषतैव[३] विगुणस्य[४] गुणः" (शिशुपालवध ९।१२) इति न्यायाद्, अत्र स्थितौ दोषसम्भवात्. "एषा वै देवमनुष्याणां शान्ता दिग्" (तैत्ति.ब्रा. २।१।३।५) इति उत्तरदिशः उत्कृष्टत्वात् तत्र स्थितौ न देवाः बुद्धिनाशं कुर्वन्ति, न स्वतः. परम् अस्मिन्[५] अर्थे स्वकीयाः प्रतिबन्धकाइति **(स्वैः अज्ञातगतिः!)** तैः यथा न ज्ञायते तथा गन्तव्यम्. ततो यथाधिकारम् अग्रे वक्ष्यामः इति भावः. ननु दोषाभावार्थमेव चेद् गमनं तदा अत्रैव स्थित्वा दोषो दूरीकर्तव्यः, किं गमनेन, विवेक-धैर्य-सत्सङ्ग-भगवद्गुणानाम् अत्रैव सम्भवात्, तत्र आह **इतो अर्वाग्** इति. **(भवान्!)** सर्वत्रैव प्रथमपुरुषवचनं हीनत्वबोधनाय. अयमेव कालः सर्वेषां बुद्धिनाशकः, त्वद्दृष्टान्तात्. **इतोऽपि अर्वाग्** यः **कालो (प्रायशः पुंसां गुणविकर्षणः!)** बाहुल्येन स्वतन्त्राणां विवेकादिमतामपि विवेकनाशकः तत्र कथं विवेकोत्पत्तिः इति भावः.

---

प्रकाशः

**इतो अर्वाग्** इत्यत्र. **हीनत्वबोधनाय** इति, धृतराष्ट्रस्य इति अर्थः. **स्वतन्त्राणाम्** इति **पुंसाम्** इत्यस्य विवरणम्. **देशसापेक्षः** इति पुरुषः

लेखः

**अथोदीचीम्** इत्यत्र. **हीनत्वबोधनाय** इति. ... . ननु कालस्य

---

१. भगवत इति ग. २. महाप्रस्थानमपि इति मुद्रितपाठः. भा.पाठे तु एवम् - सम्पा.

३.अदोषतैवेति घ. ४. स गुणो विगुणे इति क-ग. ५. परस्मिन्निति क-ग-घ-ङ.

देशसापेक्षस्यैव[1] कालस्य दोषजननाद्, अतएव उत्तरदेशस्थर्षीणां न कलिकालादिना बुद्धिभ्रंशः, परित्यागवैयर्थ्यापत्तेः च. "तस्यैव हेतोः" (भाग.पुरा. १।५।१८) इत्यत्र सर्वोत्कृष्टफले कालस्य अहेतुत्वप्रतिपादने देशस्यापि[2] प्रयोजकता उक्ता. "भयं प्रमत्तस्य वनेष्वपि

प्रकाशः

इति शेषः. तथाच देशापेक्षां परित्यज्य यातु इति अर्थः. **अतएव** इति स्वदेशापेक्षात्यागादेव. **परित्यागवैयर्थ्यापत्तेः** इति. देशत्यागोत्तरमपि बुद्धिभ्रंशे तथात्वापत्तेः इति अर्थः. ननु "तस्यैव हेतोः" इत्यत्र देशस्य परमफलासाधकत्वम् उक्तं, तथा "भयं प्रमत्तस्य" इत्यत्र वनस्यापि तथात्वम् उक्तं, तथा सति कोविदत्वस्य प्रमादाभावस्य च तत्साधकत्वं फलति इति ताभ्याम् अत्रैव फलार्थं प्रयतनीयं, त्यागे को विशेषः? इत्यतः[3] आहुः **तस्यैव**

लेखः

बाधकत्वे तु परिव्रज्य गमनेऽपि समः समाधिः, तस्य सार्वत्रिकत्वाद् इत्यतः आहुः **देशसापेक्षएव** इति. सप्तम्यन्तं इदम्. सामान्यदेशस्थएव उत्तमदेशम् अपेक्षते अतः तस्य सामान्यदेशस्थत्वात् कालाधीनत्वं युक्तमेव इति भावः. उत्तमदेशस्थस्यतु देशान्तराऽनपेक्षस्य न कालाधीनत्वम् इति आहुः **अतएव** इत्यादि. अत्रैव युक्त्यन्तरम् आहुः **परित्याग** इति. यदि कालः सर्वत्र एकविधएव स्यात् तर्हि मोक्षाद्यर्थपरित्यागाद्युपदेशाद्यनुपपत्तिः इति अर्थः. ननु भवतु एवं तथापि "न लभ्यते यद् भ्रमतामुपर्यधः" (भाग.पुरा. १।५।१८) इति कालस्य अप्रयोजकतानिरूपणपूर्वकं देशस्यापि निरूपिता इति कथं देशस्य साधकत्वम् इत्यतः आहुः **तस्यैव** इत्यादि. तथाच न तत्र साधनपराणां गृहादिना निर्विण्णानां देशस्य अप्रयोजकता उच्यते अपितु कृतसाधनानाम् अत्युत्कृष्टानां परमफलविचारेण उक्तम् इति भावः. वाक्यान्तरविरोधम् आशङ्क्य परिहरन्ति **भयम्** इति. एवञ्च अत्र तु गृहे प्रमत्तत्वदर्शनाद् भगवदिच्छा तथैव इति भावः ॥२७॥

१. देशसापेक्ष एवेति क-ग-घ-प्रकाशे-लेखे - सम्पा.  २. देशस्याऽप्रयोजकतेति ग.

३. अतः इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

स्याद्'' (भाग.पुरा. ५।१।१७) इत्यत्र तु ईश्वरेच्छायाः नियामकत्वात् न केवलेन विरोधः. तस्माद् इदानीम् एतत्स्थानं परित्यज्य उत्तरदेशे गन्तव्यम् इति सिद्धम् ॥२७॥

तत् तथैव कृतवान् इति आह.

**॥ सूतः उवाच ॥**

**एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो ह्याजमीढः ॥**
**छित्वा स्वेषु स्नेहपाशान् द्रढिम्नो निश्चक्राम भ्रातृसन्दर्शिताध्वा ॥२८॥**

**एवम्** इति. **राजा** इति तथा करणे सामर्थ्यम्. **अनुजेन** इति अप्रतारकत्वम्. **प्रज्ञाचक्षुः** इति उत्तमाधिकारित्वम्. **आजमीढः** अजमीढवंशोत्पन्नः. तस्य हस्तिनापुर-परित्यागे[१] पितृकृत-नगरपरित्यागेन सर्ववंशधर्मपरित्यागो **बोधितः**. तदुक्तप्रकारेणैव गतः इति ज्ञापयितुम् आह **छित्वा स्वेषु** इति. **द्रढिम्नो** दृढतरान्. **भ्रात्रा** विदुरेण **सम्यग्दर्शितो (अध्वा!)** बहिः अन्तः

प्रकाशः

इत्यादि. तथाच तत्र तयोः असाधकत्वमात्रम् उक्तं, नतु बाधकत्वम्, अतः तत्र **केवलेन** कालेन देशेन च **न** परमफल**विरोधः** इति अर्थः. तथाच तत्र तथा अस्तु, प्रकृतेतु कालस्य बाधकतायाः [२]प्रत्यक्षानुमानाभ्यां सिद्धत्वात् तन्नियम्यैः स्वैः व्याप्तस्यापि तथात्वाद् विरोधएव इति देशः त्याज्यएव इति अर्थः ॥२७॥

एतदेव आहुः **तदित्यादि**. **केचिद्** इत्यादि. श्रीधर-बोपदेवाद्याः ''गतस्वार्थे''ति (श्लो. २५) श्लोकव्याख्यात**पक्षस्थं** धीरं **मन्यन्ते** इति अर्थः ॥२८॥

लेखः

**एवं राजा विदुरेण** इत्यत्र. **तस्य हस्तिनापुर** इत्यादि. अजमीढः पितृकृतं हस्तिनापुरमपि त्यक्त्वा गतः. तद्वंशोत्पन्नत्वाद् अस्यापि स्नेहपाशछेदो योग्यएव इति भावः. **तदुक्त** इति, अजमीढोपदर्शितमार्गेण इति अर्थः. तद्वंश्यत्वात् विदुरोक्तप्रकारेण गतः इति वा अर्थः ॥२८॥

१. हस्तिनापुरपरित्यागेनेति ख. २. अध्यक्षानुमानाभ्यामिति पाठः.

मार्गो यस्य. केचिद् एनं[1] प्रथमपक्षस्थं मन्यन्ते ॥२८॥

**पतिं प्रयान्तं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी ॥**
**हिमालयं न्यस्तदण्डप्रहर्षं मनस्विनामिव सत्सम्प्रहारम् ॥२९॥**

भार्यायामपि तेन मोहः त्यक्तएव तथापि स्वधर्मत्वेन तया गतम् इति आह **पतिम्** इति. **सुबलस्य पुत्री** इति क्षत्रियाभिमानः, ततो जातिधर्मेणापि गमनम् उक्तम्. **अनुजगाम** इति वचनाद् अग्रेऽपि अनुगमनं सूचितम्. **चकाराद्** विदुरोऽपि. **साध्वी** इति अबाधिका. तस्य महद्धैर्यसूचनार्थं **हिमालयम्** इति उक्तम्. ननु अतिदुःखदे[2] देशे चित्तस्थैर्याभावात् परलोकार्थिनां कथं गमनं? तत्र आह **न्यस्तदण्डप्रहर्षम्** इति. **न्यस्तः** त्यक्तो भूतेषु **दण्डो** यैः, भूताभयदातारः, तेषां **प्रकर्षेण हर्षो** यत्र. अन्या सर्वा भूः जीवव्याप्ता, तत्र स्थितो अनिच्छयाऽपि बहून् मारयति, ततो व्रतं भज्येत. हिमे तु सर्वजीवपरिहारात् शरीरेऽपि कृमिसम्बन्धाभावात् परमहंसानां हिमस्थानम् अतिप्रियम्. किञ्च सर्वपरित्यागी देहपरित्यागार्थमपि प्रवृत्तः ; तत्रतु देहपरित्यागसाधनानि सुगमानि, यथा युद्धे. **मनस्विनां** तत्र देहपरित्यागेच्छूनाम्. **सत्कर्तृकः सम्यक्प्रहारो** यत्र युद्धे, "लक्ष्यं[3] शस्त्रभृतां वा स्याद्" (प्राय.मयू.महापापप्रायश्चि.) इति स्मृतेः. अथवा. वीररसाविष्टस्य यथा

प्रकाशः

**पतिम्** इत्यत्र. पौनरुक्त्यपरिहाराय आहुः **अबाधिका** इति, "विप्रस्य वै सन्न्यसतो" (भाग.पुरा. ११।१८।१४) इत्यत्र उक्तैः बाधकैः दैवैः अनाविष्टा इति अर्थः ॥२९॥

लेखः

**पतिम्** इत्यत्र. **"लक्ष्यं शस्त्रभृतां वा स्याद्" इति स्मृतेः** इति. इदं प्रायश्चित्तमयूखे— "हत्वा तु क्षत्रियो विप्रं गुणाढ्यमिह कामतः, प्रायश्चित्तं चरेद् वीरो विधिवत् कायशुद्धये, लक्ष्यं शस्त्रभृतां वा स्याद् विदुषाम् इच्छयात्मनः, प्रास्येद् आत्मानम् अग्नौ वा समिद्धेत्रिः अवाक्शिरः" इति ॥२९॥

१. एवमिति घ-ङ.	२. अतिदुःखदेशे इति ख-ग.	३. शस्त्रं लक्ष्यभृतामिति क-ग-घ.

युद्धभूमिः तथा वैराग्यरसाविष्टस्य सर्वविषयरहितं हिमस्थानम् ॥२९॥

एवम् उत्तमदेशगमनपर्यन्तम् उक्तम्, अग्रिमकृत्यन्तु अनुवादात् स्पष्टीभविष्यति. साक्षाद् विदुरोपदेशकथने मर्यादायां विरोधः आपद्येत.

यावत् कस्यापि हृदयं यस्मिन् सर्वात्मना भवेत् ॥
हृदा बन्धनसद्भावान्न स[1] मुच्येत कर्हिचित् ॥(७)॥
अत एवेष्टवर्गेच्छा यथा गच्छेत् तथा चरेत् ॥
धृतराष्ट्रे तथा बन्धो मा भूदिति हरेः प्रियः ॥(८)॥
युधिष्ठिरादिमोहस्य नाशमाह स नारदः ॥
मोहाभावः स्वतो नास्ति तस्येति प्राक्कथा तता ॥(९)॥

---

प्रकाशः

**अनुवादाद्** इति नारदकृतानुवादात्. ननु नारदेन "विदुरोपदेशाद् गतः" इति कुतो न उक्तं, तत्र आहुः **साक्षाद्** इत्यादि. **विरोधः** इति. "विदुरो अस्मासु पूर्वं स्निग्धः इदानीम् अस्मद्दोषदर्शी जातः" इत्याकारको **विरोधो** युधिष्ठिरस्य मनसि **आपद्येत.** तद् अनुचितं, विदुरस्य अन्यत्र तात्पर्याद्, अतः तदभावार्थं न उक्तवान् इति अर्थः. ननु अस्मिन् अध्याये धृतराष्ट्रस्य[2] मुक्तिमात्रं वक्तव्यं, तत्तु "धृतराष्ट्रः सह भ्रात्रा" (श्लो. ५०) इत्यादिना वक्ष्यति ; ततः पूर्वं युधिष्ठिरप्रश्नादिकं व्यास-सूताभ्यां किमिति उक्तम् इति आकाङ्क्षायां – युधिष्ठिरादिमुक्तिः या अग्रिमाध्याययोः वक्ष्यते तदुपोद्घातत्वेन अत्र इदम् उक्तं, तथा धृतराष्ट्रमुक्तेः प्रकृतत्वात् तदुपयुक्तत्वेनापि उक्तं, तथा अन्योपदेशायापि उक्तम् इति – आशयं कारिकाभिः आहुः **यावदित्यादि. प्राक्कथा** इति युधिष्ठिरप्रश्नादि-

लेखः

अयं – विदुरागमनेन धृतराष्ट्रमुक्तिः भगवता युधिष्ठिरादिमुक्त्यर्थमेव कारिता इति – आशयम् उद्घाटयन्ति कारिकात्रयेण **यावद्** इत्यादि. **न विमुच्येत** इति. एवं धृतराष्ट्रे युधिष्ठिरस्य स्नेहातिशयाद् मुक्तिः न भवेद् इति भावः. **धृतराष्ट्रे तथा** इति. लोकवद् **धृतराष्ट्रे** युधिष्ठिरस्य **बन्धो**

---

१. विमुच्येत इति पाठः लेखे - सम्पा.    २. धृतराष्ट्रमात्रमिति पाठः.

एवम् अर्धरात्रसमये धृतराष्ट्रे निर्गते उदयानन्तरं प्रहरपर्यन्तं जिज्ञासा न अभूत्. तद् आह

**अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान् नत्वा तिलगोभूमिरुक्मैः ॥**
**गृहं प्रविष्टो गुरुवन्दनाय न चापश्यत् पितरौ सौबलीञ्च ॥३०॥**

**तत्र सञ्जयमासीनं पप्रच्छोद्विग्नमानसः ।**

**॥ युधिष्ठिरः उवाच ॥**

**गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ॥**
**अम्बा च हतपुत्रार्ता पितृव्यः क्व गतः सुहृत् ॥३१॥**

**अजातशत्रुः** इति नाम्नैव वैराभावो निरूपितः. **कृतमैत्रः** इति, देव-पितृ-ऋषि-भूततर्पणेन सर्वत्र मैत्री कृता. अथवा प्रातःसन्ध्या मित्रदैवत्या, "मित्रस्य चर्षणी धृत" (तैत्ति.संहि. ३।४।११।५) इति उपस्थानाद् अनुद्धरणाभ्युदये च मैत्रचरुविधानात् च, अतः कृतसन्ध्यावन्दनः इति अर्थः. कृतावश्यको वा, गुदस्य मित्रदैवत्यात्. क्रमेण त्रयं ज्ञातव्यम्. **हुताग्निः** कृताग्निहोत्रः. राज्ञो हि दानं नित्यं, तत्रापि (**तिलगोभूमिरुक्मैः !**) तिलपात्रं

---

प्रकाशः

कथा (७-९). **अजातशत्रुः** इत्यत्र. **अनुद्धरणाभ्युदये** इति. गार्हपत्यादिकं कुण्डाद् अग्नीनाम् उद्धरणात् पूर्वं सूर्योदये तत्प्रायश्चित्तत्वेन तद्विधानम् इति अर्थः. **क्रमेण** इति. आवश्यकं पूर्वं, ततः सन्ध्या, ततः तर्पणम् इति क्रमेण ॥३०॥

लेखः

**मा भूद्** इति अर्थः. **प्राक्कथा** इति नारदोपदेशात् प्राक्कालीना. "पितर्युपरते" (श्लो. ३३) इत्यादि स्निग्धतद्गुणवर्णनम् इति अर्थः. यद्वा "युधिष्ठिरो लब्धराज्यो" (श्लो. १६) इत्यादिना सामान्यतो मोहकथा इति अर्थः (७-९).

**अजातशत्रुः** इत्यत्र. **मित्रदैवत्याद्** इति. एवञ्च **आवश्यक**पदेन सकलेन्द्रियशुद्धिः उच्यते इति. **क्रमेण** इति, अस्मदुक्त-प्रतिलोमक्रमेण इति अर्थः ॥३०॥

गोदानं भूमिदानं स्वर्णदानम् इति च[१]. आज्यावेक्षणं स्वर्णदानेएव उक्तं, ''तिलैर्विष्णुर्गवा रुद्रो भूम्या चैव प्रजापतिः, सर्वे प्रीताः सुवर्णेन सत्पात्रेषु समर्पणाद्'' ( ) इति. तानि[२] दानानि कृत्वा (**विप्रान् नत्वा!**) ब्राह्मणेभ्यो नमस्कृत्य परम्परागतं **गृहं प्रविष्टः** राजगृहं – 'राज'शब्दवाच्यत्वं च धृतराष्ट्रे, (तेन!) धृतम् इति तद्गृहं – प्रविष्टः. (**गुरुवन्दनाय!**) गुर्वादिवन्दनमपि नित्यम्. नष्टाश्व-दग्धरथन्यायेन[३] धृतराष्ट्रस्य पितृत्वं, युधिष्ठिरस्य च पुत्रत्वम् इति – गुरुषु मातुः मुख्यत्वात्, कुन्तीं नत्वा – धृतराष्ट्र-विदुर-नमस्कारार्थं प्रविष्टः तौ (**पितरौ!**) **सौबलीञ्च न च अपश्यत्** दृष्टवानपि न. नमस्कारो दूरे, (**उद्विग्नमानसः!**) महान् उद्वेगो जातः. अतो[४] अविचार्यैव **सञ्जयं** (**तत्र आसीनं पप्रच्छ!**) पृष्टवान्. गवल्गणस्य पुत्रो **गावल्गणिः**. पित्रादिक्रमेण त्वम् एतेषामेव सेवकः ; कथम्[५] अद्य प्रमत्तः इति. **नः तात** इति परमपूज्यत्वं, **वृद्धः** इति धर्मः, **नेत्रयोः हीनः** इति दया. सम्बन्धमात्रविवक्षया षष्ठी. भार्यासहितत्वेन सुखित्वम् आशङ्क्य आह **अम्बा च** इति, गान्धारी च (**हतपुत्रार्ता!**) पुत्रशोकेन भर्तृव्रतचर्यया च आर्ता = पीडिता. गमनसम्भावनाभावात् **क्व** इति उक्तम्. **पितृव्यो** विदुरः, सोऽपि **सुहृत्** शुद्धान्तःकरणः अतो वञ्चनं न करिष्यति इति भावः ॥३०-३१॥

गमनाभावाद् अदर्शनाच्च गङ्गोपर्येव गृहस्य विद्यमानत्वाद् गङ्गापतनं सम्भावयति.

---

लेखः

**अपि मयि** इत्यत्र. **गङ्गोपर्येव** इति, हस्तिनापुरस्य गङ्गातटे स्थितत्वात् तथा इति अर्थः. **लज्जयैव** इति. मम दौरात्म्यं पश्यन् मम अग्रे वक्तुम् अशक्तेः ''किं वक्तव्यम्'' इति **लज्जया गतः** इति

---

१. चकारो नास्ति क. २. तानीति नास्ति क-घ. ३. ''तव अश्वो नष्टो ममापि रथो दग्धः अतः उभौ सम्प्रयुज्यवहै'' (लौकि.न्या.साह. १५५). धृतराष्ट्रः पुत्रहीनो पितृहीनो युधिष्ठिरः, तौ चान्योन्यकृते जातौ पितृपुत्रवदिति स्थितिः - सम्पा. ४. अतो विचार्यैवेत्यवग्रहशून्यः पाठः सर्वेषु पुस्तकेषु. प्रतिभातस्त्ववग्रहो मूले निवेशितः. ५. कथमप्रवृत्त इति क. कथमप्रमत्त इति घ-ङ.

**अपि मय्यकृतप्रज्ञे हतबन्धुसुतादयः[१] ॥**
**आशंसमानः शमलं गङ्गायां दुःखितोऽपतत् ॥३२॥**

**अपि** इति. **अकृतप्रज्ञे** न कृता प्रज्ञा = पुत्रबुद्धिः येन. पूर्वं[२] (**हतबन्धुसुतादयः**!) पुत्राश्च बान्धवाः हताः यस्य. अतः उभयाभावात् शास्त्रतः पुत्रत्वेऽपि यदि पुत्रत्वं न मन्यते तदा "अस्मासु शत्रुत्वमेव स्थितमिति कदाचिद् अस्मानपि मारयेद्" इति **शमलं** पापम् **आशंसमानो** अपमृत्युषु गङ्गामरणं श्रेष्ठम् इति अपमृत्युमरणाद् **दुःखितो** मारणापेक्षया मरणम् उत्तमम् इति **गङ्गायाम् अपतत्**. विदुरस्तु लज्जया अनुक्त्वैव गतः इति भावः ॥३२॥

तदपि असम्भावितम् इति मत्वा आह.

**पितर्युपरते पाण्डौ सर्वान्नः सुहृदः शिशून् ॥**
**अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥३३॥**

**पितरि उपरते** इति. वस्तुतस्तु उभाभ्यामेव रक्षिताः[३] लाक्षागृहाद् दास्यात् च. एवम् अन्यदपि ज्ञातव्यम्. तद् आह **अरक्षतां व्यसनतः** इति ॥३३॥

सञ्जयस्तु पूर्वमेव तदभावं ज्ञात्वा, भयादपि, मूर्च्छितएव स्थितः अतो न उत्तरं दत्तवान् इति आह.

**॥ सूतः उवाच ॥**

**कृपया स्नेहवैक्लव्यात् सूतो विरहकर्षितः ॥**
**आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥३४॥**

---

लेखः

अर्थः. **भावः** इति, युधिष्ठिराभिप्रायः इति अर्थः ॥३२॥

**पितरि** इत्यत्र. **लाक्षागृहाद्दास्याच्च** इति. विदुरेण धृतराष्ट्रेन च रक्षिताः इति अर्थः ॥३३॥

---

१. हतबन्धुः स्वभार्यया इति मुद्रितपाठः सुबोधिन्यनुरोधेन संशोधितः - सम्पा.

२. पूर्वपुत्राश्चेति ख-ग. ३. रक्षिताविति ख.

**विमृज्य पाणिनाश्रूणि विष्टभ्यात्मानमात्मना ॥**
**अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥३५॥**

**कृपया** इति. दीनत्वात् कृपा, स्नेहः सहजः. **कृपया** च **स्नेहा**धिक्याद् **वैक्लव्यम्**. **आत्मेश्वरम्** इति नीतिः अतिपीडायां हेतुः[१]. यद्यपि युधिष्ठिरः ईश्वरः तथापि स्वस्य धृतराष्ट्रएव. (**न प्रत्याह!**) अवचने **अतिपीडैव** हेतुः, नतु [२]अवज्ञादिः. तथापि ईश्वरसान्निध्यात् तूष्णीम्भावो अनुचितइति ''विकलश्च न वदेद्'' ( ) इति स्मृतेः निर्गतानि **अश्रूणि पाणिना विमृज्य** अन्येषाम् अनिर्गमार्थं च **आत्मानं विष्टभ्य** गुर्वन्तराभावेऽपि (**आत्मना!**) स्वयमेव गुरुः भूत्वा ''प्रमादकथनेऽपि दण्डं न करिष्यति'' इति **अजातशत्रुं** प्रति धृष्टता-औदासीन्य-हेलनाद्यभावाय **प्रभोः** धृतराष्ट्रस्य **पादौ**[३] **अनुस्मरन्** – भक्त्या[४] भगवतो वा, दण्डाभावाय – **प्रत्यूचे** प्रतिकूलम् उत्तरं दत्तवान् ॥३४-३५॥

**॥ सञ्जयः उवाच ॥**

**नाहं वेदात्मवसितं पित्रोर्वः कुलनन्दन ॥**
**गान्धार्याश्च महाबाहो वञ्चितोऽस्मि महात्मभिः ॥३६॥**

(**न अहं वेद!**) ''[५]नहि [६]जानामि'' इति उक्ते राज्ञः प्रियं भवति. अज्ञाने हेतुः **आत्मवसितम्** इति. न केनचित् सह मन्त्रणं कृतं किन्तु **आत्मनि** एव **वसितम्** अवसितं, ''वष्टि भागुरिरल्लोपम्'' (पाणि.सूत्र २।४।८२ का.) इति. **पित्रोः व** इति कदाचिद् भवद्भिः ज्ञायेत, **आत्मत्वात् कुलनन्दन**त्वात् च चिकीर्षितमपि कदाचित् सूचयेत्. अथवा **कुलनन्दन** इति तव तु दोषो नास्ति इति अर्थः. **महाबाहो** इति. तव क्रियाशक्तेः आधिक्येऽपि यदि त्वं न जानासि, कुतो मम ज्ञानम् इति भावः. **महात्मभिः** इति, महान् आत्मा आत्मनि वा यस्य. स्वतएव वञ्चनसामर्थ्यं[७], भगवदीयत्वेन वा. उभयथापि अहं **वञ्चितः** इति अर्थः ॥३६॥

---

१. हेतौ इति क-ख-ग. २. नत्वज्ञानादिरिति घ. ३. भक्त्या पादाविति ख-ग.

४. भक्त्येति नास्ति ग. ५. नाऽहमितीति प्रतीकमधिकं क.

६. न हि न जानामीति क-ख. ७. महान् = बुद्धिः आत्मा यस्य इति विग्रहे - सम्पा.

एवं पूर्वकथां निरूप्य विवक्षितकथाम् आरभते. तत्र गावल्गणिवाक्यं श्रुत्वा महामोहग्रस्तो राजा प्रमादं वा कुर्याद् इति आशङ्क्य एतादृशकार्ये नियुक्तो नारदः तदा समागतः इति आह **अथ** इति.

**॥ सूतः उवाच ॥**

**अथाजगाम भगवान् नारदः सह तुम्बुरुः ॥**
**प्रत्युत्थायाभिवाद्याह सानुजोऽभ्यर्चयन्नृषिम् ॥३७॥**

**अथ** मोहानन्तरं तदपगमार्थम् आगतः इति अर्थः. **तुम्बुरुः** अन्यः ऋषिः ; शोकापनोदे[1] हि सम्मतिः अपेक्ष्यते, अधिकारिणः उद्वेगाधीनत्वात्[2]. तदा प्रमादं कर्तुं विचारयन् नारदं दृष्ट्वा "अनेन निर्णयो भविष्यति" इति **(प्रति!) उत्थाय** पूर्वावस्थां त्यक्त्वा **ऋषिम् अभिवाद्य (आह!)** स्वागतादिकम् अपृष्ट्वैव धृतराष्ट्रं पृच्छति ॥३७॥

**॥ युधिष्ठिरः उवाच ॥**

**नाहं वेद गतिं पित्रोर्भगवन् क्व गतावितः ॥**
**अम्बा च हतपुत्रार्ता क्व गता सा तपस्विनी ॥३८॥**
**कर्णधार इवापारे मग्नाः नः[3] पारदर्शनः ॥**

**॥ सूतः उवाच ॥**

**अथाबभाषे भगवान् नारदो मुनिसत्तम ॥३९॥**

**न अहं वेद** इति अमङ्गलसम्भावनां न उक्तवान्, अयुक्तत्वात्. शीघ्रकथनार्थम् आह **कर्णधारः** इति. **(अपारे!)** शोकसमुद्रे **मग्नाः (नः!)**

---

प्रकाशः

**अथाजगाम** इत्यत्र. **प्रमादम्** इति आत्मघातादिरूपम् अनर्थम्. **उद्वेगाद्धीनत्वाद्** इति उद्वेगेन हीनत्वाद्, अधिकारजाघन्याद् इति अर्थः ॥३७॥

लेखः

**नाऽहं वेद** इत्यत्र. **अमङ्गल** इति. गङ्गापतनाद्यमङ्गलसम्भावनाम्

---

१. शोकापनोदने इति क. २. उद्वेगाद्धीनत्वादिति पाठः प्रकाशे – सम्पा.

३. भगवान् इति मुद्रितपाठः सुबोधिन्यनुरोधेन संशोधितः – सम्पा.

वयं, तत्र सार्वज्ञ्यं नौका, तस्याः निर्वाहको भवानेव. केवल-नाविकवद् न किन्तु **पारदर्शनः** गन्तव्यदेशं पश्यसि. पर्यवसानं जानासि इति अर्थः. एवम् अर्धवचने स्थितः, उपसंहाराकथनात्. (**अथ**!) तदा **नारदः** (**आ**!) तस्य[१] अकथनहेतुं ज्ञात्वा स्वयमेव **बभाषे**. ज्ञाने हेतुः **भगवान्** इति, अनुबोधे वा. **मुनिसत्तम** इति सम्बोधनम्. (**मुनिसत्तमः**!) पाठान्तरेऽपि प्रकाराणाम् उक्तत्वाद् आभासाद्यूहनेन स्वयम् ऊहनीयम्. मुनयो हि कृपालवो भवन्ति अतः कृपया नारदो अपृष्टमपि आह इति अर्थः ॥३८-३९॥

भगवान् संसारिजीवेषु यदज्ञानं करोति तत् सहसा कृतिव्यावृत्त्यर्थम्, अतः त्वयापि सहसा न किञ्चित् कर्तव्यम्. प्रथमतो मोहं दूरीकुरु पश्चात् पृष्टं वक्ष्यामि इति अभिप्रायेण आह.

**॥ नारदः उवाच ॥**

**मा कञ्चन शुचो राजन् यदीश्वरवशं जगत् ॥**
**स संयुनक्ति भूतानि स एव वियुनक्ति च ॥४०॥**

**मा कञ्चन शुचः** इति. शोको हि अनिष्टज्ञानसाध्य-[२]स्वन्यूनतापादकानिष्ट-पदार्थनिदिध्यासनविशेषः. कोऽपि अनिष्टभावनया न

---

प्रकाशः

**मा कञ्चन** इत्यत्र. **शोको हि** इत्यादि. शोको हि यथा मानभङ्गादौ स्वन्यूनतायां तस्य मननेन विशिष्टज्ञानम्[३]. तत्र च शत्रुनाशादि-निदिध्यासने अतिव्याप्तिवारणाय विशेषणदलम्. ''स्वन्यूनतापादकम् अनिष्टज्ञानं शोकः'' इति उक्ते पुत्रादिनाशश्रवणजन्य-शाब्दमात्रे अतिव्याप्तिः इति तद्वारणाय विशेष्यदलम्. तादृशशाब्दस्यापि लक्ष्यत्वाङ्गीकारे तु प्रयोगप्रसिद्ध्योः[४]

लेखः

इति अर्थः. **अथ** इत्यत्र. **अनुबोधे वा** इति. उपदेशानन्तरमेव राज्ञः शोकप्रशामक-ज्ञानोत्पत्तौ वा **भगवान्** इति हेतुः इति अर्थः. **पाठान्तरेऽपि** इति, सविसर्गपाठेऽपि इति अर्थः ॥३८-३९॥

---

१. तस्याः कथनहेतुमिति ग. २. स्वन्यूनतादृक् अनिष्टेत्यादि घ.

३. मनने अनिष्टज्ञानमिति पाठः. ४. प्रयोगसिद्ध्योः.

चिन्तनीयः इति अर्थः. **राजन्** इति सम्बोधनाद् महाकुटुम्बित्वम् उक्तं, तेन महति राज्ये सर्वदा इष्टानिष्टोत्पत्तेः शोके कदाचिदपि राज्यसुखं न स्याद्, अतो राजा न शोचति. किञ्च शोको निष्फलो विरुद्धः च, तत्र हेतुः **यदीश्वरवशं जगद्** इति. यस्मात् कारणात् सर्वं जगद् ईश्वरवशम्. भगवता हि सर्वोऽपि[1] पदार्थः क्रियते नियम्यते च. स न कस्यचिद् द्विष्ट[2] इष्टो वा. स स्वार्थं परार्थं वा करोति. तत्र परार्थकरणे हितमेव करोति इति नियमः. स्वार्थकरणेऽपि स्वलीलासिद्धये करोति. तत्र परार्थपक्षे भगवता तस्य हिते क्रियमाणे स्वयं चेत्[3] शोचेत् तदा निषिद्धम्. भगवतः च कोपो भवेत्. भगवल्लीलायान्तु सुतरामेव क्रोधो, अनौचित्यं च. स्वस्यापि ममतास्पद-दूरीकरणे पूर्वोक्तएव न्यायः. अतो भगवदधीनत्वाद् आत्मानं परं वा, **कञ्चन मा शुचः**. ननु अग्नेरिव संयोग-वियोगाभ्यां दुःखजननात् स्वदुःखेन शोकः इति चेत्, तत्र आह **सः संयुनक्ति** इति. भूतानि सएव योजयति वियोजयति च. तस्मात् कृतौ इव संयोगेऽपि सैव युक्तिः अनुसन्धेया. उभयथापि सर्वथा भगवान्

प्रकाशः

विरोधएव दोषइति समुदितोपादानम्. निदिध्यासनं = प्रयत्नपूर्वकं विशिष्टज्ञानम्. तदेतद् अभिसन्धाय आहुः **कोऽपि** इत्यादि. शोकाकरणे हेत्वन्तरम् आहुः **किञ्चे**त्यादि. ननु स्वपुत्रनाशादौ कथं हितकरणानुसन्धानं स्वार्थपक्षे इत्यतः आहुः **ममतास्पदे**त्यादि. **सैव** इति स्वहितकरणरूपा. लीलात्वेन विचारेऽपि

लेखः

**मा कञ्चन** इत्यत्र. **पूर्वोक्तएव न्यायः** इति. भगवान् लीलार्थम् एवं सर्वं करोति इति न्यायः इति अर्थः. अतएव "क्रीडार्थमात्मनः इदं त्रिजगत्कृतं ते, स्वाम्यन्तु तत्र कुधियः पर ईश कुर्युः" (भाग.पुरा. ८।२२।२०) इत्यादिवाक्यानि इति भावः. **स संयुनक्ति** इत्यत्र आभासे **ननु** इति. अग्निः यथा सम्बन्धे सति दहत्येव तथा वध्वादिवर्गसंयोगावपि इति अर्थः ॥४०॥

१. सर्वे पदार्थाः क्रियन्त इति क. २. विद्विष्ट इति ग-घ-ङ. ३. चेच्छा चेदिति ग.

हितं करोति इति ज्ञातव्यम् ॥४०॥

ननु स्वार्थपक्षे कथं शोकपरिहारः – भगवांस्तु स्वलीलार्थं करोति, जीवास्तु अयुक्ते योजितत्वाद् दुःखेन शोचन्ति, भगवल्लीलायाः बहुकालविततत्वात् स्वस्य दुःखपरम्परायां शोकस्य आवश्यकत्वात् – तत्र आह

**यथा गावो नसि प्रोतास्तन्त्यां बद्धाः स्वदामभिः ॥**
**वाक्तन्त्यां नामभिर्बद्धा वहन्ति बलिमीशितुः ॥४१॥**
**यथा क्रीडोपस्कराणां संयोगविगमाविह ॥**
**इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणाम् ॥४२॥**

**यथा गावः** इति. "न[१] दुःखं पञ्चभिः सह" (सुभा.र.माला ३।८४) इति च, "तदर्थमेव सृष्टाः वयम्" इति च, तदर्थमेव महद्भिः विषयैः योज्यन्ते इति च, अवसरे स्वामिद्रोहस्य अयुक्तत्वाद् ज्ञात्वा दुःखमपि सोढ्वा "अग्रे कृतार्थाः भविष्यामः" इति बुद्ध्वा भगवल्लीलामेव सम्पादयेद्, अन्यथा दुःखं बहु प्रयच्छेद् इति गावो दृष्टान्तः. **नसि** नासिकायां **प्रोताः**. तदा हि बलीवर्दा वशे भवन्ति. अहन्ताममता-रज्ज्वा विषयलक्षण-नासिकायां प्रोताः इन्द्रिययुक्ताः भगवद्वशे भवन्ति इति अर्थः. दृष्टान्तेनैव सामान्यबन्धनम् उक्त्वा विशेषबन्धनम् आह **वाक्तन्त्यां नामभिः**

प्रकाशः

सैव अनुसन्धेया इति आशयेन आहुः **उभयथा** इत्यादि ॥४०॥

**यथा गावः** इत्यत्र. **तदर्थम्** इति लीलार्थम्. **अन्यथा** इति लीलायां दोषत्वाद्यभिसन्धाने. **दीर्घरज्जुः** इति. यस्यां रज्जौ बलीवर्दान् नसि प्रोतान्

लेखः

**वाक्तन्त्याम्** इत्यस्य आभासे **दृष्टान्तेनैव** इति. यथा बलीवर्दाः नसि प्रोताः स्ववशे सर्वे तिष्ठन्ति तथा जीवमात्रम् इन्द्रियादिवर्गसम्बद्धं भगवद्वशे तिष्ठति इति सामान्योक्तिः ; अत्र पुरुषयोनिप्राप्ताः विशिष्य

१. तद्दुःखमिति घ-ङ. "पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह, पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह" (सुभा.र.माला. ३।८४) -सम्पा.

**बद्धा** इति. वेदलक्षणा दीर्घरज्जुः. ब्राह्मण-क्षत्रियरूपः ओदनः, स च भगवता भोक्तव्यः. तैः भगवति सायुज्यं प्राप्तव्यम्. तेषां प्राकृतक्रियाः तुषाः. बीजयोनिसम्बन्धः[१] तृणसम्बन्धः. इन्द्रियाणि बलीवर्दाः, वेदो मर्यादारज्जुः, भगवदिच्छा स्तम्भः. एवं सति स्वस्य इन्द्रियाध्यासे बलीवर्दत्वम्. अन्यथा स्वस्य आधारत्वं त्रिविधपापविमोकः[२] च फलम्. इन्द्रियाणि तु देवताधिष्ठितानि[३] वैदिककर्मणि प्रवर्तन्ते, तेन स्वस्य मलापकरणं भवति. पुनः निरन्तरसमाधिना प्राकृततुषे अपगते ज्ञानाग्निना पक्वा[४] ओदनत्वं[५] सम्पद्यन्ते[६]. **नामभिः**

प्रकाशः

कृत्वा रज्ज्वन्तरेण बध्यन्ते सा **तन्ती,** तद्रूपा इति अर्थः. **आधारत्वम्** इति प्राकृतक्रियारूप-तुषाधारत्वम् ; असंस्कृतान्नरूपत्वम् इति अर्थः. अनध्यासे कथम् इन्द्रियव्यापारः इत्यतः आहुः **इन्द्रियाणि** इत्यादि.

लेखः

उच्यन्ते इति अर्थः. व्याख्याने भोगस्य फलम् आहुः **तैः** इति. यथा क्षेत्रस्थाः व्रीहयो मध्यस्थः तं बालं विरज्जुसम्बद्धबलीवर्दैः खुराभिघातैः निस्तुषा अग्निना सैन्धनेन अधिष्ठिता ओदनत्वं भजन्ते. सर्वं प्रकृते निगमयन्ति **तेषां प्राकृतक्रिया** इत्यादिना. **तृणसम्बन्धः** इति. यथा व्रीहिषु मूलभूत-तृणसम्बन्धः तथा अत्र बीजयोनिसम्बन्धः इति अर्थः. **स्वस्य** इति, आत्मनः इति अर्थः. **आधारत्वम्** इति, ज्ञानादि-सकलोत्तम-गुणाधारत्वम् इति अर्थः. **फलम्** इति, अध्यासनिवृत्तेः फलम् इति अर्थः. एवञ्च "भवता अध्यासः त्यक्तव्यः, ततएव विशोकत्वं भविष्यति" इति नारदाभिप्रायः इति उक्तं भवति. ननु इन्द्रियाणां बलीवर्दत्वम् अनुपपन्नं, तूषीभूतप्राकृतक्रिया-निवर्तकत्वाभावात्, प्रत्युत इन्द्रियाणां प्रवृत्त्येकस्वभावत्वात् प्राकृततज्जनकत्वमेव इति आशङ्कायाम् आहुः **इन्द्रियाणि तु** इति. **तेन स्वस्य** इति. वैदिकेन कर्मणा जीवप्राकृतक्रियापकरणं भवति इति अर्थः. **पुनः** इति. निरन्तर-वैदिककर्मधाराभिः प्राकृतक्रियामल-निवृत्त्या सत्त्वशुद्धौ इति अर्थः.

१. बीजयोनिः सम्बन्ध इति क. बीजयोनिः स्वसम्बन्ध इति ख. २. विमोचकश्चेति क-ग.
३. देवताधिकृतानीति घ. ४. पक्त्वेति ख. ५. काञ्चनत्वमिति घ. ६. सम्पत्स्यत इति क-ग-घ.

**बद्धाः** 'ब्राह्मणो' अयं, 'क्षत्रियो' अयं, 'ब्रह्मचारी', 'गृहस्थः' इति ये यत्र योजिताः ते तत्रैव परिभ्रमन्ति. कार्यन्तु प्रभोः कुर्वन्ति, नतु प्रेरकस्य. तस्माद् इन्द्रियाणां भगवदर्थं सृष्टत्वात् तैः भगवत्कार्ये क्रियमाणे स्वयं वृथा अध्यासं कृत्वा शोको न कर्तव्यः इति अर्थः. किञ्च भगवता हि क्रीडार्थं सृष्टाः. यथा बालः प्रतिमाभिः क्रीडति— स यथासुखं प्रतिमाः स्थापयति, कुतश्चिद् वियोज्य कुतश्चिद् योजयति. (**यथा इह क्रीडितुः इच्छया क्रीडोपस्कराणां संयोग-विगमौ स्यातां तथैव ईशेच्छया नृणाम्!**) तथा सर्वे पुरुषा भगवतः क्रीडाप्रतिमाः. ते केनचित् संयुज्यन्ते वियुज्यन्ते च. अतः एवं ज्ञात्वा सम्बन्धिषु ममतया शोक-हर्षौ न विधेयौ इति समुदायेन विवेकः. पूर्वन्तु तत्त्वानां प्रत्येकं विवेकः उक्तः. एवम् ईश्वरार्थं[1] सृष्टपक्षे शोको अनुचितः इति उक्तम् ॥४१-४२॥

निरीश्वरादिमतेऽपि, बाह्यमतेषु च, कुत्रापि शोकः शास्त्रार्थो न भवति इति आह.

**यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयम् ॥**
**सर्वथा न हि शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥४३॥**

---

प्रकाशः

**प्रेरकस्य** इति इन्द्रियाधिष्ठातुः. **अध्यासं कृत्वा** इति, देहादिषु तत्सम्बन्धिषु च यथायथम् अहन्तां ममतां च इति अर्थः. **किञ्च भगवता** इत्यादि. इतः आरभ्य **यथा क्रीडोपस्कराणाम्** इत्यस्य व्याख्यानम्. **कुतश्चिद् योजयति** इत्यत्र सार्वविभक्तिकः तसिः. केनचिद् इति अर्थः ॥४१-४२॥

लेखः

**समाधिः** इन्धनम्. **नतु प्रेरकस्य** इति, लोके प्रेरकत्वेन अभिमतस्य स्वामिनः इति अर्थः. **समुदायेन** इत्यादि. पूर्वं हि प्रत्येक-भूतेन्द्रियादीनां भगवदधीनत्वोक्त्या विवेकः उक्तः, **यथा क्रीडोपस्कराणाम्** इत्यनेन तु तत्समुदायभूत-स्थूलदेहस्य तदधीनत्वप्रतिपादनेन विवेकः उक्तः इति न पौनरुक्त्यम् इति भावः ॥४१-४२॥

---

१. ईश्वरार्थसृष्टेत्यादि क-ग.

**यन्मन्यसे** इति. सर्वे हि वादिनः चतुर्विधाः— साङ्ख्याः सर्वं **ध्रुवं** मन्यन्ते ; आविर्भाव-तिरोभावावेव उत्पत्ति-प्रलयौ. बाह्यास्तु "सर्वम् अनित्यं, कृतकत्वाद्" इति **अध्रुवं** मन्यन्ते. बाह्यभेदाएव केचन माध्यमिकादयो न आसीद् अस्ति भविष्यति इति **न ध्रुवं न अध्रुवं** मिथ्या इति मन्यन्ते. नैयायिकास्तु **उभयं** मन्यन्ते— आकाशादयः परमाणवः च ध्रुवाः, अन्ये अध्रुवाः इति. चतुर्ष्वपि पक्षेषु **सर्वथा ते न शोच्याः** न हि नित्यः शोकम् अर्हति. न वा बुद्बुदरूपम् अनित्यं शोकम् अर्हति. शशशृङ्गवत्पक्षस्तु सर्वथा शोकाभावाय. नैयायिकपक्षे शोकः सम्भवति, तत्रापि उत्तरम् उच्यते. "शत्रुमरणे कथं न शोचति, मित्रमरणे च शोचति तत् कुतः?" इति प्रष्टव्यः. **स्नेहाद्** इति चेत्, स्नेहएव शोकहेतुः अपकारी, स त्यक्तव्यः. ननु कदाचित् सुखं प्रयच्छति इति कथं त्यक्तुं शक्यते इति चेत्? तत्र आह **मोहजाद्** इति. अज्ञानाद् जातः स्नेहः कथं सुखं प्रयच्छेत्[१]! नहि सन्निपाताद् जातं शैत्यं तापापनोदनं करोति. तस्मात् मूर्च्छायां महद्दुःखे[२] सुखमिव[३] मन्यते. अन्यथा तन्निराकरणार्थं न यतेत ॥४३॥

फलितम् आह.

**तस्माज्जह्यङ्ग वैक्लव्यमज्ञानकृतमात्मनः ॥**
**कथं त्वनाथाः कृपणा वर्तेरन् वनमाश्रिताः ॥४४॥**

---

प्रकाशः

**यन्मन्यसे** इत्यत्र. **न च** इति मूलस्य अर्थम् आहुः **न आसीद् अस्ति भविष्यति** इति. अत्र त्रिष्वपि नञो अन्वयः ॥४३॥

लेखः

**यन्मन्यसे** इत्यत्र. **नैयायिकपक्षे शोकः सम्भवति** इति. प्रपञ्चस्य नित्यानित्यसमुदायत्वेन उभयविलक्षणत्वाद् इति भावः. **कथं न** इति, नित्यानित्यसमुदायस्य उभयत्र तौल्यात् कथम् इति अर्थः. **तन्निराकरणार्थम्** इति, मूर्च्छानिराकरणार्थम् इति अर्थः ॥४३॥

---

१. प्रयच्छेद्वेति ग-घ.   २. मोहाद्दुःखमिति घ.   ३. सुखमिति इति ग.

**कालकर्मगुणाधीनो देहोऽयं पाञ्चभौतिकः ॥**
**कथमन्यांस्तु गोपायेत् सर्पग्रस्तो यथा परम् ॥४५॥**

**तस्माद्** इति. हे **अङ्ग, वैक्लव्यम्** इन्द्रियाणाम् अन्तःकरणस्य च विकलतां केवलं (**आत्मनः अज्ञानकृतम्!**) पदार्थाज्ञानेन जातं त्वं विदितपदार्थो **जहि** नाशय इति अर्थः. अयम्[१] एकांशेनापि स्थितः पुनः दुःखं दास्यति इति भावः. मध्ये राजा शङ्कते **कथं त्वनाथा** इति, रक्षकरहिताः. वने हि रक्षा अपेक्ष्यते, विषयाभावात् च **कृपणाः**, यस्य च आश्रयं कृतवन्तः तत् नपुसंकम् अचेतनम् इति. उत्तरम् आह **कालकर्मगुणाधीनः** इति. "किं त्वमेव रक्षकः तत्र न तिष्ठसीति शोकः आहोस्विद् रक्षकमात्राभावात्?" तत्र आद्यं निराकरोति— त्वं रक्षकः इति पक्षस्तु अयुक्तः, 'राज'शब्दस्य देहवाचकत्वात्. नहि एकेन गृहेण गृहान्तरं रक्षितुं शक्यते. किञ्च व्यवहारानुसारेणापि रक्षकत्वे अन्याधीनः कथं रक्षेत्? **अयं देहः कालाधीनः** कालप्रेरणां विना कथं रक्षेत्? कालस्तु निमित्तम् इत्यस्मिन् पक्षेऽपि **कर्माधीनः**, कालप्रेरणया यत्कर्म कृतवान् तत्फलभोगस्य आवश्यकत्वात्. कर्मापि निमित्तमेव दृष्टसापेक्षत्वाद्

प्रकाशः

**कालकर्मे**त्यत्र. **'राज'शब्दस्य देहवाचकत्वाद्** इति. इदं **देहो अयम्** इत्यस्य इदमो व्याख्यानम्. **निमित्तम्** इति, न रक्षाकर्ता इति अर्थः ॥४५॥

लेखः

**कालकर्म** इत्यत्र. **कालस्तु निमित्तम्** इति, परम्परया साधकः इति अर्थः. एवञ्च कालाधीनत्वं न सर्वथा[२] अपाकर्तुं शक्यम् इति भावः. **कालप्रेरणया** इति. एवञ्च कर्म कालाधीनं, तदधीनश्च देहः इति कर्माधीनत्वं साक्षादङ्गीकार्यम् इति भावः. गुणाधीनत्वं स्थापयितुम् अत्रापि परम्परानिमित्तत्वमेव इति आशयेन आहुः **कर्माऽपि** इत्यादिना.

१. वैक्लव्यजनितः शोकः इति भावः -सम्पा. २. "सर्वं ममानिर्वक्तुं शक्यम्" इति उभयोः त-थपाठयोः असम्बद्धइवाभातो गद्यांशः ह्येवं संशोधितः -सम्पा.

इति चेत्, तत्रापि कर्मैव चेद् दृष्टसामग्रीमपि सम्पादयति तदापि पूर्वोक्तएव दोषः. अथ अन्यः चेत्, स्वभावभूताः ते **गुणाः** अतः त्रिदोषव्याप्तः. स्वयं (**पाञ्चभौतिकः!**) पञ्चभूतविकारः. भूतानि तु भक्षकाणि. यैः आत्मैव भक्षितः तद्विकारः **कथम् अन्यान् गोपायेत्?** अन्ये तु एतद्व्यतिरिक्ताः देहाद्यध्यासरहिताः **तु**शब्देन च कालानधीनाः भगवदीयाः जाताः. किञ्च कालग्रस्तः सर्वथा न रक्षति इति दृष्टान्तम् आह **सर्पग्रस्तः** इति. अजगरगिलितः **परं** बहिःस्थितम्. अतः त्वां धृतराष्ट्रः शोचितुम् अर्हति नतु त्वं धृतराष्ट्रम् इति अर्थः ॥४४-४५॥

भक्ष्याभावस्तु न शङ्कनीयः, सर्वत्रैव भगवता भक्ष्यं क्लृप्तम् इति वदन् ''कोऽपि रक्षको नास्ति'' इति पक्षं दूषयति.

**अहस्तानि सहस्तानाम् अपदानि चतुष्पदाम् ॥**
**फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥४६॥**

**अहस्तानि** इति. आदौ सृष्टव्यत्वेन जीवाएव उपस्थिताः. तेषां सृष्टिः नाम देहनिर्माणेन तत्र प्रवेशनम्. तत्र उत्तरत्र (/उत्तरोत्तर?) वृद्ध्याद्यर्थम् अन्नसर्गे कर्तव्ये जीवातिरिक्तम् अलभमानः सर्वमेव अन्नम् अत्तारं च कृतवान्. तत्र सामान्यप्रकारो विशेषश्च. सामान्यं लौकिकं, विशेषो वैदिकः. तत्र सामान्यप्रकारे व्यवस्थाम् आह **अहस्तानि सहस्तानाम्** इति. उपलक्षणम् एतद्, बलवतां दुर्बलं[१] भक्ष्यम्. तद् बलं क्रियया इति हस्त-पादौ

प्रकाशः

**अहस्तानि** इत्यत्र. **दूषयति** इति, द्वाभ्यां दूषयति इति अर्थः. **तत्र सामान्यप्रकारः** इति अन्नात्तृभावे सामान्यप्रकारः.

लेखः

न हि कर्माणि दृष्टं कर्तारं विना निष्पद्यन्ते स्वयमेव, जडत्वात्. न च कर्तृदेहोत्पत्तावपि तत्प्राचीनकर्मैव निमित्तम् अस्तु इति वाच्यं, तथा सति तत्कर्मणोऽपि कर्तृसापेक्षत्वाद् अनवस्था आपद्येत. तस्माद् अन्यदेव तत्त्वेन अन्वेष्टव्यम् इति आहुः **अथाऽन्यश्चेद्** इत्यादि ॥४५॥

१. दुर्लभमिति ख.

क्रियायां करणे इति[१] तयोः ग्रहणम्. सहस्ताअपि अहस्तानां भक्ष्याः भवन्ति, यथा मनुष्याः अजगरादीनाम्. महान्तोऽपि फल्गूनां भक्ष्या भवन्ति, यथा पिपीलिकानां सर्पाः. अतो बलाभिप्रायेण एतद् उक्तं, प्रायिकाभिप्रायेण वा. **अहस्तानि** मत्स्यादीनि, **अपदानि** तृणादीनि. यत् पुनः जीवाधिष्ठानं नास्ति तदेव नास्ति. भावे वा घटादेरिव[२] न भक्ष्यता. अतएव भगवता सर्वत्र भक्ष्यं क्लृप्तमिति न चिन्ता कार्या, नीवार-फलादेः अरण्येऽपि सत्त्वात् ॥४६॥

ननु कथम् एवं भगवान् करोति— स्वसृष्टम् अन्यं खादयति! तत्र आह.

**तदिदं भगवान् राजन्नेक आत्मात्मनां स्वदृक् ॥**
**अन्तरोऽनन्तरो भाति पश्य तं माययोरुधा ॥४७॥**

**तद् इदं भगवान्** इति. वैषम्य-नैर्घृण्ये भगवतो न स्तः, स्वात्मानमेव करोति इति. तद् आह **इदं** जगद् **भगवान्**. तत्र हेतुः **तद्** इति. यस्मात् कारणात् सर्वं सर्वस्य भक्ष्यं तस्माद् नहि अन्यम् अन्यो भक्षयितुं शक्नोति. **राजन्** इति सम्बोधनम् अन्याये दण्डार्थं, तेन यदि अन्यम् अन्यो भक्षयेद् राजदण्डादिः स्यात्. ननु भगवतोऽपि अनुचितं यत् स्वयं कृत्वा स्वयं भक्षयति इति, तत्र आह **एकः** इति. सृज्य-स्रष्ट्रोः अभेदात्. सृष्टानामपि ननु एतदपि अयुक्तम्, आत्मानं भक्षयति इति, तत्र आह **आत्मा** इति. अतति व्याप्नोति इति आत्मा. सर्वमेव व्याप्नोति इति बहिःस्थितम् अन्तःप्रवेशयति, अन्तःस्थितं तच्च बहिः. स्वस्मिन्नेव स्वयम् अन्तर्बहिः भवति इति वस्तुवृत्तम्. तत्र भक्ष्यादिव्यवहारस्तु लौकिकः.

---

प्रकाशः

**भावे वा** इति जीवानधिष्ठितस्य सत्त्वेऽपि ॥४६॥

**तदिदम्** इत्यत्र. **तत्र आह** इति, तादृश्यां शङ्कायां खाद्यानां खादकानां च अभेदम् आह इति अर्थः. **सृष्टानामपि** इति, परस्परम् अभेदाद् इति अर्थः. **बहिः** इति, प्रकटयति इति शेषः. **लौकिकः**

---

१. इतीति नास्ति ख. २. घटादिरिवेति ख.

अथवा **आद्** भक्षणात्[१]. **मा** निषेधात्मको भवति ; नहि सृष्टस्य अभक्षणे आत्मैव अवतिष्ठते. ननु [२]अन्यजीवाधिष्ठितं कथं भक्षयति? तत्र आह **आत्मनाम् आत्मा** इति. भक्षकाणामपि उपसंहर्ता इति अर्थः. अथवा जडानाम् उपसंहारेऽपि जीवानां विद्यमानत्वात् कथम् एकः इत्यतः आह **आत्मनाम् आत्मा** इति, स्वरूपम् इति अर्थः. ननु तथापि जीवदयया न भक्षयेद् इत्यतः आह **स्वदृग्** इति, स्वस्मिन्नेव दृष्टिः यस्य. अन्यानपि आत्मत्वेनैव जानाति, स्वभोगार्थं वा अन्यान् न पश्यति इति अर्थः. ननु स क्व अस्ति इति आशङ्क्य आह **अन्तरो अनन्तरो भाति** इति. अन्तरः अनन्तरश्च बाह्याभ्यन्तरभावेन सएव भाति इति अर्थः. स सर्वत्र भक्षकत्वेन उपस्थितः इति भावः. उपदेशं भेदप्रकारेण[३] फलपर्यवसितं मन्यमानः आह **पश्य तम्** इति, तमेव सर्वं सर्वत्र भासमानं च पश्य[४] इति अर्थः. ननु एकस्य कथम् अनेकप्रकारत्वं? तत्र आह **मायया उरुधा** इति. मायायाः प्रतिरूपत्वेन उक्तत्वात् तत्र सम्बद्धो[५] जलचन्द्रवद् अग्निवद् वा अनेकधा भाति इति अर्थः ॥४७॥

प्रकाशः

इति. तथाच वस्तुविचारे कूर्माङ्गवद् अन्तःप्रवेशाद् न दोषः इति अर्थः. **आद्** इत्यादि. आसमन्ताद् अदनम् आद्, आतः = **भक्षणात् मा निषेधात्मकः** केवलो **भवति** अवतिष्ठते इति अर्थः. "यरोनुनासिको वा" (पाणि.सूत्र. ८।४।४५) इति सन्धेः वैकल्पिकत्वात् नत्वाभावः[६]. पृषोदरादित्वाद् वा दत्व-नत्वयोः अभावः, तेन 'आत्मा' इति अतिपरोक्षवृत्त्या सिद्ध्यति इति ज्ञेयम्. 'आद् अभजनाद्' इति पाठो न भाति, **नहि** इत्याद्यग्रिमग्रन्थानुरोधाद् इत्यपि ज्ञेयम् ॥४७॥

लेखः

**तदिदम्** इत्यत्र. **सृष्टानामपि** इति. ... **आद् भक्षणाद्** इति. ... . **उपदेशं भेदप्रकारेण** इति. ... **अग्निवद्वा** इति. स यथा अयोगोलकादौ

१. अभक्षणादिति ग. अभजनादिति घ. २. अन्येति नास्ति घ. ३. भेदकारेणेति ख.
४. पश्येदित्यर्थ इति क-ग-घ. ५. सम्बन्ध इति घ. ६. नानुनासिकः.

एवं रक्षकत्वाभावम् आशङ्क्य भगवतः सर्वरूपेण रक्षकत्वम् उक्त्वा तस्य इदानीं संहारलीलापरत्वम्[१] आह

**सोऽयमद्य महाराज भगवान् भूतभावनः ॥**
**कालरूपोऽवतीर्णोऽस्यामभावाय सुरद्विषाम् ॥४८॥**

**सो अयम् अद्य** इति. **महाराज** इति सम्बोधनाद् न भयं कर्तव्यम् ; इतोऽपि अधिकं स्वाराज्यं दास्यति इति भावः. **सो अयम्** इति ज्ञानदृष्ट्या प्रदर्शयन् आह. दृश्यस्य अन्यत्वं वारयति **भगवान्** इति. ननु आगतस्य किं प्रयोजनं? तत्र आह **भूतभावन** इति, भूतानि भावयति = पालयति दोषदूरीकरणेन इति. स्वयं स्वतन्त्रतया संहर्तापि विशेषाधिकारित्वात् कालस्य पालयति इति ज्ञापनार्थं भक्तिसिद्धये (**कालरूपो**!) कालस्य रूपमिव

प्रकाशः

**सो अयम् अद्य** इत्यत्र. **सर्वरूपेण रक्षकत्वम्** इति. व्यापकत्वेन [२]भक्षक-भक्षकत्वेन सर्ववस्तुस्वरूपत्वेन च इति अर्थः. संहारलीलायां कथं पालकत्वम् इत्यतः आहुः **दोषदूरीकरणेन** इति. तथाच तदापि पालकत्वम् अव्याहतम् इति भावः. **विशेषाधिकारित्वाद्** इति संहरणे विशेषाधिकारित्वात् ॥४८॥

लेखः

तत्तद्रूपेण दृश्यते, सर्वत्र व्यापकश्च, तथा इति अर्थः ॥४७॥

**सोऽयमद्य** इत्यत्र. ननु कालरूपो भूत्वा संहरति इत्यत्र किं बीजम् अतः आहुः **स्वयम्** इत्यादि. तथाच न अशक्तः सन् कालम् अङ्गीकरोति किन्तु सर्वेश्वरत्वेन तादृशकार्ये अधिकृतेइति तं स्वीकरोति इति भावः. ननु निष्प्रयोजनस्य कथम् अङ्गीकारः इत्यतः तत्प्रयोजनम् आहुः **पालयति** इत्यादि. येन रूपेण पालयति तेनैव रूपेण संहारे भगवति सर्वदा भयादिना भक्तिः न उत्पद्येत इति रूपान्तरमिव कृत्वा करोति इति. तदेतद् आहुः **पालयति** इत्यादि. भगवांस्तु पालयत्येव इति ज्ञानार्थम् इति अर्थः. ननु एतज्ज्ञानस्य किं प्रयोजनम् अतः आहुः **भक्तिसिद्धये** इति ॥४८॥

१. संसारलीलेति घ-ङ. २. भक्ष्य-.

रूपं कृत्वा **सुरद्विषाम् अभावाय अवतीर्णः**. वामनव्यावृत्त्यर्थम् आह **अस्याम्** इति ॥४८॥

एवं कृष्णचरित्रम् उक्त्वा उपसंहरन् राजानम् उपदिशति.

**निष्पादितं देवकार्यमवशेषं प्रतीक्षते ॥**
**तावद्यूयमवेक्षध्वं भवेद् यावदिहेश्वरः ॥४९॥**

**निष्पादितम्** इति, ''मया निष्पादितं ह्यत्र देवकार्यमशेषतः'' ( भाग.पुरा. ११।७।२ ) इति वाक्यात्. **अवशेषं** भारहारक-भारदूरीकरणम्. मोहान्तरानुत्पत्तये तथा उक्तं, वस्तुतस्तु तदपि जातमेव. **तावत्** तच्छ्रवणपर्यन्तम् अवश्यम्भावित्वाद्[१] **अवेक्षध्वं यावद्** भगवान् **इह** निवारकत्वेन आगच्छेत्[२]. ननु अस्मान् स्थापयित्वा गतः कथं निवारयेत्? तत्र आह **ईश्वरः** इति, सर्वकरणसमर्थः ॥४९॥

एवं भगवज्ज्ञापनेन मोहाभावं भयञ्च उत्पाद्य पृष्टे उत्तरम् आह.

**धृतराष्ट्रः सह भ्रात्रा गान्धार्या च स्वभार्यया ॥**
**दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ॥५०॥**

**धृतराष्ट्रः** इति. **हिमवतो दक्षिणेन** हिमालयस्य दक्षिणे भागे[३] पूर्वमेव सिद्धम् **ऋषीणाम् आश्रमं गतः**. गङ्गादक्षिणभागाद् राजगृहाद् हिमदक्षिणभागे[४] ऋषिगृहे गतः इति आधिक्यम्. ''गाङ्गं करिकराद् भ्रष्टं

---

प्रकाशः

मौसलस्य जातत्वात् कथम् एवम् उक्तिः इत्यतः आहुः **मोहान्तरेत्यादि. निवारकत्वेन** इति, स्थापनीयानां मृत्युनिवारकत्वेन मोहनिवारकत्वेन वा ॥४९॥

लेखः

**धृतराष्ट्रः** इत्यत्र. **गङ्गादक्षिणभागाद्** इति. गङ्गादक्षिणभागेएव हस्तिनापुरस्य विद्यमानत्वाद् इति भावः. **आधिक्यम्** इति. राजगृहं, तत्रापि गङ्गादक्षिणभागे इति सर्वसौख्यहेतुसत्त्वेऽपि यद् हिमभागे महाशीतप्रचुरे, तत्रापि ऋषीणाम् आश्रमे विषयोपकरणरहिते गतइति दुष्करत्वेन आधिक्यम्

---

१. अवश्यभावितत्वादिति घ. २. अधिगच्छेदिति क-घ.

३. दक्षिणभागे इति घ. ४. हिमेति नास्ति ग-घ-ङ.

वायुना पल्लवीकृतं, पुण्यदेशेषु पतितं[१] हिमं तं विद्धि राघव" ( ) इति वाक्याद् हिमसम्मुखतया तथा[२] शीतेन अतिपीडितः च तिष्ठति इति अर्थः ॥५०॥

तत्र ऋषीणाम् अनुभावं, गङ्गाञ्च, आह.

**स्रोतोभिः सप्तभिर्यत्र स्वर्धुनी सप्तधा व्यधात् ॥**
**सप्तानां प्रीतये नाम्ना सप्तस्रोतः प्रचक्षते ॥५१॥**

**स्रोतोभिः** इति. तस्य आश्रमस्य **सप्तस्रोतः** इति नाम तत् सार्थकम् इति आह. **यत्र** आश्रमे ऋषीणाम् उत्कर्षस्थापनाय (**सप्तधा**!) प्रत्येकम् ऋषीणां समीपे प्रवाहरूपेण आगता – वक्रतया गमने तु उच्च-नीचता स्याद्, ऋषीणां वैमनस्यं च, अतः **स्रोतोभिः सप्तभिः** इति उक्तं – **व्यधाद्** जाता. आत्मानं वा **स्रोतोभिः** इति – "तृतीया च होश्छन्दसि" (पाणि.सूत्र २।३।३) इति कर्मार्थे तृतीया – तेन स्रोतांसि व्यधाद् इति अर्थः. **स्वर्धुनी** इति. स्वतन्त्रतया आकाशगङ्गा समागता इति ज्ञायते, तेन जलान्तरामिश्रणेन अतिपवित्रत्वम्[३] उक्तम्. **नाम्ना सप्तस्रोतः** इति – 'नाना[४]' इति पाठे सप्तानां प्रीतये नाना – अनेन यथासङ्ख्यं ज्ञापितम् ॥५१॥

तत्र तस्य कृत्यम् आह तूष्णीम्भावव्यावृत्त्यर्थम्.

**स्नात्वाऽनुसवनं तस्मिन् हुत्वा चाग्नीन् यथाविधि ॥**
**अब्भक्ष उपशान्तात्मा स आस्ते विगतैषणः ॥५२॥**

**स्नात्वा** इति. स्नानादयो नियमाः, उपशान्त्यादयो यमाः. **अनुसवनं**

---

प्रकाशः

**धृतराष्ट्रः** इत्यत्र. **पल्लवीकृतम्** इति पल्लववद् ईषद्घनीकृतम् ॥५०॥

लेखः

इति अर्थः. **करिकराद् भ्रष्टम्** इति. ... ॥५०॥

**स्रोतोभिः** इत्यत्र. **तृतीया च होश्छन्दसि** इति. ... ॥५१॥

---

१. पततीति क-ग-ङ. २. तथेति नास्ति ग. ३. अतिपवित्रमिति क-ग-ङ. ४. नामेति घ.

त्रिकालम्. सवनानुकल्पतया वा. **( हुत्वा! ) अग्नीन्** गार्हपत्यादीन्. अन्धस्यापि यथा गार्हस्थ्यं तथा होमः इति च अदोषः. होमेन[१] अग्नयएव संस्क्रियन्ते इति संस्कार्यत्वेन कर्मता **( अग्नीन्! )**. आधानं कृत्वा इति अर्थः. **चकाराद्** अग्निहोत्रमपि हुत्वा. **यथाविधि** पञ्चाग्निविधानम् अनतिक्रम्य. अपएव भक्षयति इति **अब्भक्षः**. वानप्रस्थाश्रमे अकृष्टपच्यादि वायुभक्षान्तम् आहाराः विहिताः, तत्र उपान्त्यम् अब्भक्षः. **उप** भगवत्समीपे प्रतीचि वा **शान्तः आत्मा** अन्तःकरणं यस्य ; ज्ञानार्थं भगवदाविर्भावार्थं वा. **( विगतैषणः! )** एषणापरित्यागेन[२] मुक्तियोग्यता सूचिता. **आस्ते** इति सत्तातिरिक्तधर्म-राहित्यं सूचितम्. लोकैषणा[३] अत्र[४] मुख्या ॥५२॥

एवं यम-नियमौ उक्त्वा अष्टाङ्गयोगं वक्तुम् आसनादिकम् आह.

**जितासनो जितश्वासः प्रत्याहृतषडिन्द्रियः ॥**
**हरिभावनया ध्वस्तरजःसत्त्वतमोमलः ॥५३॥**

**जितासनः ( जितश्वासः प्रत्याहृतषडिन्द्रियः! )** इति, आसनजयः प्राणानां[५] जयः प्रत्याहारः च क्रमेण उक्ताः. **षडिन्द्रियः** इति, कर्मेन्द्रियाणि नियमएव प्रत्याहृतानि. ध्यानम् आह **हरिभावनया** इति. ध्यान-धारणे एकीकृत्य उक्ते, एकदेश-समुदायभेदेन तयोः भेदात्. **ध्वस्तानि गुणत्रयमलानि** रागादीनि यस्य ॥५३॥

**विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् ॥**
**ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे ॥५४॥**

---

प्रकाशः

**स्नात्वा** इत्यत्र. **अग्नयएव संस्क्रियन्ते** इति, न फलार्थं होमः इति अर्थः. **त्रिमुख्या** इति. तथाच सापि त्यक्ता इति अर्थः ॥५२॥

लेखः

**स्नात्वा** इत्यत्र. **सवनानुकल्पतया वा** इति. ... . **अन्धस्याऽपि** इति. ... . **प्रतीचि वा** इति. ... ॥५२॥

---

१. होमे वाऽग्नय इति ख.  २. ईषणेति ख.  ३. लोकेषणेति ख.

४. त्रिमुख्येति क-ख-ग-प्रकाशे - सम्पा.  ५. प्राणायामजय इति ग.

निर्विकल्पसमाध्यर्थम् आह **विज्ञानात्मनि** इति. अन्ते सएव कर्तव्यः. अत्र हि उत्तरोत्तरं पञ्च आत्मानः— उत्क्रान्तिगत्या गतिकर्ता जीवः प्रथमो ; दैह्य-मानसभेदेन भिन्नः एकएव. स व्यष्ट्यात्मा[१], ततो महान् ब्रह्माण्डाभिमानो विज्ञानात्मा समष्टिः, तस्मात् परः प्रकृत्यधिष्ठाता पुरुषः, ततोऽपि महान् अक्षरात्मा, ततः पुरुषोत्तमः[२] इति. तत्र स्वात्मानं प्रथमम्. क्रमविलापनेन ब्रह्मपर्यन्तं गतः इति आह (**तं**!) स्वात्मानं **विज्ञानात्मनि संयोज्य, तं च क्षेत्रज्ञे.** अथवा **विज्ञानात्मा** महत्तत्त्वं चित्ताविर्भूतचैतन्यम्[३], **तं क्षेत्रज्ञे** पुरुषे, **तं ब्रह्मणि** अक्षरे. तस्य अनात्मत्वे[४] प्रविलापनं व्यर्थम् इत्यतः आह **आत्मानम्** इति. ननु पुरुषाक्षरयोः स्वरूपे वैलक्षण्याभावात् किं प्रविलापनेन इत्यतः आह **घटाम्बरम्** इति. घटे भिन्ने यथा ( / घटा ! ) काशम् आकाशं स्यात्. अतः प्रकृत्यधिष्ठातृत्वं दूरीकृतम् इति अर्थः ॥५४॥

तस्य अक्षरधर्माविर्भावेन दोषनिवृत्तिम् उपसंहरति.

**ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः ॥**
**निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः ॥५५॥**

ध्वस्तेति. **मायागुणानाम् उदर्कः** प्रकृतौ व्यामोहेन सम्बन्धः. **नितरां रुद्धाः** पुनरुद्गमनसामर्थ्यरहिताः इन्द्रियान्तःकरणानि **करणाशयाः** यस्य. **निवर्तिताखिलाहारः** इति प्राणवृत्तिनिवारणम्. एवं चतुर्णां

---

प्रकाशः

**विज्ञानात्मनि** इत्यत्र. **स एव** इति निर्विकल्प-समाधिरेव. **अत्र** इति आत्मविचारे. **दैह्य-मानसभेदेन** इति देहाभिमानित्व-मनोभिमानित्वभेदेन. **ब्रह्माण्डाभिमानेति,** "ब्रह्माण्डे अहम्" इति अभिमानो यस्य सः. **प्रकृत्यधिष्ठातृत्वम्** इत्यादि. तथाच चतुर्थे आत्मनि प्रविलीनः इति अर्थः ॥५४॥

लेखः

**विज्ञानात्मनि** इत्यत्र. **सएव** इति, समाधिः इति अर्थः ॥५४॥

---

१. व्यष्टात्मेति घ. २. पुरुष इति ग-घ-ङ.

३. चिन्ताविर्भूतेति ङ. ४. तस्याऽनामत्वे इति घ.

देहेन्द्रिय-प्राणान्तःकरणानां[1] बीजभूतमाया-गुणसहितानां व्यापारे निवृत्ते अक्षररूपं प्राप्तस्य आत्मनः स्वतो व्यापाराभावात् **स्थाणुः इव ( अचलः ! )** आसीद् इति आह **आस्ते** इति. बहिःस्थित-वाय्वाद्यचालने दृष्टान्तः. "वृक्षइव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" ( श्वेताश्वतरोप. ३।९ ) इति श्रुतेः तत्तुल्यो वा जातः इति अर्थः ॥५५॥

तर्हि[2] एवं बहुकालं स्थास्यति इति विचार्य समाधिविरतौ समानेय इति आशङ्कायाम् आह.

**तस्यान्तरायो मैवाभूः संन्यस्ताखिलकर्मणः ।**
**स वा अद्यतनाद् राजन् परतः पञ्चमेऽहनि ॥**
**कलेवरं हास्यति स्वं तच्च भस्मीभविष्यति ॥५६॥**
**दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे ॥**
**बहिःस्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥५७॥**

**तस्य अन्तरायः** इति, परमपुरुषार्थे सन्निहितस्य विघ्नरूपः त्वं **मा भूः**. त्वद्दर्शनादिना मोहे उत्पन्ने सर्वनाशो भविष्यति. किञ्च त्वया गतेन विषयसम्पादनमेव कर्तव्यं, तच्च संन्यासिनो निषिद्धम् इति आह **संन्यस्तानि अखिलानि कर्माणि** येन. अनेन कर्मार्थमपि विषयग्रहणं निवारितम्. तर्हि रक्षार्थं प्रयत्नः कर्तव्यः इति आशङ्क्य आह **स वा** इति. प्रथमं बहुकालं स्थितिरेव नास्ति. विनियोगः च स्वतःसिद्धः **अद्यतनात् पञ्चमे अहनि. राजन्** इति सम्बोधनाद् गमनसम्भृतावपि[3] तावान् कालो गमिष्यति इति सूचितम्. **परतः** इति अद्यदिनं परित्यज्य पञ्च दिनानि. तत्र **पञ्चमे अहनि कलेवरं हास्यति. अहनि** इति शुक्लपक्षादिकमपि सूचितम्. कलेवरपरित्यागे हेतुः **स्वम्** इति. दग्धपट-न्यायेन

---

लेखः

**स वा अद्यतनाद्** इत्यत्र. **गमनसम्भृतौ** इति, धृतराष्ट्रसमीपगमनार्थम् उपकरणसम्पादने इति अर्थः. **तावान्** इति, धृतराष्ट्रस्थित्यवधिक-**कालः** इति अर्थः. तद्दर्शनन्तु दूरादेव अपास्तम् इति भावः ॥५६॥

---

१. प्राणेति नास्ति ग. २. तर्ह्ययमिति क-ग-घ-ङ. ३. सम्भूतावपीति घ.

अभिमानशेषस्य विद्यमानत्वाद् ''भस्मान्तम् इदं शरीरम्'' (ईशा.उप. १।१७) इति श्रुतेः तस्य प्रतिपत्तिम् आह **तच्च** इति. ब्रह्मणि स्थितोऽपि प्रयत्नशेषेण प्राण-देहादिकं धृत्वा तिष्ठति. तस्य त्यागसमये आग्नेयीं धारणां कृत्वा त्यक्तवान् अतः **तद् (भस्मीभविष्यति!)** भस्म जातम् इति अर्थः, ''आधानप्रभृति यजमानो अग्नयो भवन्ति'' (        ) इति श्रुतेः[१]. अन्तःस्थिताग्निप्राकट्ये बहिःस्थितैरपि संसर्गाद् महति अग्नौ सञ्जाते (**अग्निभिः पत्युः देहे दह्यमाने सहोटजे!**) पर्णशालायामपि दग्धायां पातिव्रत्यधर्मेण ''प्रविशेद्वा हुताशनम्'' (निर्ण.सि. ।३।उत्त.। विधवाधर्माः) इति **बहिःस्थिता** अपि **पत्नी** अग्न्युपघाताभावाय **साध्वी तमेव अग्निम् अनु (वेक्ष्यति!)** प्रवेशं करिष्यति इति अर्थः ॥५६-५७॥

एवं दम्पत्योः विनियोगम् उक्त्वा तद्धेतुभूत-विदुरविनियोगम् आह.

**विदुरस्तु तदाश्चर्यं निशाम्य कुरुनन्दन ॥**
**हर्षशोकयुतस्तस्माद् गन्ता तीर्थनिषेवकः ॥५८॥**

**विदुरस्तु** इति तुशब्देन तयोः अवस्थां तस्य निवारयति. ननु सह आगतानां मध्ये कथं द्वयोरेव सा गतिः, न तृतीयस्य इत्यतः आह **तदाश्चर्यम् (निशाम्य!)** इति. पूर्वन्तु तत्क्रियायामेव आसक्तं चित्तम् आसीत् ''किं भविष्यति'' इति. निष्पन्ने तु कार्ये तद् आश्चर्यत्वेन स्फुरितं, न कर्तव्यत्वेन ; न हि अद्भुतं सर्वस्य सम्भवति इति. तर्हि किं कृतवान् इत्यतः आह **गन्ता** इति. **कुरुनन्दन** इति सम्बोधनं तव एतद् न कर्तव्यम् इति सूचयति, सर्वाह्लाद-करत्वात्. पारलौकिकैहिकविचारेण[२]

प्रकाशः

**स वा** इत्यत्र. आग्नेय्याः धारणायाः यजमानस्य आवश्यकत्वाय आहुः **आधाने**त्यादि. तथाच तस्य तदभिन्नत्वात् तेन साधारणा कार्यैव इति अर्थः ॥५६-५७॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे त्रयोदशाध्यायविवरणम् ॥

---

१. ''यजमानो वा अग्नेः योनिः'' (तैत्ति.संहि. ३।४।१०।५) इत्यादिश्रुतिभ्यो आधानाद् आरभ्य यजमानएव अग्नयो भवन्ति - सम्पा.    २. विचारण इति घ.

**हर्ष-शोकयुतः तस्माद्** देशाद् "देहपातनपर्यन्तं परिभ्रमेद्" इति विध्यनुसारेण प्रवृत्तत्वाद् मध्ये प्रासङ्गिकं समाप्य प्रक्रान्तमेव कृतवान् इति आह **तीर्थनिषेवकः** इति ॥५८॥

एतावता राज्ञः शोको निवृत्तइति नारदगमने पूर्वोक्तस्य समाप्तिम् आह **इतीति.**

**॥ सूतः उवाच ॥**

**इत्युक्त्वाऽथाऽऽरुहत् स्वर्गं नारदः सहतुम्बुरुः ॥**
**युधिष्ठिरो वचस्तस्य हृदि कृत्वाऽजहाच्छुचः ॥५९॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे त्रयोदशोऽध्यायः ॥

**अथ** इति भिन्नप्रक्रमेण, पूजितः सन्तुष्टहृदयः. अतः परं भूमौ तस्य कार्यं नास्ति इति ज्ञापयति **आरुहत् स्वर्गम्** इति. तुम्बुरुणा कथान्तरसूचनम् आशङ्क्य (आह!) **सहतुम्बुरुः** इति. उपाख्यानफलम् आह **युधिष्ठिर** इति. **शुचः** शोकान्[1]. वाक्यस्य शोकबाधकत्वाद् वाक्ये स्थिते शोकाः[2] निर्गताः इति अर्थः ॥५९॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे त्रयोदशो अध्यायः ॥

---

लेखः

**इत्युक्त्वा** इत्यत्र. **उपाख्यानफलमाह** इति, नारदाद्युपदेशः इति अर्थः. एवञ्च एतदध्यायश्रवणफलमपि एतद् इति सूचितं भवति इति ज्ञेयम् ॥५९॥ इति श्रीत्रयोदशाध्यायः ॥

## ॥ इति त्रयोदशोऽध्यायः ॥

---

१. शोकानीति ख-ङ. २. शोकानि गतानीत्यर्थ इति ख-घ-ङ.

# ॥ अथ चतुर्दशोऽध्यायः ॥

एवं हि धृतराष्ट्रस्य मुक्तिमुक्त्वा त्रयोदशे ॥
पाण्डवानामतो द्वाभ्यां हेतुपूर्वमुदीर्यते ॥(१)॥
तेषां नेष्टो ब्रह्मभावः सायुज्यं परमीप्सितम् ॥
तन्न[१] स्याद् भूतले कृष्णे सखिभावेन बाधनात्[२] ॥(२)॥
अतश्चतुर्दशे हेतुं भगवद्गमनं महत् ॥
यो वदेत् तस्य सन्दर्शः[३] प्रश्नश्च विनिरूप्यते ॥(३)॥
सम्भावनाया[४] हेतुत्वं[५] निश्चये किमुतेति च ॥
भगवद्गमनं तस्माद् उभयत्रोच्यते द्विधा ॥(४)॥

एवं पूर्वाध्याये "तावद्यूयमवेक्षध्वम्" (भाग.पुरा. १।१३।४९) इति नारदवाक्याद् भगवन्निर्याणस्य आवश्यकत्वं श्रुत्वा, धृतराष्ट्रगमनकृत-क्लेशं

---

प्रकाशः

अथ चतुर्दशाध्यायं विवरिषवो अवसररूप-सङ्गतिबोधनाय पूर्वाध्यायार्थम् अनुवदन्तः प्रस्तुताग्रिमयोः अर्थम् आहुः **एवं हि** इत्यादि. **अतः** इति एतदनन्तरम्. ननु द्वाभ्यां हेतुपूर्वं कथनस्य किं प्रयोजनम् अतः आहुः **तेषाम्** इत्यादि द्वयम्. **महद्** इति भूमित्यागरूपम्. तथाच तद्धेतुत्वेन अत्र तत्कथनम् इति अर्थः. ननु तथापि तत्तु द्वितीये वाच्यं, तथात्वस्य[६] कथं हेतुबोधकत्वम् इत्यतः आहुः **सम्भावनायाम्** इत्यादि. **इति च** इति, एवं प्रकारेण तत्र हेत्वन्तराणि समुच्चेतुं **विनिरूप्यते** इति पूर्वेण सम्बन्धः. एतदेव निगमयन्ति **भगवद्गमनं तस्माद्** इत्यादि (१-४).

लेखः

पूर्वाध्यायार्थेन हेतुनैव अत्र सङ्गतिः इति ज्ञापयितुं तद् अनुवदन्ति **एवम्** इत्यादि. **सायुज्यम्** इति. ... . **हेतुं** सायुज्यहेतुम् इति अर्थः. तच्च हेतुत्वं बाधकनिवृत्तिः (१-४).

---

१. तत्तस्माद्भूतल इति क-घ. २. बन्धनादिति क-घ. ३. संस्पर्श इति क. ४. सम्भावनायामिति क-ग-घ. ५. हेतुत्वनिश्चये इति ग-घ. ६. तथा सति अस्य इति कि.पाठे - सम्पा.

परिहृत्य, स्वगमनहेतुभूतं भगवद्गमनं – प्रति चिन्ताऽऽकुलितः पर्यालोचनं करोति इति – वक्तुं तस्य पीठिकाम् आह.

॥ सूतः उवाच ॥

**सम्प्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ॥**
**ज्ञातुं[१] च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥१॥**
**व्यतीताः कतिचिन्मासास्तदा पाण्डुसुतो नृपः ॥**
**ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ॥२॥**
**कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥**
**पापीयसीं नृणां वार्तां क्रोधलोभावृतात्मनाम् ॥३॥**
**जिह्मप्रायं व्यवसितं शाठ्यमिश्रं च सौहृदम् ॥**
**पितृमातृसुहृद्भ्रातृदम्पतीनां च कल्कनम् ॥४॥**
**[२]निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम् ॥**
**लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥५॥**

**सम्प्रस्थिते** इति. शापात् पूर्वं भगवान् किं करोति इति ज्ञानार्थम् अर्जुनः प्रेषितः. तस्मिन्नपि[३] गते बहवो मासाः जाताइति विलम्बे कारणाभावात् चिन्ता, निमित्तदर्शनाच्च. तत्र आद्यं द्वाभ्याम् आह. गमनागमननिरूपणाद्[४] **द्वारकायां** गतस्य न कापि चिन्ता. तत्रापि (**सम्प्रस्थिते**!) सम्यग्गतस्य[५],

---

लेखः

**सम्प्रस्थिते** इत्यत्र. **शापात् पूर्वम्** इति. ... . **तत्राऽऽद्यं द्वाभ्याम्** इति. विलम्बे कारणाभावे “सम्प्रेषितो द्वारकायां जिष्णुः” (श्लो. ६) इत्यादि श्लोकद्वयेन युधिष्ठिरः आह इति अर्थः. एवञ्च आद्यैः षड्भिस्तु पीठिकैव उच्यते इति भावः. **गमनागम** इति. गमनम् आगमश्च द्वारकायाम् अर्जुनस्य बहुधा जातइति न अपूर्वं गमनम् इति तथा इति अर्थः ॥१॥

---

१. ज्ञातुं मायामनुष्यस्य वासुदेवस्य चेष्टितमिति क्वाचित्कः पाठः. २. इतः प्राक् “कन्याविक्रयिणं तातं सुतं पित्रोरपोषकम्, ब्राह्मणान्वेदविमुखाञ्छूद्रान्वै वेदवादिन” इति क्वचित् पठ्यमानः श्लोकः प्रक्षिप्तः. ३. अपगते इति घ. ४. गमनागमनस्य निरूपणादिति क. गमनागमनिरूपणादिति ग-लेखे - सम्पा. ५. सम्यगागतस्येति घ.

श्वशुरगृहे समाह्वानात्. तत्रापि स्वयं **जिष्णुः** जयशीलः. तत्रापि **बन्धूनां** (**दिदृक्षया!**) दर्शनार्थे, न कलहाद्यर्थे. तत्रापि (**पुण्यश्लोकस्य!**) सर्वानिष्टनिवारकस्य **कृष्णस्य** विशेषचरित्रं **चेष्टितं ज्ञातुम्. कतिचित्** सप्त **मासाः**[१] (**व्यतीताः!**). यदा न आयात् **तदा पाण्डुसुतो** दीर्घदर्शी विचारावश्यकत्वाय च **नृपः** आगमने (**निमित्तानि ददर्श!**) अपशकुनानि दृष्टवान्. **घोराणि रूपाणि** येषां ; फलतो भयजनकत्वं दूरे, तेषामेव दर्शने भयं भवति इति अर्थः. नच तावन्मात्रत्वं, तानि पुनः **निमित्तानि** अनिष्टसूचकानि, शकुनशास्त्रे तथा प्रतिपादनात्. स्वतोऽपि ज्ञानं सम्भवति महापुरुषवंशोत्पन्नत्वाद् इति आह **कुरूद्वहः** इति. ज्योतिःशास्त्रात् **कालगतिः च** (**रौद्रा!**) क्रूरा जाता, कलेः दुष्टस्य प्रवेशात्. किञ्च **विपर्यस्ताः ऋतुधर्माः** यत्र. अनेनापि कालगतिः दुष्टा इति ज्ञातम्. अनापद्यपि (**नृणां!**) प्राणिनां **वार्ता** जीविका **पापीयसी** साधुजुगुप्सिता. कर्तृधर्मेषु **क्रोध-लोभावेव** प्रकटौ. यत्किञ्चित् क्रियते तत्र अधिकारिविशेषणम् एतद्द्वयं, ताभ्याम् **आवृतः आत्मा** येषाम्. कालस्य, कालस्थानां च दोषाः उक्ताः. व्यवहारे बुद्धिदोषम् आह. बुद्धिः द्विधा[२] हि समीचीना— (**व्यवसितं!**) व्यवसायात्मिका, (**सौहृदं!**) सर्वप्राणिषु सौहार्दजनिका **च.** तत्र उभयत्रापि (**जिह्मप्रायं!**) कौटिल्यं (**शाठ्यमिश्रं!**) वञ्चकता[३] च प्रविष्टा. बुद्धिः

---

प्रकाशः

**सम्प्रस्थिते** इत्यत्र. **यदा न आयाद्** इति **व्यतीताः** इत्यस्य अर्थः ॥१॥

लेखः

**कालस्य** इत्यत्र. **ज्योतिःशास्त्राद्** इति. महापुरुषत्वेन अन्तःकरणवृत्त्या क्रूरत्वज्ञानेऽपि लक्षणैस्तु ज्योतिःशास्त्रादेव ज्ञानं, तत्तल्लक्षणानां तत्तत्फलं तच्छास्त्रेएव उक्तत्वाद् इति भावः. तादृशगत्युद्भवे हेतुम् आहुः **कलेः** इति. **कर्तृधर्मेषु** इति निर्धारणे सप्तमी ॥२-३॥

---

१. सप्त मासानिति ख. २. द्विविधेति क-ख. ३. चञ्चलतेति घ.

हि बहिःचेष्टाभिः अनुमीयते, सा कुटिलस्य न शक्या, वञ्चकस्य च सौहार्दम्. तस्माद्[१] एतद्द्वयं लोके भातम्[२] इति अर्थः. लौकिकधर्मदोषम् आह **पित्रादिभिः** (**कल्कनं**!) कलहः. येषु सहजः स्नेहो धर्म्यः तैः सह कलहः! पित्रादीनां सम्बन्धिभिः सह कलहः, **दम्पतीनां** परस्परम्. एवम् एतानि **निमित्तानि,** अन्यानि च [३]**अत्यरिष्टसूचकानि.** समूलानि च इति आह **काले तु अनुगते** इति, दोषेषु कालः सानुकूलः. किञ्च. **नृणां** प्राणिनां सर्वेषां – पूर्वयुगेषु ब्राह्मणादीनां ज्ञानादयइव – **लोभाद्यधर्माः** स्वाभाविकाः जाताः. **प्रकृतित्वेन**[४] विगानमपि नास्ति इति भावः. **अनुजो** भीमः ॥१-५॥

आसन्यस्तु अपहतपाप्मा अतः कालादिदोष-सम्भ्रमाभावात् तेन सह विचारो युक्तइति भीमेन सह विचारयति.

॥ युधिष्ठिरः उवाच ॥

**सम्प्रेषितो द्वारकायां जिष्णुर्बन्धुदिदृक्षया ॥**
**ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥६॥**
**गताः सप्ताधुना मासा भीमसेन तवानुजः ॥**
**नायाति कस्य वा हेतोर्नाहं वेदेदमञ्जसा ॥७॥**

**सम्प्रेषितः** इति. चकाराद् अभिप्रायम् (**ज्ञातुं**!). द्वितीयचकाराद् अन्येषामपि कालादीनाम् (**विचेष्टितम्**!). तस्य स्वतो अनिष्टं नास्ति इति आह **भीमसेनेति,** भीमा सेना यस्य. **अनु** पश्चाद् (**जः**!) जातत्वात् सोऽपि तादृशः. जिज्ञासितसन्देहेऽपि आगमनाभावे हेत्वभावात् कुतो **न आयाति** इति आह ॥६-७॥

---

प्रकाशः

**जिह्मप्रायम्** इत्यत्र. **न शक्या** इति न अनुमातुं शक्या. **सौहार्दम्** इति, न अनुमातुं शक्यम् इति शेषः. **तस्मै** इति युधिष्ठिरार्थम्. तत्कृतार्थत्वार्थं[५] तस्य **एतद्द्वयं भातम्** इति अर्थः ॥४॥

---

१. तस्मा एतद्द्वयमिति ग-ङ-प्रकाशे - सम्पा. २. भीतमिति घ. ३. अत्यनिष्टेति ग.
४. प्रकृतित्वे चेति घ. ५. तत्कृत्यार्थम् इति कि.पाठे - सम्पा.

शुद्धान्तःकरणत्वात् स्वस्यैव निमित्तं स्फुरितं सम्भावनया आह **अपि** इति.

**अपि देवर्षिणादिष्टः स कालोऽयमुपस्थितः ॥**
**यदात्मनोऽङ्गमाक्रीडं भगवानुत्सिसृक्षति ॥८॥**

**आसमन्तात्** (**क्रीडं!**) क्रीडासाधनम्. [1]**मा** (**क्रीडं!**) क्रीडासाधनं वा. अन्यथा एवं न भवेद् इति भावः ॥८॥

तत्र हेतुम् आह

**यस्मान्नः सम्पदो राष्ट्रं दाराः प्राणाः कुलं प्रजाः ॥**
**आसन् सपत्नविजयो लोकाश्च यदनुग्रहात् ॥९॥**
**पश्योत्पातान् नरव्याघ्र दिव्यान् भौमांश्च[2] दैहिकान् ॥**
**दारुणान् शंसतोऽदूराद् भयं नो बुद्धिमोहनम् ॥१०॥**

**यस्माद्** इति. **लोकाः** स्वर्गादयः ; राजसूयादि-करणाद् अवगम्यन्ते[3]. हे **नरव्याघ्र** इति दर्शनमात्रेण न भयम् इति सूचितम्. **उत्पाताः** अनिष्टसूचकानि निमित्तानि (**दिव्यान् भौमान् दैहिकान्!**) त्रिविधान्यपि (**दारुणान्!**) स्वतः[4] क्रूराणि. अतो **अदूरादेव भयं शंसन्ति.** बुद्ध्या हि भयं निवर्तयितुं शक्यते, इदन्तु **भयं** (**नः!**) **बुद्धिमेव मोहयति** ॥९-१०॥

तत्र आध्यात्मिकं निमित्तम् आह.

**ऊर्वक्षिबाहवो वामाः स्फुरन्त्यङ्ग पुनः पुनः ॥**
**वेपथुश्चापि हृदय आराद् दास्यन्ति विप्रियम् ॥११॥**

**ऊर्वक्षीति.** प्राण्यङ्गत्वेऽपि न एकवद्भावो भिन्नस्वभावत्वेन दोषख्यापनार्थः. **वेपथुः** कम्पः. **चकारात्** चिन्तादयः. **आरात्** समीपे ॥११॥

---

लेखः

**अपि देवर्षिणा** इत्यत्र. **आक्रीडासाधनम्** इति, क्रीडासाधनं मर्यादीकृत्य इति अर्थः. कुत्रचित् **माक्रीडा** इत्यादिपाठे तु **मा** लक्ष्मीः **क्रीडासाधनं** यत्र. तथाच क्रीडार्थं तत्र गतः इति भावः ॥८॥

---

१. आक्रीडासाधनमिति ख-लेखे - सम्पा. २. भौमान् सदैहिकानिति क्वचित्पाठः.

३. अवगम्यत इति ग. ४. स्वतोऽक्रूराणीति क-ख-ग.

भौतिकम् अनिष्टम् आह.

**शिवैषोद्यन्तमादित्यम् अभिरौत्यनलानना ॥**
**मामङ्ग सारमेयोऽयम् अभिरोदित्यभीतवत् ॥१२॥**
**शस्ताः कुर्वन्ति मां सव्यं दक्षिणं पशवोऽपरे ॥**
**वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥१३॥**
**मृत्युदूतः कपोतोऽयमुलूकः कम्पयन्मनः ॥**
**प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः ॥१४॥**

**शिवेति.** **एषा** इदानीमपि दृष्टिगोचरः[१]. **अनलानना** स्वभावतएव अग्निमुखाः **अभितो रौति** परीत्य रौति इति अर्थः. **सारमेयः** श्वा **अभि** परितः **रोदिति**[२] दुष्टशब्दं करोति. (**माम् अभीतवत्!**) मत्तो भयं न मन्यते. **शस्ताः** अश्वादयः **अपरे** गर्दभादयः **वाहा** अश्वाः चकाराद् गवादयः. **पुरुषव्याघ्र** इति सम्बोधनं तस्य शङ्काभावसूचकम्. **मम** अपि अश्वाः सर्वसुखेन विद्यमानाअपि (**रुदतो लक्षये!**) रोदनं कुर्वन्तइव लक्ष्यन्ते. **अयं कपोतो मृत्युदूतः** मृत्युसमीपे आकारणार्थम् आगतः. दक्षिणदेशाद् आगत्य शब्दकरणाद् अवसीयते. **कपोतोऽयम्** इत्यन्तं भिन्नं वाक्यं, **उलूकादिभिन्नम्. प्रत्युलूकः** काकः, जातिविशेषो वा. चकाराद् अन्येऽपि[३], येषां शाश्वतिको विरोधः. **कुह्वैः** कुत्सितशब्दैः (**अनिद्रौ!**) न विद्यते निद्रा याभ्यां तौ **शून्यं** जगद् **इच्छतः** ॥१२-१४॥

आधिदैविकम् आह.

**धूम्रा दिशः परिधयः कम्पते भूः सहाद्रिभिः ॥**
**निर्घातश्च महांस्तात साकं च स्तनयित्नुभिः ॥१५॥**
**वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः ॥**
**असृग्वर्षन्ति जलदा बीभत्समिव सर्वतः ॥१६॥**
**सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ॥**
**ससङ्कुलैर्भूतगणैर्ज्वलिते इव रोदसी ॥१७॥**
**नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च ॥**

---

१. दृष्टिगोचरेति क-ग. २. रौतीति ख-ग. ३. नकुलसर्प-मूषकमार्जारादयः - सम्पा.

**न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥१८॥**

**धूम्रा दिशः** इति, धूमयुक्ता[1] दिशएव **परिधयः,** मध्ये त्रैलोक्यं ज्वलदग्निः इति अर्थः. **निर्घातो** निरभ्र-विद्युत्पातः, मेघाभावेऽपि गर्जितानि च. **खरः** तीक्ष्णः **स्पर्शो** यस्य. **रजसा** पांशुवृष्ट्या[2] **तमः** अन्धकारम्. **असृग्** रुधिरं **बीभत्समिव** विष्ठारूपमिव. **पश्य** इति न अत्र तिरोहितमिव. **ग्रहाणां** शुक्रादीनां **मर्दं** युद्धं **पश्य** इति उभयत्र सम्बन्धः. **दिवि** आकाशे, नतु शास्त्रमात्रे. **सम्यक् सङ्कुलैः** भूत-प्रेत-पिशाचादीनां **गणैः** हेतुभिः द्यावापृथिवी **ज्वलिते**[3]**इव**[4]. ते हि मध्ये स्थिता, घातुका रुद्रगणा उपरि अधश्च ज्वालयन्तीव इति अर्थः. वाय्वादि-हेतुव्यतिरेकेणापि **क्षुभिताः (सरांसि!)** पङ्किलावर्तमानजलाः **मनांसि च** अस्मदादीनां **अग्निः आज्येन न ज्वलति** जलेनेव. एवं सर्वस्य अन्यथाकर्ता **कालः किं विधास्यति** इति न ज्ञायते इति अर्थः ॥१५-१८॥

तेषां निमित्तानाम् अवान्तरफलमपि जातम् इति आह.

**न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः ॥**
**रुदन्त्यश्रुमुखा गावो न [5]हृष्यन्त्यृषभा व्रजे ॥१९॥**
**दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च ।**
**इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः ॥**
**भ्रष्टश्रियो निरानन्दाः किमघं दर्शयन्ति नः ॥२०॥**

**न पिबन्ति** इति. क्षुधिताअपि **वत्साः स्तनं**[6] **न पिबन्ति** इति अर्थः. **मातरो गावः** सर्वेषामेव [7]तद्दुग्धोपजीवनाद् **न दुह्यन्ति** दोहनं न कारयन्ति इति अर्थः. **अश्रूणि मुखे** यासाम्. **ऋषभाः** पुष्टाः बलीवर्दाः. **दैवतानि** प्रतिमाः **स्विद्यन्ति** स्वेदयुक्तानि[8] भवन्ति, **उच्चलन्ति** देशान्तरे गच्छन्ति. **भ्रष्टा श्रीः** येषां, **निर्गतः आनन्दो** येभ्यः. **अघं** दुःखजनकं पापं **नः** अस्मभ्यम् ॥१९-२०॥

---

१. धूम्रयुक्ता इति क. २. पांसुवृष्ट्येति घ. ३. ज्वालिते इति ग.

४. एवेति क-ख-ग-घ. ५. नर्दन्तीति क्वचित्पाठः. ६. स्तनमिति नास्ति क-ख-ग.

७. दुग्धोपजीवनादिति क-ग-घ. ८. स्वेदयुक्तानीवेति ख.

एतेषां हेतुं सम्भावयति.

**मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः ॥**
**अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा ॥२१॥**

**मन्ये** इति. **महोत्पातैः** हेतुभिः कृत्वा भूः (**हतसौभगा, भगवतः!**) **पदैः हीना** इति **मन्ये. न** विद्यते **अन्यपुरुषेषु श्रीः** ध्वज-वज्रादिरूपा येषाम्. एवम् अन्वय-व्यतिरेकाभ्यां सामीचीन्यं सर्वं भगवदन्वयात्, सर्वमेव अनिष्टं तत्सान्निध्याभावाद् इति निरूपितम् ॥२१॥

सूचकानां शीघ्रफलत्वम् आह.

**॥ सूतः उवाच ॥**

**इति चिन्तयतस्तस्य दृष्टारिष्टेन चेतसा ॥**
**राज्ञः प्रत्यागमद् ब्रह्मन् यदुपुर्याः कपिध्वजः ॥२२॥**
**तं पादयोर्निपतितम् अयथापूर्वम् आतुरम् ॥**
**अधोवदनम् अब्बिन्दून् मुञ्चन्तं नयनाब्जयोः ॥२३॥**
**विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ॥**
**पृच्छति स्म सुहृन्मध्ये संस्मरन् नारदेरितम् ॥२४॥**

**इति चिन्तयतः** इति. **दृष्टम्** आलोचनेन **अरिष्टं** येन तादृश**चेतसा**[१] **राज्ञः** सतः. **यदुपुर्याः** द्वारकायाः. **कपिध्वज** इति शीघ्रागमनं[२] सूचितम्. (**प्रत्यागमद्!**) प्रतिकूलतया आगमनम्. आगत्य (**नि!**) वचनादिकम् अनुक्त्वैव **पादयोः पतितम्**. सर्वदा यथा आयाति न तथा इति **अयथापूर्वम्**. **आतुरं विच्छायं** कृशम्. दुःखाविष्काराभावेऽपि बहुकालाभ्यासात् स्वत एव (**नयनाब्जयोः अब्बिन्दून् मुञ्चन्तं!**) अब्बिन्दवो नेत्रकमलाभ्यां पतन्ति. 'कमल'पदं जलावरणसूचकम्. **विगता च्छाया** कान्तिः यस्य. एतादृशेन सह सम्भाषणस्य अनुचितत्वेऽपि अनुजत्वात् तथा. **नृपत्वाद्** बहुनिमित्तज्ञानं, तेन न[३] दर्शनमात्रेण भाव्यर्थनिश्चयज्ञानम् इति **पृच्छति. सुहृदां मध्ये** एकान्ततुल्ये. (**नारदेरितं संस्मरन्!**) दृष्ट-श्रुताभ्याम्

---

१. तादृशचेतस इति षष्ठी ख. २. शीघ्रगमनमिति घ. ३. नेति नास्ति क-ग-घ-ङ.

अनिष्टशङ्की[१]. अनेन अर्जुनतुल्यो अयमपि इति उक्तं भवति. **स्म** इति प्रसिद्धे. अनेन सर्वजनीनं तस्य भगवत्परत्वम् इति उक्तम् ॥२२-२४॥

**॥ युधिष्ठिरः उवाच ॥**

**कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते ॥**
**मधुभोज-दशार्हार्ह-सात्त्वतान्धक-वृष्णयः ॥२५॥**

**आनर्तपुरी** द्वारका. ये पूर्वं रक्षकत्वेन षड्विधा उक्ताः ते सुखिनः **कच्चित् ?** ते चेत् सुखिनः तदा मूलस्वास्थ्यं स्वयमेव ज्ञातं भविष्यति इति प्रश्नः ॥२५॥

तान् सामान्यतः पृष्ट्वा विशेषेण पृच्छति.

**शूरो मातामहः कच्चित् स्वस्त्यास्ते वाथ मारिष ॥**
**मातुलः सानुजः कच्चित् कुशल्यानकदुन्दुभिः ॥२६॥**
**सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः ॥**
**आसते सस्नुषाः क्षेमं देवकीप्रमुखाश्च ताः ॥२७॥**
**कच्चिद् राजाऽऽहुको जीवत्यसत्पुत्रोऽस्य चानुजः ॥**
**हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः ॥२८॥**
**आसते कुशलं कच्चिद् ये च शत्रुजिदादयः ॥**
**कच्चिदास्ते सुखं रामो भगवान् सात्त्वतां प्रभुः ॥२९॥**
**प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः ॥**
**गम्भीररयोऽनिरुद्धो वर्धते भगवानुत ॥३०॥**
**सुषेणश्चारुदेष्णश्च साम्बो जाम्बवतीसुतः ॥**
**अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः ॥३१॥**
**तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः ॥**

---

लेखः

**कच्चिद्** इत्यत्र. **ये पूर्वम्** इति. एकादशाध्याये "मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः. आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव" ( भाग.पुरा. १।११।११ ) इत्यत्र इति अर्थः ॥२५॥

---

१. अनुमानशङ्कीति ग-घ-ङ.

**सुनन्दनन्दशीर्षण्या ये　चान्ये सात्त्वतर्षभाः ॥३२॥**
**अपि स्वस्त्यासते सर्वे　रामकृष्णभुजाश्रयाः ॥**
**अपि स्मरन्ति कुशलमस्माकं बद्धसौहृदाः ॥३३॥**

**शूरः** इति. **मारिषः शूरः**, सम्बोधनं वा. **वा**शब्देन वृद्धत्वात् तदकौशलेऽपि न चिन्ता इति सूचितम्. अतएव पूर्ववैलक्षण्याय **अथ** अग्रिमाणां कुशलम् अपेक्ष्यतेएव. **आनकदुन्दुभिः** इति भाग्यवत्त्वं सूचितम्. **सहात्मजाः** इति समस्तं पदं, परं न सादेशः. **आहुकः** पितृनाम्ना निरूपितः उग्रसेनः. **असत् पुत्रो** यस्य, अविद्यमानपुत्रो वा. अतएव दुःखापनोदार्थं[१] राज्ये अधिकृतः. **हृदीकः ससुतः, अक्रूरो**ऽपि. **जयन्तादयो** भ्रातरः. सर्वे नवमे स्पष्टा भविष्यन्ति. **रामो** बलभद्रः. सर्वेषां सौख्यं[२] तन्मूलकम् इति ते त्रयो भिन्नतया स्वातन्त्र्येण निरूप्यन्ते— बलभद्रः **प्रद्युम्नो अनिरुद्धः** च **भगवान्** इति, **महारथः** इति, **भगवान्** इति च[३]. **सुषेणादयः** पुत्राः. **कार्ष्णिप्रवराः** कृष्णपुत्राः प्रवराः येषां ; प्रद्युम्नादिमित्राणि. **ऋषभादयः कार्ष्णिषु** वा **प्रवराः**. **शौरेः** भगवतः. **सुनन्द-नन्दौ शीर्षण्यौ** श्रेष्ठौ येषाम्[४]. भगवदीयत्वेन तेषां प्रश्नः इति अभिप्रायेण आह ते **अपि स्वस्ति आसते** इति. **राम**पदम् आवेशाभिप्रायेण प्रतीत्यभिप्रायेण वा. यथा तेषां कुशलम् अस्माभिः स्मर्यते तथा ते **अपि अस्मत् कुशलं स्मरन्ति** इति सम्भावना. अनेन कुशलं सकार्यं पृष्टं, स्वयम् अतिकुशलाः परकुशलं स्मरन्ति इति ॥२६-३३॥

भगवतः कुशलप्रश्नस्य कर्तुम् अयुक्तत्वेऽपि बहूनां रक्षणीयत्वेन

---

लेखः

**शूरः** इत्यत्र. **मारिषः शूरः** इति. … . **परं न सादेशः** इति. "वा उपसर्जनस्य" (पाणि.सूत्र ६।३।८२) इत्यस्य वैकल्पिकत्वाद् इति भावः. **हृदीकः** इति. हृदीको भोजपुत्रः. तस्य सुताः देवबाहु-शतधनुः-कृतवर्माणः. **भ्रातरः** इति, भगवद्भ्रातरः इति अर्थः ॥२६-२८॥

---

१. दुःखापनोदनार्थम् इति भा.पाठे - सम्पा.　२. सौख्यं तु तन्मूलकमिति ख-भा.पाठयोः - सम्पा.

३. चकारो नास्ति ख.　४. येषान्ते इति घ.

उपस्थितत्वाद् – आराध्यानां ब्राह्मणानां कालवशेन उत्पथानां रक्षणवैयग्र्य-सम्भवाद्[१], भक्तानामपि तथात्वात् च, शत्रुवधार्थम् अन्यत्र गमनसम्भावनाद्, बहिर्मुखानां यादवानां परस्परं कलहसम्भावनात् च – भगवत्त्वेऽपि[२] प्रकारविशेषं पृच्छति **भगवानपि** इति.

**भगवानपि गोविन्दो ब्रह्मण्यो भक्तवत्सलः ।।**
**कच्चित् पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः ।।३४।।**

**गोविन्दः** अस्मदादीनाम् इन्द्रः **ब्रह्मण्यः** ब्राह्मणहितः **भक्तेषु वत्सलः पुरे** द्वारकायां **सुधर्मायां** सभायां **सुहृद्वृतः सुखम् आस्ते** इति. सुहृदां सुखं कुर्वन् आस्ते इति अर्थः, स्यमन्तक-प्रसङ्गवद् असुखसम्भावनात् ।।३४।।

किम् अनेन प्रश्नेन इत्यतः आह.

---

प्रकाशः

**भगवानपि** इत्यत्र. **अयुक्तत्वेऽपि** इति, भगवत्त्वादेव अयुक्तत्वेऽपि. **बहूनाम्** इति अस्मादृशाम् अन्यदेशवासिनाम्. **आराध्यानाम्** इत्यादिना उक्तहेतुद्वयेन **अन्यत्र गमनसम्भवात् पुरे आस्ते** इति, **बहिर्मुखे**त्यादिहेतोः **सुधर्मायाम् आस्ते** इति, **भक्तानामपि कालवशेन तथात्वात् च सुहृद्वृत** इति **प्रकारविशेषं पृच्छति** इति अर्थः. **सुखपद**प्रयोजनम् आहुः **स्यमन्तके**त्यादि ।।३४।।

लेखः

**भगवानपि** इत्यत्र. ननु भगवतः असुखसम्भावनैव नास्तीति तत्प्रश्नः अनुपपन्नः इत्यतः आहुः **स्यमन्तक** इति. तथाच तत्प्रसङ्गे भगवतो लोकदर्शनात् तथा जातम् इति सम्भावनया प्रश्नः इति अर्थः ।।३४।।

**मङ्गलाय च** इत्यत्र. आभासे **किमनेन** इति. असुखसम्भावनया लोकसजातीयता-ज्ञापनेन वक्तुः हीनत्वापादकत्वात् किम् अनेन इति अर्थः. **आह** इति. इति आशङ्कासमाधानाय भगवतो मूलत्वादिकथनेन तदिच्छैव सर्वत्र निमित्तम् इति आह इति अर्थः. व्याख्याने **निविष्ट** इति. स्वेन

---

१. सम्भावनादिति ख.	२. भक्तानामपि तथात्वाच्च भगवत्त्वेऽपीत्यादि ग.

**मङ्गलाय च लोकानां क्षेमाय च भवाय च ॥**
**आस्ते यदुकुलाम्भोधावाद्योऽनन्तसखः पुमान् ॥३५॥**

**मङ्गलाय**[१] **च** इति. भगवतो यद् द्वारकायां निवसनं तत् ( **लोकानां!** ) सर्वप्राणिनां, विशेषतो द्वारकावासिनां **मङ्गलाय ( क्षेमाय! )** निविष्टपदरक्षणाय **च ( भवाय! )** आधिक्याय **च.** ननु यदि तेषां भाग्यं मङ्गलजनकं न भवेत् तदा किं भगवत्स्थित्या? तत्र आह[२] **आद्यः** इति, मूलकारणभूतः इति अर्थः. "कालं कर्म स्वभावं च" (भाग.पुरा. २।५।२१) इति वाक्यात् सृष्टिसमये भगवता कार्यार्थं परिगृहीताः कालादयः. ततो जीवान् सृष्ट्वा[३] तेभ्यो अदृष्टरूपं कर्म विभक्तम्, अतः ते तादृशाएव. अथवा यथापूर्वं विभक्ताः इदानीमपि स्वेच्छया विभज्यन्ते, तस्यैव विभाजकत्वात्. ननु कालेन यथास्थानस्थिताः सर्वे अपकृष्यन्ते, तद् भगवता कथं क्षेमः? तत्र आह **अनन्तसखः** इति. अनन्तः कालः, तस्य सखा. अनेन भगवदभिप्रेतस्य स्थानं न अपकर्षति इति उक्तम्. ननु प्राकृतस्य उद्भवः पूर्वमेव सिद्धो

---

प्रकाशः

**मङ्गलाय** इत्यत्र. **क्षेमाय भवाय** इत्यत्र साधारणानाम् अधिकाराभावं हृदि कृत्वा आहुः **निविष्टपदरक्षणाय** इति. ये द्वारकादौ निविष्टाः तेषां स्थानरक्षार्थम् अधिकपद-प्राप्त्यर्थं च इति अर्थः. **तादृशाः** इति. मङ्गलजनकादृष्टवन्तएव सृष्टाः सन्ति इति अर्थः. **अथवा** इत्यादि. तथाच अदृष्टाभावेऽपि तत्सम्पादनसामर्थ्याद् न दोषः इति अर्थः.

लेखः

अधिष्ठितं यत् पदं द्वारकात्मकं तद्रक्षणाय इति अर्थः. मूलकारणत्वद्योत्यम् अर्थम् आहुः **कालं कर्म** इत्यादि. इदं द्वितीयस्कन्धे पञ्चमाध्याये अस्ति. **अतस्ते तादृशाएव** इति. यतो भगवदिच्छैव तथा अतः स्यमन्तकादिप्रसङ्गे अक्रूरादयो जीवाः विरुद्धाचरणाएव इति अर्थः. एवञ्च स्वेच्छानुकूलतया न किञ्चित् तत्र बाधकम् इति भावः. **पूर्वम्** इति, अवतारणात् पूर्वमेव

---

१. मङ्गलायेति नास्ति ख-घ. २. तत्राहेति नास्ति ख. ३. दृष्ट्वेति घ-ङ.

यथाप्रकृतिपरिणामं, कथम् इदानीम्[१] उद्भवो भवेत्? तत्र आह **पुमान्** इति. पुरुषाधिष्ठानेनैव नित्या प्रकृतिः तथा परिणमति. तस्य इदानीमपि विद्यमानत्वाद् उद्भवेन परिणता भविष्यति इति अर्थः. अतो भगवत्स्थितेः एतदर्थत्वात् कार्यं कुर्वन् तिष्ठति न वा इति प्रश्नः. "न ह्यस्य कर्हिचिद्" (भाग.पुरा. १।९।१६) इति वाक्याद् द्वितीयः पक्षः, स्थितौ क्लेशाभावश्च ध्वनिना[२] सूचितः. **अम्भोधौ अनन्तसखः** इति शेषशायी समुद्रे तिष्ठति इति अर्थः ॥३५॥

एतस्मिन् अर्थे निदर्शनम् आह पुरुषाणां स्त्रीणाञ्च श्लोकद्वयेन क्रमेण.

**यद्बाहुदण्डगुप्तायां स्वपुर्यां यदवोऽर्चिताः ॥**
**क्रीडन्ति परमानन्दं महापौरुषिका इव ॥३६॥**

द्वारकायां सर्वे **यादवाः स्वर्चिताएव** तिष्ठन्ति, चोरदृष्टि-शत्रुभयाभावात्. देशभयाभावात् **स्वेति**. कार्यान्तराभावात् **क्रीडन्ति** भोजन-शयनादिकमपि क्रीडात्वेन[३] कुर्वन्ति **परमानन्दो** यथा भवति तथा. यथा परस्परं क्रीडाकर्तॄणां स्वरूपं क्रीडायां विनियुज्यते तथा परमानन्दं परस्परार्थे विनियुञ्जते इति अर्थः. भगवति आत्मीयत्वस्य दृढत्वाद् भगवत्कृतम् आत्मकृतमेव मन्यमानाः (**महापौरुषिकाः!**) महापौरुषयुक्ताइव निःशङ्काः

प्रकाशः

**यथाप्रकृतिपरिणामम्** इति एकं पदं **सिद्धः** इति क्रियायाः विशेषणम्. **ध्वनिना** इति काक्वा[४] ॥३५॥

लेखः

सृष्टिसमये इति अर्थः. **द्वितीयः पक्षः स्थितौ** इति. भगवान् न तिष्ठति इति पक्षस्थितौ इति अर्थः. **ध्वनितार्थः** इति, **अनन्त**पद-ध्वनितार्थः इति अर्थः. तद् व्युत्पादयन्ति **अम्भोधौ** इति. तथाच तदानीमपि स्वरूपानन्दे रमयति इति भावः ॥३५॥

१. कथमिदानीमुद्भवेदिति क. २. ध्वनितार्थः इति पाठः लेखे - सम्पा.

३. क्रीडनमिति घ-ङ. ४. काव्याङ्गप्रधानवाक्येन वा इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

क्रीडन्ति इति अर्थः ॥३६॥

स्त्रीणामपि तथात्वम् आह.

**यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ॥**
**निर्जित्य सङ्ख्ये त्रिदशांस्तदाशिषो हरन्ति वज्रायुधवल्लभोचिताः ॥३७॥**

**यत्पादेति. पादशुश्रूषणमेव मुख्यं कर्म,** अन्यत्तु लौकिकम्. लौकिकापेक्षया विहितस्यैव मुख्यतया करणात् स्वर्गे भोक्तव्ये धर्मपरित्यागेन भोगो मा भवतु इति विषयबलाद् अत्रैव स्वर्गम् आनयन्ति. **सत्या** सत्यभामा. तस्याः प्रियत्वप्रसिद्धेः तद्भावमेव अन्याअपि शिक्षन्ति इति **सत्यादय** इति उक्तम्. **द्व्यष्टानां सहस्राणां** समाहारः. स्त्रीत्वविवक्षाभावात्[१] न ङीप्. **त्रिदशान्** स्वयं **( सङ्ख्ये! ) निर्जित्य** इति स्वेच्छया गरुडप्रेरणया अवगम्यते. स्त्रीणां स्त्रीकर्तृकभोगः स्वर्गेएव वाञ्छितइति **वज्रायुधवल्लभोचिता** इति आह. **वज्रायुधस्य** इन्द्रस्य **वल्लभा** इन्द्राणी, तस्याः **उचितं** पारिजातादि **( हरन्ति! )** ॥३७॥

एवम् ऐहिकामुष्मिके एकत्र भुञ्जते इति उक्तम्. पुरुषाणान्तु आमुष्मिकस्य अनुक्तत्वात् सत्यादिवद् एकीकृत्य भोगासम्भवाद् आमुष्मिकं पृथग् आह.

**यद्बाहुदण्डाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः ॥**
**अधिक्रमन्त्यङ्घ्रिभिराहृतां बलात् सभां सुधर्मां सुरसत्तमोचिताम् ॥३८॥**

**यद्बाहुदण्डाभ्युदयानुजीविनः** इति. अन्यः स्वर्गतुल्यो विषयः

---

प्रकाशः

**यत्पादशुश्रूषणेत्यत्र. अन्यत्तु** इति भोगात्मकन्तु. **विषयबलाद्** इति शुश्रूषणविषयस्य भगवतो बलात् ॥३७॥

लेखः

**यत्पाद** इत्यत्र. **धर्मपरित्यागेन** इति, पादशुश्रूषणरूप-धर्मपरित्यागेन इति अर्थः. ननु स्त्रीणां जयकर्तृत्वं कथं सम्भवति, अयुध्यमानत्वात्? अतः आहुः **स्वेच्छया** इति, सत्यभामेच्छया इति अर्थः. तयैव गरुडो वा प्रेरितः इति ॥३७॥

---

१. स्त्रीविवक्षाभावान्नेति क-ग-घ-ङ.

स्वतःसिद्धः, सभा परं न्यूना इति तद्भोगम् आह. **बाहुदण्डयोः अभ्युदयः** सर्वोत्कर्षः, तम् **अनु जीवनं** यस्य[१] येषाम्. (**यदुप्रवीराः अकुतोभयाः**!) न यदुश्रेष्ठत्वेन निर्भयत्वं किन्तु सेवकत्वेन. स्वर्गे हि देवाः सकृत् स्नाताः तस्यां सभायां सकृद् उपविशन्ति पादौ अस्पर्शयित्वा. तादृशीं **सभां मुहुः अङ्घ्रिभिः आक्रमन्ति,** तत्रापि **बलात्**. न हि लौकिकक्रियया सा लभ्या, शताश्वमेधकर्तृलभ्यत्वात्. तद् आह **सुरसत्तमोचिताम्** इति. **सुरसत्तमाः** इन्द्रादयः ॥३८॥

एवं सर्वान् पृष्ट्वा अर्जुनगत-वैक्लव्यहेतून्[२] उद्भावयति.

**कच्चित् तेऽनामयं तात भ्रष्टतेजा विभासि मे ॥**
**अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः ॥३९॥**

**कच्चित् ते अनामयम्** इति. **अनामयम्** आरोग्यं **कच्चित्?** रोगेणापि एवं भवति. किञ्च (**भ्रष्टतेजा**!) तेजोऽपि तव गतम् इति लक्ष्यते. तत्र मम दृष्टिरेव प्रमाणम् इति आह (**मे**!) **विभासि** इति. तेजोगमनम् अन्तःशोकात् पापात् च भवति. तत्र प्रथमम् अन्तःशोकहेतून् गणयति **अलब्धमान** इति, श्वशुरगृहे मानाभावो अन्तःतापहेतुः[३], **अवज्ञा** च सुतराम्. अवज्ञायां हेतुः **चिरोषित** इति, श्वशुरगृहे बहुकालवासे अवज्ञा भवति. **अवज्ञातः किं वा** इति सम्बन्धः. अथवा चिरवास एव शोकहेतुः ॥३९॥

एवम् अन्तःकरण-शरीरकृत-दोषेण तापः उपपादितः. इन्द्रियकृतदोषम् आह.

**कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमङ्गलैः ॥**
**न दत्तं युक्तमर्थिभ्य आशया यत् प्रतिश्रुतम् ॥४०॥**

**कच्चित् न अभिहत** इति. **अभावैः** स्नेहशून्यैः रूक्षैः पुरुषैः[४]. **अमङ्गलैः** (**शब्दादिभिः**!) वा गालिदानैः. **आदिशब्देन** पञ्चापि गृहीताः.

---

१. यस्येति पदं बाहुदण्डयोरित्यतः प्राग्युज्यमानमपि लेखकप्रमादादिह पतितं प्रतिभाति.

२. हेतुमिति घ. ३. अन्तस्तापे हेतुरिति क-घ. ४. पुरुषैरिति नास्ति ख-ग-घ.

इदानीम् अधर्म्याणि[1] सम्भावयति **न दत्तम्** इति. **आशया यत् प्रतिश्रुतं** – चतुर्थ्यर्थे "बहुलं छन्दसि" (पाणि.सूत्र ७।३।९७) इति – "आशायै दास्यामि" इति प्रतिज्ञातं, तदाशाभङ्गहेतुत्वाद् (**न दत्तं!**) अदानं "सर्वम् .. इष्टं दत्तं .. वृङ्क्ते" (आप.धर्मसूत्र १।१।३।२५-२६) इति श्रुतेः तेजोहर्तृ भवति ॥४०॥

दानं शरणागतरक्षा च क्षत्रियस्य मुख्यम्. शरणागतानामपि मध्ये त्वम् एतानि किं न परिपालितवान् असि इति आह.

**कच्चित् त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियम् ॥**
**शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ॥४१॥**

**कच्चिद्** इति. **ब्राह्मणः** सर्वावस्थासु परिपाल्यः **स्त्रियः** च, अन्ये **वृद्ध-बाल-रोगिणः,** अन्यदपि **शरणोपसृतं सत्त्वं** हरिणादि **न अत्याक्षीः** न त्याजितवान् असि. अन्यैः पीडायां समुपस्थितायां ततः (**शरणप्रदः!**) त्याजनं न कृतम् इति अर्थः ॥४१॥

धर्मसूक्ष्माभावम् आह.

**कच्चित् त्वं नाऽगमोऽगम्यां गम्यां वाऽसत्कृतां स्त्रियम् ॥**
**पराजितो वाऽथ भवान् नोत्तमैर्नासमैः पथि ॥४२॥**

**त्वं ना** पुरुषो भूत्वा **अगम्याम् (स्त्रियम्!) अगमः** कामवशेन अगम्यागमनं कृतम्. **गम्यां वा असत्कृतां** अपमानं कृत्वा, अगम्याम् अगम इति. शत्रुपराजयोऽपि एतद्धेतुः इति तम् आह **पराजितः** इति. अस्य पूर्वोक्तानुभयरूपत्वाद् **अथ** इति. **नोत्तमैः** (समैः!) नसमासः.

---

प्रकाशः

**पराजितेत्यत्र. नसमासः** इति. 'नैकधा' इत्यादिवत् 'न'शब्देन सह "सुप् सुपा" (पाणि.सूत्र २।१।४) इति समासः इति अर्थः ॥४२॥

लेखः

**कच्चित् त्वं नाऽगम** इत्यत्र. **एतद्धेतुः** इति, तेजोहानिहेतुः इति अर्थः. **नसमासः** इति. न उत्तमा इति अनुत्तमा इति 'नैकधा' इत्यादिवत्

---

१. अधर्माणीति क-ग-घ.

**नासमैः** अधमैः. समैः वा अधमैः वा (**भवान् पथि!**) पराजितः इति अर्थः ॥४२॥

मिष्टान्नादिकं याचकेभ्यो बालादिभ्यो अदत्वा भोजनेऽपि एवं भवति इति लौकिकम् आशङ्कते.

**अपि स्वित् पर्यभुङ्क्थास्त्वं सम्भोज्यान् वृद्धबालकान् ॥**
**जुगुप्सितं कर्म किञ्चित् कृतवांश्च यदक्षमम् ॥४३॥**

**अपि स्विद्** इति. **परिः** वर्जनार्थः ; **सम्भोज्यान् वृद्ध-बालकान्** परित्यज्य किम् **अभुङ्क्थाः त्वम्?** सम्यग्भोज्याः हि ते. **भोज्याः वृद्ध-बालकान्** इति पाठे **भोज्याः** स्त्रियः. **सम्भोज्य**[१] वा, "अथादावुत्तरे[२] विभागे" (तैत्ति.प्रातिशाख्य ३।१) इति न्यायेन ह्रस्वः. **आवृद्धबालकान्**

प्रकाशः

**अपि स्वित् पर्यभुङ्क्था** इत्यत्र. **सम्भोज्ये**ति ह्रस्वान्तपाठे प्रयोगसम्भवप्रकारम् आहुः **"अथादावुत्तरे विभागे"** इति. इदं लक्षणग्रन्थस्य प्रातिशाख्यस्य सूत्रम्. तथाच "अथादावुत्तरे विभागे ह्रस्वं व्यञ्जनपरः" इति सूत्रेण यथा 'देवयते शीकयते' इत्येवमादेः पदस्य "देवाय ते यजमानाय शर्म, शीकाय ते स्वाहा" इत्येवं संहिताध्ययनदशायां दीर्घो बोध्यते. तेन न्यायेन अत्रापि पदविभागे ह्रस्वः, संहितायामेव दीर्घः इति अर्थः. सूत्रार्थस्तु – 'अथे'ति अधिकारे. 'आदौ उत्तरे' पदादौ पदान्ते च संहितायां वर्तमानो दीर्घो यदि 'व्यञ्जनपरः' स्यात् तदा 'विभागे' पदपाठे 'ह्रस्वम्' आपद्यते – इति त्रिभाष्यरत्ने व्याख्यातः. तत्र स्वारसिकम् एकपद्यम्, अत्र तु समासकृतम् इत्यतो अत्र **न्याय**पदम् उक्तं ज्ञेयम् ॥४३॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे चतुर्दशाध्यायविवरणम् ॥

लेखः

'न'शब्देन समासः इति अर्थः. तेन अनुत्तमः इति न आशङ्कनीयम् इति भावः. एवञ्च नोत्तमाः स्वसमाः इति अर्थः ॥४२॥

॥ इति श्रीसुबोधिन्यां चतुर्दशोध्यायः ॥

१. सम्भोज्या वा इति क-ङ. सम्भोज्या इति घ. २. अथा तावुत्तरे विभाग इति ग.

वा. अन्यदपि **जुगुप्सितं** पश्चाद् जुगुप्साजनकम् **अक्षमं च** पश्चात् सोढुम् अशक्यं च ॥४३॥

मुख्यं कारणम् उत्प्रेक्षते.

**कच्चित् प्रेष्ठतमेनाऽथ हृदयेनात्मबन्धुना ॥**
**शून्योऽस्मि रहितोऽनित्यं मन्यसे तेन्यथा न रुक् ॥४४॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे चतुर्दशोध्यायः ॥

**कच्चिद्** इति. **हृदयेन** हृद् अयते प्रविशति इति हृदयो अन्तर्यामी. **अथ** इति पूर्वव्यावृत्त्यर्थः. **आत्मत्वेन बन्धुः**[१]. **रहितः** तादृशेन विरहितः **शून्यो असि. अनित्यं मन्यसे** आत्मनि गते देहास्थितेः[२] नित्य ( / नियत ! ) -त्वात्. अतिशोके[३] अयमेव हेतुः. **अन्यथा ते न रुक्.** अन्यस्य अविवेकिनो यादृशेऽपि चिन्ता भवति, तव तु अयमेव हेतुः इति अर्थः ॥४४॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे चतुर्दशो अध्यायः ॥

## ॥ इति चतुर्दशोऽध्यायः ॥

---

१. बन्धु इत्यविसर्गः पाठः क-घ.    २. देहादिस्थितेर्नित्यत्वादिति क-ग-घ-ङ.

३. अतिशोकेऽप्ययमेवेति घ.

# ॥ अथ पञ्चदशोऽध्यायः ॥

एवं चतुर्दशे हेतुं सम्भाव्याथ[१] विनिश्चयात् ॥
कृतकार्यः शास्त्ररीत्या मुक्तोऽभूदिति वर्ण्यते ॥(१)॥
भार्याभ्रातृभिरत्रैव सहितो मुक्तिमेयिवान् ॥
पञ्चदशे महाराजः[२] कृष्णभक्त्येति रूप्यते ॥(२)॥
प्रेमोपकारज्ञानानि जिष्णौ राजार्थमाह हि ॥
एनं[३] दृष्ट्वैव राजाऽपि तथैवाभूद्[४] यतः परः ॥(३)॥

प्रकाशः

अथ पञ्चदशाध्यायं विवरिषवः सङ्गतेः प्रागेव उक्तत्वात् तां स्मारयन्तः प्रस्तुतस्य अर्थम् आहुः **एवम्** इत्यादि. **विनिश्चयाद्** इति ल्यब्लोपे पञ्चमी. शास्त्ररीतावपि विशेषम् आहुः **भार्ये**त्यादि. तथाच यथा "ये देवा यज्ञहनः" (तैत्ति.संहि. ३।५।४।३) इत्यादीन् मन्त्रान् उक्त्वा "इत्याह इमानेव लोकांस्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेति" (तत्रैव) इति तत्पाठेन सपरिकरस्य यजमानस्य सुवर्गो लोकः श्राव्यते तथा **अत्र भक्त्या इति निरूप्यते** इति अर्थः. अवान्तरवाक्य-तात्पर्यम् आहुः **प्रेमे**त्यादि. **आह** इति सूत आह. **परः** इति उत्कृष्टो भक्तः (१-३).

लेखः

। श्रीहरिः जयतितराम् । एककार्यत्वमेव अध्यायसङ्गतिः इति आशयेन आहुः **एवम्** इत्यादि. **प्रेम** इति भगवति प्रेम. तच्च "हे पार्थ हेऽर्जुन सखे कुरुनन्दन" (श्लो. १८) इत्यादिना निरूप्यते. "यत्संश्रयाद्" (श्लो. ७) इत्यादिना **उपकारः**. एवमादि च भगवन्माहात्म्य**ज्ञानम्** अपि निरूपितं ज्ञेयम्. यद्यपि न एवं विभागशः उच्यते, मुख्यतया उपकारस्यैव वक्ष्यमाणत्वात्, तथापि अंशतः तयोरपि निरूपणम् इति ज्ञेयम्. **तथैव** इति,

१. अर्थविनिश्चयादिति ख. २. महाराजकृष्णपक्षे निरूप्यत इति ख. महाराजकृष्णभक्तिर्निरूप्यत इति घ. ३. एवमिति ग-घ. ४. तथा वाऽभूदिति क-ख-ग-घ.

प्रथमम् अर्जुनस्य प्रेमौत्कण्ठ्यम् आह **एवम्** इति त्रिभिः.

**॥ सूतः उवाच ॥**

**एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥**
**नानाशङ्कास्पदं रूपं कृष्णविश्लेषकर्शितः ॥१॥**
**शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः ॥**
**विभुं तमेवानुध्यायन्नाशक्नोत् प्रतिभाषितुम् ॥२॥**

**एवं कृष्णो** अर्जुनो **नानाशङ्कास्पदं रूपं विकल्पितोऽपि न अशक्नोद्** इति सम्बन्धः. **कृष्णस्य** भगवतः **सखा** सखिस्मरणेनैव व्याकुलः इति. एतद्द्वारा वा भगवान् एतान् उपसंहर्तुम् आगतइति **कृष्ण**पदप्रयोगः. अतएव **कृष्णसखः**. अन्यथा ततएव गमनम् उचितं स्यात्. "अर्जुनेनाविताः सर्वे" (भाग.पुरा. ११।३०।४८) इति भगवद्वाक्येऽपि ततएव गमनम्

---

प्रकाशः

**एवं कृष्णसखः** इत्यत्र. भगवतो जनार्दनत्वेन कालरूपत्वेन च मुक्त्यवसरे देहत्यागे च तस्य आवश्यकतया – "अलङ्कृताः कान्तसखा वरूथशः" (भाग.पुरा. ४।३।१२) इत्यादिषु बहुव्रीहौ 'सखि'शब्दस्य साहित्येऽपि प्रयोगात् तम् आश्रित्य – पक्षान्तरम् आहुः **एतद्द्वारा वा** इत्यादि. **कृष्णसखः** कृष्णसहितः इति अर्थः. एतस्य अर्थस्य अभिप्रेतत्वाय विपक्षे बाधकान् तर्कान् आहुः **अन्यथा** इत्यादि. यदि अर्जुने भगवत्साहित्यं न स्यात् तदा पूर्वोपदेशस्मरणस्य इदानीमिव तदानीमपि सम्भवात् **ततएव** वैराग्यादेरपि सिद्धेः तस्मादेव स्थानाद् महाप्रस्थान-**गमनम् उचितं स्यात्**! ननु "अर्जुनेनाविताः" इति भगवद्वाक्याद् वज्राद्यानयनाय आगमनमिति न अनेन साहित्यसिद्धिः इत्यतः आहुः **अर्जुने**त्यादि. उक्तवाक्ये इन्द्रप्रस्थस्य

लेखः

भगवद्विषयकचिन्ताकुलएव **अभूद्** इति अर्थः. अत्र हेतुः **यतः** इत्यादि. **परः** इति, मुख्यत्वे भगवता गृहीतः इति अर्थः (१-३).

**एवम्** इत्यत्र. **अर्जुनेनाऽविताः सर्वे** इति. "अर्जुनेनाविताः सर्वे इन्द्रप्रस्थं गमिष्यथ" इति सारथिं प्रति भगवद्वाक्यम् ॥१॥

उचितं स्यात्. ‘‘तावद्यूयमवेक्षध्वम्’’ (भाग.पुरा. १।१३।४९) इति नारदवाक्यं च सत्यं स्यात्, ‘‘कृष्णौ यदुकुरूद्वहौ’’ (भाग.पुरा. ४।१।५९) इति च. अवस्थाप्रकटनन्तु विश्वासार्थं भगवतैव लीला. अन्यथा भगवतः सावशेषकार्य-कर्तृत्वं स्याद्, अर्जुनस्य तेजःशोकः च अयुक्तः स्यात्. अतएव कृष्णएव अर्जुने समाविष्टः समागतइति युधिष्ठिरमुक्तिः उचिता. **नानाशङ्कानां** पूर्वोक्तानाम् **आस्पदं रूपं** प्रति**विकल्पितः**[१].

प्रकाशः

उक्तत्वाद् इन्द्रप्रस्थादेव तथा स्यात्, नतु गजाह्वयादपीति[२] तथा इति अर्थः. बाधकतर्कम् उक्त्वा साधकतर्कम् आहुः **तावदि**त्यादि. नारदेन हि ‘‘अवशेषं प्रतीक्षते’’ (भाग.पुरा. १।१३।४९) इति भगवत्कृतां प्रतीक्षाम् उक्त्वा एतेषां प्रतीक्षणम् उक्तम्. मौसलस्यैव अवशेषत्वाङ्गीकारे तस्य वृत्तत्वेन तद्वाक्यमपि अप्रमाणं स्याद् इति तदर्थं तथा इति अर्थः. युक्त्यन्तरम् आहुः **कृष्णौ** इति. अश्विनोरिव नर-नारायणयोरपि[३] साहित्यस्य नियतत्वात् तदपि **सत्यं स्याद्** इति अर्थः. ननु यदि सार्वदिकं साहित्यं तदा पराजयाद्यवस्था न स्युः इति न इदं युक्तम् इति शङ्कायाम् आहुः **अवस्थे**त्यादि. सर्वत्र भगवत्तेजसैव कार्यसिद्धिः, न अन्यथेति अर्जुनस्य **विश्वासार्थं भगवतैव लीला** सा कृता, यथा असुरमोहाद्यर्थम् अज्ञत्वादिकं स्वस्मिन् पूर्वं प्रकटीकृतं तथा इति अर्थः. अवस्थाप्रकटनस्य लीलात्वे विश्वासार्थत्वे च युक्तिम् आहुः **अन्यथा** इत्यादि. यदि एवम् अर्जुनावस्थां न प्रकटयेत् तदा तस्य अहङ्कारे मुक्त्यभावेन तथा स्याद् इति अर्थः. ननु मुक्तेः देवकार्यत्वात् तददानेऽपि न सावशेषकर्तृत्वम् इति शङ्कायाम् आहुः **अर्जुनस्य** इत्यादि. तदभावे मा अस्तु सावशेषकर्तृत्वं तथापि तस्य अहङ्कारसत्तायां **तेजःशोकः** तेजोविषयको यः शोकः स न **युक्तः स्याद्** अतो विश्वासार्थं सा लीला इति अर्थः. फलमपि गमकत्वेन अत्र आहुः **अतएव** इति. ‘‘एवं गृहेषु सक्तानाम्’’ (भाग.पुरा. १।१३।१७) इत्याद्युक्तं संसारावेशं प्राप्यापि

१. कल्पित इति घ-ङ. २. अपीति इति मुद्रितपाठे नास्ति. कि.पाठाद् गृहीतम् - सम्पा.

३. नरनारायणोः इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

**रूपमेव** अर्जुनः इति वा. **प्रतिभाषितुं न अशक्नोद्** इति वा सम्बन्धः. **कृष्णस्य** यो **विश्लेषः** विशेषेण श्लेषो वा तेन **कर्शितः** क्षीणः. अनुत्तरे दृष्टः उपायः उक्तः — **शोकेन शुष्यत्** शोषं प्राप्नुवत् **हृत्सरोजं वदनसरोजं** च यस्य. अतएव **हतप्रभः**, अन्तस्तापे बहिःकान्तेः नाशदर्शनात्. उत्तर-ध्यानयोः युगपद् उपस्थितावपि **तमेव ध्यायन् (प्रतिभाषितुम्!)** उत्तरं वक्तुं **न अशक्नोत्**. तत्र हेतुः **विभुम्** इति, उत्तरापेक्षया ध्यानविषयस्य समर्थत्वात् ॥१-२॥

शोक-सहकृतं ध्यानं जायतेइति शोकं दूरीकरोति इति आह.

**कृच्छ्रेण संस्तभ्य शुचः पाणिनाऽऽमृज्य नेत्रयोः ॥**
**परोक्षेण समुन्नद्ध-प्रणयौत्कण्ठ्यकातरः ॥३॥**

**कृच्छ्रेण** इति. शोकस्तु स्मरणहेतुकइति स्मरणे विद्यमाने शोकनिवृत्तिः[१] अशक्या तथापि तादृशधर्मविशिष्टं भगवन्तं तेभ्यो धर्मेभ्यः[२] पृथक्कृत्य पूर्वधर्मैः[३] सह संयोज्य शोकदूरीकरणात् **कृच्छ्रेण** इति उक्तम्. **शुचः** शोकाश्रूणि अभ्यन्तरात् समागच्छन्ति (चेत्!) तत्रैव **स्तम्भितानि, नेत्रयोः** समागतानि तु **पाणिना आमृज्य** आसमन्तात् मृष्ट्वा. एवं कृते पूर्वोक्तधर्मयोजनाद् गतकालसहितः 'परोक्ष'शब्दवाच्यो अर्जुनस्य अन्तःप्रविष्टः इति आह **परोक्षेण** इति. अक्षात् परः परोक्षः. स्वेच्छयैव पूर्वम् इन्द्रियगोचरोऽपि साम्प्रतम् इच्छायाः अभावात् परोक्षएव. तेन **समुन्नद्धः** आविष्टः सम्यगुन्नद्धः[४],

प्रकाशः

इति अर्थः. **रूपमेव अर्जुनः** इति, 'इन्द्रो देवता' इतिवद् अत्र[५] लिङ्गभेदेऽपि विशेषण-विशेष्यभावः ॥१॥

**कृच्छ्रेण** इत्यत्र. ननु भगवतो नित्यत्व-व्यापकत्वे अनुभवन्तम् अर्जुनं प्रति भगवतः परोक्षत्वाभावात् कथं तदुक्तिः इत्यतः आहुः **स्वेच्छया** इत्यादि. तथाच तदानीं तादृशेच्छया तथा इति अर्थः ॥३॥

१. शोकवृत्तिरशक्येति ख. शोकनिवृत्तिः शक्येति घ. २. परोक्षत्वादिभ्यः इति भा.पाठे पादटिप्पणी - सम्पा. ३. सख्यादिभिः इति भा.पाठे पादटिप्पणी - सम्पा. ४. सम्यङ्नद्धः इति मुद्रितपाठः. भा.पाठे तु एवम् - सम्पा. ५. अत्र इति मुद्रितपाठे नास्ति. कि.पाठाद् गृहीतम् - सम्पा.

अयोगोलकं वह्निनेव. अनेन अन्तः कथने[१] बलम् उक्तम्. भक्तिरपि पूर्वं[२] प्रविष्टा स्वकार्यं करोति इति आह **प्रणयौत्कण्ठ्यकातर** इति. **प्रणयेन** स्नेहेन यद् **औत्कण्ठ्यं**[३] उद्गतकण्ठता, कण्ठाभावः कण्ठमुद्रणम् इति यावत्, तेन **कातरः** "कदा वा वक्ष्यामि" इति आकुलः— भगवान् वदति[४] "वक्तव्यं", भक्तिः वदति "न वक्तव्यम्" इति ॥३॥

एवं सति भगवत्स्मरणस्य प्राबल्याद् – भक्तिहेतुक-भगवत्स्मरणेन भगवति पुष्टे तत्तेजसा कण्ठमुद्रणे अपगते उद्गतेन बाष्पेण कण्ठे गद्गदता[५] जाता, सा पूर्वं व्याख्याता, ततो भक्तिं दूरीकृत्य – भगवन्तमेव[६] उररीकृत्य पूर्वधर्मयोगात् तानि स्मरन् आह इति आह.

**सख्यं मैत्रीं सौहृदञ्च सारथ्यादिषु संस्मरन् ॥**
**नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥४॥**

**सख्यम्** इति. समानशील-व्यसनत्वं **सख्यं,** गुह्यगोपन-गुणप्रकटीकरणा-ऽऽपद्गताऽत्यागादि-धर्मवत्त्वं **मैत्री ; सारथ्यादिषु** भगवता द्वयं कृतम्. **सौहृदं च** सुहृदो भावः = सतामिव कृत्यं बन्धुकृत्यं वा, इदमपि प्रकटीकृतम्. **च**कारात् स्वामित्व-गुरुत्वे. **आदि**शब्देन पार्षदसेवन-दौत्य-वीरासन-अनुगमनादि[७]. असमासनिर्देशः पृथक्स्मरणार्थः. **इति** वक्ष्यमाणप्रकारं **गिरा**

---

लेखः

**सख्यम्** इत्यत्र आभासे. **एवं सति** इति, उभयोः विरोधे आपतिते सति इति अर्थः. **पूर्वम्** इति, इतः **पूर्वं** "कृच्छ्रेण संस्तभ्य शुचः" (श्लो. ३) इत्यादिना **व्याख्याता** इति अर्थः. एवञ्च अत्र **बाष्पगद्गदया गिरा** इत्यनेन पूर्वोक्तामेव गद्गदताम् अनूद्य मुख्यतया सख्यादि-स्मरणादिकमेव विधीयते, नतु गद्गदतापि इति भावः. व्याख्याने **समानशील** इत्यादि. श्रीधरैस्तु "सख्यं = हितैषितां, मैत्रीम् = उपकारिताम्" इति व्याख्यातं ; तद्

---

१. अन्तकथन इति ङ. २. पूर्वे इति घ. ३. यत्कण्ठ्यं उद्गतो कण्ठाभाव इति ख.

४. वर्तत इति घ. ५. उद्गदतेति घ. ६. भगवन्तमेवोररीकृत्येति नास्ति ग.

७. वीरासनानुगमनादीति समस्य पाठस्तु प्रतिभाति. उपलब्धेषु पुस्तकेषु तथा पाठादर्शनात्तु यथोपलम्भं मूले निवेशः. पार्षदसेवनदौत्यरीत्या सेवन अनुगमनादीति तु पाठः घ.

नतु अभिनयेन, शोके तस्यापि सम्भवात् ॥४॥

राज्ञा द्वयं पृष्टं— यादवानां कुशलम्, अर्जुनशोके हेतुश्च. तत्र सन्निहितत्वाद् उक्तन्यायेन भक्तेः तिरोहितत्वाच्च शोकहेतुमेव[1] आह **वञ्चितः** इत्यादि "भस्मन् हुतं कुहकराद्धमिवोप्तमूष्याम्" (श्लो. २१) इत्यन्तेन.

**॥ अर्जुनः उवाच ॥**

**वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा ॥**
**येन मेऽपहृतं तेजो देवविस्मापनं महत् ॥५॥**

भगवता वञ्चितस्य मम इयं गतिः इति अर्थः. वञ्चनप्रकारम् आह **येन** इति. ननु भगवान् परमकृपालुः कथं वञ्चयति? तत्र आह **हरिणा** इति. सर्वदुःखहर्ता यदि इदानीम् अर्जुनस्य तेजो न अपहरेत् तदा यादवानामिव कालवशाद् अस्यापि औद्धत्ये सर्वनाशः स्याद्, अस्य मुक्तिः न स्याद्, अतः सर्वरक्षार्थं **तेजो अपहृतम्** इति अर्थः. ननु तेजोऽपहरणनिमित्त-सान्निध्यं किमर्थं कृतम् इति आशङ्क्य आह **बन्धुरूपिणा** इति. तत्रापि भगवता वञ्चनं कृतम्. बन्धुरूपम्[2] अस्य अस्ति इति **बन्धुरूपी** मातुलपुत्रेव. ततो लौकिकव्यवहारेण निकटे गते तेजो अपहृतम् इति अर्थः. ननु स्थितेऽपि तेजसि देवानां रक्षकत्वात् किम् अनेन अनिष्टं भवेद् इत्यतः आह **देवविस्मापनम्** इति. देवान् विस्मापयति इति. ननु वामनस्य विद्यमानत्वात् न शङ्का इत्यतः आह **महद्** इति ॥५॥

---

लेखः

अत्रापि अनुकूलमेव इति ज्ञेयम्. **वीरासन** इति रात्रौ शयानस्य अर्जुनस्य रक्षार्थं खड्गहस्तेन स्थितिः. **तस्याऽपि सम्भवाद्** इति. शोकेन वचनाशक्तौ शिरः-करादि-चालनाभिनयेनापि स्वदुःखं निवेद्यते ; तत् प्रकृते नास्ति इति अर्थः ॥४॥

**वञ्चितः** इत्यत्र. **ननु वामनस्य** इति. स्थलगतरक्षायां तस्यैव विशेषनियुक्तत्वात् तेन रूपेण रक्षिष्यति इति अर्थः. **महदिति** इति. तथाच अतिमहत्त्वात् तत्तेजः कृष्णैकरक्ष्यम् इति भावः ॥५॥

---

१. शोकहेतूनिति क-ग-घ. २. बन्धरूपमिति ख.

ननु तेजसि गतेऽपि[१] मन्त्रादीनां विद्यमानत्वात् का तव चिन्ता इत्यतः आह.

**यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः ॥**
**उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ॥६॥**

**यस्य** इति. **यस्य** तेजसः **क्षणवियोगेन** सर्वोऽपि **लोको अप्रियदर्शनो** जातः. अप्रियं दर्शनं यस्य ; तेजसि गते जगद् द्रष्टुमपि न रोचते, किं मन्त्रादिना! क्षुदभावे अन्नमिव, कामाभावे कामिनीव. किञ्च तेजसा हीनः **एषः** मल्लक्षणः पुरुषः **उक्थेन** प्राणेन **रहितः**. प्राणकार्यं हि बलं, तद् गतमेव. तस्मिन् गते वृक्षादाविव प्राणो अकिञ्चित्करः इति अर्थः. किञ्च लोकप्रतीत्यापि अहं तथैव जातः. तद् आह **मृतकः प्रोच्यते यथा** इति. यथा मृतको लोकैः प्रोच्यते ''न अयम् अत्र स्थापनीयो ; ज्वालनीयो, दूरीकर्तव्यः'' इति तथा मल्लक्षणोऽपि जनो लौकैः उक्तः इति अर्थः. एवं तेजोऽपहरणेन मृतप्रायएव अहं जातः इति उक्तम् ॥६॥

ननु अस्य वञ्चकत्वं ज्ञातं चेत् कथं सख्यं, कथं वा शास्त्रतो भजनीयता इति आशङ्क्य वञ्चनम् अद्यैव कृतं न पूर्वम् इति आह **यत्संश्रयाद्** इत्यादि ''तेनाहमद्य मुषितः पुरुषेण भूम्ना'' (श्लो. १३) इत्यन्तेन.

गुणस्वभावभेदेन कृष्णेनोपकृता वयम् ॥
गुणैस्तु नवधा योगात्[२] स्वभावेन त्रिधा पुनः ॥(४)॥

---

प्रकाशः

**यत्संश्रयाद्** इत्यत्र. **गुण-स्वभावभेदेन** इति. **गुणाः** इतरेतरसङ्कीर्णाः सत्त्वादयः, **स्वभावो** अर्जुनस्य प्रकृतिः, ताभ्यां कृतो यो **भेदो** वैषम्यं

लेखः

**यत्संश्रयाद्** इत्यादिश्लोकसङ्ख्यातात्पर्यं कारिकाभिः वदन्ति **गुणस्वभाव** इत्यादि. **अवञ्चयद्** इति. साम्प्रतं भगवान् अवञ्चयद् इत्यर्थकं

---

१. अपिर्नास्ति क-ग-घ. २. योगानिति घ.

एवं द्वादशधा कृष्णः कृतार्थीकृत्य साम्प्रतम् ॥
अवञ्चयदिति ह्येकं तेनान्यस्य[1] च संक्षयः ॥(५)॥
एवं चतुर्दशश्लोकैः पाण्डवेषु हरेर्गुणाः ॥
तावद्भिरेव स्वज्ञातैः [2]चतुर्दशगतिं[3] ययुः ॥(६)॥

तत्र प्रथमं सत्त्वगुणभेदान् वक्तुं रजोमिश्र-सत्त्वेन भगवता यः उपकारः कृतो रजोमिश्रणाद्[4] दूरस्थेन – उपकारफलं च स्त्रीप्राप्तिः इति – तद् आह.

**यत्संश्रयाद् द्रुपदगेहमुपागतानां**
**राज्ञां स्वयंवरमुखे स्मरदुर्मदानाम् ॥**

प्रकाशः

तेन इति अर्थः. चतुर्दशस्य अर्थम् आहुः **तेन अन्यस्य च संक्षयः** इति. **अन्यस्य** इति तेजसः. **चतुर्दशगतिम्** इति चतुर्दशप्रकारम्.

लेखः

''सोऽहं नृपेन्द्र'' (श्लो. २०) इति वाक्यम् उक्तम्. ततः **तेनैव** वञ्चनेन **अन्यस्य** अर्जुनस्य **संक्षयः** सर्वनाशः उक्तः ''तद्वै धनुः'' (श्लो. २१) इति श्लोकेन इति अर्थः. **एवम्** इति. वञ्चनं क्षयप्रकारं च वाक्येन सह **चतुर्दशश्लोकैः पाण्डवेषु हरेः** चतुर्दश**गुणाः** उक्ताः इति शेषः. **तावद्भिः** चतुर्दशभिरेव **स्वज्ञातैः** भगवद्गुणैः पाण्डवाः **गतिं ययुः** इति सम्बन्धः. एवञ्च चतुर्दशाङ्गविज्ञाताभिरेव तेषां ज्ञाने कृतार्थता जाता इति भावः. अत्र ''यत्तेजसा'' (श्लो. ९) इति श्लोकः मध्ये विगीतइति उपदर्शितैव सङ्ख्या ज्ञेया (४-६).

**यत्संश्रयाद्** इत्यत्र आभासे. ननु भगवतोपि रजोमिश्रत्वे का युक्तिः अतः आहुः **दूरस्थेन** इति. द्रुपदसभायां दूरस्थितएव साक्षिमात्रेण उपकृतवान् इति तथा इति अर्थः. **स्त्रीप्राप्तिः** इति. विक्षेपसाधक-स्त्रीरूप-फलस्य दानात् च तन्मिश्रत्वम् इति भावः.

१. तेनैवाऽस्य चेति घ.  २. चतुर्दशे इति घ.  ३. गतिर्ययुरिति क.
४. रजोमिश्रितादिति क-ग-घ.

**तेजो हृतं खलु मयाभिहतश्च मत्स्यः**
**सज्जीकृतेन धनुषाऽधिगता च कृष्णा ॥७॥**

**यत्संश्रयाद्** इति. सम्यग् आश्रयाद् ''वयं कृष्णस्य'' इति ; न हि अतीन्द्रियाश्रय-व्यतिरेकेण अतीन्द्रियार्थज्ञानं भवति. तत्र हि एकचक्रनगरात् पलायिता ब्रह्मचारिरूपेण स्थिताः. तत्र द्रौपदीस्वयंवर-प्रस्तावे अदृश्य-राधावेधे प्रतिज्ञायाम् अस्मत्प्राप्त्यर्थमेव भगवता कृतायां सर्वे समाहूताः अस्मत्तेजसः प्राकट्यार्थं भगवतैव. ततः तत्कृपया त्रयं प्राप्तं— तेषां तेजो, लक्ष्यज्ञानं, द्रौपदी च. तस्याः **कृष्णा** इति नामतः स्वसाम्यं मन्यमानः सखिषु अस्मासु तां योजितवान्, अतीन्द्रियं च (लक्ष्यज्ञानं!), तेषाञ्च[१] तेजः स्वकीयमिति तदपि च. अतः तेनैव तेजो दत्तं प्रथमम्, अन्ते तेनैव अपहृतमिति तेजःसान्निध्ये[२] सर्वम्, अपहरणेन सर्वनाशः च. **स्वयंवरस्य मुखे** आरम्भे, तदा हि सर्वे मिलन्ति. ननु परब्रह्मरूपस्य[३] भगवतः समाश्रयणे कथं प्राणिनाम् अनिष्टकरणम्? तत्र[४] आह **स्मरदुर्मदानाम्** इति, स्मरेण[५] दुष्टो मदो येषाम्. अतः तेषां तेजोहरणे दोषरूप-मदहरणाद् उपकारएव तेषां कृतः. **खलु** इति राज्ञः सम्मतिः. **(मत्स्यः!) अभिहतः च** इति, ज्ञातो अभिहतश्च. **धनुषोऽ**पि सज्जीकरणं ज्ञातं, ततः उक्तम् **सज्जीकृतेन** इति. चकाराद् इन्द्रप्रस्थ-स्थानम्[६] (अधिगतम्!) ॥७॥

---

प्रकाशः

**तेजसा मध्ये सर्वम्** इति. ह्रियमाणेन तेजसा मन्मध्यस्थं सर्वमेव हृतम् इति अर्थः ॥७॥

लेखः

व्याख्याने **तेषां तेजः स्वकीयम्** इति. ''यद्यद् विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा'' (भग.गीता १०।४१) इति वाक्यात् तत्तेजो भगवदीयमेव, अतः ततः संहृत्य अर्जुनाय दत्तम् इति अर्थः. **ततः उक्तम्** इति. तज्ज्ञापनाय प्राक् तदसत्ताज्ञापनाय च्वीप्रयोगः उक्तः इति भावः ॥७॥

---

१. च नास्ति लेखे - सम्पा. २. तेजसा मध्ये सर्वमिति ङ-प्रकाशे - सम्पा. ३. स्वरूपस्येति घ. ङ. ४. तदाहेति क-ग-घ-ङ. ५. स्मरणे इति ख-ग. ६. इन्द्रप्रस्थानमिति घ.

सत्त्वमिश्रसत्त्वेन उपकारम् आह.

**यत्सन्निधावहमु खाण्डवमग्नयेऽदाम्**
**इन्द्रञ्च सामरगणं तरसा विजित्य ॥**
**लब्धा सभा मयकृताद्भुतशिल्पमाया**
**दिग्भ्योऽहरन्नृपतयो बलिमध्वरे ते ॥८॥**

**यत्सन्निधौ** इति, सत्त्वमिश्रणाद् भगवत्सान्निध्यम्. **उ** इति वितर्के, कुत्र अहं कुत्र तत् कर्म इति! **खाण्डवं** वनं सर्वौषधिसहितम् **अग्नये** याचकाय[१] (**अदाम्!**). **इन्द्रस्य** वनम् इति तं **विजित्य. सभा** राजसूयसभा, यत्र दुर्योधनमोहः. खाण्डववने स्थितस्य मयस्य प्राणरक्षणात्[२] स्वप्राणपरीवर्तन-रूपं[३] सर्वमायामयम् **अद्भुतशिल्प**रचनारूपं च कार्यं दत्तवान्. विश्वकर्मा शिल्पमेव जानाति, मयस्तु मायामपि. अत्रापि त्रयं प्राप्तं— दानसामर्थ्यं, गाण्डीवादि[४] इन्द्रादीनां तेजः, सभा[५] च. ततः तवापि उपकारो जातः इति आह **दिग्भ्यो अहरन्** इति. **ते अध्वरे** राजसूये **बलिं** पूजाम् उपढौकनरूपं[६] द्रव्यम्[७] ॥८॥

**यत्तेजसा** इति विगीतश्लोको मध्ये अधिकः, सोऽपि व्याख्यायते.

**यत्तेजसा नृपशिरोऽङ्घ्रिमहन्मखार्थम्**
**आर्योऽनुजस्तव गजायुतसत्त्ववीर्यः ॥**
**तेनाऽऽहृताः प्रमथनाथमखाय भूपा**
**यन्मोचितास्तदनयन् बलिमध्वरे ते ॥९॥**

**यस्य** भगवतः **तेजसा नृपशिरोऽङ्घ्रिं** नृपशिरस्सु अङ्घ्रिः यस्य जरासन्धस्य तव **मखार्थम् अहन् आर्यो** मम ज्येष्ठभ्राता भीमः **तव अनुजः गजायुतसत्त्ववीर्यः** अयुतनागधैर्यबलः. **तेन** च जरासन्धेन **आहृताः** बन्द्या गृहीताः **प्रमथनाथमखाय** महाभैरव-बलिनिमित्तं ये (**भूपाः!**) राजानः ते च मोचिताः. (**यत्!**) यस्मात् ते **मोचिताः** (**तत्!**) तस्मात्

१. पावकायेति घ-ङ. २. स्वप्राणेति क. ३. परीवर्त्तरूपमिति मुद्रितपाठः. क-ग-घ पाठेषु एवम् - सम्पा. ४. गाञ्जीवादि इति क-ग-ङ. ५. स्वभाव इति घ-ङ.
६. उपढौकनद्रव्यरूपमिति घ. ७. धनमिति ख.

**ते अध्वरे बलिम् अनयन्** आनीतवन्तः. अहमिव भीमोऽपि भगवत्सान्निध्यात् श्लोकोक्तं फलं प्राप्तवान् इति अर्थः ॥९॥

तमोमिश्रसत्त्वेन उपकारम् आह.

**पत्न्यास्तवाधिमखक्लृप्तमहाभिषेक-**
**श्लाघिष्ठचारुकबरं कितवैः सभायाम् ॥**
**स्पृष्टं विकीर्य पदयोः पतिताऽश्रुमुख्या**
**यैस्तत्स्त्रियोऽकृत हतेशविमुक्तकेशाः ॥१०॥**

**पत्न्याः तव** इति. रजसा जातस्य[१] तमसा नाशः उचितः तथापि सत्त्वेन तस्य अपकारः कर्तृस्त्रीषु दत्तः. तथा करणे हेतुः **अधिमखे**ति. राजसूयमध्ये महाभिषेकप्रस्तावे यजमानपत्न्योः[२] **क्लृप्तो** यो अयं **महाभिषेकः** तेन **श्लाघिष्ठं** सर्वसभासु स्तुत्यं **चारु** मनोहरं च – वेद-लोकयोः उत्कृष्टं – यत् **कबरं** तत् **कितवैः** वञ्चकैः दुर्द्यूते अपणितमपि पणत्वम् आरोप्य भीष्मादिस्थित**सभायां** पापप्राकट्याय **यैः स्पृष्टं तत्स्त्रियो हतेशविमुक्तकेशाः कृताः**. हतः **ईशो** यो भर्ता तेन मृतभर्त्र्या[३] **विमुक्ताः केशा** यासाम्. ननु भगवत एवं करणे को हेतुः ? तत्र आह **विकीर्य पदयोः पतिताऽश्रुमुख्या** इति. दुष्टस्पर्शेन दोषसम्बन्धात् तन्निराकरणार्थं गाढभक्तिहृदयेन "हा नाथ द्वारकावासिन्[४]" (द्रष्ट. महाभा. २।६८।४१) इति रूपेण स्मरणे तदानीमेव

लेखः

**यत्तेजसा** इत्यत्र. **श्लोकोक्तं फलम्** इति. सत्त्वमिश्रसत्त्वेन उपकाररूपं फलं प्राप्तवान् इति अर्थः. अत्रापि चरित्रे सत्त्वमिश्रणादेव भगवत्सान्निध्यम् अस्ति इति ॥९॥

**पत्न्याः** इत्यत्र. **रजसा तस्य** इति, स्त्रीप्राप्तिरूप-फलस्य इति अर्थः. **सत्त्वेन** इति. तमसः सत्त्वमिश्रत्वाद् इति भावः. **तस्य** इति, तमोगुणस्य यो **अपकारः** स च द्रौपद्यपकार**कर्तॄणां स्त्रीषु दत्तः**. अतएव ताः हतेशविमुक्तकेशाः जाताः इति भावः.

१. रजसा तस्येति घ-लेखे. रसजातस्येति ङ. २. यजमानपत्न्या इति ग-घ. ३. तेन मृतभर्त्रेत्ययमंशो नास्ति ख. ४. "आकृष्यमाणे वसने द्रौपद्या चिन्तितो हरिः, गोविन्द द्वारकावासिन् कृष्ण गोपीजनप्रिय" - सम्पा.

उपस्थितस्य भगवतः – अन्येषां महापातकित्वाद् द्रौपदीमात्रप्रत्यक्षस्य – **पदयोः (कितवैः!) दुष्टस्पृष्टं कबरं विकीर्य पतिता या अश्रुमुखी** तस्याः. तदानीं भगवान् द्वारकातः समागत्य तस्याः अग्रे स्थितः. साऽपि[१] तं दृष्ट्वा तस्य[२] पादयोः[३] पतिता[४] अश्रूणि अवर्तयत्[५]. अतएव "या त्वरा द्रौपदीत्राणे[६]" (जगन्नाथस्तो. ४) इति वाक्यं सङ्गच्छते. एवं गुप्ततयापि सर्वदा सर्वं कार्यं[७] करोति इति अवगन्तव्यम् ॥१०॥

रजोमिश्रतमसा यः उपकारः कृतः तम् आह **यो नो जुगोप** इति.

**यो नो जुगोप वनमेत्य दुरन्तकृच्छ्राद्**
**दुर्वाससोऽरिविहितादयुताग्रभुग्यः ॥**
**शाकान्नमुष्टिमुपयुज्य यतस्त्रिलोकीं**
**तृप्ताममंस्त सलिले विनिमग्नसङ्घः ॥११॥**

एवं हि आख्यायिका— कदाचिद् दुर्वासाः षण्मासोपवासी पारणादिवसे सर्वदैत्यप्रार्थनया दुर्योधनगृहं गतः. तेन च आतिथ्येन सन्तोषितो अयुतशिष्यसहितो "वरं वृणीष्व" इति आह. तदा भगवता व्यामोहितो दुर्योधनः – सहसा पाण्डूनां[८] नाशः प्रार्थयितुम् अशक्यः इति मन्यमानो – व्याजेन प्रार्थयिष्यामि इति सञ्चिन्त्य "यथा अस्मद्गृहे समागतं शिष्यैः सह तथैव अस्मज्ज्येष्ठभ्रातुः युधिष्ठिरस्य गृहे गन्तव्यं, परं द्रौपदीभोजनानन्तरम्, अन्यथा सा खेदं प्राप्स्यति" इति वरम् अयाचत. ततः "तथा" इति उक्त्वा तथैव गतो दुर्वासाः. पाण्डवानां च अरण्ये भोजनाभावे भगवदुपदेशात् सूर्यप्रार्थनायां

---

लेखः

**पतिता या अश्रुमुखी** इति. एवञ्च पतिता चासौ अश्रुमुखी च इति विग्रहः. **या त्वरा द्रौपदीत्राणे** इति. ... ॥१०॥

**यो नो** इत्यत्र आभासे. **रजोमिश्र** इति. सत्त्वावस्थात्रयम् उक्त्वा तमोवस्थात्रयम् उच्यते इति अर्थः. **दैत्यप्रार्थनया** इति. ... ॥११॥

---

१. सैवेति ख. सोऽपीति घ. २. तस्या इति घ. ३. पदयोरिति ख. ४. पतित्वेति घ.
५. अश्रूण्यवर्तयन्निति ग–ङ. ६. "या त्वरा द्रौपदीत्राणे या त्वरा गजमोक्षणे, मय्यार्ते करुणामूर्तेः सा त्वरा क्व गता हरेः" - सम्पा. ७. कार्य्यमिति नास्ति ग. ८. पाण्डवानामिति ख.

सर्वान्नपूर्णां स्थालीं ददत् सूर्यः आह "द्रौपदीभोजनावधि अक्षय्यम् अन्नं भविष्यति" इति. ततः प्रभृति सा ऋष्यागमनकालम्[1] अतिक्रम्य भुङ्क्ते. एवं जाते सति प्रहररात्र्यनन्तरं द्रौपदीभोजनं योगेन ज्ञात्वा तथैव आगतः. तदा पाण्डवाः द्रौपदी च सर्वनाशं मेनिरे. तदा ध्यातः कृष्णः समागतो बहिरेव द्रौपदीम् [2]अदृष्ट्वैव ऋषिं प्रति उक्तवान् "जातः पाकः, स्नानं क्रियताम्" इति. "तथा" इति आवश्यकं कर्तुं दुर्वाससि गते अन्तःप्रविष्टो भगवान् द्रौपदीवैक्लव्यं दृष्ट्वा कवलमात्रावशिष्टे भोजने स्थाल्यामपि तौ उच्छिष्टं शाकान्नं प्राश्य त्रिलोकीमेव तृप्ताम् अकृत.

तद् आह **यो नो जुगोप** इति. **यो** भगवान् **वनम् एत्य नः** अस्मान् **जुगोप. दुर्वाससोः** भयहेतुत्वात् पञ्चमी, **दुरन्तं कृच्छ्रं यस्माद् अरिविहिताद्** दुर्योधनेन प्रेरितात्. यः दुर्वासाः **अयुतं** ब्राह्मणाः **अग्रे भुञ्जते यस्य. शाकेन[3] सहितम् अन्नमुष्टिम्** – प्रथमतएव वा भगवदर्थं स्थापितं ; नियतकृत्यं हि तत्, तद् – **उपयुज्य** स्वीकृत्य **जुगोप** इति सम्बन्धः. कथम् एतावता गोपनम्? तत्र आह **यतः सलिले निमग्नः**[4] **ऋषिसङ्घः** यः पूर्वम् आवश्यकं कर्तुं गतः स[5] सलिले निमग्नः उत्थानसमये **त्रिलोकीमेव तृप्ताम् अमंस्त** किमुत आत्मानम् इति अर्थः ॥११॥

सत्त्वमिश्रतमसा कृतम् आह **यत्तेजसा** इति.

**यत्तेजसाऽथ भगवान् युधि शूलपाणिः**
**विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ॥**
**अन्येऽपि चाहममुनैव कलेवरेण**
**प्राप्तो महेन्द्रभवने महदासनार्धम् ॥१२॥**

**अथ** इति भिन्नप्रक्रमे, श्लोकद्वयेन द्रौपदीनिमित्तरक्षणस्य उक्तत्वात्

---

प्रकाशः

**यत्तेजसा** इत्यत्र. **चरित्रम् इतीति. इति** हेतोः **भिन्नः प्रक्रमः** इति अर्थः ॥१२॥

---

१. साऽतिथ्यागमनकालमिति घ. २. द्रौपदी दृष्ट्वैवेति ख. ३. शाकेन शिष्टमन्नमुष्टिमिति क-घ-ङ.
४. निमग्नो ऋषिसङ्घ इति क-ख-ग. ५. स इति नास्ति घ.

स्वपौरुषाभावात् च तदपहाय केवलं स्वपौरुषसाध्यं चरित्रम् इति. **भगवान्** इति सन्तोषे वरदानहेतुः. **शूलपाणिः** इति विपरीते मारणहेतुः. एवं दुर्धर्षोऽपि महादेवो **यत्तेजसा विस्मापितः** नहि जीवसामर्थ्येन ब्रह्मणो विस्मयो भवेत्. तत्रापि **सगिरिजः** पार्वतीसहितः. पर्वतपुत्री हि पर्वतादपि अधिकेन पदार्थेन विस्मिता भवति इति सूचितम्. अत्रापि किरातार्जुनकथा[१] अनुसन्धेया. परीक्षार्थं समागतो महादेवः सर्वव्रतोद्यापनरूप-चिह्नसहितस्य अर्जुनस्य चिह्नप्रदर्शनार्थं पार्वतीमपि आनीतवान्. तत्र [२]शस्त्रास्त्र-मुष्टि-बाहुयुद्धेषु समाप्तेषु मल्लयुद्धेन स्वयं भूमौ पतित्वा स्वोपरि-पतितार्जुनपृष्ठस्थ-चिह्ने पार्वत्या दृष्टे दम्पत्योः हास्यमुखम् अवलोक्य भीतो अर्जुनः स्तोत्रं कृतवान्. ततः प्रीतो महादेवः (**निजम् अस्त्रम् अदाद्!**) पाशुपतास्त्रं दत्तवान् **मे** मह्यम्. **अन्येऽपि** इन्द्रादयः तदानीं समागत्य स्वास्त्राणि दत्तवन्तः, **च**कारात् शत्रुजयः च. किञ्च तस्य अस्त्रस्य प्रयोगसिद्ध्यर्थं महेन्द्रप्रस्थित-मातलिप्रार्थनया तेनैव नीतो **महेन्द्रभवने** वर्षपञ्चकम् इन्द्राऽऽ**सनस्य अर्धं महद्** इन्द्रोपवेशनभागाद् अधिकं शरीरान्तरोपभोग्यम् **अमुनैव कलेवरेण** तेजोमयेन प्राप्तवान् अस्मि इति अर्थः. अत्रापि त्रयं प्राप्तं— महादेवसन्तोषः अस्त्रप्राप्तिः इन्द्रासनप्राप्तिः च इति ॥१२॥

तमोमिश्रतमसा कृत्यम् आह

**तत्रैव मे विहरतो भुजदण्डयुग्मं**
**गाण्डीवलक्षणमरातिवधाय देवाः ॥**

---

लेखः

**यत्तेजसाऽथ** इत्यत्र. **सर्वव्रतोद्यापन** इत्यादि. ... . **महेन्द्र** इत्यादि. अर्जुनस्य स्वर्गे आकारणार्थम् इन्द्रेण सपरिकर-स्वरथसहितो मातलिः प्रेषितः. तत्प्रार्थनया मातलिनैव महेन्द्रभवने नीतः इति अर्थः. वनपर्वणि[३] किरातार्जुनीयानन्तरम् अयं प्रसङ्गो अस्ति ॥१२॥

**तत्रैव मे** इत्यत्र आभासे. **तमोमिश्रतमसा** इति. सत्त्वस्थानेऽपि स्वर्गे संरम्भादिकं यत् तत् तामसतामसेनैव भवति इति तथा.

---

१. किरातार्जुनीयकथेति ख.  २. शस्त्रार्थेति ग.  ३. द्रष्ट. महाभा. ३। अध्याय ४२-४४ - सम्पा.

**सेन्द्राः श्रिता यदनुभावितमाजमीढ**
**तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥१३॥**

**तत्रैव** इति. **तत्रैव** स्वर्गेएव **विहरतो मे भुजदण्डयुग्मम्.** स्वयं चतुर्भुजाअपि केचन अधिकभुजाः केचन ततोऽपि अधिकभुजाः. आश्रयणे हेतुः **गाण्डीवलक्षणम्** इति, गाण्डीवं लक्षणं चिह्नं यस्य. अनेन उभयोः चिह्नता. युद्ध-धनुष्टङ्कार-सज्जीकरणादौ हस्तद्वयं सर्वदा व्यापृतम् इति ज्ञापितम्. नच एतावता कार्यं सिद्ध्यति – मम इन्द्रपुत्रत्वाद् बलस्य वायुजन्यत्वाद् गाण्डीवस्य च आग्नेयत्वाद् इन्द्रादीनां मूलभूतानामेव तत्र सत्त्वाद् – हेत्वन्तरं वक्तव्यम् इति आकाङ्क्षायाम् आह **यदनुभावितम्** इति. **आजमीढेति** वैक्लव्याभावाय. स हि त्रिभिः पुरुषैः सह मुक्तः. तमसा मिलिततमसा वञ्चनस्य[१] अभिप्रेतत्वाद् उपकारासमाप्तावेव[२]

प्रकाशः

**तत्रैव** इत्यत्र. ननु पूर्वश्लोकवद् उत्तरश्लोकानामपि 'यत्'पदोपबन्धवत्तासत्त्वाद् अस्मिन्नेव मध्यस्थे किमिति मोषः उच्यते इति आकाङ्क्षायाम् आहुः **तमसेत्यादि. गुणनिरूपणाद्** इति **आजमीढपदेन** मोक्षदाननिरूपणात्.

लेखः

**स्वयम्** इति, देवाः इति अर्थः. **इन्द्रपुत्रत्वाद्** इति. तथाच हीनत्वाद् न स्वरूपमात्रेण कार्यसिद्धिः इति भावः. ननु गाण्डीवेन सर्वसिद्धिः अस्त्येव इत्यतः आहुः **बलस्य** इति. एवञ्च गाण्डीवस्य अग्निदैवत्याद् अग्नेश्च वाय्वधीनबलत्वाद् अत्रापि वायु बहूपोद्बलको अपेक्षितएव इति भावः. **मूलभूतानाम्** इति, अर्जुनशस्त्रास्त्र-मूलभूतानाम् इति अर्थः. **तमसा मिलिततमसा** इति. यथा स्वर्गे अरातिवधाद्युपकारः तमोमिश्रतमसा कृतः तथा वञ्चनमपि तेनैव रूपेण अभिप्रेतम् इति अर्थः. अत्र गमकम् आहुः **उपकार** इत्यादि. तमस्तमसा कृते यः उपकारः तदसमाप्तावेव उपकार-कारणीभूतस्य जयस्य तामसगुणस्य अनुरूपस्य अफलाः, **तेनाऽहम्** इति **तत्**पदेन कारणगुणविशिष्टस्यैव परामर्शाद् इति भावः.

१. वचनस्येति क. वञ्चितस्येति घ-ङ. २. उपकारसमाप्तावेवेति क.

कारणगुणनिरूपणाद् आह **तेन अहम्** इति. मोषे हेतुः **पुरुषेण** इति, ब्रह्माण्डविग्रहत्वात्. रोगनाशे औषधत्यागवत्. तेजोऽपहरणेऽपि भगवतो व्यापकत्वाद् ज्ञानद्वारा मोक्षं दास्यतीति न अनाप्तत्वम् इति आह **भूम्ना** इति.

वस्तुतस्तु "यत्तेजसा नृपशिरोऽङ्घ्रि" (श्लो. ९) श्लोकवत् "पत्न्यास्तव" (श्लो. १०), "यो नो जुगोप" (श्लो. ११) इत्येतावपि[१] विगीतौ, अर्जुनविषयत्वाभावात् कुश्लिष्टत्वाच्च[२]. अतः [३]सत्त्वरजस्तमोभिरेव श्लोकत्रयप्रतिपाद्यैः भगवच्चरित्रम् उक्त्वा मोषः चतुर्थे प्रतिपाद्यते,

प्रकाशः

तथाच एवं हेतुद्वयात् परोक्षत्वं मोक्षदातृत्वं च वक्तुं मोषम् आह इति अर्थः. **ब्रह्माण्डविग्रहत्वाद्** इति. तथाच तेन रूपेण अतिपरोक्षतया मोषहेतुत्वम् इति अर्थः. **तेजोऽपहरणेऽपि** इति, कार्यकारणोत्तरं तेजोऽपहरणेऽपि इति अर्थः. एवं सर्वसम्मतपाठम् आदृत्य मध्ये मोषोक्तिः समर्थिताः. अतः परं सिद्धान्तपक्षेण समर्थयन्ति **वस्तुतः** इत्यादि. ननु गुणैः कार्यान्तरमपि

लेखः

"यत्तेजसा" (श्लो. ९) इति श्लोकवद् अन्यदपि श्लोकद्वयं प्रक्षिप्तम् इति ज्ञापयन्तः प्रकारान्तरेण वाक्यतात्पर्यं निरूपयितुम् आहुः **वस्तुतस्तु** इत्यादिना. **अर्जुनविषयत्वाभावाद्** इति. उपक्रमोपसंहारयोः अर्जुनविषय-भगवदुपकारस्यैव दर्शनाद् मध्ये अन्यविषयकं श्लोकत्रयं प्रक्षिप्तम् इति अर्थः. **कुश्लिष्टत्वाद्** इति. राज्ञा विकीर्णकेशादिवर्णनं कुश्लिष्टम् इति अर्थः. **रजःसत्त्वतमोभिः** इति. तथाच "यत्संश्रयाद्" (श्लो. ७) इत्यत्र शुद्धरजोगुणएव उच्यते, तथा "यत्सन्निधौ" (श्लो. ८) इत्यनेन शुद्धसत्त्वं, "यत्तेजसाऽथ भगवान्" (श्लो. १२) इत्यत्र शुद्धतमोवस्था इति. **मोषश्चतुर्थे** इति. एवञ्च येन पूर्वं गुणत्रयावस्थयापि उपकृतं तेन मुषितइति उपकारसमाप्तिः उक्ता इति. ननु भगवत्कृतोपकारः श्लोकत्रयेएव समाप्तः चेद् "यद्बान्धव" (श्लो. १४) इत्यादिष्वपि उपकारवर्णनस्य का गतिः इति आशङ्कायां

१. इत्यादावपीति क-ग. २. चकारो नास्ति ख. ३. रजःसत्त्वतमोभिः इति पाठः लेखे - सम्पा.

लोकत्रय-जयस्यैव अभीष्टत्वात्. दैत्यजयः साधनप्राप्त्या निरूपणीयोऽपि[१] भोगस्य प्राधान्यात् सएव निरूपितः. अर्थात् निरूपितोऽपि उपसंहारे [२]अनुवादेन

प्रकाशः

जायतेएवेति त्रयेणैव निरूपणं कुतः इति आकाङ्क्षायाम् आहुः **लोकत्रये**त्यादि. नृ-देव-दैत्यात्मकाः ये लोकाः तज्जयस्यैव अर्जुनेष्यमाणत्वाद् इति अर्थः. "यत्तेजसा" (श्लो. १२) इति श्लोके दैत्यजयस्य अस्पष्टत्वात् तत् स्फुटीकर्तुम् आहुः **दैत्ये**त्यादि. अत्र **दैत्यजय** इत्यादौ सप्तम्यन्तः पाठः प्रतिभाति. तथाच तस्मिन् एवं **निरूपणीयेऽपि** अभीष्टेषु **भोगस्य प्राधान्यात् सएव** तत्र **निरूपितः** इति अर्थः. तर्हि तन्निरूपणे किं मानम् अतः आहुः **अर्थाद्** इत्यादि. आसनार्धप्राप्तिरूपस्य अर्थस्य देवारातिवधादेव जातत्वाद् तन्निरूपणेन **अर्थादेव निरूपितोऽपि** देवलोक-वृत्तान्**तोपसंहारे तदनुवदन-**भगवत्कृत**वञ्चनयोः शेषतया** अङ्गतया अग्रिमश्लोके **निरूपितः**. तथाच

लेखः

न अग्रिमश्लोकेषु अर्जुनोपकारः उच्यते किन्तु आवश्यकं भगवच्चरित्रमेव इति आशयेन उक्तश्लोकत्रयेएव अर्जुनस्य उपकारं स्थापयन्ति **लोकत्रयजयस्यैव** इति. **अभीष्टत्वाद्** इति, अर्जुनस्य अभीष्टत्वाद् इति अर्थः. ननु त्रिलोकीम् अन्तरा दैत्यानां सत्त्वात् तज्जयस्य च अनुक्तत्वात् कथं त्रिलोकजयः इत्यतः आहुः **दैत्यजयः** इति. यद्यपि कण्ठरवेण अत्र स नोक्तः तथापि अत्र त्रिलोकजयात्मक-फलनिरूपणादेव दैत्यवधोऽपि साधनत्वेन अर्थात् प्राप्नोत्येव, फलस्य साधनं विना अनिरूप्यत्वाद् इति भावः. **सएव** त्रिलोकीजयएव. तत्रापि विशेषम् आहुः **अर्थान्निरूपितोऽपि** इत्यादि. **उपसंहारे** इति, गुणत्रयेण उपकारोपसंहारे इति अर्थः. **अनुवादेन** इति. एवञ्च अर्थाद् निरूपितो यो दैत्यवधः सो अत्र **अरातिवधाय देवाः** इत्यनेन अनुवादेन निरूपितः इति अर्थः. **वञ्चनशेषतया** इति. **तेनाऽहमद्य मुषितः**

१. दैत्यजये साधनप्राप्त्या निरूपणीयेऽपि इति सम्भावितः पाठः प्रकाशे - सम्पा.

२. अनुवदन-वञ्चनशेषतया इति पाठः मुद्रितः प्रकाशे च. अनुवदन् वञ्चनशेषतयेति ख-ग. लेखकृतां पाठः गृहीतः - सम्पा.

वञ्चनशेषतया निरूपितः, दैत्यानां तत्प्राधान्यात्, ‘‘मायेत्यसुराः’’ (मुद्गलोप. २।३) इति श्रुतेः. यत् पुनः अग्रे भगवच्चरित्रकथनं तद् अवतारकार्यमिति न अत्यन्तम् अर्जुनानुग्रहः सिद्ध्यति, भूभारहरणस्य[१] स्वापेक्षितत्वात् ‘‘मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्’’ (भग.गीता ११।३३) इति भगवद्वाक्यात् च. अतो अर्जुने भगवतः उपकारत्रयमेव गुणरूपम्.

प्रकाशः

अग्रे अनुवादएव मानम् इति अर्थः. ननु तथापि मध्ये वञ्चननिरूपणस्य तात्पर्यम् आहुः **दैत्यानाम्** इत्यादि. **तत्प्राधान्याद्** इति वञ्चनप्राधान्यात्. तथाच इदानीं संहारकालत्वात् तत्र च ‘‘अन्ते त्वधर्महरमन्युवशासुराद्याः’’ (भाग.पुरा. २।७।३९) इति वाक्येन असुराणाम् उपकरणरूपत्वाद् इदानीं तदनुगुणत्वबोधनाय तदुक्तिः इति अर्थः. ननु एवं सति अग्रे भगवच्चरित्रनिरूपणस्य किं प्रयोजनं, प्रश्नोत्तरस्य तावतैव जातत्वाद् इति आकाङ्क्षायाम् आहुः **यदित्यादि. न अत्यन्तम्** इति. आपाततः प्रतीयमानोऽपि तेषु श्लोकेषु सः अत्यन्तं न सिद्ध्यति इति अर्थः. **अनुग्रहः** उपकारः. अत्यन्तासिद्धौ गमकद्वयम् आहुः **भूभारे**त्यादि. सिद्धम् आहुः **अतः** इति, ‘‘यद्बान्धव’’ (श्लो. १४) इत्यादिपद्यत्रयस्य अवतारकार्यबोधन-मात्रार्थत्वात्.

लेखः

इत्यनेन दैत्यजयादिकर्तारम् अनूद्य वञ्चनस्यैव मुख्यतया निरूपणाद् इति भावः. ननु वञ्चनवाक्येएव दैत्यवधानुवादस्य किं प्रयोजनम् अतः आहुः **दैत्यानाम्** इति. तथाच दैत्ये मायाकार्य-वञ्चनप्राधान्यात् वञ्चनेनैव तन्मारणम् अभिप्रेतम् इति ज्ञापनाय अत्र उक्तिः इति भावः. एवं पूर्वश्लोकानां सङ्गतिम् उपपाद्य अग्रिमाणां ताम् उपपादयितुम् आहुः **यत्पुनः** इत्यादि. **अग्रे** इति, ‘‘यद्बान्धव’’ (श्लो. १४) इत्यादिश्लोकत्रये इति अर्थः. अत्र अर्थोपष्टम्भाय वाक्यम् आहुः **मयैव** इति. सिद्धम् आहुः **अतः** इति. **उपकारत्रयमेव** इति. तच्च पूर्वं श्लोकत्रयेण निरूपितम् इति भावः. तुर्येण तु उपसंहारः इति ज्ञेयम्. ‘‘यद्बान्धव’’ (श्लो. १४) इत्यादि

१. भूभारहरणस्याऽस्वापेक्षितत्वादिति ख.

दोषाभावरूपं[१] च अग्रे वक्ष्यते "सौत्ये वृत" (श्लो. १७) इत्यादिभिः त्रिभिः.

कारणं करणञ्चैव प्रतिबन्धश्च कथ्यते ॥
स्वकृतत्वज्ञापनाय[२] माहात्म्यज्ञापनाय तत् ॥(७)॥
दोषाभावेन सहितं दैन्येनापि विमिश्रितम् ॥
कृष्णमाहात्म्यविज्ञानं सर्वथा मुक्तिदायकम् ॥(८)॥

इति निश्चयः. अतो माहात्म्यज्ञापनं त्रिभिः, त्रिभिः च दोषाभावः, द्वयेन दैन्यम् इति – अन्तर्बहिःसाधनहरणाद् इति – युक्तम् उत्पश्यामः ॥१३॥

तमोमिश्ररजसा चरित्रम् आह **यद्बान्धव** इति. हेतुत्वेन कारणं वा.

---

प्रकाशः

ननु एवं सति मध्ये एतेषां किं प्रयोजनम् इति आकाङ्क्षायां तत्तात्पर्यं कारिकाभ्याम् आहुः **कारणम्** इत्यादि. इतरसंहारस्य अर्जुनद्वारा **कारणं,** स्वयं **तत्करणम्,** अर्जुनसंहार**प्रतिबन्धः च** इति त्रयं भगवतः तूष्णीकत्वेऽपि भगवत्**कृतत्वम्** एषां ज्ञापयितुं **कथ्यते** इति अर्थः. **तदिति** स्वकृतत्वज्ञापनम्. एवं कथनस्य प्रयोजनम् आहुः **दोषे**त्यादि. सिद्धम् आहुः **अतः** इत्यादि. **अन्तःसाधनं** बलं, **बहिःसाधनं** धन्वादिसामर्थ्यम्. तथाच एवम् उपपत्तौ तेषां श्लोकानां विगीतत्वं युक्तमेव इति अर्थः ॥१३॥

सर्वसम्मतपक्षम् आश्रित्य आहुः **तमोमिश्रे**त्यादि. विगीतत्वाभिप्रायेण

लेखः

त्रयाणाम् अर्थं ग्राहयन्ति **कारणम्** इति. निमित्तत्वं, साक्षात्कारणत्वं, शत्रु-शस्त्रादि-प्रतिबन्धकत्वं च श्लोकत्रयेण उच्यते. "सौत्ये वृतः" (श्लो. १७) इत्यादित्रयस्य उक्तम् अर्थं स्मारयन्ति **दोषाभावेन सहितम्** इति. "सोऽहं नृपेन्द्र" (श्लो. २०) इत्यादि द्वयोः अर्थम् आहुः **दैन्येनापि** इति. दैन्ये हेतुम् आहुः **अन्तर्बहिः** इति ॥१३॥

**यद्बान्धव** इत्यत्र. **हेतुत्वेन कारणम्** इति. भगवतएव हेतुत्वेन निरूपणात् कारणत्वम् इति अर्थः. ननु उत्तरकुमारस्य सहायत्वेन वर्तमानत्वात् कथम्

---

१. दोषाभावञ्चाऽग्रे त्रयं वक्ष्यत इति ग. दोषाभावायाऽग्रे त्रयमिति घ. २. स्वकृतत्वाज्ञापनायेति ग.

**यद्बान्धवः कुरुबलाब्धिमनन्तपारम्**
**एको रथेन ततरेऽहमनार्यसत्त्वम् ॥**
**प्रत्याहृतं पुरु धनञ्च मया परेषां**
**तेजस्पदं मणिमयञ्च हृतं शिरोभ्यः ॥१४॥**

**यस्य** भगवतो **बान्धवः ;** भगवद्बन्धुत्वेनैव भजन-सान्निध्याद्यभावेऽपि **कुरुबलाब्धितरणम्**. सेनायाः नित्यनूतनत्वाय **अब्धित्वम्**. **अनन्तपारम्** इति देशकालानवच्छिन्नम्. तत्रत्याः अवध्याः इति कालानवच्छिन्नता, अनुल्लङ्घ्याः इति देशानवच्छिन्नता. तत्र[1] **एकः** असहायः, उत्तरगोग्रहणे (!?) उत्तरस्य[2] भीतस्य दर्शनार्थं स्थापितत्वात्. **रथेन** इति प्लवनशङ्का निवारिता, तेन निलीय गमनं परास्तम्. **अनार्याः** कर्णादयः, तेएव **सत्त्वानि** जलचराः यस्मिन्. अनेन तैः तत्र पतितस्य पुनः अनावृत्तिः सूचिता, कुतः तरणम् इति भावः. न केवलं तरणं कृतं किन्तु तत्रत्यानि रत्नान्यपि आहृतानि इति अभिप्रायेण आह **प्रत्याहृतं पुरु धनं च** इति. वस्तुतस्तु तद्द्रव्यम् अर्जुनस्यैव, राज्यस्वामित्वात्, तैः परं बलाद् गृहीतं ; तत् पुनः **प्रत्याहृतम्** इति **प्रति**शब्दार्थः. **च**काराद् वस्त्राणि. **तेजस्पदं** तेजसः स्थानम्. तद्व्याजेन तेजोऽपि अपहृतम् इति अर्थः. **मणिमयम्** अमूल्यं सर्वपुरुषार्थसाधकं वा. अनेन सर्वस्वं सर्वे च पुरुषार्थाः हृताः इति ज्ञापितम्. **चकारात्** शिरोरत्नं,

प्रकाशः

आहुः **हेतुत्वेन** इत्यादि. एवम् अग्रेऽपि. **यद्बान्धव** इत्यत्र. कथं निवारिता इत्यतः आहुः **तेन** इत्यादि. निलीय गमननिरासे एकस्य तत्र अशक्तत्वात् निवारिता इति अर्थः ॥१४॥

लेखः

एकत्वम् अतः आहुः **दर्शनार्थम्** इति. तथाच तेन न काचित् पुरुषार्थसिद्धिः इति अर्थः. **प्रत्याहृत**पदस्य अर्थम् आहुः **वस्तुतः** इति. **बलाद् गृहीतम्** इति, अन्यायेन कौरवैः गृहीतम् इति अर्थः ॥१४॥

---

१. द्रष्ट. महाभा.। विराट्पर्व ४-गोग्रहणपर्व। अध्याय ३७-३८ - सम्पा.

२. मत्स्यराज-विराटराज्ञः कुमारः उत्तरो नामा - सम्पा.

रत्नानि च सहजानि. **शिरोभ्यः** इति. तद्व्याजेन शिरांस्येव अपहृतानि इति अर्थः. सम्मोहनास्त्रेण मोहयित्वा सर्वं हृतम्. अत्र बन्धुत्वमेव निमित्तम् ॥१४॥

सत्त्वमिश्ररजसा कृतम् आह.

**यो भीष्मकर्णगुरुशल्यचमूष्वदभ्र-**
**राजन्यवर्यरथमण्डलमण्डितासु ॥**
**अग्रेचरो मम विभो रथयूथपानाम्**
**आयुर्मनांसि च दृशा सह ओज आर्च्छत् ॥१५॥**

**यो भीष्मकर्णे**ति. पूर्वं परीक्षार्थं गतत्वाद् असावधानैः गतम्; इदानीं युद्धार्थं शस्त्रास्त्रादिसम्पन्नाः मन्त्रादियुक्त-कवचादिमन्तः कालेनापि मारयितुम् अशक्याः – काल-काम-परशुरामादिजेतारो अशक्याः – इति मत्वा स्वयम् **अग्रेचरो** भूत्वा तेषाम् **आयुः मनांसि च** उत्साह-शक्तीः चकाराद् विवेक-धैर्यादिकं च **दृशा** दृष्टिमात्रेणैव **आर्च्छद्** आहृतवान्. **स**[1]**(?) ओजः** ओजसा सह इति अर्थः. अथवा **सहः**[2] अन्तःकरणशक्तिः **ओजः** इन्द्रियशक्तिः, तदपि हृतवान् इति अर्थः. **गुरुः** द्रोणः. चत्वारएव सेनापतयो जाताः तेषां **चमूषु. भीष्म-गुरुमध्ये कर्ण**कथनम् अतिसामर्थ्यद्योतनार्थम्. **अदभ्राः** ये **राजन्यवर्याः** कुत्रापि मारणार्थं छिद्ररहिताः तेषां **रथमण्डलानि** तैः **मण्डितासु.** अनेन तासु प्रविष्टो वशीकृतो भवति इति सूचितम्. एवं सेनाचतुष्टयेऽपि भगवतैव सर्वं कृतं, न मया इति उक्तम्. अनेन स्वयं करणम्[3] उक्तम् ॥१५॥

रजोमिश्ररजसापि कृतम् आह, परकृतप्रतिबन्धं वा.

**यद्दोःषु मां प्रणिहितं गुरुभीष्मकर्ण-**
**द्रौणित्रिगर्तशलसैन्धवबाह्लिकाद्यैः ॥**
**अस्त्राण्यमोघमहिमानि निरूपितानि**
**नोपास्पृशन्नृहरिदासमिवासुराणि ॥१६॥**

---

१. स अञ्जः. अञ्जसा सहेत्यर्थ इति ख. मूलानुरोधात् सह ओज इति पाठस्तु भाति.

२. सहेत्यविसर्गः पाठः क-ग. सः इति ख. ३. कारणमिति ख.

**यद्दोःषु माम्** इति. **प्रणिहितं** स्थापितम्. **द्रौणिः** अश्वत्थामा **त्रिगर्तः** सुशर्मा **शलः** शल्यः **सैन्धवो** जयद्रथः. **अमोघो महिमा** येषाम्. **निरूपितानि** मद्वधार्थं प्रक्षिप्तान्यपि **न उपास्पृशन्**[१] समीपे रथादिकमपि न स्पृष्टवन्तः. **न उपास्पृशन्** इति पाठः. **नृहरिदासं** प्रह्लादं ; प्रसिद्धो दृष्टान्तः. प्रमेयबले प्रमाणबलं दृष्टान्तः, दास्यभक्तेः शास्त्रीयत्वात्. **यद्दोःषु** इति प्रमेयबलम्. **आसुराणि** असुरकृतानि शूलादीनि ॥१६॥

गुणकृतम् उक्त्वा स्वभावकृतेषु नीचकर्मणि नियुक्तः तदपराधं सोढवान् इति आह.

**सौत्ये वृतः कुमतिनात्मद ईश्वरो मे**
**यत्पादपद्ममभवाय भजन्ति भव्याः ॥**
**संभ्रान्तवाहमरयो रथिनो भुविष्टं**
**न प्राहरन् यदनुभावनिरस्तचित्ताः ॥१७॥**

**सौत्ये वृतः** इति सूतकर्मणि कृतः. तत्र हेतुः **कुमतिना,** फलस्य कुत्सित-साध्य-साधनत्वेन नियोजितत्वात्. सहने हेतुः **आत्मदः** इति, स हि तुष्टः स्वात्मानं प्रयच्छति. ततः स कुत्रापि नियोगं करोतु, प्राप्तत्वाद् इति अर्थः. तर्हि को दोषः ? तत्र आह **ईश्वरः** इति. यद्यपि **आत्मदः** तथापि **ईश्वरः** कर्तुम् अकर्तुम् अन्यथाकर्तुं समर्थः. अनेन तेजोहरणम् अल्पमेव जातम् इति भावः. **मे** मया मह्यं वा न हि सौत्येन किञ्चित् कार्यं सिद्धं ; प्रतिष्ठामात्रं परम्. कुमतित्वं प्रकटयति **यत्पादपद्मम्** इति. **भव्याः** सत्तायां परिनिष्ठिताः, सन्तः इति यावद्, **अभवाय** मोक्षाय **पादेति** भक्तिमार्गेण **पद्मम्** इति सुखसेव्यत्वाय रस्यत्वाय च **भजन्ति** सेवन्ते. "यद्दोःषु मां प्रणिहितम्" (श्लो. १६) इत्यत्र निरूपितमपि

---

प्रकाशः

**सौत्ये** इत्यत्र. **फलस्य** इति आनन्दरूपस्य भगवतः. **ततः स** इति जीवः. **प्राप्तत्वाद्** इति यथेष्टविनियोगे हेतुः. **अल्पम्** इति अल्पं फलम् ॥१७॥

---

१. नोपस्पृशुरिति क. नोऽस्पृशन्निति ग. नोपस्पृशन्निति ग.

शस्त्राद्यस्पर्शं लोकरीत्या स्पष्टसम्भावनाभावात्[१] पुनः जयद्रथवधे मध्याह्ने श्रान्तवाहानां विशल्यकरणार्थम् उत्तीर्णं मां **न प्राहरन्** इति आह. **संश्रान्तवाहम्** इति साधनाभावः सूचितः. **अरय** इति मारणावश्यकत्वम्. **रथिनो भुविष्ठम्** इति साधनाऽसाधनाभ्यां बहुवचनैकवचनाभ्यां च कामनायामपि[२] शत्रूणां दुर्लभा अवस्था सूचिता. **यस्य** भगवतो **अनुभावेन** अलौकिकसामर्थ्येन **निरस्तं चित्तं** "मारणीयो अयम्" इति ज्ञानं येषाम्. अनेन अपकारेऽपि आनुषङ्गिकं फलम् एतादृशम् इति सूचितम् ॥१७॥

किञ्च एतादृशेऽपि अपकारिणि परिहासदशायामपि वचनेनापि न अपकारः कृतः इति आह.

**नर्माण्युदाररुचिरस्मितशोभनानि**
**हे पार्थ हेऽर्जुन सखे कुरुनन्दनेति ॥**
**सञ्जल्पितानि नरदेव हृदिस्पृशानि**
**स्मर्तुर्लुठन्ति हृदयं मम माधवस्य ॥१८॥**

**नर्माणि** इति. अपराधाभावेऽपि स्वस्मरणार्थं[३] सर्वावस्थासु तथा तथा वचनानि उक्तवान् यथा (**हृदिस्पृशानि!**) हृदये प्रविष्टानि **हृदयं लुठन्ति** लोठयन्ति. **लुनन्ति**[४] इति वा पाठः. **नर्माणि** सुखकराणि परिहासवचनानि ; अर्थानुसन्धानाभावेऽपि स्वरूपतएव सुखकराणि इति आह. **उदारं** यद् **रुचिरं स्मितम्**. सर्वपुरुषार्थदानाय उदारं, किञ्च[५] रुचिरं रसोत्पादनाय, रसाभावे पुरुषार्थानाम् अयथात्वात्. स्मितेन अल्पव्यामोहनं सूचितं ; स्वभावसुन्दराणां स्मितेन शोभातिशयो वशीकरणार्थो[६] भवति. तत्र अनैकान्तिकं दृष्ट्वा **हे पार्थ** इति सम्बोधयति. स्तब्धं दृष्ट्वा **अर्जुन** इति, वृक्षवाचकत्वात्.

---

प्रकाशः

**नर्माणीत्यत्र. अयथात्वाद्** इति, अपुरुषार्थत्वाद् इति अर्थः. **तत्र अनैकान्तिकम्** इति स्मिते वशीकरण-व्यभिचारम्. **सम्बोधयति** इति,

---

१. स्पष्टसम्भावनादिति ख. २. कामयानामिति ग-ङ. कामयमानामपीति घ. ३. स्मरणार्थमिति ख-ग.
४. लुणन्तीति क-ग. ५. भा.पाठानुसारेण. मुद्रितपाठे नास्ति - सम्पा. ६. सर्ववशीकरणार्थ इति क.

वञ्चनापकरणादि दृष्ट्वा **हे सखे** इति. अचातुर्यं दृष्ट्वा **कुरुनन्दन** इति, क्षेत्रकर्षकत्वात् कुरोः. अतएव भगवद्वाक्यानां सञ्जल्पितत्वम् उक्तम्. **नरदेव** इति गूढबोधनार्थं सम्बोधनम्. वचनानां समर्थत्वात् मर्मस्पर्शित्वाद् **हृदिस्पृशानि** इति उक्तम्. **मम हृदयं** हृदये **मम माधवस्य** अस्मत्स्वामिनः **सञ्जल्पितानि** इति सम्बन्धः ॥१८॥

एवम् अपराधापनोदनार्थं[1] प्रतीकारे कृते तद्धेतुकाः अन्येऽपि अपराधाः कृताः तानपि दूरीकृतवान् इति आह.

**शय्यासनाटनविकत्थनभोजनादि-**
**ष्वैक्याद् वयस्य ऋतवानिति विप्रलब्धः ॥**
**सख्युः सखेव पितृवत्तनयस्य सर्वं**
**सेहे महान् महितया कुमतेरघं मे ॥१९॥**

**शय्येति. शय्यायां** शय्याविषये आसनादिविषयेषु च. तामसादिस्थानानि **शय्यासनाटनानि. विकत्थनं** सन्निपातकार्यं स्वश्लाघारूपम्. **भोजनादीनि** आवश्यक-लौकिकानि. **ऐक्याद्** एकभावात्. नहि स्वस्मात् कश्चित् कदाचित् शङ्कते. ऐक्यकरणं भगवदुपकारः. दुष्टस्य ततो मदाद् विप्रलम्भः = वक्रोक्त्या वञ्चनम्. तत्र वञ्चनशब्दम् आह हे **वयस्य** इति. वयसा तुल्ययोः

प्रकाशः

वशीकरणार्थं सम्बन्धित्वेन सम्बोधयति. **सञ्जल्पितत्वम्** इति. प्रतिवादिजयमात्र-फलक-कथायाः जल्पत्वेन तथा इति अर्थः ॥१८॥

**शय्येत्यत्र. प्रतीकारे कृते** इति भगवता कृते. **अन्ये** इति अर्जुनकृताः.

लेखः

**नर्माणि** इत्यत्र. **क्षेत्रकर्षकत्वाद्** इति, यज्ञार्थं सौवर्णलाङ्गलेन क्षेत्रभूमेः आकर्षणात्. अतएव 'कुरुक्षेत्रम्' इति प्रसिद्धिः ॥१८॥

**शय्या** इत्यत्र आभासे. **एवम् अपराधापनोदनार्थम्** इत्यादि. बार्हिमुख्य-स्तब्धत्वादि-दोषपरिहारार्थं हि भगवता "हे पार्थ, हेऽर्जुन" इत्यादि संबोध्यते. तेन प्रत्युत [2]अधिक-सहभावोत्पत्त्या शयन-विकत्थनादयो दोषाः

१. अपराधानोदनार्थमिति ख. २. आधिकारिक- इति थ.पाठे - सम्पा.

मध्ये कुतः तव आधिक्यं, कथं वा, मित्रम् इति वा. किञ्च **ऋतवान्** इति, सत्यवान् इति अर्थः. असत्यकरणं मत्वा तथा वचनम्. सहनं च न मनसि रोषस्थापनेन[१]. सह्यदोषे सखिदृष्टान्तः (**सख्युः सखेव!**), असह्यदोषे तु पितृदृष्टान्तः (**तनयस्य पितृवत्!**). तस्यापि असह्यदोषसङ्ग्रहार्थम् **सर्वम्** इति. सहने प्रयोजकं रूपम् आह **महान्** इति, न[२] हि पिपीलिकादीनाम् अपराधं गजो मन्यते. उपढौकनाद्यभावाय आह **महितया** इति, स्वमहिम्नैव. हेत्वन्तरम् आह **कुमतेः** इति ॥१९॥

एवं सर्वं चरित्रम् उक्त्वा सर्वोपसंहारार्थं[३] तत्कृतां लीलाम् अनुस्मरति.

**सोऽहं नृपेन्द्र रहितः पुरुषोत्तमेन**
**सख्या प्रियेण सुहृदा हृदयेन शून्यः ॥**
**अध्वन्युरुक्रमपरिग्रहमङ्ग रक्षन्**
**गोपैरसद्भिरबलेव विनिर्जितोऽस्मि ॥२०॥**

**सोऽहम्** इति. **नृपेन्द्र** इति सम्बोधनम् "अस्य विचारः त्वया अवश्यं कर्तव्यः" इत्येतदर्थम्. पुरुषेणापि **रहितः** प्राणी स्त्र्यादिरूपः सर्वकार्यबहिष्कृतो भवति, किमुत **पुरुषोत्तमेन!** अनेन उत्तमकार्योपसंहारो ज्ञापितः. **सख्या** इति मध्यमकार्योपसंहारः. **प्रियेण** इति ततः [४]परः ; प्रियजनः प्रियस्य

---

प्रकाशः

**तस्यापि** इति, पितुरपि इति अर्थः ॥१९॥

**सो अहम्** इत्यत्र. **अस्य विचारः** इति, वक्ष्यमाणे कार्ये प्रतीकारस्य विचारः इति अर्थः. ततः पराणां कार्याणां का सम्भावना इत्यतः आहुः

लेखः

ये उत्पन्नाः तेऽपि निराकृताः इति अर्थः. व्याख्याने **कथं वा मित्रम्** इति. ... . **तस्याऽप्यसह्य** इति, पितुरपि इति अर्थः ॥१९॥

**सोऽहम्** इत्यत्र. **ततः परम्** इति, मध्यमतः **परं** निकृष्टं कार्यमपि उपसंहृतं ज्ञापितम् इति अर्थः. तत् स्पष्टयन्ति **प्रियस्य** इति. यः प्रियः

---

१. रोषम्लापनेनेति घ. २. न हीति नास्ति ख.

३. सर्वोपसङ्ग्राहार्थमिति घ. ४. ततः परप्रियस्येति ग. ततः परं प्रियस्य इति लेखे – सम्पा.

निकृष्टमपि करोति. एवं स्वनिष्ठ-कार्याभावहेतून् उक्त्वा भगवन्निष्ठाभावाय आह **सुहृदा** इति. तद्राहित्यस्य फलम् आह **हृदयेन शून्यः** इति. उत्कृष्टधर्माणां तत्सहभावात् तदपगमे सर्वम् अपगतमिति शून्यता. हृदयं शून्यं जातम् इति अर्थः. तेन अन्यदपि कार्यं जातम् इति वदन् ''पराजितो वाथ भवान्'' (भाग.पुरा. १।१४।४२) इति सम्भावना सत्या जाता इति आह **अध्वनि (असद्भिः गोपैः अबलेव विनिर्जितोऽस्मि!)** इति. **परिग्रहः** स्त्रीवर्गः. **अङ्ग** इति कोमलसम्बोधनं प्रतीकारकरणाभावाय. **अबला** स्त्री ॥२०॥

तेन सर्वनाशम् आह.

**तद्वै धनुस्त इषवः स रथो हयास्ते**
**सोऽहं रथी नृपतयो यत आनमन्ति ॥**
**सर्वं क्षणेन तदभूदसदीशरिक्तं**
**भस्मन्हुतं कुहकराद्धमिवोप्तमूष्याम् ॥२१॥**

**तद्वै धनुः** इति ''गाण्डीवलक्षणम्'' (श्लो. १३) इति उक्तम्. **ते इषवः** ''अर्जुनस्य इमे बाणाः'' (महाभा. ६।११९।६६) इति. **स रथः** अप्रतिहतः. **ते हयाः** सर्वत्र गन्तारः. **सो अहं रथी** भीष्मादिहन्ता. **यतः** सामग्रीतः **आनमन्ति** सर्वतो नमन्ति. **आमनन्ति** इति वा पाठः,

---

प्रकाशः

**प्रियस्य** इत्यादि. यथा सारथ्यम् इति अर्थः. स्वनिष्ठाः कार्याभावहेतवः त्रिविध-भगवद्राहित्यानि, भगवन्निष्ठकार्याभावहेतुः सुहृत्त्वाभावः ॥२०॥

लेखः

स **प्रियस्य निकृष्टमपि** कार्यं **करोति ;** तस्मिन् गते तदपि उपसंहृतम् इति भावः ॥२०॥

**तद्वै धनुः** इत्यत्र. **गाण्डीवलक्षणम्** इति. एवं तल्लक्षणत्वेन प्रसिद्धम् इति तद्गौरवम् उक्तम्. **अर्जुनस्य** इति. ''अर्जुनस्य इमे बाणाः नेमे बाणा शिखण्डिनः, सीदन्ति मम गात्राणि माघमा सेगवा इव'' इति भीष्मवाक्यं भारते. ''माघमा वृश्चिकी प्रोक्ता सेगवास्तस्य पुत्रकाः'' इति

कीर्तयन्ति इति वा. तत्र अङ्गारेभ्यो अग्न्यपगमे[१] इङ्गालत्वं सम्पद्यते तदा रूपं, देवत्वं, दाहकत्वं सर्वमेव अपगच्छति. तथा पूर्वोक्तेषु ईशः प्रविष्टः तदा तत् सर्वं कार्यं निष्पन्नं ; तदपगमे सर्वं नष्टमिति अन्वय-व्यतिरेकाभ्यां प्राप्ताप्राप्तविवेकेन सर्वं भगवत्कृतम् इति सिद्धं भवति, केवलान्वये विशेषेण तदेकसाध्यता-निश्चयाभावात्. इदानीन्तु तदनाधारत्वेन[२] अन्यथासिद्धम् इति अभिप्रायेण आह **असद्** इति. **ईशरिक्तं सर्वम् असद् अभूद्** इति अर्थः. कार्याकर्तृत्वेन असत्त्वं, तेषां फलसाधकत्वमेव रूपम् इति. तदभावो वा, ततएव तत्प्रसिद्धेः. अत्र[३] असाधकत्वे दृष्टान्तम्

प्रकाशः

**तद्वै धनुः** इत्यत्र. **प्राप्ताप्राप्तविवेकेन** इति, कार्यनिष्पत्तिकारणत्वेन किं प्राप्तं किं वा अप्राप्तम् इति विचारेण. **इदानीन्तु** इत्यादि. व्यतिरेकदशायां तु **तद्** धनुरादिकम् **आधारत्वेन** ईशाधारत्वेन हेतुना **अन्यथासिद्धं** तत्स्वरूपस्य स्वातन्त्र्येण अन्वय-व्यतिरेकाभावाद् ईशशक्त्यैव तद्ग्रहणात् स्वरूपतो जयाकारणत्वेन सिद्धम् इति अर्थः. **तदभावो वा** इति. स्वरूपाभावएव वा असत्त्वम् इति अर्थः. फलसाधकत्वस्य[४] तद्रूपत्वे मानम् आहुः

लेखः

व्याख्यातम्. **कीर्तयन्ति** इति. यान् धनुरादीन् **नृपतयः कीर्तयन्ति** इति अर्थः. **अन्वयव्यतिरेकाभ्याम्** इति. ताभ्यां यत् **प्राप्तं** तदेव न्यायप्राप्तं, यत् ताभ्यां न प्राप्तं तद् न न्यायप्राप्तम् इति **विवेकेन** इति अर्थः. **तदाधारत्वेन** इत्यत्र **तदनाधारत्वेन** इति पाठः प्रतिभाति. भगवदनाधारत्वेन इति अर्थः. यथापाठं तु श्रीपुरुषोत्तमैः व्याख्यातम्. **कार्याकर्तृत्वेन** इति, आयुधादीनां कार्याक्षमत्वेन इति अर्थः. अस्मिन् अर्थे औपचारिकम् असत्त्वं सिद्ध्यति इति पक्षान्तरम् आहुः **तेषाम्** इत्यादि. **तदभावः** इति. फलसाधकत्वमेव हि आयुधादीनां स्वरूपं, तत्त्वाभावे च स्वरूपतएव तदसत्ता उक्ता भवति इति अर्थः. अत्र हेतुः **ततएव** इत्यादि. फलसाधकत्वरूपादेव

१. अग्न्युपगमे इति ख. २. तदाधारत्वेनेति ख-ग-प्रकाशे. तदाराधकत्वेनेति घ - सम्पा.

३. अत्रेति नास्ति ग. ४. फलसाधकस्य इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

आह लोक-वेदभेदेन द्वयम्. लोकेऽपि[१] स्ववृत्ति-सेवाभ्यां द्वयं, वेदे तु तत्समुदितम् एकत्रैव द्वयम्, अतो दृष्टान्तत्रयम् आह. तत्र वैदिको दृष्टान्तः **भस्मनि हुतम्** इति. ''यदि पूर्वस्यामाहुत्यां[२] हुतायां यजमानो[३] म्रियेत, दक्षिणतः शीते भस्मनि उत्तरामाहुतिं निनयेद् भस्मोत्करं वा गमयेद्'' (आप.श्रौ.सूत्र ९।११।१८) इति भस्मनि होम उक्तः. स यथास्थितइति असति विनियुज्यते. तथा गोपेषु अस्माभिः विनियुक्तः इति अर्थः. न वा[४] ईश्वराराधनं, न वा धर्मः. लोके ईश्वराराधनम् अस्ति तेन कार्यं सिद्ध्यति तत् कार्यम् 'ईश्वरराद्धम्'[५] इति उच्यते. स चेद् ईश्वरः **कुहको** भवेत्, तत्फलम् असद् भवेत्, कुल्माषदानवत्[६]. अनेन अधिष्ठातृदेवानां विपरीतफलदानेन असत्त्वम् उक्तम्. एवं फलवैफल्यं साध्यवैफल्यं च उक्त्वा साधनवैफल्यम् आह **इवोप्तम् ऊष्याम्** इति. **ऊषी** ऊषररूपा पृथिवी, गौरादित्वाद् ङीष्. सा हि बीजशक्तिदाहिका. तत्र गतं बीजं स्वरूपतोऽपि नश्यति[७]. तथा अत्रापि लौकिकरथित्वमपि गतम् इति अर्थः ॥२१॥

एवं द्वितीये उत्तरम् उक्त्वा प्रथमस्य उत्तरम् आह.

---

प्रकाशः

**ततएव** इत्यादि. **स्थितइति** इति, अवशिष्टः इति हेतोः इति अर्थः. **विनियुक्तः** इति, धनुरादिः विनियुक्तः. **कुहकः** इति सकपटः. **फलवैफल्यम्** इत्यादि. परिग्रहरक्षाभावेन आराधनवैयर्थ्यं, **साध्यवैफल्यं** रक्षावैयर्थ्यं, **साधनवैफल्यं** धन्वादिवैयर्थ्यम् ॥२१॥

**राजन्** इत्यत्र. **द्वितीये** इति स्वास्वास्थ्ये. **प्रथमस्य** इति सर्वप्रश्नस्य ॥२२-२३॥

लेखः

आयुधादीनां प्रसिद्धेः इति भावः. **यदि पूर्वस्याम्** इति. ... ॥२१॥

**राजन्** इत्यस्य आभासे. **एवं द्वितीये** इत्यादि. अर्जुनशोकहेतु-प्रश्नोत्तरम्

---

१. लोकेऽपीत्यादिः पङ्क्तिर्नास्ति ग. २. अहुतायां हुतायां वेति क-ख-घ. ३. यजमाने इति ख. ४. वेति नास्ति ख. ५. ईश्वराराधनमिति ख-घ. ६. द्रष्ट. ''कुल्माषान् कुत्सितान् माषान्'' इति छान्दो.उप.शांकरभा. १।१०।२ इत्यत्र - सम्पा. ७. विनश्यतीति घ-ङ.

**राजंस्त्वयानुपृष्टानां सुहृदां नः सुहृत्पुरे ॥**
**विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥२२॥**
**वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम् ॥**
**अजानतामिवान्योन्यं चतुःपञ्चावशेषिताः ॥२३॥**

**राजन्** इति. **(नः!) सुहृदां** यत् कुशलं पृष्टं **सुहृत्पुरे** तत्र उत्तरं— शापो जातः. ततो **विप्रशापविमूढानां** देशान्तरे गत्वा **मुष्टिभिः विनिघ्नताम्. मिथो** युद्धे हेतुः **वारुणीं मदिरां पीत्वा** इति. अमृतमथनाद् उद्भूता मदिरा वारुणी. सा तालाद्यधिष्ठिता तालप्रभूता **वारुणी** इति उच्यते. तेन **मदेन उन्मथितचेतसां** गतविवेकानां मध्ये **चतुःपञ्चावशेषिताः** इति सम्बन्धः. चतुर्भिः युक्ताः पञ्च **चतुःपञ्च** ; नवद्रव्येषु यादवशरीरसङ्घातं प्रविष्टेषु चतुर्विधैः परमाणुभिः सह आकाशादयः पञ्च उर्वरिताः. ननु स्नेहस्य बाधकत्वात् कथम् एवम्? अतः आह **(अन्योन्यम्!) अजानताम्** इति. युद्धार्थं ज्ञानम्, अन्यार्थम् अज्ञानम् इति **इवार्थः** ॥२२-२३॥

अत्र कर्तारं सम्भावयति **प्रायेण** इति.

**प्रायेणैतद् भगवत ईश्वरस्य विचेष्टितम् ॥**
**मिथो निघ्नन्ति भूतानि रक्षयन्ति च यन्मिथः ॥२४॥**

सर्वकर्तृत्वेन रक्षकत्वेन च भगवत्कर्तृत्वं निश्चीयते. कालेनापि सम्भवति

---

प्रकाशः

**निश्चीयते** इति, अत्रापि निश्चीयते ॥२४॥

लेखः

उक्त्वा यादवकुशल-प्रश्नस्य उत्तरम् आह इति अर्थः. व्याख्याने **नवद्रव्येषु** इति. यादवशरीर-सङ्घातारम्भकत्वेन तेषु प्रविष्टानि यानि नवद्रव्याणि तन्मध्ये चतुर्भिः परमाणुभिः सह आकाशादयः पञ्चैव कारणीभूताः उर्वरिताः इति अर्थः. एवञ्च येभ्यो वंशवृद्धि-ज्ञानभक्तिरक्षणादि-कार्यं सम्पादनीयम् तेएव कारणत्वेन रक्षिताः ब्रह्माण्डकारण-परमाण्वादिवद्, ये च अग्रे कार्योत्पादकत्वेन अनभिमताः ते निष्कारणत्वात् न रक्षिताः घटादिवद् इति भावः ॥२२-२३॥

इति **प्रायग्रहणम्**. तत्रापि भगवतो विद्यमानत्वाद् उत्कटकोटिः. दृष्टार्थम् अन्यथात्वेन व्याख्यास्यन् सर्वत्रैव लोककर्तृकं कार्यं भगवत्कार्यम् इति आह **मिथो निघ्नन्ति** इति. तुल्यानां मारण-रक्षणे[१] प्रयोजककार्ये, स्वतः उत्कर्षापकर्षाभावात्. **चकाराद्** उत्पादयन्ति. पुत्रगृहे स्वयम् उत्पन्नः पिता पुत्रत्वम् आपद्यते ॥२४॥

ननु प्रकृते कथं भगवत्कार्यत्वं, श्रुत्यप्रतिपादितत्वाद् इति आशङ्क्य आह.

**जलौकसां जले यद्वन्महान्तोऽदन्त्यणीयसः ॥**
**दुर्बलान् बलिनो राजन् महान्तो बलिनो मिथः ॥२५॥**
**एवं बलिष्ठैर्यदुभिर्महद्भिरितरान् विभुः ॥**
**यदून् यदुभिरन्योन्यं भूभारान् सञ्जहार ह ॥२६॥**

**जलौकसाम्** इति. यथा मत्स्यानाम् अग्निशापविमूढानाम् अन्योन्य-घातकत्वं – मात्स्यो न्यायो **महान्तो अदन्ति अणीयसः** इति – तथा प्रकृते **दुर्बलान् बलिनः**. **राजन्** इति सम्मत्यर्थम्. **महान्तः (बलिनो मिथः!)** तु अन्योन्यं परस्पराघातेन मृताः. उपसंहरति **एवं बलिष्ठैः** इति. **बलिष्ठैः महद्भिः इतरान्** अबलिनो अमहतः. ननु सर्वे भगवता मारणीयाः ; ते कथम् अन्योन्यं मृताः ? तत्र आह **विभुः** इति, सर्वकरणसमर्थः तैरेव तान् मारितवान्. महान् साधनैः करोति, महत्तरस्तु आज्ञया,

लेखः

**प्रायेण** इत्यत्र. **उत्कटकोटिः** इति. अतएव **प्रायग्रहणम्** इति भावः. **दृष्टार्थम्** इति, मौसलरूपम् **अन्यथात्वेन** जीवदोषत्वेन इति अर्थः. **तुल्यानाम्** इति, **मारणलक्षणे** कार्ये **तुल्यानाम्** इति अर्थः. **प्रयोजक** इति, प्रयोजकस्य भगवतः कार्ये इति अर्थः. **उत्पादयन्ति** इति, निघ्नन्ति उत्पादयन्ति च इति अर्थः ॥२४॥

**जलौकसाम्** इत्यत्र. **अग्निशापविमूढानाम्** इति. ... . **मात्स्यो** इति. अन्योन्यभक्षणे मत्स्यन्यायएव मानम् इति अर्थः ॥२५-२६॥

१. मारणलक्षणे इति लेखकृतां पाठः - सम्पा.

विभुः इच्छया. **अन्योन्यम्** इति. यथा विवाहे उत्सवादिषु अन्योन्यपरिवेषणं तथा मारणं जातम् इति अर्थः ॥२५-२६॥

एवं सामान्याकारेण सङ्क्षेपतः कथाम् उक्त्वा विस्तरेण कथनीयम् इति आकाङ्क्षायां पुनः त्यक्तधर्मविशिष्ट-भगवत्स्मरणेन वैक्लव्ये जाते वक्तुं न शक्यते इति आह.

**देशकालार्थयुक्तानि हृत्तापोपशमानि च ॥**
**हरन्ति स्मरतश्चित्तं गोविन्दाभिहितानि मे ॥२७॥**

**देशकालेति. देश-कालाभ्यां** विशेषिताः ये **अर्थाः तद्युक्तानि**[१] नीतिवाक्यानि, **हृत्तापोपशमानि, च**कराद् भगवन्माहात्म्यबोधकानि —एवं त्रिविधान्यपि वाक्यानि पूर्वमेव (**गोविन्दाभिहितानि!**) भगवता बोधितानि. देशकालानुसारेण सर्वं कर्तव्यम् इति नीतिः. आत्मनिष्ठतया बाह्यधर्माः त्यक्तव्याः. भगवद्विषयकमोहो भगवन्माहात्म्यज्ञानात् त्याज्यः. तानि वाक्यानि भगवदुक्तानि साम्प्रतं (**स्मरतः!**) स्मृतानि सन्ति **चित्तं हरन्ति.** अर्थानुसन्धाने हि शोकापनोदस्वरूपेणैव शोकजनकत्वं, भगवदीयत्वात्. तस्मात् शब्दप्राबल्यात् शोकेन तूष्णीम्भावः ॥२७॥

**॥ सूतः उवाच ॥**

**एवं चिन्तयतो जिष्णोः कृष्णपादसरोरुहम् ॥**

---

प्रकाशः

**देशकालेत्यत्र. भगवदीयत्वाद्** इति, वाक्यानां भगवदीयत्वात्. भगवान् हि अन्यत् करोति अन्यत् सम्पद्यते, तथा वाक्यान्यपि इति अर्थः. अत्र तूष्णीम्भावः कण्ठतो अनुक्तोऽपि अग्रे चिन्तनोक्त्या अर्थबलादेव पूर्ववाक्यशेषत्वेन अवगन्तव्यः ॥२७॥

लेखः

**देशकाल** इत्यत्र. **अर्थानुसन्धाने** इति. गीतादिवाक्यार्थानुसन्धाने सति यद्यपि शोकापनोदः उचितः, तत्तु प्रत्युत तेनैव रूपेण शोकोत्पादनेन विपरीतं जातं, अर्थापेक्षया वाक्यानां साक्षात्सम्बद्धत्वेन प्राबल्याद् इति अर्थः ॥२७॥

---

१. तद्युक्तानीतिवाक्यानीति क-घ.

**सौहार्देनातिगाढेन शान्तासीद् विमला मतिः ॥२८॥**

**एवं** धर्मपुरस्सरं[१] स्मृतेन भगवता[२] भक्तिजननाद्, भक्त्या च (**कृष्णपादसरोरुहं चिन्तयतो जिष्णोः!**) भगवच्चरणारविन्दस्मरणे दृढप्रेमोत्पत्तौ (**अतिगाढेन सौहार्देन!**) जीव-भगवतोः सान्निध्ये सति सत्त्वगुणावेशात् परमानन्दाविर्भावात् च रजस्तमोदोषेषु अपहृतेषु **शान्ता विमला** च (**मतिः!**) बुद्धिः **आसीत्. शान्ता** सत्त्वेन, **विमला** अन्ययोः अपगमेन. **मतित्वात्** स्वभावतएव[३] ज्ञानरूपत्वम्. एतत्सर्वं जातम् इति आह **एवम्** इति ॥२८॥

ननु आपाततः शोकापगमेऽपि सुषुप्ताविव सर्वथा न अपगतइति ज्ञानप्रकाशम् आह **वासुदेवेति**. आत्मस्वरूपज्ञानं भगवत्स्वरूपज्ञानं च न उपदेशसापेक्षं[४], प्रमाण-वस्तु-परतन्त्रत्वात्. परं प्रमाण-वस्तुनोः आवरणं दूरीकर्तव्यम्. तत्र प्रमाणावरणं दूरीकृतमिव, रजस्तमसोः अपगमेन सत्त्वप्राकट्यात्. जीवात्मावरणं माया, भगवदावरणं भगवदिच्छा. तत्र जीवावरणं भक्तिसहित-ज्ञानेन अपगच्छति. भगवन्माहात्म्यज्ञानपूर्वक-भगवद्विषयक-परमप्रेम्णा भगवत्सेवायां भगवदावरणम् अपगच्छति. तदा निर्मलदृष्टेः सवितृ-प्रकाश-साक्षात्कारइव भगवत्-स्व-रूपयोः मनसा साक्षात्कारो भवति. तत्र अर्जुनस्य द्वयं जातम् इति आह श्लोकद्वयेन **वासुदेवेति**, शान्ता अपि बुद्धिः सवासना इति पुनरुद्गम-निराकरणार्थम्.

**वासुदेवाङ्घ्र्यनुध्यान - परिबृंहणरंहसा ॥**
**भक्त्या निर्मथिताशेष-कषायधिषणोऽर्जुनः ॥२९॥**

---

प्रकाशः

**एवम्** इत्यत्र. **स्वभावतएव ज्ञानरूपत्वम्** इति. "बुद्धिर्विज्ञानरूपिणी" (भाग.पुरा. २।१०।३३) इति वाक्याद् विशिष्टज्ञान-समानाकारत्वम् ॥२८॥

**वासुदेवाङ्घ्रीत्यत्र. भगवत्-स्व-रूपयोः** इति, जीव-परमात्मनोः इति अर्थः. **जीव-भगवत्स्वरूपयोः** इति वा पाठः प्रतिभाति.

---

१. धर्मपुरःस्मृतेनेति ख. २. भगवत इति क-ग. ३. एवेति नास्ति ख. ४. सापेक्षकमिति घ.

**वासुदेवाङ्घ्र्यनुध्यानस्य** यत् **परिबृंहणम्**[1] आलिङ्गनं तदेव **रंहो** वेगो यस्याः तादृशभ**क्त्या निर्मथिता** उद्धृतसाराः, स्वरूपेण नाशिता वा, **अशेषकषायाः** यस्याः तादृशी **धिषणा** यस्य सो **अर्जुनो** जातः इति अर्थः. अनेन सवासनं बुद्धेः आवरणं गतम् इति उक्तम् ॥२९॥

जीवावरणदूरीकरणार्थम् उपायम् आह.

**गीतं भगवता ज्ञानं यत् तत् सङ्ग्राममूर्धनि ॥**
**कालकर्मतमोरुद्धं पुनरध्यगमद् विभुः ॥३०॥**

**गीतम्** इति. शुद्धे हि अन्तःकरणे प्रमाणेन उत्पादितं ज्ञानम् आत्मावरणं दूरीकरोति. तत् पूर्वमेव गीताख्येन प्रमाणेन भगवतोपदिष्टेन ज्ञानं जातमेव अस्ति, परं ( **सङ्ग्राममूर्धनि !** ) **काल-कर्म-तमोभिः** त्रिगुणात्मकैः ( **रुद्धं !** ) सज्ञाना[2] बुद्धिः आवृता. तद् इदानीम् आवरणापगमे स्वयमेव ज्ञानं जातम् इति आह **गीतम्** इति. गीतायां **भगवता** उक्तं **ज्ञानं यत् तत् पुनः अध्यगमद्** इति सम्बन्धः. ननु वृत्तिरूपं ज्ञानं त्रिक्षणावस्थायी इति सकारणस्य तस्य स्वतः तिरोहितत्वाद् गतं कथं प्राप्तवान्? अत आह **विभुः** इति, समर्थत्वाद् ज्ञानतिरोभावं दूरीकृतवान्[3] इति अर्थः ॥३०॥

ततो यथा आत्मावरणं दूरीभूतं तद् आह क्रमेण.

**विशोको ब्रह्मसम्पत्त्या सञ्छिन्नद्वैतसंशयः ॥**
**लीनप्रकृतिनैर्गुण्याद् अलिङ्गत्वादसम्भवः ॥३१॥**

**विशोकः** इति. ज्ञाने **ब्रह्मसम्पत्तिः** जाता, "ब्रह्म वेद ब्रह्मैव

---

प्रकाशः

**सो अर्जुनो जातः** इति. "वलक्षो धवलो अर्जुनः" ( अग्निपुरा. ३६०।५३ ) ; शुद्धो जातः इति अर्थः ॥२९॥

**त्रिक्षणावस्थायी** इति मतान्तरानुसारेण पूर्वपक्षतया उक्तं, मूले ज्ञानस्य रुद्धत्वकथनेन चिरकाल-स्थायित्वस्यैव अभिप्रेतत्वाद्, **ज्ञानतिरोभावं दूरीकृतवान्** इति पुनःप्राप्तिस्वरूप-व्याख्यानात् च इति ज्ञेयम् ॥३०॥

**विशोकः** इत्यत्र. **ततः** इति ज्ञानानुसन्धानानन्तरम्.

---

१. परिबृंहनमिति क. परिबृंहितमिति घ. २. सज्ञानबुद्धिरिति क. ३. दूरीकृतमिति क.

भवति'' (मुण्डकोप. ३।२।९) इति. शोको हि विषयाऽप्राप्त्येति ब्रह्मत्वेन सर्वविषयप्राप्तौ सत्यां शोकाभावइति सर्वविषयप्राप्तिम् आह **सञ्छिन्नद्वैतसंशयः** इति. सम्यक् छिन्ना द्वैतप्रपञ्चे देहादौ संशया यस्य, स्वस्यैव सर्वरूपत्वे न कोऽपि सन्देहो भवति इति. अथवा द्वैते[1] सर्वत्र आत्मनः प्रवेशात् – सर्वत्र अस्य आत्मनः स्वरूप-नाश-संशयाः स्थिताः सखण्डभावात् ; तद् आत्मनो ब्रह्मभावाद् अन्तःप्रवेशेन – बहिःसम्बन्धसन्देहाः निवारिताः इति अर्थः. ननु बाह्ये विषये स्थिते पुनःसम्बन्धेन संशयाः भविष्यन्ति इति आशङ्क्य आह **लीनप्रकृतीति. लीना** या **प्रकृतिः,** तया कृत्वा जातं यद् **नैर्गुण्यं** निर्गुणावस्था, तया कृत्वा (**अलिङ्गत्वाद्!**) लिङ्गापगमे जाते मूलदोषाणां निवृत्तत्वाद् **असम्भवः** न पुनरुद्गमः इति अर्थः. अतः उद्गमाभावादेव न सम्बन्धः, लिङ्गस्य च निवृत्तत्वात्. एवं सर्वदोषापगमपूर्वक-ब्रह्मभावे जाते सर्वे शोकाः निवृत्ताः[2] इति भावः ॥३१॥

एवम् अर्जुनस्य कृतार्थत्वम् उक्त्वा राज्ञः कृतार्थत्वं वक्तुं तस्य अध्यवसायम् आह.

**निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च ॥**
**स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥३२॥**

**निशम्य** इति. **भगवन्मार्गं** ज्ञात्वा, वैकुण्ठे गतः इति, **यदुकुलस्य च संस्थां** मृत्युं, **स्वःपथाय** देवमार्गाय **निभृतात्मा** दृढान्तःकरणः गन्तुं **मतिं चक्रे** इति अर्थः ॥३२॥

क्रमेण मुक्तिं वक्तुं पृथायाः मुक्तिम् आह.

**पृथाप्युपश्रुत्य धनञ्जयोदितं नाशं यदूनां भगवद्गतिञ्च ताम् ॥**
**एकान्तभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥३३॥**

कुन्ती (**उपश्रुत्य!**) तदैव पूर्वोक्तं श्रुत्वा (**एकान्तभक्त्या अधोक्षजे**

प्रकाशः

**अन्तःप्रवेशेन** इति सर्वान्तःप्रवेशेन. **असम्भवः** इति न विद्यते संशयानां सम्भवो यस्मिन् इति सप्तम्यर्थे बहुव्रीहिः. **न पुनरुद्गमः** इति तात्पर्यार्थः ॥३१॥

१. अद्वैते इति घ. २. निवृत्ता जाता इति क.

**निवेदितात्मा!**) भगवच्चित्ता[१] परमप्रेम्णा आविर्भूते **भगवति** सायुज्यं प्राप्ता (**संसृतेः उपरराम!**) शरीरं जहौ इति अर्थः ॥३३॥

ननु भगवता किमर्थम् एवं कृतं? तत्र आह **यया अहरद्** इति, भगवतो यादवोपसंहारे आत्मत्वाद् न दोषभावः[२] इति वक्तुम्.

**ययाहरद् भुवो भारं तां तनुं विजहावजः ॥**
**कण्टकं कण्टकेनेव द्वयञ्चापीशितुः समम् ॥३४॥**

**यया** यादवतन्वा सहायार्थम् आनीतया **भुवो भारम् अहरत् तां तनुं विजहौ.** क्लेशाभावार्थम् आह **अजः** इति, नहि तेन जातो अस्ति. तत्र दृष्टान्तम् आह **कण्टकम्** इति. सर्वथा आत्मीयाभावः सूचितः. तथापि अभिमानिनां जीवानां क्लेशात् कथम् एवम्? अत आह **द्वयं चापि ईशितुः समम्** इति. नियन्तुः द्वयं समम् ॥३४॥

भगवति विशेषम् आह **यथा** इति.

**यथा मत्स्यादिरूपाणि धत्ते जह्याद् यथा नटः ॥**
**भूभारः क्षपितो येन जहौ तच्च कलेवरम् ॥३५॥**

**यथा नटः** स्वरूपमेव नानाविधक्रीडार्थं स्त्र्यादिरूपेण प्रदर्शयति,

प्रकाशः

**यया अहरद्** इत्यत्र. आभासे **आत्मत्वाद्** इति, नियन्तृत्वाद् इति अर्थः. **न दोषभावः** इति, अत्र **न दोषः** इत्येव पाठः प्रतिभाति. **विजहौ** इति. तथाच कार्ये निवृत्ते प्रयोजनाभावाद् एवं कृतम् इति अर्थः. **द्वयम्** इति, भूभारभूत-तनुः[३] तद्धर्तृ-तनुश्च[४] इति द्वयम्. अत्र तयोः तन्वोः सत्यत्वं, कण्टकदृष्टान्ताद् द्वयोः साम्यकथनात् च अनित्यत्वं परम् ॥३४॥

१. भगवच्चिन्तेति ख.   २. दोषाभाव इति क-ग.

३. अत्र भगवतो भूभारभूततनुः इति न भुवि भारभूता भगवत्तनुः इति आशयः किमुत "एको देवो बहुधा निविष्टो यदा भारं तन्द्रयते स भर्तुं निधाय भारं पुनरस्तमेति" (तैत्ति.आर. ३।१४।१) इति श्रुत्युक्ता भूभाररूपा यस्यां तनौ सा भूभारभूततनुः इति आशयः - सम्पा.

४. तद्वर्तितनुश्च इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

निवृत्ते च कार्ये तानि रूपाणि उपसंहरति, एवम् इदमपि इति अर्थः ॥३५॥

एतत्कथनस्य प्रकृतोपयोगं वक्तुम् आह **यदा मुकुन्दः** इति. सर्वेषां मोक्षदानार्थम् अवतीर्णो भगवान् दत्वा मोक्षं यदा निवृत्तः तदा मोक्षबाधकत्वेन कलिधर्माणां निरूपणात् तेषु आगतेषु स्थितस्य मोक्षो नास्तीति निर्गमनमेव शरणम् इति कालव्याप्तिरहितदेशं प्रति – तदतिरिक्तहेतोः भागवतादेः अभावाद् – भगवतैव सह गन्तव्यम् इति मतिं कृतवान् इति आह **यदा मुकुन्दः** इति.

कलिः कालमलं सर्वं कालस्वामी तु माधवः ॥
यतो निवर्तते तत्र वह्नाविव निकृष्टता ॥(९)॥

---

प्रकाशः

**यथा** इत्यत्र. **एवम् इदमपि** इति. तथाच भूभार-क्षपणार्थं यो मर्त्यवेशः तमपि इति अर्थः. अत्र कलेवरस्य अवस्तुत्वं त्यक्तरि नटदृष्टान्तात् "कृष्णो ह्यत्यक्तदेहोपि त्यक्तदेहस्य देहवद्, आत्मानं दर्शयामास स्वरूपसदृशाकृतिम्" (ब्रह्माण्डपुरा. ) इति ब्रह्माण्डवाक्याच्च ज्ञेयम् ॥३५॥

**यदा मुकुन्दः** इत्यत्र. निर्गमनस्यैव शरणत्वे हेतुः **तदतिरिक्ते**त्यादि. **प्रत्यन्तस्य गन्तव्यपदेन** अन्वयः.

सर्वेषु युगेषु कालत्वाऽविशेषेऽपि कलिधर्माणामेव मोक्षबाधकत्वं, तथा सर्वेषु देशेषु देशत्वाऽविशेषेऽपि देशविशेषस्य कुतः तद्व्याप्तिराहित्यं, येन युधिष्ठिरस्य तत्र गमने बुद्धिः, इति आकाङ्क्षायां व्याख्येय-श्लोकद्वयस्य तात्पर्यम् आहुः **कलिः** इत्यादि. "त्वं 'कालमल' इत्युक्तो मले शुद्धिर्न विद्यते" (ब्रह्मवैवर्तपुरा. ) इति ब्रह्मवैवर्तीय-काशीमाहात्म्ये कलिं प्रति ब्रह्मणो वाक्यात् **कलिः कालमलम्**. अतो मलत्वरूपाद् विशेषात् तद्धर्माणां मोक्षबाधकत्वम् इति भावः. कालस्य सर्वोपादानत्वात् **सर्वं** कालः. तेन मूलस्य[१] सर्वत्र व्याप्तिसम्भवेऽपि स्वामी **कालस्वामी तु माधवः** कालोपादेयाद् **यतो** यस्माद् देशाद् **निवर्तते** तिरोहितो भवति

---

१. मलेति पाठः.

दारौ(?) तु[१] न तथा तेन देशान्तरगतिर्मता ॥
अग्निभावेऽपि काष्ठेन स साध्य इति निश्चयः ॥(१०)॥

**यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ॥**
**तदाहरेवाप्रतिबुद्धचेतसाम् अभद्रहेतुः कलिरन्ववर्तत ॥३६॥**

**मुकुन्दो भगवान्** इति वचनाद् मुक्त्यर्थमेव भगवदवतारः इति उपसंहारः. यद्यपि भगवतो नित्यसम्बन्धात् क्वापि त्यागो नास्ति तथापि प्रकटित-परमानन्दरूपस्य परिच्छिन्नतया[२] प्रदर्शनात् **तन्वा जहौ** तनुद्वारा जहौ इति अर्थः. भूमित्यागस्य पूर्वम् अनुक्तत्वाद् नटवत् च तनुत्यागस्य

प्रकाशः

**तत्र** तस्मिन् देशे **निकृष्टता.** तत्र दृष्टान्तः **वह्नौइव** इति. यथा निवृत्ते वह्नौ पार्थिवस्य भस्मतया निकृष्टता, भस्मनो अग्निपुरीषत्वाद्, "अग्नेर्भस्मासि अग्नेः पुरीषमसि" (मैत्रा.संहि. २।७।११) इति श्रुतेः. तर्हि देशान्तरस्य कथं शुद्धत्वं? तत्र आहुः **दारौ** इत्यादि, तदन्तर्वह्नेः सत्त्वेन **न तथा** न[३] निकृष्टता. एवं देशान्तरे अन्तः भगवतः सत्त्वेन न निकृष्टत्वम्. अतो **देशान्तरगतिः** युधिष्ठिरस्य **मता** बुद्धौ आरूढा इति अर्थः. **दारौ** इति पुल्लिङ्गनिर्देशस्तु लिङ्गस्य लोकाश्रयत्वेन अशिष्यत्वात् "नित्यं शलाका स्त्रियाम्" (पाणि.लिङ्गानुशा. ३४) इति ज्ञापकात्. ननु भगवत्सत्तयैव चेत् निकर्षाभावः तर्हि भक्तत्वेन युधिष्ठिरेऽपि तत्सत्त्वात् निर्गमनम् अनर्थकम् इति आकाङ्क्षायाम् आहुः **अग्निभावेऽपि** इत्यादि. यथा अरणौ वह्निसत्त्वेऽपि **काष्ठेन** मथनद्वारा प्रकाशनात् **स** (अग्निः) **साध्यः** तथा अत्र भगवत्सत्त्वेऽपि देशान्तरगत्या स प्रकाश्यः **इति** हेतोः युधिष्ठिरस्य गमन**निश्चयः** इति अर्थः (९-१०).

ननु भगवतो व्यापकत्वात् पूर्वोक्तं सर्वम् असम्भवि इत्यतः आहुः **यद्यपि** इत्यादि. केचिद् अत्र "स्वतन्वा सह महीं जहौ" इति व्याकुर्वते, तद् दूषयन्ति **भूमी**त्यादि. तथाच एवं व्याख्याने **जहौ** इति त्यागवाचकपदे

१. दारौ तु इत्यत्र दारुणि इति पाठः सम्भाव्यते - सम्पा. २. अपरिच्छिन्नतयेति क.

३. मुद्रितपाठे न नास्ति. कि.पाठे तु अस्ति - सम्पा.

उक्तत्वात् त्यक्तस्य वस्तुत्वाभावाद् अपूर्वविधौ अनुवादे वा सहार्थतृतीया न सम्भवति. ननु अग्रे उत्पतस्यमानानां भक्तानां कथम् उद्धारः इति आशङ्क्य आह **श्रवणीयसत्कथः** इति. **तदा** तस्मिन् इति अर्थे अव्ययम्. **अहः** इति लुप्तसप्तम्यन्तम्, अव्ययं वा. प्रातःकाले भगवद्गमनम् इति सम्प्रदायविदः ; तदैव प्रातःकाले कलिः प्रवृत्तः. ननु भगवत्कृपावलोकितानां भगवन्मार्गानुवर्तिनां विद्यमानत्वात् कथं कलिप्रवृत्तिः इत्यतः आह **अप्रतिबुद्धचेतसाम् अभद्रहेतुः** इति. न सर्वार्थं तदा गमनम्. प्रकर्षेण विकसितकमलानां मुकुलसम्भावना-रहितानाम् अस्तमयेऽपि न काचित् क्षतिः ; अन्येषाम् अस्तमये अन्धकारादिना कीटनिवासः स्यादेव. ज्ञानेन विकासः, भक्त्या मुकुलसम्भावनाभावः ॥३६॥

तर्हि स्वस्य न काचित् चिन्ता इति आशङ्क्य आह.

**युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि ॥**
**विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥३७॥**

**युधिष्ठिरः** इति, विकलत्वाद्यभावेन दृढस्थित्या अविकासं[1] मन्यते

---

प्रकाशः

विध्यनुवाद-वैरूप्यापत्तिः. सा हि अस्य अनुपपद्यमानत्वात् तृतीयायाअपि असम्भवः इति अर्थः ॥३६॥

लेखः

**यदा मुकुन्दो** इत्यत्र. **भूमित्यागस्य** इत्यादि. ... ॥३६॥

**युधिष्ठिरः** इत्यत्र. **विकलत्वाद्यभावेन** इत्यादि. गृहपशुपुत्रादि-विषये **विकलत्वाद्यभावेन**[2], गृहादौ **दृढस्थित्या** लोकस्य **अविकासं मन्यते** तत्साजात्येन, **युधिष्ठिरादीनपि तथा** मत्वा तत्रापि प्रवृत्तः इति अर्थः ॥३७॥

---

१. अविकाशमिति क-ग-घ.

२. इह "इत्थम्भूतलक्षणे तृतीया" (पाणि.सूत्र २।३।२१). तथाच राष्ट्रनगरागार-परिवारशरीरेष्वपि कलिप्रभाव-दर्शनेनापि वैक्लव्याद्यभावेन युधिष्ठिरविषये कलेरपि स्वानुकूल्यमतिः इति आशयः. वस्तुतस्तु कलिकाल-प्रभावदर्शनेन विकलत्वं, स्वपौत्रेण कलिनिराकरणसामर्थ्यञ्च स्थितमेव इति अग्रिमनिरूपणसङ्गतिः - सम्पा.

कालः. स तु युधिष्ठिरादीनपि तथा मन्यते. अतः तद्देशेष्वपि महदल्पप्रभेद-भिन्नेषु (**राष्ट्रे पुरे गृहे आत्मनि!**) राष्ट्र-नगर-गृह-शरीरेषु (**तत्परिसर्पणं!**) प्रविष्टः. अल्पविकासात्[१] च तद् ज्ञातवान् इति आह **बुधः** इति. तत्रापि विचारः — किं स्थातुम् आगतो, द्रष्टुं वा इति. तत्रापि युधिष्ठिरस्य निश्चयो जातः इति आह **विभाव्य** इति. ससामग्रीकस्य समागतत्वात् न इतो गमनं कलेः. तस्य सामग्री — प्रथमतो **लोभः** सर्वदोषाणाम् आश्रयो अन्तःकरणधर्मः. **अनृतं** वाग्दोषः प्रायेण स्वरूपनाशकः, प्रामाण्यकोटेः स्वरूपनिर्वाहकस्य नाशात्. (**जिह्म!**) कुटिलता बुद्धिदोषः, **हिंसा** शरीरस्य. अत्र क्रमे शिष्टं स्वयम् ऊह्यम्. **आदि**शब्देन रोगादयोऽपि. **हिंसाद्यधर्मचक्रं विभाव्य गमनाय** पूर्वोक्तामेव मतिं[२] **पर्यधाद्** इति अर्थः ॥३७॥

अशक्तस्य परित्यागो अनुचितः, त्यक्तानां वासनाजनकत्वाद्, अतः कलिभयाद् युधिष्ठिरगमनम् अनुचितम् इति आशङ्क्य आह.

**स स्वपौत्रं विनयिनमात्मनोऽनवमं गुणैः ॥**
**तोयनीव्याः पतिं भूमेरभ्यषिञ्चद् गजाह्वये ॥३८॥**
**मथुरायां तथा वज्रं शूरसेनपतिं ततः ॥**
**प्राजापत्यां निरूप्येष्टिम् अग्नीनपिबद् ईश्वरः ॥३९॥**

**स स्वपौत्रम्** इति. न[३] हि कलिनिराकरणाऽसमर्थो युधिष्ठिरो गतः, तन्निराकरणार्थं पौत्रस्य स्थापितत्वात्, किन्तु शास्त्रस्य प्रामाण्याद् इति अभिप्रेत्य आह **स्वपौत्रम्** इति. "भ्रातृणाम् एकजातानाम्" (मनुस्मृ. ९।१८२) इति न्यायाद् राज्यदानात् च **स्वे**ति. **पौत्रग्रहणं** पुत्रनामस्थापनार्थम्[४].

प्रकाशः

**युधिष्ठिरः** इत्यत्र. **स तु** इत्यादि. युधिष्ठिरे ज्ञानाऽविकासमन्ता कलिः **युधिष्ठिरादीन्** पाण्डवान् **अपि (तथा!)** भगवत्कृपाऽनवलोकितान् **मन्यते** इति अर्थः ॥३७॥

१. अल्पविकाशाच्चेति क-ग-घ. २. गतिमिति घ.

३. न हीत्यादिरभिप्रेत्याऽऽहेत्यन्तो ग्रन्थो नास्ति ख.

४. नात्र देवक-प्रतिविन्ध्यौ पुत्रौ विवक्षितौ किन्तु अभिमन्युनामस्थापनार्थम् इति आशयः -सम्पा.

**गुणैः** भगवदीयत्वादिभिः **आत्मनो अनवमम्** अन्यूनम्. अनेन दोषाभावः तत्र अधिकः इति उक्तं भवति. हीनस्थापने प्रजाशापः प्रसज्येत. **तोयनीव्याः** समुद्रावरणायाः. अन्ये तु राजानः स्त्रियो वस्त्ररहिताअपि[१] स्त्रिया एकदेश-चरणसंवाहनादिना पतित्वं मन्यन्ते इति सूचितं **नीवी**पदेन. **पतिम्** इति अनुवादः, भगवतैव तदर्थं कृतत्वात्. पतित्वार्थम् इति लक्षणा च स्यात्. अतः स्वयम् (**अभ्यषिञ्चद्!**) अभिषेकमात्रं कृतवान्. (**मथुरायां तथा!**) एवमेव **वज्रम**पि कृतवान्. अनिरुद्धपुत्रो वज्रः. शूरसेनदेशस्यापि पतित्वज्ञापनाय आह **शूरसेनपतिम्** इति. अनेन मर्यादायां यावान् देशः तावान् दत्तः इति उक्तम्. **ततः** तेषां राज्यस्वीकारानन्तरं **प्राजापत्याम् इष्टिं निरूप्य (अग्नीन् अपिबद्!)** प्रव्राजं कृतवान् इति आह. वैश्वानरी प्राजापत्या वा विकल्पेन विहिता. **ईश्वरः** इति तथाकरणसमर्थः ॥३८-३९॥

यथाशास्त्रकरणाद् गृहेएव सर्वपरित्यागस्य उक्तत्वाद् अंशपरित्यागस्य

---

प्रकाशः

**स स्वपौत्रम्** इत्यत्र. नीवीपदसूचितम् अर्थम् आहुः **अन्ये तु** इत्यादि. **स्त्रिया** कृतेन **चरणसंवाहनादिना एकदेशे** भुज्यमाने **वस्त्ररहितायाः अपि स्त्रियः पतित्वं** स्वस्मिन् **मन्यन्ते** इति योजना. **वस्त्ररहिता** इत्यत्र **वस्त्ररहितायाः** इति षष्ठ्यन्तः पाठः प्रतिभाति. षिचो द्विकर्मकत्वाभावेन **स्वपौत्रं पतिम् अभ्यषिञ्चद्** इति प्रयोगानुपपत्तिम् आशङ्क्य तदुपपत्त्यर्थम् आहुः **पतिम्** इत्यादि. अनुवादानङ्गीकारे दोषम् आहुः **पतित्वे**त्यादि. अनुशासनाभावेन द्वितीयायाः चतुर्थ्यर्थे लक्षणाद् धातोः द्विकर्मकत्वकल्पना च स्याद् इति अर्थः ॥३८-३९॥

लेखः

**स स्वपौत्रम्** इत्यत्र. **भ्रातॄणामेकजातानाम्** इति वाक्यं … . **पतिमित्यनुवादः** इति … ॥३८-३९॥

---

१. वस्त्ररहिताया अपि स्त्रियैकदेशे चरणसंवाहनादिनेत्यादिः शोधितो ङपाठः. स च तत्र यथाश्रुतं पाठं संरक्ष्यैव निवेशितः. ततश्च युक्तोऽप्ययं पुस्तकान्तरेऽनुपलम्भान्न मूले निवेशितः.

अशास्त्रार्थत्वात्[१] च सर्वपरित्याग-निरूपणार्थम् आह.

**विसृज्य तत्र तत्सर्वं दुकूलवलयादिकम् ।।**
**निर्ममो निरहङ्कारः सञ्छिन्नाशेषबन्धनः ।।४०।।**

**विसृज्य** इति. देहातिरिक्त-परित्यागः सुगमः, तद् आह. **आदिशब्देन** दुकूल-वलययोः विद्यमानत्वेन ग्रहणं, नतु शेषाभ्यनुज्ञानफलकत्वेन. "चीरवासा" (श्लो. ४३) इति यद् अग्रे वक्ष्यते तत्[२] परित्यागतुल्यत्वेन तज्ज्ञापनार्थम्. त्यक्तानाम् आत्मीयत्वं निराकरोति **निर्ममः** इति. परित्यागाभिमानाभावाय एतद् उक्तम्, अन्तःत्यागाय[३] वा, उभयोः कर्तव्यत्वाद् अन्योन्यं हेतु-हेतुमद्भावात्[४] च. देहस्य सपरिकरस्य त्यागम् आह **निरहङ्कारः** इति, देहे अहन्ता [५]त्यक्ता. ममतायाः स्वरूपतो नाशात् मध्ये तिष्ठति

प्रकाशः

**विसृज्य** इत्यत्र. **अशास्त्रत्वाद्** इति. न विद्यते शास्त्रम् अस्मिन् इति अशास्त्रं, तथात्वाद् = अशास्त्रीयत्वाद् इति अर्थः. ननु शेषाभ्यनुज्ञानङ्गीकारे चीरवासस्त्वोक्तिः विरोत्स्यत इत्यतः आहुः **चीरे**त्यादि. तत्परित्यागतुल्यत्वेन वस्त्रपरित्यागानुकल्पत्वेन वस्त्रपरित्यागज्ञापनार्थमिति न विरोधः इति अर्थः. ननु प्राजापत्येष्टिकथनादिनैव सन्न्यासारम्भे सिद्धे दुकूलादिषु आत्मीयतापि निराकृतैव इति पुनः निर्ममत्वोक्तेः किं प्रयोजनम् अतः आहुः **परित्यागे**त्यादि. ननु अहन्तात्याग-कथनस्य किं प्रयोजनम् अतः आहुः **मध्ये** इति, अहन्तामध्ये ।।४०।।

लेखः

**विसृज्य** इत्यत्र. **आदिशब्देन** इति. सुगमत्वाद् विशिष्य कथनं न इति अर्थः. **विद्यमानत्वेन ग्रहणम्** इति. अत्र राजत्वेन तत्र दुकूल-वलयादीनां सदा सत्त्वात् मुख्यतया वक्तव्यएव इति आशयेन दुकूल-वलययोः विसृज्यत्वेन ग्रहणं ; न एतावता दुकूल-वलयमात्रस्यैव त्यागो अभिप्रेतः, तत्र अशेषाणां देहरक्षानुकूलानां ग्राह्यत्वेन अभ्यनुज्ञापि फलति इति. ननु एवं तदा अग्रे "चीरवासा" इत्याद्युक्तिः कथम्? अत्र आहुः **चीर** इत्यादि ।।४०।।

---

१. अशास्त्रत्वाद् इति पाठः प्रकाशे - सम्पा. २. न तत् परित्यागतुल्यत्वेनेति ग.

३. अन्तस्त्यागाभावाय वेति ख. ४. हेतुमद्भावाच्चेति ख. ५. अहन्ता त्यक्त्वेति क.

देहादिः. तस्य त्यागप्रकारम् आह **सञ्छिन्नाशेषबन्धनः** इति. बाह्यावरणं सम्यक् छिन्नम् इति आह **सञ्छिन्ने**ति. पुत्रादीनाम् उपकारित्वबुद्धिः[१] अधुना निवृत्ता. अतएव न प्रतिबन्धकता ॥४०॥

इदानीम् उर्वरितस्य शरीरमात्रस्य ज्ञान-कर्मभ्यां लयं वक्तुं प्रथमतो ज्ञानेन लयम् आह, अध्यासस्य अज्ञानसाध्यत्वात् तन्निवृत्त्यर्थम्. तत्त्वादिप्रकारेण[२] ज्ञानसाध्यत्वात् तत्प्रकारेणैव निवर्त्यते[३]. भगवत्कृतत्वपक्षे तदाज्ञया परित्यागः, तत्रापि येन क्रमेण भगवता सम्पादितं तत्क्रमकथनं

प्रकाशः

ननु ब्रह्मवादे "मत्तः स्मृतिर्ज्ञानमपोहनं च" (भग.गीता १५।१५) इति वाक्याद् अध्यासस्य ईश्वरकर्तृकत्वात् किमिति कुतो वा त्यागः इत्यतः आहुः **भगवत्कृते**त्यादि. **तदाज्ञया** इति "वाचं यच्छ मनो यच्छ प्राणान् यच्छेन्द्रियाणि च, आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वना" (भाग.पुरा. ११।१६।४२) इत्यादिरूपया. **वाचम्** इत्यत्र. ननु✽ अस्तु आज्ञया अध्यासपरित्यागः, तथापि तन्निवृत्त्यर्थं देहादिलये भावनीये देहस्य अन्नमयत्वाद् "अन्ने प्रलीयते मर्त्यम्" (भाग.पुरा. ११।२४।२२) इति एकादशोक्तप्रकारेण लयो भावनीयः. अथ साग्निकत्वाद् यज्ञावश्यकत्वं तदा "श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति" (भग.गीता ४।२६) इत्यादि गीतोक्तप्रकारेषु केनचित् प्रकारेण होतव्यम्. किमिति अयं वागादि-होमप्रकारः ✽इति आकाङ्क्षायां – साग्नित्वेन द्वितीयस्य आवश्यकत्वेऽपि गीतायां नानाप्रकारकथनात् तेषु नियम्यस्य नियामके होमः सर्वत्र सिद्ध्यतीति प्रकारान् वैकल्पिकत्वाद् अनादृत्य – सिद्धम् आदाय यथाकथञ्चिद् होमेऽपि आज्ञासिद्धिः

लेखः

**वाचम्** इत्यत्र. आभासे **भगवत्कृतत्वपक्षे** इति. "एष उ एव" (कौषीतकिब्रा.उप. ३।९) इति श्रुतेः अध्यासस्य भगवत्कृतत्वमेव इति पक्षे

१. "पुन्नामनरकाद् यस्मात् त्रायते पितरं सुतः, तस्मात् 'पुत्र' इति प्रोक्तः" (मनुस्मृ. ९।१३८) इति परलोके, इहलोके तु वार्धक्ये पालनादिना उपकारित्वबुद्धिः इति – सम्पा.

२. तत्त्वादिप्रकारेणाऽज्ञानसाध्यत्वादिति ख.	३. निवर्तत इति घ-ङ.

चित्तप्रबोधनार्थम् उचितम्. तद् आह.

**वाचं जुहाव मनसि तत्प्राण इतरे च तम् ॥**
**मृत्यावपानं सोत्सर्गं तत्पञ्चत्वे ह्यजोहवीत् ॥४१॥**
**त्रित्वे हुत्वा च पञ्चत्वं तच्चैकत्वेऽजुहोन्मुनिः ॥**
**सर्वमात्मन्यजुहवीद् ब्रह्मण्यात्मानमव्यये ॥४२॥**

**वाचम्** इति. वाक्सम्बन्धेन हि शरीरसम्बन्धः, पुरञ्जनोपाख्याने तथा निरूपणात्. मनसो हि भार्या वाक्. प्राकृती [१]सा. आत्मनो हि वाचः

श्रीगोकुलनाथानां टिप्पणी

पञ्चदशे अध्याये **वाचम्** इत्यत्र. **आत्मनो हि** इति. देवतारूपायाः **वाचो** जीवस्य सम्बन्धः प्राकृत्या **वाचा** हेतुभूतया, जीवसम्बन्धि-वागधिष्ठात्री

प्रकाशः

इति आशयेन आहुः **तत्रापि** इत्यादि. **सम्पादितम्** इति, यस्य यत्सम्बन्धित्वं सम्पादितं **तद् आह** इति तस्माद् हेतोः एतं क्रमम् आह इति अर्थः. सम्बन्धं प्रमाणेन स्फुटीकुर्वन्ति **वागि**त्यादि. तथाच तस्यां हुतायां निमित्तापाये नैमित्तिकस्यापि अपायइति शरीरसम्बन्धोऽपि अपेष्यति इति तदर्थं तथा इति अर्थः. वाचो मनःसम्बन्धित्वाय आहुः **मनसः** इत्यादि. ननु देवपत्नीकथन-प्रस्तावे "वाग्वायोः" (तैत्ति.आर. ३।९।९) इति श्रावणात् कथं मनोभार्यात्वम् इत्यतः आहुः **प्राकृती हि सा** इति. (**हि**!) यतो हेतोः **सा** अत्र हूयमाना **प्राकृती** तेन मनोभार्या वैदिकी इतो अतिरिक्ता

लेखः

इति अर्थः. **पुरञ्जनोपाख्याने** इति. "मुख्या नाम पुरस्ताद् द्वारन्तयाऽऽपणवद् दूदनो विषयौ याति पुरराड् रसज्ञविपणान्वितः" (भाग.पुरा. ४।२५।४९) इति रसज्ञः रसनेन्द्रियं, विपणो वागिन्द्रियं ; ताभ्याम् अन्वितस्यैव मुख्यद्वारभूतस्य मुखस्य आलापान्नभक्षणसामर्थ्यकथनात् तथात्वम् इति अर्थः. **प्राकृती सा** इति. यया वाचा वक्तव्यं प्रतिपद्यते सा मूलभूता इति अर्थः. ननु तर्हि सा पृथक् कुतो न ज्ञायते तत्र आहुः **आत्मनः** इति. आत्मसम्बन्धिन्या

१. हि सा इति पाठः प्रकाशे - सम्पा.

तया वाचा सम्बन्धाद् न पृथङ्निरूपणम्. अस्यां निवृत्तायां सा स्वनिष्ठा स्वतएव भविष्यति. तस्याः निर्बन्धः पश्चाद् वक्तव्यो ''बद्धवाग्'' (श्लो. ४३) इत्यनेन. ईश्वरकर्तृके हि अधीने लयो मुख्यः. तत्र ''दूतीरेव त्वं मनसो असि'' (तैत्ति.संहि. २।५।११।५) इति श्रुतेः मनोऽधीनत्वं

---

श्रीगोकुलनाथानां टिप्पणी

सा इत्येतत्प्रकारकः इति अर्थः. अतो **न पृथक्** तद्धोम**निरूपणं** किन्तु अधिष्ठात्र्यां हुतायां अधिष्ठानरूपा **सा स्वतएव स्वनिष्ठा भविष्यति** इति अर्थः ॥४१॥

प्रकाशः

इति अर्थः. ननु अत्र आहुतिरूपा स्ववक्तव्या वाक्, स्वश्रोतव्या परस्य वाग् वा, देवतारूपा वा? आद्ये ''बद्धवाग्'' (श्लो. ४३) इति अग्रिमवैयर्थ्यापत्तिः, द्वितीय-तृतीययोः तु तन्नियमासम्भवेन आहुतित्वासम्भवः इति शङ्कायां तां निश्चेतुं व्यवच्छिन्दन्ति **आत्मनः** इत्यादि. **तया** इति आहुतिरूपया. **न** इति, न आहुतित्वेन. भगवत्कर्तृकाध्यासपक्षे अयमेव होमप्रकारः आवश्यकः इत्यत्र बीजम् आहुः **ईश्वरे**त्यादि. **हि** यतो हेतोः **ईश्वरकर्तृके** अध्यासे आज्ञया निवर्तनीये **अधीने लयो मुख्यः** अधिकः इनः अधीनः, निरङ्कुशेश्वरः इति यावत्, तस्मिन् लयो मुख्यः तत्सायुज्यसम्पादकः. अतो अयं प्रकारः आवश्यकः इति अर्थः. स तु आहत्य न भवति इति क्रमस्य आवश्यकत्वे यस्य यन्नियतत्वं तद् आहुः **तत्र** इत्यादि. **मनोधीनत्वं** मनो नियम्यत्वम्. **अभिमानिनी** इति

लेखः

**वाचा** स्वकार्यरूपया शब्दात्मिकया प्राकृत्या **वाचा सम्बन्धाद् न पृथक्** निरूप्यते इति अर्थः. **अस्याम्** इति प्राकृत्याम्. **तस्याः** इति, आत्मसम्बन्धिन्याः शब्दरूपायाः इति अर्थः. वागादीनां मनआदिषु लये योग्यतां व्युत्पादयन्ति **ईश्वरकर्तृके** इत्यादि. ईश्वरकर्तृके अधीनत्वे सति अस्य नियन्तरि **लयो मुख्यः** फलपर्यवसायि इति अर्थः. ईश्वरेण सृष्टिकालेएव यस्य यदधीनत्वं निश्चितं तस्य तत्र लयः उचितः इति निष्कर्षार्थः. **तत्र** इति. तेषु मनःप्राणादिषु मध्ये वाचः मनोऽधीनाः.

वाचः. वाङ् नाम काचित् सर्ववागधिष्ठात्री देवता. सा हि अभिमानिनी ; यएव[१] तस्याः निकृष्टत्वं मन्यते, ततएव निवर्तते प्रजापतेरिव. तथा[२] अस्मादपि निवर्तिष्यते[३] इति भावः. तथा मनसोऽपि प्राणाधीनत्वं, तद्गतागतिभ्यां निरूपणात्. यद्यपि प्राणनिरोधे[४] मनसः करणत्वं[५] तथापि अग्रे निरोधकत्वात् तदधीनत्वं, तन्निरोधेन निरुद्धत्वाद् वा. तथाच देहबन्धकापगमः[६]. अतएव

प्रकाशः

सगर्वा. **प्रजापतेरिव** इति. इदम् उपाख्यानं "प्रजापते आशया वै श्राम्यसि" (तैत्ति.ब्रा. ३।१२।२।३) इति श्रुतौ प्रायः अस्ति. एतेन दृष्टान्तेन तस्याः आहूतिसम्पादने तन्निवृत्ते प्रमाणम् उक्तम्. सिद्धम् आहुः **तथा** इत्यादि. **निवर्तयिष्यते** इति भगवता निवर्तनीया. तथाच अस्य आहुतित्वे तत्सम्बन्धेन सर्वाएव वाचः आहुतिभावं प्राप्य निवृत्ताः भविष्यन्ति इति अर्थः. वाचः स्वनियामकाधीनत्वं उक्त्वा[७] तन्नियामके मनसि तथात्वम् अतिदिशन्ति **तथा** इत्यादि. हेतुमुखेन तत्र प्रमाणम् आहुः **तद्गतागतिभ्याम्** इति. "स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वा अन्यत्र आयतनम् अलब्ध्वा बन्धनमेव उपश्रयते, एवमेव खलु सौम्य मनो दिशं दिशं पतित्वा अन्यत्र आयतनम् अलब्ध्वा प्राणमेव उपश्रयते, प्राणबन्धनं हि सौम्य मन" (छान्दो.उप. ६।८।२) इति छान्दोग्यश्रुतौ मनोगतागतिभ्यां मनसः प्राणाधीनत्वनिरूपणाद् इति अर्थः. विपरीतम् उद्भाव्य समादधते **यद्यपि** इत्यादि. **अग्रे** इति निरोधानन्तरम्. ननु तथा सति तौल्याद् आहुतिक्रमस्य वैकल्पिकत्वापत्तिरिति अरुच्या पक्षान्तरम् आहुः **तन्निरोधेन** इत्यादि. प्राणनिरोधेन इति अर्थः. तथापि दोषतादवस्थ्यम् इति फलमुखेन स्मृतिप्रमाणत्वेन आहुः **तथाच** इत्यादि. **तथाच** इति **चो** अवधारणे ; प्राणनिरोधेन मनोनिरोधेएव **देह-सम्बन्धापगमः**. **अतएव** इति, प्राणनिरोधेन मनोनिरोधे[८] देहसम्बन्धापगमादेव.

१. यत एवेति ख. यं येवेति ग. यमेवेति घ-ङ. २. न ह्यस्तादपीति घ. ३. निवर्तयिष्यन्त इति क-ग-घ. निवर्तयिष्यत इति पाठः प्रकाशे -सम्पा. ४. प्राणनिरोधेनेति क-ग-घ.
५. कारणत्वमिति क-घ. ६. देहसम्बन्धापगमः इति पाठः प्रकाशे -सम्पा.
७. मुद्रितपाठे नास्ति. कि.पाठे अधिकम् -सम्पा. ८. मुद्रितपाठे नास्ति. कि.पाठे अधिकम् -सम्पा.

योगशास्त्रे तन्मूलकत्वकथनं देहस्य. **इतरे च तम्** इतरे = अपाने. 'इतरस्मिन्' इति वक्तव्ये **इतरे** इति कथनम् असर्वनामत्वज्ञापकम्. तेन अग्रे मलत्वेन परित्यागकथनाद् भगवत्त्वम् अयुक्तमिति प्राणनियामकत्वेऽपि न भगवद्दृष्टिः कर्तव्या इति सूचितम्. होमकथनं तु पञ्चाग्निविद्यया उत्पादितशरीरस्य ब्रह्मविद्याधिकारोपयोगात् प्रकृतस्य अतथात्वेऽपि भावनया तथात्वसम्पादनार्थं, पूजायां शरीरनिर्माणवत्. प्रयत्नेन ऊर्ध्वानीतस्य[1] वायुना सह ऊर्ध्वम् आगतस्य पुनः अपानेन आकर्षणात् प्राणस्य अपानाधीनत्वम्. सांसर्गिकस्तु वायुः श्वासेन बहिः निर्गच्छति, अन्यथा सोऽपि निर्गच्छेत्. अपानस्तु न[2] प्रयत्नाधीनगतिकः ; तस्य मृत्युरेव नियामकइति मृत्यौ तस्य लयम्[3] आह **मृत्यौ अपानम्** इति. मृत्युनैव हि स ऊर्ध्वं नीयते[4]. केचन

प्रकाशः

**तन्मूलकत्वकथनम्** इति मनोमूलकत्वकथनम्. तथाच फलमेव अस्य प्राणाधीनत्वगमकम्, अतो मनसः प्राणनिरोध-करणत्वं, न प्राणस्य मनोधीनत्व-प्रयोजकम् इति अर्थः. ननु अत्र ईश्वरे होमस्य उपक्रान्तत्वाद् एतस्मिन् तददृष्टौ अस्मिन् होमकथनं विरोत्स्यते इति आशङ्कायाम् आहुः **होमेत्यादि**. **प्रकृतस्य** इति युधिष्ठिरदेहादेः. **तथात्वसम्पादनार्थम्** इति मुक्तिसाधनाधिकार-सम्पादनार्थम्. **पूजायाम्** इत्यादि. यथा एकादशे "अण्वीं जीवकलां ध्यायेत् नादान्ते सिद्धभावितां, तयात्मभूतया पिण्डे व्याप्ते सम्पूज्य तन्मयः" (भाग.पुरा. ११।२७।२३-२४) इत्यादौ पूजायोग्यत्वार्थं भावनया केवलचिदात्मक-देह**निर्माणवद्** इति अर्थः. प्राणस्य अपानाधीनत्वं स्फुटीकुर्वन्ति **प्रयत्नेन** इत्यादि. **वायुना** इति [5]नस्यवायुना. अत्रापि "प्राणो वै ग्रहः सोऽपानेनातिग्रहेण गृहीतो अपानेन हि गन्धान् जिघ्रति" (शतपथब्रा. १४।६।२।२) इति श्रुतिः अनुसन्धेया. ननु प्रमाणस्य अनुपलम्भाद् मृत्योः कथम् अपाननियामकत्वम् इत्यतः आहुः **मृत्युना** इत्यादि. **स ऊर्ध्वं क्रियते** इति, अपानः प्राणकर्षणाय उत्क्षिप्यते. प्राणे अपानाधीनतायाः

१. ऊद्र्ध्वानीतस्य प्राणस्येति क-ख.　२. नकारो नास्ति क.　३. भयमिति ग.

४. क्रियत इति क-घ-प्रकाशे - सम्पा.　५. तस्य वायुना इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

पुनः योगेन प्राणं बलिष्ठं विधाय अपानेन प्राणापकर्षणे कृते पुनः प्राणोत्कर्षणे सापानम् उत्कर्षन्ति, बहिर्गमनाभावाय च अन्योन्यबलिष्ठत्वाद् गतिद्वयनिरोधं च कुर्वन्ति. तस्य प्रकारस्य फलार्थत्वाद् न तत् प्रकृते निरूप्यते. अतः सहजासुरे अपाने प्राणम् अजुहोद्, अपानं तु मृत्यौ इति. ननु तेन प्रकारेण मृत्युना गृहीते अपाने दुर्गतिश्रवणात् किमिति अजुहोत्? तत्र आह **सोत्सर्गम्** इति. तत्र हि मृत्युः अपानः च उत्सर्गे गच्छतः, अत्र तु उत्सर्गसहितस्य अपानस्य मृत्यौ होमात् मृत्योः तेन मार्गेण गमनाभावो अतो न अनिष्टदातृत्वम्. मृत्युरपि अत्रैव लीयते, "मृत्युर्यस्योपसेचनम्" (कठोप. १।२।२५) इति श्रुतेः. ओदनं देहो, मृत्युः घृतम् इत्यतः मृत्युः अत्रैव निरुद्धः, "अशनया मृत्युरेव" (तैत्ति.ब्रा. ३।९।१५।२) इति श्रुतेः. सः सर्वप्राणिषु वर्तते. तस्य प्राणापानौ पोषकौ आहारदान-मलापकरणाभ्याम्. तौ चेत् तत्र निरुद्धौ, देहमात्रपरिनिष्ठो देहाधीनो भवति, पश्चाद् देहं भक्षयितुम् आरभते. तदा तस्य नियामकानि पञ्चमहाभूतानि तं निबध्नन्ति[१]. अतो योगिनो देहो न वर्धते न क्षीयते. एवं पञ्चमहाभूताधीनं मृत्युं प्राप्ताप्राप्तविवेकेन भूतप्रविष्ट-भगवत्कार्यत्वाद् भूतांशं धर्मिणं परित्यज्य

प्रकाशः

साहजिकत्वं बोधयितुं योगिविशेषाणां मतम् अनूद्य परिहरन्ति **केचन** इत्यादि. **तत्र** इति दुर्गतिस्थले. **अत्रैव** इति स्वनियामके. तस्माद् न दुर्गतिः इति अर्थः. स मृत्युः को वा इति अपेक्षायाम् आहुः **अशनया** इत्यादि. तस्य कथं पञ्चत्वाधीनत्वम् इत्यतः आहुः **स सर्वे**त्यादि. **तत्र निरुद्धौ** इति देहे निरूद्धौ. **तस्य नियामकानि** इति मृत्योः नियामकानि. **निबध्नन्ति** इति प्रतिबध्नन्ति. **अतः** इति भक्षण-पोषणयोः अभावात्. ननु एवं पञ्चभूताधीने मृत्यौ तस्य पञ्चसु होमो युक्तः, न पञ्चत्वे, अत्र दृष्टं यत् मृत्युनियामकत्वं तत् कस्य धर्मः इति विमर्शे अत्र होमम् आहुः **एवम्** इत्यादि. **प्राप्ताप्राप्तविवेकेन** इति. तस्य सङ्ख्यात्वेन मृत्युनियामकत्वायोगाद् इति आकाङ्क्षायां तत्स्वरूप-निश्चायनपूर्वकं तदुपसेचनश्रुत्या भगवतएव इति प्राप्तं, भूतानां

१. बध्नन्तीति ख.

प्रविष्टस्य[1] एकस्य भगवतः पञ्चत्वात् **पञ्चत्वे** अजुहोत्. पूर्वोक्ता युक्तिः **हि**शब्देन द्योत्यते. एवं तत्रापि[2] स्वतएव आहृत्य – भगवतः पञ्चत्वाभावाद् द्विपदातिक्रमस्यैव शक्यत्वात् – स्वस्मिन् काले च गच्छन् स्वेच्छया गरुडम् अतिक्रम्य लक्ष्म्यां समागतः **त्रित्वं** प्राप्तः. कालम् अतिक्रम्य

प्रकाशः

तु प्रमाणभावेन न प्राप्तम् इति तद्विवेकेन. **भगवत्कार्यत्वाद्** इति ल्यब्लोपे पञ्चमी ; भगवत्कार्यत्वं निश्चित्य. **तत्प्रविष्टस्य** इति तादृशव्यवहारनियामक-सङ्ख्यारूपेण प्रविष्टस्य. एवं मृत्युहोमपर्यन्तं व्याख्याय अग्रिमश्लोकं व्याकर्तुम् अतिदिशन्ति **एवं तत्रापि** इति. **एवं** नियामके नियम्यलयभावनया **तत्रापि** त्रित्वे तन्नियम्यस्य पञ्चत्वस्य होमार्थे निर्णयेऽपि प्राप्ताप्राप्तविवेकरूपा युक्तिः **च**शब्देन समुच्चीयते इति शेषः. सा कथम् इति आकाङ्क्षायां तां युक्तिं स्फुटीकुर्वन्ति **स्वत** इत्यादि. पञ्चानां क्रमतः उत्पत्तेः ततः पूर्वं **स्वतएव** सहसा **भगवतः पञ्चत्वाभावात्** तन्नियामकः पूर्वो अवधिः वक्तव्यः. स च विचार्यमाणः त्रित्वं प्राप्तो भगवानेव पर्यवस्यति. तत् कथम् इति आकाङ्क्षायां भूतोत्पत्तेः पूर्वं **द्विपदातिक्रमस्यैव** द्वे च ते पदे च द्विपदे गरुड-कालौ तयोः अतिक्रमस्यैव **शक्यत्वात्** सुकरत्वात् **स्वस्मिन्** इत्यादिना उक्तरीत्या स्व-काल-लक्ष्मीभिः **त्रित्वं प्राप्तः**, स्व-गरुड-प्रकृतिभिः वा त्रित्वं प्राप्तः. भगवानेव प्राप्ताप्राप्तविवेकेन पञ्चभूतनियामकतया[3] अग्नित्वं प्राप्तः इति अर्थः. अग्निं व्युत्पाद्य होमम्

लेखः

एवं पञ्चत्वे लयम् उक्त्वा तस्यापि त्रित्वे लयं वक्तुं तस्य तदधीनत्वं व्युत्पादयन्ति **एवं तत्रापि** इति. एवं पञ्चत्वे लये उक्तेऽपि इति अर्थः. **स्वतएव** इति. यत्किञ्चित् व्यापारं प्राप्य स्वतएव पञ्चत्वं न प्राप्तो अपि तु गुणैरेवेति तस्यापि तत्र लयो वक्तव्यएव इति भावः. गरुडः कालाभिमानी, लक्ष्मीः प्रकृत्यभिमानिनी. ... .

१. तत्प्रविष्टस्य इति पाठः प्रकाशे – सम्पा. २. तत्रापि च इति पाठः प्रकाशे – सम्पा.

३. पञ्चभूताऽनियामकतया इति मुद्रितपाठः कि.पाठानुरोधात् संशोधितः – सम्पा.

प्रकृतौ वा. तदेवम् अस्मदादि-मृत्युभक्षकं **पञ्चत्वरूपं** भूतात्मानं भगवन्तं (**त्रित्वे!**) गुणत्रयरूपे भगवति **अजुहोत्,** तदधीनत्वाद् भूतानाम्. तत्रापि गुणत्रयनिविष्टो भगवान् (**एकत्वे!**) प्रकृतिस्वरूपे हुतः. सा हि परम्परया सर्वकार्यरूपा, तत्र हि सर्वे प्रवाहाः प्रविशन्ति अतः **सर्व**शब्दवाच्या. ताम् एकत्वरूपं भगवन्तं पुरुषरूपे **आत्मनि** अजुहोत्. तं च पुरुषं कालादिनियामके अक्षरे **ब्रह्मणि** अजुहोत्, तदधीनत्वात् तस्य, "तन्मायाफलरूपेण" (भाग.पुरा. ११।२४।३) इति वाक्यात्. **अव्यये** इति वेद-ब्राह्मणत्वजाति-चतुर्मुख-निराकरणार्थम्. अथवा तस्यापि प्रकृति-पुरुषभावेन व्ययसम्भवात् तद्रहिते[१] भगवति तदक्षरम् अजुहोद् इति अर्थः. एवं भगवन्मार्गे[२] नव आहुतयो नव अग्नयः ॥४१-४२॥

तत्र स्वकीयं[३] क्रमेण हुत्वा सर्वं भगवति समर्प्य त्यक्तमलांशं देहम् अरण्ये त्यक्तुं बहिःस्थितिम् आह.

**चीरवासा निराहारो बद्धवाङ् मुक्तमूर्धजः ॥**
**दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥४३॥**

---

प्रकाशः

आहुः **तदेवम्** इत्यादि. तच्च एकत्वे जुहोद् इति त्रित्वहोमं व्याकुर्वन्ति **तत्रापि** इत्यादि. **प्रकृतिस्वरूपे** इति, तदात्मना एकत्वरूपे भगवति इति अर्थः. **सर्वमात्मन्यजुहवीद्** इत्यनेन उक्तम् एकत्वहोमं व्याकुर्वन्ति **सा हि** इत्यादि. शेषं स्फुटम्. **अथवा** इत्यादि. अस्मिन् पक्षे एकत्वस्य **आत्मपदवाच्ये** अक्षरे होमः, प्रकृति-पुरुषयोः तुल्यबलत्वेन एकस्मिन् नियामकतायाः अशक्यवचनत्वात्. एवं पक्षद्वयेऽपि नव आहुतयः, नवैव अग्नयः. तद् इदम् अभिप्रेत्य आहुः **एवं भगवद्** इत्यादि ॥४१-४२॥

लेखः

**"तन्मायाफलरूपेण" इति वाक्याद्** इति. इदम् एकादशे चतुर्विंशेऽध्याये अस्ति ॥४१-४२॥

**चीरवासा** इत्यत्र आभासे **क्रमेण हुत्वा** इति. येन क्रमेण सृष्टिः तेनैव क्रमेण इति अर्थः.

---

१. तद्रहित इति ख. २. भगवन्मार्गेणेति घ. ३. स्वकार्य्यमिति ग.

**अनवेक्षमाणो निरगादशृण्वन् बधिरो यथा ।**
**उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः ॥**
**हृदि ब्रह्म परं ध्यायन्नाऽऽवर्तेत यतो गतः ॥४४॥**

**चीरवासा** इति. अतः परं यदि अस्य देह उत्पद्येत[१], पार्षदवद्[२] उत्पत्स्यते, पञ्चाग्नौ ब्रह्मविद्योपयोगि-देहवत्. एवम् असमर्थस्य तूष्णीं परित्यागः सर्वनाशकः. हट्टे पतितानि वस्त्राणि चीरवासांसि ; एतादृशेऽपि रक्षा विधेया इति त्रिदण्डम् आह— **निराहारः** इति प्राणदण्डः, **बद्धवाग्** इति वाग्दण्डः, **मुक्तमूर्धजः** इति देहदण्डः. चित्तदण्डो वा, भ्रान्तत्वज्ञापनात्. अनेन बीजस्य अनादरे[३] अनङ्कुरोत्पादकत्वं सूचितम्. एतादृशस्य सर्व-साधन-साध्य-सहितस्य प्रकारेण एतदपरित्यागे पुनः सर्वदोषसङ्क्रमः इति कूलङ्कष-प्रवाहपतित-

प्रकाशः

**चीरवासा** इत्यत्र. **अतः परम्** इत्यादि. **अतः परम्** एवं प्रकारेण देहप्रतिपत्त्यादिना जातायाः परममुक्तेः अनन्तरं **यदि** "अक्षरधियाम्" (ब्रह्मसूत्र ३।३।३३) इति सूत्रोक्तन्यायेन भगवदिच्छया **अस्य** युधिष्ठिरस्य **देह उत्पद्यते** तदा **पार्षदवद्** ब्राह्मो वा चिदात्मको वा भगवत्सेवार्थम् **उत्पस्यते** इति अर्थः. **बीजस्य** इति संसरणबीजस्य प्राणादेः. **एतादृशस्य** इति बीजादिरहितस्य. **एतदपरित्यागे** इति देहापरित्यागे.

लेखः

व्याख्याने **एवमसमर्थस्य** इति. युधिष्ठिरोक्तप्रकारेण स धैर्याद्यसमर्थस्य सर्वनाशकः इति अर्थः. अनेनैव उपकर्तुं शक्यः इति तत्त्वम्. **एतादृशेऽपि** इति. निरध्यस्तेऽपि तस्मिन् अग्रे इष्ट-गन्तव्यदेश-प्रापकत्वात् सा यथाकथञ्चिद् विधेया इति अर्थः. **चित्तदण्डो वा** इति. अस्मिन् पक्षे **निराहारः** इत्यनेन देहदण्डः उक्तः इति ज्ञेयं, "दण्डा वाग्देहचेतसाम्" (भाग.पुरा. ११।१८।१७) इति वाक्ये तथैव उक्तत्वात् तन्मायाफलरूपत्वाद् इति वाच्यम् ॥४३-४४॥

॥ इति श्रीसुबोधिन्यां पञ्चदशाध्यायः ॥

१. उत्पद्येते इति क. उत्पद्यते इति ग-प्रकाशे - सम्पा. २. पार्षदवदेवेति क.

३. बीजस्याऽऽदरेऽङ्कुरोत्पादकत्वमिति ङ.

नौकोत्तरणवद् देहोत्तरणं कर्तव्यम् इति तत्प्रकारम् आह **दर्शयन्** इति. **आत्मनो** देहस्य. **जडो** अन्तःकरणविवेकशून्यः, जडभरतवत्. **उन्मत्तः** इन्द्रियविकलः, मदिरामत्तवत्. **पिशाचो** भूतग्रस्तो देहविकलः. एवं देहेन्द्रियान्तःकरणानि यथा न परैः आक्रम्यन्ते तथा विधेयानि, अन्यथा अन्यत्र प्रविष्टानि बीजभावम् आपद्येरन्. **अनवेक्षमाण**[१] इतस्ततो अविलोकयन् स्वस्मिन्नेव दत्तचित्तः स्वभावतएव अन्यवचनम् **अशृण्वन्**. सर्वथा आत्मनि दत्तचित्तत्वज्ञापनाय ( आह ! ) **बधिरो यथा** इति. दग्धपटवत् तस्य गमनसंस्कारः. इयमेव अवस्था ब्रह्मविदां बहिः[२] इन्द्रियाणां विषयाग्रहणे भवति. शुकवत् तद् उक्तम्. गन्तव्यदेशम् आह **उदीचीम्** इति. यद्यपि सर्वदेशेषु[३] न अस्य नाशः तथापि मर्यादया तत्रैव गतः. **महात्मभिः ( गतपूर्वां दिशां ! )** इति, एतदपेक्षयापि ते महान्तः इति तेषाम् अनुगमनं युक्तम् इति भावः. शून्यवद् गमनं वारयति **हृदि ब्रह्म परं ध्यायन्** इति. यद्यपि ब्रह्माभिव्यक्तिदशायां ध्यानं न अपेक्षते[४], स्वतएव स्फुरति, तथापि अनभिव्यक्तदशायां ध्यानं कर्तव्यं, न तूष्णीम्भावो युक्तः इति. कियद् दूरे गतम् इति आकाङ्क्षायाम् आह **गतः** प्राणी **यतो न आवर्तेत** कण्ठपर्यन्तं[५] हिमे जले वा तावद्दूरे गतः इति अर्थः ॥४३-४४॥

अन्येषां निर्गमनम् आह **सर्वे** इति.

**सर्वे तमनु निर्जग्मुर्भ्रातरः कृतनिश्चयाः ॥**
**कलिनाऽधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥४५॥**

---

प्रकाशः

**नौकोत्तरणवद्** इति नौकात्यागवत्. **अनवेक्षमाणः** इत्यत्र. ननु एवं देहाद्यध्यासाभावे **निरगाद्** इत्यनेन उक्तस्य गमनस्य कथं सिद्धिः इत्यतः आहुः **दग्धेत्यादि**. दग्धे पटे पटत्वजातिवद् अनभिमानेऽपि संस्काररूपो गुणः तिष्ठति, [६]तथाच तन्न्यायेन तत्सिद्धिः[६] इति अर्थः ॥४३-४४॥

---

१. इतः प्रागनवेक्षमाण इति प्रतीकमधिकं घ. २. इन्द्रियाणां बहिःविषयाग्रहणे इति अन्वयः -सम्पा. ३. सर्वदेहेष्विति ग. ४. नाऽपेक्ष्यत इति क-ग-ङ. ५. कण्ठपर्यन्तहिमे इति क-ख. ६-६. तेन सिद्धिः इति मुद्रितपाठः कि.पाठानुरोधात् संशोधितः -सम्पा.

**ते साधु कृतसर्वार्था ज्ञात्वाऽऽत्यन्तिकमात्मनः ॥**
**मनसा धारयामासुर्वैकुण्ठचरणाम्बुजम् ॥४६॥**

अनेनैव प्रकारेण सर्वेषां गमनम् आह **तम् अनु** इति. लौकिक-शास्त्रीयसम्मतिम् आह **भ्रातरः कृतनिश्चयाः** इति. भ्रातृणां यद् अन्यतमः करोति तत् सर्वे कुर्वन्ति इति लोकः, शास्त्रे तु निश्चितं कुर्वन्ति इति. "मुख्ये शास्त्रार्थसम्भवः" ( ) इति न्यायेन सर्वेषु यदि शास्त्रार्थसम्भवः स्यात्, सर्वे मुख्याः स्युः. अतो लोकवद् वेदेऽपि ते गौणाएव. तत् कथं तद्वद् अतिदेशः इति आशङ्क्य तथा शास्त्रार्थनिर्धाराभावेऽपि स्थूलप्रकारेण तेषां निर्धारो अस्ति इति तद् आह **कलिना** इति. भगवद्भक्तेषु विषयाणां बाधकत्वाभावेऽपि दुःसङ्गसहितानां तेषां तथात्वात्, कलौ च दोषसम्भवात् **कलिना अधर्ममित्रेण** सर्वाः **प्रजाः भुवि स्पृष्टा दृष्ट्वा** गन्तुं कृतधियो जाताः इति वैराग्यम्[१]. साधनम् आह **ते साधु कृतसर्वार्थाः** इति. धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः साधु यथा भवन्ति तथा कृताः. चतुर्णां पुरुषार्थानां स्वसाधनसाध्यतेव भगवत्सेवासाध्यतापि अस्ति. तत्रापि भगवत्सेवया साधिता निष्प्रत्यूहम् उत्तमाः भवन्ति. अतः तैः सर्वैः पुरुषार्थाः साधिताः. अथवा (**साधुकृतसर्वार्थाः!**) साधुषु कृताः सर्वे पुरुषार्था यैः ; साधुसङ्गादेव सर्वे पुरुषार्थाः सिद्धाः. अतः तद्विरोधित्वेन असत्सङ्गो हेयइति पूर्वेण सम्बन्धः. अथवा भक्तिः पञ्चमः पुरुषार्थः. चत्वारः तैः अनुभूताः, भक्तिः च पञ्चमः. तत्र तारतम्ये विचार्यमाणे अत्यन्तं सुखं सुखहेतुः च भक्तिरेव. अतः **आत्यन्तिकं ज्ञात्वा (वैकुण्ठचरणाम्बुजम्!)** श्रीकृष्णचरणारविन्दमेव **मनसा धारयामासुः** नतु अन्यं कुसृष्टिप्रकारम्[२] ॥४५-४६॥

प्रकाशः

**ते साधुकृतेत्यत्र. अस्ति** इति, "यत्कर्मभिर्यत्तपसा" (भाग.पुरा. ११।२०।३२) इत्यादिवाक्याद् अस्ति. **भक्तिश्च पञ्चमः** इति, तैः अनुभूतः इति शेषः ॥४५-४६॥

१. वैराग्यसाधनम् इति मुद्रितपाठः तात्पर्यानुरोधात् संशोधितः - सम्पा.   २. कुसृष्टप्रकारमिति क-ग.

ततः किं वृत्तम् इति आह.

**तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे ॥**
**तस्मिन्नारायणपदे एकान्तमतयो गतिम् ॥४७॥**
**अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः ॥**
**विधूतकल्मषाः स्थानं विरजेनात्मनैव हि ॥४८॥**

**तद्ध्यानोद्रिक्तया** इति. **तद्ध्यानेन उद्रिक्ता** उच्छलिता या **भक्तिः** सर्वाङ्गे पूर्णा बहिरपि निर्गताः तेन अन्तःस्थान् दोषान् दूरे बहिष्करोति अतो **विशुद्धधिषणाः**. ततः **परे** पुरुषोत्तमे अनन्यशब्दवाच्ये **तस्मिन्** प्रसिद्धे **नारायणपदे** नारायणो ब्रह्माण्डरूपः पदं यस्य. अनेन शास्त्रार्थरूपे **एकान्तमतयो** भूत्वा – दोषादेव व्यभिचारबुद्ध्युत्पत्तेः[१] – **गतिं** गमनसामर्थ्यं गमनमेव वा **अवापुः**. पूर्वस्य शास्त्रतः साधनानि उक्तानि, न फलम्, एतेषान्तु फलमपि उक्तम्. अथवा ज्ञानमार्गेण राज्ञो गतिः, अन्येषां भक्तिमार्गेण इति. अथवा लोकेभ्यः तिरोभावपर्यन्तम् असाधारण्येन गमनम् उक्त्वा पश्चात् सर्वेषां साधारण्येन गमनं, साधनं फलं च. अतः सर्वेएव शास्त्रमार्गं परित्यज्य केवल**विषयात्मभिः दुरवापां गतिम् आपुः** इति सर्वेषामेव भगवत्प्राप्तिः फलम्. **असद्भिः** इति आचाराराहित्यं ; सिद्धेऽपि ज्ञाने अभिमानशेषस्य विद्यमानत्वात् तत्कृतो दोषः स्यादेव. **विषयात्मभिः** इति अन्तःकरणदोषः प्रत्येकम् अगमने[२] हेतुः पाषण्डिविषय-व्यावृत्त्यर्थम्. ततो गतिं प्रतिपद्य समीपे गच्छन्तः क्रमेण तत्त्वांशातिक्रमे यदा सर्वांशातिक्रमः तदा **विधूतकल्मषत्वम्**, आत्मापेक्षया अन्यस्य सर्वस्यैव कल्मषत्वात्. स्थानस्य स्वस्य च एकरूपत्वं, तद् आह **विरजेन** इति. **हि** युक्तो

प्रकाशः

**तद्ध्यानेत्यत्र. तेन** इति बहिःनिर्गमनेन. **अवापुः** इत्यत्र. **प्रत्येकम् अगमने हेतुः** इति. आचाराराहित्यम् अन्तःकरणदोषः च इति द्वयं, प्रत्येकं तथा इति अर्थः ॥४७-४८॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे पञ्चदशाध्यायविवरणम् ॥

१. व्यभिचारे बुद्ध्युत्पत्तेरिति ख. २. प्रत्येकगमने हेतुरिति ग-घ.

अयम् अर्थः ; न हि अशुद्धाः शुद्धे गन्तुम् अर्हन्ति, शुद्धानां वा अशुद्धं स्थानं भवति. तस्माद् यथायोग्यं स्थानं प्राप्तवन्तः इति अर्थः ॥४७-४८॥

अधिकारिणान्तु[१] भक्तानामपि "यावदधिकारं त्वाधिकारिकम्" इति न्यायेन न भगवत्प्राप्तिः किन्तु स्वस्थानप्राप्तिरेवेति विदुरे तद् आह.

**विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान् ॥**
**कृष्णादेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥४९॥**

**विदुरोऽपि** इति. **प्रभासो** हि अधिकारस्थानमार्गः. **आत्मवान्** इन्द्रियादिसहितः पूर्वदेहसहितो वा. मोक्षार्थम् आग्रहाकरणे हेतुः **कृष्णादेशेन** इति, **तच्चित्त** एव "भगवदाज्ञया अधिकारं करोमि" इति. **पितृभिः** इति समानयनार्थम् आगतैः (सह!). **स्वक्षयं** वैवस्वतपुरम्[२]. क्षयपदप्रयोगस्तु तत्र गतानां तथात्वात् ॥४९॥

द्रौपद्याः भिन्नां गतिम् आह.

**द्रौपदी च तदाज्ञाय पतीनामनपेक्षताम् ॥**
**वासुदेवे भगवति ह्येकान्तगतिरापतत् ॥५०॥**

**द्रौपदी** इति. सा पूर्वमेव भगवदीया भगवच्चरणप्रवेशार्थम् उद्यतापि भगवता पतिभ्यो दत्तत्वात् तद्धितार्थं स्थिता. (**तद्!**) तेषाञ्च (**पतीनाम्!**) **अनपेक्षतां** (**आज्ञाय!**) ज्ञात्वा, (**वासुदेवे!**) स्वहृदयेएव प्रकटे भगवति **एकान्तगति**त्वाद् अस्याः[३], देहेन्द्रियादिसङ्घाताद् उत्क्रम्य **भगवति आपतद्** इति अर्थः ॥५०॥

---

१. तुर्नास्ति क-ग-घ.

२. "यमः कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः" (अमरकोश १।५९) - सम्पा.

३. अस्येति ख.

एवम् अध्यायत्रयस्य प्रासङ्गिकत्वं ज्ञापयितुं चरित्रश्रवणफलम्[१] आह.

**यः श्रद्धयैतद् भगवत्प्रियाणां पाण्डोः सुतानामभिसम्प्रयाणम् ॥**
**शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम् ॥५१॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे पञ्चदशोऽध्यायः ॥

**यः श्रद्धया** इति. भगवतः सर्वांशसहितस्य सर्वश्रवणे सर्वं फलम् इति अंशे खण्डशः फलम् अनूद्यते क्वचित् पूर्वसहितम्, अतो न अन्यानर्थक्यम्. वैष्णवत्वात् तेषु **श्रद्धा.** तेषां स्वातन्त्र्यादि-गुणवत्त्वं स्वतोऽपि इति द्योतयितुं **पाण्डोः** इति उक्तम्. ऐहिकफलं **स्वस्त्ययनं पवित्रम्** इति इष्टप्राप्त्यनिष्टनिवृत्तिरूपम्. आमुष्मिकन्तु **भक्तिः** साधनं भगवत्प्राप्तिः फलम्. **सिद्धिम्**[२] इति अलभ्यलाभ-प्राप्त्यर्थम् उक्तम् ॥५१॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे पञ्चदशो अध्यायः ॥

## ॥ इति पञ्चदशोऽध्यायः ॥

---

१. श्रवणमाहेति ख. 'यः श्रद्धये'ति श्लोकस्तट्टीका तदवतरणं चेति किमपि नास्ति घ.

२. सिद्धमितीति क-ख.

# ॥ अथ षोडशोऽध्यायः ॥

मुक्तिर्निरूपिता पूर्वमधिकारनिरूपणे ॥
पारलौकिकबन्धस्य निवृत्त्यै पितृहेतुतः ॥(१)॥
ऐहिकस्यापि बन्धस्य निवृत्तिरधुनोच्यते ॥
अधिकारस्य सम्प्राप्त्या लोकतो बन्धसम्भवः ॥(२)॥
[1]कलिदोषाच्च तेनात्र क्रमेणैव निवार्यते ॥
प्रथमं षोडशाध्याये[2] स्वाधिकारेण यद् भवेत् ॥(३)॥

---

प्रकाशः

षोडशाध्यायं विवरिषवः सङ्गतिं वक्तुं पूर्वाध्यायत्रयार्थम् अनुवदन्ति **मुक्तिः** इत्यादि. **पूर्वम्** इति, पूर्वाङ्गत्वात् पूर्वम् इति अर्थः. **पितृहेतुतः** इति पितृभ्यो हेतुभ्यः. इदं **पारलौकिकबन्धस्य** इत्यनेन अन्वेति. प्रस्तुताध्यायत्रयार्थम् आहुः **ऐहिके**त्यादि. **अधुना** इति अस्मिन् प्रकरणे. तेन उभयोः प्रकरणयोः एककार्यत्वं सङ्गतिः इति अर्थः. अत्र[3] अध्यायद्वयप्रयोजनम् आहुः **अधिकारे**त्यादि. **निवार्यते** इति बन्धो निवार्यते. अतो द्वैविध्याद् अध्यायद्वयम् अत्र इति अर्थः. अवान्तरार्थान् अस्य अध्यायस्य आहुः **प्रथमम्** इत्यादि. **यद् भवेद्** इति. **यद् भूरक्षादिकं** राजत्वाद्

लेखः

षोडशाध्यायं व्याचिख्यासवः पूर्वाध्यायस्य उपोद्घाततैव सङ्गतिः इति अभिप्रायेण आहुः **मुक्तिः** इत्यादि. परीक्षितो मुख्याधिकारस्य अत्र अध्याये निरूपणीये कर्तव्ये तदङ्गत्वेन पूर्वेषां मुक्तिः निरूपिता इति अर्थः. **पितृहेतुतः** इति. पितॄणां मुक्त्यभावे परकृतप्रतिबन्धः स्याद् इति भावः. निवृत्तेः प्राप्तिपूर्वकत्वात् तत्प्राप्तिम् आहुः **अधिकारस्य** इति. राज्याधिकारस्य इति अर्थः. **लोकतः** इति, लोकासक्त्या इति अर्थः. अत्रैव प्रयोजकान्तरम् आहुः **कालदोषाच्च** इति, कलिदोषात् च इति अर्थः. **क्रमेण** इति, अध्यायत्रयेण **निवार्यते** इति अर्थः (१ - २ १/२).

---

१. कालदोषाच्चेति ख-लेखे - सम्पा. २. षोडशेऽध्याये इति ग-घ.

३. अथ इति कि.पाठे - सम्पा.

भूधर्मरक्षा सर्वापि सामान्येन विशेषतः ॥
निरूप्यतेऽन्यथा स्वस्य दोषः स्याद् [१]द्विविधोऽपि हि ॥(४)॥
अतः पुत्रान् समुत्पाद्य धर्मरक्षा निरूप्यते ॥
आधिदैविकरक्षार्थं कलिनिग्रह ईर्यते ॥(५)॥
स्वभावतः स्थापितोऽपि मूलदोषान्न वर्धते ॥
मूलनिर्हरणं तस्मात् कर्तव्यमिति निश्चयः ॥(६)॥
आधिदैविकरूपाणां साक्षात्कारो यदा न हि ॥
भगवच्चरितस्यापि दैविकत्वात् स [२]नैव हि ॥७॥

---

प्रकाशः

**भवेत् सामान्येन** तत् **निरूप्यते,** अश्वमेधादिकन्तु **विशेषतः** इति अर्थः. विशेषतो निरूपणप्रयोजनम् आहुः **अन्यथा** इत्यादि. **द्विविधः** इति लौकिको वैदिकश्च. पूर्वपिक्षया[३] न्यूनत्वं लौकिको दोषः, अयाज्ञिकत्वं च वैदिकः इति. आधिदैविकरक्षायाः किं प्रयोजनम् अतः आहुः **स्थापितः** इत्यादि. धर्मः इति शेषः. **मूलदोषाद्** इति. काले धर्मः क्रियतइति तस्य मूलं कालः, तद्दोषात्. शेषं स्फुटम् (१-८).

लेखः

प्रकृताध्यायार्थम् आहुः **प्रथमम्** इति. **सामान्येन** इत्यादि. "ततः परीक्षिद्द्विज" (श्लो. १) इत्यादिना सामान्यराजवद् रक्षा, कलिनिग्रहादिना विशेषरक्षा इति विवेकः. **द्विविधः** इति, भूरक्षाभावप्रयुक्तो धर्मरक्षाभावप्रयुक्तः च इति अर्थः. सामान्यतः धर्मरक्षा उक्त्यैव सिद्धे कलिनिग्रहेण विशेषतः तद्रक्षाकथने प्रयोजनम् आहुः **आधिदैविक** इति. कलिना आधिदैविक-तिरोधानात् तन्निग्रहेण तद्रक्षा इति अर्थः. **स्थापितोऽपि** इति, धर्मः इति शेषः. **मूलदोषाद्** इति, मूलं कालः तद्दोषाद् इति अर्थः. ननु आधिदैविकधर्मादि-स्थापनाभावे का हानिः स्याद् अतः आहुः **आधिदैविक** इति. आधिदैविकधर्माणां यदि **न साक्षात्कारः** तदा अन्तःकरणाद्यशुद्ध्या

---

१. स्याद्विविधोऽपि हीति ख-ग-घ. २. सदैव हीति घ.

३. पूर्वपक्षे इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

अतोऽधिकारसिद्ध्यर्थं दैविकानां निरूपणम् ॥
अनुग्रहो निग्रहश्च वरदानं तथैव च ॥(८)॥

एवं परीक्षितः पाण्डवकृत-प्रतिबन्धनिवृत्त्यर्थं तेषां मुक्तिम् उक्त्वा "आश्चर्यवत् पश्यति कश्चिदेनम्" (भग.गीता २।२९) इति न्यायेन "श्रुत्वाप्येनं वेद न चैव कश्चिद्" (भग.गीता २।२९) इति निर्धारात् च तथा श्रवणं मा भूदिति पूर्वं तस्य आधिदैविक-साक्षात्कारादिकं निरूपयितुं जातके सूचितं स्वरूपं तस्य अनुवदति.

**॥ सूतः उवाच ॥**

**ततः परीक्षिद् द्विजवर्यशिक्षया महीं महाभागवतः शशास ह ॥**
**यथा हि सूत्यामभिजातकोविदाः समादिशन् विप्रमहद्गुणस्तथा ॥१॥**

**ततः परीक्षिद्** इति. "यस्त्विच्छया कृतो धर्मः" (भाग.पुरा. ७।१५।१४) इति वाक्याद् राज्यरक्षापि स्वेच्छया न कृता इति आह **द्विजवर्यशिक्षया** इति. भगवद्भक्ताः ब्राह्मणाः द्विजवर्याः ; तेषामेव धर्मसूक्ष्मपरिज्ञानं, "नारायणपराः विप्राः धर्मं गुह्यं परं विदुः" (भाग.पुरा. ७।११।४) इति वाक्यात्. बोधितस्य हृदये समागमनार्थम् आह **महाभागवतः** इति, भगवद्भक्तेष्वपि महान्. अनेन त्रयं सूचितं— सर्वत्र भगवद्भजनप्रवृत्तिः, भूमेः भगवद्भार्यायाअपि हेतुवशाद् अन्यपालकत्वे तन्निराकरणेन भगवद्धर्मप्रवृत्ति-परत्वं, धर्मस्य च भगवदीयत्वेन परिपालनम् इति. ह इति आश्चर्ये.

---

लेखः

अग्रे वर्णयिष्यमाण-**भगवच्चरित्रस्यापि** साक्षात्कारो **न** स्यात्, तेषाम् आधि-**दैविकत्वाद्** इति अर्थः. **अधिकारसिद्ध्यर्थम्** इति, आधिदैविकचरित्रश्रवणे अधिकारसिद्ध्यर्थम् इति अर्थः (३-८).

**ततः** इत्यत्र. **अनेन** इति, **महाभागवतः** इति विशेषणेन इति अर्थः. **हेतुवशाद्** इति, भगवदिच्छाविशेषवशाद् इति अर्थः. **अन्यपालकत्वे** इति. अन्यस्य पालकत्वे सत्यपि अत्र तु स्वस्य पालकत्वनिराकरणेन भगवद्धर्मप्रचारपरत्वमेव राज्ञः इति सूचितम् इति अर्थः. एवञ्च भगवद्धर्मप्रचारैक-राज्यत्वेन राज्यकरणं, नतु तत्स्वामित्वाभिमानेनापि इति तत्त्वम्. **भगवदीयत्वेन** इति, स्वस्य तत्त्वेन तत्परिपालनम् इति अर्थः.

भगवद्भक्तानां कार्यविशस्य अयुक्तत्वाद्, भगवद्वाक्यत्वेऽपि स्वरूपाविष्टत्वात्, तथात्वे वा परमभागवतत्वं न भवेदिति उभयम् अत्र इति आश्चर्यम्. आश्चर्यं समर्थयितुं कालकृतम् एतद्, न भगवत्प्रेरणया इति ज्ञापयितुम् आह **यथा हि** इति. **सूत्यां** जन्मकाले **अभिजातं** जातकं तत्र **कोविदाः** निपुणाः. (**विप्रमहद्गुणः !**) विप्रेषु महान् गुणो यस्य, ब्रह्मण्यता इति यावत्. अतः कालकृत-शुभफलसिद्धिः ॥१॥

इदानीं तस्य कृतस्य भूरक्षणस्य उत्तरत्र अनुवृत्तिसिद्धये पुत्रान् उत्पादितवान् इति आह.

**स उत्तरस्य तनयाम् उपयेम इरावतीम् ॥**
**जनमेजयादींश्चतुरस्तस्यामुत्पादयत् सुतान् ॥२॥**

**स उत्तरस्य** इति. मातुलकन्यापरिणयनं लोके विहितं स्मृतौ निषिद्धं, लौकिकधर्माणां दृष्टान्तीकरणप्रस्तावे ''मातुलस्येव योषा भागः'' (ऋक्संहि. २।१४।६) इत्यत्र निरूपणात् ''मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च, समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेद्'' (स्कन्दपुरा. ३।२।२१।१९)

---

प्रकाशः

**स उत्तरस्य** इत्यत्र. **''मातुलस्येव योषा''** इति वाक्यस्य विधायकत्वे समानयोगक्षेमत्वाद् ''धन्वन्निव'' (ऋक्संहि. १०।४।१) इत्यादीनामपि

लेखः

**भगवद्वाक्यत्वे** इति. ''श्रेयः प्रजापालनमेव राज्ञः'' (भाग.पुरा. ४।२०।१४) इत्यादि. तथाच जरासन्धनिरुद्ध-नृपान् प्रति प्रजाधर्मेण रक्षया इति ॥१॥

**स उत्तरस्य** इत्यत्र. **लोके विहितम्** इति, लोकाचारेण उक्तम् इति अर्थः. **स्मृतौ निषिद्धम्** इति. **विहितपदन्तु** ... इत्यादिस्मृतिषु विहितत्वेऽपि तत्तद्देशीयानाचारत्वेन तद्विधानं, नतु आचारत्वेन इति ज्ञापयितुं निषेधः. अतएव जैमिनिप्रथमाध्याये तृतीयपादे यो मातुलीविवाहादौ शिष्टाचारः प्रमा न वा इति सन्दिह्य प्रमात्वम् इति पूर्वपक्षे अप्रमात्वम् इति सिद्धान्तितम्. ननु ''मातुलस्येव योषा'' इति श्रुतौ दृष्टान्तीकरणात् कथम् अप्रामाण्यम् अतः आहुः **लौकिकधर्माणाम्** इति. तथाच लोकप्रसिद्ध्या दृष्टान्तमात्रम् उच्यते, न एतावता तस्य विधेयत्वम्, अन्यथा ''धन्वन्निव प्रपासि''

इति स्मृतेः. अतः केवलधर्मार्थं तादृशो विवाहो न कर्तव्यः. लौकिकबल-शौर्याद्यपेक्षायान्तु कर्तव्यएव. अतः **उत्तरस्य** मातुलस्य स्वसमानबलसिद्धये **(तनयाम्!) इरावतीम् उपयेमे.** नाम्ना च वैष्णवत्वं सूचितम्. सर्वपृथिवीरसवत्त्वात् तस्याम् उत्पन्नस्य बलं, तदुपभोगात् स्वस्य च अलौकिकं सौख्यं च सूचितं ; श्रुतौ रोदसीत्वकथनाद् भगवत्परिपाल्यत्वं च. तस्याः चत्वारः पुत्राः जाताः. **सुतान्** इति स्वतः. चतुर्दिक्षु रक्षा चतुर्विधपुरुषार्थसिद्धिश्च तावतैव भविष्यतीति न अधिकोत्पादनम् ॥२॥

आधिदैविकप्रकारेण अश्वमेधकरणं पूर्ववद् आह.

---

प्रकाशः

विधायकत्वापत्तिः, तथाच सति प्रत्यक्षश्रुत्यैव सर्वनिर्वाहाद् नित्यानुमेयश्रुत्यङ्गीकारो व्यासादीनां मुधैव स्याद् इत्यतः आहुः **अतः** इत्यादि. तथाच यत्र स्मार्तः प्रतिषेधः तत्र लौकिकपरत्वेन श्रुत्याशयो व्यवस्थाप्यः, कुमारशिखाधारणवत् तत्रापि विधेः उन्नेतुं शक्यत्वात्. अन्यथा उभयोः निरवकाशत्वेन अन्यतरबाधापत्तिः. यत्तु भाट्टाः (/भाट्टवार्तिके केचिद्!) मातुलकन्यापरिणयस्य केवलशिष्टाचारमूलकत्वं स्मृतिपाद-पञ्चमाधिकरण-द्वितीयवर्णके (जैमि.पूर्वमी.सूत्र १।३।८) व्यवस्थापयन्ति तद् एतेन प्रत्युक्तं ज्ञेयं, दूरतोऽपि श्रुत्याश्रयाभावे केवलस्य दुर्योधनाद्याचारवद् भ्रान्ताचारत्वेन अप्रामाण्यात् शिष्टानादरणीयत्वापत्तेः. अतः श्येनादिवत् तत्करणम् इति युक्तम् उत्पश्यामः. **नाम्ना** इत्यादि. इरायाः मुख्यासु द्वादश-भगवच्छक्तिषु "श्रिया पुष्ट्या" (भाग.पुरा. १०।३६।५५) इति वाक्ये गणनात् तद्वत्त्वेन तथा इति अर्थः. **श्रुतौ** इति, "इरावती धेनुमती हि भूतं सूयवसिनी मनवे यशस्यै व्यस्कभ्नाद् रोदसी विष्णुरेतः" (ऋक्संहि. ७।९९।३) इति श्रुतौ ॥२॥

लेखः

इत्यादीनां विधानम् आपद्येत इति भावः. **नाम्ना** इति. र-लयोः अभेदाद् इला पृथिवी, तन्नाम्ना तथात्वं ज्ञापितम् इति अर्थः. **उत्पन्नस्य बलम्** इति, तस्याम् उत्पन्नस्य जनमेजयादेः इति अर्थः. **स्वस्य** इति, परीक्षितः इति अर्थः ॥२॥

**आजहाराश्वमेधांस्त्रीन् गङ्गायां भूरिदक्षिणान् ॥**
**शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥३॥**

**आजहार** इति. त्रिविधोऽपि दोषः तावतैव निवृत्तइति न अधिककरणम्[१]. **गङ्गायाम्** इति गङ्गागर्भभूमौ. **भूरिदक्षिणान्** इति सभार्याः यज्ञाः[२] पुष्टाः इति ज्ञापनार्थम्. धौम्यस्य पाण्डवैकनिष्ठत्वात् कुलाचार्यः कृपएव अनेन गुरुत्वेन स्वीकृतः इति आह **शारद्वतम्** इति, शरस्तम्बे जातः कृपः. एवं भूरिदक्षिणा-ब्राह्मणसम्पत्तौ यागः आधिदैविको जातः इति आह **देवाः यत्र अक्षिगोचराः** इति. हविर्भागभुजो देवाः भगवदंशभूताः आधिदैविकाः. तेएव वैदिकमन्त्रे प्रतिपाद्याः मन्त्रप्राधान्यपक्षेण आध्यात्मिकाः. तेएव ज्ञानरहितैः क्रियमाणाः कर्मशेषभूताः आधिभौतिकाः भूतसंस्कारकाः. उत्तमास्तु भगवदंशभूताः भगवानिव प्रत्यक्षाः ॥३॥

एवं सामान्यधर्मं विशेषधर्मं च उक्त्वा आधिदैविकत्वख्यापनार्थं धर्मप्रतिपक्षिनिग्रहम् आह.

**निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् ॥**
**नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥४॥**

**निजग्राह**[३] इति, अन्यथा पाण्डवानामिव अस्यापि निर्गमनम् उचितं स्यात्. पाण्डवैः कलिभीतैः गतम्, अयन्तु तमपि निजग्राह इति पूर्वोत्कर्षः[४]. **क्वचिद्** इति कुरुक्षेत्रे. कलेः अवस्थारूपम् आह **नृपलिङ्गधरम्** इति.

---

प्रकाशः

**आजहार** इत्यत्र. **पूर्ववद्** इति जातकोक्त-कालगुणवत्[५]. **अनेन** इति परीक्षिता. ननु पूर्वतन्त्रे देवतायाः मन्त्रमयत्व-प्रतिपादनात् कथम् अक्षिगोचरत्वम् इत्यतः आहुः **हविः** इत्यादि. **क्रियमाणाः** इति मन्त्रमयत्वेन क्रियमाणाः. तथाच उत्तरतन्त्रे देवताविग्रहाधिकरणे (ब्रह्मसूत्र १।३।२५) तस्याः विग्रहस्थापनात् पूर्वतन्त्रं मध्यमाधिकारिपरम् अतो न विरोधः इति अर्थः ॥३॥

---

१. नाऽधिकरणमिति ख. नामकरणमिति घ. २. दक्षिणा इति घ-ङ. ३. निजग्राहौजसेतीति घ. नास्ति क-ग. ४. पूर्वोक्तकर्ष इति ख. ५. -वशात् इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

कलेः रूपत्रयं— पापं, शूद्रः, उभयविशिष्टो राजा च. तत्र उभयविशिष्टो राजा आधिदैविकं रूपं, तद् आह **नृपलिङ्गधरम्** इति. पशुषु पुत्रेणापि सहिता गौः मिथुनत्वेन व्यपदिश्यते, "मातरम् अभिगच्छन्ति" ( ) इति श्रुतेः. अतएव कलिस्पर्शयोग्यं[१] रूपं प्रदर्शितम्. शकटम् आरुह्य (**गोमिथुनं!**) गां बलीवर्दं च योजयित्वा (**पदा!**) लम्बमानपदेन[२] **घ्नन्तम्**. अथवा विजित्य **गोमिथुनं (घ्नन्तं!)** स्वविषये नयन्तं राजानम्. पापाधिष्ठातृत्वाद् धर्म-भूवाक्यानाम् अश्रवणम्, अस्य तु श्रवणं दर्शनञ्च इति निग्रहसामर्थ्यम्. इदानीन्तनवद् भाषाऽपरिज्ञानेऽपि दर्शन-नियमनादिकं[३] सम्भवति ॥४॥

अस्मिन् वाक्ये शौनकस्य सन्देहो जातः— कलिः अन्यः शूद्रस्तु अन्यः इति, तस्मिन् वा आविष्टः कलिः इति अन्यायिनं वा मारयति? अविद्यमानेऽपि चकारे पदार्थद्वयकथने एकक्रियायां समुच्चयप्रतीतिः.

प्रकाशः

**निजग्राह** इत्यत्र. **पापाधिष्ठातृत्वाद्** इति, कलेः तथात्वात् ॥४॥

**कस्य हेतोः** इत्यत्र. **समुच्चयप्रतीतिः** इति. यथा "ब्राह्मणाः शूद्राः प्रवेशनीयाः" इत्यादौ तथा इति अर्थः. अशक्यत्वं विवृण्वन्ति

लेखः

**नृपलिङ्गधरं शूद्रम्** इत्यत्र. **पापाधिष्ठातृत्वाद्** इति. कलेः तथात्वाद् धर्म-भूवाक्यानाम् अश्रवणम् इति अर्थः. **अस्य तु** इति, परीक्षितः इति अर्थः. **श्रवणम्** इति, धर्म-भूवाक्यानां श्रवणं तद्दर्शनञ्च इति अर्थः. **निग्रहसामर्थ्यम्** इति. निग्रहोक्त्या उक्तम् इति भावः. ननु तद्वाक्यसंवादम् अन्तरा कथं ज्ञात्वा नियमनम् इत्यतः आहुः **इदानीन्तनवद्** इति. भाषायाः अपरिज्ञानेऽपि लक्षणैः यथा निर्णीयते इदानीन्तनैः तथा राज्ञोऽपि तज्ज्ञानादिकं संगच्छते इति अर्थः ॥४॥

**कस्य हेतोः** इत्यत्र. **अन्यायिनं वा** इति. एवञ्च शूद्रेण को हि अन्यायः कृतः इति आशयः. **एकक्रियायां** निग्रहक्रियायाम्.

१. योग्यरूपमिति. २. लम्बमानपादेनेति घ. ३. नियमादिकमिति ग-घ-ङ.

अतः पृच्छति.

॥ शौनकः उवाच ॥

**कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ॥**
**नृदेवचिह्नधृक् शूद्रः कोऽसौ गां यः पदाऽहनत् ॥५॥**

**कस्य हेतोः** इति. दिग्विजये हि राज्ञां जयः कर्तव्यः, नतु कालस्य, स्वाधारत्वात्. व्यर्थः च कलिनिग्रहः, कालस्य साधारणनिमित्तत्वात् तथैव कालनिर्णयात्, कलिनिमित्तं च राज्यस्य प्राप्तत्वात्. अतो हेत्वभावाद् अशक्यत्वाच्च विग्रहनिग्रहे[१] कालनिग्रहाभावात् प्रश्नः. तत्रापि[२] **नृपः** कालावच्छिन्नराजा. तद्विशेषणत्वेन शूद्रम् अजानन् आह **नृदेवचिह्नधृग्** इति ॥५॥

शूद्रस्य कथं स वेषः, कुतो वा प्राप्तः? तथाभूतस्य वा कथं पदा गोताडनम्? अतः सन्देहनिवारणार्थं तत्कथय इति आह.

**तत् कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ।**
**अथवाऽस्य पदाम्भोजमकरन्दलिहां सताम् ॥**
**किमन्यैरसदालापैरायुषो यदपव्ययः ॥६॥**
**क्षुद्रायुषां नृणामङ्ग मर्त्यानामृतमिच्छताम् ॥**
**इहोपहूतो भगवान् मृत्युः शामित्रकर्मणि ॥७॥**

**तत्कथ्यताम्** इति. अन्यनिषेधार्थं[३] सम्बोधयति **महाभाग** इति.

---

प्रकाशः

**विग्रहेत्यादि. तद्विशेषणत्वेन** इति कलिविशेषणत्वेन ॥५॥

लेखः

**विग्रहनिग्रहेऽपि** इति. अथ विग्रहेण निग्रहे कर्तव्येऽपि कालनिग्रहासम्भवाद् इति अर्थः ॥५॥

**तत्कथ्यताम्** इत्यत्र. **निषेधार्थम्** इति. यदि भगवत्कथाश्रवणे उपादेयत्वं न भवेत् तदा न वक्तव्यम् इत्येवं निषेधार्थम् इति अर्थः. **कथाराहित्यम्**

---

१. विग्रहनिग्रहेऽपि इति पाठः लेखे - सम्पा. २. तथापीति क-ग.

३. अन्यनिषेधार्थमिति ख-ग-घ. (सम्बोधयतीति नास्ति).

महत् तव भाग्यं यद् भगवत्कथायां नियुक्तः तदभिज्ञः च. अतः स्वार्थाविरोधित्वे कथनीयम्, अन्यथा न इति आह **यदि कृष्णकथाश्रयम्** इति. **कृष्णकथायाः आश्रयः** तत्कथायां भगवत्कथा वर्तते इति **यदि** तदा **कथ्यताम्**. भगवत्कथाधारत्वाभावेऽपि वस्तुतो भगवदीयाः ये तत्सम्बन्धिनी अन्यापि या कथा तदाश्रयत्वेऽपि कथ्यताम् इति आह **अथवा** इति. (**पदाम्भोजमकरन्दलिहां!**) भक्तिरसास्वादवताम् इत्यनेन [१]भक्तिरसस्पर्शाभाव-कथाराहित्यं तेषां सूचितम्. **सताम्** इत्यनेन व्यामोहनार्थमपि अन्या कथा निवारिता. पुरुषसुखं ब्रह्मसुखम् अर्थसुखं च ददातीति **म-क-र-न्दः**. ''गमश्च'' (पाणि.सूत्र ३।२।४७) इति सञ्ज्ञायां खश्. स भगवच्चरणारविन्दैकनिष्ठः प्रेमसेवायाम् आविर्भावस्वरूपो [२]भक्तैकभोग्यो विशेषतो निर्वचनाशक्यः ; यदर्थं सर्वोऽपि भक्तिमार्गः शास्त्रं च. तदास्वादनयुक्तानां कथया शास्त्रार्थपरिज्ञानं भवति. अतः प्रमाणकथा प्रमेयकथा वा तदाश्रिता चेत्, तदा कथनीया, अन्यथा अस्यापि सन्देहापादकत्वाद् असत्त्वम्. **असन् आलापः, असतां** वा **आलापः** – उभयस्य उभयं प्रतियोगि – तादृशैः **किं** प्रयोजनम्? ननु इष्टालापाः पुष्टिकराः इति कालगमनमेव प्रयोजनम्! तत्र आह **आयुषो यदपव्ययः** इति. कोटिसुवर्णैरपि यद् आयुः क्षणमात्रम् अलभ्यं तादृशस्य **आयुषो अपव्ययः** अन्यायव्ययः. अतः[३] आयुःक्षयकरत्वात् तद् न वक्तव्यम्. सत्रारम्भस्तु आयुर्वृद्ध्यर्थमेव इति आह **क्षुद्रायुषाम्** इति. अल्पायुषां (**नृणाम्!**) प्राणिनां (**मर्त्यानां!**) मरणावश्यकत्ववतां मरणक्लेशनिवृत्त्यर्थम् **अमृतम् इच्छताम्** अर्थे **मृत्युः**

प्रकाशः

**किमन्यैः** इत्यत्र. **उभयस्य उभयं प्रतियोगि** इति. उक्तालापद्वयं भगवत्तद्भक्तकथयोः प्रतिकूलतया योगिविरुद्धत्वेन सम्बन्धी इति अर्थः.

लेखः

इति. भक्तिरसभावोपचितां कथां कुर्वन्ति इति अर्थः. **व्यामोहनार्थम्** इति. स्वस्य तात्पर्याभावेऽपि अन्यव्यामोहनार्थम् इति अर्थः. **गमश्च** इति....

१. भक्तिरसस्पर्शाभावे इति घ. २. भक्त्यैकभोग्य इति घ. ३. अतस्तत्रायुःक्षयेति क. अत्राऽऽयुःक्षयेति ग.

**इह उपहूतः** इति सम्बन्धः. पूर्वेण वा (अन्वयः!) **क्षुद्रायुषां किम् अन्यैः असदालापैः** इति. सहस्रसंवत्सरसत्रे अमृतम् आविर्भवति इति निश्चयः. विद्यमानानां च मृत्युः बाधकः. आधिदैविकः च सः. अतो यज्ञभागभोगार्थम् इह आहूतः, अवस्थाभेदेन पशूनां तद्भागत्वात्, "मृत्यवे वा एष नीयते यत् पशुः" (तैत्ति.संहि. ३।१।५।१) इति श्रुतेः. "रौद्रं गवि" (तैत्ति.ब्रा. २।१।८।१) इति न्यायेन अवस्थाभेदेनापि हविर्भाक्त्वम्. **शामित्रं** पशुहिंसनं, तत्र **कर्मणि** देवतायाः अपेक्षा सूचिता. अधर्मकोटित्वाभावाय **भगवान्** इति ॥६-७॥

---

प्रकाशः

**अमृतमिच्छताम्** इति. एतेन मूले **मर्त्यानामृतमिच्छताम्** इत्यत्र **मर्त्याद् अमृतम्** इति पाठः (?) सुबोधिन्यां प्रतिभाति. उक्तयोजनायाम् 'अर्थ'पदाऽध्याहार-सम्भवात् पक्षान्तरम् आहुः **पूर्वेण वा** इति. उक्तयोजनयोः मध्ये पूर्वैव साधीयसी, उत्तरश्लोकानां स्वारस्याद् इति ज्ञापयितुम् अग्रिमं व्याकुर्वन्ति **सहस्रे**त्यादि. **निश्चयः** इति. "विश्वसृजः प्रथमा" (तैत्ति.ब्रा. ३।१२।९।७) इत्यत्र हिरण्मय-शकुनिरूप-ब्रह्मप्रादुर्भाव-श्रावणात् तथा इति अर्थः. **स** इति मृत्युः. ननु यज्ञे मृत्युभागः को वा, सर्वहविषां तत्तद्दैवतत्वेन[१] तत्र मृत्योः अप्रवेशात्, क्वचित् प्रवेशेऽपि असार्वत्रिकत्वाद् इति आशङ्कायाम् आहुः **अवस्थाभेदेन** इति. तथाच नीयमानावस्थानां **पशूनां तद्भागत्वात्** पशुयागे तत्प्रवेशात् तथा इति अर्थः. यागान्तरेऽपि प्रवेशाय आहुः **रौद्रम्** इत्यादि. तथाच घृतस्य सर्वयागेषु सत्त्वाद् मृत्योः रुद्रावस्थया घृतस्य गोनिष्ठत्वावस्थया च यागमात्रे तस्य तथात्वम् इति अर्थः. **शामित्र** इति वक्तव्ये यत् **कर्म**पदम् अधिकम् उक्तं तत्तात्पर्यम् आहुः **तत्र** इत्यादि ॥६-७॥

लेखः

**क्षुद्रायुषाम्** इत्यत्र. **"रौद्रं गवि" इति न्यायेन** इति. इयं श्रुतिः तैत्तिरीयद्वितीयाष्टके प्रथमप्रपाठके ॥६-७॥

---

१. तत्तदेव तत्त्वेन इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

किम् अतो यदि एवं? तद् आह.

**न कश्चिन्म्रियते तावद् यावदास्त इहान्तकः ।**
**एतदर्थं हि भगवान् आहूतः परमर्षिभिः ।।**
**अहो नृलोके पीयेत हरिलीलामृतं वचः ।।८।।**

**न कश्चिद्** इति. ततोऽपि किम्? **एतदर्थम्** इति. लोके कोऽपि न म्रियताम्; अस्मत्सत्रेण आविर्भूतेन अमृतेन पीतेन अमराएव भवन्तु सर्वे, मध्येऽपि न म्रियन्ताम् —इति अर्थं निश्चित्य तन्निर्वाहार्थं **परमर्षिभिः** आह्वानसमर्थैः **भगवान्** इह **आहूतः**. स च अदृश्यः कथारूपेण समागतः. अतएव **अहो** इति आश्चर्यम्. यतो लोके **हरिलीलामृतं**[१] **वचः पीयेत.** अयम् अर्थः— अस्माभिः सत्रं समारब्धं स्वापकीर्तिनिवारणार्थम्. सत्रे हि समारब्धे सर्वे म्रियन्ते, "यः[२] सत्रायागुरते" (तैत्ति.ब्रा. १।४।७।७) इति श्रुतेः, "किम् एते सत्रिणः[३]" (तैत्ति.संहि. ७।२।९।३) इति च.

प्रकाशः

इह भगवान् आहूतः, शामित्रकर्मणि मृत्युः आहूतइति उभयाह्वानपक्षम् अङ्गीकृत्य आहुः **अर्थम्** इत्यादि. **अर्थं निश्चित्य** इति भाविनम् अर्थं निश्चित्य. **न कश्चिद्** इत्यत्र. **स्वापकीर्तिनिवारणार्थम्** इति. अत्र प्रथमश्रुतौ आगुरणम् उक्तं, तच्च उद्यमनं; "सर्वे सर्वाभ्यएव देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः आत्मानम् आगुरते यः सत्राय आगुरते" इति. 'सर्वाभ्यः' इत्यादौ चतुर्थी. तथाच उक्तसर्वार्थम् आत्मानम् उद्यमयति इत्यतो अपकीर्तिः. द्वितीयस्यान्तु "सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रम् आसते तस्मात् पृच्छति किम् एते सत्रिणः" इति स्फुटैव अपकीर्तिः इति तदर्थं

लेखः

**न कश्चिन्म्रियते** इत्यत्र. "**यः सत्रायागुरते**" इति श्रुतिः तैत्तिरीयब्राह्मणे प्रथमाष्टक-तुरीयप्रपाठके. "**किमेते सत्रिणः**" **इति च** इति श्रुतिस्तु संहितासप्तमाष्टक-द्वितीयप्रपाठके ।।८।।

१. हरिलीलामृतवच इति ख. २. यः सत्रायागुरुत इतीति क-ख. यो मात्रायागुरत इतीति घ.

३. सत्रिणा इति चेति ख.

ततः तद्दोषपरिहारार्थम् ऋषिभिः एवं विचारितम् "अत्र भगवान् आह्वातव्यः, यागः च तत्र समर्पणीयः, मृत्युः च शामित्रकर्मणि ; ततः च अस्मदपकीर्तिः गमिष्यति" इति. तत्र भगवता तथैव सम्पादितं ; स्वयम् आगतः. कथारूपेण च समागतः त्वद्द्वारा —इदन्तु आश्चर्यम्. अतो दृष्टद्वारैव प्राणिनाम् अमृतं भविष्यति[१], अन्यथा वरादिद्वारेण[२] अदृष्टद्वारा[३] तत् सिद्ध्येत्. अतः आश्चर्यस्य सिद्धत्वाद् भगवच्चरित्रमेव वक्तव्यं त्वया, न अन्यद् इति ॥८॥

ननु ते स्वतएव स्वमृत्युं निवारयिष्यन्ति ; किं भवत्प्रयासेन इत्यतः आह **मन्दस्य** इति.

**मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै ॥**
**निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥९॥**

**मन्दस्य** अलसस्य, अनेन कर्माभावः सूचितः. **मन्दा प्रज्ञा यस्य** इति ज्ञानाभावः. **मन्दम् आयुः यस्य** इति भक्त्यभावः. तस्य **नक्तं वयः** रात्रिसम्बन्धी आयुः **निद्रया ह्रियते, दिवा च** आयुः **व्यर्थकर्मभिः** इति. अतः सर्वस्यापि आयुषो अन्यत्र विनियोगात् न तेषां सामर्थ्यम् ॥९॥

भगवत्कथाश्रयत्वं कलिनिग्रहस्य मत्वा तस्य प्रस्तावनाम् आह.

**॥ सूतः उवाच ॥**

**यदा परीक्षित्कुरुजाङ्गलेऽवसत् कलिं प्रविष्टं निजचक्रवर्तिते ॥**
**निशम्य वार्तामनतिप्रियां ततः शरासनं संयुगशौण्डिराददे ॥१०॥**

---

प्रकाशः

तथा इति अर्थः. **एवं विचारितम्** इति अग्रिमेण अस्यापि अन्वयः ॥८॥

**मन्दस्य** इत्यत्र. **सामर्थ्यम्** इति मृत्युनिवारणसामर्थ्यम् ॥९॥

**यदा** इत्यत्र. **कलिनिग्रहस्य** इति, कथ्यमानस्य तस्य इति अर्थः ॥१०-१२॥

---

१. इति इति भा.पाठे अधिकम् अत्र -सम्पा. २. अवतारादिद्वारे इति क-ग-घ. ३. अदृष्टाद्वेति घ.

**स्वलङ्कृतं श्यामतुरङ्गयोजितं रथं मृगेन्द्रध्वजमास्थितः पुमान् ॥**
**वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥११॥**
**भद्राश्वं केतुमालं च भारतं चोत्तरान् कुरून् ॥**
**किम्पुरुषादीनि सर्वाणि विजित्य जगृहे बलिम् ॥१२॥**

**यदा परीक्षिदिति.** **कुरुजाङ्गले** देशे हस्तिनापुरे **अवसत्** तदा **निजचक्रवर्तिते कलिं प्रविष्टं** श्रुत्वा **शरासनम् आददे** इति सम्बन्धः. **वसन्** इति पाठे 'भवति' इति अर्थाद् योजनीयम्, 'अभूद्' इति वा. पाण्डवैरेव राज्यस्य साधितत्वात् निष्कण्टके राज्ये स्वयम् उपविष्टो नाममात्रेण राजा इति हृदये दुःखम् आसीत्. तत् कलिप्रवेशे श्रुते विशेषतः शिक्षणं[१] समागतमिति प्रोत्साहो जातः. तथापि राज्ये अधर्मः प्रविष्टः इति **अनतिप्रिया[२] वार्ता.** राजाज्ञाऽकरणे[३] कलिः[४] तत्प्रयोजकः. तदकरणे तेएव मारणीयाः, दैत्यपक्षपाताभावे हृदयपूर्वकाज्ञोल्लङ्घनासामर्थ्यात्. तस्माद् दैत्यवधे न दोषइति **संयुगशौण्डिः** युद्धशूरः **शरासनम् आददे** "दूरादेव तान् मारयिष्यामि" इति. देवाश्वानां दैत्याभिमुखता न सम्भविष्यतीति **श्यामतुरङ्गयोजितं[५] रथम्** आरुरुहे. राजत्वज्ञापनाय **स्वलङ्कृतम्** इति, रत्नादिघटितम्.

लेखः

**यदा परीक्षिद्** इत्यत्र. **अभूदिति वा** इति, इति वा योजनीयम् इति अर्थः. ननु कालजये कर्तव्ये युद्धोद्यमोक्तिः विरुद्धाः – नहि कालो युद्धे साध्यो भवति किन्तु अतीन्द्रियत्वेन दान-धर्मादिभिरेव साध्यः – इति आशङ्कायां **संयुगशौण्डिपदस्य** प्रकृते आवश्यकत्वाय आहुः **राजाज्ञा** इत्यादि. **अकरणे** इति छेदः. नहि कालनिग्रहार्थम् अयं संरम्भः, तस्य अधीरभीषकत्वेन महाभागवतराजाज्ञोल्लङ्घने सामर्थ्याभावात्, किन्तु कलिकालोपोद्बलक-दैत्याः निवारणीयाः, अन्यथा निगृहीतोऽपि अनिगृहीतएव इति तदर्थम् अयम् उद्योगः इति अर्थः. तदेतद् उक्तं **तदकरणे** इति. तदाज्ञया अकरणे इति अर्थः. **तेएव** इति, दैत्याएव इति अर्थः.

१. शिक्षणसमागतमिति क-ग. २. अनतिप्रियां वार्तामिति ख. ३. राज्ञा करणे इति क.
४. कलिस्त्वप्रयोजक इति ख. कलिस्तत्वप्रयोजक इति ग. ५. श्यामतुरगयोजितमिति क.

**मृगेन्द्रध्वजम्**[१] इति स्वस्य असाधारणं चिह्नं, कलिः च गजरूपइति. गर्दभरूपो वा. सिंहरूपेण भगवता दैत्येन्द्रवधाद् वा. **पुमान्** इति असहायशूरत्वम्. **पुराद्** इति पाठे नगराद् युद्धार्थमेव निर्गतो, नतु विचारं कृतवान् इति. दिग्विजये कृते अन्यद् आन्तरालिकं स्वयमेव भविष्यतीति **दिग्विजयाय** इति उक्तम्. अस्य जम्बूद्वीपाधिपत्यं ; तस्य नव खण्डाः. तत्र प्रथमं परितः परिभ्रमणं कृतवान्. तत्र पश्चिमभागे **भद्राश्वं** नाम वर्षं, **केतुमालं** पूर्वभागे, **भारतं** दक्षिणतः, **उत्तराः कुरवः** उत्तरभागे, अन्ये मध्यस्थाः **किम्पुरुषादयः** ; नवखण्डजयं कृत्वा स्वाज्ञां प्रचारितवान्. तत्र प्रमाणं **बलिं (जगृहे!)** गृहीतवान् इति ॥१०-१२॥

कलिस्तु आन्तरालिकः इति ज्ञापनार्थं प्रथमं तत्र भगवद्भक्तिः स्थिता इति निरूपयति.

> **तत्र तत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् ॥**
> **प्रगीयमानञ्च यशः कृष्णमाहात्म्यसूचकम् ॥१३॥**
> **आत्मानञ्च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः ॥**
> **स्नेहञ्च वृष्णिपार्थानां तेषां भक्तिञ्च केशवे ॥१४॥**
> **तेभ्यः परमसंहृष्टः प्रीत्युज्जृम्भितलोचनः ॥**
> **महाधनानि वासांसि ददौ हारान् महामनाः ॥१५॥**

**तत्र तत्र** इति. यत्रैव गच्छति तत्रैव (**स्वपूर्वेषां महात्मनां!**) अर्जुनरथस्य गतिं शृणोति. तत्रत्याः **कृष्णं** दृष्टवन्तो **माहात्म्यं** च गायन्ति. (**वृष्णि-पार्थानां स्नेहं!**) पाण्डव-भगवत्सम्बन्धं च जानन्ति ; तत्सर्वं गायन्ति. अतः (**आत्मानं!**) एनं परीक्षितं च ते जानन्ति

---

लेखः

**भद्राश्वम्** इत्यत्र **मध्यस्थाः किम्पुरुषादयः** इति. इलावृत-रम्यक-हिरण्मय-हरिवर्ष-किम्पुरुषाणि इति अर्थः. तत्र मेरोः सर्वतः इलावृतं, ततः उत्तरतो रम्यकं, हिरण्मयं च दक्षिणतो, हरिवर्षं, किम्पुरुषं च इत्येव खण्डाः इति अर्थः ॥१०-१२॥

---

१. मृगेन्द्रध्वज इतीति क-ख-घ.

(**अस्त्रतेजसः परित्रातं!**) ब्रह्मास्त्रतो भगवता परिपालितम्. **स्नेहं भक्तिञ्च** यावद् जानन्ति तत् सर्वं गायन्ति. अतः **प्रगीयमानं (यशः!) शृण्वानः संहृष्टः तेभ्यो (महाधनानि वासांसि हारान्!) ददौ** इति सम्बन्धः. अनेन (**महाधनानि!**) प्राप्तस्य धनस्य तत्रैव विनियोगः उक्तः, (**हारान्!**) मात्सर्याभावः च, (**वासांसि!**) यथापूर्वं धर्मस्थापनञ्च उक्तम्. **प्रीत्युज्जृम्भितलोचनः** इति तेषाम् अपराधसहनमपि सूचितम्. **महामनाः** इति स्वकृतार्थता च ॥१३-१५॥

एवं वर्तमाने तस्मिन् किञ्चिद् आश्चर्यं वृत्तं तद् वक्ष्यति.

**सारथ्यपारषदसेवनसख्यदौत्य-**
**वीरासनानुगमनस्तवनप्रणामम् ॥**
**स्निग्धेषु पाण्डुषु जगत्प्रणतिं च विष्णो-**
**र्भक्तिं करोति नृपतिश्चरणारविन्दे ॥१६॥**

मध्ये "सारथ्ये"ति श्लोकः प्रायेण विगीतः. तं केचन[1] 'श्रुत्वा' इति पदम् अध्याहृत्य – **करोति** इति कृतवान् इति अर्थे व्याख्याय – योजयन्ति ; **जगत्कर्तृकां प्रणतिं च** श्रुत्वा इति. **जगत्प्रणतस्य** इति वा पाठः ॥१६॥

एवं कलिकार्यं दूरीकृत्य जगति धर्मं स्थापयित्वा, विष्णुभक्तिञ्च, कलिनिग्रहार्थम् आधिदैविकधर्मे उपकारम् आह.

**तस्यैवं वर्तमानस्य पूर्वेषां वृत्तमन्वहम् ॥**
**नातिदूरे किलाश्चर्यं यदासीत् तन्निबोध मे ॥१७॥**

**तस्य एवम्** इति. **एवं वर्तमानस्य तस्य** सतो (**नातिदूरे!**) निकटेएव किञ्चिद् जातं **तन्निबोध** इति सम्बन्धः. **वर्तमानस्य न अतिदूरे** वा ; क्रियापेक्षया देशनैकट्यम्[2]. कालनैकट्यं तु उक्तमेव ॥१७॥

---

लेखः

**तस्यैवम्** इत्यत्र. **क्रियापेक्षया** इति. परीक्षिद्वर्तमानक्रियापेक्षया

---

१. "कर्माणि तानि शृण्वन् तथा विष्णोः जगत्कर्तृकां प्रणतिं च शृण्वन् ... परीक्षिद् ... भक्तिं करोति स्म" इति श्रीधरी - सम्पा. २. देशनैवेद्यमिति ख.

धर्मः पृथिवी च राजानं बोधयितुमेव तादृशरूपेण समागतौ स्व-स्वव्यवस्थाम् अन्योन्यमुखतो निरूपयतः. कलिः च आध्यात्मिके[१] रूपे निराकृते स्थानं प्रार्थयितुं तद्रूपेण प्रकटः. राजान्वेषणार्थमेव प्रवृत्तौ मध्ये मिलितौ. तद् आह.

**धर्मः पदैकेन चलन् विच्छायामुपलभ्य गाम् ॥**
**पृच्छति स्माश्रुवदनां विवत्सामिव मातरम् ॥१८॥**

**धर्मः** इति. **एकेन पदा चलन्** सत्यात्मकेन. अंशतो व्याख्यानं[२] न श्रौतम्. देवतारूपत्वात् च न[३] लौकिकानुपपत्तिः. पादानां नामतः

प्रकाशः

**तस्य एवम्** इत्यत्र. **उक्तमेव** इति. ''यदा परीक्षिद्'' (श्लो. १०) इत्यत्र कलिप्रवेशकथनाद् उक्तमेव ॥१७॥

**धर्मः** इत्यत्र. **प्रवृत्तौ** इति पृथिवी-धर्मयोः विशेषणम्. 'छाया'पदस्य

लेखः

देशनैकट्यम् इति अर्थः. **उक्तमेव** इति, पूर्वस्मिन् पक्षे उक्तम् इति अर्थः ॥१७॥

**धर्मः** इत्यत्र. **अंशतो व्याख्यानम्** इति. **एकेन पदा चलन्** इत्यत्र ''एकेन अंशेन चलन्'' इत्येवं अंशपरत्वेन श्रीधरैः व्याख्यातं, तत् लक्षणाप्रसक्त्या अयुक्तम् इति अर्थः. यद्यपि अत्र श्लोके न व्याख्यातं तथापि ''तपः शौचं दया सत्यमिति पादाः कृते कृताः'' (भाग.पुरा. १।१७।२३) इत्यत्र तथैव व्याख्यास्यमानत्वात् तदनुरोधेन अत्रापि तथैव अर्थः उचितः. ननु एकेन पदा चलने स्थित्याद्यसम्भवाद् अगत्या तथैव व्याख्येयम् इत्यतः आहुः **देवतारूपत्वाद्** इति. ननु* तथापि अत्र तपः-शौच-दया-सत्यानां पादत्वं स्मर्यते तथा द्वादशे तृतीये ''सत्यं दया तपो दानम्'' (भाग.पुरा. १२।३।१८-२०) इति 'शौच'स्थले 'दानं' स्मर्यते. किञ्च तत्रैव ''त्रेतायां धर्मपादानां तुरीया शोचः हीयते'' इत्यादिना

१. आध्यात्मिकरूपे इति ख. २. व्याख्यानेनाऽश्रौतमिति क. अत्र ''धर्मो वृषरूपः, विच्छायां हतप्रभां, गां गोरूपां पृथिवीं, विवत्सां नष्टापत्याम्'' इत्येतावत्येव श्रीधरी - सम्पा. ३. नेति नास्ति घ.

स्वरूपतश्च भेदो युगभेदेन कल्पभेदेन च व्यवस्थापनीयः. **विच्छायां** विवर्णाम्. चरणः[१] पुरुषाधः सच्छायः तिष्ठति, तदभावे विच्छायएव. **गां** पृथिवीं गोरूपाम्. केचन कृष्याद्यभावात्[२] छायाभावम् आहुः, कालेन म्लानां वा. **अश्रुवदनाम्** अश्रूणि वदने यस्याः. अनेन अन्तःतापा. भूमौ बाष्पजलमेव जलं, न वृष्टिजलम्. (**विवत्सां!**) वत्सरहिता गौरिव केवलं पितॄणाम् उपयोगिनी. तथा पृथिव्यपि मरणार्थमेव उपयुज्यते, न जीवनार्थम् इति **मातृपदं** व्याख्यातम् ॥१८॥

आमयं ज्ञात्वापि व्यवहारानुसारेण पृच्छति.

**कच्चिद् भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन ॥**
**आलक्षये भवतीमन्तराधिं दूरे बन्धुं शोचसि कञ्चनाम्ब ॥१९॥**
**पादैर्न्यूनं शोचसि मैकपादमुतात्मानं वृषलैर्भोक्ष्यमाणम् ॥**
**अहो सुरादीन् हृतयज्ञभागान् प्रजा उतस्विन्मघवत्यवर्षति ॥२०॥**
**अरक्ष्यमाणाः स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्तान् ॥**

---

प्रकाशः

आतपाभावार्थकत्वम् अभिप्रेत्य प्रकारान्तरेण वैवर्ण्यम् आहुः **चरण** इत्यादि. वत्सरहितायाः गोः पित्रुपयोगित्वं ''पितृभ्योऽग्निष्वातेभ्योऽभिवान्यायै दुग्धे मन्थम्'' (तैत्ति.संहि. १।८।५।१) इति तद्धविर्बोधकश्रुत्या ज्ञेयम्. 'अभिवान्या' मृतवत्सा. 'मन्थः' सक्तुः. **व्याख्यातम्** इति. पित्रुपयोगिकथनेन अभिवान्यात्वबोधनादेव उक्तार्थम् ॥१८॥

लेखः

शुचएव ह्रासः प्रतिपाद्यते, एवञ्च विरोधे कथं निर्णयः❊ इत्यतः आहुः **युगभेदेन** इत्यादि. अतएव ''कोऽवृश्चत् तव पादांस्त्रीन्'' (भाग.पुरा. १।१७।१२) इत्यपि स्वरसतः संगच्छते इति ज्ञेयम्. **चरण** इति. चरणो हि पुरुषस्य अधः वर्तमानएव **सच्छायो** भवति, न अन्यथा. अत्र च पृथिव्याः चरणरूपायाः पुरुषरूप-भगवत्स्वरूपाभावे छायाराहित्यं युक्तमेव इति अर्थः ॥१८॥

---

१. चरणे पुरुषस्याऽधश्छाया तिष्ठतीति घ. २. पुष्पाद्यभावादिति ख. कृष्णाद्यभावादिति घ.

**वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥२१॥**
**किं क्षत्रबन्धून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि ॥**
**इतस्ततो वाशनपानवास-स्नानव्यवायोन्मुखजीवलोकम् ॥२२॥**
**यद्वाम्ब ते भूरिभरावतार-कृतावतारस्य हरेर्धरित्रि ॥**
**अन्तर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलम्बितानि ॥२३॥**

**कच्चिद्** इति. **भद्रे** इति सम्बोधनं परीक्षिद् अस्ति पालकः इति ज्ञापनार्थम्. यद्यपि वैकुण्ठे भगवद्भार्या त्वं सुखेन[१] तिष्ठसि तथापि (**ते!**) तव **आत्मनः** पृथिवीरूपस्य **अनामयं कच्चित्?** रोगस्तु तव नास्ति ; आधिः सम्भाव्यते. तद् आह **ईषत् म्लायता मुखेन** यतो **विच्छाया असि** अतो **भवतीम् अन्तराधिं लक्षये. अन्तरा आधिः** यस्याः सा, ताम्. तत्र आधिहेतून् उत्प्रेक्षते. दशेन्द्रियाणि अन्तःकरणचतुष्टयं, ततः चतुर्दश शोकहेतून् उत्प्रेक्षते **दूरे बन्धुम्** इत्यादिना. हे **अम्ब! दूरे** स्थितं **बन्धुं** भर्तारं वराहं, हे अम्ब मां वा पुत्रं **शोचसि?** शोके हेतुः **पादैः न्यूनम्** इति. **आत्मानं** शरीरं (**उत!**) वा पृथिवीरूपम्. रसो अत्र शोकहेतुः[२]. **वृषलैः** शूद्रैः **हृतयज्ञभागाः** देवाः बाहवः. **मघवति अवर्षति** अन्नरहिताः प्रजाः पादाः, **अरक्ष्यमाणाः स्त्रियो बालाः** च. हे **उर्वि**[३] सन्तोषाभावेन मनोवैक्लव्यं, मलमोक्षो वा. **पुरुषादैः** राक्षसैः **इव आर्तान्** पीडितान् **बालान्. वाचं देवीं** वेदरूपां ; चक्षुः एषा[४]. **कुकर्मणि ब्राह्मणकुले, (अब्रह्मण्ये!)** ब्राह्मणाहिते **राजकुले, कुलाग्र्यान्** ब्राह्मणान् श्रोत्ररूपान्, **क्षत्रबन्धून्** क्षत्रियाधमान्. **कलिना उपसृष्टान्** इति सर्वदोषसहितान् घ्राणरूपान्. **तैः अवरोपितानि** उद्वासितानि **राष्ट्राणि** देशाः

लेखः

**पादैर्न्यूनम्** इत्यत्र. **रसोऽत्र** इति. **अत्र** पृथिवीविषयकशोके **रसएव शोके हेतुः**. अर्थाद् रसाभावं दृष्ट्वा शोकः इति तत्त्वम्. अभावस्मरणस्य प्रतियोगिस्मरण-हेतुकत्वात् तथा उक्तिः. **अरक्ष्यमाणाः** इत्यत्र. ... ॥२०-२१॥

१. सुखेनाऽतिष्ठसीति ख. २. शोके हेतुः इति क-लेखे - सम्पा.

३. हेतुर्विसन्तोषाभावेनेति ख-ग. ४. एषामिति ख.

वाग्रूपाः. **इतस्ततो** विधि-निषेध-परिपालन-व्यतिरेकेण भोजन-**पान**-स्थिति-**स्नान**-सम्भोगोन्मुखं **जीवलोकं** बुद्धिरूपम्. एतेषां पूर्वपक्षतापि सम्भवति इति आह **यद्वा** इति. (**ते!**) तव **भूरिभारावतारणार्थं कृतावतारस्य** भगवतो वासुदेवस्य (**हरेः!**) सर्वदुःखहर्तुः, हे **धरित्रि,** साम्प्रतम् **अन्तर्हितस्य,** तेनैव **विसृष्टा कर्माणि** उदारचरित्राणि अनधिकारिषु वर्तमानानि **निर्वाणार्थं विलम्बितानि** निर्वाणम् अदत्वा तूर्ष्णीं स्थितानि चित्तरूपाणि (**स्मरती!**) स्मरन्ती तानि **शोचसि** ॥१९-२३॥

**इदं ममाचक्ष्व तवाधिमूलं वसुन्धरे येन विकर्षितासि ॥**
**कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमद्य सौभगम् ॥२४॥**

**इदं** वक्ष्यमाणं भवत्येव **तव आधिमूलं ;** तत्र सम्मतिमेव **आचक्ष्व.** हे **वसुन्धरे** सर्वरत्नादिसहिते शृङ्गारप्रिये, **येन** रहितेन त्वं **विकर्षिता असि.** तत्[१] स्वयमेव आह यत् कलिना **कालेन बलिना सुरार्चितं** (**ते सौभगं!**) तव सौभाग्यं भगवत्स्थितिरूपं तद् **अद्य हृतम्** इति, कालेन चिह्नादीनामपि हरणात् ॥२४॥

तत्र धर्मोक्तं सर्वमेव हेतुम् अङ्गीकृत्य सर्वेषां मूलं भगवद्गमनमिति यत्रैव तद्राहित्यं तमेव शोचामि इति आह.

**॥ धरणी उवाच ॥**

**भवान् हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ॥**
**चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥२५॥**

**भवान् हि वेद** इति. युक्तिः उक्तैव— धर्मस्य ज्ञानमपि प्रमाणम्, उत्प्रेक्षितमपि प्रमितमेव, स्वात्मनि प्रमितत्वात्. अतः तद् आह **चतुर्भिः वर्तसे येन** इति. द्वापरान्ते स्वभावतएव पादत्रयं गच्छति. तदापि[२] त्वं **येन** भगवता कृत्वा **चतुर्भिः पादैः वर्तसे.** ते पादाः (**लोकसुखावहैः!**) सर्वसुखहेतवः. तदभावे सर्वे शोच्याः भवानिव ॥२५॥

---

१. ततः स्वयमेवाऽऽहेति ग-घ. २. तदपीति क.

शोके हर्षे च गुणाएव हेतवः. ते च भगवन्निष्ठाः तत्सम्बन्धादेव अन्यत्र भवन्ति. तेन गुणपात्रेण रहितं सर्वमेव शोचामि इति वक्तुं गुणान् गणयति भगवदीयान् **सत्यम्** इत्यादिना.

**सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् ॥**
**शमो दमस्तपस्साम्यं तितिक्षोपरतिः श्रुतम् ॥२६॥**
**ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ॥**
**स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च ॥२७॥**
**प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ॥**
**गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहङ्कृतिः ॥२८॥**
**इमे चान्ये च भगवन्नित्या यत्र महागुणाः ॥**
**प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥२९॥**

**सत्यं** यथार्थभाषणम्. **शौचं** शुद्धत्वम्. **दया** परदुःखासहनम्. **क्षान्तिः** क्रोधप्राप्तौ चित्तसंयमनम्. **त्यागो** अर्थिषु मुक्तहस्तता. **सन्तोषो** अलम्बुद्धिः. **आर्जवम्** अवक्रता. **शमो** मनोनैश्चल्यम्. **दमो** बाह्येन्द्रियनैश्चल्यम्. **तपः** स्वधर्मः. **साम्यम्** अरिमित्राद्यभावः. **तितिक्षा** अपराधसहनम्. **उपरतिः** लाभप्राप्तौ औदासीन्यम्. **श्रुतं** शास्त्रविचारः. **ज्ञानम्** आत्मविषयम्. **विरक्तिः** वितृष्णता. **ऐश्वर्यं** नियन्तृत्वम्. **शौर्यं** सङ्ग्रामोत्साहः. **तेजः** प्रभावः. **बलं** दक्षत्वम्. **स्मृतिः** कर्तव्यार्थानुसन्धानम्. **स्वातन्त्र्यम्** अपराधीनता. **कौशलं**[१] क्रियानिपुणता. **कान्तिः** सौन्दर्यम्. **धैर्यम्** अव्याकुलता. **मार्दवं** चित्ताऽकाठिन्यम्. **प्रागल्भ्यं** प्रतिभातिशयः. **प्रश्रयो** विनयः. **शीलं** सुस्वभावः. **सह-ओजो-बलानि** मन-इन्द्रिय-शरीराणां पाटवानि. **भगो**[२] भोगास्पदत्वम्. **गाम्भीर्यम्** अक्षोभ्यत्वम्. **स्थैर्यम्** अचञ्चलता. **आस्तिक्यं** श्रद्धा. **कीर्तिः** यशः. **मानः** पूज्यत्वम्. **अनहङ्कृतिः** गर्वाभावः. **अन्ये च**

---

प्रकाशः

**सत्यम्** इत्यत्र. **शोके हर्षे च** इति. इदानीन्तनशोके प्राथमिकहर्षे च इति अर्थः ॥२६॥

---

१. कौशल्यमिति ख. २. भगः सौभाग्यास्पदत्वमिति क-घ.

ब्रह्मण्यत्व-भक्तवत्सलत्वादयः **नित्याः** सहजाः. **इमे च अन्ये च** इति चकारद्वयं संसर्गिदोषनिवृत्त्यर्थम्[१]. **महागुणाः** इति परमकाष्ठापन्नाः ; यथा ज्ञानं निरतिशयं, बलं निरतिशयम् इति. एकस्मिन्नपि गुणे जाते जगति महत्त्वं लभते जीवः ; तेन विना सर्वथा न महत्त्वम्. भक्तिस्तु भगवद्रूपेति न तया व्यभिचारः. अतएव सर्वैः एते गुणाः **प्रार्थ्याः**. ते भगवति (**न वियन्ति कर्हिचित्!**) व्ययमपि न प्राप्नुवन्ति, ईषदपि न क्षीयन्ते ॥२६-२९॥

एवं गुणनिरूपणस्य प्रयोजनम् आह.

**तेनाहं गुणपात्रेण श्रीनिवासेन साम्प्रतम् ॥**
**शोचामि रहितं लोकं पाप्मना कलिनेक्षितम् ॥३०॥**

**तेन अहम्** इति. सर्वे गुणाः एकतः लक्ष्मीश्च एकतः, अतः तां भिन्नतया निरूपयति **श्रीनिवासे**ति. भगवन्निर्गमने सर्वे भगवद्गुणा लक्ष्मीः तद्गुणाः च निवृत्ताः. अतः शोचामि इति आह **शोचामि रहितम्** इति. किञ्च तत्प्रतियोगिनो दोषाः सर्वे समागताः इति आह **पाप्मना कलिना ईक्षितम्** इति. सर्वेषां पापानां हेतुभूतेन **कलिना ईक्षितं** दृष्टम् "आत्मीयो अयम्" इति ॥३०॥

के तद् ईक्षिताः इति आकाङ्क्षायां त्वदुक्ताः सर्वेएव इति तान् गणयति.

---

लेखः

**इमे चाऽन्ये च** इत्यत्र. **भक्तिस्तु भगवद्रूपा** इति. ननु अयं भगवद्गुणानुवादो हि भगवत्स्मरणोद्रिक्त-भक्त्यैव सम्भवति ; ताम् भक्तिमेव कालः कुतो न तिरोहितवान् इत्यतः इदम् उक्तम्. यद्वा ननु **प्रार्थ्या महत्त्वम्** इति व्यभिचरितं, भक्तीच्छूनां कुशलानां भक्त्यतिरिक्तप्रार्थनायाः अदर्शनाद् इत्यतः आहुः **भक्तिस्तु भगवद्रूपा** इति. एवं तत्प्रार्थनेन तत्सिद्धिः आनुषङ्गिकीति न व्यभिचारः इति अर्थः. अतएव "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा" (भाग.पुरा ११।२०।३३) इत्यादि वाक्यानि इति भावः ॥२९॥

---

१. सांसर्गिकेति घ.

**आत्मानञ्चानुशोचामि भवन्तञ्चाऽमरोत्तम ॥**
**देवानृषीन् पितॄन् साधून् सर्वान् वर्णांस्तथाश्रमान् ॥३१॥**

**आत्मानम्** इति. हे **अमरोत्तम** देवश्रेष्ठ धर्म. द्वितीयान्तपाठो वा. **देव-पितृ-ऋषयः** ऋणापाकरण-कर्त्रभावात्[१]. [२]कालादिधर्महेतूनाम् अभावात् सदाचाराः न सन्ति इति **साधुशोकः**. **वर्णाश्रमाः** स्वधर्माभावात् ॥३१॥

**अलम्** एतैः निरूपितैः ; मुख्यतया तु आत्मानमेव अनुशोचामि इति आह **ब्रह्मादयः** इति द्वाभ्याम्.

**ब्रह्मादयो बहुतिथं यदपाङ्गमोक्ष-**
**कामास्तपः समचरन् भगवत्प्रपन्नाः ॥**
**सा श्रीः स्ववासमरविन्दवनं विहाय**
**यत्पादसौभगमलं भजतेऽनुरक्ता ॥३२॥**

अत्र केचिद् इमे गुणाः प्राकृतगुणकार्यरूपाः[३] गुणसम्बन्धादेव भगवति

---

प्रकाशः

**ब्रह्मादयः** इत्यत्र. सर्वसाधारण्येन सर्वशोकहेतुभूतयोः भगवद्राहित्य-कलीक्षितयोः कथनेन प्रश्नोत्तरपूर्तौ **ब्रह्मादयः** इत्यादि कथनस्य प्रयोजनम् आहुः **अलम्** इत्यादि. तत्र उक्तगुणवद्-भगवद्-राहित्यस्य शोकप्रयोजकत्वात् ते गुणाः सहजाइति मूलग्रन्थानुरोधाद् वक्तव्यम् इति तद्दार्ढ्याय मतान्तरं दूषयितुम् उपक्षिपन्ति **अत्र केचिद्** इति, मायावादिनः. **तदीयत्वे गुणत्वमेव**

लेखः

**आत्मानम्** इत्यत्र. **देवपितृऋषयः** इति. मूले **देवान् पितॄन् ऋषीन् साधून्** इति पाठः प्रतिभाति. तथा पदव्याख्यानत्वेन ऋषीणां अन्ते कथनम्. **ऋण** इति. देवादिऋणापाकरणकर्तॄणां यागधर्मपूर्वक-प्रजोत्पत्ति-ब्रह्मचर्याणाम् अभावात् तान् शोचामि इति अर्थः. **वर्णाश्रमाः** इति. धर्महेतुकालाद्यभावादेव वर्णाश्रमधर्माभावाद् वर्णाः आश्रमाः च न सन्ति इति अर्थः ॥३१॥

**ब्रह्मादयः** इत्यत्र. **अत्र केचिद्** इति, मायावादिनः इति अर्थः.

---

१. ऋणापकरणकर्तृभावादिति ग. करणकर्तृभावादिति ख.

२. कलादिधर्मेति ख. ३. प्राकृतकार्यगुणरूपा इति ग.

वर्तन्ते, न सहजाः इति आहुः. ते प्रष्टव्याः— कस्य एते गुणाः इति, सत्त्वादीनाम् आत्मनो वा? आद्ये स्वातन्त्र्यादीनां तदीयत्वे गुणत्वमेव भज्येत, ब्रह्मत्वं वा भवेत्. संयोगजत्वेऽपि प्राप्ताप्राप्तविवेकेन गुणसम्बन्धकृतः चेद्

प्रकाशः

**भज्यत** इति. तमसः प्रलायकत्वेन स्वातन्त्र्यस्य तमोगुणत्वात्, कौशलादीनां रजोगुणत्वाद्, रजस्तमसोश्च हेयत्वेन तेषां गुणत्वमेव न स्यात्. विग्रहस्य सात्त्विकत्वाङ्गीकारेऽपि तत्र तेषां प्रवेशाऽलाभादपि तद्गुणत्वं न स्याद् इति अर्थः. **ब्रह्मत्वं वा भवेद्** इति. सत्त्वादीनाम् असत्त्वाद् एतेषामपि तथात्वापत्त्या तत्र अभावेन निर्विशेषब्रह्मत्वमेव भगवतः स्यात्, नतु ईश्वरत्वम् इति अर्थः. तेषां सदसद्विलक्षणत्वे तु ‘‘न सत्तन्नासदुच्यते’’ (भग.गीता १३।१२) इति गीतावाक्येन ब्रह्मणः तथात्वात् तेषामपि ब्रह्मत्वं स्यात्, नतु गुणत्वम् इति वा अर्थः. ननु एते गुणाः भगवति न आरोपिताः किन्तु आगन्तुकाः अतो निर्विशेषत्वाभावाद् न ब्रह्मत्वं किन्तु ईश्वरत्वम् इति चेत्, तत्र आहुः **संयोगजत्वे** इत्यादि. तथाच तथा चेत् तदा वसनारुण्यवद् भगवति

लेखः

**तदीयत्वे** इति, सत्त्वादिगुणाधिकरणत्वे इति अर्थः. **भज्येत** इति, सत्त्वादीनां शौचादीनां च गुणत्वं सम्भज्येत इति अर्थः, गुणे गुणाश्रयत्वस्य असम्भवाद् इति भावः. यद्वा स्वातन्त्र्यादिगुणानां नियमेन सत्त्वादि-गुणाश्रितत्वे तेषां भगवद्गुणत्वं भज्येत, यतः न हि अन्याश्रितस्य अत्र गुणत्वं शक्यवचनम् इति. अथ गृहिलतया तथैव मन्येथाः तदा दूषणान्तरं गृहाण इत्याहुः **ब्रह्मत्वं वा** इति. सत्त्वादीनां स्वतन्त्रतया शौचादि-सकलब्रह्मगुणास्पदत्वेन ब्रह्मतैव स्याद् इति अर्थः. एवञ्च सकलप्रमाणविरोधः इति भावः. अथ ब्रह्मणो निर्गुणत्वेन तत्र स्वतो गुणसम्बन्धासम्भवाद् यं कञ्चन उपाधिं परिकल्प्य एवं तत्संयोगजन्यत्वमेव गुणानां स्वीकार्यम् इति चेत्, तथापि सत्त्वादिगुणैः स्मरणात् सत्त्वादिना उत्पत्त्यादि प्राप्तं, व्यतिरेके तु अप्राप्तम् इति **प्राप्ताप्राप्तविवेकेन** सत्त्वादिगुणानामेव उपाधित्वम् अङ्गीकृत्य **गुणसम्बन्धत्वे कृत**एव स्वातन्त्र्यादि-गुणोत्पत्तिपक्षएव आदर्तव्यः. एवञ्च उत्पत्तिस्वीकारे जन्यपदार्थस्य नाशाऽविनाभावित्वात् तन्नाशोऽपि उरीकार्यएव.

गुणानामेव. उत्पत्तिपक्षस्तु वैनाशिकप्रक्रियायाः अनङ्गीकारात् न घटते, "नित्या" (श्लो. २९) इति वाक्यविरोधः च. सगुणो भगवान् इति तु पक्षो निराकृतो, निराकरिष्यते च. किञ्च याम् अनुपपत्तिं परिहर्तुं भगवति सत्त्वादीन् कल्पयन्ति तत्र सत्त्वादेः का शक्तिः यया भगवदनुपपत्तिमपि

---

प्रकाशः

प्रतीयमानाअपि ते **गुणानामेव** स्युः न भगवतः इति अर्थः. ननु घृतद्रवत्ववत् ते भगवति उत्पद्यन्ते, नतु परं जयन्ति, अतो भगवदीयाः इति चेत्, तत्र आहुः **उत्पत्ती**त्यादि. नच "नित्य"पदस्य यावदवतारभावित्वम् अर्थो युक्तः, "न वियन्ति स्म कर्हिचिद्" (श्लो. २९) इति चतुर्थपाद-वैयर्थ्यापत्तेः. अतः तद्विरोधो दुरुद्धरएव इति अर्थः. ननु गुणसम्बन्धः सार्वदिकएव अङ्गीक्रियते इति न पूर्वोक्तो दोषः इत्यतः आहुः **सगुणः** इत्यादि. सत्त्वादिगुण-स्वरूपविचारेण दूषणान्तरम् आहुः **किञ्च** इत्यादि. अस्तु सगुणः तथापि का अनुपपत्तिः यदर्थं भगवति सत्त्वादयः कल्प्यन्ते? निर्विशेषस्य जगत्कर्तृत्वाद्ययोगात् श्रुत्युक्तानां तेषाम् असम्भवः इति चेद्, बाढं, तर्हि तेषां सत्त्वादीनां सामर्थ्यं विचारणीयं किम् एते तां परिहर्तुं शक्ताः न वा इति. तत्र आद्यस्तु न सङ्गच्छते. तथाहि— ते जडाः किं ब्रह्मणि स्वतएव सम्बद्धाः(१), हेतुना(२) वा? आद्ये(१) त्रयाणाम् अन्योन्यमिथुन-वृत्तित्वेन

लेखः

तत्तु अस्माभिः श्रुत्येकशरणैः आस्तिकैः "असत्यम् अप्रतिष्ठं ते जगदाहुरनीश्वरम्" (भग.गीता १६।८) इत्यादिभिः आसुरमतत्वेन निन्दितायाः वैनाशिकप्रक्रियायाः अनङ्गीकाराद् न मन्यते. "इमे चाऽन्ये च भगवन् नित्या यत्र महागुणाः" (श्लो. २९) इति प्रकृतवाक्यविरोधश्च इति. तदिदम् उक्तं **विरोधश्च** इत्यन्तेन. ननु मा अस्तु सत्त्वादिगुणानाम् उपाधित्वग्रहणम् ; एवञ्च सर्वदा सगुणस्यैव इमे स्वातन्त्र्यादिगुणाः उत्पन्नशिष्टाएवेति न वैनाशिकप्रक्रिया प्राप्तावसरा इति चेद्, अत्र आहुः **सगुणो भगवानिति पक्षः** इति. **यामनुपपत्तिम्** इति, वैषम्यादि-प्राप्तिरूपाम् इति अर्थः. **का शक्तिः** इति. तेषामपि भगवत्कार्यत्वात् तदधीनत्वेन तद्दूरीकुर्याद् इति अर्थः.

दूरीकुर्युः? अथ यावान् अर्थो अस्माभिः ब्रह्मणि उच्यते तावान् गुणेषु मायायां वा मन्यमानाः(?) चेत्, ''मायेत्यसुराः'' (मुद्गलोप. २।३) इति पक्षं न व्यभिचरेयुः इति अलं विस्तरेण. **बहुतिथं** बहुकालम्. भगवत्त्यागस्य परमानिष्टत्वं शास्त्रार्थः ; तत् किं स्वभावतएव हेतुतो वा

प्रकाशः

सम्बन्धस्य अविशिष्टत्वाद् युगपत् कार्यत्रयापत्त्या सृष्टि-प्रलयादि-व्यवस्था-भङ्गप्रसङ्गः. अथ चलत्वाद् रजः प्राक् संसृज्यते ततो अन्यः ततः इतरइति गुणस्वभावएव व्यवस्थापकः इति चेत्, तर्हि सर्वप्रलायकत्वात् प्रबलं तमः कुतः तूष्णीकं? वस्त्वभावाद् इति चेत्, तर्हि उत्पद्यमानानेव द्वितीयक्षणे ग्रसतु! अथ सत्त्वेन प्रतिबन्धात् न तथा इति चेत्, तर्हि सत्त्वस्यापि सर्वदा सत्त्वाद् न जातु प्रलयो अस्तु! अथ अन्योन्योपमर्दकत्वमपि तेषां स्वभावइति सत्त्वोपमर्दात् सुखेन प्रलयः इति चेत्, तर्हि वैनाशिकप्रक्रियायाः अनङ्गीकाराद् ग्रस्यमानानां द्वितीयक्षणे उत्पत्तिः अस्तु, स्वभावस्य अनपेतत्वाद् हेत्वन्तरस्य अनुपेतत्वाच्च. अतो अवधिनियमभङ्गाद् आकस्मिकवादान्तर्गतः स्वभाववादस्तु असङ्गतः, अनीश्वरत्वापादकत्वाद् ''यतो वा इमानि'' (तैत्ति.उप. ३।१।१) इत्यादिश्रुतिविरोधाच्च. अथ हेतुना[२] सम्बद्धाः तर्हि सम्बन्धात् पूर्वम् ईश्वरस्य अभावात् तस्य कार्यत्वापत्तिः, साङ्ख्यमतापत्तिश्च. हेतुः च कः इत्यपि विचारणीयम्. कालः इति चेद्, अद्वैतहानिः. इच्छा चेत्, तदापि तथा. तत्रापि तस्याः क्रमानपेक्षायाम् अव्यवस्थाप्रसङ्गः. अपेक्षायां तत्र हेतोः अवश्यवाच्यत्वेन गुणानां तथात्वाङ्गीकारे स्वभाववादापत्त्या तद्दोष-तादवस्थ्यम्. तेषाम् अवस्तुत्वेन अङ्गीकारात् ततः कार्याभावे शून्यवादप्रसक्तिः. अतः तेषां सामर्थ्यविचारे भगवति तत्सम्बन्धकल्पनम् असङ्गतम् इति अर्थः. ननु भेदवादम् अङ्गीकृत्य, सत्त्वादीनां चेतनत्वं च अङ्गीकृत्य, तत्सम्बन्धं च नित्यम् अङ्गीकृत्य, स्वातन्त्र्यादीनां गुणधर्माणां भगवति नित्यत्वम् अङ्गीक्रियते इति चेत्, तत्र आहुः **अथ** इत्यादि. प्रासङ्गिकं परिहृत्य प्रस्तुतम् आहुः **बहुतिथम्** इत्यादि. विशेषेण आत्मशोके को वा हेतुः इति आकाङ्क्षायाम् आहुः **भगवत्त्यागस्य** इति, भगवत्कृतत्यागस्य.

इति विचार्यते. तत्र भगवदीयानां भगवत्त्यागः सर्वथा[१] अनर्थाय, तदपेक्षया अन्येषां हीनत्वात्, सङ्घातप्रवेशेन सापेक्षत्वात् च. हीनापेक्षायां[२] स्वरूपनाशापत्तिः. अतो भगवदीयानां मध्ये मुख्या लक्ष्मीः स्वतः समर्थाअपि तत्सामर्थ्यं तस्याः अकिञ्चित्करम् इति तन्निर्वाहार्थं च कार्ये कारणे[३] च उदासीना भगवन्तमेव भजते. अन्ये च पुनः तत्सेवकाः, अहं च सपत्नी. अतो भगवत्त्यागे महान् अनर्थः इति वक्तुं लक्ष्म्याः कृत्यम्

प्रकाशः

**विचार्यते** इति. स्वतः त्यागे भगवतः स्वतन्त्रत्वाद् अल्पः, स्वात्मदोषेण त्यागे तु अधिकः इति निश्चेतुं त्यागहेतुः विचार्यते इति अर्थः. **सर्वानर्थाय** इत्यत्र कर्मधारयः. **तदि**त्यादि. एकेन त्यक्तं हि अन्यो अपेक्षते इति तेन ग्रहणे सर्वे अनर्थाः इति अर्थः. हेत्वन्तरम् आहुः **सङ्घातप्रवेशेन** इति.व्युच्चरणोत्तरमपि यावद् न सङ्घातप्रवेशः तावद् न तत्त्यागः, अतः तेन सापेक्षत्वे अपेक्षायाः अनर्थमूलत्वात् तथा इति अर्थः. प्रकृते को वा अनर्थः इत्यतः आहुः **हीने**त्यादि. हीनेन हीनस्य वा अपेक्षायां भगवदीयत्वरूप-स्वरूपमेव नश्यति इति सएव अनर्थः इति अर्थः. **अतः** इति एतत् सर्वम् अवगत्य. **समर्था** इति अन्यस्य हीनतानिवारणसमर्था. **निर्वाहार्थं च** इति **च**कारात् स्वस्य भगवदीयतायाअपि निर्वाहार्थम्. कार्यं कारणं च अनुपदम् अत्रैव व्याख्यास्यते. **अन्ये** इति ब्रह्मादयः **तत्सेवकाः** भगवतः सेवकाः. **सपत्नी** इति तत्समानभाग्या[४]. **अतः** एवम् अस्माकं

लेखः

ननु अन्यदेवादीनाम् अनुस्मरणं कर्तव्यम् इत्यतः आहुः **तदपेक्षया** इति. **सङ्घात** इति. रजस्तमआदिविशिष्ट-शरीरालम्बनेनैव तेषां कार्यकरणसमर्थत्वाद् अप्रयोजकाः इति अर्थः. ननु अगत्या तदेव अङ्गीकरणीयम् इत्यतः आहुः **अकिञ्चित्करम्** इति. भगवत्सम्बन्धं विना तथा इति अर्थः. **अन्ये** ब्रह्मादयः **तत्सेवकाः** लक्ष्मीसेवकाः, **अहम्** इति पृथिवी **च.**

१. सर्वानर्थायेति ग. २. दीनापेक्षयेति ग. ३. कार्य्यकारणे चेति ग.

४. समानभाग्या इति मुद्रितपाठः. कि.पाठे तु एवम् - सम्पा.

आह. तस्याअपि कार्यवृत्तान्तः[१] उच्यते. **यदपाङ्गमोक्षकामाः** यस्याः लक्ष्म्याः अपाङ्गः[२] कटाक्षः तस्य मोक्षः तत्कामाः ब्रह्मादयः. अत्र 'कटाक्ष'पदेन भगवन्निष्ठानुरागसहित- भगवद्विषयक-कामभावसहित-स्वसमर्पणभावोद्गिरण-सहितार्धदृष्टिः[३] उच्यते. ततः तस्यां दृष्टौ भगवान्, भगवद्विषयकः कामो, भगवत्स्नेहो, लक्ष्मीः, सृष्टिः इति पञ्च पदार्थाः सन्ति. ते हि दुर्लभाः एकत्र समुदिताः. अतो दृष्टिविषयता-सिद्ध्यर्थं **भगवत्प्रपन्नाः** भगवति शरणं गताः भगवन्तं हृदये स्थापयित्वा इति अर्थः. तादृशाः सन्तः **तपः**[४] **(समचरन्!)** कुर्वन्ति. एतादृशाः कटाक्षाः लक्ष्म्याः प्रतिक्षणं सहस्रं भवन्ति[५]. एवं माहात्म्ययुक्तापि **सा (श्री!)** लक्ष्मीः चरणारविन्दं **भजते,** भगवदत्यागे[६] तस्यैव हेतुत्वात्. तस्याअपि दुर्लभः चरणः. सेवार्थमेव

प्रकाशः

सर्वेषां भगवदीयत्वाद् विवक्षितं **वक्तुं** सर्वत्यागसूचकं भजनरूपं तस्याः **कृत्यम् आह** इति अर्थः. **तस्याः** इत्यादि. तस्याः स्वकार्ये औदासीन्यं वक्तुं प्रथमतः स उच्यते इति अर्थः. **कटाक्षपदेन** इति तद्वाचकाऽ**पाङ्गपदेन. उच्यते** इति, **भावोद्गिरणान्तानां** चतुर्णाम् अभावे तादृशदृष्टेः असम्भवाद् अर्थबलेन समर्प्यते. **अतः** इति, एषां[७] दुर्लभानां लक्ष्मीदृष्ट्या सिद्धिम् अवगत्य. **तादृशाः** इति लक्ष्मीकटाक्ष-मोक्षकामाः.

लेखः

तथाच अन्येषां तद्द्वारा भगवत्प्रसादप्राप्तावपि मम तु सपत्नीत्वात् ताम् अनपेक्ष्यैव साक्षाद्भगवत्सम्बन्धाभिलाषो युक्तः इति भावः. **कार्यवृत्तान्तम्** इति. **कार्ये कारणे च उदासीनाः** इति उक्तः, तत्र कार्यकारणे औदासीन्यम् आह इति अर्थः. **भगवद्विषयकः** इति, भगवद्विषयको अभिलाषः इति अर्थः. **लक्ष्मीः** इति, भगवदीयं तेजः इति अर्थः. **सृष्टिः** इति, सृष्टिसामर्थ्यम् इति अर्थः, तस्याः रजःप्रधानत्वाद् इति भावः.

१. वृत्तान्तमुच्यत इति क-ख-ग. कार्यवृत्तान्तम् इति लेखे - सम्पा. २. अपाङ्गमिति ख-ग.

३. अर्थदृष्टिरिति घ. ४. तपं कुर्वन्तीति घ. ५. भवतीति क-ख.

६. भगवत्पदत्यागे इति ख. भगवत्त्यागे इति घ. ७. एवम् इति कि.पाठे - सम्पा.

चरणप्राप्तिस्तु सुतरां दुर्लभा. एवं तस्याः कार्यम् उक्त्वा कारणपरित्यागम् आह **स्ववासम् अरविन्दवनं विहाय** इति. शतांशेनापि अन्यासक्तौ[१] चरणसेवा दुर्लभा इति स्वस्य जन्मस्थानमपि अरविन्दवनं विहाय. **वन**पदेन च असेव्यत्वं सूचितम्. (**पादसौभगं!**) चरणसौभाग्यं **भजते** भक्तिनिष्ठा भवति इति अर्थः. एतावता मम चरणत्वाद् मत्सेवां सापि करोति इति अहं भगवदीयानाम् उत्तमा इति भावः. चरणसौभाग्ये साभिलाषा लक्ष्मीः तत्प्राप्तये तत्त्वाय वा (**अनुरक्ता!**) अनुरागेण अत्यभीष्टत्वं द्योतयति ॥३२॥

तद् मयि सर्वत्र स्थितम् इति आह.

**तस्याहमब्जकुलिशाङ्कुशकेतुकेतैः**
**श्रीमत्पदैर्भगवतः समलङ्कृताङ्गी ॥**
**त्रीनत्यरोचमुपलभ्य ततो विभूतिं**
**लोकान् स मां व्यसृजद् उत्स्मयतीं तदन्ते ॥३३॥**

**तस्य**[२] इति. चरणमाहात्म्यम् उक्त्वापि पुनः[३] भगवद्ग्रहणं भगवतापि समलङ्करणार्थम्. स्वरूपतः चरणोत्कर्षम् आह **अब्जकुलिशाङ्कुशकेतुकेतैः** इति. (**अब्ज!**) भगवच्चरणे कमलाकृतिरेखाः एकदेशस्य कमलत्वसम्पादिकाः

---

प्रकाशः

**उक्त्वा** इति, तत्र औदासीन्यबोधनाय उक्त्वा. **जन्मस्थानम्** इति. "पुनश्च पद्माद् उत्पन्ना आदित्योऽभूद् यदा हरिः" (विष्णुपुरा. १।९।१४३) इति विष्णुपुराणवाक्याद् जन्मस्थानम्. एतेन सिद्धम् आहुः **एतावता** इत्यादि. **तत्त्वाय वा** इति, भजते इति शेषः ॥३२॥

**तस्य** इत्यत्र. **भगवद्ग्रहणम्** इति, **ततो विभूतिम्** इति उत्तरार्धे

लेखः

**कार्यमुक्त्वा** इति. चरणसेवैकतानतया ब्रह्मादिसामर्थ्याधानादिरूप-कार्यौदासीन्यम् उक्त्वा इति अर्थः. **तत्त्वाय** इति, चरणरूपताप्राप्तये इति अर्थः ॥३२॥

---

१. अनासक्ताविति ख. २. यस्य इति मुद्रितपाठः क-भा.-प्रकाश-लेखपाठानुरोधात् संशोधितः. नास्त्येवेदं घ. यस्येतीत्यादिश्चरणोत्कर्षमाहेत्यन्तोंऽश एव नास्ति ख. - सम्पा. ३. पुनर्यद्भगवद्ग्रहणमिति क.

सन्ति, तेन मकरन्दरूपामृतं तत्र फलं नियतम् अस्ति इति सूचितम्. तत्र अधिकारिणो दुर्लभाः सर्वथा दोषरहिताः ; तत् सङ्घाते विद्यमानानाम् असम्भावितम्. (**कुलिश!**) तदर्थं भगवच्चरणारविन्देएव वज्राकारा रेखा वर्तते पापपर्वतानां छेदिका. अतः तत्सेवायां प्रथमतः सर्वपापक्षयः. किञ्च मनोनैश्चल्ये सर्वम् एतत् सम्भवति. योगादिना च तत्साधने बहिर्मुखता स्यात्. (**अङ्कुश!**) अतो भगवच्चरणारविन्देएव सेवकानां मनोवशीकरणार्थम् अङ्कुशाकारा रेखा वर्तते. अतो भगवच्चरणारविन्द-माहात्म्यादेव तत्सेवकानां ततो मनो न गच्छति, नापि मार्गविरोधेन. ननु एतत्सर्वं भजनानन्तरं भवति, भजने प्रवृत्तिरेव दुर्लभा – काल-कर्म-स्वभावेभ्यो भयसम्भवात् सर्वदा जीवानां भीतत्वाद् न क्वापि स्वास्थ्यम् – इति आशङ्क्य (**केतु!**) भगवच्चरणारविन्देएव अभयपताका-लक्षणा रेखा वर्तते, अत्र आगमनमात्रेणैव न कुतश्चिद् भयम् इति सूचिका. एतान्येव **केतानि** चिह्नानि येषाम्. लक्ष्मीः चापि तत्र ; तत्सङ्गे कटाक्षा, ब्रह्मादयः च. तद् आह **श्रीमत्पदैः** इति. अत्र आगतस्य अन्यथाभावव्यावृत्त्यर्थम् आह **भगवत** इति. **सम्यग् अलङ्कृतानि अङ्गानि यस्याः**. वैष्णवानां चक्रादिचिह्नैरेव[१] सम्यक्त्वम्. भगवच्चरणारविन्दस्पर्शे सात्त्विकभावेन तदंशे स्वेदाद् रेखासहित-चरणाभिव्यक्तिः

---

प्रकाशः

'तच्'छब्देन भगवद्ग्रहणम्. **तदर्थम्** इति, सङ्घाते विद्यमानानामपि अमृताधिकारार्थम्. **त्रीन्** इत्यत्र विशेष्यभूतलोकोक्तौ 'अति'पदसमभिव्याहार-

लेखः

**तस्य** इत्यत्र. **तत्सङ्घाते** इति, दोषसमूहे इति अर्थः. **नाऽपि मार्गविरोधेन** इति. यदि मनोनिग्रहार्थं योगादि स्वतन्त्रतया अवलम्ब्यते तदा भक्तिमार्गविरोधः इति अर्थः, भक्तिमार्गे बहिर्दर्शनस्यैव मुख्यत्वाद् इति भावः. **तत्सङ्गे कटाक्षाः** इति. लक्ष्म्याः चरणसम्बन्धोक्तेः तत्कटाक्षाअपि उक्ताः भवन्ति इति अर्थः. एवञ्च उपदर्शित-भगवदादि-पञ्चकाभिलाषायाम् एतदेव सेव्यम् इति भावः. अतएव तत्कामादयोऽपि तत्रैव इति अर्थः.

---

१. इवेति क-ग.

स्फुटा. एवम् अलङ्करणसहिता – लोकत्रयस्य च अन्येषां च त्रित्वयुक्तानाम् अनलङ्कृतत्वाद् – **(त्रीन् लोकान्) अत्यरोचम्** अतिक्रम्य कान्तियुक्ता जाता. किञ्च भगवतोऽपि **विभूतिम् उपलभ्य** भगवानपि मयि शेते उपविशति भुङ्क्ते क्रीडति, ऐश्वर्यं च करोति. एवं पूर्वसर्वसौभाग्ययुक्तां तां **माम्** इदानीं **व्यसृजत्**. त्यागे हेतुः **उत्स्मयतीम्**[1] इति. भूमिष्ठानां यादवादीनां भूम्युत्पन्नाऽन्नभोजनेन गर्वदर्शनात् कारणगर्वानुमानम्, अन्नेनैव सर्वभावानाम् उद्भवात्[2]. अतः **तदन्ते** उत्स्मयनाशार्थं मां व्यसृजद् इति अर्थः ॥३३॥

एवं मूलभूताम् उपपत्तिं श्लोकद्वयेन उक्त्वा लौकिकीम् उपपत्तिं श्लोकद्वयेन आह.

**यो वै ममातिभरमासुरवंशराज्ञाम्**
**अक्षौहिणीशतमपानुददात्मतन्त्रः ॥**
**त्वां दुःस्थमूनपदमात्मनि पौरुषेण**
**सम्पादयन् यदुषु रम्यमबिभ्रदङ्गम् ॥३४॥**

**यो वै मम** इति. **मम (अतिभारम्!)** अतिभाररूपम् **अक्षौहिणीशतम् अपानुदत्**. भूम्युत्पन्नानां तद्भारत्वे[3] हेतुः **आसुरेति**. **वंशपदेन** तेषां गोत्राणि अत्र सन्ति इति ज्ञापितम्. स्वस्य साधनापेक्षाभावाय आह **आत्मतन्त्रः** इति. अनेन [4]यादवरूप-भारहरणमपि सूचितम्. वत्सोपकारमपि आह **त्वां**

---

प्रकाशः

सूचितम् अर्थम् आहुः **अन्येषां च त्रित्वयुक्तानाम्** इति. ते च ब्रह्मादयः, सात्त्विकादिभेदभिन्नाः भक्ताः च ज्ञेयाः ॥३३॥

**यो वै** इत्यत्र. **मूलभूताम्** इति भगवत्कृते त्यागे मुख्यहेतुभूताम् ॥३४॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे षोडशाध्यायविवरणम् ॥

लेखः

**त्रित्वयुक्तानाम्** इति, सत्त्वादिभेदभिन्नानाम् इति अर्थः ॥३३॥

---

१. उत्स्मयन्तीमितीति ख-ग-घ.  २. उद्भावनादिति क.

३. तद्भारकत्वे इति क-ख.  ४. भूभारेति क.

**दुःस्थम्** इति. रोगादिव्याप्तिवद् अधर्मव्याप्त्या[१] दुःस्थता[२]. **ऊनपदत्वं** कालात्. **आत्मनि पौरुषेण** इति, स्वयम् अन्तःप्रविश्य स्वपौरुषेण गतान् अंशान् सम्यक् सम्पादितवान् इति उक्तम्. **त्वां सम्पादयन्** इति सम्बन्धः. त्वं हि प्रथमतः पूर्णइति त्वदर्थं मदर्थमेव. **यदुषु अङ्गम् अबिभ्रद्** (**रम्यं!**) आवयोरेव रमणयोग्यम्. भगवदीयाः धर्मात्मानः च रमन्ते ॥३४॥

फलितम् आह.

**का वा सहेत विरहं पुरुषोत्तमस्य**
**प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ॥**
**स्थैर्यं स मानम् अहरन् मधुमानिनीनां**
**रोमोत्सवो मम यदङ्घ्रिविटङ्किताया: ॥३५॥**

**का वा** इति. **वा** इति अनादरे ; या भगवद्**विरहं सहेत**[३] सा न कापि इति अर्थः. पुरुषमात्रविरहोऽपि सोढुम् अशक्यः, किं पुनः **पुरुषोत्तमविरह** इति! उपकारपक्षो दूरे तिष्ठतु, कामेनापि[४] न विरहसहनम् इति आह **प्रेमेति**. त्रिभिः ससाधनैः सर्वाएव वशीकृताः सात्त्विकाः तामसाः राजसाः च. तत्र सात्त्विकाः **प्रेमावलोकेन** वशीकृताः, तामसास्तु **रुचिरस्मितेन** मनोहारिमोहनेन, राजसास्तु **वल्गुजल्पैः** मनोहरवाक्यैः. सात्त्विकेभ्यो भक्ति-ज्ञाने दत्वा वशीकृतवान्, तामसेभ्यो मोहाभावं वैराग्यं च दत्वा, राजसेभ्यो युक्ति-प्रमाणे दत्वा. अतएव **मधुमानिनीनां स मानं स्थैर्यम् अहरत्** मथुरास्थानां मानिनीनां (मानं स्थैर्यं!) – येन मानेन स्थिरीभूताः कामे[५],

लेखः

**यो वै** इत्यत्र. **प्रथमतः पूर्णः** इति, सत्ययुगे चतुष्पाद् इति अर्थः ॥३४॥

**का वा** इत्यत्र. **मनोहारि** इति, मनोहारीस्त्रीरत्नमोहनेन इति अर्थः. **मोहाभावम्** इति. स्मितस्य मायात्वेन मोहकत्वेन रुचिरोक्त्या अत्र तदभावः उक्तो भवति इति अर्थः. तथा स्मितस्य मनोहारित्वेन प्रापञ्चिकविषय-वैराग्य-

१. अधर्मप्राप्त्येति क-ख-घ. २. दुःस्थानामिति ख.

३. सहते इति ख-घ. ४. अकामेनाऽपि विरहासहनमिति घ. ५. कर्ममार्गे वेति ख.

मार्गे वा, वेदेन ज्ञानेन वा – आत्मस्थितिम्. **मधु** इति भिन्नं वा पदं ; **मानिनीनां (मधु!)** रसं **स्थैर्यादि** च. किञ्च **ममापि यद् (अङ्घ्रिविटङ्किताया: !)** अङ्घ्रिचिह्निताया: सर्वदा **रोमोत्सव:** ॥३५॥

**तयोरेवं कथयतो: पृथिवीधर्मयोस्तदा ॥**
**परीक्षिन्नाम राजर्षि: प्राप्त: प्राचीं सरस्वतीम् ॥३६॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे षोडशोऽध्याय: ॥

**एवं (तयो: कथयतो: !)** भगवद्विरहेण क्लिष्टयो: संवादे जायमाने[1] अदूरे श्रुत्वा (**पृथिवी-धर्मयो: !**) देवता-धर्मसान्निध्यं बुद्ध्वा विश्वामित्र-**प्राच्यां**[2] कुरुक्षेत्रस्थ-**सरस्वत्याम् (राजर्षि: !)** ऋषित्वाद् आवश्यकं कर्तुं गत: इति आह **तयो:** इति. **तदा** संवादसमनन्तरमेव. (**परीक्षिन्नाम!**) प्रसिद्ध्या तयो: अतिरोभावो युक्त: इति सूचितम्[3] ॥३६॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे षोडशो अध्याय: ॥

---

लेख:

जनकत्वं च. **युक्ति-प्रमाणे** इति. **वल्गु**पदेन युक्ति:[4] **जल्प**पदेन प्रमाणम् इति ज्ञेयम्. **येन मानेन** इति. **येन मानेन** भगवन्तं वशीकर्तुं **कामे** विषये **स्थिरीभूता:,** मार्गे समागच्छन्तं भगवन्तं द्रष्टुं **मार्गे वा स्थिरीभूता:,** तं मानम् अहरद् इति अर्थ:. **मान**पदस्य व्युत्पत्तिभेदेन प्रमाण-प्रमेयपरत्वम् अङ्गीकृत्य आहु: **वेदेन ज्ञानेन वा** इति. एवञ्च प्रमाणप्रमेयाभ्यां सहिताम् **आत्मस्थितिम्** आत्मस्थैर्यम् अहरद् इति अर्थ: ॥३५॥ इति श्रीषोडशाध्याय: ॥

## ॥ इति षोडशोऽध्याय: ॥

---

१. ज्ञायमाने इति ग-घ. २. विश्वामित्रप्राचीं कुरुक्षेत्रस्थामिति घ. विश्वामित्रा नदी महाभारते (भीष्मपर्व ९।२५) निरूपिता, तत: प्राच्यां - सम्पा. ३. तूचित इति क-ख.

४. राजसीनां मानापनोदनाय यानि युक्तिवचनानि "नैवम् आचरितं चेद् मया, आवयो: सङ्गमोऽपि न स्याद्" इत्येवं रूपाणि तानि 'वल्गु'पदेन उक्त्वा 'जल्प'पदेन प्रमाणतर्कसाधनोपलम्भ:. मानिनीनां मानप्रयुक्त-दोषारोपणादि-निरासक-प्रमाणवचनै: जय: इति तात्पर्यम् - सम्पा.

# ॥ अथ सप्तदशोऽध्यायः ॥

ततः सप्तदशे धर्मपृथिवीसान्त्वनं विदः ॥
भीतस्य स्थानदानं च कलेः शिक्षा च रूप्यते ॥(१)॥
प्रथमं मारणे भीतिस्तयोः स्वास्थ्यस्य च क्षयः ॥
अतः सान्त्वनमग्रे च स्थानदानं विचारतः ॥(२)॥

---

प्रकाशः

अथ सप्तदशाध्यायं विवरिषवो अध्यायार्थस्य पूर्वम् उक्तत्वेऽपि विशेषेण अवान्तरार्थान् बोधयितुं पुनः आहुः **ततः सप्तदशे** इत्यादि. **विदः** इति तत्स्वरूपज्ञातू राज्ञः सकाशात्. प्रथमं सान्त्वननिरूपण-तात्पर्यम् आहुः **प्रथमम्** इत्यादि. **विचारत** इति, "अयम् अधर्मबन्धुः अतः तादृशान्येव स्थानानि अस्य देयानि, अन्यथा अन्यस्यापि अधर्मस्थानत्वापत्त्या महानेव अनर्थः"

लेखः

पूर्वाध्यायेन अस्य प्रसङ्गसङ्गतिं बोधयितुं प्रकृताध्यायार्थम् आहुः **ततः** इत्यादि. एवं धर्म-पृथिवीसंवादानन्तरं **सप्तदशे** अध्याये **धर्म-पृथिवी-सान्त्वनं विदः**, अतएव राज्ञः स्वरूपज्ञानेन **भीतस्य कलेः शिक्षा स्थानदानं च निरूप्यते** इति अर्थः (१).

ननु धर्मादिसान्त्वनतः पूर्वमेव कलेः शिक्षा स्थानदानञ्च कुतो न निरूप्यते इत्यतः तत्तात्पर्यम् आहुः **प्रथमम्** इत्यादि. सान्त्वनतः पूर्वमेव कलिशिक्षोद्योगे राज्ञः क्रौर्यादिधर्ममेव दृष्ट्वा पृथिवी-धर्मयोरपि **भीतिः** स्यात्. तथा पूर्वमेव स्थानदाने पूर्वपक्षपातिनं ज्ञात्वा "परीक्षिद् अस्मान् रक्षिष्यति" इति (**तयोः**!) पृथिवी-धर्मयोः पूर्वं यत् **स्वास्थ्यं** स्थितं तस्यापि **क्षयः** स्यात्. **अतः** (**अग्रे**!) प्रथमं **सान्त्वनम्** उक्त्वा ततो (**विचारतः**!) विचारपूर्वकं **स्थानदानं** निरूप्यते इति अर्थः. उपलक्षणम् एतत्. तथाच रक्षापि उक्ता इति भावः (२).

ननु तथापि राज्ञा पृष्टो धर्मो "अत्राऽनुरूपं राजर्षे विमृश स्वमनीषया" (श्लो. १९) इत्यन्तं सन्दिग्धमेव वाक्यं किमिति उक्तवान् इत्यतः

विवेकस्थापनायैव धर्मवाक्यं ततोऽस्य हि ॥
सर्वसामर्थ्यसम्बोधो[१] वैराग्यं वक्तुमद्भुतम् ॥(३)॥
मूर्तीभूतास्त्रयो राज्ञे स्वखेदख्यापनाय[२] तौ ॥
वेषान्तरेऽपि तत्पीडाख्यापनाय स मारकः ॥(४)॥

---

प्रकाशः

इति विचार्य. धर्मवाक्यतात्पर्यम् आहुः **विवेकस्थापनाय** इति. नानावाक्यकृतो यो विमोहः तन्निवारको यो अधिकारिविवेकः तत्स्थापनाय. तस्यापि प्रयोजनं **हि** यतो हेतोः **ततः** विवेकाद् **अस्य** राज्ञः **सर्वसामर्थ्यसम्बन्धः** आधिदैविकं ज्ञातुं सामर्थ्यसत्ता बोध्यते इति अर्थः. तस्यापि प्रयोजनम् अग्रिमाध्याये **अद्भुतं वैराग्यं वक्तुं** तदुपोद्घातता. एतेन अग्रिमसङ्गतिः उक्ता. **मूर्तीभूताः** इत्यादि. अलौकिकसामर्थ्यम् अवगन्तुं प्रत्यक्षाः जाताः इति शेषः. ज्ञानानन्तरं

लेखः

तत्सूचितम् अर्थम् आहुः **विवेक** इति. तथाच धर्मेणैव निःसन्दिग्धः उत राज्ञः स्वतएव धर्मादिज्ञानविवेको अस्ति इति न स्थापितं स्याद्, अतः तथा **धर्मवाक्यं** युक्तम् इति अर्थः. ततः किम् इति चेत्, तत्र आहुः **सर्व** इति. विवेकेन स्थापनेन राज्ञः सर्वसामर्थ्यम् अस्ति इति सर्वेषां बोधः सिद्धः इति अर्थः. ततोऽपि किम् इत्यतः आहुः **वैराग्यम्** इति. राज्ञः **वैराग्यं अद्भुतम्** अग्रे निरूपणीयं "युवैषतोत्स्रष्टुमहो सहासुभिः" (भाग.पुरा. १।४।११) इत्यादिना, तत्र उपपत्तिं वक्तुं **सर्वसामर्थ्यसम्बोधः** आवश्यकः इति अर्थः (३).

**मूर्तीभूताः** इति. पृथिवी धर्मः कलिः च इति **त्रयोऽपि मूर्तीभूताएव** राज्ञो दर्शनविषयत्वं प्राप्ताः इति शेषः. त्रयाणां तथादर्शनविषयत्वे प्रयोजनं वदन्तः तावद् आद्ययोः आहुः **राज्ञे** इति. तत्र **राज्ञे स्वखेदख्यापनाय (तौ!)** पृथिवी-धर्मौ मूर्तीभूतौ निरूपितौ इति अर्थः. तृतीयस्य तद् आहुः **वेषान्तरेऽपि** इति. वेषान्तरेऽपि पृथिवी-धर्मयोः कलिजनित-

---

१. -सम्बन्धवैराग्यमिति क. -सम्बोधवैराग्यमिति ग-घ. -सम्बन्धः वैराग्यम् इति प्रकाशे. -सम्बोधः वैराग्यम् इति लेखे - सम्पा. २. स्वखेदाख्यापनायेति ख.

सन्धानं वस्तुभूतस्य कृतं तेनास्य च स्वयम् ॥
कृतं भूमेस्तु हेतूनां शोकस्य विनिवारणात् ॥(५)॥

एवं पूर्वाध्यायान्ते पूर्ववाहिन्यां सरस्वत्यां स्नातुं गतः इति उक्तम्. ततः तत्र गतो अधर्मं दृष्टवान् इति आह.

॥ सूतः उवाच ॥

**तत्र गोमिथुनं राजा हन्यमानमनाथवत् ॥**
**दण्डहस्तञ्च वृषलं ददृशे नृपलाञ्छनम् ॥१॥**
**वृषं मृणालधवलं मेहन्तमिव बिभ्यतम् ॥**
**वेपमानं पदैकेन सीदन्तं शूद्रताडितम् ॥२॥**
**गाञ्च धर्मदुघां दीनां भृशं शूद्रपदाहताम् ॥**
**विवत्सां साश्रुवदनां कृशां यवसमिच्छतीम् ॥३॥**

**तत्र** इति. **गोमिथुनं** मिथुनवद्[1] भासमानं वृषभं गां च. **अनाथवद्** द्वितीयार्थे वतिः. नाथाभावयुक्तं वा, भगवतो अप्रकटत्वात्. **वृषलं** शूद्रं, महतां व्यक्तिदर्शनेनैव जातिपरिज्ञानात्. चिह्नानि तु राज्ञः ; **नृपस्य लाञ्छनम् इव लाञ्छनं** यस्य. एवं पाषण्डधर्मं च दृष्टवान् इति अर्थः. मिथुनस्य

प्रकाशः

धर्मप्रचारसामर्थ्यं बोधयितुं प्रतिसन्धानकथा इति आशयेन आहुः **सन्धानम्** इत्यादि. **तेन** हेतुना **अस्य** धर्मस्य **स्वयं** स्वतएव आश्वासनं **कृतं, भूमेस्तु शोकस्य हेतूनां निवारणात्** परम्परया इति अर्थः (१-५).

लेखः

**पीडाख्यापनार्थं मारकः स** कलिः मूर्तीभूतो निरूपितः इति अर्थः. एवञ्च तस्य स्वभाववैरित्वं ज्ञापितम् (४).

**सन्धानम्** इति, न्यूनपादसन्धानं राज्ञा **स्वयमेव कृतम्** इति. **वस्तुभूतस्य** इति, एकेन पदमात्रेण स्थितस्य इति अर्थः. **भूमेस्तु सन्धानं शोकहेतूनां निवारणात् कृतम्** इति अर्थः (५).

**तत्र** इत्यत्र. **नृपस्य लाञ्छनम्** इति. अर्थकथनम् इदं, विग्रहस्तु

१. मिथुनीवदिति क-ग.

दीनत्वज्ञापनाय वर्णयति[१] **वृषम्** इति द्वाभ्याम्, अन्यथा पक्षपातोऽपि दोषः स्यात्. प्रथमं वृषं वर्णयति **मृणालधवलम्** इति, अब्जादिवत् कान्तियुक्तं श्वेतम्. अनेन स्वभावतः[२] शुद्धः इति उक्तम्. अन्यानि पञ्चाङ्गानि विकलानि इति आह, तत्र प्रत्यहं बाह्यक्षयः[३]. **मेहनं** मूत्रणं ; कर्मक्षयः उक्तः. **बिभ्यतमिव** इति भयेन ज्ञानाभावः उक्तः, **इवेति** अनुकरणात्. अथवा मूत्रस्थानातिरिक्तस्थानेभ्यो मूत्रमिव निःसरति, तेन रोगः सूचितः. **एकेन पदा वेपमानम्.** कम्पनं द्विप्रकारं— पादाभावेन जाड्येन च. तत्र **एकेन पदा** हेतुना **वेपमानम्.** चतुःपदस्य[४] पादत्रयगमने एकपादस्थितौ कम्पो भवत्येव. ज्ञानसहित-तपःप्रभृतीनाम् अभावात् केवलसत्ये धर्मस्थितिः चञ्चला भवति. (**सीदन्तं!**) जाड्येन वेपन्तं (अर्थात्!) पदार्थापरिज्ञानेन धर्मकृतिः न निःकम्पा. **शूद्रताडितम्** इति. कालवशेन शूद्रकर्तृक-धर्मस्य

---

प्रकाशः

**वृषम्** इत्यत्र. **तत्र प्रत्यहं बाह्यक्षयः** इति. पञ्चाङ्गवैकल्ये बाह्यस्य धर्मस्य क्षयः सूचितः इति अर्थः. तद् उपपादयन्ति **कर्मे**त्यादि. **कर्मक्षयः उक्तः** इति. मूत्रणस्य विसर्गरूपत्वात् कर्मेन्द्रियसाध्यत्वात् च बाह्यस्य आचारादिरूपकर्मणः क्षयः उक्तः इति अर्थः. **इवेति अनुकरणाद्** इति **इव**पदबोधिताद् अनुकरणात्. दम्भेन करणम् **इव**पदेन बोध्यतइति बाह्यधर्मस्य क्रियारूपस्य क्षयः उक्तः इति अर्थः. **रोगः सूचितः** इति. तथाच दुष्कर्मभोगसूचनात् तेनापि बाह्यधर्मक्षयः उक्तः इति अर्थः. **चञ्चला भवति** इति. तेन फलानुपयोगात् क्षयः तस्य उक्तः इति अर्थः. **सीदन्तम्** इत्यस्य अर्थम् आहुः **जाड्येन वेपन्तम्** इति. **इत्येव सम्बन्धः** इति.

लेखः

नृपस्य इव लाञ्छनं यस्य इति. **वृषम्** इत्यत्र. **अन्यथा** इति, दीनत्वाभावे स्वतएव समर्थत्वे इति अर्थः. **अनुकरणाद्** इति, मूत्रोत्सर्गानुकरणाद् इति अर्थः ॥१-२॥

---

१. च वर्णयतीति ग. तौ वर्णयतीति घ. २. स्वभावशुद्धयुक्तामिति ख.

३. बाह्येति क-ख. ४. चतुष्पादस्येति ख.

पाषण्डित्वेन धर्मव्यथाजननात् ताडनम्. दण्डेन ताडनं वृषस्य, पदा ताडनं पृथिव्याः (अर्थात्!) कलिः भूमिवधाय तिष्ठति, पाषण्डमार्गैः च धर्मं व्यथयति. **ददृशे** इत्येव सम्बन्धः. **गां च** वर्णयति. चकाराद् भय-कम्पादयो अस्याअपि. स्वभावतः उत्तमा इति आह **धर्मदुघाम्** इति, **धर्मम्** अग्निहोत्रादिकं दोग्धि इति. घर्मदुघाम्[1] इति पाठे प्रवर्ग्यदुग्धं दोग्धि[2] इति. अस्याः षडङ्गविकलत्वम् आह. देशादिभिः सम्पन्ना भूः पुष्टा[3] भवति ; तदभावे विकला. देशानाम् उत्तमानां दुष्टस्थित्या नाशाद् **दीना. (शूद्रपदाहतां!)** कालेनापि पीडिता, पाषण्डैः उपभुज्यमानत्वात्. कलेः प्रथमपादत्वात् **पदा** इति एकवचनम्. एवं देश-कालदोषौ निरूपितौ. **विवत्साम्** इति कर्त्रभावः[4]. वत्साः स्व-स्वधर्मे मुख्याः पृथुदोहे[5] निरूपिताः ; तेषां साम्प्रतम् अभावः. अतएव **साश्रुवदनाम्** अश्रुभिः सहितं वदनं यस्याः. अनेन मन्त्राभावः उक्तः. हर्षरूपाः ते[6] ; अपशब्दाः = अश्रूणि. **कृशां** द्रव्याभावात्. यत्र यज्ञः तत्र न यज्ञियानि द्रव्याणि. **यवसम् इच्छतीं**[7] यज्ञादिषु भागम् इच्छन्तीम्, अनेन कर्माभावः. एवम् अस्याः षडङ्गविकलत्वं सूचितम्. अत्रापि (**ददृशे**!) पूर्ववत् क्रियासम्बन्धः ॥१-३॥

एवं दृष्ट्वा मारकस्य अपूर्वत्वात् तं पृच्छति मारयितुम्, अन्यथा अविचारितकर्तृत्वं स्यात्. अतएव ससामग्रीकः पृच्छति इति आह.

---

प्रकाशः

पूर्वश्लोकोक्त-क्रिययैव सम्बन्धः, नतु "पप्रच्छ" इति उत्तरश्लोकोक्तया, तत्र मारणोद्योगस्यैव दर्शनाद् अग्रे कलिं प्रत्येव पूर्वं प्रश्नात् च इति अर्थः ॥२-३॥

---

१. धर्मदुहामितीति घ. घर्मं दुग्धं दोग्धि इति घर्मदुघा धेनुः. "घर्मधुग् ध्वाले चादोहे" (कात्या.श्रौ.सूत्र २५।६।२) इति वाचस्पत्यं -सम्पा. २. दोग्धी इति मुद्रितपाठः. दोग्ध्रीति घ. भा.पाठे तु एवम् -सम्पा. ३. दुष्टेति घ. ४. कर्तृभाव इति ग. ५. "वत्सं कल्पय मे वीर ... सर्वकामदुघां पृथ्वीं दुदुहु पृथुभाविताम्" (भाग.पुरा. ४।१८।९-२६) इत्यत्र -सम्पा. ६. ते मन्त्राः हर्षरूपाः, तदभावात् साश्रुवदनात्वम् -सम्पा. ७. यवसमिच्छन्तीति क. यवसमिच्छन्तीमिति ख-ग-घ-ङ. प्रतीकत्वान्मूलानुरोधो पाठस्तु प्रतिभातीति स एवेह निवेशितः.

**पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदम् ॥**
**मेघगम्भीरया वाचा समारोपितकार्मुकः ॥४॥**

**पप्रच्छ** इति. **कार्तस्वरेति** राजत्वख्यापकम्. **कार्तस्वरं** सुवर्णं, तस्य **परिच्छदाः**[१] यस्य. अनेन महत्त्वज्ञानात् सहसा अनतिक्रमः सूचितः. **मेघगम्भीरया** इति तप्तानां कृपावर्षणात्. **गम्भीरा** इति शब्दश्रवणेनैव शत्रूणां मज्जनम्[२]. एवं वाक्ये दुष्टनिग्रह-शिष्टपरिपालने सूचिते. **समारोपितकार्मुकः** इति, अयुक्तवचनमात्रेणैव परिज्ञातो मारणीयः इति ॥४॥

प्रश्नम् आह **कस्त्वम्** इति द्वाभ्याम् अज्ञान-निश्चयभेदात्. अधिक्षेपार्थो वा द्वितीयः.

**॥ राजा उवाच ॥**

**कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान् बली ॥**
**नरदेवोऽसि वेषेण नटवत् कर्मणाऽद्विजः ॥५॥**
**कस्त्वं कृष्णे गते दूरं सह गाण्डीवधन्वना ॥**
**शोच्योऽस्यशोच्यान् रहसि प्रहरन् वधमर्हसि ॥६॥**

**(मच्छरणे!)** अहमेव शरणं रक्षको यस्य तादृशे **लोके बलाद्** विधिव्यतिरेकेण **अबलान्** अशत्रुभूतान् दीनान् (**हंसि!**). **बली** इत्यनेन आपदभावः सूचितः. चिह्नैरेव परिज्ञायताम् इति आशङ्क्य आह **वेषेण** केवलं **नरदेवो असि,** न[३] राजा त्वं, सामग्र्यभावात्[४] प्रसिद्ध्यभावात्[५] च. **नटवद्** इति, राज्ञाम् उपहासार्थं तादृशं रूपं कृत्वा धर्म-भूरक्षायां

---

प्रकाशः

**कः त्वम्** इत्यत्र. **निश्चयभेदाद्** इति. अद्विजत्व-निश्चयस्य पूर्ववाक्ये जातत्वेऽपि तद्विशेषनिश्चयस्य द्वितीयोक्त-कर्मणा जातत्वात् तेन द्वितीयः इति अर्थः. पूर्ववाक्योक्त-कर्मणापि तस्य सम्भवाद् इति अरुच्या पक्षान्तरम् आहुः **अधीत्यादि**. द्वितीयस्य आभासे **तथापि** इति, एवं प्रश्नोत्तरमपि ॥५-६॥

---

१. परिच्छदानीति ख-ग-घ.  २. मर्दनम् इति पाठः सम्भाव्यते - सम्पा.

३. नेति नास्ति क-ख-ग.  ४. सामर्थ्याभावादिति घ.  ५. प्रसिद्धत्वाच्चेति घ.

कर्तव्यायां विपरीतकरणम्. तथापि न भवसि इति आह. **कर्मणा अद्विजः** शूद्रः. नहि द्विजाः गां पदा ताडयन्ति. **अद्विजः** इत्यनेन द्वितीयजन्मनि जाते कर्तव्याकर्तव्यविवेको भवेत्, तदभावात् पदापि ताडयति इति अर्थः. तथापि ताडनपरं निर्भर्त्सयति. **कः त्वम्** इति अधिक्षेपे "अहम् एतादृशएव" इति चेत्, कथं कृष्णे अर्जुने च विद्यमाने न प्रकटः? अतो (**गाण्डीवधन्वना सह कृष्णे गते!**) धर्मकर्तरि कारयितरि च प्रचलिते **त्वं कः** कुत्सितएव. तद्गमनानन्तरम् "अयम् अहम्" इति आगतः चोरो भवति, ताभ्यां राज्ये अनिरूपणात्. बलात् चेद् राजा भवितुम् इच्छसि तदा **शोच्यो असि** सापराधो असि. किञ्च **अशोच्यान्** अनपराधान् (**रहसि!**) एकान्ते **प्रहरन्** सुतरां सापराधो असि. अतो **वधम् अर्हसि** न अन्यं दण्डम् इति भावः ॥५-६॥

एवं मारयितुं विचारयन् उत्तराऽकथनात् सन्दिग्धः तयोः सापराधत्वम् आशङ्क्य सान्त्वनार्थं पृच्छति.

**त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् ॥**
**वृषरूपेण किं कश्चिद् देवो नः परिखेदयन् ॥७॥**

**त्वं वा मृणालधवलः** इति. प्राकृतवृषभस्य[१] कान्तियुक्त-शुभ्रता[२] दुर्लभा[३], एकपदा च (**चरन्!**) गमनम्. अतः इदं प्राकृत-पशोः असम्भावितम् इति **कश्चिद् देवएव किं (त्वं!)** भवान्? नहि पशुरूपाः देवाः एतादृशाः भवन्ति. तर्हि **वृषरूपेण नः** अस्मान् **खेदयन् किं देवः?**

लेखः

**कस्त्वम्** इत्यत्र. **अधिक्षेपे** इति. राज्ञा **अधिक्षेपे** कृते कलेः उत्तरम् **अहम् एतादृशएव** इति. यादृशो दृश्यते तादृशएव इति अर्थः ॥५-६॥

**त्वं वा** इत्यत्र. **एतादृशाः** इति, अङ्गादिविकलाः इति अर्थः. **खेदयन्** इति. तथा अस्मान् वेदनार्थत्वे तु एतादृशत्वम् उपपद्यते अपि इति सम्भावना इति अर्थः. **अग्न्यादयो रूपान्तरेण गताः** इति. यथा

१. प्राकृतवृषभकान्तीत्यादि समस्तं क. २. युक्तत्वशुभ्रतेति क-ग-घ. ३. दुर्लभतेति क.

पूर्वमपि श्रूयते शिबिप्रभृतिषु, अग्न्यादयो रूपान्तरेण गताः इति ; "कथम् अयं राजा अस्मान् ज्ञास्यति" इति ॥७॥

पदा भूस्पर्शाद् न अयं देवः इति निश्चित्य आह.

**न जातु कौरवेन्द्राणां दोर्दण्डपरिरम्भिते ॥**
**भूतलेऽनुपतन्त्यस्मिन् विना ते प्राणिनां शुचः ॥८॥**
**मा सौरभेयानुशुचो व्येतु ते वृषलाद् भयम् ॥**
**मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि ॥९॥**

**न जातु** इति. (**ते विना!**) त्वद्व्यतिरेकेण अन्यो अस्मद् राज्ये श्रुतो दृष्टो वा. न कस्यचित् (**प्राणिनां शुचः भूतले अनुपतन्ति!**) शोकाश्रूणि भूमौ पतन्ति. तत्रापि **अस्मिन् कौरवेन्द्राणां** कुरुवंशराज्ञां **दोर्दण्डपरिरम्भिते** आलिङ्गिते **भूतले**. नहि महाराजोपभुज्यमाना[१] भूः क्लिष्टा भवति. तव तु स्वरूपं न ज्ञायते इति भावः. खेदो वा अनेन विवृतः. ननु राज्ञाम् एवं कथनम् अनुचितम् इति आशङ्क्य आह हे **सौरभेय** सुरभ्याः पुत्र. अनेन अस्य मध्यमभावो[२] निरूपितो— न अयं देवो न प्राकृतः इति किन्तु कामधेनुपुत्रो वृषभोत्तमः इति. अतः त्वं **मा शुचः. ते वृषलाद् भयम् (व्येतु!)** अपगच्छतु. वृषलं मारयिष्यामि इति भावः. एवं वृषभसान्त्वनम् उक्त्वा सुरभिसान्त्वनम् आह **मा रोदीः** इति. हे **अम्ब!** सर्वदा त्वद्दुग्धपानात् मातृत्वं, स्नेहेन वा. **ते भद्रं** मदागमनं तव कल्याणम् इति अर्थः. अतएव **मा रोदीः**. तर्हि एतावत्कालं कथं न ज्ञातं? तत्र आह **मयि** इति, (**खलानां!**) **शास्तरि** सति. यदा अहम् अस्य शासनं[३] करिष्यामि तदा तव भद्रम्.

---

प्रकाशः

**मा सौरभेय** इत्यत्र. **एवं कथनम्** इति, अवस्थानुवादेन अस्मासु दुष्टत्वमिव आरोपयत् कथनम् ॥९॥

लेखः

औशीनर-शिबिपरीक्षार्थम् इन्द्राग्नी श्येन-कपोतरूपौ भूत्वा गतौ (द्रष्ट. महाभा.- ३।१९७।११-२७) तथा इति अर्थः ॥७॥

---

१. महाराजोपयुज्यमानेति घ. २. मध्यभाव इति ख. मध्यमाभाव इति घ. ३. शासनामिति ख.

निमित्ताभावात् पूर्वं न जातम् इति भावः ॥८-९॥

ननु अस्मन्निमित्तं त्वया किमर्थं मारणीयः ? तत्र आह.

**यस्य राष्ट्रे प्रजाः सर्वाः त्रस्यन्ते साध्व्यसाधुभिः ॥**
**तस्य मत्तस्य नश्यन्ति कीर्तिरायुर्भगो गतिः ॥१०॥**

**यस्य** इति. स्वार्थमेव अयं मारणीयो, अस्मदपकारित्वाद् इति तस्य अपकारम् आह. हे **साध्वि, यस्य राष्ट्रे असाधुभिः (सर्वाः!) प्रजाः त्रस्यन्ते तस्य** चत्वारि **नश्यन्ति.** नाशाऽननुसन्धाने हेतुम् आह **मत्तस्य** इति. चत्वारि गणयति **कीर्तिः** इति. **भगो** भाग्यं, **गतिः** परलोको ज्ञानं वा ॥१०॥

किञ्च न केवलम् एतदरक्षणे[1] दोषः इति एतद्रक्षणं – तथा सति काम्यता स्यात् – किन्तु एतद्रक्षणं विहितमपि इति नित्यता. तस्मात् नियतविधिबोधितत्वादेव करिष्यामि इति आह **एषः राज्ञः** इति.

**एष राज्ञः परो धर्मो ह्यार्तानामार्तिनिग्रहः ॥**
**अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ॥११॥**

**एषः** इति अङ्गुल्या निर्दिशति ; एतादृशानां रक्षणं **राज्ञः परो धर्मः.** प्रजारक्षापेक्षया अयमेव **परो धर्मो** यद् **आर्तानाम् आर्तिनिग्रहः.** आर्तेभ्यो दानाद्यपेक्षयापि आर्तिनिग्रहः परो धर्मः. ततः किम्? अतः आह **अतः एनम्**[2] इति. स्वधर्मपरिपालनार्थमेव **एनं वधिष्यामि.** ननु

---

लेखः

**यस्य राष्ट्रे** इत्यत्र. **नाशाननुसन्धाने** इति, राष्ट्रपतेः स्वनाशाऽननुसन्धाने इति अर्थः ॥१०॥

**एतदरक्षणे** इति. पृथिवी-धर्मयोः रक्षाभावे अपकीर्तिरूपो दोषः स्याद् इति मत्वा यदि धर्मादिरक्षा तदा **काम्यता स्यात्,** स्वापयशोदूरीकरण-कामनया प्राप्तत्वाद् इति अर्थः. **एतद्रक्षणम्** इति धर्मादिरक्षणम्. **नित्यता** इति. धर्मादिरक्षणस्य विधिप्राप्तत्वेन अवश्यं कार्यत्वात् नित्यता, नतु काम्यतामात्रम् इति अर्थः. **करिष्यामि** इति. एतद्वधं युष्मद्रक्षणञ्च करिष्यामि इति

---

१. एतदरक्षणदोष इति क-ग. एतदरक्षणादाविति घ-ङ.　　२. अत एवेतीति ख-ग.

साक्षाद्वधे अधर्मः, रक्षायां परम्परया धर्मः ; तत् कथं हनिष्यसि[१] इत्यतः आह **भूतद्रुहम्** इति, सर्वेभ्यो भूतेभ्यो द्रुह्यति इति. एतद्वधे भूतानां जीवनं भवति, एतदवधे बहूनां मरणम्, अतो लाघवाद् एकस्यैव मरणं वरम्. ननु साक्षान्निषेधविधि-विषयो अयम्, अन्ये तु न स्वकर्तृकहिंसा-विषयाः, अतो बहुत्वम् अप्रयोजकम् इति आशङ्क्य आह **असत्तमम्** इति. नहि अस्य वधे अधर्मो अस्ति, दुष्टनिग्रहादेः विहितत्वात्. अतः एतद्वधे[२] त्रयं सिद्ध्यति— दुष्टनिग्रह-विधिपरिपालनं, भूतद्रोहनिषेध-विधिपरिपालनम्, आर्तानाम् आर्तिनिग्रह-विधिपरिपालनं च इति[३] ॥११॥

सुरभिसान्त्वनविधि-प्रस्तावेन तद्वधम् उक्त्वा सौरभेयार्थमपि तद्वधो भवतु इति तं पुनः पृच्छति.

**कोऽवृश्चत् तव पादांस्त्रीन् सौरभेय चतुष्पद ॥**
**मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनाम् ॥१२॥**

**को अवृश्चद्** इति. **तव त्रीन् पादान् को अवृश्चद्** अच्छिनत्? यथापराधं दण्डः कर्तव्यः ; सुरभ्याः ताडनमात्रम् अनेन कृतं,

---

प्रकाशः

**एषः** इत्यत्र. **स्वकर्तृकहिंसाविषयाः** इति परीक्षित्कर्तृक-तद्विषयाः ॥११॥

लेखः

अर्थः. **एषः** इत्यत्र. **ननु साक्षान्निषेध** इति. **अयं** कलिवधो "न हिंस्यात् सर्वभूतानि" (                ), "सत्यं च ब्रह्मचर्यं चाहिंसां च यत्नेन परिरक्षेद्" (आरुणि.उप. ३) इत्यादि साक्षान्निषेधको यो विधिः तद्विषयः, स्वकर्तृकहिंसाविषयत्वात्. **अन्ये तु** अनेन वध्याः इति **न** तथा इति **बहुत्वं** साक्षान्निषेधदृष्ट्या **अप्रयोजकम्** इति अर्थः ॥११॥

---

१. हनिष्यामीति ग.  २. एव तद्वधे इति क-ग-घ.

३. 'आर्त्तिनिग्रहविधिपरिपालनञ्चे'ति 'च'कारे पङ्क्तिमवसाय्य 'इति सुरभिसान्त्वने'त्यवतरणान्वयित्वेन 'इती'त्यव्ययस्य सर्वत्र पुस्तकेषु पाठः. भाति त्वेवम्.

तन्निवारणपूर्वक-ताडनेनापि प्रतीकारो भवति. पादत्रयच्छेदे तु अस्यापि पादद्वयं हस्तश्च च्छेत्तव्यः, ततः कथय इति अर्थः. **चतुष्पद** इति सम्बोधनाद् अवश्यं पूर्वं पादचतुष्टयं स्थितम् इति ज्ञापितम्. ननु तस्यापि पादच्छेदेन मम कः पुरुषार्थः स्यात्? तत्र आह **मा भूवन्** इति. (**राष्ट्रे त्वादृशाः!**) यथा भवान् जातः तथा अन्येऽपि – अस्मिन् जीवति – **मा भूवन्** इति एतन्निग्रहः कर्तव्यः. ननु त्रिविधाः[१] राज्ये भवन्ति ; को अयम् आग्रहः सर्वथा अयं मारणीयः इति? तत्र आह **राज्ञां कृष्णानुवर्तिनाम्** इति. अन्येषां राज्ये भवन्तु नाम, भगवत्सेवकानां राज्ये न युक्ताः. यतो अयम् अत्रत्यैः सर्वैरेव भगवान् सेव्यः. इन्द्रियविकलास्तु सेवितुं न अर्हन्ति अतः तादृशाः न युक्ताः ॥१२॥

**आख्याहि वृष भद्रं वः साधूनामकृतागसाम् ॥**
**आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणम् ॥१३॥**

अतः सर्वथा त्वया वक्तव्यम् इति आह **आख्याहि** इति. **वृष**त्वात् तव न अनौचित्यम्. ननु माम् अस्मदीयान् वा कथिते मारयिष्यति इति शङ्का न विधेया इति आह[२] **भद्रं वः** इति, युष्माकं भद्रमेव. ननु[३] अस्मिन् जीवति कथं भद्रम्? तत्र आह[४] **साधूनाम्** इति. एतस्य शिक्षार्थं दण्डकरणपक्षेऽपि (**साधूनाम् अकृतागसाम् आत्मवैरूप्यकर्तारं!**) धर्ममार्गवर्तिनाम् अपराधरहितानां देहवैरूप्यकरणम् अनुचितम्. तथापि[५] मारणे

प्रकाशः

**आख्याहि** इत्यत्र. **एतस्य शिक्षार्थं दण्डकरणपक्षेऽपि** इति, अयं शूद्रो वृषस्य शिक्षायै दण्डं कृतवान् इति पक्षेऽपि. **तथापि** इति वैरूप्यकरणे.

लेखः

**कोऽवृश्चद्** इत्यत्र. **तन्निवारणपूर्वक** इति. सुरभिताडन-निवारणपूर्वक-कलिताडनेनापि तदपराधप्रतीकारो भवति इति अर्थः ॥१२॥

**आख्याहि** इत्यत्र. **मामस्मदीयान्** इति. वैरूप्यकर्तरि कथिते सः

१. रक्ष्याः ताडनीयाः मारणीयाः इति - सम्पा. २. न विधेयेत्याशङ्क्याऽऽहेति क-ख-ग-घ.
३. न त्वस्मिन्निति ख-ङ. ४. तदाहेति ख. ५. तत्रापीति क.

को हेतुः? तत्र आह **पार्थानाम्** इति. "पाण्डवानामेव अयम् अधिकारी सर्वान् दण्डयति" इति लोकापवादजननात् पूर्वसिद्धां निष्कलङ्क-**कीर्तिं दूषयति.** अतो भवतामपि एतदाख्याने कीर्तिस्थापनधर्मो भवति ॥१३॥

मत्प्रतिज्ञा च सिद्धा भवति इति आह.

**जनेऽनागस्यघं युञ्जन् सर्वतोऽस्य च मद्भयम् ।**
**अनागस्स्विह भूतेषु य आगस्कृन्निरङ्कुशः ॥**
**आहर्ताऽस्मि भुजं साक्षाद् अमर्त्यस्यापि साङ्गदम् ॥१४॥**

**जने** इति. **अनागसि जने (अघं!)** अपराधं **युञ्जन् सर्वतो मत्तो**[१] **भयं** प्राप्नोति. देह-धनैहिकामुष्मिक-प्रकारैः मत्कृतं भयं प्राप्नोति. **अस्य च** सम्बन्धी पुत्रादिः **भयं** प्राप्नोति. 'प्राप्नोति' इति अध्याहाराऽकरणे यो **अनागसि जने अघं युञ्जन्** भवति तस्य **मत्तः सर्वतो भयं** भवति इति 'भवति'द्वयम् अध्याहर्तव्यम्. वस्तुतस्तु अर्धमात्रं[२], पूर्ववद् अग्रिमश्लोकेन उक्तार्थत्वात्. आख्याते किं करिष्यति इति आकाङ्क्षायाम् आह **अनागस्सु** इति. ननु सोऽपि अधिकारी, कथं त्वया मारणीयः? तत्र आह **निरङ्कुशः** इति, नियामकरहितः. अतएव

---

प्रकाशः

वैरूप्यकरणमेव अस्य उचितं, नतु मारणम् इति अर्थः ॥१३॥

**पूर्ववद्** इति प्रायेण विगीतम्[२] ॥१४॥

लेखः

अस्मदीयान् मां वा मारयिष्यति इति अर्थः. **अयमधिकारी** इति. **अयं** कलिः अधिकारी इत्यादि लोकाभिप्रायः ॥१३॥

**जने** इत्यत्र. **अस्य सम्बन्धी** इति. **अस्य** सम्बन्धी पुत्रादिः **अनागसि जने अघं युञ्जन् सर्वतो मद्भयं** प्राप्नोति इति योजनायां क्रियाद्वयाध्याहारो न इति ॥१४॥

---

१. मत्त इति नास्ति ख. २. "जनेऽनागस्यघं युञ्जन् सर्वतोऽस्य च मद्भयं, साधूनां भद्रमेव स्याद् असाधुदमने कृते" इति पूर्णएव श्लोकः श्रीधर्यादिभिः स्वीकृतः पाठः. तत्र उत्तरार्धस्य विगीतत्वम् आहुः -सम्पा.

(**आगस्कृद्!**) उत्पथगामी. कथं शक्यः[1] इति अपेक्षायाम् आह **आहर्ता अस्मि** इति. **अमर्त्यस्य**[2] इन्द्रस्यापि (**भुजम् आहर्ता अस्मि!**) बाहुम् उत्पाटयामि इति अर्थः. **साक्षाद्** इति स्वयमेव गत्वा, नतु अभिचारद्वारा. **साङ्गदम्** इति, अङ्गदाद्याभरणैः सहितं सर्वैः पूजितमपि[3] ॥१४॥

ननु भवान् अत्र न नियुक्तः अतो नियोगानुसारेण पालनं कर्तव्यं ; वयं तु यतः कुतश्चित् त्वद्राष्ट्रे समागताः, न त्वदीयाः इति आशङ्क्य आह.

**राज्ञो हि परमो धर्मः स्वधर्मस्यानुपालनम् ॥**
**शासतोऽन्यान् यथाशास्त्रमनापद्युत्पथानिह ॥१५॥**

**राज्ञो हि** इति. राज्ञो हि धर्मद्वयं— सहजो धर्मः, अधिकृतः च. सहजधर्मस्तु आर्तार्तिनिग्रहः, स मुख्यः. अन्यस्तु गौणः. तत्र स्वराष्ट्रादिनियमो नास्ति ; भार्यामपि मारयन् निवारणीयः. परम् अशक्त्या तूष्णीम्भावः. राज्ञस्तु अशक्त्यभावात् स[4] (**परमो!**) मुख्यो **धर्मः स्वधर्मानुपालनमेव. अन्यान्** स्वधर्मरहितान् **अनापद्युत्पथान् शासतः**, नतु विरक्तस्य त्यक्तशासनस्य. अतो मम आर्तिहरणं स्वधर्मः अतो वक्तव्यम् इति ॥१५॥

कलिनिग्रहो बहिर्मुखेन कर्तुम् अशक्यः, अभगवदीयेन वा. यद्यपि

---

प्रकाशः

**राज्ञः** इत्यत्र. **त्यक्तशासनस्य** इति दत्तभूताभयस्य ॥१५॥

लेखः

**राज्ञो हि** इत्यत्र. **भार्यामपि** इति. कश्चन अन्यायवर्ती स्वभार्यां मारयति चेत् तद्भार्यायां स्वत्वाभावेऽपि राज्ञा रक्षा कर्तव्या इति अर्थः. तथा आर्तिनिग्रहादौ स्वत्वाऽस्वत्वम् अप्रयोजकम् इति अर्थः ॥१५॥

**एतद् वः** इत्यत्र. **येषां गुणगणैः** इत्यत्र गुणानां भगवद्वश्यतासम्पादनेनैव स्तुतत्वात् तदभावे अकिञ्चित्कराः गुणाः इति उक्तं, तदनुगुणम् आभासम् आहुः **कलिनिग्रहो** इत्यादि. व्याख्याने. मूले वचोमात्रस्य युक्तत्वकथनसूचितम्

---

१. शिक्यमिति ख. क्षम इति घ. २. अमर्त्यस्याऽपीन्द्रस्याऽपीति ख.

३. पूजितमितीति ग. ४. सम्मुखो धर्म इति ख.

अयम् अनुभयरूपः तथापि अभिमानात् तथा भाति. अतो अन्तर्मुखः कर्तव्यः इति अभिप्रायेण उत्तरं वक्तुं प्रथमं प्रोत्साहयति भगवदीयत्वज्ञानाय.

**।। धर्मः उवाच ।।**

**एतद् वः पाण्डवेयानां युक्तमार्ताऽभयं वचः ।।**
**येषां गुणगणैः कृष्णो दौत्यादौ भगवान् कृतः ।।१६।।**

**एतद् वः** इति. **एतत्** परदुःखदूरीकरणं परमकृपालूनां (**वः युक्तं!**) भवताम् उचितमेव. **आर्तानाम् अभयं** यस्मात् तादृशं **वचः**. यद्यपि इदं वचनम् अभिमानसूचकं भवति तथापि परदुःखनिवारणार्थम् उक्तं, नतु स्वोत्कर्षख्यापनार्थम्. कृतिस्तु अयुक्तैव इति भावः. नहि अन्यपीडया कृतः पदार्थो धर्मो भवति. आर्तिनिवारणरूपं भगवदीयं धर्मं पुरस्कृत्य **भगवान् (दौत्यादौ कृतः!)** वशो जातः. (**येषां गुणगणैः!**) एतादृशाः गुणाः भवत्सु सहस्रशः सन्ति यैः कृत्वा (**कृष्णः!**) परमानन्दः साक्षात्पुरुषार्थः (**भगवान्!**) सर्वप्रमाणार्थः. अनेन भ्रान्तत्वमपि आक्षिप्तम्. अतो अत्यन्तं बहिर्मुखधर्मनिष्ठा[1] त्यक्तव्या इति भावः ।।१६।।

---

प्रकाशः

**एतद् वः** इत्यत्र. **अयम्** इति राजा. **तथा भाति** इति बहिर्मुखो भाति. **सर्वप्रमाणार्थः** इति. इदं **भगवत्**पदव्याख्यानम् ।।१६।।

लेखः

अर्थम् आहुः **कृतिस्त्वयुक्तैव** इति. एतद्वचनार्थभूता कृतिः इति अर्थः. अत्र हेतुः **न ह्यन्यपीडया** इति. "आहर्ताऽस्मि भुजं साक्षाद्" (श्लो. १४) इत्यादि वचनवाच्य-कृतेः तथात्वाद् इति भावः. अत्र हि "कः क्षेमो निजपरयोः कियान् वा अर्थः स्वपरद्रुहा धर्मेण" (भाग.पुरा. ६।१६।४२) इत्यादिवाक्यम् अनुसन्धेयम्. तथाच धर्मस्य अतिसूक्ष्मा गतिः इति अयमेव धर्मः इति निर्णेतुम् अशक्यम् इति भावः. **सर्वप्रमाणार्थः** इति. एतादृशो **भगवान् दौत्यादौ कृतः** इति शेषः. **अनेन भ्रान्तत्वम्** इति. साक्षात्पुरुषार्थभूतस्य भगवतो दौत्यादि-हीनकर्मसु योजनेन तथात्वम् आक्षिप्तम् इति अर्थः ।।१६।।

---

१. बहिर्मुखनिष्ठेति घ.

इति भगवत्परत्वम् उपदिश्य धर्मसूक्ष्मत्वम्[१] उपदिशति.

**न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ॥**
**पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥१७॥**
**केचिद् विकल्पवसना आहुरात्मानमात्मना ॥**
**दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ॥१८॥**

**न वयम्** इति. अयम् अर्थः— एते त्रयोऽपि पादाः आहत्य एकेनैव न नाशिताः किन्तु सत्यादिभिः स्व-स्वनिवृत्त्या. ते हि धर्मपादोपजीवकाः स्वयं निवर्तमानाः धर्मस्य एकैकं पादम् आदाय निवर्तन्ते. द्वापरे च परो[२] धर्मो द्विपदो[३] जातः, प्रमाणानां द्वैराश्यात्. अतो निर्णायकप्रमाणाभावाद्[४] वस्तुतः केनापि अकृतत्वात् – कालेन भगवता वा कृतत्वात् – तादृक्स्वभावधर्मकरणाद् उत्तरं न घटते. नहि काले वा भगवति वा अयं किञ्चित् कर्तुं शक्तः. तस्मात् प्रमाणबोधने स्वाधिकारानुसारेण पदार्थान्

प्रकाशः

**न वयम्** इत्यत्र. **उपदिशति** इति परोक्षेण उपदिशति. ननु एवं परोक्षेण किमिति उपदेशः इत्यतः आहुः **अयमर्थः** इत्यादि. **द्वैराश्याद्** इति, श्रुति-स्मृतिभेदेन द्वैराश्यात्. **तादृक्स्वभावे**ति, ह्रसन्स्वभावेति अर्थः.

लेखः

**न वयम्** इत्यत्र. **एकेन** इति, कलिमात्रेण इति अर्थः. ननु सत्यादिनिवृत्त्या धर्मपादाः कथं निवृत्ताः इत्यतः आहुः **ते हि** इति. सत्यादयः इति अर्थः. **तादृक्स्वभाव** इति. सत्यादिनिवृत्त्या यस्य चरणाः निवर्तन्ते तादृशस्वाभाविकएव भगवता **धर्मस्वरूपकरणात्** तादृशे विषये मम **उत्तरं न घटते** इति धर्माभिप्रायः. ननु कुतो न घटते इति चेत्, तत्र आहुः **नहि** इत्यादि. **अयम्** इति, परीक्षिद् इति अर्थः. तथाच उत्तरं न घटते इति धर्माभिप्रायः. यदि तेन किञ्चित्प्रयोजनं सिद्ध्येत् ; तदभावात् तथा इति अर्थः. ननु एवं तर्हि तूष्णीं स्थातव्यम् इति चेत्, तत्र आहुः

१. धर्मसूक्ष्ममिति क-घ. धर्मं सूक्ष्ममिति ग. २. पर इति नास्ति ख-घ.
३. द्विपर इत्यपि पाठान्तरतया दृश्यते ग. ४. निर्नायकेति क.

बुद्ध्वा तथा करिष्यति, नतु अकथनं स्पष्टकथनं वा युक्तम् इति. हे **पुरुषर्षभ.** "पुरुषत्वे च मां धीराः" (भाग.पुरा. ११।७।२१) इति न्यायेन पुरुषमात्रस्यैव भगवद्दृष्टिः युक्ता, त्वं तु पुरुषर्षभः. किञ्च[1] **क्लेशबीजानि** पापानि भगवदपराधाः वा, तानि कुतो भवन्ति इति विचारः कर्तव्यः[2]— पुरुषएव तत्र समवायिकारणम्, अन्तःकरणं वा, भूतसंस्कारपक्षे शरीरं वा? निमित्तानि अन्यानि, नियामको विचारणीयः ; केन नियमिता सामग्रीः क्लेशबीजं जनयति? तत्र अनिश्चये हेतुः— स हि **पुरुषो** भवति, अन्यस्य नियामकत्वाभावात्. ते च पुरुषाः पञ्च व्यष्टि-समष्टि-पुरुष-काल-पुरुषोत्तमाः. तत्र अनिश्चयः, विचारकस्य अन्तःकरणस्य **वाक्यभेदैः मोहितत्वात्. वयम्** इति सर्वेषामेव अत्र विचारे अशक्यता. एकमेव वाक्यं स्व-स्वबुद्ध्यनुसारेण अनेकधा योजयन्ति ते **वाक्यभेदाः**. सर्वत्र च युक्तेः सहायता. वाक्यभेदैः निर्णीतान्[3] पदार्थान् आह. तत्र केचित् मायावादिप्रभृतयो व्यष्टिमेव हेतुं मन्यन्ते. तदर्थं "सर्वमेव विकल्पं[4] माया"

---

प्रकाशः

**पुरुषः** इति न्याय-वैशेषिक-मीमांसकमते, **अन्तःकरणं** साङ्ख्य-पातञ्जलमते, **शरीरं** धर्मशास्त्रमते. **अन्यानि** इति देश-काल-द्रव्य-मन्त्र-कर्माणि. **व्यष्टिमेव हेतुं मन्यन्ते** इति, अस्मदादि-शारीरमेव स्वक्लेशबीजं मन्यन्ते

लेखः

**तस्माद्** इति. यस्माद् विशिष्य अवक्तव्यं तस्माद् इति अर्थः. **तथा करिष्यति** इति. परीक्षिद् धर्मपालनं स्वाधिकारानुसारेण करिष्यति इति धर्माभिप्रायः. **पुरुषत्वे च मां धीरा** इति. "पुरुषत्वे च मां धीराः साङ्ख्ययोगविशारदाः, आविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितम्" इति. **भूतसंस्कारपक्षे** इति. पाप-पुण्यान्तानि शरीरारम्भकभूतेष्वेव यथायोग्यं पाप-पुण्यात्मकं संस्कारम् उत्पादयन्ति इति पक्षे इति अर्थः. **व्यष्टि** इत्यादि. प्रतिशरीरविद्यमानः आत्मा **व्यष्टिः**, ब्रह्माण्डाभिमानी स्वराट् **समष्टिः**, **पुरुषः** प्रकृत्यधिष्ठानम्. स्पष्टम् अन्यत्. **केचिद्** इत्यत्र. **विकल्पं माया**

---

१. किञ्चिदिति ख. २. कर्तव्य इति नास्ति ख. ३. निर्णीतार्थानिति ख. ४. विकल्प्येति घ-ङ.

इति आच्छादयन्ति. ते **विकल्पवसनाः** विकल्पे वसनं येषाम् इति. विविधकल्पनारूपम् अज्ञानं वा वसनं येषाम् इति. ते **आत्मानमेव** नियामकं मन्यन्ते, "आत्मैव ह्यात्मनो बन्धुः" (भग.गीता ६।५) इति वाक्यात्. आत्मनोऽपि हेतुत्वेन[१] न आत्मातिरिक्तं कारणं मन्यन्ते किन्तु **आत्मनैव**. **अन्ये** पुनः समष्टिकारणवादिनः पौराणिका ज्योतिश्शास्त्रसहकृताः पुरुषशरीरं ब्रह्माण्डं मत्वा, तत्र चेष्टारूपं च कालचक्रं[२] स्वीकृत्य, तदवयवैः बुधादिभिः[३] अन्तःस्थित-सर्वपरिज्ञानाद् (**दैवं!**) ग्रहसहितं समष्टिमेव कारणं मन्यन्ते. (**परे!**) ततोऽपि पुरुषकारणवादिनः प्रकृत्यधिष्ठातारं पुरुषं मन्यन्ते ; सहायभूतं च **कर्म** नियामकत्वेन स्वीकुर्वन्ति. अन्यथा प्रकृति-पुरुषयोः नित्यत्वात् कालस्य च नित्यत्वाद् अपेक्षान्तराभावे सृष्टिः स्याद् न स्याद् वा, अतो नियामकस्य कर्मणो अपेक्षा. "प्रबुद्धकर्मा दैवेन" (भाग.पुरा. ३।६।४) इति वाक्यात् च. यद्यपि काल-स्वभावौ वर्तेते तथापि न तयोः नियामकत्वं सम्भवति, अन्यत्वात् साधारणत्वात् च. तस्मात् कर्मसहितः

प्रकाशः

इति अर्थः. **आत्मनैव** इति. पक्षान्तरेषु इयं तृतीया सहार्थे. तेन दैव-कर्म-स्वभावेषु सर्वत्र **आत्मपदान्वयो** बोध्यः. प्रथमपक्षे तु करणार्थे. तथाच तेन क्लेशाः भवन्ति इति शेषः. **समष्टिम्** इति ब्रह्माण्डशरीराभिमानिनम्. **कारणम्** इति व्यष्टिक्लेशकारणम्. **पुरुषकारणवादिनः** पातञ्जलाद्याः पौराणिकविशेषाः वा **पुरुषं मन्यन्ते** इति तत्त्वात्मकं तथा मन्यन्ते. **कर्म** इति भिन्नं पदम्. **अन्ये पुनः** इति पौराणिकविशेषाः. विवेचनस्वरूपम् आहुः **नियामकत्वम्** इत्यादि ॥१७-१८॥

लेखः

इति. तस्य वसनं मायाम् **आच्छादयन्ति** इति, सर्वतो व्यापकत्वेन स्वीकुर्वन्ति इति अर्थः. **वसनपदतात्पर्यम्** इदम्. **आत्मनोऽपि हेतुत्वेन** इति, आत्मनिरूपितहेतुत्वेन इति अर्थः, तत्स्वरूपज्ञानहेतुत्वेन इति यावत्. **प्रबुद्धकर्मा दैवेन इति वाक्याद्** इति. तृतीये पञ्चमाध्याये इदम्. **अन्यत्वाद्**

१. नेति नास्ति क-ग. २. कालचक्रञ्चेति क. ३. बुद्ध्यादिभिरिति ख.

पुरुषः क्लेशबीजहेतुः. (**अपरे!**) अन्ये पुनः कालमेव हेतुत्वेन मन्यन्ते, द्वारत्वेन **स्वभावम्**. स हि प्रकृत्यादीन् प्रेरयति. स्वभावात्[१] ते परिणमन्ते. स्वभावादेव प्रेरयति. ''सुखं दुःखम्'' (भग.गीता १०।४) इति कालरूपस्य भगवतो वाक्यात् च. यद्यपि पुरुषोत्तमएव सः तथापि सर्वरूपत्वात् तस्मिन् प्रकरणे कालरूपं ख्यापितवान् इति तद्वाक्यानां तच्छेषत्वम्. ''सपालो यद्वशे लोको वायोरिव घनावलिः'' (भाग.पुरा. १।९।१४) इति वाक्यात् च. अन्ये तु (**प्रभुं!**) पुरुषोत्तमं मन्यन्ते. स हि सर्वत्र प्रविष्टः सर्वं करोति. कालादिष्वपि सएव प्रविष्टः. यद्यपि कालस्य सर्वप्रभुत्वं तथापि न तस्य स्वतः तत्[२] किन्तु भगवत्प्रेरणया. अन्यथा तस्य सर्वात्मत्वाभावाद् वैषम्य-नैर्घृण्ये प्रसज्येयाताम्. कालात्मनोः च विवेचनम् अग्रे वक्ष्यामः ; नियामकत्वमेव तस्य, न सर्वत्वम् इति च ॥१७-१८॥

तर्हि सर्वत्र प्रविष्टो भगवान् सर्वं कुर्वन् कथं न लक्ष्यते? तत्र आह.

**अप्रतर्क्यादनिर्वाच्यादिति केष्वपि निश्चयः ॥**
**अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥१९॥**

**अप्रतर्क्याद्** इति. यद्यपि शास्त्रप्रामाण्याद् आपाततः तर्क्यते सर्ववस्तुषु[३] वस्तुस्वरूपः इति, तत्त्वविदस्तु[४] पश्यन्ति, तथापि शृङ्गग्राहिकया[५] स्पष्टतया

लेखः

इत्यादि. ... . **सुखं दुःखम्** इति. ''सुखं दुःखमयं क्षेमं कर्मणैवाभिपद्यते'' इति, ''स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते'' (भाग.पुरा. १०।२१।१६) इत्यादिना स्वभाववादएव उक्तइति तथा इति भावः. **कालरूपस्य** इति. अतएव वाक्यं ''कालात्मना भगवता शक्रदर्पं जिघांसत'' (भाग.पुरा. १०।२१।३१) इति उक्तम् इति. **अन्यथा तस्य** इति. कालस्य स्वतएव कर्तृत्वे ते स्यातां, भगवतस्तु वस्तुतः सर्वात्मकत्वाद् आत्मसृष्टेः न ते स्याताम् इति भावः इति. **अग्रे** इति. ... . **तस्य** इति कालस्य ॥१७-१८॥

**अप्रतर्क्याद्** इत्यत्र. **शृङ्गग्राहिकया** इति. यथा गोव्यक्तिशृङ्गं

१. स्वभावादेवेति ग. २. तदिति नास्ति ख.

३. सर्वमिति ख. ४. तुर्नास्ति घ-ङ. ५. शृङ्गग्राहिकतयेति क-ख-ग.

न प्रतर्क्यः. तर्हि ज्ञात्रा[१] एतत् कथं न उच्यते "इदम् इत्थम्" इति? तत्र आह **अनिर्वाच्याद्** इति. शर्करादि-माधुर्यवत् केवलानुभवैकवेद्यं, न स्पष्टतया वक्तुं शक्यं, विशेषशब्दाभावात् सङ्केताभावाच्च अव्यवहार्यत्वात्. तस्माद् यद्यपि विशेषाकारेण वक्तुम् अशक्यम्, उत्प्रेक्षितुं च, तथापि शास्त्रानुभवाभ्यां **तन्निश्चयः**. तादृशाः विरलाः इति आह **केष्वपि** इति. अत्र पञ्चपक्षेषु यथाधिकारं व्यवस्थापितत्वात्[२] तवापि यथा अधिकारः तदनुरूपेण व्यवस्थापय इति आह **अत्र अनुरूपम्** इति. **राजर्षे**[३] इति सम्बोधनाद् – राजत्वाद् विचारकत्वम्, ऋषित्वात् मन्त्रद्रष्टृत्वं, तेन – वेदहृदयविचारेण (**विमृश!**) निर्णयं कुरु इति ज्ञापितम्. अत्र सम्मतिः न प्रष्टव्या, एकरूपत्वाभावेन स्वाधिकारानुसारेण कथनप्रसङ्गाद्, अतः **स्वमनीषया** एव विचारय ॥१९॥

एवं धर्मवाक्यं श्रुत्वा वाच्य-वचन-वक्तृनिर्धारान्(/रं!) कृतवान् इति आह.

**॥ सूतः उवाच ॥**

**एवं धर्मे प्रवदति स सम्राड् द्विजसत्तम ॥**
**समाहितेन मनसा विखेदः पर्यचष्ट तम् ॥२०॥**

**एवम्** इति, नहि धर्मव्यतिरेकेण अन्यः एवं वक्तुं शक्तः[४]. **स** च **सम्राड्** विचारकः. हे **द्विजसत्तम** इति सम्बोधनं सूक्ष्मेक्षिकायां संवादार्थम्. तस्य एवं विचारः उत्पन्नः— व्यवहारानुसारेण पृष्टे यद् अयम् अन्यथा उत्तरयति तत्र को हेतुः? अस्मत्परीक्षार्थं[५] परोक्षेण कथनं, स्वस्य वा अव्यवहार्यत्वं, प्रतारकत्वम्, अज्ञत्वं वा[६] इति? एवं चतुःपक्षविचाराय

लेखः

गृहीत्वा स्पष्टं निर्दिश्यते तथा इति अर्थः. **ज्ञातृभिः** इति, भगवत्स्वरूपज्ञातृभिः इति अर्थः. **कथनप्रसङ्गाद्** इति. धर्मो हि अत्र अनेकपक्षान् उपक्षिपन् स्वस्वाधिकारेणैव कथनप्रसङ्गं ज्ञापयति इति तथा इति अर्थः ॥१९॥

१. ज्ञातैः कथमिति क-ख-ग. ज्ञातृभिः इति लेखकृतां पाठः -सम्पा. २. भा.पाठानुसारेण. व्यवस्थात्वाद् इति मुद्रितपाठः -सम्पा. ३. राजर्ष इतीति सर्वत्र पाठो दृश्यते. यथानिवेशन्तु प्रतिभाति. ४. शक्य इति घ. ५. प्रतीक्षार्थमिति ख. ६. चेतीति क-ग-घ.

चित्तं प्रवृत्तम्. तत्र कुशाग्रबुद्धित्वाद् वाच्य-वाक्य-ज्ञानाभावेऽपि अभिप्रायस्य वक्तुः च निर्धारं शीघ्रमेव कृतवान्. (**समाहितेन मनसा विखेदः!**) बुद्धिः च न क्लिष्टा. अस्तु यथाकथञ्चित् पञ्चपक्षाः तन्निर्धारो वा, तथापि – घातको अयम्, अनेनैव अयं ताडितः, तथापि – यद् न कथयति, व्याजेन च अन्यत् कथयति, अतो धर्मएव अयं, पूर्वव्यवस्थायाः[1] श्रुतत्वाद् युगनिरूपणप्रस्तावे. अतः स्वप्रयोजनम् [2]अवसरं च विचार्य निर्धारितत्वात्[3] **तम्** अर्थं **पर्यचष्ट** इति ॥२०॥

तमेव आह.

**॥ राजा उवाच ॥**

**धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक् ॥**
**यदधर्मकृतः स्थानं सूचकस्यापि तद् भवेत् ॥२१॥**

**धर्मं ब्रवीषि** इति. त्वं तु **धर्मः (असि!)**, **धर्मज्ञ**त्वात् ; नहि अन्यो अन्यस्य स्वरूपं जानाति. हेतोः स्वरूपासिद्धिम् आशङ्क्य (आहुः!) अयं **धर्मज्ञो, (धर्मं ब्रवीषि!)** धर्मवक्तृत्वाद् इति. किञ्च **वृषरूपधृग्** अलौकिकेषु[4] धर्मस्यैव वृषरूपत्वम्. धर्मकथकत्वं[5] समर्थयते **यदधर्मकृतः स्थानम्** इति. यस्तु **अधर्मकृत्** तस्य **यत् स्थानं** नरकादि,

---

प्रकाशः

**धर्मं ब्रवीषि** इत्यत्र. **स्वरूपासिद्धिम्** इति पक्षे हेत्वभावम्. **धर्मवक्तृत्वाद्** इति, द्वितीयम् अनुमानम् उक्तम् इति अर्थः. स्वरूपासिद्धिवारणाय अनुमानान्तरं वदति इति आहुः **किञ्च** इत्यादि. तथाच वृषत्वेऽपि प्रयोजकान्तरम् अन्तरेण मनुष्यवाणी-वक्तृत्वाद् अनुमिते अलौकिकत्वे तेषु तस्यैव तथात्वं ;

लेखः

**एवम्** इत्यत्र. **पूर्वव्यवस्थायाः** इति. "कलिं प्रविष्टं निजचक्रवर्तिते" (भाग.पुरा. १।१६।१०) इत्यादिना तत्प्रवेशव्यवस्थायाः कथनाद् इति अर्थः ॥२०॥

---

१. पूर्वव्यवस्थापा इति ख. २. अनवसरमिति क. ३. निर्धारितवानिति ख-ग.

४. देवादिषु इति भा.पाठे पार्श्वटिप्पणी - सम्पा. ५. धर्मकथनत्वमिति क.

**सूचकस्यापि तद् भवेद्,** अर्थाद् अधर्मस्य[१]. तस्मात् नरकभयाद् धर्मसूक्ष्मदृष्ट्या धर्मं वदति इति धर्मः ॥२१॥

ननु अयुक्तो अयं विचारः[२], वाक्यानां स्वार्थपरित्यागाद् इदानीन्तन-मीमांसकवत्[३], तस्माद् वाक्यार्थं पुरस्कृत्य विचारणीयम् इति आकाङ्क्षायाम् आह.

**अथवा देवमायाया नूनं गतिरगोचरा ॥**
**चेतसो वचसश्चापि भूतानामिति निश्चयः ॥२२॥**

**अथवा** इति. यद् उक्तम् अनेन "न[४] जानीमः" इति तत् तथैव, "मायां मदीयाम् उद्गृह्य वदतां किं नु दुर्घटम्" (भाग.पुरा. ११।२२।४) इति वाक्याद् युक्तीनाम् अप्रयोजकत्वेन निर्धारस्य अशक्यत्वात्. ननु मायां तत्प्रवृत्तिं वा प्रथमतो विचारयतु[५], ततो अन्यद् ज्ञास्यति इति आशङ्क्य आह **देवमायायाः** भगवत्सहितायाः, भगवत्प्रेरितायाः, भगवच्छक्तित्वेन तुल्यायाः वा **गतिः** प्रवृत्तिः (**चेतसो अगोचरा**!) न स्वानुभवगम्या (**वचसश्चापि**!) न वेदवाक्यगम्या साधारणानां, तद् आह **भूतानाम्** इति ॥२२॥

एवं धर्मो अयं, पृथिवी इयं, कलिः अयम् —इति त्रितयं निश्चित्य तदनुरूपं कार्यं करिष्यन् धर्माग्रे अनुवदति.

**तपः शौचं दया सत्यमिति पादाः कृते कृताः ॥**
**अधर्मांशैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव ॥२३॥**

**तपः शौचम्** इति. तत्तद्युगानुसारेण धर्मस्य नानारूपत्वात् तदानीन्तन-पादान् गणयति. द्वादशस्कन्धे अन्यथानिरूपणस्य प्रयोजनं तत्रैव

---

प्रकाशः

ततोऽपि त्वं धर्मएव इति अर्थः. **अर्थाद् अधर्मस्य** इति **सूचकस्य** इति अन्वयः. तथाच अधर्मस्य यः सूचकः, "अनेन अधर्मः कृतः" इति शृङ्गग्राहिकया वक्ता, तस्य इति अर्थः ॥२१॥

**तपः** इत्यत्र. **अन्यथानिरूपणस्य** इति, "सत्यं दया तपो दानम्"

---

१. अर्थादधर्मः स्यादिति घ-ङ. २. निर्द्धार इति घ. ३. मीमांसकत्वादिति क-ग.

४. नेति नास्ति क-ग. ५. विचारयितुमिति ख-घ.

वक्ष्यते[१]. **तपः** कृच्छ्रादि, **शौचं** सर्वथा शुद्धता तद्धेतुः आचारः, **दया** परदुःख-प्रहाणेच्छा, **सत्य**भाषणं च — एभिः चतुर्भिः धर्मो ज्ञायते. प्रत्येकं कृतादिषु प्रधानाः. तस्य धर्मस्य प्रतिपक्षी अधर्मः, तस्यापि चत्वारः पादाः. स च गर्दभरूपः. स च एकशफः, धर्मो द्विशफः. प्रमाण-प्रवृत्ती धर्मे, अधर्मे तु न प्रमाणम्. निवृत्त्यर्थं परं[२] ज्ञापनम् अनुवादेन, अन्यथा वाक्यभेदः स्यात्. भूमिः सर्वा एकस्य स्थितियोग्या, उभयोः भूमिसमान-पृथुत्वात्.

---

प्रकाशः

(भाग.पुरा. १२।३।१८) इत्येवं कथनस्य. **परदुःखप्रहाणेच्छा** इति. इदं न दयालक्षणं, पूर्वं ''परदुःखासहनं दया'' (सुबो. १।१६।२६) इति लक्षितत्वाद्, एकादशस्कन्ध-सुबोधिन्यां तथा प्रतिपादयिष्यमाणत्वाच्च. ननु ''न हिंस्याद्'' (                ) इत्यादिश्रुतिभिः निषेध्यत्वेन प्रतियोगिनो अधर्मस्यापि अवगमात् कथम् अधर्मे प्रमाणाभावः इत्यतः आहुः **निवृत्त्यर्थम्** इत्यादि. अनुवादे गमकम् आहुः **अन्यथा** इत्यादि. अधर्मस्यापि प्रमाणवाक्यार्थत्वे

लेखः

**तपः** इत्यत्र. **द्वादश** इति, तृतीयाध्याये इति अर्थः. **प्रत्येकम्** इति. यद्यपि कृते चतुष्पाद् धर्मः तथापि तपसएव प्राधान्यवत्त्वम् ; एवम् अन्यत्रापि. **स च गर्दभरूपः** इति. ... . **प्रमाणप्रवृत्ती** इति. प्रमाणं वेदादि, तद्बोध्या प्रवृत्तिः च धर्मे ; अधर्मे तु अप्रामाणिकी प्रवृत्तिरेवेति एकशफत्वमेव इति अर्थः. ननु धर्मेऽपि ''न हिंस्यात् सर्वभूतानि'' इत्यादौ निषेध्यत्वेन प्रतियोगिनोऽपि अधर्मस्यापि निरूपणात् कथम् अधर्मे प्रमाणाभावः इत्यतः आहुः **निवृत्त्यर्थम्** इति. अनुवादे गमकम् आहुः **अन्यथा** इत्यादि. अधर्मस्यापि वाक्यार्थत्वे अर्थैक्याभावेन वाक्यभेदः स्याद् इति अर्थः. **एकस्य** इति धर्मस्य अधर्मस्य वा. अतो न एककालावच्छेदेन उभयोः स्थितिः योग्या इति अर्थः. अत्र हेतुः **भूमिसमानपृथुत्वाद्** इति. उभयोः भूमिव्याप्यस्थितत्वाद् इति अर्थः. यां भूमिम् आक्रम्य तिष्ठतः तत्र अन्यस्य न अवकाशः इति तेन क्वापि न व्याभिचारः ॥२३॥

---

१. वक्ष्यतीति ख.   २. परिज्ञापनमिति ख-घ.

कालस्तु उभयसमानः प्रवृत्ति-निवृत्तिभेदेन उभयस्थापकः, युगप्रवृत्तौ धर्मं निवृत्तौ अधर्मम् इति. ततः कालवशात्[१] त्रीन् धर्मपादान् दूरीकृत्य अधर्मः स्वस्य पादान् त्रीन् स्थापयामास इति आह **अधर्मांशैः (त्रयो भग्नाः!)** इति. अधर्मस्य पादाः चत्वारो (**स्मय-सङ्ग-मदैस्तवः!**) गर्व-सङ्ग-मदानृतरूपाः. एतेषां दशाविशेषे धर्मप्रवेशाद् **अंशपदप्रयोगः** ॥२३॥

कलेः दोषं वक्तुम् आह.

**इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद् यतः ॥**
**तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥२४॥**

**इदानीम्** इति. हे **धर्म! इदानीं ते सत्यमेव** एकः **पादो यतो निर्वर्तयेत्** स्वात्मानं नितरां वर्तयेत्[२] प्रचारयेत्. त्वां वा, सम्बन्धित्वेन उपस्थितत्वात्. विभक्तिव्यत्यासे न अध्याहारदोषः. **तं** पादम् **अधर्मो**[३] **जिघृक्षति,** सत्यहेतुम् अन्तःकरणं वा. ननु अधर्मो जिघृक्षति ; कलेः को अपराधः? तत्र आह **अधर्मो अयं कलिः** इति. अपरिच्छिन्नः कालः, तस्य 'कृता'दिपदप्रयोगो अवच्छेदेन वक्तव्यः. तत्र स्वस्य स्वावच्छेदकत्वाभावाद् अन्यस्य अभावाद् धर्माधर्मावच्छेदकत्वेन 'कृता'दिपद-

प्रकाशः

अर्थैक्याभावेन वाक्यभेदः स्यात्! अतो "न हिंस्याद्" इत्यादिष्वपि निषेधविधानार्थं हिंसादेः अधर्मस्य अनुवादएव स्वीकार्यः इति अर्थः. **भूमिः** इति कर्मभूमिः. **अधर्मम्** इति, व्यवस्थापयति इति शेषः. **दशाविशेषे** इति, भगवद्दासत्वाभिमान-सत्सङ्ग-भगवद्गानादिकृतहर्षोत्कर्षे, गोब्राह्मणाद्यर्थ-काऽनृत-दशायाम् ॥२३॥

ननु सम्बुध्यन्ते **धर्म**पदे विभक्तिव्यत्यासात् **त्वां निवर्तयेद्** इति व्याख्यानम् अयुक्तम् इत्यतः आहुः **विभक्ती**त्यादि. व्यत्यासानङ्गीकारे 'स्वात्मानम्' इति अध्याहारः स्याद् इति अर्थः. ननु अधर्मस्य पदार्थान्तरत्वेन कालभिन्नत्वात् कथम् उद्देश्यविधेयभाव इति आकाङ्क्षायां तस्य पर्यवसानं विचारयन्ति **अपरिच्छिन्नः** इत्यारभ्य **कलिरित्यर्थः** इत्यन्तेन. एवं युगविभागे

१. कालबलादिति ग-घ. २. निर्वर्त्तयेदिति क. ३. तं पादं धर्म इति ख.

प्रयोगः[१]. तत्र केवलधर्मावच्छेदकं कृतं, केवलाऽधर्मावच्छेदकः[२] कलिः, भागशः उभयावच्छेदकं त्रेता, समशः उभयावच्छेदकं द्वापरम् इति. कालस्य[३] द्वितीयराशि-परिच्छेदार्थम् आगमने धर्मांशमपि[४] अतिक्रम्य आगमनाद् अधर्मांशप्रवेशः. "ये वै चत्वारः स्तोमाः कृतं तद्, अथ[५] ये पञ्च कलिः सः" (तैत्ति.ब्रा. १।५।११।१) इति श्रुतौ स्तोम-चतुष्टयात्मकस्य ज्योतिष्टोमादेः कृतत्वनिरूपणाद् धर्मावच्छेदकत्वं कृतस्य. 'अथ' तदतिरिक्तो यः कालः पञ्चात्मकः[६] 'सः कलिः'. एतदभावचतुष्टयरूपत्वम् अतिरिक्तं च. अतः पञ्चत्वं "समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि" (तैत्ति.ब्रा. १।५।३।४) इत्यत्र प्रसङ्गाद् निर्धारितम्. अतो यथा आकाशस्य परिच्छेदको घटादिः – तस्य घटाकाशस्य प्रदर्शने घटएव प्रदर्श्यते मध्यभागेन – तथा

प्रकाशः

उपपत्तिम् आहुः **कालस्य** इत्यादि. **द्वितीयराशि** इति, अधर्मराशिः इति अर्थः. **अधर्मांशप्रवेशः** इति अवच्छेदके काले तत्प्रवेशः. तथाच यथा संवत्सररूपेण परिभ्रमन् सर्वम् अन्तः स्थापयति तथा अधर्मांशमपि इति तथा विभागः इति अर्थः. ननु कृत-कल्योः धर्माऽधर्मावच्छेदकत्वे किं मानम् अतः आहुः **ये वै** इत्यादि. **प्रसङ्गान्निर्धारितम्** इति. "देवस्य सवितुः प्रातः" (तैत्ति.ब्रा. १।५।३।१) इति अनुवाके प्रातः-सङ्गव-मध्याह्नाऽपराह्न-सायाह्नानां सवितृ-मित्र-बृहस्पति-भृगु-वरुण-दैवत्यत्वेन पुण्यत्वं वदन्त्या श्रुत्या, तदवान्तराणां सम्बन्धिनां चतुर्णाम् अग्निष्टोमोकथ्य-षोडश्यतिरात्रकरणेन आत्तवीर्यत्वं च वदन्त्या, चत्वारि अश्लीलानि इति वदन्त्या, चतुर्णां कालावयवानाम् एतदभावचतुष्टय-रूपत्वं निर्धारितम् इति

लेखः

**स्तोमचतुष्टयात्मकस्य** इति. प्रथमाष्टकब्राह्मणे पञ्चमप्रपाठके इयम्. **समानस्याऽह्नः पञ्च पुण्यानि** इति. इयमपि तत्रैव.

१. कृतादिप्रयोग इति ख-ग-घ. २. केवलं धर्मावच्छेदक इति घ.

३. द्वापरकालस्येति क. ४. अधर्मांशमिति ग-घ.

५. श्रथ ये इति ग. श्रयसे इति घ. ६. स पञ्चात्मक इति ख.

अयं कलिः इति अर्थः. पूर्वं कृतेन सह समता हीनता च स्थिता, अधुना उत्कृष्टता, पादत्रयप्रवेशात्. तत्रापि सुतराम् **अनृतेन एधितः** पुष्टः स्वशत्रुं धर्मपादं[१] **जिघृक्षति,** शत्रुशेषस्य अरक्षणीयत्वात्. अतएव वेदे उभयोरेव नाम ; त्रेता कृतशेषः, द्वापरं कलिशेषः ॥२४॥

एवं धर्मस्य [२]स्वरूपम् उक्त्वा भूमिस्वरूपज्ञानम् आविष्करोति.

**इयञ्च भूर्भगवता न्यासितोरुभरा सती ॥**
**श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥२५॥**
**शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिताधुना ॥**
**अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यन्ति मामिति ॥२६॥**

**इयञ्च** इति. **च**कारा**द्** अतिरिक्तः कलिः. तस्य विशेषतो अनिरूपणं **च**कारेण ज्ञापितम्. अस्याः गुणत्रयं दोषत्रयं च. इयं हि षडंशा. पूर्वं **भगवता न्यासितः** उत्तारितः **ऊरुः** अधिको **भारो** यस्याः. भगवत्कृतोपकारत्वं गुणः. ततः **सती** भगवदेकनिष्ठा. भगवतैव स्वांशैः अलङ्कृता च, तद् आह **श्रीमद्भिः** इति. **न्यासः**[३] स्थापनम्. **सर्वतः कृतं कौतुकं** यस्याम्[४]. अनेन शृङ्गाररसत्वं च[५] सूचितम्. दोषान् आह **शोचति**

---

प्रकाशः

अर्थः. **मध्यभागेन** इति. घटस्य अन्तर्बहिः आकाशो, मध्ये घटः ; तथा उभयतः कालो मध्ये अधर्मः. एवं सति उद्देश्यविधेयभावस्य अवच्छेदकत्वे पर्यवसानम् इति अर्थः. **पूर्वम्** इति, द्वापर-त्रेतयोः इति अर्थः. ननु द्वापर-त्रेतयोः कलिसद्भावे किं मानम् इति आकाङ्क्षायां पूर्वोक्तां श्रुतिमेव स्मारयन्ति **अतएव** इत्यादि ॥२४॥

लेखः

**पूर्वं कृतेन सह** इति, कृतेन सह त्रेतादौ इति अर्थः. एवञ्च कृतादौ हीनत्वं, द्वापरादौ समता इति अर्थः. **अधुना** इति, कलौ इति अर्थः. **अतएव वेदे** इति. ... ॥२४॥

---

१. धर्मं पादमिति ख. २. धर्मस्य रूपमिति क-ग. धर्मं स्वरूपमिति घ.

३. न्यासस्थापनमिति क-ग. ४. यस्या इति क-ग. ५. चकारो नास्ति ख.

इति. भगवत्परित्यागेन शोको, दुर्भगात्वम्[१], अब्रह्मण्यभोगेन पूर्वावस्थात्यागश्च. अश्रूणि कलयति इति **अश्रुकला.** स्वकृतदोषाभावार्थम् आह **साध्वी** इति. भाग्याभावएव त्यागे हेतुः, तद् आह **दुर्भगेति. अधुना (उज्झिता!)** इति त्यागनैकट्यं सूचितम्. ननु राज्ञां भगवद्रूपत्वात् तद्भोगे को दोषः इति? तत्र आह **अब्रह्मण्याः** इति. भगवद्धर्मवैपरीत्यम् **अब्रह्मण्य**पदेन सूचितम्. (**नृपव्याजाः!**) नृपत्वं च भाक्तं, योगाभावात्. **शूद्राः** इति भगवद्विरोधित्वम्, "असुर्यः शूद्रः" (तैत्ति.ब्रा. १।२।६।७) इति श्रुतेः. ते **भोक्ष्यन्ति (माम्!) इति** शोको रोदनं च. अनेन स्वस्य रसाविर्भावाभावात् न तेषां भोगः सेत्स्यति इति भावः सूचितः ॥२५-२६॥

**॥ सूतः उवाच ॥**

**इति धर्मं महीं चैव सान्त्वयित्वा महारथः ॥**
**निशातमाददे खड्गं कलयेऽधर्महेतवे ॥२७॥**

उपसंहरति **इति** इति. **चकारः** उक्तसमुच्चयार्थः, **एवकारः** कलिनिषेधार्थः. **महारथः** इति निग्रहसामर्थ्यम्. कलेः देवतात्वात् तीक्ष्णखड्गेन शिरश्छेदनम् अयुक्तम् इति आशङ्क्य आह **अधर्महेतवे** इति, अधर्मकारणाय[२]. निवृत्त्यर्थे चतुर्थी, "मशकेभ्यो धूमः" इतिवत् ॥२७॥

अदृश्यतया गमने न प्रयोजनं, न वा निस्तारः. धर्मवाक्यानां श्रवणात् तदर्थपर्यालोचनया राजनि अभिमानादिः स्वकुटुम्बम् अस्ति इति ज्ञात्वा

---

प्रकाशः

**इतीत्यत्र. उक्तसमुच्चयार्थः** इति, स्वरूप-तद्दुःखज्ञान-समुच्चयार्थः ॥२७॥ **तम्** इत्यत्र. **स्वकुटुम्बम्** इति कलिकुटुम्बम् ॥२८॥

लेखः

**इति** इत्यत्र. **अदृश्यतया गमने** इति. तथा गमने कलिप्रयोजनं न इति अर्थः. **धर्मवाक्यानाम्** इति, धर्मसंवादे राजवाक्यानाम् इति अर्थः. **ज्ञात्वा** इति. **स्वकुटुम्बम् अभिमानादि**-कलिपरिकरं **राजनि अस्ति** इति **ज्ञात्वा** इति अर्थः ॥२८॥

---

१. दुर्भगत्वमिति ख. २. अधर्मकरणायेति ख.

स्वनाशभयं परित्यज्य तच्छरणं गतः इति आह.

**तं जिघांसुमभिप्रेत्य विहाय नृपलाञ्छनम् ॥**
**तत्पादमूलं शिरसा समगाद् भयविह्वलः ॥२८॥**

**तं जिघांसुम्** इति. (**नृपलाञ्छनं विहाय!**) राजचिह्नं छत्रादि ; लोके आज्ञापनं त्यक्त्वा इति अर्थः. **पादमूलम्** इति स्वस्य राजशेषत्वं ज्ञापितं— शरणागतः तव सेवकः इति. **भयविह्वलः** इति. धर्मः चेत् प्रेरयेत् तदा मारयिष्यति इति भयम्. कापट्यं वा ज्ञास्यति – चरणपातव्याजेन राजानमपि स्पृशति येन तस्यापि अग्रे दुर्बुद्धिः उत्पत्स्यते. धर्मसान्निध्याद् इमम् अर्थं ज्ञास्यति – इति भयम् ॥२८॥

चरणपातानन्तरं यद् जातं तद् आह.

**पतितं पादयोर्वीरः कृपया दीनवत्सलः ॥**
**शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव ॥२९॥**

**पतितम्** इति. **पादयोः** इति गतिनाशः सूचितः. सोऽपि धर्मबुद्धेः उपकाराय भविष्यति, इहैव भगवत्सायुज्यात्. **वीरः** इति स्वधर्मानुसन्धानं, न प्रकृतविचारः[१]. धर्मसान्निध्याद् दयादिप्रवेशो अधर्मसान्निध्यात् तत्र जातः ; तद् आह **कृपया** इति. इयं दया लौकिकी इति आह **दीनवत्सलः**

प्रकाशः

**पतितम्** इत्यत्र. **सोऽपि** इति गतिनाशोऽपि. **तत्र जातः** इति, अधर्ममारणावसरे जातः इति अर्थः. **पशुः** इति, राजा पशुः ॥२९॥

लेखः

**पतितम्** इत्यत्र. **गतिनाशः** इति. चरणपातेन चरणगत्यवरोधात् तन्नाशः सूचितः इति अर्थः. **सोऽपि** इति, गतिनाशोऽपि इति अर्थः. **धर्मबुद्धेः** धर्मस्थापनार्थं प्रवृत्तत्वेन धर्मबुद्धेः राज्ञः **उपकाराय भविष्यति** इति अर्थः. उपकारः कः इति आकाङ्क्षायाम् आहुः **इहैव** इति, अस्मिन्नेव देशे श्रीभागवतप्राकट्येन **भगवत्सायुज्याद्** इति अर्थः. अन्यथा युधिष्ठिरादीनामिव अस्यापि महाप्रस्थानगमनं प्रसज्येत इति भावः. **तत्र जातः** इति, दयात्मको

१. प्राकृतेति ख.

इति. वत्सं लाति इति पशुः ; दीनविषये न विचारः कृतः इति अर्थः. पूर्वजकीर्तिरक्षार्थं न अस्य बुद्धिः जाता, स्वधर्मएव जाता इति **शरण्यः** इति उक्तम्. लोकापवादभयादपि, तद् आह **श्लोक्यः** इति. **इदं** वक्ष्यमाणम् **आह च** अनिष्टं निवर्तितम् इष्टं च प्रयच्छति इति अर्थः. **हसन्निव** इति मुखप्रसादो गर्वलेशसम्बन्धो वा ॥२९॥

कलेः कम्पं दृष्ट्वा "कालान्तरे मारयिष्यति इति शङ्का अस्य वर्तते" इति अनुमाय तन्निवृत्त्यर्थम् आह.

**॥ राजा उवाच ॥**

**न ते गुडाकेशयशोधराणां बद्धाञ्जलेस्ते भयमस्ति किञ्चित् ॥**
**न वर्तितव्यं भवता कथञ्चन क्षेत्रे मदीये त्वमधर्मबन्धुः ॥३०॥**

**न ते गुडाकेशे**ति. **गुडाका** निद्रा, तस्या **ईशो** अर्जुनः. अनेन मायामोहाभावात् **न (ते!)** त्वत्कृतम् अस्माकं **भयम्** इति सूचितम्. **यशोधराणाम्** इति, यशोलज्जया अपि अधर्मं न करिष्यामः इति भावः. सत्यप्रतिज्ञार्थं वा. अहं तु पौत्रएव, अन्येऽपि ये केचन अर्जुनस्य यशोधारकाः तेषामपि अग्रे **बद्धाञ्जलेः (ते!)** तव किमपि **भयं नास्ति.** इन्द्रादिरपि भयजननासमर्थः इति अर्थः. परम् अस्मदीया आज्ञा परिपालनीया इति आह **न वर्तितव्यम्** इति. **कथञ्चन** केनापि अंशेन. (**मदीये क्षेत्रे!**) स्वस्य जम्बूद्वीपराज्यम् अल्पमिव निरूपयति. **क्षेत्रम्** इति(?) उत्पत्तिस्थानं वा. अतो यदेव बीजं पतिष्यति तदेव उत्पत्स्यते इति

---

लेखः

धर्मो अधर्मविषयको जातः इति अर्थः. **न विचारः** इति. दीनवत्सलत्वादेव अयम् अधर्मबन्धुः कलिः सर्वथा न रक्ष्यः इति **विचारो न कृतः** इति अर्थः. **पूर्वजकीर्ति** इति. "पार्थानां कीर्तिदूषणं तव वैरूप्यकर्तारं मम आख्याहि, तम् अहं मारयिष्यामि" (श्लो. १३) इति पूर्वम् उक्तं तद् अत्र शरण्यत्व-स्वधर्ममहिम्ना विस्मृतम् इति अर्थः. **अनिष्टम्** इति, मारणम् इति अर्थः. **इष्टं** स्थानदानं भयाभावो वा ॥२९॥

**अस्य** इति, कलेः इति अर्थः. **न ते** इत्यत्र. **क्षेत्र**पदतात्पर्यम् आहुः **उत्पत्तिस्थानम्** इति. तत्सूचितम् आहुः **अधर्मे** इति. अधर्मबन्धुत्वाद्

(**भवता न वर्तितव्यं!**) त्वया न स्थातव्यम्. तत्र हेतुः **अधर्मबन्धुः** इति. अधर्मे निवार्ये दण्ड्ये[१] वा अपकारं करिष्यति इति सूचितम्. अतएव इदानीं पाषण्डिनां निराकरणे निराकर्तुः भयम् ॥३०॥

ननु राज्ञः एतदेव[२] कार्यं यत् प्रजाशिक्षणं दण्डश्च, अतो लाभहेतुं मां कुतो निवारयसि इत्यतः आह.

**त्वां वर्तमानं नरदेवदेहेष्वनुप्रविष्टोऽयमधर्मपूगः ॥**
**लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दम्भः ॥३१॥**

**त्वां वर्तमानम्** इति. यदि राजानः त्वया त्यक्ताः स्युः तदा तेषां लाभो[३] भवेत् ; तेषामपि अधर्मित्वे स्वरूपनाशात् किं लाभेन! स्वस्यापि तथात्वेन अनुमोदनाद् अलाभः च. अतएव **नरदेवदेहेषु वर्तमानं त्वाम् अनु अधर्म**समूहोऽपि **प्रविष्टः**. स च प्रत्यक्षो अस्मास्वपि वर्तते इति (**अयम्!**) इदमा निर्दिशति. तम् अधर्मपूगमेव गणयति. नवः तस्य प्राणाः. **लोभः** परद्रव्याभिलाषः. ततः तत्सिद्ध्यर्थम् **अनृतं** "मिथ्यैव त्वया एवं कृतम्" इति वाच्यतापादनादि. प्रतियोगिनो[४] बलवत्त्वे **चौर्यं** गुप्ततया वित्तहरणं, दौर्बल्ये तु **अनार्यं** प्रत्यक्षतएव स्त्री-रत्नादिहरणम्. आर्यविरुद्धशीलत्वात् तस्य अनार्यत्वम्. तस्य अशक्तौ **अंहः** अपराधकरणम् अग्निदाहादि. ततो **ज्येष्ठा** दारिद्र्यसम्पादनम्. **चकारात्** स्वस्यापि दारिद्र्यम्.

---

प्रकाशः

**त्वाम्** इत्यत्र. **ज्येष्ठा दारिद्र्यसम्पादनम्** इति. पुराणे अलक्ष्म्याः लेखः

अस्माभिः अधर्मे दण्डादौ क्रियमाणे अस्मदपकारं करिष्यति इति अर्थः ॥३०॥

**त्वाम्** इत्यत्र आभासे **लाभहेतुम्** इति. त्वदाज्ञया अहमेव शिक्षयामि इति त्वदिष्टमेव इति भावः. व्याख्याने **त्यक्ताः स्युः** इति. तान् विहाय अन्यत्रैव यदि प्रवृत्तः स्याद् इति अर्थः. **स्वस्याऽपि** इति, परीक्षितः इति अर्थः. **तथात्वेन** इति, राजत्वेन इति अर्थः ॥३१॥

---

१. दण्डे इति ग. २. एतत्कार्य्यमिति घ. ३. लोभ इति घ. ४. प्रतियोगित इति क.

ततो वञ्चनचातुरी[१] **माया,** ततः **कलहः,** पुनर्विश्वासार्थं **दम्भः च.** चकारात् कलहानन्तरं[२] मारणं वा ॥३१॥

उपसंहरति.

**न वर्तितव्यं तदधर्मबन्धो धर्मेण सत्येन च वर्तितव्ये ॥**
**ब्रह्मावर्ते यत्र यजन्ति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥३२॥**

**न वर्तितव्यम्** इति. हे **अधर्मबन्धो, (तत्!)** तस्माद् हेतोः **न वर्तितव्यम्.** अधिकरणस्य तद्विरोधित्वं प्रकटयति **धर्मेण** इति. **धर्मेण** कायिकेन **सत्येन** वाचिकेन[३] **चकारात्** मानसिकेन ; काय-वाङ्-मनोभिः ये धर्मकर्तारः तेषामेव (**वर्तितव्ये!**) स्थानयोग्ये. तत्रापि देशविशेषं निर्दिशति **ब्रह्मावर्ते** इति. तद्धि धर्मक्षेत्रं ; तत्र यदि निर्दुष्टो धर्मः उत्पन्नः तदा अन्यत्र अधर्ममपि नाशयेत्. अतो धर्मक्षेत्रे त्वया न स्थातव्यम्. नच कदाचिदपि तत्र धर्मशून्यता, देवानामपि देवयजनत्वेन निरन्तरं यज्ञसम्भवात्. तद् आह **यत्र यजन्ति यज्ञैः** इति. तत्रापि मुख्यधर्मप्रकारेण यजन्ति इति आह **यज्ञेश्वरम्** इति. "यज्ञेन यज्ञम् अयजन्त देवाः" (तैत्ति.आर. ३।१२।७) इति श्रुतिः अनुसन्धेया. ननु अहमपि एकदेशे स्थास्यामि इति चेत्, तत्र आह **यज्ञवितानविज्ञाः** इति. **यज्ञवितानो** यज्ञविस्तारः उक्थ्यादयः[४], तत्र विशेषज्ञाः. अनेन त्वयि प्रविष्टे ते तदानीमेव ज्ञास्यन्ति, ततो न करिष्यन्ति इति सूचितम् ॥३२॥

ननु किं यज्ञैः ? ऐहिकेष्टसिद्धिः त्वयैव कर्तव्या, परलोकस्तु विचारणीयः. तत्र आह.

**यस्मिन् हरिर्भगवानिज्यमान इज्यात्ममूर्तिर्भजतां शं तनोति ॥**
**कामान् अमोघान् स्थिरजङ्गमानाम् अन्तर्बहिर्वायुरिवैष आत्मा ॥३३॥**

---

प्रकाशः

लक्ष्मीज्येष्ठभगिनीत्वाद् 'ज्येष्ठा' इति नाम्ना प्रसिद्धेः तथा इति अर्थः ॥३१॥

---

१. वञ्चने इति क. वचने इति घ. २. कलहादनन्तरमिति घ.

३. वाचनिकेनेति क-ग. ४. उवक्थ्यादय इति ख. तुष्ट्यादय इति घ.

**यस्मिन्** इति. **यस्मिन्** देवयजने **हरिः इज्यमानः** उद्देश्यो यज्ञपुरुषो विष्णुरेव साक्षाद् **भगवान्**. ननु देवाएव इन्द्र-वाय्वादयः तत्र इज्यन्ते! तत्र आह **इज्यात्ममूर्तिः** इति, इज्यानाम् आत्मा मूर्तिः च अयम्. ततः किम् अतः आह **भजतां शं तनोति** इति. भक्तिमार्गानुसारी आधिदैविकयज्ञाः एते, तत्र न अदृष्टद्वारा फलं[१] किन्तु प्रीता देवता फलं प्रयच्छति इति. स्वस्य उद्देश्यत्वाभावात् च, भगवतः च तथात्वात्. अतः प्रीतिरेव (दृष्टं!) द्वारम्. आध्यात्मिकेषु च अदृष्टद्वारा फलं, भौतिकेषु भूतसंस्कारद्वारा. सर्वत्र वा भगवान् फलदाता, ''फलमत उपपत्तेः'' (ब्रह्मसूत्र ३।२।३८) इति. तद् आह **भजतां**[२] **शं तनोति** इति. धर्मपक्षे[३] विस्ताराभावः. **अमोघाः** च नः **कामाः**[४], **स्थिर-जङ्गमानां** च न फलसम्बन्धः, अतो यथावेदं यज्ञकरणम् अत्रैव, फलं च. किञ्च यज्ञैः सन्तुष्टो भगवान् ज्ञानमपि प्रयच्छति, अन्तर्बहिश्च प्रकटो[५] भवति इति

प्रकाशः

**यस्मिन्** इत्यत्र. **धर्मपक्षे विस्ताराभावः** इति. धर्मादेव फलम् अदृष्टद्वारा इति पक्षे **शं तनोति** (इति!) अनेन उक्तो यः सुखविस्तारः तदभावः, फलस्य तददृष्टनियतत्वाद् इति अर्थः. **तथा अस्तु** इति, एको अस्तु इति अर्थः ॥३३॥

लेखः

**यस्मिन्** इत्यत्र आभासे. **विचारणीयः** इति. तैः याज्ञिकैरेव साधनान्तरेण विचारणीयः इति अर्थः. **तत्राऽऽह** इति. तस्याम् आशङ्कायाम् उभयसाधकत्वं यज्ञस्यैव आह इति अर्थः. व्याख्याने. ननु कर्मणैव सर्वम् उपपाद्यतां, किं भजनेन इत्यतः आहुः **धर्मपक्षे** इति. कर्मजन्य-धर्मपक्षे इति अर्थः. **विस्ताराभावः** इति. तत्साध्य-स्वर्गादेः क्षयिष्णुत्वाद् इति भावः. अन्यत्रापि व्यतिरेकं ग्राहयन्ति **अमोघाः** इत्यादिना.

---

१. फलन्तीति ख. २. यजतामिति क. ३. ''कर्मैव फलदम् इति पक्षे स्वर्गादिकम् अनित्यमेव फलम्. भगवांस्तु शं विस्तारयति'' इति भा.पाठे पार्श्वटिप्पणी -सम्पा. ४. ''इन्द्रियादिगामिनएव भोगाः'' इति भा.पाठे पार्श्वटिप्पणी -सम्पा. ५. प्रकाश इति घ.

आह **अन्तर्बहिः** इति. एकस्य उभयत्वं[१] सदृष्टान्तम् आह **वायुरिव** इति. 'प्राण'-'वायु'शब्दभेदेऽपि यथा पदार्थस्य एकत्वं तथा भगवान् 'अन्तर्बहिः'पदार्थत्वेन व्यवह्रियमाणोऽपि एकएव इति अर्थः. ननु दृष्टान्तेनैव भगवान् तथा अस्तु, सर्वत्वाद्, अतः आह **एषः आत्मा** इति. न प्राणमात्रत्वम् अस्य किन्तु अयम् आत्मा. **एषः** इति भक्त्या स्फुरन्तं भगवन्तं निर्दिशति ॥३३॥

एवं प्राप्तजीवाभयो विशेषं प्रार्थयितुं पुनः नम्रभावनां[२] कृत्वा वञ्चयितुम् आरभते इति आह.

**॥ सूतः उवाच ॥**

**परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ॥**
**तमुद्यतासिम् आहेदं दण्डपाणिमिवोद्यतम् ॥३४॥**

**परीक्षिता एवम्** इति. **आदिष्ट** आज्ञप्तः. **जातवेपथुः** प्रतिज्ञां सत्यां करिष्यतीति[३], इदानीं[४] गन्तव्यं पतति इति च. विलम्बः तूष्णीम्भावो वा अशक्यइति आह **उद्यतासिम्** इति. कृतपूर्वापराधस्य अवश्यदण्डकर्तृत्वं[५] ज्ञापयति **दण्डपाणिमिव**[६] इति. सकृदपराधः सोढः[७], अतः परं मारयिष्यति इति आह **उद्यतम्** इति ॥३४॥

विज्ञापनाम् आह.

**॥ कलिः उवाच ॥**

**यत्र क्व चाऽथ वत्स्यामि सार्वभौम त्वदाज्ञया ॥**
**लक्षये तत्र तत्रापि त्वामात्तेषुशरासनम् ॥३५॥**
**तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ॥**
**यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम् ॥३६॥**

---

लेखः

**उभयत्वम्** इति, अन्तस्त्वं बहिष्ट्वं च इति अर्थः. **प्राण** इति. प्राणो वायुः च इति शब्दभेदेऽपि इति अर्थः ॥३३॥

---

१. "अन्तर्बहिःप्रकटत्वम् इति अर्थः" इति भा.पाठे पार्श्वटिप्पणी - सम्पा.

२. नम्राभावानामिति ख. ३. करिष्यतीति ख. (सत्यामिति नास्ति). ४. इदानीञ्चेति ख.

५. अवश्यमिति क. ६. दण्डकर्तृत्वमिति ख. ७. सोढव्य इति क-ग-घ.

**यत्र** इति. हे **सार्वभौम** सर्वा भूमिः तवैव, अहमपि त्वदीयः. अतो मदधिष्ठितभूमेरेव[१] त्वम् ईश्वरः इति ज्ञापितम्. पूर्वम् अस्माकं स्वातन्त्र्यं स्थितम्, अधुना तवैव आज्ञा कर्तव्या इति आह **अथ** इति भिन्नप्रक्रमे[२]. **त्वदाज्ञया यत्र क्व च वत्स्यामि.** मम स्थितौ नास्ति सन्देहः परं त्वया रोषो न विधातव्यः. जीवता च क्वचित् स्थातव्यं, जीवनं च त्वयैव दत्तम्, अतः – स्पष्टतया त्वदाज्ञाव्यतिरेकेऽपि[३] जीवनरक्षणाद्[४] दत्तैव आज्ञा – मत्कार्यदर्शनात् च क्रोधं[५] करिष्यसि इति आह **लक्षये** इति. यत्रैव स्थास्यामि **तत्रैव त्वाम् आत्तशरासनं** द्रक्ष्यामि. अतो यत्र स्थित्वा त्वाम् आत्तशरासनं न द्रक्ष्यामि तत्स्थानं देहि इति आह **तन्मे** इति. चातुर्येण प्रार्थितं— त्वां द्रक्ष्यामि शरासनरहितम् अतो मद्दर्शनमात्रेणैव शरासनं त्यक्तव्यम् इति भावः. **धर्मभृतां श्रेष्ठः** इति याचितदानं दत्तपरिपालनं च सूचितम्. (**ते अनुशासनम् आतिष्ठन् नियतो वत्स्ये!**) यद्यपि अहं तत्र स्थास्यामि परं त्वया निर्देष्टव्यं; त्वदाज्ञया चेत् स्थितिः, नियमेन स्थितिः स्यात्, त्वदाज्ञा च परिपालिता स्यात्. अत्रापि वञ्चनं— "शास्त्रफलं प्रयोक्तरि" (जैमि.पूर्वमी.सूत्र ३।७।१८) इति न्यायेन तत्पापं तवैव भविष्यति इति भावः. **नियतः** इति वचनाद् धर्मार्थेष्वपि द्यूतादिषु[६] मम वासः इति ज्ञापितम् ॥३५-३६॥

तत् तथैव कृतवान् इति आह.

**॥ सूतः उवाच ॥**

**[७]तत्तथाऽभ्यर्थितस्तस्मै स्थानानि कलये ददौ ॥**
**द्यूतं पानं स्त्रियः सूना यत्राऽधर्मश्चतुर्विधः ॥३७॥**

**तत्तथा** इति. अस्य अवश्यं स्थानं देयम्, अयञ्च अधर्मबन्धुः, द्यूतादिः च अधर्मः, अतः "स्थानान्तरे दत्ते तदपि अधर्मस्थानं भविष्यति"

---

१. भूमेरेवमिति ख. २. भिन्नक्रमे इति ख-ग. ३. त्वदाज्ञया व्यतिरेकेणेऽपीति क-ग.

४. जीवरक्षणादिति ख. ५. क्रोधञ्चेति क-घ. ६. पूजादिष्विति क.

७. "अभ्यर्थितस्तदा तस्मै" इति पाठोपलम्भेऽपि प्रतीकग्रहस्य भेदाद्यथोक्तमेव पाठोऽभ्युपेयः प्रतिभाति. अन्ये तूपलम्भानुरोधात्प्रतीकमेव परिवर्त्तयन्ति. तन्न युक्तम्.

इति विचार्य द्यूतादिकमेव स्थानं दत्तवान् इति (आह!) **द्यूतम्** इति. **द्यूतम्** अक्षक्रीडा. अनाधानविषयं[१] **पानं** मदिरायाः. **स्त्रियः** साधारण्यः, बहुवचनात्. **सूना** हिंसा. एतेषु **यत्र अधर्मो** भवति तद् अस्य स्थानं, नतु स्वभावतः. शास्त्रतो वा यत्र एतानि भवन्ति न[२] तानि कलिस्थानानि भवन्ति. किञ्च **चतुर्विधो अधर्मः** "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः" (मनुस्मृ. ११।५४). स्तेये[३] द्यूतं प्रविष्टम् अतो महापातक-स्थानभूतम्. एतच्चतुष्टयं कलेः स्थानम् इति अर्थः ; कलिना सएव[४] गृहीतो यः एतानि करोति. **यत्र** इति पदाद् अधर्मस्य उद्देश्यत्वमेव ॥३७॥

ननु मम पञ्च स्थानानि श्रुतिबोधितानि, अतः एकम् अधिकं देयम् इति आकाङ्क्षायाम् आह.

**पुनश्च याचमानाय जातरूपमदाद् विभुः ॥**
**ततोऽनृतं मदः कामो रजो वैरञ्च पञ्चमम् ॥३८॥**
**एतानि पञ्च स्थानानि ह्यधर्मप्रभवः कलिः ॥**
**औत्तरेयेण दत्तानि न्यवसत् तन्निदेशकृत् ।३९॥**

**पुनः च** इति. एकवारं स्थानचतुष्टयं दत्तं, **पुनः याचमानाय**

---

लेखः

**अभ्यर्थितः** इत्यत्र. **अनाधानविषयम्** इति. आहिताग्नेः राजसूयादौ अक्षक्रीडायाः विहितत्वाद् इति भावः. **न तु स्वभावतः** इति. स्वभावतएव इदं चतुष्टयम् अवच्छेदकावच्छेदेन कलिस्थानं न इति अर्थः. तेन सिद्धम् आहुः **शास्त्रतो वा** इत्यादि. **वा** इति अव्ययं वाक्यालङ्कारे, नतु विकल्पार्थः. तथाच "अक्षैः क्रीडति" (                ) इति राजसूये अक्षक्रीडनस्य, सौत्रामण्यादौ सुरापानस्य, धर्मपरस्त्रीणां, याज्ञियहिंसायाः च न कलिस्थानयोग्यता इति अर्थः ॥३७॥

---

१. अनाधीनेति ख.     २. ख-भा.पाठानुसारेण. मुद्रितपाठे नास्ति - सम्पा.

३. स्तेयं द्यूते प्रविष्टमिति घ-ङ.     ४. सर्व एवेति क-ग-घ.

**जातरूपं** सुवर्णम् **अदात्**. स्तेये सामान्यत्वेन सुवर्णम् आगतम्, अधुना सुवर्णत्वेन[१] स्वरूपेण स्वर्णं कलिस्थानम्. ननु अयं महान् अनर्थः ; कथं सुवर्णं तस्मै दत्तवान् इति? तत्र आह **विभुः** इति. **च**कारात् स्वतन्त्रतया अर्पितानि स्थानानि याचितानि. एषां स्थानानां पुनः प्राप्तानां न स्वरूपेण स्थानत्वं किन्तु कार्यतः इति तानि कार्याणि क्रमेण गणयति **ततः** इति. यस्माद्[२] **अधर्मः** (श्लो. ३७) इति अनुवर्तते अतो **अनृत**रूपं द्यूतं, **मद**रूपं पानं, **काम**रूपाः स्त्रियो, **रजः** क्रोधः तद्रूपा सूना, सुवर्णं, **वैर**रूपं **च**काराद् उभयविधं गृहीतं तत् पञ्चमं, सुवर्णेऽपि वैरं हिंसायां च वैरम् इति —**एतानि**[३] **पञ्च स्थानानि अधर्मप्रभवः** अधर्मोत्पादकः. **औत्तरेयेण** उत्तरायाः पुत्रेण ; अविवेकः सूचितः[४]. तेषु **(कलिः!) न्यवसद्** इति अर्थः. **तन्निदेशकृत्** परीक्षिदाज्ञाकर्ता ॥३८-३९॥

प्रकाशः

**पुनः च** इत्यत्र. **पुनः प्राप्तानाम्** इति स्वातन्त्र्येण प्राप्तानाम् ॥३८॥

लेखः

**पुनश्च** इत्यत्र. **स्तेये** इति, 'द्यूत'पदबोध्ये तस्मिन् इति अर्थः. **सुवर्णस्तेयत्वेन** इति. तथाच विशेषविधानम् इति अर्थः. तेन अस्य उत्कटत्वं सूचितम्. तेन सिद्धम् आहुः **स्वरूपेण** इति. स्तेयत्वाभावेऽपि स्वरूपेणापि तत् स्थानम् इति अर्थः. **स्वतन्त्रतया** इति. ''न अन्यः कश्चन तत्र तिष्ठतु किन्तु अहमेव'' इत्येवं स्वातन्त्र्यम् इति अर्थः. **एषाम्** इति. अत्र **पुनः** इति अर्थान्तरे. तथाच **प्राप्तानां** पञ्चस्थानानां **पुनः न स्वरूपेणैव** कलिस्थानत्वं **किन्तु कार्यतो**ऽपि इति अर्थः. तथाच कलिस्वरूपाधिष्ठितानि इमानि कार्यम् अवश्यं जनयन्त्येव इति भावः. **उभयविधम्** इति, वैरम् इति अर्थः. उभयविधत्वं दर्शयन्ति **सुवर्णेऽपि** इत्यादि ॥३८-३९॥

१. सुवर्णस्तेयत्वेन इत्येव पाठः सर्वमातृकासु तथापि स्वारसिकतया इत्थं भाति इति निवेशितः - सम्पा.

२. यस्मादधर्मचतुर्विध इति ग.  ३. अमूनीति घ.

४. ''मातृनाम्ना तु हीनता'' (सुबो.का. १।४।४) इत्यतः - सम्पा.

**अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ।।**
**विशेषतो धर्मशीलो राजा लोकगुरुः पतिः ।।४०।।**

एवं कलेः स्थानानि निर्दिश्य प्रसङ्गाद् धर्मवर्तिनः उपदिशति **अथ** इति. अनृतादिरूपाणि[१] **एतानि न सेवेत बुभूषुः** उद्भविष्णुः **क्वचित्** प्रमादादपि. ''पाक्षिकोऽपि दोषः परिहरणीयः'' ( ) इति पदार्थाग्रहेण सेवमाने कदाचित् कलिस्थानमपि सेवेत, ततो महान् अनर्थो भवेत्, तस्माद् एतानि पञ्चापि दूरतएव परिहरणीयानि कलिस्थानशङ्कया. यत्र पुनः व्यतिरेकेण निश्चयः तत्र न विधिः न प्रतिषेधः. सम्भावितम् एतद् राज्ञे इति विशेषाकारेण निषेधति **विशेषतः** इति. **धर्मशीलो राजा,** तस्य अधर्मप्रतिपक्षत्वात्. **लोकगुरुः** अन्येभ्यः उपदेशकर्ता, शिष्याणां तदाचारशिक्षणात्. **पतिः** इति परिपालकः, राजधर्माः प्रजाः इति ।।४०।।

---

प्रकाशः

**अथेत्यत्र. पदार्थाऽग्रहेण** इति पदार्थस्वरूपस्य अविचारेण, आपाततः पदार्थप्रतीत्या[२] इति अर्थः. **यत्र** इति स्वस्त्रीसेवनादौ. **न विधिः न प्रतिषेधः** इति. ''लोके व्यवायामिषमद्यसेवा'' (भाग.पुरा. ११।५।११) इति वाक्यात् तदाकाङ्क्षानिवृत्तये नियमः इति अर्थः ।।४०।।

लेखः

**अथैतानि** इत्यत्र. **पदार्थाग्रहेण** इति, विध्युक्त-हिंसाद्याग्रहेण इति अर्थः. **कलिस्थानम्** इति, अवैधहिंसादिरूपम् इति अर्थः. अन्यथा पाक्षिकदोषापत्तिः इति आहुः **ततः** इत्यादि. **यत्र पुनः** इति. अधर्मवर्तिनि यत्र एतत्सिद्धान्ताद् व्यतिरेकनिश्चयपरं तत्र तु विधि-निषेधौ न नियामकौ इति अर्थः. यद् वा ''स्वैरं चरन्ति मुनयः'' (भाग.पुरा. १०।३०।३५) इत्युक्तिप्रकारेण येषां कालानपेक्षा तत् तथा इति अर्थः ।।४०।।

---

१. अनृतानि रूपाणीति ख.	२. कि.पाठानुसारेण. पदार्थाप्रतीत्या इति मुद्रितपाठः - सम्पा.

एवं कलिं प्रस्थाप्य राजा यत् कृतवान् तत् प्रकृतम् आह.

**वृषस्य नष्टांस्त्रीन् पादान् तपः शौचं दयामिति ॥**
**प्रतिसन्दध आश्वास्य महीञ्च समवर्धयत् ॥४१॥**

**वृषस्य** इति, कालेन धर्मस्य ये त्रयः पादाः पूर्वोक्ताः (**नष्टान्!**) गताः तान् अनूद्य पुनः **प्रतिसन्दधे** सम्यक् सन्धानं कृतवान्. चतुर्विधमपि धर्मं प्रवर्तितवान् इति अर्थः. पृथिव्याः सान्त्वनम् आह **आश्वास्य** इति. **समवर्धयत्** सर्वत्र भक्तिमार्गप्रचारेण कृष्यादिना च पाषण्डदूरीकरणेन च, **च**काराद् धर्ममपि, अवर्धयत् ॥४१॥

तस्य [१]शान्तस्यापि कीर्त्यनुभावयोः विद्यमानत्वात् ''वर्तमानसामीप्ये वर्तमानवद् वा'' (पाणि.सूत्र ३।३।१३१) इति न्यायेन श्रद्धातिशयजननार्थं दूरकथाव्यावृत्तये विद्यमानत्वेन निरूपयति.

**स एष एतर्ह्यध्यास्ते ह्यासनं पार्थिवोचितम् ॥**
**पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ॥४२॥**

**स एषः** इति. भगवत्सायुज्यं प्राप्तस्य सर्वत्र भगवतइव स्फुरणाद् **एषः** इति निर्देशः. अतएव **एतर्हि** इदानीमपि **पार्थिवोचितम् आसनम् अध्यास्ते.** जनमेजयः तत्स्थाने[२] तदध्यासने न उपविशति ; **स**एव भगवद्रूपो भूत्वा तत्र आस्ते. **हि** इति सर्वेषां प्रतीतिः. अतएव **पार्थिवोचितं** राज्ञाम् उचितम् इदानीमपि अध्यास्ते इति अर्थः, अन्यथा **पार्थिवोचितम्**

---

प्रकाशः

**स एषः** इत्यत्र. **शान्तस्य** इति अविद्यमानस्य. **भगवतइव स्फुरणाद्** इति, यथा भगवतो व्यापकत्वं तथा सायुज्यं प्राप्तेऽपि व्यापकत्वाविर्भावात् ॥४२॥

लेखः

**स एषः** इत्यत्र. आभासे **वर्तमानसामीप्ये** इत्यादिना उक्ता व्यवस्था लोकप्रतीतिम् अनुरुन्ध्य, व्याख्यास्यमानप्रकारस्तु परतार्था अलौकिकदृष्टिम् अनुसृत्य इति अविरोधः इति ॥४२॥

---

१. तस्याऽज्ञातस्येति ख. २. तत्स्थानैतदध्यासनोपविशतीति ग.

इति व्यर्थं स्यात्. सिंहासनान्तरमपि[१] न अध्यास्ते किन्तु **पितामहेन राज्ञा** युधिष्ठिरेण परित्यागं कृत्वा (**अरण्यं!**) वनं **विविक्षता उपन्यस्तम्** ॥४२॥

ननु किम् एतद् उपचाराद् उच्यते? न इति आह.

**आस्तेऽधुना स राजर्षिः कौरवेन्द्रश्रियोल्लसत् ॥**
**गजाह्वये महाराजश्चक्रवर्ती बृहच्छ्रवाः ॥४३॥**

**आस्ते अधुना** इति, अधुनापि तथैव आस्ते. ननु देहान्तरं प्राप्य? न इति आह **स**[२] **राजर्षिः** सएव[३] राजर्षिरेव. सादृश्यभ्रमं वारयति **कौरवेन्द्रश्रियोल्लसद्** इति, कौरवेन्द्राणां श्रिया राजलक्ष्म्या[४] उल्लसद् यथा भवति तथा. आसनं वा. तत्रापि **गजाह्वये. महाराजः** इति राजश्रिया जुष्टएव[५]. **चक्रं** च[६] **वर्तयति** आज्ञापयति च. तथैव **बृहती** (**श्रवाः!**) कीर्तिः यस्य, बन्दिभिः स्तूयमानः ॥४३॥

एवं भगवत्कृपया भागवतेन च अजरामरो ब्रह्मभूतएव भगवानिव रमते इति उक्त्वा – तद्दिदृक्षानिवृत्तये[७] तस्य अलौकिकमेव रूपम् उक्तं, नतु लौकिकम् इति अभिप्रायेण – उपसंहरति.

**इत्थम्भूतानुभावोऽयम् अभिमन्युसुतो नृपः ॥**
**यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः ॥४४॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे सप्तदशोऽध्यायः ॥

**इत्थम्भूतानुभावो अयम्** इति. मृतोऽपि जीवन् तिष्ठति **इत्थम्भूतानुभावः**. कलिनिग्रहादिः वा. **अभिमन्युसुतः** इति महाशूरत्वम् उक्तम्. तद्राज्यएव भवद्भिः सत्रम् आरब्धम् इति आह **यस्य पालयतः** (**यूयम्!**) इति. अन्यथा भवन्तोऽपि भागवतश्रवणार्थं गच्छेयुः.

---

१. सिंहासनानन्तरमिति घ. २. स राजर्षीरिति नास्ति ख. ३. स राजर्षिरेवेति ख.

४. राज्यलक्ष्म्या इति भा.पाठः - सम्पा. ५. पुष्ट इति ख-ग. ६. चकारो नास्ति क-घ.

७. तद्दिदृक्षयेति क-घ.

(**दीक्षिताः !**) संवत्सरदीक्षायाः कृतत्वात् ''न कश्चिन् म्रियते तावद्'' (भाग.पुरा. १।१६।८) इति वाक्येन न[1] विरोधः, अग्नीषोमीयप्रभृत्येव हिंसायाः विधानात्. **क्षोर्णी पालयतः** सतः. **सत्राय** सहस्रसंवत्सरायैव, अन्यथा अल्पराजनि[2] महत्कर्मारम्भो न घटते. अनेन कलौ महायागनिषेधोऽपि[3] समर्थितो भवति ॥४४॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे सप्तदशो अध्यायः ॥

---

प्रकाशः

**इत्थम्भूतेत्यत्र. संवत्सरेत्यादि.** तथाच दीक्षायां शामित्रस्य अभावेन मृत्योः आह्वानाभावाद् अविरोधः इति अर्थः ॥४४॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे सप्तदशाध्यायविवरणम् ॥

लेखः

**यस्य पालयतः** इत्यत्र. **न विरोधः** इति. तैः हि मृत्युः निरुद्धः इति राज्ञः अन्यथाभावो न घटते ॥४४॥ इति श्रीसप्तदशाध्यायव्याख्या ॥

## ॥ इति सप्तदशोऽध्यायः ॥

---

१. नेति नास्ति ख. २. अतुल्यराजनीति ख. ३. महायोगनिषेधेनापीति क.

# ॥ अथ अष्टादशोऽध्यायः ॥

अथाध्यायद्वयेनास्य वृत्तमुत्तरमीर्यते ॥
शापात् प्रायस्ततो राज्ये शापो वैराग्यबोधकः ॥(१)॥
सङ्क्षेपकथनं पूर्वं श्रोतृप्रीत्यनुसारतः ॥
विस्तारोक्त्यै तयोः श्रद्धा श्लाघा चान्योन्यमीर्यते ॥(२)॥

---

प्रकाशः

अथ अष्टादशाध्यायं विवरिषवः पूर्वोत्तराध्यायसङ्गतिं बोधयितुम् अध्यायद्वयार्थम् आहुः **अथेत्यादि. अथ** अद्भुतवैराग्योपोद्घातत्वेन अलौकिक-सामर्थ्य-बोधनानन्तरम् **अध्यायद्वयेन** वैराग्यदार्ढ्यबोधकं राज्ञः चरित्रम् **ईर्यते.** तत्र प्रकारम् आहुः **शापाद्** इत्यादि. **शापात् प्रायः, ततः** प्रायं द्वारीकृत्य **शापो राज्ये वैराग्यबोधकः**[१]. तर्हि द्वयोः किमिति तत्कथनं? तत्र आहुः **सङ्क्षेपकथनं पूर्वम्** इति. तथाच एतयोः सूतवाक्ये सामान्य-विशेषभावः सङ्गतिः इति अर्थः. किमिति सङ्क्षेपः इत्यतः आहुः **श्रोत्रित्यादि.** सूत-शौनकवाक्यानां तात्पर्यम् आहुः **तयोः** इत्यादि **स्थापयितुम्** इत्यन्तम्. **तयोः** इति वक्तृ-श्रोत्रोः. **तादृशम्** इति, श्रद्धया प्रोत्साहेन च उक्तं

लेखः

अथ पूर्वाध्यायेन सङ्गतिं वदन्तो अध्यायद्वयार्थम् आहुः **अथ** इत्यादि. शापोऽपि राज्ञः माहात्म्यबोधकत्वेन गुणरूपएव इति आशयेन आहुः **शापाद्** इति. यतः **शापात् प्रायो**पवेशो राज्ञा कृत **ततः शापो वैराग्यबोधकः** वैराग्यगुणख्यापको जातः इति अर्थः. एवञ्च शापः पूर्वाध्यायार्थः, वैराग्यबोधनं द्वितीयाध्यायार्थः इति (१).

इदानीं प्रकृताध्यायार्थ-तात्पर्यम् आहुः **सङ्क्षेपकथनम्** इति. राज्ञो वृत्तस्य **सङ्क्षेपेण कथनं पूर्वं,** ततः श्रोतृप्रवृतिं ( / प्रीतिं ! ) ज्ञात्वा विस्तारोक्तिः. तदुक्त्या वक्तृ-श्रोत्रोः भगवदीयचरित्रवर्णने श्रवणे च **श्रद्धा,** श्रद्धाहैतुकी वा **अन्योन्यं श्लाघा च ईर्यते** इति अर्थः (२).

---

१. व्यवहारबोधकः.

तादृशं[१] फलवन्नान्यदिति स्थापयितुं[२] द्विजात्[३] ॥
शापस्तु हरिणा प्रोक्तस्तक्षकाग्नेरलौकिकात्[४] ॥(३)॥
ज्ञानिनो देहनाशाय नान्यथामृतवर्षणात् ॥
यादवेभ्यस्तथोत्कर्षः शापमुग्धेभ्य ईर्यते ॥(४)॥

एवं तस्य राज्यस्थितिम् उक्त्वा उत्तरस्थितिं सङ्क्षेपेण आह.

---

प्रकाशः

श्रुतं च. ननु शापो यथा प्रायद्वारा वैराग्यरूपोत्कर्षबोधकः तथा स्वरूपेण अधर्मस्यापि बोधकः इति कथं तेन उत्कर्षसिद्धिः इत्यतः आहुः **द्विजाद्** इत्यादि. **हरिणा प्रोक्तः** इति, ब्राह्मणस्य मुखरूपत्वात् तथा. **न अन्यथा अमृतवर्षणाद्** इति, शापाभावे श्रीभागवतात्मक-कथामृतवर्षणाद् ज्ञानिदेहनाशो न इति अर्थः. तथाच तत्प्रतिपत्त्यर्थं स इति न उत्कर्षहानिः इति अर्थः. शेषं स्फुटम्. तथा स अधर्मोऽपि "शापो मेऽनुग्रहायैव" (भाग.पुरा. १०।३१।१४) इति न्यायेन फलतः उत्कर्षस्यैव साधकइति न कोऽपि दोषः इति अर्थः (१-४).

लेखः

श्रद्धादिवर्णनेन सूचितम् आहुः **तादृशम्** इत्यादि. शापतात्पर्यम् आहुः **द्विजाद्** इत्यादि. **ज्ञानिनो** ब्रह्मसाक्षात्कारवतो राज्ञो भौतिकाग्निसम्बन्धस्य अयुक्तत्वाद् **अलौकिकात् तक्षकाग्नेरेव देहनाशाय** द्विजं द्वारीकृत्य **हरिणैव शापः प्रोक्तो** दत्तः इति अर्थः. **नाऽन्यथा** इति, उक्तालौकिकप्रकाराभावे देहनाशो न स्याद् इति अर्थः. तात्पर्यान्तरम् आहुः **अमृतवर्षणाद्** इत्यादि. यादवास्तु शापेन मुग्धाः भगवन्तं प्रतिपक्षित्वेन मन्यमानाः नाशं प्राप्ताः, अयन्तु प्रपञ्चे श्रीमद्भागवतामृतवर्षणात् प्रत्युत अत्युत्कृष्टम् अधिकारं प्राप्तवान् इति तथा इति भावः. तथाच एवमादिगुणसिद्ध्यर्थं शापो भगवतैव दत्तः इति तत्त्वम् (४).

---

१. तादृशे इति क.   २. संस्थापयितुमिति ग-घ.   ३. द्विजानिति ख-ग.   ४. ताक्षिकाग्नेरिति ग.

॥ सूतः उवाच ॥

**यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥**
**अनुग्रहाद् भगवतः कृष्णस्याद्भुतकर्मणः ॥१॥**

**यो वै द्रौण्यस्त्रे**ति. येन भगवता पूर्वं संरक्षितः तेनैव इदानीम् उपसंहृतः इति बोधयति. **अद्भुतकर्मणः** इति, **विप्लुष्टो**[1] **न मृतः**, अमृतं पीत्वा मृतः इति! **भगवतः कृष्णस्य** इति प्रकटाप्रकट-ब्रह्मनामनी[2], **मातुः उदरे न मृतो** गङ्गायान्तु मृतः इति ॥१॥

इदानीं[3] मरणे विशेषम् आह.

**ब्रह्मकोपोत्थिताद् यस्तु तक्षकात् प्राणविप्लवात् ॥**
**न सम्मुमोहोरुभयाद् भगवत्यर्पिताशयः ॥२॥**

**ब्रह्मकोपोत्थिताद्** इति. **तक्षको**ऽपि अदग्ध्वा स्थातुम् अशक्तः ; ब्रह्मास्त्रम् अत्र आगत्य सफलं जातम् इति **ब्रह्म**शब्दप्रयोगः. **प्राणानां विप्लवो** यस्माद् इति, निरुद्धानाम् अग्नौ प्रवेशाद् महान् उपद्रवः. सर्वत्र प्राणाः न अग्निं स्पृशन्ति. अत्र स्पर्शाद् वा विप्लवः[4]. अतएव **उरुभयात्**. सम्मोहाभावे हेतुः **भगवति अर्पिताशयः** इति. आशयस्य तक्षकाऽग्रहणार्थं भगवति समर्पणम् ॥२॥

---

प्रकाशः

**यो वा** इत्यत्र. **प्रकटाप्रकटनामनी** इति. प्रकटस्य कालरूपस्य अप्रकटस्य सदानन्दरूपस्य नामनी इति अर्थः ॥१॥

**ब्रह्मकोपे**त्यत्र. **कोपपद**तात्पर्यम् आहुः **तक्षकः** इत्यादि ॥२॥

लेखः

**यो वै** इत्यत्र. **प्रकटाप्रकट** इति. "कदाचिद् जगदुद्धारार्थम् अखण्डः प्रादुर्भूतः 'कृष्ण'शब्दवाच्यः" (त.दी.नि. १।१ प्रका.) इति राद्धान्तात् कृष्णः इति अवतारदशापन्नं, "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" (त.दी.नि. १।६) इत्युक्तिदिशा भगवान् इति अनवतारदशापन्नं नाम इति अर्थः ॥१॥

---

१. प्लुष्ट इति ख-ग. २. नाम्नीति घ-ङ. ३. इदानीमिति नास्ति ग. ४. विलम्ब इति ख.

तस्य देहत्यागप्रकारम् आह.

**उत्सृज्य सर्वतः सङ्गं विज्ञाताजितसंस्थितिः ॥**
**वैयासकेर्जहौ शिष्यो गङ्गायां स्वं कलेवरम् ॥३॥**

**उत्सृज्य** इति. प्रथमतः (**सर्वतः सङ्गम् उत्सृज्य**!) परित्यागः, ततो (**वैयासकेः शिष्यः**!) गुरुकृपा, तस्य सत्सम्प्रदायाद्[१] (**विज्ञाताजित-संस्थितिः**!) भगवत्स्वरूपविज्ञानं, ततो **गङ्गायां** (**स्वं कलेवरं जहौ**!) देहत्यागः इति. **विशेषेण ज्ञाता अजितस्य संस्थितिः** येन. **सम्यक् स्थितिः** व्यवस्था ॥३॥

**नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् ॥**
**स्यात् सम्भ्रमोऽन्तकालेऽपि भजतां तत्पदाम्बुजम् ॥४॥**

कथं महाभये **न सम्भ्रमः** (**स्याद्**!) इति आकाङ्क्षायाम् आह **न उत्तमश्लोकेति. उत्तमश्लोकस्यैव वार्ता** येषां, लौकिक्यपि वार्ता येषां भगवत्सम्बन्धिनी. सर्वदा **तत्कथामृतं जुषताम्** उपनिबद्धां सद्भिः कथ्यमानाम्. किञ्च (**तत्पदाम्बुजं भजतां**!) भगवत्पदाम्बुजं[२] सेवमानानाम्. भ्रमस्तु सन्निपातकार्यं ; दोषाः गुणाश्च एकीभूताः यदा एकत्वं सम्पद्यन्ते[३].

---

प्रकाशः

**न उत्तमे**त्यत्र. अत्र अन्तकाले भ्रमाभावबोधनात् कारणसद्भावे च भ्रमाभीक्ष्ण्यदर्शनाद् अत्र कथं तदभावः इति आशङ्कायां भगवच्छास्त्रानुसारेण तत्कारणम्, अन्यत्र तत्सत्त्वम् अत्र तदभावं च, साधयन्ति **भ्रमस्तु** इत्यादि. सन्निपातः कः कीदृशश्च इत्यतः आहुः **दोषाः** इत्यादि. **दोषाः** रजस्तमसो वृत्तयः, **गुणाः** सत्त्वस्य वृत्तयः "शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः, तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः, काम ईहा मदस्तृष्णा

लेखः

**नोत्तमश्लोक** इत्यत्र आभासे **महाभये न** इति. **न** इति भिन्नं पदम्. व्याख्याने **उपनिबद्धाम्** इति. शास्त्रादौ **उपनिबद्धां सद्भिः** च शास्त्रज्ञैः **कथ्यमानां** भगवत्कथां **जुषताम्** इति अर्थः.

---

१. तत्सम्प्रदायादिति घ. २. तत्पदाम्बुजमिति ग. ३. सम्पद्यत इति ग.

"सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः" (भाग.पुरा. ११।२५।६). व्यवहारः च सन्निपातः, तेन यावज्जीवं सन्निपातव्यवहारः अन्तेऽपि तत्कार्यं प्राप्नुवन्ति. देहेन्द्रियान्तःकरणैः भगवदीयकार्यकरणे[१] पूर्वसन्निपातो निवर्तते[२]. तत्र लौकिकी वार्ता तामसी, आवश्यकी राजसी, भजनं सात्त्विकम्. विपरीतं वा. आद्यं मानसं, "यद्धि मनसा ध्यायति" (तैत्ति.संहि. ६।१।७।४)

---

प्रकाशः

स्तम्भ आशीर्भिदासुखम्, मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यमः, क्रोधो लोभोऽनृतं हिंसा याच्ञा दम्भः क्लमः कलिः, शोकमोहौ विषादार्ती निद्राशाभीरनुद्यमः" (भाग.पुरा. ११।२५।२-४) इत्यत्र उक्ताः. ते **एकीभूताः** यथासम्भवम् उद्भूतानुद्भूतरूपेण संहताः **एकत्वं** पिण्डीभावेन एकत्वसङ्ख्यायोगं यदा प्राप्नुवन्ति, स तेषां पिण्डीभावः सन्निपातः. यथा वैद्यके पूर्वं त्रिदोषः ततः सन्निपातः तथा इति अर्थः. सच "सन्निपातस्त्वहम्" इति भगवद्वाक्याद् "व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिः" (तत्रैव) इति भगवद्वाक्याच्च अहं-ममाभिमानरूपो, मनोमात्रेन्द्रियप्राण-स्वाभाविक-व्यापारात्मक-व्यवहाररूपः च इति द्विप्रकारकः इति अर्थः. एवं भ्रमकारणम् उक्त्वा तस्य सार्वदिकत्वं भ्रमाभीक्ष्ण्याय बोधयन्ति **तेन** इत्यादि. **तेन** अहं-ममाभिमानेन **यावज्जीवं** मनोमात्रेन्द्रिय-प्राणानाम् आत्मसन्निधानपर्यन्तं **सन्निपातात्मकः व्यवहारः**, अतो **अन्तेऽपि** देहादीनाम् आत्मसन्निधानात् तैः **तत्कार्यं** सन्निपातकार्यं भ्रमं **प्राप्नुवन्ति.** अतः तेषां भ्रमस्य आभीक्ष्ण्यम्. तर्हि तस्य सर्वत्र तौल्याद् भगवदीयेषु कुतो न भ्रमोत्पत्तिः? तत्र आहुः **भगवदीये**त्यादि. तथाच पूर्वसन्निपातनिवृत्त्या तदनुत्पत्तिः इति अर्थः. निवृत्तिरेव कथम् इत्यतः तत्कारणम् आहुः **तत्र** इत्यादि. **तामसी** इति, स्वभावतः क्रियमाणत्वात् तथा. **विपरीतम्** इति. तेषां सात्त्विकस्वभावेन भगवत्सम्बन्धितयैव क्रियमाणत्वात् लौकिकी वार्ता सात्त्विकी, आग्रहदार्ढ्येन क्रियमाणत्वाद् भजनं सेवारूपं तामसं, कथाजोषणं तु राजसमेव. **आद्यम्** इति वार्ताकरणम्. तत्र उपपत्तिः

---

१. भगवदीयकार्य्यकारणैरिति क. भगवदीयकार्य्यकरणैरिति ख. २. वर्त्तत इति ग.

इति श्रुतेः. अतो निरन्तरं कायेन्द्रियान्तःकरणैः[१] सबीजे दोषे निराकृते त्रयाणां स्वभावपरावृत्तौ – स्पर्शमणिस्पर्शेन लोहादेरिव – सर्वस्य असंश्लिष्ट-भगवत्स्वरूपाभिनिवेशाद् न भ्रमजनकत्वम् इति अर्थः. यद्यपि अन्तकाले देहेन्द्रियान्तःकरणानां वैक्लव्यं सम्भवति तथापि तेषां कालस्य न अन्तकत्वम्[२] अन्तकसम्बन्धित्वं वा, अमृतपानेन नित्यत्वाद् इति भावः ॥४॥

ननु कथं कालनियामकत्वं[३] तेषाम्? तत्र आह

**तावत्कलिर्न प्रभवेत् प्रविष्टोऽपीह सर्वतः ॥**
**यावदीशो महान् उर्व्यामाभिमन्यव एकराट् ॥५॥**

**तावत्कलिः** इति. तस्य राज्येऽपि कालसम्बन्धो नास्ति तत्र कथं

---

प्रकाशः

**यद्धीत्यादि.** "यद्धि मनसा ध्यायति तद्वाचा वदति" इति श्रुतौ वाचां मनःपूर्वकत्व-प्रतिपादनाद् इति. अतः सत्त्वादिगुणकार्येष्वपि देहादिषु एवं भगवत्सम्बन्धाद् **निरन्तरे**त्याद्युक्तप्रकारेण अज्ञानसहिते सन्निपाते निराकृते तथा इति अर्थः. ननु एवम् अन्यदा अस्तु, अन्तसमये तु कालेन स्वभावव्यत्यासाद् भ्रमः स्यादेव इति चेत्, तत्र आहुः **यद्यपि** इत्यादि. **नित्यत्वाद्** इति, देहादीनां कालानधीनत्वात्. तथाच अतो महाभयेऽपि न भ्रमः इति अर्थः ॥४॥

**तावद्** इत्यत्र. ननु यदि राज्ञा कलिः निराकृतः तदा तदनधिष्ठितस्य कालस्य कलौ अप्रवेशाद् गणनायाम् आधिक्यं स्याद् इति तन्निरासाय आहुः **आधिदैविके**त्यादि. निराकृतस्तु आधिदैविकः, तेन तस्य प्रभुत्वाभावः ;

लेखः

**असंश्लिष्ट** इति. असङ्गश्रुत्या[४] भगवतो असंश्लिष्टरूपतया अभिनिवेशाद् गुणानामपि असंश्लिष्टस्वभावत्वेन **भ्रमजनकत्वम् न** इति अर्थः ॥४॥

---

१. कार्य्येन्द्रियान्तःकरणैरिति ख-ग-घ. २. नान्तत्वमिति ख. ३. कालनियमकत्वमिति ख-ग. ४. "असङ्गो ह्ययं पुरुषः" (बृहदा.उप. ४।३।१५-१६) इति श्रुत्या - सम्पा.

तदायुषि सम्बन्धः! आधिदैविकत्वाद् अस्य कलेः[१]. ननु गुणानां गुण्यपेक्षया हीनत्वाद् भगवत्कृतं कालं कथम् अयं निराकृतवान् इत्यतः[२] आह **प्रविष्टोऽपि (न प्रभवेद्!)** इति. मणिना यथा अग्निस्तम्भः तथा राजनि विद्यमाने कलेः प्रतिष्टम्भः. भगवदीयत्वाविशेषेऽपि कार्यापेक्षया गुणानाम् उत्कृष्टत्वात् प्रतिष्टम्भएव राज्ञा कृतः, नतु स्वदेशाद् दूरीकरणम्. तद् आह **इह सर्वतः प्रविष्टोऽपि** इति. अनेन कालस्य देशपरिच्छेदो निवारितः. ननु [३]प्रतिष्टम्भोऽपि भगवत्कृते कथं शक्यः ? तत्र आह **ईशः** इति. भगवत्प्रवेशाद् ऐश्वर्यदानाद् वा ईशत्वम्. स हि कर्तुम् अकर्तुम् अन्यथाकर्तुं समर्थः. किञ्च भगवता कालोऽपि अधिकृतो, राजा च ; तयोः पुनः राजा **महान्** कृतः. अतः प्रतिबन्धो युक्तएव. किञ्च अयं (**आभिमन्यवः!**) भागिनेयपुत्रो व्यवहारे मान्यः, स तु वाहनरूपः. अतोऽपि अस्य महत्त्वम्. किञ्च कलिः खण्डशः प्रवर्तते देशविषये, अन्येषु अष्टवर्षेषु[४] ''त्रेतायुगसमः

प्रकाशः

आध्यात्मिकस्तु वर्ततएव इति न गणनाधिक्यम् इति अर्थः. **गुणानां गुण्यपेक्षया** इति. **गुणानां** राजनिष्ठानां **गुण्यपेक्षया** भगवदपेक्षया. **गुणानाम्** इति, ''कलिं सभाजयन्त्यार्या'' (भाग.पुरा. ११।५।३६) इत्यादिवाक्योक्तानां कलिगुणानां राजगुणानां च ॥५॥

लेखः

**तावद्** इत्यत्र. **आधिदैविकत्वाद्** इति. ... . **ननु गुणानाम्** इति. राज्ञः उत्कर्षे भगवद्गुणानामेव प्रयोजकत्वाद् इति अर्थः. **गुण्यपेक्षया** इति. भगवता गुणिना आहितसामर्थ्यत्वात् कालस्य प्राबल्यम् इति अभिमानः. **भगवदीयत्वाऽविशेषे** इति. कालस्य राज्ञः च तत्त्वाविशेषेऽपि इति अर्थः. **कार्यापेक्षया** इति. तथाच कार्यतएव निराकृतो, न स्वरूपतः इति तथा इति भावः. तदेतद् आहुः **प्रतिष्टम्भएव** इति. **वाहनरूपः** इति, गरुडरूपेण तथा इति अर्थः ॥५॥

१. कालेरिति ख. कालस्येति घ. काल इति ङ. २. इत्याहेति ख-ग.

३. ननु प्रविष्टोऽपि वशीकर्तुं कथं शक्य इति घ. ४. अष्टवर्गेष्विति ग.

कालो वर्तते'' (भाग.पुरा. ५।१७।१२) इति वचनाद्, अयञ्च **एकराट्**. अतः खण्डमण्डलाधिपतिः महाखण्डमण्डलेश्वरात्[1] प्रतिबद्धो भवत्येव ॥५॥

ननु कालएव कलिः न प्रवृत्तः इति कुतो न अङ्गीक्रियते? ''तस्यर्ते यः क्षणो नीतः'' (भाग.पुरा. २।३।१७) इति वाक्यानुरोधात्. सूर्यगत्या गणनायां कालपरिच्छेदे कृतादिव्यवहारः. अतः प्रासङ्गिकोत्कर्षन्यायेन तदायुषा भगवता च कालएव उत्कृष्टः कस्मात् न उच्यते इति आशङ्क्य आह.

**यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम् ॥**
**तदैवेहानुवृत्तोऽयम् अधर्मप्रभवः कलिः ॥६॥**

**यस्मिन् अहनि** इति. सत्यम्, एताभ्याम् उत्कर्षः कर्तुं शक्यते, परं न सम्पन्नः. तत्र द्वापरान्ते भगवान् अवतीर्णः, कलिः च न प्रविष्टः. तथाच भगवता सूर्यगतिः उत्कृष्टैव. अथ प्रचलिते भगवति उत्कर्षकाभावात्

---

प्रकाशः

**यस्मिन्** इत्यत्र. **इति वाक्यानुरोधाद्** इति. अस्मिन् वाक्ये उत्तमश्लोकवार्ताविच्छिन्नस्य कालस्य हरणाभावकथनेन सूर्यपरिस्पन्दाऽनवच्छिन्नत्व-बोधनानुरोधाद् अत्रापि उत्तमश्लोकवार्ताविच्छिन्नस्य कालस्य सूर्यपरिस्पन्दानवच्छिन्नतायाः शक्यवचनत्वाद् इति अर्थः. सूर्यपरिस्पन्दानवच्छिन्नत्वे कथं कलिप्रवृत्त्यभावसिद्धिः इत्यतः आहुः **सूर्येत्यादि**. तथाच तदभावे तदभावात् प्रवृत्त्यभावसिद्धिः अतः तथा इति अर्थः. **उत्कर्षः** उद्धरणम्. **तदायुषा** इति भगवद्वार्ताविच्छिन्नेन राजायुषा. ननु विद्यमाने सामर्थ्ये कुतो न सम्पन्नः इति आकाङ्क्षायां पूर्वं सामर्थ्यगमकम् आहुः **तत्र** इत्यादि. **उत्कृष्टैव** इति. सूर्यपरिस्पन्दावच्छेदे तत्कृतगुण-दोषयोः यथायथम् आवश्यकत्वेऽपि ''भूः कालभर्जितभगापि यदङ्घ्रिपद्म-स्पर्शोत्थशक्तिरभिवर्षति नोऽखिलार्थान्'' (भाग.पुरा. १०।७९।३०) इति वाक्ये दोषनिवृत्तिकथनेन द्वापरनिवृत्तिबोधनाद् उत्कृष्टैव. तथाच सामर्थ्यम् अस्त्येव इति अर्थः. तदसम्पत्तौ

---

१. महाखण्डलेश्वरादिति क-ख-ग.

परीक्षितः च अनधिकारात् कलिः प्रविष्टः. अतः परं प्रविष्टस्य च्छेदने[१] मर्यादैव भज्येत! देशात् च निराकरणे पश्चाद् आगत्य पुनः तावन्तं कालम् अनुभवेत्, ततः च कल्क्यवतारकालो बाध्येत! अतो भगवता सह अस्य [२]समानबलत्वाभावात् न उत्कर्षः इति अभिप्रायेण आह. **यस्मिन्** (**अहनि!**) दिवसे (**यर्हि!**) यस्मिन् क्षणे **भगवान्** (**गाम् उत्ससर्ज!**) त्यक्तवान् **तदैव अयं कलिः अनुवृत्तः** तदपेक्षया स्थितएव भगवति प्रचलिते स्वयम् उपविष्टः. (**अधर्मप्रभवः!**) तस्मिन् उपविष्टएव सर्वे अधर्माः प्रवृत्ताः ॥६॥

ननु तथापि दुष्टत्वाद् मारणमेव उचितं – निराकरणं वा, भगवान् च प्रार्थनीयः, सर्वेषां च उपकारः सिद्ध्यति – इति आशङ्क्य आह

**नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ॥**
**कुशलान्याशु सिद्ध्यन्ति नेतराणि कृतानि यत् ॥७॥**

**न अनुद्वेष्टि** इति. यद्यपि राजा सर्वं कर्तुं समर्थः तथापि **कलिं न अनुद्वेष्टि** यद्यपि धर्मो द्वेष्टि [३]स्वयन्तु तमनु न द्वेष्टि. तत्र हेतुः **सम्राड्** इति, खण्डमण्डलाधिपतीनाम् अन्योन्यद्वेषेऽपि तदनुरोधेन सम्राट् न द्वेष्टि. ननु अधर्मप्रभवत्वाद् युक्तो द्वेषः! तत्र आह **सारभुग्** इति. व्रीहिषु तुषाः सन्तीति ते न निराक्रियन्ते अपितु तुषविमोकेन ते भुज्यन्ते. तथा अयमपि राजा सारमेव भुङ्क्ते. सारत्वं च तदैव यदा असारत्वेन[४] वेष्टितो भवति. अतः केनापि अंशेन न द्वेष्टि. ननु विष-मधुसम्पृक्तान्नत्यागवद्

---

प्रकाशः

उपपत्तिम् आहुः **अथेत्यादि. अस्य स्वसमानबलत्वाभावाद्** इति. पूर्वोक्तायुर्विशिष्टस्य राज्ञो मर्यादाभङ्गाभावपूर्वक-कल्क्यवतारकाल-बाधाभावपूर्वक-गत्युत्कर्षणा-ऽसामर्थ्येन तथात्वाद् इति अर्थः. **तदपेक्षया** इति भगवत्प्रचलनप्रतीक्षया ॥६॥

---

१. छेदेनेति ख. २. स्वसमानेति पाठः प्रकाशे - सम्पा.

३. न स्वयं तु तमनु द्वेष्टीति घ. ४. असाररूपेण इति अर्थः - सम्पा.

गुण-दोषयोः तुल्यत्वाद् दोषस्य च अधिकत्वात् कुतो न त्यागः? तत्र आह **सारङ्गइव** इति. सारं गायति इति **सारङ्गो** भ्रमरः. स हि मधुना मत्तो गायति. तत्र केतक्यादिषु बहिःकण्टक-वेष्टितेषु मकरन्दप्राचुर्यात् तत्र रमते, तदेकजीवनत्वात्. तथाच राजापि "कलौ खलु भविष्यन्ति नारायणपरायणाः" (भाग.पुरा. ११।५।३८) इति भगवद्गुणानां भक्तानां च अत्र सुलभत्वात् स्वस्य तदेकजीवनत्वात् च भक्तिसिद्ध्यर्थं न द्वेष्टि इति अर्थः. अधर्मांशनिराकरणन्तु प्रतिबन्धेनापि सेत्स्यति इति भावः. किञ्च कृतस्य अस्य च (यत्!) तुल्यता[१] तस्मादपि न द्वेष्टि इति आह **कुशलानि** इति. "कृते तात्कालिकः[२] शापः त्रेतायां दशभिः दिनैः, मासेन द्वापरे ज्ञेयः कलौ संवत्सरेण तु" (पराशरस्मृ. १।२७). तद्वैपरीत्येन च धर्मसिद्धिः, तद् आह **कुशलानि** पुण्याणि (**आशु सिद्ध्यन्ति!**), **(न!) इतराणि** पापानि. **कृतानि** इति, प्रायेण कलौ संसर्गजानि न भवन्ति इति ज्ञापितम्. **यद्** यस्मात् **कृतान्येव इतराणि** भवन्ति अतो

---

लेखः

**नाऽनुद्वेष्टि** इत्यत्र. **यदाऽसारत्वेन** इति. असारत्वेन वेष्टितोऽपि यदि रसिकाः तं न त्यजन्ति तदैव तस्य सारत्वं ज्ञापितं भवति इति अर्थः. यद्वा अनुयोगिज्ञाने प्रतियोगिज्ञानस्य कारणत्वाद् असारैः यदा वेष्टितो भवति तदैव सारत्वं ज्ञाप्यते इति अर्थः. **तुल्यत्वाद्** इति आपाततः तुल्यत्वात्. तथाच यथा अन्नांशेन क्षुन्निवर्तकत्वं गुणो, विषांशेन च मरणजनकत्वं दोषः, तथा कलावपि अंशतो गुण-दोषसाम्यस्य आपाततः भावेऽपि दोषस्य उत्कटत्वात् **कुतो न त्यागः** इति अर्थः. **प्रतिबन्धेनापि** इति. ... . **तुल्यता** इति, वैपरीत्या तुल्यता इति अर्थः. कृते पापं तत्क्षणिकं, कलौ भजनादिधर्मः तत्क्षणिकः. तथा तत्र धर्मः चिरकालेन सिद्ध्यति, अत्र तु अधर्मः तथैव इति भावः. **संसर्गजानि** इति. अतएव "कलौ कर्तैव लिप्यते" (स्कन्दपुरा. २।४।३०।७) इत्यादिस्मृतयः. **कृतान्येव**

---

१. न तुल्यतेति स्यात्. २. तत्क्षणिक इति क-ख. कृते तात्क्षणिकः पापः त्रेतायां द्वादशेऽहनि द्वापरे मासमात्रेण कलौ संवत्सरेण तद् इति मुद्रितपाठः. स्मृतिपाठः गृहीतः -सम्पा.

लोकोपकारार्थमपि न द्वेषः ॥७॥

किञ्च न अयं कलिः देशे प्रवर्तते[१] किन्तु पुरुषेषु, तत्रापि बालेषु, तत्रापि प्रमत्तेषु. अतः शिक्षकत्वेन तस्य स्थितत्वाद् उपेक्षैव तत्र, न द्वेषः इति आह.

**किं तु बालेषु शूरेण कलिना धीरभीरुणा ॥**
**अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥८॥**

**किन्तु** इति. तुशब्देन[२] पूर्वपक्षो[३] देशस्थितिरूपो निवारितः. **बालेषु** धर्मार्थं प्रवृत्तेषु शीघ्रमेव फलसिद्धौ प्रपञ्चविलयः स्याद्, धर्मेण अन्तःकरणशुद्धौ ज्ञानोदयेन सर्वत्यागप्रसङ्गात्. अतएव तद्धर्मप्रतिबन्धार्थं **शूरेण (कलिना!).** ये तु मोक्षाधिकारिणो **धीराः** तेभ्यः तु (**भीरुणा!**) बिभेति. किञ्च वैराग्यहेतुः च अयं, यतः **प्रमत्तेषु**[४] **अप्रमत्तः**, आयुःक्षयकरत्वात्. अतएव कलौ अल्पायुषो भवन्ति. ननु कथमेवम् अस्य स्वभावः? तत्र आह **यो वृकः** इति. अयं तु वृकरूपः. स रात्रौ शयानान् अरक्षितान् बालानेव गृह्णाति, न व्याघ्रवत् सर्वभक्षकः. अतएव न[५] तद्वधार्थं महतां प्रवृत्तिः. एकवचनेन असहायता सूचिता. तत्रापि विशेषः **नृषु वर्तते,** न नरोत्तमेषु, अन्येषु वा ऋषिषु. अतः उपेक्षणीयः इति अर्थः ॥८॥

एवं प्रसङ्गात् कलिस्वरूपं निरूप्य तत्कथाम् उपसंहरति.

**उपवर्णितमेतद् वः पुण्यं पारीक्षितं मया ॥**
**वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥९॥**

**उपवर्णितम्** इति. एवं खण्डशो निरूपितस्य[६] प्रकृतोपयोगित्वाभावात् **पुण्यम्** इति आह ; यथा गङ्गास्नानादिकं धर्मः तथा **एतदुपाख्यानमपि.**

---

लेखः

इति **एवकारेण** संसर्गजव्यावृत्तिः ॥७॥

**उपवर्णितम्** इत्यत्र. **खण्डशः** इति. तथानिरूपणे साकल्येन भगवन्माहात्म्यानवगमात् तथा इति अर्थः. **पुण्यम्** इति. तथाच तावदेव श्रुतं फलायैव इति अर्थः. **सोऽहं वः श्रावयिष्यामि** इति. ... ॥९॥

---

१. वर्त्तत इति ख-घ. २. तुशब्दे इति ख-ग-ङ. ३. पूर्वपक्षोद्देशस्थितिरूप इति क-घ.
४. प्रमत्तेष्वयमप्रमत्त इति ख-ग. ५. नेति नास्ति ख. ६. निरूप्य तस्येति ख.

(**पारीक्षितं!**) परीक्षितः सम्बन्धि. कथने हेतुः **वासुदेवकथोपेतम्** इति. किञ्च **यदाख्यानम्**[१] **अपृच्छत** "तत् कथ्यताम्" (भाग.पुरा. १।१६।६) इति वाक्येन पृष्टत्वाद् (**मया वः!**) उत्तरं दत्तम्. अन्यथा केवलैव भगवत्कथा कथिता स्यात्, "सोऽहं वः श्रावयिष्यामि" (भाग.पुरा. १।३।४५) इति प्रतिज्ञानात्. कथासङ्क्षेपः च ॥९॥

ननु यदि अयुक्तः प्रश्नः – साक्षाद्भगवत्कथायाः अनिरूपकत्वात् – तदा वयं तदैव कथं न निवारिताः ; किं प्रासङ्गिकेन? इति तत्र आह.

**या याः कथा भगवतः कथनीयोरुकर्मणः ॥**
**गुणकर्माश्रयाः पुम्भिः संसेव्यास्ता बुभूषुभिः ॥१०॥**

**याः याः कथाः** इति. न अत्यन्तं कथा अनुपयोगिनी, भगवत्कथायाः आधारत्वात्[२]. उत्तमाश्रयत्वमेव अधिकारित्वम्. अतो **याः** काश्चन **कथा भगवतो गुणकर्माश्रयाः** गुणान् कर्माणि च आश्रित्य प्रवृत्ताः **ताः** (**संसेव्याः!**) श्रोतव्याः. तत्र हेतुः **कथनीयोरुकर्मणः** इति, **कथनीयानि उरु** अधिकानि **कर्माणि** यस्य. भगवत्कथायाः आधिक्यं निरूपककथायाः[३] सद्भावे भवति. तदैव भक्तिजनकत्वम्, अन्यथा सहस्रनामपाठवद् धर्मोपयोगित्वं स्यात्. **कथनीयानि उरु** यथा भवन्ति[४] तथा **कर्माणि** यस्य ; केवलनिर्देशेन भगवत्कर्माणि न कथनीयानि किन्तु साधाराणि[५] सप्रतिष्ठानि[६] कथनीयानि

---

प्रकाशः

**याः याः** इत्यत्र. **केवलनिर्देशेन** इति. निर्देशो लौकिकबुद्धि-विषयीकरणम्. **साधारणानि** इति लौकिकतौल्येन प्रतीयमानानि. **सप्रतिष्ठानि** इति, तादृशान्यपि तत्प्रतिष्ठापूर्वकं कथनीयानि इति अर्थः ॥१०॥

---

१. यदात्मानमिति ख-ग-घ. २. आरब्धत्वादिति ख.

३. निरूपककथायां सद्भावः इति क. ४. भवतीति ग-घ.

५. भा.पाठानुरोधात्. साधारणानि इति मुद्रितपाठे प्रकाशे च - सम्पा. ६. सम्प्रतिष्ठानीति ख.

इति अर्थः. **पुम्भिः** इति स्वतन्त्रैः, तत्रापि **बुभूषुभिः** भवितुम् इच्छुभिः = उद्भविष्णुभिः, घृतसहितस्य अन्नस्यैव पोषकत्ववत्[१] ॥१०॥

एवं निवृत्तं सूतं प्रतिबुध्य सर्वे ऋषयो अभिप्रेतार्थज्ञानार्थं तं प्रोत्साहयन्ति.

**॥ ऋषयः ऊचुः ॥**

**सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ॥**
**यत्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥११॥**

**सूत जीव** इति. ब्राह्मणानां सन्तोषदाने आशिषएव द्रव्यम्! तद् आह हे **सूत, शाश्वतीः समाः** त्वं **जीव!** ननु भवतां क्व उपयोगः? तत्र आहुः हे **सौम्य** हे बुध. उत्पत्तिशिष्टं तस्य ज्ञानं चातुर्यं च, अतो बहुकालं त्वज्जीवने अस्माकं महत्कार्यम् इति भावः. **समाः** संवत्सरान्[२] **शाश्वतीः** नित्याः ; ते हि ब्रह्मणो भवन्ति, अन्येषां वा नित्यानां पदार्थानाम्. अनेन ''अपरिमितं कालं जीव'' इति उक्तं भवति. एवम् आशीर्वादे हेतुम् आहुः (**यद्!**) यस्मात् कारणाद् **विशदं कृष्णस्य यशः शंससि.** प्रउगादिशंसनवत्[३] न इदं कर्ममात्रोपयोगि किन्तु (**मर्त्यानां नः!**) अस्माकम् **अमृतं** तत् मरणनिवर्तकं सुखकरं परमानन्दरूपं च. तदर्थं हेतून् आह **विशदं यशः कृष्णस्य** इति. **विशदं** निर्मलम्. विशं[४] द्यति इति वा,

---

प्रकाशः

**सूत जीवेत्यत्र. प्रउगादिशंसनवद्** इति. प्रउगं शस्त्रविशेषः, ''प्रउगं शंसति'' (द्रष्ट. शाबरभा. २।१।१३) इति श्रुतेः. शस्त्रं च अत्र प्रगीतमन्त्रसाध्या स्तुतिः ज्ञेया. **विशं[५] द्यति** इति पचाद्यच्, भावप्रधानो निर्देशः. तथा

लेखः

**सूत जीव** इत्यत्र. **प्रउगादि** इति. ब्राह्मणपठित-शस्त्रविशेषस्य सञ्ज्ञा इयम् ॥११॥

---

१. क-खपाठानुसारेण. पोषकत्वाद् इति मुद्रितपाठः - सम्पा. २. संवत्सरा इति क-ग-घ.

३. प्रागादीति ख-लेखे. प्रौगादीति ग. प्रोगादीति घ - सम्पा. ४. विषम् इति मुद्रितपाठः मूल-सुबोधिनी-प्रकाशानुरोधात् संशोधितः - सम्पा. ५. विषम् इति मुद्रितपाठस्तु अशुद्धः - सम्पा.

संसारप्रवेशं दूरीकरोति इति. अनेन मरणं निवर्तितम्. **यशः** च सर्वेषां सुखजनकम्. **कृष्णः** च परमानन्दः, सदानन्दवाचकत्वात्.

कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥
सदानन्दश्च भगवान् कृष्ण इत्यभिधीयते ॥(५)॥

अनेन परमानन्दत्वम् ॥११॥

परीक्षित्कथाप्रश्नमात्रेण यदा अयम् उदासीनः तदा कर्मप्रवृत्तिम् अस्मदीयां दृष्ट्वा न वक्ष्यत्येव इति आशङ्क्य आहुः.

**कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ॥**
**आपाययति गोविन्दपादपद्मासवं मधु ॥१२॥**

**कर्मणि अस्मिन्** इति. **अस्मिन्** यज्ञाख्ये **कर्मणि (अनाश्वासे!)** फलनिश्चयाभावात् तदाश्वासो नास्ति, "को हि तद्वेद यद्यमुष्मिंल्लोके अस्ति वा न वा इति दिक्ष्वतीकाशान् करोति" (तैत्ति.संहि. ६।१।१।१) इति श्रुतेः. यथा तत्र असन्देहे सन्देहवचनम् एवम् अत्रापि इति अर्थः. अतएव **धूमधूम्रात्मनां** धूमेन धूम्रः आत्मा देहो येषाम्. यज्ञकृतो दोषः स्फुटः, गुणस्तु सन्दिग्धः. एतादृशे महति कष्टे

---

प्रकाशः

सति प्रवेशकर्तृत्वं द्यति इति अर्थः सिद्ध्यति, तद् आहुः **संसारे**त्यादि. यतः एवम् अतः प्रवेशकर्तृत्वं द्यति इति अर्थः ॥११॥

**कर्मणी**त्यत्र. **यथा तत्र** इत्यादि. मनुष्यलोकस्य प्रत्यक्षफलत्वेन उत्कृष्टत्वं वक्तुं यथा देवलोकफले सन्देहवचनं तथा अत्र भगवल्लीलाकथारसस्य उत्कृष्टत्वाय कर्मणो अनाश्वासत्वम् उच्यते, नतु तस्य कर्मणो निन्दार्थम् इति अर्थः ॥१२॥

लेखः

**कर्मणि** इत्यत्र. **को हि तद्वेद** इति. इयं श्रुति सप्तमाष्टके प्रथमप्रपाठके ॥१२॥

**गोविन्दपादपद्मासवं मधु आपाययति.** सहस्रसमयागेन कोऽपि रसो न अनुभूतः, त्वया च अनुभूयते, अतो यागापेक्षया **भवानेव** आदरणीयः. आसमन्तात् पानं हृदयप्रवेशपर्यन्तम्. **गोविन्दे**ति श्रोतॄणां रक्षकत्वं, **पादपद्मे**ति भक्तिमार्गप्रचारः. अनेन अग्रेऽपि पानं सूचितम्. **आसवे**ति देहविस्मारकम्. अनेन ज्ञानफलम् अत्र आनुषङ्गिकम् इति ज्ञानाद् उत्कर्षः सूचितः. **मधु** इति मिष्टं ; स्वरूपतोऽपि पेययोग्यता उक्ता ॥१२॥

एवं कथायाम् अत्यादरम् उक्त्वा तस्मिन् अत्यादरम् आहुः.

**तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ॥**
**भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥१३॥**

**तुलयामः** इति. (**भगवत्सङ्गी!**) भगवता सह सङ्गो यस्य तादृशस्य यः **सङ्गः** तस्य (**लवेनापि!**) एकदेशेनापि **स्वर्गं न तुलयामः** यथा त्वत्सङ्गेन कथामृतपाने सुखं जातं तथा स्वर्गे भविष्यति इति न कल्पयामः. तदा असमानसाम्यापादनेन अनादरः स्यात्. स्वर्गो हि "यन्न दुःखेन सम्भिन्नम्" ( ) इति वाक्याद् दुःखासंश्लिष्टः सुखविशेषः. स च जीवोपभोग्यो जीवात्मानन्दाद् न्यूनः[१]. तस्यैव जीवावरणनिवृत्तिरूपो **अपुनर्भवः**, यतो न पुनर्भवति इति. सच मानुषानन्दापेक्षया

---

१. अत्र सर्वनिर्णयप्रकाशोक्ताद् भिन्नार्थो वर्ण्यते ; तत्र विरोधाभासपरिहारो अवगन्तव्यः — कर्मानुष्ठानस्य यथा निष्काम-सकामभेदाद् द्वैविध्यं तथैव "ब्रह्मार्पणं ... ब्रह्मकर्मसमाधिना" (भग.गीता ४।२४) इत्यादिन्यायेन ब्रह्मात्मकत्वभानसाहित्य-राहित्यभेदादपि द्वैविध्यं भवति. तत्र "ब्रह्मज्ञानाभावे तु पञ्चात्मकाद् भगवतः स्वर्गसुखं भवति. सच स्वर्गो द्विविधः ... सत्त्वाकारान्तःकरणे सर्वेहानिवृत्तौ यद् आत्मसुखं प्रकटीभवति तद् अग्निहोत्रादिसाध्यम्. सर्वदेवानाम् अधिकृतानां तुष्टौ आध्यात्मिकत्वे यागस्य जाते आत्मानन्दः प्रकटो भवति. एतदभावे तु भौतिकत्वे स्वर्गलोको भवति इति अर्थः" (त.दी.नि.प्र. २।५), तथाच "स्वर्गलोके विद्यमानानाम् इन्द्रादीनां स्पर्धादिकं श्रूयते; तच्च दुःखरूपम्. नच ब्रह्मलोकः 'स्वर्ग'शब्दवाच्यः, प्रवृत्तिमार्गनिष्ठत्वात्. ज्ञानाभावेन केवलकर्मकरणं प्रवृत्तिमार्गः" (त.दी.नि.प्र. २।६) इति वाक्यद्वयाभिप्रायविमर्शे अत्र सुबोधिन्यां स्वर्गस्य तृतीयोऽपि अर्थो "जीवात्मानन्दाद् न्यूनो जीवावरणनिवृत्तिरूपः" श्रीमदाचार्यैः अङ्गीकृतो भाति - सम्पा.

उत्तमोऽपि ब्रह्मानन्दापेक्षया हीनः, सएव वा. उभयथापि आनन्दमयस्य भगवतः तुल्यो न भवति, सङ्ख्यया परिमितत्वेन निरूपणात्. अपरिमितो हि भगवदानन्दो विलक्षणः च – अन्यथा जीवस्य ब्रह्मभावो न उच्येत, ब्रह्मभूतस्य वा भगवत्प्रवेशः ; नहि द्रोणमात्रेऽपि पिण्याके भक्षिते

प्रकाशः

**तुलयामः** इत्यत्र. ननु स्वर्गापवर्गयोः कथं न तत्समानत्वम् इति आकाङ्क्षायां तयोः स्वरूपं क्रमेण आहुः **स्वर्गो हि** इत्यादि. न्यूनत्वम् एतस्य जन्यत्वात् पारक्यत्वाच्च बोध्यम्. **तस्यैव जीवावरणनिवृत्तिरूपः** इति. "जीवो जीवं विहाय माम्" (भाग.पुरा. ११।२५।३५) इत्यादौ[१] त्याज्यस्य लिङ्गस्यापि जीवत्वकथनात् जीवरूपं यद् आवरणं तन्निवृत्तिरूपः इति अर्थो बोध्यः. **सएव** इति ब्रह्मानन्दएव. **सङ्ख्यया** इति आनन्दमीमांसास्थ-सङ्ख्यया. ब्रह्मानन्दस्य जीवानन्दाद् विलक्षणत्वे, भगवदानन्दस्य तदुभयविलक्षणत्वे च मानम् आहुः **अन्यथा** इत्यादि. ननु आनन्दमीमांसायामिव "यतो वाचो निवर्तन्ते" (तैत्ति.उप. २।९।१) इति मन्त्रेऽपि 'ब्रह्म'पदेन उभयत्र एकस्यैव ब्रह्मानन्दस्य प्रतीतेः ब्रह्मानन्दस्य

लेखः

**तुलयामः** इत्यत्र. **जीवात्मानन्दाद्** इति, **स** कर्मसाध्य-सुखविशेषे आवरणनिवृत्त्या यो जीवात्मानन्दः प्रादुर्भवति ततो **न्यूनः** इति अर्थः. **तस्यैव** इति, कर्मफलीभूतात्मसुखविशिष्ट-जीवस्यैव इति अर्थः. **जीवावरण** इति, माया इति अर्थः. एतावता जीवन्मुक्तावस्था उक्ता भवति. **स च** इति, जीवन्मुक्तानन्दः इति अर्थः. **सएव वा** इति, ब्रह्मानन्दएव वा **अपुनर्भव**पदेन उक्तः इति अर्थः. तम् इमम् उत्कर्षं क्रमेण प्रतिपादितं दृढयन्ति **अन्यथा** इति. आत्मसुखरूप-कर्मफलापेक्षया ज्ञानफलीभूत-ब्रह्मभावस्य जीवन्मुक्ततासम्पादकस्य उत्कृष्टत्वाभावे तादृशस्य फलत्वेन ब्रह्मभावो न उच्येत इति अर्थः. **ब्रह्मभूतस्य** इति, ब्रह्मभावापेक्षया एतस्य भगवत्प्रवेशस्य उत्कृष्टत्वाभावे इति अर्थः ॥१३॥

---

१. कि.पाठानुसारेण. इत्यादि इति मुद्रितपाठः – सम्पा.

मुष्टिमात्र-शर्करारसानुभवो भवति – ब्रह्मानन्देऽपि[१] ब्रह्मणः पूर्णज्ञानवतोऽपि सनकादेः भगवदानन्दाकाङ्क्षणात्. अतो भगवता सह स्वर्गापवर्गयोः न तुल्यता. साधनपक्षेऽपि न तुल्यता. मुक्तो हि भगवत्प्राप्तौ अधिकारी. "ब्रह्मभूतः प्रसन्नात्मा" (भग.गीता १८।५४) इति वाक्याद् भक्तोऽपि[२] भक्तिं जनयति. भक्तौ इदं स्वरूपोपकारि अङ्गम्. अधिकारिनिरूपणद्वारा मोक्षः. "मुक्तानामपि सिद्धानाम्" (भाग.पुरा. ६।१४।५) इति वाक्याद् न सर्वे मुक्ताः भगवदानन्दं प्राप्नुवन्ति. भगवत्सङ्गिनस्तु सङ्गस्य लेशोऽपि एकदेशोऽपि भगवदानन्दं प्रकटयति. अतः स्वतन्त्रनियत-पाक्षिकयोः न तुल्यता. भ्रान्तः तुलयतु नाम, वयं तु **न तुलयामः. मर्त्यानाम् आशिषः** पुत्राद्याशीः. **आशिषः** इति द्वितीया-बहुवचनम्. (**किम् उत!**) तासां निषेधो लौकिकाभिप्रायेण, लौकिकानां तत्र आदरविशेषात्. लौकिक-वैदिकमार्गापेक्षया पुष्टिमार्गः उत्कृष्टः इति उक्तं भवति ॥१३॥

एवं वक्तुः प्रोत्साहनम् उक्त्वा स्वकीयं रागातिशयं द्योतयन्ति.

**को नाम तृप्येद् रसवित् कथायां महत्तमैकान्तपरायणस्य ॥**
**नान्तं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥१४॥**

---

प्रकाशः

कथं भगवदानन्दतो भेदावगतिः, कथं तत्र च न्यूनत्वावगतिः इत्यतः आहुः **ब्रह्मानन्दे** इत्यादि. तथाच भगवदपेक्षया ब्रह्मानन्दे न्यूनता, ब्रह्मणो न्यूनता इति उभयमपि एकेनैव कार्येण अवगम्यतइति श्रुतौ शब्दसाधारण्येऽपि अर्थो अवगन्तव्यः इति अर्थः, अन्यथा वदद्व्याघातापत्तेः इति. सिद्धम् आहुः **अतः** इत्यादि. ननु मा अस्तु भगवत्तुल्यत्वं तथापि भगवत्सङ्गिसङ्गतुल्यत्वे का वा अनुपपत्तिः इत्यतः आहुः **साधने**त्यादि. भक्तिसाधनं भगवत्सङ्गिसङ्गः ; तत्तौल्यापगमेऽपि सा न वक्तुं शक्या इति अर्थः. तद् उपपादयन्ति **मुक्तो हि** इत्यादिना. **इदम्** इति मुक्तत्वम्. **मोक्षः** इति, स्वरूपोपकारी इति शेषः. **स्वतन्त्रनियतपाक्षिकयोः** इति. स्वतन्त्रनियतं च पाक्षिकं च इति द्वन्द्वः ॥१३॥

---

१. ब्रह्मानन्दे ब्रह्मणोऽपीति ख-ग-घ-ङ. २. भगवद्भक्तोऽपीति ग.

**को नाम तृप्येद्** इति, न हि एतादृशे अमृते कश्चित् तृप्यति – अतृप्तिप्रकारस्तु पूर्वं निरूपितः – तस्य रसत्वेऽपि इच्छासाधकत्वनिरूपणात्. तेन औषधवद् न तृप्तिहेतुत्वम्. न केवलं तद्रूपत्वं किन्तु रसत्वमपि, अतः स्वस्मिन्नेव रुचिं जनयति. यद्यपि साधारण्येन श्रोतृमात्रे[१] रसं जनयति तथापि परमसंसाररोग-व्याप्तस्य अन्तःप्रवेशाभावेन सकृदपि रसाज्ञानात् तस्य रुचिः मा भवतु, यस्तु **रसवित्** स कथं तृप्येत[२] इति अर्थः. तत्रापि **कथायाम्**. कथारसस्तु[३] अतृप्तिहेतुः लोकेऽपि सिद्धः. कर्म-ज्ञाननिष्ठाः तृप्यन्ति इति चेत्, तत्र आह **महत्तमैकान्तपरायणस्य** इति. **महत्तमाः** भक्तिसहित-ज्ञानिनः तेषाम् **एकान्तेन** नियमेन **परं** यद् **अयनम्** उत्कृष्टं यत् प्राप्तिस्थानं, फलरूपम् इति यावत्, **तस्य** भगवतः. यद्यपि केवलकर्म-ज्ञानिनो **रसवित्**पदेनैव निवर्तिताः तथापि लोकप्रतीत्या साधनत्वेन तेषामपि रसवित्त्वम्. यदा ततोऽपि उत्कृष्टाः न निवर्तन्ते फलत्वात् तदा ते तदनुवर्तिनः कथं निवर्तेरन्! अत्र निवृत्तिः केवलं रसाज्ञानादेव, न अन्यतः इति सिद्धम्. तत्र सम्मतिम् आहुः **न अन्तम्** इति. **अगुणस्य**

प्रकाशः

**को नाम** इत्यत्र. **पूर्वम्** इति, प्रथमाध्यायस्थे "वयं तु न वितृप्यामः" (भाग.पुरा. १।१।१९) इति श्लोके. **तस्य** इति कथास्वरूपस्य. **तद्रूपत्वम्** इति रसजनकत्वम्. **तस्य** इति, तद्रूपस्य उत्कृष्टफलरूपस्य इति अर्थः. **साधनत्वेन** इति. "यस्य स्मृत्या" (नारदपुरा. १।१७।१०८) इति, "ज्ञानं यतः प्रतिनिवृत्तः" (स्कन्दपुरा. १।२।२०) इत्यादिवाक्यैः कर्मपूर्ति-ज्ञानयोः साधनत्वेन ज्ञानात् साधनत्वरूपे यो **रसः तद्वित्त्वं,** नतु फलत्वेन रूपेण इति तद्व्यावृत्तिः इति अर्थः. विरोधाभासत्वेन असङ्ख्यातत्वम् उपपादयन्ति

लेखः

**को नाम** इत्यत्र. **पूर्वं निरूपितः** इति. "यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे" (भाग.पुरा. १।१।१९) इत्यत्र निरूपितः इति अर्थः ॥१४॥

१. श्रोत्रमात्रे इति घ.   २. तृप्यत इत्यर्थ इति घ.   ३. कथारसस्याऽतृप्तिहेतुरिति क-ग-घ.

**गुणानाम् अन्तं** परिच्छेदं[१] **न जग्मुः**. यथा रुचिः नित्या कथाकृतैव कथायां तथा गुणाअपि न परिच्छिन्नाः, अतो न अलंबुद्धिहेतवः. अपेक्षितात् परिच्छिन्नादेव निवर्तन्ते[२], अतः प्रमाण-प्रमेययोः नित्यत्वाद् अपेक्षान्तराभावात् प्रतिबन्धकाभावाच्च न अलंबुद्धिः सम्भवति इति उक्तम्. **अगुणस्य**[३] **गुणानाम्** इति विरोधाभासेन असङ्ख्यता सूचिता. यो हि गुणवान् स परिमितगुणो भवति, यथा देवदत्तादिः. अगुणस्य तु गुणाः पर्वताग्र-नदीजलवद् अपरिमिताएव भवन्ति. नच ते अलीकाः, रसानुभवात्[४], प्रेक्षावतां च प्रवृत्तेः. नच स गुणवान्, अद्वैतभङ्गापत्तेः. अतो (अगुणः!) भगवानेव स्वरूपेणैव अविक्रियमाणएव तादृशगुणरूपो भवति इति कारणस्य नित्यत्वात् प्रतिक्षणं जायमानाः गुणाः अनन्ताएव भवन्ति. गणकानां गणनापर्यवसानात् च अनन्तत्वम्. तद् आह **योगेश्वराः** इति. अलौकिकाः भगवद्गुणाः न लौकिकप्रमाणगम्याः इति, तत्रापि न साधारणयोगगम्याः किन्तु भगवद्योगगम्याः इति **योगेश्वराः** इति उक्तम्. **भवो** महादेवः, **पाद्मो** ब्रह्मा नाभिकमले जातः ; तौ **मुख्यौ** येषाम्. भक्तियोगयोः महादेवस्य प्राधान्यात् प्रथमतो ग्रहणम्. प्रमाणमुख्यतया भवग्रहणं, प्रमेयमुख्यतया पाद्मग्रहणं भवति इति व्युत्पत्त्या अभिव्यक्त-ब्रह्मरूपं = वेदरूपमेव भवस्य रूपम् इति, "वेदः शिवः शिवो वेदः" (शिवपुरा.            ) इति वाक्यात्. भगवन्नाभिकमलोत्पन्न-त्वात् तज्जत्वेन[५] तत्त्वम् ॥१४॥

---

प्रकाशः

**यो हि** इत्यादि. **पर्वताग्र-नदीजलवद्** इति. यथा ब्रह्मगिरेः पतन्ती गोदा न कदापि विच्छिद्यति अपरिमिता भवति तथा इति अर्थः. उपपत्तिम् उक्त्वा प्रमाणम् आहुः **गणकानाम्** इत्यादि. भवस्य प्रमाणमुख्यरूपत्वम् उपपादयन्ति **भवतीत्यादि**. "वेदः शिवः शिवो वेदः वेदाभ्यासी सदाशिवः, पाषाणः शिवतां याति वेदाभ्यासाद् द्विजः किमु" इति वाक्यं शिवपुराणीयं, तस्माद् भवस्य मुख्यप्रमाणरूपत्वम् इति अर्थः. **तत्त्वम्** इति प्रमेयमुख्यत्वम्.

---

१. परिवेदमिति ङ.     २. निवर्त्तत इति क-ग-घ.     ३. अगुणानामिति ख.

४. रसानुभावादिति ख.     ५. तज्जननत्वेनेति क-घ.

प्रमाण-प्रमेय-प्रमातॄणाम् आनन्त्येन योग्यत्वाद् गुणान् कथय इति आहुः.

**तन्नो भवान् वै भगवत्प्रधानो महत्तमैकान्तपरायणस्य ।।**

**हरेरुदाराचरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ।।१५।।**

**तन्नो भवान्** इति. तव च एतदेव कृत्यं, यतो **भवान् वै** निश्चयेन **भगवदीयानां मध्ये प्रधानो** मुख्यः. **प्रधान**शब्दः प्रकृतिवाचकएव नित्यनपुंसकः. भगवान् प्रधानं यस्य इति वा. किञ्च **महत्तमानां** भगवद्भक्तानाम् **एकान्ततः परायणं** परमप्राप्यं फलम्. अतः तवापि महत्त्वसिद्ध्ये भगवद्गुणकथनम् आवश्यकम् इति उक्तम्. कथनक्लेशोऽपि नास्ति इति आह **हरेः** इति. भगवद्व्यतिरेकेणापि गुणैरेव सर्वे पुरुषार्थाः दीयन्ते इति **उदाराचरितम्**[1] इति उक्तम्. **विशुद्धम्** इति, शुद्ध्यर्थमेव सर्वे प्रयासाः सर्वे च संस्काराः. चरित्रं च, विशेषाकारेण शुद्धिः[2] यस्माद् इति. स्वस्य श्रोतृत्वम् आह **शुश्रूषताम्** इति. **विशेषेण तनोतु** विस्तारयतु ; प्रार्थनायां लोट्. वक्तृत्वयोग्यताम् आह **विद्वन्** इति ।।१५।।

एवं सामान्यतः कथनार्थं प्रार्थयित्वा श्रोतव्यं विशेषाकारेण पृच्छति.

---

प्रकाशः

यद्यपि निःश्वसितश्रुतेः "प्रचोदिता येन" (भाग.पुरा. २।४।२२) इति वाक्याच्च भगवतएव वेदोत्पत्तेः तद्रूपस्य शिवस्यापि प्रमेयमुख्यत्वं सम्भवति तथापि प्रमाणस्वरूपतया तत्कोटिप्राबल्याद् मूले पाद्मस्य पृथगुल्लेखात् च अत्र प्रमाणरूपत्वमेव आदृतं ज्ञेयम् ।।१४।।

**तन्नो भवान्** इत्यत्र. **नित्यनपुंसकः** इति, सुहृद्वाचक-'मित्र'शब्दवत्. तथाच मुख्यवाचकस्य पुल्लिङ्गत्वेऽपि अदोषः इति अर्थः. कोशानुरोधेन, [3]सम्बन्धषष्ठ्यां सम्बन्ध्यध्याहारक्लेशेन च, पक्षान्तरम् आहुः **भगवान्** इत्यादि ।।१५।।

---

१. उदारचरितमिति ग.  २. शुद्धमिति क-ङ. शुद्धिमिति ग.

३. कि.पाठानुरोधेन. सम्बन्धं षष्ठ्यां इति मुद्रितपाठः -सम्पा.

**स वै महाभागवतः परीक्षिद् येनापवर्गाख्यमदभ्रबुद्धिः ॥**
**ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम् ॥१६॥**

**स वै महाभागवतः** इति. साधन-फलयोः यत्र न व्यभिचारः तत् श्रोतव्यम्. तत्र श्रोतुः अधिकारिविशेषणम् **महाभागवतः** इति. भगवद्भक्तो भागवतः, यस्तु भगवता भागवतत्वेन गृहीतः स फलमुखो महाभागवतः. अत्यन्तं भगवत्कृपावलोकितः श्रोता मुख्यः इति उक्तं भवति. तस्य तथात्वे हेतुम् आह **परीक्षिद्** इति. ‘‘पूर्वदृष्टमनुध्यायन्’’ (भाग.पुरा. १।१२।३०) इति निरुक्त्या परीक्षित्त्वम्. **येन** उपदेशेन **खगेन्द्रध्वजपादमूलं भेजे** तत् कथय इति अग्रेण सम्बन्धः. (**अपवर्गाख्यं!**) शास्त्रान्तरे ‘ब्रह्म’ इति ‘मोक्षः’ इति यत् स्वरूपं व्यपदिश्यते तदेव अस्मच्छास्त्रे चरणपीठं वैकुण्ठाख्यं, ‘‘तद्विष्णोः परमं पदम्’’ (कठोप. १।३।९) इति श्रुतेः. परमभागवतस्यापि भगवच्चरणारविन्दगमने यत् साधनं तद् अवश्यं श्रोतव्यम्. महतामपि येन विना कार्यं न सिद्ध्यति तत् साधनं मुख्यम् इति अध्यवसीयते. ननु तज्ज्ञानं भविष्यति – तच्च प्रसिद्धमेवेति – किं कथनेन इति आशङ्क्य आह **अदभ्रबुद्धिः** इति, अनल्पा बुद्धिः यस्य. पूर्वमेव तस्य बुद्धिः स्थिता अतो न बुद्धिरूपं ज्ञानं साधनं किन्तु **वैयासकिशब्दितेन ज्ञानेन.** तत्तु ज्ञानं नित्यसिद्धमेव ; **वैयासकिना** शुकेन केवलं **शब्दितम्** उच्चारितं भागवताख्यं ज्ञानं चैतन्यरूपम्. **खगेन्द्रो** गरुडः, स **ध्वजे** यस्य इति कालः चिह्नतां प्राप्तः, ‘‘कालात्मकः सोऽथ सुपर्ण आसीद्’’ (महाभा.ता.निर्णय ३।१३) इति वाक्यात्. ‘‘तद्विष्णोः परमं पदम्’’ इति श्रुत्यनुरोधेन एतद् उक्तम्. **मूलपदं** पुनरागमनाभावाय, ‘‘यत्पादमूले कृतकेतनः पुमान्’’

---

प्रकाशः

**स वै** इत्यत्र. **तद्विष्णोः** इति. ‘‘सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम्’’ इति काठकादिवाक्येषु तथानिर्णयाद् इति अर्थः ॥१६॥

लेखः

**स वै** इत्यत्र. **कालात्मकः सोऽथ सुपर्ण आसीद्** इति. ... . **यत्पादमूले** इति. ‘‘विनिर्धूताशेषमनोमलः पुमान्, असङ्गविज्ञानविशेषवीर्यवान्, यत्पादमूले कृतकेतनः पुमान् न संसृतिं क्लेशवहां प्रपद्यते’’ इति ॥१६॥

(भाग.पुरा. ४।२१।३२) इति वाक्यात्. भुवनाङ्घ्रिपात् प्रवेशार्थं[1] वा ॥१६॥

तत् कथय इति आहुः.

**तन्नः परं पुण्यमसंवृतार्थम्　आख्यानमत्यद्भुतयोगनिष्ठम् ॥**
**आख्याह्यनन्ताचरितोपपन्नं पारीक्षितं भागवताभिरामम् ॥१७॥**

**तन्नः** इति. इदम् आख्यानं सर्वैः श्रोतव्यं धर्मार्थकाम-मोक्ष-भक्तिनिष्ठैः. तत्र **पुण्य**त्वाद् धर्मनिष्ठैः श्रोतव्यम्. **न संवृतो अर्थो** यस्मात् यस्मिन् वा ; अस्मिन् श्रुते अर्थोऽपि सिद्ध्यति. **अद्भुत**त्वात् कामः. अत्यद्भुता **योगनिष्ठा** यत्र, अनेन मोक्षार्थिभिः श्रोतव्यम् इति उक्तम्. **आख्यानं** तद्वृत्तान्तप्रतिपादक-शब्दसन्दर्भः. किञ्च **अनन्ताचरितोपपन्नम्** अनन्तस्य यानि[2] अनन्तानि आचरितानि तैः उपपन्नम्. तस्य आख्यानस्य एतानि विधेयविशेषणानि. उद्देश्यविशेषणत्वे अपूर्वत्वेन कथाक्षेपो अयुक्तः स्यात्! एवं त्वया कथितं **पारीक्षितम्** इति प्रसिद्धं भविष्यति, **भागवतानां** च

प्रकाशः

**तन्नः परं पुण्यम्** इत्यत्र. उद्देश्यविशेषणत्वे दूषणम् उक्त्वा विधेयविशेषणत्वे गुणम् आहुः **एवं त्वया** इत्यादि. एवंप्रकारकोपकाराय त्वया कथितम् इति अर्थः ॥१७॥

लेखः

**तन्नः** इत्यत्र. **विधेयविशेषणानि** इति. कथाम् उद्दिश्य पुण्यत्वादिकं विधीयते इति अर्थः. **अपूर्वत्वेन** इति. अयमर्थः — उद्देश्यविशेषणत्वे हि पुण्यत्वाद्यनुवादेन कथैव विधीयते इति वक्तव्यं ; तत्तु यदि प्रमाणान्तरेण पुण्यादिकं प्राप्तं स्यात् तदा तद्विहितपुण्यत्वाद्यनुवादेनैव कथाविधानात् कथितं स्याद्, "अग्निहोत्रं जुहोति" (तैत्ति.संहि. १।५।९।१) इति वाक्यविहित-होमोद्देशेन दधिविधानवत्[3]. एवञ्च तेषां पुण्यत्वादीनां पूर्वम् असिद्धत्वेन कथाक्षेपः तदुद्देशेन असङ्गतः स्याद् इति. ननु भगवत्कथायाः पुण्यत्वादिधर्मवत्त्वस्य सर्वत्र प्रतिपादनात् न अपूर्वत्वम् इत्यतः

१. भुवनाङ्घ्रिपस्य भगवतो मूलप्रवेशार्थम् इति अर्थः इति भा.पाठे पार्श्वटिप्पणी - सम्पा.

२. यान्याचरितानीति ग.　　३. "दध्ना इन्द्रियकामस्य जुहुयात् (तैत्ति.ब्रा. २।१।५।६) - सम्पा.

**अभिरामम्**. अथवा **पारीक्षितम् आख्यानम्** इति उद्देश्यांशः[१], अन्यद् विधेयम्. **भागवताः अभितो रमन्ते अस्मिन्** इति वा ॥१७॥

एवं प्रोत्साहितः श्रोतॄन् प्रोत्साहयति.

**॥ सूतः उवाच ॥**

**अहो वयं जन्मभृतोऽद्य हा स्म वृद्धानुवृत्त्यापि विलोमजाताः ॥**
**दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानियोगः ॥१८॥**

**अहो** इति. अत्र स्वश्लाघा परस्तुत्यर्था, "धन्यो अहम्" इतिवत्. **अहो** इति [२]आश्चर्ये. **वयम्** इति श्लाघायाम्. **जन्मभृतः** सफलजन्मानः. **अद्य** इति अलभ्यलाभः. **हा** इति अद्भुतत्वम्. **स्म** इति प्रसिद्धे. अकस्माद् अस्माकं सफलजन्मत्वं वृत्तम्. नहि असज्जन्म नः सत्फलं भवति. अतः सज्जन्मनापि[३] जातम् इति आश्चर्यं ; नहि असद् उत्पन्नः सज्जन्मा भवति. नहि एकं बहवः प्रार्थयन्ते सन्तः. अतो बहूनाम् उपकारकरणाद् बहुभिः निरूपितं[४] बहुत्वं वा बहुसमानत्वं वा[५] एकस्य जातम् इति श्लाघा. प्रसङ्गाद् जाते जन्मनि दैववशात् फलसम्बन्धः प्रायेण, "क्वचित् तरति कश्चन" (भाग.पुरा. १०।३५।५) इति वाक्यात्.

लेखः

आहुः **अथवा** इति. **पारीक्षितम्** इति. तथाच भगवत्कथायाः तथागुणकत्वेन अन्यत्र प्रसिद्धत्वेनापि तस्याः उभयदर्शितधर्मवत्त्वस्य अन्यत्र अप्रसिद्धत्वेन अपूर्वत्वात् परीक्षितकथाम् उद्दिश्य तद्विधानमेव युक्तम् इति अर्थः इति भावः ॥१७॥

**अहो** इत्यत्र. **धन्योऽहमितिवद्** इति. "धन्योऽहं, मद्गृहे भवान् समागतः" इत्यादौ यथा इति अर्थः. **असज्जन्म नः** इति. **नः** इति भिन्नं पदं, **नः** अस्माकम् असज्जन्म इति अर्थः. **प्रायेण** इति, अस्य **धृतम्** इत्यनेन अन्वयः. **क्वचित्तरति** इति. "मैवमेवाधमस्यापि स्यादेवाच्युतदर्शनं, ह्रियमाणः कालनद्या क्वचित्तरति कश्चन" इति

१. उद्देशांश इत्युपलब्धेषु पुस्तकेषु पाठः. प्रतिभातस्तु निवेशितः. २. इत्याश्चर्य्यमिति ख.
३. सज्जन्माऽपीति क-ख. ४. निरूपितत्वमिति ख. निरूपितेति ग. ५. चेति क-ख.

अस्माभिस्तु फलार्थमेव जन्म धृतं, सूतत्वाभावे इदं न उपपद्येत इति. ब्रह्मकल्पे इयं व्यवस्था **अद्यैव** जाता, न पूर्वं कदाचन. अयम् अर्थो युक्त्या च बाध्यते अतः स्मर्तुः विस्मयजनकः. निन्दितस्य उत्तमत्वेन सर्वजनीनत्वम् अत्याश्चर्यकरं, यतो[१] भगवतइव भवत्कृपया[२] मयि षड्गुणाः जाताः **विलोमजाताअपि,** "ब्राह्मण्यां क्षत्रियात् सूतः" (याज्ञ.स्मृ. १।४।९३). **वृद्धानुवृत्त्या** एवं जाताः, अतो वृद्धानाम् अनुवर्तनं सर्वपुरुषार्थदायि. किञ्च दोषोऽपि निवृत्तः. (**दौष्कुल्यम् आधिं!**) "वयं दुष्कले जाताः कथं भगवत्कृपया सत्कुले भविष्यामः" इति या मनःपीडा सापि निवृत्ता. **महत्तमानाम्**[३] आज्ञा **अभिधा, नियोगः** भगवद्गुणाभिधानार्थं नियोगः स **शीघ्रमेव आधिं विधुनोति.** अतो भवताम् अनुवृत्ति-नियोगौ मम सर्वपुरुषार्थसाधकौ जातौ ॥१८॥

अतः परम् "उत्तरे किं भविष्यति इति न जाने, प्रश्नादेव एतत्सिद्धिः" इति आह.

---

प्रकाशः

**अहो** इत्यत्र. **ब्रह्मकल्पे इयं व्यवस्था** इति, तत्र हि पृथोः यज्ञे बृहस्पतेः हविषि ऐन्द्रं हविः प्रमादतः पतितं, ततः सूतः उत्पन्नः, तस्य मुख्या वृत्तिः पुराणकथनम्, अन्या अश्वचिकित्साद्या जघन्या —इति उक्ता. **षड्गुणाः** इति, **अहो वयम्** इत्यादिश्लोकषट्कोक्ताः ॥१८॥

**कुतः पुनः** इत्यत्र. **इति आह** इति, **इति** हेतोः **उत्तरे** अधिकप्राप्तिं कैमुतिकेन **आह** इति अर्थः. **अपेक्षा** इति तत्र उपादेयबुद्धिः. अपेक्षायां

लेखः

अक्रूरवाक्यम्. **ब्रह्मकल्पे** इति, ब्रह्मसृष्टौ **इयं व्यवस्था** सर्वथा हीनस्य सर्वोत्कृष्टत्वरूपा **अद्यैव जाता** इति महान् अलभ्यलाभः इति अर्थः. इदम् **अद्यपदतात्पर्यम्** ॥१८॥

---

१. अत इति ख-ग-घ.    २. भगवत्कृपयेति क-ख.    ३. महतां या आज्ञेति क-ख-ग.

**कुतः पुनर्गृणतो नाम तस्य महत्तमैकान्तपरायणस्य ॥**
**योऽनन्तशक्तिर्भगवाननन्तो महद्गुणैश्च[१] यम् अनन्तमाहुः ॥१९॥**

**कुतः पुनः** इति. **तस्य नाम गृणतो** दौष्कुल्याधिः[२] कुत्र तिष्ठति इति सम्बन्धः. इदन्तु न स्वाभिप्रायेण, अन्यथा स्वश्लाघायां गर्वः स्यात्. अतः केवलं नामोच्चारणकर्तुः फलम् उच्यते कुलरहितानाम् उद्धाराय, कुलीनानां गर्वाभावाय च. एकवचननिर्देशात् च न स्वाभिप्रायम्[३]. नाम्नो माहात्म्यम् आह **महत्तमैकान्तपरायणस्य** इति. महत्तमानामपि – तन्नामोच्चारणे स्वस्य अभीष्टस्थानत्वात् – नामोच्चारयितुः अपेक्षा भवति, "प्रायेण अयम् अस्मदभीष्टं जानाति" इति. ततः तेऽपि अनुवृत्ताः भविष्यन्ति इति भावः. एवं सर्वोपास्यत्वेन नामोच्चारणमाहात्म्यम् उक्त्वा भगवन्माहात्म्यम् आह कैमुतिकन्याय-प्रदर्शनार्थं[४]— ततो महान्तो नाम भगवान् इति उत्तरोत्तरम् उत्कृष्टाः अतः तन्निष्ठायां तथैव फलम् इति ज्ञापनार्थम्. अन्यथा नामोच्चारणएव शास्त्रं समाप्तं स्यात्, ततः च भागवताऽनारम्भः प्रसज्येत! अतो भगवन्माहात्म्यं वदति **यो अनन्तशक्तिः** इति. "यस्य नाम एतादृशं सो अनन्तशक्तिः" इति वक्तव्ये नामपुरस्सरं

प्रकाशः

हेतुम् आहुः **प्रायेण** इत्यादि. **ततः** इति. तेन न्यायेन एवं ज्ञापनार्थं स न्यायो अत्र उच्यते इति अर्थः. **वक्तव्ये** इति, उक्ते इति अर्थः.

लेखः

**कुतः पुनः** इत्यत्र. **नाम्नो माहात्म्यमाह** इति, तदुच्चारयितुः माहात्म्यकथनेन कैमुत्या तन्माहात्म्यम् आह इति अर्थः. **तदुच्चारयितुः अपेक्षा महत्तमानां भवति** इति योजना. अत्र हेतुः **स्वस्याऽभीष्टस्थानत्वाद्** इति. **स्वस्य** महत्तमस्य **अभीष्टं** नाम, तत्स्थानत्वाद् इति अर्थः. तथाच **महत्तमाएव एकान्तं** मुख्याः अन्तः **परायणाः** अनुवृत्ताः यस्य नामोच्चारयितुः

---

१. महद्गुणत्वाद् इति अन्येषां पाठः. सुबोधिन्यान्तु एवम् आभाति - सम्पा.

२. दौःकुल्याधिरिति ख. ३. स्वाभिप्रायेणेति क-ग.

४. कैमुत्यन्यायेन प्रदर्शनार्थमिति क-प्रकाशे. कैमुत्यन्यायप्रदर्शनार्थमिति ग-घ - सम्पा.

भगवन्माहात्म्यम् उक्तं भविष्यति इति विपरीततया कथयन् उत्तरवाक्यगतमेव **यच्**छब्दं प्रयुङ्क्ते. महतो भावो माहात्म्यं ; महत्त्वं च देश-कालापरिच्छेदेन वस्त्वपरिच्छेदेन च. तद् भगवतः त्रयं जातं तादृशं[१]— शक्तयः(१), स्वरूपं(२), गुणाश्च(३) ; स्वरूपतः कार्यतः फलतश्च. अतो नवधा अनन्तत्वं भगवति पर्यवस्यति[२]. तद् आह(१) **यो अनन्तशक्तिः** इति. सर्वतो अनन्ताः शक्तयो यस्य, अनन्ता शक्तिः यस्य इति वा, अनन्तेषु शक्तिः यस्य इति वा. एवम् उत्तरत्रापि. (२)**भगवान् च अनन्तः**.

प्रकाशः

**विपरीततया कथयन्** इति भगवत्कथनपूर्वक-नाममाहात्म्यं कथयन्. **उत्तरवाक्यगतम्** इति, उत्तरार्धः इति अर्थः. किं भगवति माहात्म्यम् इति आकाङ्क्षायाम् आहुः **महतो भावो माहात्म्यम्** इति. महत्त्वमेव माहात्म्यम् इति अर्थः. तद् विवृण्वन्ति **महत्त्वम्** इत्यादि. **तादृशम्** इति देशाद्यपरिच्छिन्नम्. **अतो नवधा** इति. स्वरूपस्य त्रिधा अपरिच्छिन्नत्वम्. शक्ति-गुणयोः तु, कार्यस्य फलस्य च, यथायथं सर्वत्र सर्वदा सर्वेषु दर्शनात् शक्तीनां कार्यतः त्रिधा अपरिच्छिन्नत्वं, गुणानां तु फलतः तथात्वम् ; अतो नवधा इति अर्थः. **पश्यति** इति पाठे सूतः पश्यति इति अर्थो बोध्यः. **पर्यवस्यति** इति प्राञ्जलः पाठः. **उत्तरत्र** इति, **महद्गुणत्वाद्** इत्यनेन उक्तेषु गुणेष्वपि इति अर्थः ॥१९॥

लेखः

इति मूलार्थः इति भावः. **विपरीततया** इति, भगवता नाममाहात्म्यं कथयन् इति अर्थः. **उत्तरवाक्यगतम्** इति. पूर्वार्धे **तस्य** इत्येतस्य स्थाने 'यस्य' इति पठित्वा तद्बलेन तच्छब्देन इति **उत्तरवाक्यगतमेव 'यच्'छब्दं** भगवतो मुख्यत्वबोधनाय **प्रयुङ्क्ते** इति अर्थः. **अतो नवधा** इति, शक्त्यादित्रयाणां प्रत्येकं स्वरूप-कार्य-फले त्रिविधत्वात् तथा इति अर्थः. **अनन्ता शक्तिर्यस्य** इति. अस्मिन् पक्षे एकैकस्याः शक्तेः आनन्त्यम् उक्तं, पूर्वत्र तु बहुवचनेन सकलशक्तिनिष्ठम् एकमेव आनन्त्यम् उक्तम् इति भेदः. एतद् व्युत्पत्तित्रयेण शक्तीनां त्रित्वमपि विवृतं ज्ञेयम्. तत्र

१. तादृशशक्तय इति ख. २. पश्यति इति क्वाचित्कः पाठः प्रकाशे सूचितः -सम्पा.

अनेन स्वरूपस्य अनन्तत्वम् उच्यते. न विद्यते अन्तो यस्य यस्माद् यस्मिन् इति वा. तन्निष्ठानामपि अन्ताभावः सूचितः[१]. किञ्च (३) गुणानां द्विरूपम् अनन्तत्वं— **महत्त्वेन, गुणत्वेन** च. गुणाः स्वरूपतो अनन्ता, महत्त्वं च अनन्तम्. एकस्मिन्नपि गुणे महत्त्वस्य परिच्छेदो नास्ति. **च**काराद् भगवतइव गुणानामपि अवान्तरभेदाः. एवम् एकेन प्रकारेण अपरिच्छेदरूपेण माहात्म्यम् उक्तम् ; एवं माहात्म्यानि अनन्तानि[२] इत्यपि सूचितम् ॥१९॥

माहात्म्यान्तरं विशेषाकारेण वक्तव्यम् इति आकाङ्क्षायाम् आह.

**एतावताऽलं ननु सूचितेन गुणैरसाम्यानतिशायनस्य ॥**
**हित्वेतरान् प्रार्थयतो विभूतिर्यस्याङ्घ्रिरेणुं भजतेऽनभीप्सोः ॥२०॥**

**एतावताऽलम्** इति. स्वभावतो माहात्म्यानि वक्तुम् अशक्यान्येव, सूचनं परं कर्तव्यम्. अन्यथा महाराजाधिराजस्य स्वरूपं स्पष्टतया कथितम् अपराधाय भवति. सूचनमपि बहु न कर्तव्यम्. तद् आह **एतावता** सूचितेन **अलम्** एतावदपि सूचनं न कर्तव्यम् इति अर्थः.

---

लेखः

प्रथमपक्षे **सर्वतो** जगति व्यापकत्वरूप-कार्यतो आनन्त्यम् उक्तम्. द्वितीये प्रत्येकम् आनन्त्योक्त्या स्वरूपतः तद् उक्तम्. तृतीये च पक्षे तच्छक्तिप्रवेशे तेषाम् अनन्तत्वं सम्पद्यते इति उक्त्या फलतः तद् इति. **यस्माद्** इत्यनेन लोकेऽपि अनन्तत्वं यतएव प्रवृत्तम् इति कार्यतः, सप्तम्यन्तेन फलतः. तत् स्वयमेव ग्राहयन्ति **तन्निष्ठानाम्** इति. **द्विरूपम्** इति, स्वरूपतो द्विरूपम् अनन्तत्वम् इति अर्थः. **महत्त्वं च** इति, **स्वरूपतो अनन्तम्** इति अर्थः. एवञ्च द्विविधमपि स्वरूपतएव आनन्त्यम् उक्तम् इति न अधिकसङ्ख्या इति भावः. एवञ्च महान्तो गुणाः यस्मात्, महत्स्तुत्याः गुणाः यस्य इति कार्यतः ; फलतः चापि तद् ऊह्यम् इति. **अपरिच्छेदरूपेण** इति. शक्ति-स्वरूप-गुणानाम् आनन्त्यरूपेण माहात्म्यम् उक्तम् इति अर्थः ॥१९॥

---

१. सूचित इति नास्ति ख-ग-घ. २. अनन्तान्यपीति घ.

**ननु** इति सम्बोधनं सम्मत्यर्थम् अन्तःकरणस्यैव. माहात्म्यरसाभिनिविष्टश्च वदति. माहात्म्यं हि तरतमभावेन निरूपणीयं ; तत् [1]सजातीय-विजातीय-तादृशपुरुषसम्भावनायां भवति. तद् भगवति न सम्भवति इति आह **गुणैः असाम्यानतिशायनस्य** इति. **गुणैः** हेतुभिः कृत्वा **न साम्यम् अतिशयः** च यस्य. एवं स्वरूप-शक्तिभिः च. तथापि किञ्चित् सूच्यते इति आह **हित्वेतरान्** इति. "तया विना क्व देवत्वम्" (द्रष्ट. विष्णुपुरा. १।९।१२०) इत्यादिवाक्यन्यायेन लक्ष्मीमूलकं सर्वम्. विचारिका च सा. एवं (**विभूतिः!**) स्वरूपतो बुद्धितश्च महती यदि (**इतरान् हित्वा!**) सर्वान् विहाय भगवन्तं भजते तदा सर्वोत्तमत्वं न विविच्य वक्तव्यम्. सा हि सर्वोत्तमा यदि स्वतः स्थातुं शक्नुयात्, किमर्थं भजेत[2]? भोगार्थं वा यदि तदा **प्रार्थयतो** अन्यानपि[3] विहाय **अनभीप्सुं** कथं भजेत? तत्रापि **अनभीप्सोः अङ्घ्रिरेणुं** कथं भजेत! अतो अङ्घ्रिरेणोरपि सा हीना, तदपेक्षया च अन्ये. तस्माद् माहात्म्यनिरूपणं न कर्तव्यम्. न हि "सर्षपात् मेरुः महान्" इति कश्चिद् वदति! ॥२०॥

अस्तु वा प्रकृतिरूपत्वाद् अस्याः, स्त्रीत्वाद् वा, बुद्ध्यभावः. तथाच महतो विचारपूर्वकं भजनं सूचनार्थं वक्तव्यम् इति चेत्, तत्र आह.

---

प्रकाशः

**एतावता** इत्यत्र. **स्वरूपशक्तिभिः** इति, स्वरूपेण शक्तिभिः च इति अर्थः. **"तया विना क्व देवत्वम्"** इति वाक्यन्तु विष्णुपुराणे इन्द्रकृत-लक्ष्मीस्तुतौ वर्तते ॥२०॥

लेखः

**एतावता** इत्यत्र. **सम्बोधनम्** इति. **ननु** इति विचारार्थकः सम्बोधनं स्वान्तःकरणस्यैव सम्मत्यर्थम् उक्तम् इति अर्थः. **तया विना क्व देवत्वम्** इति. ... ॥२०॥

**अथाऽपि** इत्यत्र. आभासे **महतः** इति, महत्कर्तृकं भजनं वक्तव्यम्

---

१. -विजातीय- इत्यधिकं भा.पाठानुसारेण, मुद्रितपाठे नास्ति -सम्पा.

२. भजते इति क-ग. ३. अपिर्नास्ति क-ख-ग.

**अथापि यत्पादनखावसृष्टं जगद् विरिञ्चोपहृतार्हणाम्भः ॥**
**सेशं पुनात्यन्यतमो मुकुन्दात् को नाम लोके भगवत्पदार्थः ॥२१॥**

**अथापि** इति. यद्यपि विभूतित्वाद् लक्ष्म्याः न स्त्रीत्वादिकृतदोषः सम्भवति, युक्तिः च उक्ता, **अथापि** "तुष्यतु दुर्जन" इति न्यायेन प्रकारान्तरेण माहात्म्यसूचनं निरूप्यते. त्रयो हि महान्तः — ब्रह्मा विष्णुः[१] रुद्रः च. तत्र ब्रह्मा चरणक्षालनकर्ता, शिवः चरणोदकधारकः ; अतः परं को महान् भवेत्! तद् आह **यत्पादनखावसृष्टम् अर्हणाम्भो विरिञ्चेन** ब्रह्मणा **उपहृतं** समर्पितम्. **अर्हणाम्भः** पूजासाधनोदकं, गङ्गा इति[२] यावत्. **सेशं** महादेवसहितं **जगत् पुनाति. नखावसृष्टम्** इति भिन्नं वा. तेन ब्रह्माण्डभेदेन यदा चरणजलम् आगतम् अलकनन्दादिरूपं तदपि सङ्गृहीतं भवति. अथवा भगवदपेक्षया जलस्य अतिहीनत्वं ज्ञापयति **नखावसृष्टम्** इति ; नखोदकं हि अतिहीनम्. ईशस्य पावित्र्यम् अग्रे वक्ष्यते. **शेषं पुनाति** इति पाठे भगवद्व्यतिरिक्तं सर्वमेव आब्रह्म तृणस्तम्बपर्यन्तं पुनाति. नखोदककर्तृक-पावनापेक्षा यदा अन्येषां तदा **भगवत्पदार्थः को** वा भवेत्! ननु कोऽपि मा अस्तु, अक्षरात् परस्यैव भगवत्त्वात्, तत्र आह **लोके** इति. वेदे तु स भगवान् भवत्येव ; लोकसिद्धोऽपि वक्तव्यः.

---

प्रकाशः

**अथापि** इत्यत्र. **युक्तिः** इति, दोषसत्त्वे अङ्घ्रिरेणुं न भजेद् इति युक्तिः. **भिन्नं वा** इति. **पादः च नखः च** इति द्वन्द्वान्ते श्रूयमाणस्य **अवसृष्ट**शब्दस्य प्रत्येकम् अभिसम्बन्धात् तथा इति अर्थः. **अग्रे** इति. तृतीयस्कन्धे "यच्छौचनिःसृत" (भाग.पुरा. ३।२८।२२) इति कपिलोक्तौ, नवमस्कन्धे शुकोक्तौ च इति अर्थः ॥२१॥

लेखः

इति अर्थः. **अलकनन्दादि** इति. ... . **लोकसिद्धोऽपि** इति, "अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" (भग.गीता १५।१८) इति वाक्यात् ॥२१॥

---

१. विष्णुश्चेति क.    २. गङ्गोदकमितीति क.

लोकस्तु ब्रह्माण्डमात्रदर्शी, अतो ब्रह्माण्डे यो नायकः स भगवान् इति उक्तं भवति. **भगवच्छब्दो** निरतिशयब्रह्मवाचकः ॥२१॥

एवं युक्त्या प्रमाणेन च भगवत्त्वं स्थापयित्वा अनुभावेनापि भगवत्त्वम् आह.

**यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु सङ्गमूढम् ॥**
**व्रजन्ति तत्पारमहंस्यमन्त्यं यस्मिन्नहिंसोपरमः स्वधर्मः ॥२२॥**

**यत्र अनुरक्ताः** इति. यथा नखोदकम् अन्यदीयं सर्वार्थनाशकं तदेव भगवदीयं सर्वपुरुषार्थसाधकं, तथा अन्यत्र अनुरागः आत्मनाशको भगवति तु अल्पोऽपि रागः सर्वपुरुषार्थसाधकः. तद् आह **यत्र** भगवति **अनुरक्ताः** ये केचन ; न ब्राह्मणत्वादिनियमो न वा साधनान्तरापेक्षा. तद् आह **सहसा** इति. एकम् अत्र बाधकं यत् कामनाबलाद् आगतविषयभोगो वा ; तत्परिहारार्थम् आह **धीराः** इति. आपाततः सुखकरत्वं तेषाम्, अतो विवेकेन धैर्यं कर्तव्यम्. अथवा धीराअपि भवन्ति ; अनुरागएव असहायः साधनम् अपेक्षितं, साध्यं फलं च, साधयति इति अर्थः. रागो हि अन्तःकरणधर्मः. स स्ववर्गं पुष्णाति, नतु स्ववर्गं नाशयति. भगवत्सम्बन्धन्तु प्राप्य भगवता संस्कृतः [१]स्ववर्गं सर्वमेव नाशयति – यतो यदेव बाधकं संसारहेतुभूतं तदेव स्ववर्गं सर्वं नाशयित्वा भगवत्पदं प्रापयति – इति उपलक्षणत्वाद् रागस्य न द्वेषादिभिः व्यभिचारः. **देहादिषु** रूढः **सङ्गो** अहन्ताममतालक्षणः, तादृशम् **ऊढं सङ्गं व्यपोह्य. ऊढ**पदेन वेदेनापि बोधितत्वं सूचितम्. यथा विवाहिता स्त्री न परित्याज्या तद्वद्

---

प्रकाशः

**यत्र** इत्यत्र. **तेषाम्** इति कामनादीनाम्. **भवन्ति** इति, अनुरागेणैव भवन्ति इति अर्थः. ननु "यत्र यत्र देहादिसङ्गनाशकत्वं तत्र तत्र भगवद्विषयरागत्वम्" इति व्याप्तिः अप्रयोजिका, ज्ञान-द्वेषादौ व्यभिचाराद् इत्यतः आहुः **उपेत्यादि**. तथाच भगवद्विषयकत्वमात्रैव व्याप्तिः इति भावः.

---

१. सर्वस्वमेवेति क.

देहादिषु सङ्गो न त्याज्यः इति "आत्मानं सततं रक्षेत्" (मनुस्मृ. ७।२१३), "शरीरम् आद्यं खलु धर्मसाधनम्" (कुमारसम्भवम् ५।३३) इति, "पुरुषस्य अखिलार्थदः" (भाग.पुरा. ९।९।२८) (इति!) च एवंविधैः वाक्यैः जनितामपि बुद्धिं त्यजन्ति इति अर्थः, "स जहाति मतिं लोके वेदे च परिनिष्ठिताम्" (भाग.पुरा. ४।२९।४६) इति वाक्यात्. ज्ञाने तु तावानेव पुरुषार्थः, अत्र तु सो अवान्तरव्यापारः इति आह **व्रजन्ति** इति. **यत्र अनुरक्ताः तद् व्रजन्ति** इति अर्थः, "मद्भक्ताः यान्ति मामपि" (भग.गीता ७।२३) इति वाक्यात्. ननु अस्य गौणफलत्वं भविष्यति इति आशङ्क्य आह **पारमहंस्यम्** इति, परमहंसैः प्राप्यम्. ननु क्रममुक्तौ ते वैश्वानरादि-लोकमपि प्राप्नुवन्ति, तद्वद् इदमपि अवान्तरस्थानं स्याद् इति आशङ्क्य आह **अन्त्यम्** इति, "आनन्दमानन्दमयोऽवसाने[1]" (भाग.पुरा. २।२।३१) इति वाक्यप्रतिपादितम्. अतः परम् अन्यत् प्राप्तव्यं नास्ति इति अर्थः. ननु अस्य धर्महेतुत्वाभावाद् अवेदप्रतिपाद्यत्वेन अप्रामाणिकत्वं स्याद्, अतः पूर्वं निरूपितं न सन्मार्गः इति आशङ्क्य आह **यस्मिन् अहिंसोपरमः स्वधर्मः** इति. पूर्वकाण्डे धर्मः प्रतिपाद्यः, उत्तरकाण्डे ज्ञानसाध्योपरतिः अविद्यायाः. एतद्द्वयम् अनुरागस्य स्वाभाविको धर्मः, यथा जलस्य रसः. अतो, भक्ति-धर्म-प्रतिपादकत्वात्[2] सर्ववेदानां, न भक्तौ वेदविरोधः शङ्कनीयः. **अहिंसा**पदेन च मुख्यो धर्मो निरूपितः.

---

लेखः

**यत्र** इत्यत्र. **स जहाति मतिम्** इति, "यदा यस्य अनुगृह्णाति भगवान् आत्मभावितः" इति पूर्वार्धम्. **आनन्दमानन्दमयोऽवसाने**[२] इति. ... . ननु अहिंसैव यदि मुख्यो धर्मः, किमिति तर्हि "वायव्यं श्वेतम् आलभेत" (तैत्ति.संहि. २।१।१।१) इति विधिः इत्यतः आहुः **आलभतिः** इति. **सहजत्वाद्** इति. भगवत्पराणां धर्मस्य सहजत्वाद् विधिबोधनात् पूर्वमेव आचरणाद् विधिप्रेरणादिकं तत्र कुण्ठितं भवति; न एतावता वेदविरोधः इति अर्थः ॥२२॥

---

१. अवसानम् इति मुद्रितपाठः उद्धृतवचनानुसारेण संशोधितः - सम्पा.    २. धर्मभक्तीति ग.

'आलभतिः' न हिंसार्थे इति अवोचामः. अतः सहजत्वाद् भक्तं प्रति विधिशक्तिरेव कुण्ठिता, नतु विरोधः इति भावः. एतावता भगवन्माहात्म्यम् अनन्तं न कस्यापि वक्तुं योग्यम् इति उक्तम् ॥२२॥

तर्हि भवान् कथं वक्ष्यति इति आशङ्क्य आह.

**अहं हि पृष्टोऽर्य्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् ॥**
**नभः पतन्त्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः ॥२३॥**

**अहं हि** इति. हे[१] **अर्य्यमणः** सूर्यसङ्काशाः. अनेन भवद्भिरेव [२]उद्योतिताः स्मारिताः भगवद्गुणाः स्वमाहात्म्येन वा[३] बोधिताः ते भवद्भ्यो वक्तव्याः. अतो न मम अपूर्ववक्तृत्वं किन्तु अनुवादकत्वम् इति न ब्राह्मणोपदेशकृतोऽपि दोषः. अतएव आह **हि** इति. **अहं पृष्टो** भगवद्गुणवर्णने[४] आज्ञप्तो **भवद्भिरेव आचक्षे – भवद्भिः** इति उभयत्र सम्बद्ध्यते – परं स्वबुद्ध्यनुसारेण. तद् आह **आत्मावगमो अत्र यावान्** इति. यद्यपि "अर्थं बुद्ध्वा वाक्यरचना[५] नाम" (             ) इति न्यायेन वाक्यावगमः[६] समायात्येव तथापि वेदपाठकवत्[७] कथनं व्यावर्तितं, तथा सति अर्थावबोधो न स्याद् इति. ननु किम् एतावता स्याद् भगवद्गुणानां सर्वेषाम् अनिरूपणात्? तत्र आह **नभः पतन्ति** इति. **पतत्रिणो** गरुडादयो **नभः** आकाशम् **आत्मसममेव उत्पतन्ति,** नतु आकाशविशालतानुरोधेन, तथापि खेचरत्वं सिद्ध्यति. तथा ममापि भगवद्गुणवक्तृत्वं सेत्स्यति इति

---

प्रकाशः

**अवोचामः** इति **कुण्ठिता** इति, तद्व्यापारात् प्रागेव तत्प्रतिपादिते अर्थे प्रवृत्तेः तथा इति अर्थः ॥२२॥

**अहं हि** इत्यत्र. **अर्यमणः** इत्यत्र दीर्घाभावः छान्दसः. **हि** इति. मूले **हिः** हेतौ इति अर्थः. **सम्बद्ध्यते** इति. पूर्ववाक्ये कर्तृत्वेन, द्वितीये प्रयोजकत्वेन इत्येवं (उभयत्र!) सम्बद्ध्यते. **वेदपाठवद्** इति, आधुनिकवेदपाठवत् ॥२३॥

---

१. हे इति नास्ति घ. २. भवद्भिरेव द्योतिता इति क. ३. वेति नास्ति क.

४. कथने इति ख. ५. वाक्यरचनामितीति ख. वाक्यारचनमिति घ. ६. वाक्यापगम इति ग.

७. वेदपाठवदिति क-ग-प्रकाशे – सम्पा.

भावः. ननु विषमो दृष्टान्तः – क्रियातु परिच्छिन्नैव भवति, ज्ञानन्तु अपरिच्छिन्नविषयकमपि भवति – इति आशङ्क्य आह **तथा समम्** इति. **विपश्चितो** ज्ञानिनोऽपि **विष्णोः** व्यापकस्य **गतिं** चरित्रं स्वयोग्यतानुसारेणैव जानन्ति. अन्यथा किञ्चिज्ज्ञत्वं न स्याद्, भगवत्तुल्यता च स्यात्. **गतिम्** इति एकवचनं सर्वोऽपि गुणः आकाशतुल्यइति एकोऽपि गुणो न कैश्चित् सम्यग् अवगम्यते इति उक्तम्. अतो न केवलं ममैव अयं दोषः किन्तु विषयएव तादृशः इति ॥२३॥

एवं न्यूनवक्तृत्वदोषं परिहृत्य पृष्टे उत्तरम् आह.

**एकदा धनुरुद्यम्य विचरन् मृगयां वने ।**
**मृगाननुगतः श्रान्तस्तृषितः क्षुधितो भृशम् ॥**
**जलाशयमचक्षाणः प्रप्रवेश तमाश्रमम् ॥२४॥**

**एकदा** इति. राज्ञः प्रमादात् शापो जातः इति वक्तुं स्वभावप्रवृत्तेः अनर्थहेतुत्वं बोधयति. **धनुः उद्यम्य** इति वधाभिनिवेशः सूचितः. **वने मृगयां**[१] पारधिवत्[२] **चरन्** धावतो **मृगान् अनुगतः**. मृगसङ्गात् तच्छोको अस्यापि सञ्जातः, "आरण्याः पशवः कनीयांसः शुचा श्रुता[३] (?)" (तैत्ति.संहि. ५।१।४।३) इति श्रुतेः. अतएव **श्रान्तः** देहवैक्लव्यं जातम्. **तृषितः क्षुधितोऽपि** जातः. दोषत्रयम् उत्पन्नम् इति अर्थः. अन्यथा महावीरस्य, निरन्तरयुद्धकरणेऽपि अक्षीणबलस्य कथं श्रमादि स्यात्! तस्माद् दुष्टानुगमनं न विधेयम्. **भृशम्** इति सोढुम् अशक्यम्. दोषोत्पन्नस्य श्रमादेः दोषजनकत्वमेव, न गुणजनकत्वम् इति वक्तुं तादृशस्य दोषान्तरमपि जातम् इति आह

---

प्रकाशः

**एकदा** इत्यत्र. **विचरन्** इति, कुर्वन् इति अर्थः. **ह्युता (?)** इति, **हि (?)** यतो हेतोः **हृताः** प्राप्ताः गृहीताः इति अर्थः. **जलाशयम्**

लेखः

**एकदा** इत्यत्र. **तच्छोको** इति, मरणशोकः इति अर्थः. **अस्याऽपि** इति, मृगानां सङ्गकरणाद् राज्ञो जातः इति अर्थः. **आरण्याः पशवः**

---

१. मृगयायामिति घ. २. पारधीवदनुधावतो मृगानित्यादि क. ३. ह्युता इति घ-प्रकाशे – सम्पा.

**जलाशयम्** इति. **अचक्षाणः** अपश्यन् ; जलाशयानामपि देवत्वात् तं प्रति तेऽपि तिरोहिताः इति भावः. **प्रकर्षेण प्रवेशः** अपृष्ट्वा अननुज्ञातः, अतः[१] (**आश्रमं!**) स्थानपर्यन्तं[२] गमनम्. **तम्** इति प्रसिद्धं पराभूतद्रौणिमन्त्र-स्थानम् ॥२४॥

स्वतो दोषव्याप्तस्य सद्दर्शनेऽपि न सद्बुद्धिः उत्पन्ना ; यथा सन्निपातव्याप्तो हविषापि म्रियते तथा जातम् इति आह **ददर्श** इति त्रिभिः सार्धैः. तत्र द्वयेन मुनेः स्वरूपं वर्णयति तस्य दोषाधिक्याय.

**ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥**
**प्रतिरुद्धेन्द्रियप्राण - मनोबुद्धिमुपारतम् ॥२५॥**
**स्थानत्रयात् परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥**
**विप्रकीर्णजटाच्छन्नं रौरवेणाऽजिनेन च ॥२६॥**

**मुनिम्** इति श्रवण-मनने ब्रह्मविषयके सिद्धे तस्य इति ज्ञापितम्. **आसीनम्** इति निदिध्यासनपरत्वम्. योगे च आसनं तृतीयम् अङ्गम्, अतः पूर्वद्वयमपि अर्थाद् उक्तं भवति. **शान्तम्** इति प्राणायामेन मनोनियमनम् उक्तम्. **मीलितलोचनम्** इति प्रत्याहारः. ध्यान-धारणे वक्तुं प्रत्याहारमेव विशदयति **प्रतिरुद्धे**ति. अथवा **मीलितलोचनम्** इति विषयाणाम् अप्रतिबन्धकत्वं सूचितम्. **प्रतिलोमतया रुद्धा** अन्तर्नीता **इन्द्रिय-प्राण-मनो-**

प्रकाशः

इत्यत्र **अननुज्ञातः** इति. तस्य अन्तःप्रवेशः अननुज्ञया इति अर्थः ॥२४॥

लेखः

इति श्रुतिः ... . **पराभूतद्रौणिस्थानम्** इति. ... ॥२४॥

**ददर्श** इत्यत्र. **योगे चाऽऽसनं तृतीयम्** इति. ''यमश्च नियमश्चैव तथाऽऽसनमपीष्यते, प्राणायामस्तथा शक्तेः प्रत्याहारश्च धारणा, ध्यानं समाधिरेतानि योगेऽङ्गानि तपोधन'' ( ) इत्यत्र तथा इति अर्थः. **पूर्वद्वयम्** इति, यम-नियमौ इति अर्थः. एवं च तन्त्रेण श्रवण-मनन-निदिध्यासन-समाधिरूपं वेदान्तोक्तमपि साधनं विवक्षितम् इति

१. अन्तारिति क-घ.  २. पर्य्यन्तगमनमिति क-घ.

**बुद्ध्यो** येन. एवं बाह्यविषयाऽन्तर्विषय[१]-निवृत्त्यनन्तरं (**उप!**) स्वस्वरूपे विद्यमाने भगवति **आसमन्ताद् रतः** अनुरक्तः. तेन स्वरूपेण भगवत्सेवकः इति उक्तम्. अनेन ध्यान-धारणेऽपि सूचिते. समाधिम् आह **स्थानत्रयाद्** इति. जीवस्य चत्वारि स्थानानि जाग्रत्-स्वप्न-सुषुप्ति-समाधिरूपाणि. तत्र भगवतः कार्यद्वयं, गुणाः, स्वरूपं च क्रमेण अभिव्यक्ताः भासन्ते. अतो अस्य **स्थानत्रयात् परं (प्राप्तं!)** समाधिं[२] प्राप्तस्य स्वरूपं भासते इति अर्थः. न केवलं भानमात्रं किन्तु फलमपि जातम् इति आह **ब्रह्मभूतम्** इति, "ब्रह्म वेद ब्रह्मैव भवति" (मुण्डकोप. ३।२।९) इति श्रुतेः. असम्प्रज्ञातसमाधित्व-ज्ञापनाय आह **अविक्रियम्** इति, सर्वविकाररहितम्. अनेन देहायुर्वृद्धि-क्षयादिकमपि निवर्तितं, मनोव्यापारोऽपि निराकृतः. केवलं स्वरूपेणैव भगवन्तं सेवते इति उक्तं भवति. बहिः च उपघातक-निराकरणप्रकारं[३] पूर्वमेव कृतवान् इति आह **विप्रकीर्णे**ति. **विप्रकीर्णाभिः जटाभिः आच्छन्नम्.** रुरुः बहुशृङ्गमृगः ; **रौरवेण** चर्मणा **कृष्णाजिनेन च** उपरि आच्छन्नम्. एतावता बहिरन्तर्व्यवस्थया स सर्वथा न प्रार्थनीयः इति सूचितम् ॥२५-२६॥

---

प्रकाशः

**स्थानत्रयाद्** इत्यत्र. **कार्यद्वयम्** इति, बाह्यम् आन्तरं च इति अर्थः ॥२५-२६॥

लेखः

भावः. **स्वरूपे विद्यमाने** इति, इदम् **उप** इत्यस्य विवरणम्. **स्थानत्रयाद्** इत्यत्र. **चत्वारि स्थानानि** इति, अवस्थितिविशेषाः इति अर्थः. **कार्यद्वयम्** इति. जाग्रदवस्थायां भगवत्कार्यः प्रपञ्चः, स्वप्ने सुखादयो, धर्मगुणाः सुषुप्तौ, भगवत्स्वरूपं च समाधौ तु भासते इति अर्थः. **असम्प्रज्ञात** इति, निर्विकल्पक-समाधित्वे इति अर्थः. तथाच राज्ञा अभिमानेन कृतेऽपि वाण्यभिप्रायस्तु तथैव इति भावः ॥२५-२६॥

---

१. बाह्यविषयमान्तर्विषयेति क. बाह्यविषयः अन्तर्विषयेति ख. बाह्यविषय आन्तर्विषयेति ग. बाह्यविषयश्चान्तविषयमिति घ. २. समाधिप्राप्तस्येति क-ख-ग. ३. उपघातनिराकरणेति क.

तादृशमपि याचितवान् इति आह.

**विशुष्यत्तालुरुदकं तथाभूतमयाचत ।**
**अलब्धतृणभूम्यादिरसम्प्राप्तार्घ्यसूनृतः ॥**
**अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥२७॥**

**विशुष्यत्तालुः** इति, विशेषेण शुष्यत्[१] तालु यस्य ; शोकेनैव तालुशोषणम्. **तथाभूतम्** इति पूर्वोक्तधर्मयुक्तम्. याचनमपि दोषएव, तेन दोषेण दोषान्तरमपि उत्पन्नम् इति आह **अलब्धेति**. "तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता, एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन" (पञ्चतन्त्रम् १।१८२) इति सद्धर्मः. तं[२] च तस्मिन् अदृष्ट्वा स्वस्य शिक्षकत्वं[३] च स्मृत्वा शिक्षार्थमिव कोपं कृतवान्. **न[४] लब्धा (येन!). तृणं भूमिः आदि**शब्देन उदकम्. तृण-भूमी आदिः यस्य इति. जलस्य अपेक्षितत्वाद् एवम् उक्तम्. राजनिमित्तं विशेषधर्मो अर्घ्यादिः. **न सम्प्राप्ताः अर्घ्यादिसूनृतान्ताः** येन. राजसु ब्राह्मणैः पाद्यस्य अकर्तव्यत्वाद् अर्घ्यग्रहणम्. तदप्राप्तौ दोषेण हेत्वन्तरं कल्पयति **अवज्ञातम्** इति. निषेधाभावात् च **इव**प्रयोगः. यदि स्वयमेव जलादिकं गृह्णीयात् तदापि न दोषः स्याद् आपद्धर्मत्वात्, परम् अभिमानेन तदपि न कृतवान्. तद् आह **आत्मानं मन्यमानः** इति. दोषेण दृष्टेः [५]प्रतिरुद्धत्वात् तत्स्वरूपम् अविचार्यैव केवलं **चुकोप**. ह इति आश्चर्ये ॥२७॥

क्रोधः शिक्षार्थमपि भवति, मन्युः तु द्विष्टएव. तदा तस्य अन्यद् दोषद्वयम् उत्पन्नम् इति आह.

**अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ॥**
**ब्राह्मणं प्रत्यभूद् ब्रह्मन् मत्सरो मन्युरेव च ॥२८॥**

**अभूतपूर्वः** इति कदापि एतादृशो दोषो न उत्पन्नो, यस्तु ब्राह्मणे मत्सरः. **सहसा** इति विचारोत्पत्तिः निवारिता[६]. देहधर्माएव प्रबलाः जाताः

---

१. शुष्यती तालुरिति क-ग. शुष्यन्ती तालुरिति ख. २. स चेति क-ख-ग-घ.

३. शिक्षकमिति क-ग. ४. नकारो नास्ति ग.

५. दृष्टेऽप्रतिरुद्धत्वादिति ख. ६. निरूपितेति क. पूर्वज्ञानं निवारितमिति घ-ङ.

इति आह **क्षुत्तृड्भ्याम्** इति. [१]**अर्दितः आत्मा** अन्तःकरणं यस्य. एवं ब्राह्मणातिक्रमं श्रुत्वा शौनकस्य क्षोभो मा भवतु इति **ब्रह्मन्** इति सम्बोधनम्. **ब्राह्मणे** एव **मत्सरो मन्युश्च (अभूद्!)** जातः. परोत्कर्षासहनं मत्सरः. एवं दश दोषाः उत्पन्नाः **च**कारेण समुच्चिताः ॥२८॥

उपसंहाराय दोषाणां फलम् आह.

**स तु ब्रह्मऋषेरंसे गतासुम् उरगं रुषा ॥**
**विनिर्गच्छन् धनुःकोट्या निधाय पुरमागतः ॥२९॥**

**स तु ब्रह्मऋषेः** इति. तुशब्देन पूर्वग्लानिः निवारिता, कार्यस्य जातत्वात्.

कलेः स्थानप्रदानाद्धि ब्राह्मणातिक्रमे मतिः ॥

**ब्रह्मभूतस्य ऋषेः** इति प्रमेय-प्रमाणोभयबलवत्त्वं सूचितं ; तद् नित्यम्. **अंसे** इति. नीयमानः सर्पः शिरसः साक्षाद्ब्रह्मत्वाद् अंसएव पतितः, तस्य वा हस्तो अग्रे न चलितः. (**उरगं!**) सर्पं हत्वा मरणानन्तरं **गतासुं** तम् उत्थाय **विनिर्गच्छन् धनुःकोट्या** उत्थाप्य **अंसे निधाय स्वपुरम् आगतः** मृगयां गतो धनुषः स्वस्य च कार्यं कृत्वा समागतः[२]. तत्रैव निकटे तिष्ठेत् चेत्, सान्त्वयेदपि बालकम् ॥२९॥

ननु तथा करणे राज्ञः को अभिप्रायः ? तत्र आह.

**एष किं निभृताशेषकरणो मीलितेक्षणः ॥**
**मृषासमाधिराहोस्वित् किं नु स्यात् क्षत्रबन्धुभिः ॥३०॥**

**एषः किम्** इति. **निभृतानि अशेषाणि करणानि** यस्य. तादृशो भूत्वा **किं मीलितेक्षणः आहोस्विद्** अस्मद्वञ्चनार्थं **मृषासमाधि**ज्ञापको **मीलितेक्षणः** इति? ननु तथा ज्ञापने किं प्रयोजनं? तत्र आह **किं नु स्याद्** इति. **नु** इति वितर्के निश्चये वा— **क्षत्रबन्धुभिः किं स्याद्** आगतैः गतैः वा. क्षत्रबन्धुत्वज्ञानं योगात्. यद्यपि मृषासमाधित्वेऽपि न किञ्चिद् अनेन कर्तुं शक्यते तथापि चित्तसमाधानार्थम् एवं विचारः उत्पन्नः इति अर्थः ॥३०॥

---

१. इति अधिकं भा.पाठानुरोधात्. मुद्रिते नास्ति - सम्पा.	२. स समागत इति क.

एवम् अविचारितकृतेः अनर्थपर्यवसायित्वम् आह.

**तस्य पुत्रोऽतितेजस्वी विचरन् बालकोऽर्भकैः ।।**
**राज्ञाऽघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ।।३१।।**

**तस्य** इति. 'पुन्'नाम्नो नरकात् त्रायते इति **पुत्रः** ; स चेद् अस्माद् न त्रायते, पुत्रत्वाद् अपगतः स्यात्. **अतितेजस्वी** च, अनेन सामर्थ्यं द्योतितम्. अविवेकहेतुमपि आह **अर्भकैः** सह **बालक**एव आश्रमप्रान्ते **विचरन् राज्ञा (अघं!)** अपराधं पापं वा **प्रापितं श्रुत्वा.** मृतसर्पस्पर्शेऽपि पापं भवति, "पापाद् मरणम्" (                ) इति मरणं वा, आश्रमस्थवधेन वा, अपराधपक्षे राजकर्तृको अपराधो मुनिपर्यवसायी जातइति[१]. **तात** इति स्नेहनाम. **तत्र** इति, यत्रैव श्रुतः तत्रैव **इदम् अब्रवीत्** ।।३१।।

अग्रे दण्डनिरूपणार्थं दण्डयोग्यताम् आह त्रिभिः— अधर्म-स्वामिद्रोहौ दण्डनिमित्तं राजनिष्ठं, दण्डनसामर्थ्यं च स्वनिष्ठम्. तत्र प्रथमं दोषम् आह.

**अहो अधर्मः पालानां पीव्नां बलिभुजामिव ।।**
**स्वामिन्यघं यद् दासानां द्वारपाले शुनामिव ।।३२।।**

**अहो** इति आश्चर्ये. **पालानाम् अधर्मः** धर्मपालकाः अधर्मं निराकुर्वन्ति

---

प्रकाशः

**तस्य पुत्रः** इत्यत्र. पापप्रापणं कथम् इति आकाङ्क्षायाम् आहुः **मृतसर्पे**त्यादि. **आश्रमस्थवधेन** इति. यथा सर्पो हतः तथा अन्यं हन्यात्, तथा सति मरणमेव आपतेद् इति अर्थः. **मुनिपर्यवसायी जातः** इति. यथा ब्रह्मघ्नो लिङ्गं कपालधारणं तथा सर्पघ्नस्य सर्पधारणम् इति तथा इति अर्थः ।।३१।।

---

१. समाधिस्थमुनेः पुण्याश्रमे सर्पमरणं पापेन वा अपराधेन वा सम्भवति. तत्र पापपक्षे मुनेः पापेन सर्पपापेन वा मरणम् इति अवान्तरपक्षद्वयम्. तत्र सर्पस्य भोगयोनिस्थस्य पापासम्भवाद् मुनेः पापम् इति मुनिपर्यवसायिपापम्. राजकर्तृकापराधपक्षेऽपि मुन्याश्रमे कृतस्य सर्पमारणापराधस्य मुनिपर्यवसायित्वम् इति आशयो भाति - सम्पा.

नतु कुर्वन्ति इति आश्चर्यम्. आश्चर्याभिनिविष्टो ध्यायन् न इदम् आश्चर्यम् इति ज्ञातवान्. अतो अधर्महेतुं वदन् स्थानविशेषं प्राप्य तस्य हेतुत्वं ज्ञापयन् दृष्टान्तम् आह **पीव्नाम्** इति. स्थूलत्वमेव अधर्मकरणे हेतुः. नीचाः राज्येन पुष्टाः अधर्मं कृतवन्तः इति अर्थः. (**बलिभुजां शुनामिव!**) यथा श्वानो बलिना पुष्टाः बलिदातारमेव भक्षयन्ति, गृहं वा प्रविशन्ति. ब्राह्मणानां राज्यद्वयं— स्वाराज्यं बहीराज्यं च. बहीराज्यं स्वभोग्यं न भवतीति स्वाराज्यसाधकत्वेन[१] विनियुक्तम्. अतएव क्षत्रियाः स्थापिताः. ब्रह्मणा निर्मिता भूः, कश्यपेन च दत्ता, तथा परशुरामेण रघुनाथेन च, तथापि यद् ब्राह्मणैः बहीराज्यं न कृतं तद् अन्तस्तत्करणार्थम्. तदेव आह **स्वामिन्यघम्** इति. **दासानां यत् स्वामिनि अघम्** अपराधकरणं पापं तत् **शुनामिव** जातिदोषेण अविवेकेन च जातम्. **द्वारपाले** द्वारपालने ये विनियुक्ताः श्वानः, द्वारपालनार्थं वा, ते यथा अज्ञानात् स्वामिनमेव भक्षयन्ति, गृहं मा प्रविशतु इति, तथा समाध्यर्थमेव राजा विनियुक्तः समाधिं मा करोतु, अस्मत् पूजां करोतु इति! एतावता शुनः तुल्यता राज्ञो निरूपिता ॥३२॥

विषमदृष्टान्तशङ्कायाम्[२] आह **ब्राह्मणैः** इति. अनेन स्वामिद्रोहः

---

प्रकाशः

**अहो** इत्यत्र. **एतावता** इति, पूजायाः अकरणेन समाधिविघ्नेन च ॥३२॥

लेखः

**अहो** इत्यत्र. **गृहं मा प्रविशतु** इति. तस्य स्वभावः यद् अपरिचितं नवीनं दृष्ट्वा तं प्रवेष्टुं न ददाति. अज्ञानात् स्वामिन्यपि तथा प्रवृत्तौ अत्र स दृष्टान्तः इति अर्थः. **समाध्यर्थम्** इति. कश्चन अज्ञानाद् दुष्टः समाधिविघटको मा भूद् इति तदर्थमेव राजत्वेन ब्राह्मणैः नियुक्तः इति अर्थः ॥३२॥

---

१. स्वाराज्यं साधकत्वेनेति क-ख-ग. स्वराज्यसाधकत्वेन विनियुक्ता इति घ.

२. शङ्कामाहेति क-घ.

समर्थ्यते.

**ब्राह्मणैः क्षत्रबन्धुर्हि द्वारपालो निरूपितः ॥**
**स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति ॥३३॥**

**हि** इति चतुर्धा निरूपणं बोधितम्. शरीरादिबाह्यपदार्थो द्वारम्. वस्तुतो अत्र निरूपकाः भृगवः. अतो यैः निरूपितं **तेषामेव गृहे द्वाःस्थः** सर्वदा द्वारपालकः **सभाण्डं** भोजनपाकपात्रस्थम् अन्नं **(कथं!) भोक्तुम् अर्हति!** ब्राह्मणम् आज्ञापयितुं न अर्हति, तेषामेव कृपया राज्यकरणात्. ब्रह्मणो हि गृहं ब्रह्माण्डं, तत्र सर्वपुरुषार्थोपभोग-स्थानानि[1] ब्राह्मणाः[2], तदुपघातक-निराकरणाद् द्वारपालको राजा. राज्यं बलिस्थानम्. ब्राह्मणमपि

---

प्रकाशः

**ब्राह्मणैः** इत्यत्र. **विषमदृष्टान्तशङ्कया** इति. पुरुषविधब्राह्मणे[3] "क्षत्रात् परं नास्ति तस्माद् ब्राह्मणः क्षत्रियम् अधस्ताद् उपास्ते" (बृहदा.उप. १।४।११) इति श्रुतेः तथा इति अर्थः. **चतुर्धा निरूपणम्** इति, स्वामिद्रोहस्य चतुर्धा निरूपणम्. प्रत्यक्षतो द्वारपालत्वाद्यप्रत्ययात् तत् कथम् इति आकाङ्क्षायां तद् उपपादयन्ति **शरीरादी**त्यादिना. **द्वारम्** इति समाधेः द्वारम्. तथाच तद्रक्षकत्वेन द्वारपालत्वम् इत्यतो न प्रत्यक्षविरोधः इति अर्थः. तर्हि कथं दृष्टान्तवैषम्यपरिहारः इत्यतः आहुः **वस्तुतः** इत्यादि. तथाच पश्चाद् एवंभावात् न तद्वैषम्यम् इति अर्थः. **अर्हति** इति. मूलस्थ **कथं**शब्दो अत्र योज्यः. एवम् एकप्रकारेण स्वामिद्रोहो निरूपितः. द्वितीयम् आहुः **ब्राह्मणम्** इत्यादि. तथाच कश्यपादिभिः दत्तेऽपि राज्ये तैः क्षत्रियेभ्यो दानात् तथा इत्यतोऽपि द्रोहः इति अर्थः. तृतीयम् आहुः **ब्रह्मणः** इत्यादि. **सर्वपुरुषे**त्यादि. द्वाराणि इति अर्थः. **बलिस्थानम्** इति बलिदानस्य स्थानम्.

लेखः

**ब्राह्मणैः** इत्यत्र. **चतुर्धा** इति. बन्धुत्वं द्वारपालत्वं च इति स्वस्वरूपविचारेण द्विधा, ब्राह्मणत्वं स्वामित्वं च इति ब्राह्मणस्वरूपेण द्विधा —एवं चतुर्धा इति अर्थः. **भृगवः** इति. ... ॥३३॥

---

१. सर्वपुरुषार्थफलोपभोगस्थानानि ब्रह्मण इति ग. २. ब्रह्मणेति ख.

३. पुरुषविद्- इति मुद्रितपाठः - सम्पा.

कृषीवलवद् बलिमध्यपातनात् सभाण्डभोजनम्. समाधिस्थापराधाद् गृहप्रवेशेन सभाण्डभोजनम् ॥३३॥

एवम् अपराधं समर्थयित्वा स्वस्य दण्डनसामर्थ्यं वदन् प्रकारान्तरं व्यावर्तयति.

**कृष्णे गते भगवति शास्तर्युत्पथगामिनाम् ॥**
**तद् भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ॥३४॥**

**कृष्णे गते भगवति** इति. सदानन्दरूपे स्वानुभवार्थमेव ब्राह्मणान् नियुज्य स्वस्थानं गते – भगवत्त्वात् स्वानन्दानुभवस्य सम्पादनार्थं पूर्वं ब्राह्मणप्रतिपक्षक-**शास्तरि** – पालकानां ( **उत्पथगामिनां** ! ) तथात्वे ब्राह्मणैरेव दण्डः कर्तव्यः, कोटिद्वयस्यैव स्थापितत्वात्. अतो द्वयम् अस्माभिरेव कर्तव्यमिति आह **( अहं शास्मि ! ) भिन्नसेतून्** इति. **भिन्नाः सेतवो** मर्यादा यैः. अनेन स्वार्थपरित्यागः उक्तः. ननु कदापि सेतुभेदनं न श्रुतं, तत्र आह **अद्य** इति. अद्यैव जातम् अद्यैव दण्डनं कर्तव्यम् इति अर्थः. स्वसामर्थ्यं तथाविधम् अस्ति इति बालकान् बोधयति **( मे बलं ! ) पश्यतः** इति. आविर्भूतं ब्रह्मतेजः स्वस्मिन् स्वयं पश्यन् स्वमित्रत्वात् तानपि प्रदर्शयति ॥३४॥

एवम् अध्यवसायं कृत्वा यत् कृतवान् तद् आह.

**इत्युक्त्वा रोषताम्राक्षो वयस्यान् ऋषिबालकः ॥**
**कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥३५॥**

---

प्रकाशः

'स्थाने' इति वा पाठः. **ब्राह्मणमपि** इति. अत्र 'ब्राह्मणे' इति सप्तम्यन्तः पाठः प्रतिभाति, अन्यथा 'आज्ञापयति' इत्यादेः अध्याहारापत्तेः. चतुर्थम् आहुः **समाधीत्यादि** ॥३३॥

**कृष्णे** इत्यत्र. मूले **भगवति** इति विशेषणं हेतुगर्भम् इति ज्ञापयन्ति **भगवत्त्वाद्** इति. **तथात्वे** इति स्वानन्दानुभव-प्रतिपक्षत्वे. **कोटिद्वयस्य** इति, पाल्य-पालककोट्योः इति अर्थः. **द्वयम्** इति सेतुपालनं तत्प्रतिपक्षशासनं च. **स्वार्थपरित्यागः** इति स्वप्रयोजनत्यागः, स्वकार्यत्यागः इति यावत् ॥३४॥

**इति उक्त्वा** इति. राजभावनया पालकत्वाध्यासाद् **रोषः,** तेन **ताम्रे अक्षिणी** यस्य. अनेन पुनः विचारान्तरं न कृतवान् इति ज्ञापितम्. **कौशिकी** नदी तस्या **आपः**[१] अपः **उपस्पृश्य** आचम्य ( **ऋषिबालकः** ! ) स्वस्य ब्रह्मभावम् आविर्भाव्य **वाग्रूपं वज्रं विससर्ज** ''षट् फट् जहि'' इत्यादिमन्त्रान् उक्त्वा. दधीच्यस्थिनिर्मितः सः वज्रः, अयन्तु ब्राह्मणानां मूलभूतो वाग्वज्रः ॥३५॥

तस्य वाग्वज्रस्य अर्थम् आह.

**इति लङ्घितमर्यादं तक्षकः सप्तमेऽहनि ॥**
**धक्ष्यति स्म कुलाङ्गारं चोदितो मे पितृद्रुहम् ॥३६॥**

**इतीति,** एवम्प्रकारेण त्यक्त**मर्यादं तक्षकः सप्तमे अहनि धक्ष्यति** भस्मसात् करिष्यति. **स्म** इति प्रसिद्धे ; सर्वप्रसिद्ध्या तं भक्षयिष्यति इति अर्थः. अनेन तस्य प्रतीकारो न भविष्यति इति सूचितम्. ''सप्त वै शीर्षण्याः प्राणाः'' ( तैत्ति.संहि. ५।३।२।५ ) इति श्रुतेः शिरसो रक्षितत्वात् प्राणघातकत्वेऽपि तावत्कालं जीवनम् उक्तं ; यदि शिरसि स्थापयेत् तदैव म्रियेत. ननु पाण्डवकुलोत्पन्नं कथं धक्ष्यति तक्षकः ? तत्र आह **कुलाङ्गारम्** इति. यदि इदानीं न दग्धः, एतादृशापराधान्तरकरणे कुलमेव नाशयिष्यति यादववत्. अतः पाण्डवानाम् उपकारार्थमेव तं धक्ष्यति इति अर्थः. ननु प्रार्थितो न धक्ष्यति इति आशङ्क्य आह **चोदितो मे** इति, मत्प्रेरितो न अन्यथा करिष्यति इति अर्थः[२]. अन्यथा तमपि धक्ष्यामि इति भावः. एवम् आज्ञापने हेतुः **पितृद्रुहम्** इति, अस्मत्पित्रे द्रुह्यति इति ॥३६॥

**ततोऽभ्येत्याश्रमं बालो गलेसर्पकलेवरम् ॥**
**पितरं वीक्ष्य दुःखार्तो मुक्तकण्ठो रुरोद ह ॥३७॥**

एवं शप्त्वा तस्मिन् तेजसि शान्ते मानुषभावेन ( **आश्रमम् अभ्येत्य** ! ) गृहम् आगत्य रोदनं कृतवान् इति आह **ततः** इति. **गलेसर्पकलेवरम्** इति अलुक्समासः. **बाल**त्वात् मृतो जीवति वा इति न ज्ञातवान्. तादृशं **पितरं वीक्ष्य दुःखेन आर्तः मुक्तकण्ठः ( रुरोद ! )** प्लावितेन

---

१. आप इति नास्ति ख-ग-घ-ङ.    २. इति भाव इति ख.

स्वरेण. पिता तु सर्पकण्ठः, स्वयं मुक्तकण्ठः. ह इति निश्चये ॥३७॥

ततः किं वृत्तं? तद् आह.

**स वा आङ्गिरसो ब्रह्मन् श्रुत्वा पुत्रविलापनम् ॥**
**उन्मील्य शनकैर्नेत्रे दृष्ट्वा चांसे मृतोरगम् ॥३८॥**
**विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि ॥**
**केन वापकृतं सर्वमित्युक्तः स न्यवेदयत् ॥३९॥**

**स वा** इति. **आङ्गिरसः** अङ्गिरसो[१] गोत्रे उत्पन्नः; सहिष्णुत्वं कुलीनत्वं च सूचितम्. **ब्रह्मन्** इति शङ्कान्तरं वारितं; न हि ब्रह्मभूताः अन्यथा कुर्वन्ति. (**पुत्रविलापनं श्रुत्वा!**) अतिस्वराघातेन समाधिः नश्यति स्वप्नवत्. तदा **शनकैः नेत्रे उन्मील्य** उद्घाट्य **अंसे च (मृतोरगं!)** सर्पं **दृष्ट्वा** स्वभावात् तं प्रथमतो **विसृज्य. पुत्र**त्वाद् न अन्यथावचनं सम्भवति. प्रश्नमेव आह **वत्स** इति **कृतम्** इत्यन्तेन. वाक्यद्वयं **कस्माद् रोदिषि, केन वा** ते **अपकृतम्** इति. विशेषकथने प्रयोजनाभावात् सङ्क्षेपेण आह **सर्वम्** इति ॥३८-३९॥

तदा शमीकः शृङ्गिवचनं श्रुत्वा विचार्य "न साधु कृतवान्" इति आह.

**निशम्य शप्तमतदर्हं नरेन्द्रं स ब्राह्मणो नात्मजमभ्यनन्दत् ॥**
**॥ मुनिः उवाच ॥**
**अहो बतांहो महदज्ञ ते कृतमल्पीयसि द्रोह उरुर्दमो धृतः ॥४०॥**

**निशम्य** इति. अयुक्तत्वे हेतुः **नरेन्द्रम्** इति. ननु अपराधिषु दण्डएव[२] कृतः[३]; कुतो **न अभ्यनन्दत्? तत्र** आह **स ब्राह्मणः** इति. "ब्राह्मणाः क्षमयार्हणतां गताः" (भाग.पुरा. ९।१५।३९). क्षमाभावे ब्राह्मण्यमेव गच्छति इति भावः. ननु यथा राजा उपेक्षणीयः तथा अयमपि कुतो न उपेक्षितः?

---

लेखः

**निशम्य** इत्यत्र. **ननु यथा राजा** इति. स्वयम् अपकृतोऽपि यथा राजानम् उपेक्षितवान् तथा इति अर्थः. **आत्मजत्वाद्** इति. तथाच राज्ञा

---

१. साङ्गिरसो गोत्रे इति ख-घ. २. दण्डमेवेति घ. ३. कृत इति नास्ति क-ग-घ.

तत्र आह **आत्मजम्** इति. अयम् अनुपेक्षणीयः, आत्मजत्वात्. "अप्रतिषिद्धम् अनुमतं भवति" (कौटिल्यअर्थशा. १५।१८०।१८) इति न्यायेन तूष्णीम्भावे, अङ्गीकारे वा "न ब्रह्मदण्डदग्धस्य" (भाग.पुरा. ३।१४।४२) इति न्यायेन, राज्ञः परलोकोऽपि गच्छेत्. अतः[1] पितुः अनुमत्या न कृतम् इति शब्दार्थमात्रे सत्यता, न पर्यवसानतः तथा फलमपि. पुत्रस्यापि मन्युं त्याजयति युक्तिभिः, अन्यथा तस्य दुर्मरणमेव स्यात्. अतो यथा अस्य अनुतापो भवति तथा वचनानि आह **अहो** इति. राज्ञः शापः पुरुषार्थपञ्चकेनापि विरुद्ध्यते, अतः स्वस्य पुरुषार्थपञ्चकहानिः भविष्यति इति भयप्रदर्शनेन अनुतापजननम्. प्रथमतो अधर्मः कृतः इति आह. **अहो** इति आश्चर्ये, **बत** इति खेदे. **ते कृतं महदंहः** त्वया कृतं महत्पापरूपं, परम् (**अज्ञ**!) अज्ञानाद्, अन्यथा प्रायश्चित्तमपि न स्यात्. तदेव आह **अल्पीयसि द्रोहे** अपराधे (**उरुर्दमो धृतः**!) महान् दण्डः कृतः. पर्यवसाने विचार्यमाणे अस्मासु अल्पो अपराधः— आश्रमस्थः एकः सर्पो हतः, सर्पस्पर्शनं च स्नानहेतुः कारितः, भयं च जनितं तव. तस्य तु प्राणाएव हृताः. न हि सर्पेण राज्ञः तुल्यता भवति, न हि स्पर्शेन विषव्याप्तेः तुल्यता, न हि आपाततो भयेन निकटोपस्थित-प्राणहारि-महाभयस्य. तस्माद् यथापराध-दण्डाभावाद् अधर्मः ॥४०॥

ननु अस्माभिः तुल्यमेव कृतं— मारणे मारणं, सर्पस्पर्शे सर्पस्पर्शो, भये भयम् इति! तत्र आह.

---

प्रकाशः

**निशम्य** इत्यत्र. **तस्य** इति पुत्रस्य ॥४०॥

लेखः

कृतोऽपि अपकारो अकिञ्चित्करः तथा अनेन राजनि कृतः शापादि न अन्यथा भविष्यति, मम आत्मजत्वेन अतिसमर्थत्वाद्, अतो न उपेक्षा इति भावः. आत्मजत्वेन सर्वथा शिक्षणीयत्वज्ञापनाद् वा तथा ज्ञेयम्. हेत्वन्तरमपि आहुः **अप्रतिषिद्धम्** इति ॥४०॥

---

१. अत इति नास्ति क-घ.

**न वै नृभिर्नरदेवं पराख्यं सम्मातुमर्हस्यविपक्वबुद्धे ॥**
**यत्तेजसा दुर्विषहेण गुप्ता विन्दन्ति भद्राण्यकुतोभयाः प्रजाः ॥४१॥**

**न वै नृभिः** इति. हे **अविपक्वबुद्धे!** न हि पदार्थानां तुल्यता वर्तते. (**नृभिः!**) मनुष्यैरेव (**नरदेवं!**) राजा (**सम्मातुं!**) तुल्यो **न** (**अर्हसि!**) भवति, किं पुनः क्षुद्रजीवैः! ननु ब्रह्मविदां न एवं वचनं युक्तं, "शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" (भग.गीता ५।१८) इति वाक्यात्, तत्र आह **पराख्यम्** इति. इदन्तु अक्षरविचारेण जीवेषु ब्रह्म तुल्यम् इति उक्तं, नतु[१] भगवता सह जीवानां तुल्यता. भगवतो गुणावतारत्वाद् राज्ञः, "स्थानेऽथ[२] धर्ममखमन्वमरावनीशा" (भाग.पुरा. २।७।३९) इति वाक्यात्, "नाविष्णुः पृथिवीपतिः" (देवीभाग. ६।१०।२४) इति च. ननु एतद् भाक्तं सम्माननार्थम् उक्तम् इति चेत्, तत्र आह **यत्तेजसा** इति. **यस्य** राज्ञः **तेजसा दुर्विषहेण** चौरादिभिः असह्येन (**गुप्ताः!**) संरक्षिताः **प्रजाः अकुतोभयाः** सत्यः (**भद्राणि!**) कल्याणानि **विन्दन्ति,** जीवानां सर्वत्र समत्वात्. राजनि यत् तेजो, या वा आज्ञाशक्तिः, स्वरूपमात्रेणैव सर्वेषां भयनिवर्तनम् —एते न जीवधर्माः. अतो न उपचारः इति अर्थः. एवम् अधर्मकरणेन धर्मविरोधः उक्तः ॥४१॥

अर्थविरोधम् आह.

**अलक्ष्यमाणे नरदेवनाम्नि रथाङ्गपाणावयमङ्ग लोकः ॥**
**तदा हि चौरप्रचुरो विनश्यन्त्यरक्ष्यमाणेऽविवरूथवत् क्षणात् ॥४२॥**

**अलक्ष्यमाणे** इति. एकस्मिन्नपि दिवसे राजनि **अलक्ष्यमाणे** अपश्यति सति. **नरदेव** इति **नाममात्रं,** वस्तुतस्तु सः

---

लेखः

**न वै नृभिः** इत्यत्र. "सर्गे तपोहमृषयो नवमे प्रजेशाः, स्थानेऽपि अधर्ममखमन्वमरावनीशाः, अन्ते त्वधर्महरमन्युवशासुराद्याः, मायाविभूतयः इमाः पुरुशक्तिभाजः" **इति वाक्याद्** इति. **नाविष्णुः पृथिवीपतिः** इति. ... ॥४१॥

---

१. नन्विति ख-घ-ङ. २. स्थानेष्वधर्मेति ग.

(**रथाङ्गपाणिः!**) चक्रपाणिः. तद् आह[१] **अङ्ग.** पदार्थज्ञानम् अस्य भवतु इति आग्रहपरित्यागेन श्रवणार्थं कोमलसम्बोधनम्. (**तदा!**) तस्य स्वरूपमात्रादर्शने **अयं लोकः चौरप्रचुरो** भवति=प्रायेण सर्वे चौराएव भवन्ति. **विनश्यन्ति** च. बुद्धिभ्रंशः च भवति इति आह **क्षणादेव** (**अविवरूथवत्!**) मेषसमूहवत् (**अरक्ष्यमाणे!**) पालकाभावे सर्वतो गत्वा[२] **नश्यन्ति** इति अर्थः. अतः सर्वेषाम् अर्थनाशाद् अर्थविरोधः ॥४२॥

ननु तेषाम् अर्थविरोधे का नो हानिः? तत्र आह.

**तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुम्पकात् ॥**
**परस्परं घ्नन्ति शपन्ति वृञ्जते पशून् स्त्रियोऽर्थान् पुरुदस्यवो जनाः ॥४३॥**

**तदद्य** इति, तस्माद् हेतोः **अद्य पापम् अनन्वयम् उपैति** (**नः!**) अस्मान् प्रति निष्कारणमेव अस्माभिः अकृतमेव पापम् उपैति. ननु कथम् अकारणम् उपैति, अन्यथा सर्वदैव स्यात्! तत्र आह **यन्नष्टनाथस्य** इति. **यस्माद्** अस्मन्निमित्तं **नष्टो नाथो** यस्य लोकस्य तस्य यद् **वसु**[३] तस्य **विलुम्पकात्** चौरात् निमित्तात्. यद्यपि साक्षाद् अस्माभिः न कृतं तथापि[४] अस्मत्कृतेन कार्येण तथा जातम् इति पापसम्बन्धः. न केवलम् अर्थनाशएव किन्तु कामनाशोऽपि इति आह **परस्परम्** इति. (**जनाः!**) अन्योन्यमेव **घ्नन्ति** मारयन्ति, **शपन्ति** गालीः प्रयच्छन्ति, **स्त्र्यादिपदार्थान् वृञ्जते** अपहरन्ति ॥४३॥

प्राणिनः सर्वस्वं त्रयं— पशवः, स्त्रियो, अर्थाश्च. भूम्यादीनाम् एतत्साधकत्वम्. एतदभावे सर्वमेव कामेन[५] उपभोग्यं नश्यति इति आह.

**तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ॥**
**ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसङ्करः ॥४४॥**

**तदार्यधर्मः च** इति. **आर्याणां** सतां **धर्मः** सदाचारलक्षणः[६] सामान्यरूपः ; सएव **वर्णाश्रम**सहितो विशेषरूपः, सएव पुनः (**त्रयीमयः!**) वेदत्रये प्रतिपाद्यो यज्ञरूपः (**विलीयते!**). एतावता धर्मो नष्टः इति

---

१. तदा हे अङ्गेति क-ख. २. गता इति क-ग-घ. ३. वस्तु इति क-घ.
४. तथाऽस्मत्कृतेनेति क-ग. ५. कामनोपभोग्यमिति क-ग-घ. ६. सदाचाररूप इति क-ग-घ.

उक्तम्. किम् अतो यदि एवं? ततः आह **ततः** इति. ऐहिकं त्रयमेव धर्मार्थकामाख्यम्. तत्र धर्मे गते **अर्थकामाभिनिविष्टाएव**[१] भवन्ति. **ततः** च अधर्महेतुः **वर्णसङ्करो** भवति. निर्लज्जोपभोगो, दुःखादिना अभिभूतः च इति **शुनां** दृष्टान्तः. तेषाम् आनुपूर्व्याः अप्रसिद्धत्वात् पुरुषद्वयेऽपि एको अन्वयो न स्यात्, ततः च सङ्करधर्माअपि गच्छेयुः. किञ्च (**कपीनामिव!**) वानरा वृक्षजीविकया जीवन्तो मातृ-भगिनी-विवेकरहिताः बुद्धिमन्तोऽपि एकस्यां शतं प्रवर्तन्ते[२]. ततः एकस्मिन्नपि पुरुषे वर्णत्वं नास्ति. ग्राम्या-ऽरण्यपशूपलक्षकं दृष्टान्तद्वयम्. तस्मात् समूलः कामो गच्छति इति उक्तम् ॥४४॥

एवं परम्परया दोषम् उक्त्वा साक्षाद्दोषम् आह.

**धर्मपालो नरपतिः स तु सम्राड् बृहच्छ्रवाः ।**
**साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् ॥**
**क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति ॥४५॥**

**धर्मपालः** इति. एकैकोऽपि गुणो अस्माभिः सर्वात्मना पूज्यः; अस्य तु सर्वे गुणाः. धर्ममार्गेण अयं पूज्यः, तद् आह **धर्मपालः** इति. नीतिमार्गेणापि अयं पूज्यः, **नरपतिः** इति. कामार्थमपि अयं पूज्यः, **सम्राड्** इति, साम्राज्यश्रिया जुष्टः सर्वं दातुं समर्थः इति. प्रसिद्धिरपि पूजाहेतुः[३], तद् आह **बृहच्छ्रवाः** इति. बृहत्[४] श्रवः कीर्तिः यस्य. भक्तिमार्गेणापि अयं पूज्यः, **साक्षात् महाभागवतः** इति. अन्ये तु गुरुद्वारा भगवता अङ्गीकृताः महाभागवताः भवन्ति, अस्य तु भगवानेव गुरुः

प्रकाशः

**तदार्यधर्मः च** इत्यत्र. **निर्लज्जोपभोगः** इति द्वयं कामविशेषणत्वेन बोध्यम् ॥४४॥

लेखः

**तदार्यधर्मश्च** इत्यत्र. **पुरुषद्वयेऽपि** इति. ... ॥४४॥

१. अर्थकामा अभिनिविष्टा एवेति ख. अर्थकामा एव अभिनिविष्टा एवेति ग-घ.

२. प्रवर्तत इति क. वर्त्तन्त इति घ. ३. प्रजाहेतुरिति घ. ४. बृहच्छ्रवाः कीर्त्तिरिति ख.

अतः साक्षात् महाभागवतत्वम्. वैदिकविचारेणापि अयं पूज्यः, वेदार्थपालकत्वात् मन्त्रद्रष्टृत्वाच्च. तद् आह **राजर्षिः** इति. कर्मणापि अयं पूज्यः, **हयमेधयाङ्** इति, हयमेधेन इष्टवान्. किञ्च धर्मादि-विचारव्यतिरेकेणापि केवल-लौकिकविचारेणापि पूज्यः, तद् आह **क्षुत्तृट्श्रमयुतः** इति. ते पूर्वम् उक्ताः योगाद् ज्ञाताः. विशुष्यत् तालुत्वाद् **दीनः**. एवं सर्वप्रकारेण[१] पूज्यः **(अस्मत्!) शापं न अर्हति.** तस्मात् पूज्य-पूजा-व्यतिक्रमाद् अधर्मः, दोषैकदर्शनात् नीचत्वं च जातम् इति अर्थः ॥४५॥

किञ्च "भक्तद्रोहे भगवान् क्रुध्यति, तेन सर्वनाशो भविष्यती" ति भीतः सन् भगवन्तं प्रार्थयते.

**अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना ॥**
**पापं कृतं तद् भगवन् सर्वात्मा क्षन्तुमर्हसि ॥४६॥**

**अपापेषु** इति. हे **भगवन्! स्वभृत्येषु** तव भृत्येषु, पाल्यभृत्येषु[२] वा. विचार्यमाणे[३] **अपापेषु अपक्वबुद्धिना** अदूरदर्शिना[४]. "न वै शिशूनां गुणदोषयोः पदम्" (भाग.पुरा. ७।५।४९) इति ज्ञापनार्थम् आह **बालेन** इति. **पापं** शापरूपम् (**क्षन्तुम् अर्हसि!**). क्षमायां हेतुः **सर्वात्मा** इति, सर्वेषामेव त्वम् आत्मा. अतः स्वकीय-परकीय-कृतवैषम्याभावः. ननु ब्राह्मणानां किं भयं? तत्र आह **भगवान्** इति. अनेन मोक्षविरोधः उक्तः[५] ॥४६॥

भक्तिविरोधं वदन् तेनापि शापे दत्ते समः समाधिः भविष्यति इति आशङ्कां परिहरति.

**तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि ॥**
**नाऽस्य तत्प्रतिकुर्वन्ति तद्भक्ताः प्रभवोऽपि हि ॥४७॥**

---

प्रकाशः

**क्षुत्तृडित्यत्र. ते पूर्वम् उक्ताः** इति. ते क्षुत्तृडादयः **पूर्वं** सूतोक्ताः इति अर्थः ॥४५॥

---

१. सर्वेण प्रकारेणेति घ. २. स्वपाल्येति क. ३. अविचार्य्यमाणेति क.

४. अपूर्वदर्शिनेति घ. ५. फलमतः उपपत्तेः - सम्पा.

**तिरस्कृताः**[१] इति. **अपि**[२] गालिदानादिभिः **तिरस्कृताः** वक्रोक्त्या **विप्रलब्धाः** वञ्चिताः **शप्ताः** इदानीमेव **क्षिप्ताः** अधिक्षिप्ताः **हताः** ताडिताः ; गुण-क्रिया-स्वरूपा-ऽहङ्कार-देहनाशेऽपि **न प्रतीकारं कुर्वन्ति** इति अर्थः. प्रतिकूलतया करणं तु दूरापास्तम्. तत्र हेतुः **तद्भक्ताः** इति. अतएव (**प्रभवो**!) समर्था**अपि. हि** युक्तो अयम् अर्थः, शक्तौ क्षमायाः उचितत्वात् ॥४७॥

एवं पितुः अनुतापनिरूपणेन राज्ञो निर्दुष्टत्वं निरूप्य – सदुष्टस्य सदुष्टानुमोदनं युक्तमेव इति इमाम् आशङ्कां परिहर्तुम् – ऋषिं स्तौति.

**॥ सूतः उवाच ॥**

**इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः ॥**
**स्वयं विप्रकृतो राज्ञा नैवाघं तदचिन्तयत् ॥४८॥**

**इतीति.** (**पुत्रकृताघेन**!) अन्यकृतेनापि पापेन **सो अनुतप्तो** जातः. तत्र हेतुः **महामुनिः** इति. भगवतापि अनुचितं ज्ञातम् इति भगवद्धृदयपरिज्ञानात्[३] महामुनित्वम्. किञ्च सर्पस्थापनेन **स्वयं राज्ञा विप्रकृतः तद्** (**अघं**!) अपराधं (**नैव अचिन्तयत्**!) मनसापि न स्मृतवान्. अतः परम्परयापि पापभीरुत्वाद् भगवद्धृदयज्ञानाद् दोषादर्शित्वात्[४] च महान्[५] मुनिः ॥४८॥

---

प्रकाशः

**इतीत्यत्र. युक्तमेव** इति, "जिघांसन्तं जिघांसीयाद्" (वसि.स्मृ. ३।१२-१३) इति लोकन्यायेन ॥४८॥

॥ इति श्रीप्रथमस्कन्धसुबोधिनीप्रकाशे अष्टादशाध्यायविवरणम् ॥

लेखः

**इति पुत्र** इत्यत्र आभासे **इमाम् आशङ्काम्** इति. एवञ्च राज्ञः निन्दितकर्मकर्तुः अनुमोदने मुनावपि तद् आशङ्कितं स्यात्, तत् परिहर्तुम् इति अर्थः ॥४८॥

---

१. तिरस्कृता अपीति क. २. अपिर्नास्ति क-ग-घ.

३. परिर्नास्ति ख. ४. दोषदर्शित्वादिति घ. ५. महामुनिरिति क.

उभयोः तुल्यतया उपसंहरति.

**प्रायशः साधवो लोके परैर्द्वन्द्वेषु योजिताः ॥**
**न व्यथन्ति न हृष्यन्ति यत आत्माऽगुणाश्रयः ॥४९॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे अष्टादशोऽध्यायः ॥

**प्रायशः** इति. **साधवो** राजा मुनिश्च प्रकृते, सामान्यतः तु सर्वे, **लोके** सर्वत्रैव **परैः** असाधुभिः, तदानीं[१] तेन राज्ञा ऋषिबालकेन च, साधारण्ये तु अन्यैः, **द्वन्द्वेषु** सुख-दुःखादिषु (**योजिताः!**) योगं प्रापिताः दुःखेषु[२] योजिताः **न व्यथन्ति**[३], सुखे[४] च योजिताः **न हृष्यन्ति.** तस्माद् यद् एतयोः पश्चात् क्षोभाभावः तद् युक्तमेव. तत्र उपपत्तिम् आह **यतः आत्माऽगुणाश्रयः** इति. गुणाः हर्षादयः ; तेषाम् आश्रयो अन्तःकरणमेव, नतु आत्मा. अतः तेषाम् अन्तःकरणाध्यासाभावात् क्षोभाभावः उचितः इति भावः ॥४९॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे अष्टादशो अध्यायः ॥

---

लेखः

**प्रायशः** इत्यत्र. ननु प्रकृते **साधुपदेन** के विवक्षिताः? अतः आहुः **राजा मुनिश्च** इति. **सामान्यतः** इति. प्रकृताविवक्षायां तु यावन्तो लोके साधवः तेऽपि उक्ताः भवन्ति इति अर्थः. **तदानीन्तनराज्ञा** इति परीक्षिता. तथाच राज्ञा द्वन्द्वेषु योजितो ऋषिः न व्यथितो, मुनिपुत्रेण द्वन्द्वेषु योजितो राजापि न व्यथितः इति प्रकृतानुरोधेन **परपदं** व्याख्यातम् इति भावः. सामान्यपक्षम् आश्रित्य आहुः **साधारण्ये** इत्यादि ॥४९॥

॥ इति श्रीप्रथमे अष्टादशोध्यायः ॥

## ॥ इति अष्टादशोऽध्यायः ॥

---

१. तदानीन्तनराज्ञेति क-ग-घ-लेखे - सम्पा.     २. दुःखेन योजिता इति क-ग.

३. व्यथयन्तीति क.     ४. सुखेनेति क-ग.

# ॥ अथ ऊनविंशोऽध्यायः ॥

सर्वदोषनिवृत्तिस्तु पूर्वाध्याये निरूपिता ॥
प्रमादेऽपीश्वरेच्छातो[१] व्यामोहाभाववर्णनात् ॥(१)॥
अधुना पूर्णगुणता वैराग्यज्ञानभक्तिषु ॥
यशःकर्मसमाजश्रीभावेषु[२] च[३] निरूप्यते ॥(२)॥
एकोनविंशे वैराग्यात् प्राये मुनिगणागमः ॥
तत्र पृष्टार्थसन्देहे शुकागम इतीर्यते ॥(३)॥
मुनयो भगवद्भक्तयानं द्रष्टुं हरेः कथाम् ॥
श्रोतुञ्च भावितज्ज्ञानाद्[४] विवादस्तु शुकोन्नतौ ॥(४)॥

प्रकाशः

अथ ऊनविंशाध्यायं विवरिषवः सूतोक्तिसङ्गतेः पूर्वम् उक्तत्वात् ताम् अनुक्त्वा व्यासोक्तिसङ्गतेः स्फुटतया अनुक्तत्वात् ताम् उभाभ्यां स्फुटीकुर्वन्ति **सर्वदोषे**त्यादि. **निरूपिता** इति, "प्रायशः" (भाग.पुरा. १।१८।४९) इति समाप्तिश्लोके निरूपिता. तथाच एककार्यत्वम् अधिकारे सङ्गतिः इति अर्थः (१-२).

अवान्तरवाक्यतात्पर्यम् आहुः **एकोनविंशे** इत्यादि. **तत्र** इति तेषु मुनिषु. **विवादः** इति. शुकस्य परम्परया भगवदवतारत्वाद् नारद-राम-व्यासानां

लेखः

अथ एकोनविंशाध्यायं विवरिषवः एककार्यत्वमेव अध्यायसङ्गतिः इति आशयेन पूर्वाध्यायार्थम् अनुवदन्ति **सर्वदोषनिवृत्तिः** इत्यादि. पूर्वाध्यायेन राज्ञः सर्वदोषनिवृत्तिः इत्यादि निरूपिता. तत् कथं इति आशङ्कायाम् आहुः **प्रमादेऽपि** इति. ईश्वरेच्छातः प्रमादेऽपि "न सम्मुमोह उरुभयाद्" (भाग.पुरा. १।१८।२) इति व्यामोहाभावप्रतिपादनाद् इति अर्थः. **प्राये** प्रायोपवेशे सति इति अर्थः. **विवादः** इति. परन्तु **शुकोन्नतौ** शुकस्य

१. ईश्वरेच्छाया इति घ. २. श्रीभविेष्विति क.

३. यतो महानिति क-ग. ४. भाविताद् ज्ञानाद् इति भा.पाठः -सम्पा.

वैराग्यस्य प्रकर्षेण प्रकर्षोऽत्र विवक्षितः ॥
ज्ञाने तुल्येऽपि देवर्षेस्त्यागाभावान्न वक्तृता[१] ॥(५)॥
भार्गवस्यापि रामस्य व्यासस्यापि हरेस्तनोः ॥
गुरुणैव स्वरूपाप्तिज्ञानदानात्[२] न वक्तृता ॥(६)॥
द्वात्रिंशल्लक्षणोपेतः शुकएव ततो गुरुः ॥
एतदर्थं हि भगवानवतीर्णो वृषध्वजः ॥(७)॥
बीजाधानोत्तरं[३] रक्षा विष्णोरन्ते शिवात्मना[४] ॥

एवं पूर्वाध्याये राज्ञः शापो निरूपितः. इदानीम् अद्भुतकर्मणो भगवतः शापफलं निरूप्यते गङ्गा-सत्सङ्ग-ज्ञानानि. तत्र प्रथमं वैराग्यापरनाम नैरपेक्ष्यम् अनुतापलक्षण-तपसा[५] सह निरूप्यते चतुर्भिः. ''कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते, प्रायश्चित्तं स्मृतं तस्य हरिसंस्मरणं परम्'' (ब्रह्मपुरा. २२।३८)

## प्रकाशः

साक्षादवतारत्वाद् विवादः इति अर्थः. **प्रकर्षः** इति उन्नतिप्रकर्षः. ननु मा अस्तु स प्रकर्षः तथापि प्रश्नोत्तरवक्तृत्वं कुतो न इत्यतः आहुः **गुरुणा** इत्यादि. ''ईश्वराज्ज्ञानमन्विच्छेद्'' (ब्रह्मपुरा. २।६९।११) इति ज्ञानदाने गुरुत्वेन ईश्वरनियतत्वात् तेन **गुरुणा ज्ञानदानात् स्वरूपाप्तिः** भवति – ''मोक्षम् इच्छेद् जनार्दनाद्'' (मत्स्यपुरा. ६८।४१) इति मोक्षो भवति इति – साक्षादवताराणाम् अत्र **न वक्तृता** इति अर्थः. **अन्ते शिवात्मना** इति, संहारे शिवस्यैव अधिकृतत्वात् तथा इति अर्थः (३-७ १/२).

## लेखः

सर्वत्रऋषिभ्यः उत्कृष्टता अस्ति इत्यत्र **विवादएव** स्थितः, इदानीं निर्धारएव जातः इति भावः. उन्नतौ प्रयोजनम् आहुः **वैराग्यस्य** इति. **देवर्षेः** नारदस्य च **न वक्तृता** इति. तथाच शुकस्य वक्तृत्वमात्रं न किन्तु गुरुत्वमपि इति अर्थः. **शिवात्** शिवावतारात् शुकात् (१-७ १/२).

१. पात्रेति घ. २. स्वरूपाप्तिज्ञानेत्यादि क-ग. स्वरूपास्तिज्ञानेत्यादि घ. ३. बीजधानान्तरमिति ख.
४. शिवात् तथा इति पाठः लेखे - सम्पा. ५. अनुतापलक्षणमिति घ-ङ.

इति हरिसंस्मरणाङ्गभूतम् अनुतापं निरूपयन् भक्तस्य तद् भक्तिरूपम्[१] इति तदङ्गेन नैरपेक्ष्येण सह निरूपयति.

**॥ सूतः उवाच ॥**

**महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिन्तयन्नात्मकृतं सुदुर्मनाः ॥**

**॥ राजा उवाच ॥**

**अहो मयाऽमीवमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥१॥**

**महीपतिः** इति. ततः समागत्य श्रमापनोदनानन्तरं यदा राज्यविचारार्थं सिंहासनस्थो **महीपतिः** जातः **अथ** तदैव (**तत्**!) पूर्वकृतं **कर्म** (**विचिन्तयन्**!) स्मृतवान्, ब्राह्मणस्य गले सर्पदानलक्षणम्. तुशब्देन पूर्वभावो[२] निवारितः. **गर्ह्यं** निषिद्धत्वेऽपि अपकीर्तिजनकं, लोकद्वयनाशकम् इति अर्थः. चिन्तान्तरपरित्यागेन **विशेषाकारेण तदेव चिन्तयन् दुर्मनाः** जातः. यद्यपि दण्डादिप्रकारेण[३] चौरवधं करोति तदापि अन्यद्वारा कारयति, नतु साक्षात्. इदन्तु (**आत्मकृतं**!) स्वयमेव कृतम् इति दुर्मनाः जातः. मनसः शोकजनकत्वाद् दुष्टत्वं ; शोके[४] भगवत्स्मरणात् **सुष्ठुत्वम्**, अन्यथा मूर्छैव स्यात्. तस्य अनुतापाभिलापम् आह. **अहो** इति आश्चर्ये. **मया** भगवद्भक्तेन धर्मपालकेन **अमीवं** पापम् अपराधरूपं निःशङ्कम् **अनार्यवत्** स्वभावदुष्टवत् **कृतम्**. स्वभावदुष्टोऽपि न एतादृशे अपराधं करोति इति विषयं वर्णयति **निरागसि ब्रह्मणि गूढतेजसि** इति. प्रमाणविचारेण[५] लोकविचारेण वा निरपराधे न[६] दण्डः क्रियते. किञ्च प्रमेयविचारेणापि

---

लेखः

**महीपतिः** इत्यत्र आभासे **तद्भक्तिरूपम्** इति. अनुस्मरणं **भक्तिरूपम् इति** स्वतन्त्रफलतया अनुस्मरणाऽङ्गभूत-विषय**नैरपेक्ष्येण सह तन्निरूपयति** इति अर्थः. व्याख्याने **पूर्वपक्षवद्** इति, त्याज्यत्वेन इति अर्थः. **तुशब्दस्य** पूर्वपक्षनिरसनार्थत्वाद् इति भावः. **दण्डः क्रियते** इति काकूक्तिः ;

---

१. तद्भक्तिपरमिति क. तद्रूपमितीति ग.

२. पूर्वपक्षवत्पूर्वभाव इति क-ग-लेखे. पूर्वाभाव इति घ - सम्पा. ३. दण्डादिप्रकारेणैवेति घ.

४. शोकेनेति क-घ. ५. प्रमाणविचारे इति ख. ६. न इति लेखकृतां पाठे नास्ति - सम्पा.

जीवएव दण्डो, न ब्रह्मणि. नीतिविचारेणापि यत्र सर्वनाशो न सम्भावितः तत्र दण्डः, नतु गुप्ततेजसि सर्वनाशके. गूढत्वात् न तदैव दाहः, अन्यथा तावन्मात्रदाहः स्यात्! ॥१॥

तर्हि किं कर्तव्यम् इति आकाङ्क्षायां विषयएव करिष्यति, न मया किञ्चित् कर्तव्यम् इति आह.

**ध्रुवं ततो मे कृतदेवहेलनाद् दुरत्ययं व्यसनं नातिदीर्घात् ॥**
**तदस्तु कामं ह्यघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥२॥**

**ध्रुवम्** इति. ननु वैष्णवस्य तव न किञ्चिद् भविष्यति इति आशङ्क्य आह **देवहेलनाद्** इति. अन्तःस्थितो भगवानेव तेन ध्यायमानः, स तु देवालयरूपः, अतो देवालयापकारे देवएव अपकृतो भवति इति "भक्तोऽपि भगवद्द्रोहमाचरन् नरकं व्रजेद्" (  ) इति न्यायाद् **ध्रुवं व्यसनं** भविष्यति. **व्यसनं** नाम चिकीर्षित-सर्वपुरुषार्थप्रतिबन्धपूर्वक-स्वव्यापारसहित-चित्तव्याकुलता. तच्च[१] द्विविधं— स्वाश्रय-देहादिनाशकम्[२] उपायनिवर्त्यं वा. तत्र **दुरत्ययं** स्वाश्रयनाशकं **व्यसनम्**. **दुःखेन अत्ययो** यस्य इति दुःखरूपं फलं दत्वा शाम्यति[३] इति अर्थः. अत्युत्कटत्वात् शीघ्रमेव भविष्यति इति आह **न अतिदीर्घाद्** इति. तदैव न जातः इति **अति**[४]पदम्. प्रतीकारकरणानन्तरमेव[५] सर्वस्यापि अप्रतीकार्यता-परिज्ञानात्

---

प्रकाशः

**ध्रुवम्** इत्यत्र. **विषयः** इति अपराधविषयः. **स च द्विविधः** इत्यादि. अत्र नपुंसकपाठः प्रतिभाति. **क्रियताम्** इति, अप्रतीकार्यत्वपरीक्षार्थं

लेखः

किं दण्डः क्रियते अपितु न इति अर्थः. **जीवे** इति सप्तम्यन्तम् ॥१॥

**ध्रुवम्** इत्यत्र. **स्वव्यापार** इति. स्व = व्यसनं, तद्व्यापारसहिता इति अर्थः. **स च** इति, व्यापारः इति अर्थः. **क्रियताम्** इति,

---

१. स च द्विविध इति पाठः प्रकाशे लेखे च - सम्पा.    २. स्वाश्रयदेहातिनाशक इति क-ख.

३. यास्यतीत्यर्थ इति क-ग. अत्येतीत्यर्थ इति घ-ङ.    ४. इत्यपिपदमिति घ-ङ.

५. भा.पाठानुरोधात्. प्रतीकरणानन्तरमिति क-ग. प्रतीकाराद् अनन्तरमेव इति मुद्रितपाठः - सम्पा.

प्रतीकारः क्रियताम् इति आशङ्क्य आह **तदस्तु** इति. यस्य देहादिः प्रियो भवति, यस्य भगवदपराधेऽपि देहादे रक्षणीयता भवति, तस्य प्रतीकारप्रयत्नः ; "अस्माभिर्यदनुष्ठेयम्" (महाभा. ३।२४२।१५) इति न्यायेन[१] अस्माकं तदभीष्टमेव. अतः प्रार्थयते **तदस्तु कामम्** इति. व्यसनस्य सङ्कोचो मा अस्तु, देहादिनाशस्य अस्माभिरेव चिकीर्षितत्वात्. तथा प्रार्थनायां हेतुः **अघनिष्कृताय** इति, पापापनोदाय. **मे** इति साक्षाद् ममैव **अस्तु**. ननु अपराधो धर्मः, तदर्थं धर्मिनाशो अनुचितः असमानत्वात्! तत्र आह **यथा (पुनः एवम्!) न कुर्याम्** इति. शरीरे विद्यमाने साक्षात्करणं सम्भवति, शरीराद्यभावे तु राज्य-पुत्रादिद्वारा. अतः **अद्धा** साक्षादेव **अस्तु** इति अर्थः ॥२॥

ननु अतिरागिणोऽपि एवम् उक्तिः सम्भवति इति तद्व्यावृत्त्यर्थं, पाक्षिकदोषपरिहारार्थं च, आह.

---

प्रकाशः

क्रियताम्. **धर्मः** इति. वृत्तिमत्त्वेन धर्मिणः सकाशाद् हीनः इति अर्थः. **अतः** इति साक्षादपराधकरणात्. तथाच पर्यवसानविचारे धर्मिनाशापेक्षया धर्मनाशएव ज्यायस्त्वाद् उचितः इति अर्थः ॥२॥

**अद्य** इत्यत्र. **पाक्षिकदोषपरिहारार्थम्** इति. देहादौ विद्यमाने तदध्यासात्

लेखः

अप्रतीकार्यतापरीक्षार्थं क्रियताम् इति अर्थः. **अस्माभिर्यदनुष्ठेयम्** इति. अयं न्यायः चित्रसेनगृहीत-दुर्योधनविमोचनस्य अभीष्टत्वेन मन्यमानं युधिष्ठिरं प्रति भीमवचने सिद्धः. **साक्षादेवाऽस्तु** इति, साक्षात्पापकरणाभावार्थं साक्षादेव निष्कृतिः अस्तु इति अर्थः ॥२॥

**ननु अतिरागिणः** इति. धनादिप्रसक्तचित्ताः अतिलुब्धाः धनाद्यर्थे स्वप्राणान् त्यजन्ति, नतु धनादि, तथा इति अर्थः. **पाक्षिकदोष** इति. देहनाशेऽपि पुत्रराज्यस्थित्या तत्र पापसम्भवे परम्परयापि मम व्यपदेशो

---

१. "अस्माभिः यद् अनुष्ठेयं, गन्धर्वैः तद् (दुर्योधनबन्धनं!) अनुष्ठितम्". इष्टापत्तिः इति आशयः - सम्पा.

**अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ।।**
**दहत्वभद्रस्य पुनर्न मेऽभूत् पापीयसी धीर्द्विजदेवगोभ्यः ।।३।।**

**अद्यैव** इति. शेषरक्षार्थं न आत्मनि प्रार्थना किन्तु साक्षात्सम्बन्धाभावार्थम्, अतो [१]ब्राह्मणापराध-नैमित्तिकदेहनाशः. साक्षात् **प्रकोपितो ब्रह्मकुलानलो राज्यं (बलम् ऋद्धकोशं दहतु!)** सेनां धनं च नाशयतु[२]. सात्त्विक-राजस-तामससुकृताद् एतत्त्रयं भवति. ततः तत्कारणादृष्टस्य समाप्तत्वात् निष्प्रत्यूहं दहतु. तत्र साधकम् आह **अभद्रस्य** इति, न

---

प्रकाशः

कदाचित् पुनः एवम् अपराधकरणं पाक्षिको दोषः, तत्परिहारार्थम् इति अर्थः. **आह** इति, विलम्बाभावं प्रार्थयते इति अर्थः. ननु अत्र एवं ग्लानौ स्वव्यसन-सङ्कोचाभावः प्राक् प्रार्थितएव इति किम् अनेन इति शङ्कायां "शेषे षष्ठी" (पाणि.सू. २।३।५०) बोधितम् अर्थम् आहुः **शेषरक्षार्थम्** इत्यादि. पूर्वं या व्यसनसङ्कोचाभावस्य आत्मनि प्रार्थना सा शेषरक्षार्थं न किन्तु कुरु-जाङ्गलातिरिक्ते स्वस्य साक्षात्सम्बन्धाभावबोधनार्थम्. तथाच अत्र उक्तातिरिक्तानां श्रेयोर्थम् इयं प्रार्थना इति न आनर्थक्यम् इति अर्थः. सिद्धम् आहुः **अतः** इत्यादि. यतः साक्षात्सम्बद्धाएव आन्तरापराधजनकाभिमानप्रयोजकाः **अतो ब्राह्मणापराधार्थं** ब्राह्मणापराधनिवृत्तये **नैमित्तिकं** अपराधहेतुभूत-मन्यु-मत्सरजनकाभिमान-निवर्तकतया तत्सम्बन्धी **देशनाशः** प्रार्थितः इति अर्थः. तस्य प्रार्थनस्य आकारम् आहुः **साक्षाद्** इत्यादि. यतः एतत्त्रयं नाशयेत् ततो निःप्रत्यूहं भवतु इति. अयमेव आशयः इत्यत्र गमकम् आहुः **तत्र** इत्यादि. तथाच इदं स्वविशेषणमेव

लेखः

मा स्याद् इति अर्थः. **अद्यैव** इत्यत्र. **शेषरक्षार्थम्** इति. राज्यादिरक्षार्थम् आत्ममात्रे पापफलं प्रार्थना इति न इति अर्थः. **अतो ब्राह्मणापराधः** गले सर्पप्रक्षेपादिना अतिक्रमेण ब्राह्मणापराधः **तन्निमित्तको देहनाशः, साक्षात्कोप**निमित्तो राज्यादिनाशः च इति राजाशयो वर्णितः ।।३।।

---

१. अतो ब्राह्मणापराधार्थं नैमित्तिकं देशनाश इति क-ङ-प्रकाशे - सम्पा. २. नाशयेदिति घ-ङ.

विद्यते भद्रं यस्य इति. नहि कल्याणादृष्टे प्रबुद्धे विद्यमाने **पापीयसी धीः** भवति. अतः "अपदोषतैव विगुणस्य गुणः" (शिशुपालवध ९।१२) इति न्यायेन पुण्याभावे राज्यादीनां दोषजनकत्वात् तदभावप्रार्थना युक्ता इति आह **पुनः न मे अभूद्** इति. सकृद्[१] यद् जातं तत् निमित्तदाहार्थे[२] उपयुज्यते अतः समीचीनं जातम् इति विचारेण नैश्चिन्त्यं श्लोकत्रयार्थः ॥३॥

**॥ सूतः उवाच ॥**

**स चिन्तयन्नित्थमथाशृणोद् यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ॥**
**स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणम् ॥४॥**

महतां हि फलप्राप्तौ स्पृहाभावएव[३] विलम्बहेतुः[४]. अतः स्पृहायाः जातत्वात् तत् कदा भविष्यति इति चिन्तयन् **अथ** तदनन्तरमेव शापम् **अशृणोद्** इति आह **स चिन्तयन्** इति. **इत्थम्** इति पूर्वोक्तप्रकारेण. (**मुनेः सुतोक्तो!**) शमीकप्रेषित-ब्राह्मणमुखात् **तक्षकाख्यो निर्ऋतिः** इति[५] **अशृणोत्**. यद्यपि 'इति'पदं नास्ति, न वा 'तथा'पदं, तथापि **यथा**पदस्य = सम्बन्धिनो विद्यमानत्वाद् **यथा निर्ऋतिः** तथा **अशृणोद्** इति अर्थः. स्वरूपतः पदार्थस्य ज्ञातत्वात् प्रकारस्यैव अज्ञानाद् अनधिगतार्थगन्तृत्वेन प्रकारस्यैव श्रोतव्यत्वं, "सर्वे ह्यस्य[६] मृत्यवो वेष्टा(?)" (तैत्ति.संहि. ५।६।३।१) इति श्रुतेः. मृत्यवन्तराभावात् न तक्षकस्य मृत्युहेतुत्वम् अपितु मृत्युत्वमेव इति आह **तक्षकाख्यः** इति. एवं श्रुत्वा यत् कृतवान्

---

प्रकाशः

आशयस्य गमकम् इति अर्थः. **तस्मिन् निमित्तदाहार्थे** इत्यत्र 'तन्निमित्तदाहार्थे' इति पाठः प्रतिभाति ॥३॥

**स चिन्तयन्** इत्यत्र. **सर्वे ह्यस्य मृत्यवो वेष्टा** इत्यादि. अत्र **हिः** हेतौ, **वा** एवकारार्थे. तथाच हयमेधावभृथे मृत्यूनाम् इष्टत्वेन इतरेषाम्

---

१. असदिति घ-ङ. २. तस्मिन्निमित्तदाहार्थे इति क-ख-घ-प्रकाशे - सम्पा.

३. स्पृहाभावे इति ख. ४. विलम्बे हेतुरिति क.

५. इति तथा अशृणोदिति क-ग. ६. सर्वेऽप्यस्येत्यादि ग. सर्वस्य मृत्यवो नेष्टा इति घ.

तद् आह **स साधु मेने** इति. **स** इति पूर्वोक्तो राजा, अन्यथा इदानीं विचारस्य कर्तव्यत्वे शीघ्रं साधु मननं न सम्भवेत्, ततः च कर्तव्यनिर्धाराभावात् परिमितकाले विलम्बो भवेत्. तद् आह **न चिरेण** इति. **स न चिरेण साधु मेने** किन्तु शीघ्रमेव इति अर्थः. **तक्षकानलस्य** साधुत्वे हेतुः **प्रसक्तस्य विरक्तिकारणम्** इति. विषयेषु प्रसक्तस्य विषयभोगस्य[१] अहेतुत्वं ज्ञापयन् असमासम् आह. नित्यसापेक्षत्वाद् असमर्थसमासः ॥४॥

एवं निरपेक्षतां निरूप्य कर्तव्यत्वेन संन्यासलक्षणं वैराग्यम् आह.

**अथो विहायेममगुञ्च लोकं विमर्शितौ हेयतया पुरस्तात् ॥**
**कृष्णाङ्घ्रिसेवामधिमन्यमान उपाविशत् प्रायममर्त्यनद्याम् ॥५॥**

**अथो** इति. ( **इमम् अमुं च लोकं विहाय**! ) इहामुत्रार्थफलभोगविरागो न ज्ञानार्थः किन्तु भगवत्सेवार्थः इति निरूपयितुम् आह **कृष्णाङ्घ्रिसेवाम् अधिमन्यमानः** इति. अतएव **लोक**पदप्रयोगः. नतु लोके भोगपरित्यागः, भक्तिमार्गेण भगवत्सेवायाः शरीरमात्रसाध्यत्वात्. ननु शापेन अयम् एवं

प्रकाशः

अभावात् तथा इति अर्थः. **अहेतुत्वम्** इति विरक्त्यहेतुत्वम्. ननु भावि-तत्सम्बन्धज्ञानस्यैव विरक्तिकारणत्वेन उदासीनस्य तक्षकानलस्य तथात्वाभावे परस्परापेक्षाभावेन असामर्थ्यात् कथम् अयं समासः इत्यतः आहुः **नित्ये**त्यादि. **कारण**शब्दस्य नित्यं कार्यसापेक्षत्वाद् वक्तव्ये तस्मिन् विवक्षितायाः विरक्तेरेव अत्र परम्परया तथात्वेन उपस्थिततत्वाद् अयम् असमर्थएव समासः इति अर्थः ॥४॥

**अथो** इत्यत्र. **अतएव** इति, त्यागस्य भगवत्सेवार्थत्वादेव.

लेखः

**स चिन्तयन्** इत्यत्र. "भूतेष्टका उपदधाति" इत्यत्र "अत्र वै मृत्युर्जायते, यत्र यत्रैव मृत्युर्जायते तत एवैनमेव जायते, तस्माद् अग्निचित् सर्वम् आयुरिति, **सर्वे ह्यस्य मृत्यवो वेष्टाः** तस्माद् अग्निचित्राभिरचित वा" इति संहितापञ्चमाष्टके हिरण्यवर्णानुवाके. **असमर्थसमासः** इति. ... ॥४॥

१. विषयभोग्यस्येति क-ग.

करोति परित्यागम्. अतः कथम् अस्य भक्तत्वम् इति आशङ्क्य आह **विमर्शितौ हेयतया पुरस्ताद्** इति, पूर्वमेव "त्यक्तव्यौ" इति भगवत्सेवार्थं विचारितौ. केवलशरीरेण भगवत्सेवां करिष्यन् तस्य शरीरस्य क्रियान्तरे विनियोगाभावार्थम् अनशनं कृतवान् इति आह **उपाविशत् प्रायम्** इति. **प्रायम्** अनशनम्. प्रायस्य सर्वथा अन्नपरित्यागरूपस्य भगवद्व्रतेन[१] अभीष्टत्वात् प्रायस्य कर्मत्वम्, अन्यथा तादर्थ्ये चतुर्थी स्यात्. अन्नमयत्वात् शरीरस्य तदभावे वैक्लव्येन सेवाभावम् आशङ्क्य **अमर्त्यानां नदीत्वाद्** गङ्गासमीपे उपविष्टः. न विद्यते मर्त्यं येषां देवानां तेषां नदी. प्रत्यहम् अन्नभक्षणेन देहे वृद्धि-क्षययोः जायमानत्वात्[२] पूर्वं साधकत्वेन[३] गृहीतस्य देहस्य नाशाद् देहान्तरस्य च साधकत्वसन्देहाद्, गङ्गायाः च यथास्थित-वस्तुस्थापकत्वाद् गङ्गातीरे प्रायः. अमर्त्यत्वं नदीकृतमेव, तत्तीरे

---

श्रीगोकुलनाथानां टिप्पणी

एकोनविंशे अध्याये **अथो विहाय** इत्यत्र. गङ्गातीरे उपवेशनतात्पर्यम् **अमर्त्यनदी**पदेन उक्तम् इति आहुः **अन्न** इति. अमर्त्यनदीत्वात् तत्र वैक्लव्यं न भविष्यति इति अर्थः. ननु प्रायएव तर्हि न कर्तव्यः इत्यतः आहुः **प्रत्यहम्** इति. अनयोः जायमानत्वात् स्वक्रियायामपि शरीरस्य विनियोगः स्याद् इति अर्थः. एवम् अस्मिन् शरीरे गङ्गोपयोगः उक्तः. अग्रिमशरीरे तम् आहुः **पूर्वम्** इति. **नाशात्** शापेन इति शेषः. **यथास्थित** इति. विष्णोः रक्षकत्वात् तन्नद्यपि तथैव. तथाच अस्मिन् देहे जातं सेवासाधकत्वम् एतत्सन्ततावपि गङ्गास्थित्या अनुवर्तिष्यते इति अर्थः. आधिक्यमपि

प्रकाशः

**अनशनम्** इति. "प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि" (विश्वको. ) इति कोशाद् इति अर्थः. **भगवद्व्रतत्वेन** इति, "अनश्नन् अन्यः" (मुण्डकोप. ३।१।१) इति श्रुत्या तथात्वेन. एवञ्च अत्र उपविशतेः क्रियार्थत्वं बोध्यं; यथा "सत्रमासत" इत्यत्र आसतेः क्रियार्थत्वं

---

१. भगवद्व्रतत्वेनेति क-प्रकाशे - सम्पा. २. ज्ञायमानत्वादिति ग-ङ.

३. भा.पाठानुरोधात्. साधनत्वेन इति मुद्रितपाठः - सम्पा.

जाताः अमर्त्याः भवन्ति इति. अतः इदमपि शरीरम् उत्तरोत्तरं केवलतेजसा[१] निष्पाद्यमानं गङ्गासम्बन्धाद् अमर्त्यत्वम् आपन्नं सद् भगवत्सेवायां फलमुखाधिकारि भविष्यति इति तथा यत्नः. इदानीन्तनानाम् आधिभौतिकत्वाद् आधिभौतिकरूपेण सा अभिव्यक्ता न तत्फलं साधयति ॥५॥

एवं योग्यदेहसाधकत्वेन गङ्गायाः परम्परोपयोगम् उक्त्वा भक्तौ साक्षात् फलरूपम् उपयोगम् आह.

**या वै लसच्छ्रीतुलसीविमिश्र - कृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री ॥**
**पुनाति लोकान् उभयत्र सेकात् कस्तां न सेवेत मरिष्यमाणः ॥६॥**

**या वै लसद्** इति. अधिकारिशरीरं प्राप्य भगवत्सेवायां प्रथमतः

---

श्रीगोकुलनाथानां टिप्पणी

आहुः **तत्तीरे** इति. **फल** इति. साक्षात्सेवा फलरूपा भविष्यति, अधुना तु साधनरूपा जायते इति भावः. ननु आधुनिकानां गङ्गातीरस्थितावपि अन्नाभावे वैक्लव्यं जायतएव इत्यतः आहुः **इदानीन्तनानाम्** इति. एतेन तदा अमर्त्यनदीत्वप्राकट्याद् सामाजिकानां सर्वेषामेव क्षुदाद्यभावो व्याख्यातः ॥५॥

**साक्षाद्** इति. अस्मिन् जले धातुः कमण्डलुजलम् आवरणजलं वा भावयित्वा तेन सेवा इति अर्थः. **या वै लसद्** इत्यत्र. उपयोगम् उपपादयन्ति **अधिकारि** इति. प्रक्षालनं प्रथमतो जायते अतः तत्र उपयोगः

प्रकाशः

तद्वत्. **तत्तीरे** इति मन्दाकिनीतीरे. ननु गङ्गायाः अमर्त्यत्वसाधकत्वे इदानीं कथं तद्व्यभिचारः इत्यतः आहुः **इदानीन्त** इत्यादि ॥५॥

**या वै लसद्** इत्यत्र. (कथम्भूतः साक्षादुपयोगः?) तद् उपपादयन्ति **अधिकारि** इत्यादि. तथाच सेवाधिकारे सम्पन्ने भगवान् स्वयम् आयाति

लेखः

**या वै लसद्** इत्यत्र. आभासे **भक्तौ साक्षाद्** इत्यत्र. भक्तेः फलरूपत्वात् तत्र गङ्गायाः उपयोगित्ववर्णनात् साक्षात्फलरूपम् उपयोगम्

---

१. केवलं तेजसेति क-ग.

चरणप्रक्षालनम्. भावनायां तस्यां क्रियमाणायां प्रक्षालनं जातम् इति अभिज्ञापिका गङ्गा. तस्याः अभिज्ञापकं रूपम् आह— **या** ब्रह्मसदने ब्रह्मकर्तृक-

---

श्रीगोकुलनाथानां टिप्पणी

इति अर्थः. **प्रक्षालनं जातम्** इति. पूर्वमपि तेन जलेन प्रक्षालनं जातम् अस्ति, यतः तद्रूपा गङ्गा जाता इति अर्थः. **तस्याः** इति, गङ्गायाः अभिज्ञापकं तादृशम् इति अर्थः. **या** इति आरभ्य **नेत्री** इति अन्तरूपा इति अर्थः. तथाच तत्प्राकट्याभावे सा गङ्गैव न इति भावः. **लसच्छ्री** इत्यस्य अर्थम् आहुः **ब्रह्म** इति ॥६॥

(॥ इति श्रीवल्लभकृता प्रथमस्कन्धटिप्पणी समाप्ता ॥)

प्रकाशः

तदा चरणक्षालनमेव प्रथमतः इति तत्करणत्वं च गङ्गायाः इति साक्षाच्चरणसम्बन्धात्मकः फलरूपः उपयोगः इति अर्थः. ननु भवतु एवं, तथापि योग्यदेहसाधने कथम् अस्य हेतुत्वम् इत्यतः आहुः **भावनायाम्** इत्यादि. **तस्याम्** इति सेवायाम्. **अभिज्ञापिका** इति स्मारिका. तथाच तत्स्मारणेन कर्ममय-मनःसंस्कारकतया तद् इति अर्थः. ननु ब्रह्मणा चरणक्षालनमात्रस्य कृतत्वात् कथं सेवाभिज्ञापकता इत्यतः आहुः **तस्याः** इत्यादि. ननु भगवतो मोचकस्वभावत्वात् तत्सम्बन्धिन्याः मोचकत्वमेव

लेखः

आह इति अर्थः. कथं तत्र उपयोगः इति आकाङ्क्षायाम् आहुः **अधिकारि** इत्यादि. असकृद् गङ्गासेवनेन **भगवत्सेवायाम् अधिकारिशरीरं प्राप्य** मानसीसेवाभावनायां **प्रथमतः चरणप्रक्षालनं,** ततः **तस्यां भावनायां** तत् **प्रक्षालनं जातम् इति अभिज्ञापिका गङ्गा** इति अर्थः. एवञ्च पादसेवनभक्तेः संवादित्वख्यापनेन गङ्गायाः साक्षाद्भक्तिपोषकत्वेन तदुपयोगः सिद्धएव इति भावः. अत्र भगवच्चरणारविन्द-तुलसीमिश्राम्बुनेत्रीत्वं गङ्गायाः उच्यते. तेन तुलसीविमिश्र-चरणारविन्दे पूर्वमेव स्थितं जलं नीत्वा त्रिलोक्यां समागच्छन्ती सर्वान् पुनाति इति उक्तं भवति. तदेतद् उपपादयितुम् आहुः **या ब्रह्मसदने** इत्यादि. ब्रह्मसदने यद् ब्रह्मकर्तृक-चरणक्षालनं ततः पूर्वमेव इति अर्थः.

चरणक्षालनात् पूर्वं नित्यपूजायां[1] ( **श्रीतुलसी लसत्** ! ) लक्ष्मीसमर्पित-तुलसी-चरणारविन्दे स्थिता भक्तकार्यार्थं व्यापृतस्य भगवतः, चरणस्य[2] वा. भूतसंस्कारकपक्षम्[3] आश्रित्य "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः" ( ब्रह्मसूत्र ३।१।१ ) इति न्यायेन कृतप्राणिपुण्यपुञ्जस्य – सम्बन्धिनां भक्तत्वे सति

प्रकाशः

उचितं, नतु योग्यशरीरसाधकत्वम् इत्यतः आहुः **भक्तकार्ये**त्यादि. **भक्ताः** बलिः देवाः च, तत्**कार्यम्** उद्धारः स्वर्गप्राप्तिः च, **तदर्थं व्यापृतस्य** उत्क्षेपादिक्रियां तन्वानस्य, हेतुगर्भं विशेषणं, **भगवतः चरणस्य वा भूतसंस्कारपक्षं,** भावप्रधानः. भूतसंस्कारकत्वपक्षम् आश्रित्य उक्तव्यापारवत्त्वात् तदनुसन्धाय प्रकृते कथं तत्संस्कारकत्वम् इति अपेक्षायां **तदन्तरे**ति साधनाध्यायारम्भ-सूत्रोक्तन्यायेन. तत्र हि पूर्वजन्मनि निष्कामयज्ञकर्तुः ज्ञानरहितस्य मरणे यज्ञात्मक-भगवदभिव्यक्त्यभावाद् भूतसंस्कारकएव यज्ञो जातः इति, निष्कामत्वात् च यज्ञसविचाः देवाः तुष्टाः इति, तदधीनान्येव च भूतानि इति, ते देवाः तस्य अग्रे ज्ञानयोग्यदेहसिद्ध्यर्थं तत्र तत्र हुत्वा पञ्चाग्निविद्याप्रकारेण रेतो निष्पाद्य तस्य शरीरं सम्पादयन्ति इति प्रतिपादितम्. तेन **न्यायेन कृतप्राणिपुण्यपुञ्जस्य** पूर्वजन्मनि कृतो यः

लेखः

**लक्ष्मीसमर्पित** इति. अतएव मूले **श्री**पदम् उक्तम् इति भावः. **तुलसीचरणारविन्दे** इति, तुलसीविमिश्र-चरणारविन्दे इति अर्थः. ननु लक्ष्मीपूजित-चरणस्य कथं ब्रह्मणा सह सम्बन्धः इत्यतः आह **भक्तकार्यार्थम्** इति. तथाच भक्तकार्य-व्यापृतत्वेन तत्रापि गमनं सम्भाव्यतइति तथा इति भावः. कार्यव्यापृतस्य **भगवतः** तुलसीविमिश्रचरणारविन्दे **स्थिता** इति सम्बन्धः. उरुक्रमादिचरित्रे चरणस्यैव वा तत्र गमनसम्भवात् पक्षान्तरम् आहुः **चरणस्यैव वा** इति. भक्तकार्यार्थं व्यापृतस्य चरणस्य वा सम्बन्धी इति अर्थः. तस्याः भगवत्सम्बन्धेन विवक्षितप्रयोजनम् आहुः **भूतसंस्कारपक्षम्**

१. नित्यपूजायाञ्चेति ख. २. चरणस्यैव इति पाठः लेखे - सम्पा.

३. भूतसंस्कारपक्षम् इति पाठः प्रकाशे लेखे च - सम्पा.

भगवदीयशरीर-निष्पादनार्थं भगवच्चरणे[१] सम्बन्धं प्राप्य भक्तानां तत्सम्बन्धे[२] तादृशं शरीरं निष्पादयितुं स्थितस्य – चरणप्राप्तेः पूर्वमेव तत्प्राप्तिसाधकत्वं

---

प्रकाशः

पुण्यपुञ्जः – श्रवणादीनां साधनभक्तीनां साक्षान्मोक्षसाधनत्वं ज्ञात्वा तान्त्रिकीदीक्षा-पूर्वकं विहितत्वेन कृतं यद् उपासनामार्गीयं श्रवणादिनवकं तत् पूर्वोक्तयज्ञवद् भूतसंस्कारकमेव जातमिति यथा तस्य यज्ञस्य स्वव्यापारभूत-देवाधीनानि देहजनकानि भूतानीति विद्यायोग्यदेह-निष्पादनार्थं देवसम्बन्धं प्राप्य पञ्चाग्निविद्योक्त-होमरूपेण स यज्ञः तिष्ठति तथा – पूर्वोक्तनवकमपि **सम्बन्धिनां** निषेक्तृ-पोषकरूपाणां पित्रादीनां **भक्तत्वे सति** तद्द्वारा **भगवदीयशरीर-निष्पादनार्थं** तुलसी-चरणामृत-चरणरेणुरूपाणि भूतानि संस्कुर्वद् गङ्गासम्बन्धिनि **भगवच्चरणे सम्बन्धं प्राप्य** विहितत्वेन रूपेण तिष्ठतीति **भक्तानां** तादृशपुण्यश्रवणादिकृतां **तत्सम्बन्धि तादृशशरीरं निष्पादयितुं** चरणामृत-चरणरेणुसम्बन्धिनं साक्षात्सेवायोग्यं देहं निष्पादयितुं **स्थितस्य** नवकस्य गङ्गातोषकत्वात् **चरणप्राप्तेः पूर्वमेव तत्प्राप्तिसाधकत्वं** चरणामृत-चरणरेणु-प्राप्तिसाधकत्वं **गङ्गायाः** व्यासः सूतः च **वदतीति**

लेखः

इति. उपदर्शित**न्यायेन भूतसंस्कारपक्षम् आश्रित्य कृतपुण्यपुञ्जस्य** जीवस्य **सम्बन्धिनां भक्तत्वे सति** तस्य **भगवदीयशरीर-निष्पादनार्थं** गङ्गा-तुलसीविमिश्र-**भगवच्चरणे सम्बन्धं प्राप्य** वर्तते इति अर्थः. **तदन्तरप्रतिपत्तौ** इति. अयं तदन्तरप्रतिपत्तिन्यायः साधनाध्यायारम्भे अस्ति. तत्र तथाविधकर्मकर्ता असंस्कृतभूतानि त्यक्त्वा कर्मणा संस्कृतान्येव भूतानि संपरिष्वक्तएव अन्तर्लोके गच्छति इति प्रतिपादितम्. **कृतप्राणिपुण्यपुञ्जस्य** इति. कृताः प्राण्यवस्थायां पूर्वजन्मन्येव पुण्यपुञ्जाः येन स तथोक्तः. एवं भगवदीयानां देहानां चरणसम्बन्धि-तुलसी-गङ्गाजल-रेणुभिरेव सम्पत्तिः उक्त्वा तेन प्रकृते सिद्धम् आहुः **भक्तानाम्** इत्यादि. **भक्तानां** स्वचरणसम्बन्धि-रेण्वादिभिः अलौकिकशरीरं सम्पादयितुं **स्थितस्य** भगवतः **चरणप्राप्तेः पूर्वमेव**

---

१. भगवच्चरणसम्बन्धमिति ग-घ. २. तत्सम्बन्धि इति क-ग-प्रकाशे - सम्पा.

गङ्गायाः वदति **कृष्णाङ्घ्रिरेणु** इति. **श्रीतुलस्या विमिश्रो** यो **अङ्घ्रिरेणुः**. अनेन तस्मिन् शरीरे भक्तत्व-भक्त्योः सहजसम्बन्धे हेतुः उक्तः. बहूनां भूमौ स्थितानां भक्तानां तादृशशरीर-निष्पादनार्थं **कृष्णाङ्घ्रिरेणवएव अभितः अधिका** यस्य तादृशम् **अम्बु नयति** इति अम्बुनेत्री. परिमितं च गङ्गाजलं, परिमितं च कमण्डलुजलम्, अपरिमिताः च चरणरेणवइति न सम्यक्प्रक्षालनपर्याप्तम् अम्बु भवति. अतो रेणवएव अधिकाः. इदानीन्तनजलेऽपि भक्तं प्रत्येव तदभिव्यक्तीकरणं, न अन्यं प्रति इति **नेतृ**पदेन[1] सूचितम्. तस्य प्रासङ्गिकं फलद्वयम् आह **पुनाति** इति. त्रीनपि **लोकान् उभयत्र** अन्तर्बहिः **सेकात्**[2] **पुनाति. सेशान्** वा, पालकमहादेव-सहितान्. अनेन भक्तानां भूमौ उत्पन्नानाम् [3]अधिकारदोषसम्बन्धाभावः सूचितः. अतएव यो **मरिष्यमाणः** पूर्वदेहत्यागेच्छुः (**तां!**) तादृशशरीरोत्पादिकां गङ्गां **को वा न सेवेत!** ॥६॥

एवं गङ्गातीरे प्रायोपवेशनं कर्तव्यम् इति युक्त्या निश्चित्य, स्वस्य अभक्तत्वे सर्वम् अन्यथा स्यादिति तद्दोषं पाण्डवेयत्वेन परिहरन्,

---

प्रकाशः

एतादृशचरणसम्बन्धेन तस्याः तादृशं सामर्थ्यम् इति अर्थः. **भक्त्योः** इति विहिताविहितभक्त्योः. **सेशान्** इति. अस्मिन् पक्षे **उभयत्र** इत्यस्य स्थितिदशायां संहारदशायां च इति अर्थो बोध्यः ॥६॥

**इत्थं व्यवच्छिद्य** इत्यत्र. **अन्यथा स्याद्** इति, आधिदैविकरूपा-

लेखः

तादृशशरीर**प्राप्तिसाधकत्वं गङ्गायाः** इति अर्थः. **भक्तत्व-भक्त्योः** इति. तुलस्याः भक्तत्वेन तत्सम्बन्धे भक्तत्वसम्बन्धः, चरणस्य भक्तित्वेन तत्सम्बन्धेन भक्तिसम्बन्धः च उक्तः इति अर्थः. यद्यपि भक्तत्वं = भक्तिरेव तथापि भक्तत्वाभिज्ञापक-बहिस्तेजोवेषादि-चिह्नानि **भक्तत्वेन** उच्यन्ते, **भक्तिपदेन** च आन्तरो भावः इति अदोषः इति ॥६॥

---

१. नेत्रपदेनेति ग-घ.　　२. सेकानिति ख. सेशानिति ग-घ.

३. भा.पाठानुरोधात्. अधिकदोष- इति मुद्रितपाठः -सम्पा.

अग्रिमकर्तव्यम् आह.

**इति व्यवच्छिद्य स पाण्डवेयः प्रायोपवेशं प्रति विष्णुपद्याम् ॥**
**दध्यौ मुकुन्दाङ्घ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसङ्गः ॥७॥**

**इति व्यवच्छिद्य** इति. **विष्णुपद्यां प्रायोपवेशनं प्रति** पूर्वोक्तप्रकारेण[१] पक्षान्तरनिराकरणपूर्वकं **विशेषेण** इमं पक्षम् **अवच्छिद्य** निश्चित्य **दध्यौ** इति सम्बन्धः. यतः **स पाण्डवेयः**. कदाचिद् आध्यात्मिकस्य बलिष्ठत्वे[२] पूर्वोक्तं न भविष्यति इति पूर्वसहायत्वेन **मुकुन्दाङ्घ्रिमेव दध्यौ.** मोक्षदातृत्वेन स्वतन्त्रतया ध्यानस्य उपयोगं वारयति. **अङ्घ्रिम्** इति एकत्वसङ्ख्या अविवक्षिता ग्रहवद् उत्तरत्र[३] उपयोगार्थम्. तेन सन्निधानात् पूर्वशेषत्वं फलिष्यति. अनन्या[४] भक्तिः पुरुषार्थसाधिका इति तां वक्तुम् आह **अनन्यभावः** इति. न विद्यते अन्यस्मिन् भावो यस्य. प्राय-गङ्गादीनाम्[५] अपेक्षितत्वात् स्वतन्त्रता मा भवत्विति एतद् उक्तम्. अनेन मनोदण्डोऽपि उक्तः. वाचनिकं कायिकं च आह **मुनिव्रतो मुक्तसमस्तसङ्गः** इति. मुनिवद् व्रतं यस्य ; वृथालाप-परिवर्जनं[६] मौनं, मुनिव्यतिरिक्तैः सह वा भाषणनिषेधः. अन्यथा

---

प्रकाशः

ऽनाविर्भावेन स्वविचारित-कार्यानुपयोगि स्यात्. **आध्यात्मिकस्य** इत्यादि. अन्तःकरणनिष्ठ-पापादेः **बलिष्ठत्वेन पूर्वोक्तं** प्रायोपवेशनम् इति अर्थः. **ग्रहवद्** इत्यादि. यथा "ग्रहं सम्मार्ष्टि" (                ) इति सम्मार्गवाक्ये श्रूयमाणापि एकत्वसङ्ख्या ग्रहान्तराणाम् उत्तरत्र होमादिकर्मणि विनियोगार्थम् उद्देश्यगतत्वाद् अविवक्षिता इति आद्रियते तथा अत्रापि चरणान्तरस्य ध्यानोपयोगार्थम् अविवक्षिता इति अर्थः. अविवक्षितत्वस्य फलम् आहुः **तेन** इत्यादि. **पूर्वशेषत्वम्** इति सेवायोग्य-शरीरप्राप्ति-शेषत्वम्. अनन्यभावत्वकथन-प्रयोजनम् आहुः **प्रायेत्यादि. अपेक्षितत्वाद्** इति, पूर्वश्लोकद्वये कर्मत्वेन शुद्धिजनकत्वादिना च तथात्वात्.

---

१. पूर्वोक्तप्रकारान्तरेणेति ख.  २. बलिष्ठत्वेनेति क-ग-प्रकाशे - सम्पा.

३. उत्तरोत्तरत्रेति क.  ४. अनन्या भक्तिमिति ख. अन्यथा भक्तीति घ.

५. प्रायो गङ्गादीनामिति क-घ.  ६. वृथालापवर्जितमिति ख.

गृहीतव्रतस्य त्यागः प्रसज्येत! मुक्ताः सर्वे सङ्गाः येन ; पुत्र-मित्रादिभिः मनसा सङ्गाः परित्यक्ताः, आज्ञया शरीरादपि व्यावर्तिताः ॥७॥

एवं स्वकर्तव्ये कृते शिष्टं भगवानेव करिष्यति इति भागवतं शुकं च योजयन्, समाजएव रसः उत्पत्स्यते इति भक्तिरसोत्पत्त्यर्थं भगवत्कृतं मुनीनाम् आगमनम् आह.

**तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः ॥**
**प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनन्ति सन्तः ॥८॥**
**अत्रिर्वसिष्ठश्च्यवनः शरद्वान् अरिष्ट-नेमिर्भृगुरङ्गिराश्च ॥**
**पराशरो गाधिसुतोऽथ राम उतथ्य इन्द्रप्रमदेध्मवाहौ ॥९॥**
**मेधातिथिर्देवल आर्ष्टिषेणो भरद्वाजो गौतमः पिप्पलादः ॥**
**मैत्रेय और्वः कवषः कुम्भयोनिर्द्वैपायनो भगवान्नारदश्च ॥१०॥**
**अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च ॥**
**तानार्षेयप्रवरान् समेतान् अभ्यर्च्य राजा शिरसा ववन्दे ॥११॥**

**तत्र उपजग्मुः** इति. **उप** इति कालसामीप्यम्. अद्यैव तदर्थं भगवता आज्ञप्ताः ते समागताः इति न किन्तु पूर्वमेव लोकतीर्थपावित्र्यार्थं भगवता नियुक्ताः तथा कुर्वन्ति इति आह **भुवनं पुनानाः** इति. अन्यथा मुनीनाम् एतच्छेषत्वं स्यात्. पावने सामर्थ्यम् आह **महानुभावाः** इति. अनाहूतानामपि अत्रत्य-प्रयोजनज्ञाने हेतुः **मुनयः** इति. **सशिष्याः** इति शिष्याणां पुनर्बोधनव्यावृत्त्यर्थं रसिकतयैव अग्रे कथाकरणार्थम्[१]. **प्रायेण** इति स्वतन्त्रतया तीर्थाभिगमनरूपा-ऽऽश्रमधर्मकर्तृ-व्यावृत्त्यर्थम्. यद्यपि "यद्यदाचरति श्रेष्ठः" (भग.गीता ३।२१) इति न्यायेन लोकशिक्षार्थमपि

---

प्रकाशः

**आज्ञया** इति, गृहमेधे पुत्रादीनाम् आज्ञादानेन ॥७॥

**तत्र** इत्यत्र. **कालसामीप्यम्** इति. यस्मिन् काले प्रायोपवेशं कृतवान् तदैव इति अर्थः. **पुनर्बोधनव्यावृत्त्यर्थम्** इति. एवं कथाकरणार्थं यत् पुनर्बोधनं तद्व्यावृत्त्यर्थं, शिष्टाचारदर्शनादेव तत्सिद्धेः इति. **अत्रिः** इत्यत्र.

---

१. तथा करणार्थमिति क.

तीर्थाभिगमनं सम्भवति तथापि न तत् मुख्यं प्रयोजनं ; तद् आह **अपदेशैः** इति, व्याजैः इति अर्थः. एतेषां पावनकर्तृत्वं साधुत्वेनैवेति अन्ते तद् आह (**सन्तो हि तीर्थानि पुनन्ति!**). आत्रेयाः ब्राह्मणेषु मुख्याः इति प्रथमतो[१] **अत्रिः** गणितः. **शरद्वान्** कृपः, अन्यो वा. **गाधिसुतो** विश्वामित्रः. **रामः** परशुरामः. **उतथ्यो** गौतमपिता. एवं [२]ब्रह्मर्ष्यादि-भगवद्भक्तान्ताः गणिताः. **अथ** इत्यन्ताः ज्ञानप्रतिपादकाः, रामादि-पिप्पलादान्ताः[३] धर्मप्रतिपादकाः, मैत्रेयादि-नारदान्ताः भक्तिप्रतिपादकाः. आद्याः नवधा गुणैः. प्रकृति-विकृतिभेदेन पञ्चविधस्य कर्मणो दशविधत्वात् तथा मध्यमाः. षड्गुणैश्वर्याद् भगवतः तत्प्रतिपादकाः भक्ताः षड्विधाः. **च**काराद् नारदशिष्याः तत्त्वेन गणिताः. अन्येऽपि[४] तच्छिष्याः प्रकीर्णकाः, तान् आह **अन्ये च** इति. अतएव ऋषित्रय-ग्रहणम्. **अरुणः** कश्चिद् ऋषिः[५]. तेषु आगतेषु राज्ञः कृत्यम् आह **तान्** इति. **आर्षेयेषु** ऋषिवंशेषु **प्रवराः** श्रेष्ठाः, यज्ञे वृताः वा. एकदैव सर्वे समागताः इति समुदायेनैव पूजनं, यथायोग्यं वा तत्सम्मत्या. वन्दनान्ता पूजा इति पूजासमाप्तिसूचकं वन्दनम् ॥८-११॥

**सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् ॥**
**विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ॥१२॥**

"यस्तु इच्छया कृतो धर्मः" (भाग.पुरा. ७।१५।१४) इति दोषपरिहारार्थम् अव्यग्रेषु **तेषु** विज्ञापनार्थं (**भूयः!**) पुनः **प्रणामं कृत्वा** – **स्वचिकीर्षितं** कर्तव्यम् अकर्तव्यं वा इति निर्धारार्थं बहिर्दृष्ट्या उत्तरनिराकरणार्थं

---

प्रकाशः

**अन्यो वा** इति. कृपस्य शारद्वतत्वेन अप्रसिद्धेः, गौतमस्य अग्रे उक्तत्वात् च तथा इति अर्थः. **भगवद्भक्तान्ताः** इति नारदान्ताः. तेषु अवान्तरविभागम् आहुः **अथ** इत्यादि ॥८-९॥

---

१. प्रथमे तान्निर्गणिता इति क. प्रथममेवाऽत्रिरिति ग-घ-ङ. २. ब्रह्मऋष्यादीत्यादि क-ग-घ.

३. पिप्पलान्ता इति क-ख-ग-ङ. ४. अन्येऽप्येतच्छेषा इति क-ग-ङ. अन्येऽप्येवं शेषा इति घ.

५. द्रष्ट. "अथ होवाच उद्दालकम् आरुणिं गौतमः" (छान्दो.उप. ५।१७।१) - सम्पा.

च अन्तर्निविष्टः[१] सन्, (**उपस्थितोऽग्रे अभिगृहीतपाणिः!**) विनयार्थम् उत्थितो अञ्जलिं बद्ध्वा – **विज्ञापयामास** इति आह **सुखोपविष्टेषु** इति. **अथ** इति पूजावैयग्र्यसमाप्त्यनन्तरम्. **विविक्ते** सङ्घातात् पृथक्कृते आत्मनि **चेतो** यस्य. **आभिमुख्येन गृहीतौ पाणी** येन ॥१२॥

प्रथमतः स्ववृत्तान्तं कथयन् श्लोकद्वयेन ऐहिकामुष्मिकं च साधनद्वयं द्वयेन प्रार्थयते. जातं द्वयं— भगवत्कृपा महत्कृपा च, तथापि महत्कृपायाः[२] हेतुत्वात् (तां!) प्रथमम् आह.

**॥ राजा उवाच ॥**

**अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः ॥**
**राज्ञां कुलं ब्राह्मणपादशौचाद् आराद् विसृष्टं बत गर्ह्यकर्म ॥१३॥**

**अहो** इति आश्चर्ये. **वयम्** इति श्लाघायाम्. **धन्यतमाः** – धनं पुरुषार्थम् अर्हन्ति इति धन्याः, तत्र अतिशयः सर्वपुरुषार्थप्राप्तिः – भवन्तः च पुरुषार्थरूपाः ते च सम्प्राप्ताः इति. ननु[३] आगमनमात्रेण[४] स्वाधीनत्वाभावात् कथं पुरुषार्थप्राप्तिः? तत्र आह **महत्तमेति**, भगवदन्तरङ्गैः **अनुग्रहणीयं शीलं** येषाम्. तेषां शीले[५] ऋषिभिः अनुग्रहः कृतः "यादृशः तादृशो अस्य स्वभावो भवतु, वयं तेषां पुरुषार्थसाधकाः भविष्यामः" इति. अतएव **नृपाणां** मध्ये (**धन्यतमाः!**) श्रेष्ठाः. ननु राज्ञां ब्राह्मणानां च तुल्यत्वाद् एवंरूपता युक्तैव, किम् आश्चर्यम्, "अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः" (भाग.पुरा. ३।२२।४) इति वाक्यात्, तत्र आह **राज्ञां कुलम्** इति. तद्वाक्यं महापुरुषाणां कार्यप्रशंसापरं, वस्तुतस्तु राज्ञां कुलमात्रम्. यत्र ब्राह्मणाः चरणक्षालनं कृत्वा अन्तःप्रविशन्ति तत् शुद्धाशुद्धमध्ये[६] वेदिकारूपं स्थानं भवति, तत् **पादशौचम्** इति उच्यते. ततोऽपि (**आराद्!**)

प्रकाशः

**अहो** इत्यत्र. **हेतुत्वाद्** इति भगवत्कृपाहेतुत्वात्. **अतो** **ह**ीत्यादि. **अतो** हेतोः **ब्रह्म क्षत्रं च** इति द्वे **अन्योन्यम् आत्मानं रक्षतः** इति

१. अन्तर्निष्ट इति ग. अनन्यनिक इति घ. २. महत्कृपयेति क-ग. ३. नचाऽऽगेमेनत्योदिति ग.
४. मात्रेणैवेति घ. ५. शीलैरिति ग-घ-ङ. ६. तच्छुद्धाशुद्धकर्ममध्ये इति ग.

दूराद् **राज्ञां कुलम्**. तत्रापि (**विसृष्टं**!) गन्तुम् अयोग्यम्. अन्तर्गमनं तु दूरापास्तम् इति अर्थः. **बत** इति हर्षे, इदानीं तद्विपरीतं जातम् इति. तेषां निकृष्टत्वे हेतुः **गर्ह्यकर्म** इति, **गर्ह्यं** परहिंसालक्षणं **कर्म** यस्य ॥१३॥

एवं तेषां कृपाम् उक्त्वा भगवत्कृपाम् आह.

**तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम् ॥**
**निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते ॥१४॥**

**तस्यैव** इति. राज्ञां कुले कस्यचिद् गर्ह्यं कर्म न भवेदपि, अहन्तु सएव. अतः **तस्य** गर्ह्यकर्मणो **मे,** तत्रापि **अघस्य** केवलं पापरूपस्य – पूर्वं क्षत्रियत्वमपि स्थितम्, अधुना कुलाङ्गारत्वाद् अघत्वम्, एतादृशस्यापि – **निर्वेदमूलो द्विजशापरूपो** भगवानेव जातः. भगवतः तथा भवने हेतुः **परावरेशः** इति. अन्यथा परेशएव स्याद्, [१]अवरेषाम् अस्मदादीनाम् अनुद्धारकः स्यात्! ननु शापस्य कथं भगवद्रूपत्वं? तत्र आह **निर्वेदमूलः** इति, वैराग्यमूलः. षड्गुणानां मध्ये पर्यवसानरूपस्य वैराग्यस्य नहि अन्यो मूलं भवितुम् अर्हति. अतएव अनन्तरूपत्वाद् भगवतो **द्विजशापो**ऽपि एकं **रूपम्**. ननु शास्त्रद्वारा कथं न भगवान् वैराग्यहेतुः जातः? अघत्वं तु कृपायाम् अप्रयोजकम्! अतः आह **गृहेषु व्यासक्तचित्तस्य** इति. बहुवचनन्तु पुत्रादिगृहेष्वपि विशेषासक्तिः, स्वस्यापि साधनत्वेन तद्योजनात्. **अभीक्ष्णम्** इति श्रवणेऽपि समयाभावः, "न तस्य तत्त्वग्रहणाय साक्षाद्" (भाग.पुरा. ५।११।३) इति न्यायात्. अतः शास्त्राणाम् असामर्थ्यम्.

---

प्रकाशः

अन्वयः. **तद्विपरीतम्** इति उत्तमोत्तमम् ॥१३॥

**तस्यैव** इत्यत्र. **अन्यथा** इति शापरूपत्वेन अभवने. एतस्यैव विवरणम् **अन्यथा अवरेषाम्** इत्यादि. **समयाभावः** इति, शास्त्रश्रवणे अवकाशाभावः. **न तस्य** इति. इदं पञ्चमस्कन्धे जडवाक्यं "न तस्य तत्त्वग्रहणाय साक्षाद् वरीयसीरपि वाचः समासन्, स्वप्ने निरुक्त्या गृहमेधिसौख्यं न

---

१. अन्यथा अवरेषामिति क-ग-घ-प्रकाशे - सम्पा.

ननु गृहएव कथं न मोचयति, सर्वसमर्थत्वाद् भगवतः, तत्र आह **यत्र प्रसक्तः** इति. येषु गृहेषु **प्रसक्तः (आशु!)** शीघ्रं हृदये **भयमेव धत्ते,** नतु भयापहारिणम्. अतो भयनिवृत्त्यर्थं तथा जातम् इति अर्थः ॥१४॥

एवं तयोः उपकारम् उक्त्वा इदानीं स्वकर्तव्यम् आह.

**तं मोपयान्तं प्रतियन्तु विप्रा गङ्गा च देवी धृतचित्तमीशे ॥**
**द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः ॥१५॥**

**तं मोपयान्तम्** इति. एवम् उपकारविषयं **माम् उपयान्तं** भवच्छरणम्[1] आगच्छन्तं **प्रतियन्तु** जानन्तु. हे **विप्राः** विशेषेण पूरकाः ; मामपि पूरयिष्यन्ति इति भावः. देवतारूपा[2] **गङ्गा च मां** शरणागतं जानातु. गङ्गायाः जलप्रकृतित्वं लोकप्रसिद्धम् इति अचेतनशरणागतेः अयुक्तत्वाद् **देवी** इति उक्तम्. भक्तचरणोदक-शरणागतिः न भगवन्मार्गविरोधिनी. ननु किं शापविमोक्षार्थं प्रार्थयसे? न इति आह **ईशे** भगवति **धृतचित्तं मां द्विजेन** बालकेन **उपसृष्टः** प्रेषितः कृत्रिमरूपेण तक्षकरूपेण **वा कुहकः** कृत्रिमवेषेण वञ्चकः **तक्षको वा, वा** इति अनादरे, **अलम्** अत्यर्थं **दशतु!** न काचित् मम क्षतिः इति अर्थः. ननु अस्माकं तर्हि क्वः उपयोगः? तत्र आह **गायतः विष्णुगाथाः** इति. एतावता बहिश्चित्तता निवारिता. पाक्षिकोऽपि दोषः परिशङ्कनीयः इति चित्तस्य चञ्चलत्वाद् एवं प्रार्थना ॥१५॥

---

प्रकाशः

यस्य हेयानुमितं स्वयं स्याद्'' इति. अर्थस्तु— यस्य गृहमेधिसौख्यं स्वप्नदृष्टान्तेन हेयतया अनुमितं स्वतो न स्यात् तस्य वरीयसः शास्त्रीया वाचोऽपि[3] तत्त्वनिश्चयाय न बभूवुः इति. तन्न्यायाद् इति अर्थः. **तथा जातम्** इति, गृहे मोचनं न जातम् इति अर्थः ॥१४॥

**तं मोपयान्तम्** इत्यत्र. **तयोः** इति भगवदीय-भगवतोः ॥१५॥

---

१. भगवच्छरणमिति क-ग-घ. २. देवतारूपा चेति ख.

३. वाचोऽपि तस्य इति मुद्रितपाठः कि.पाठानुरोधाद् निरस्तः -सम्पा.

एवम् ऐहिकं प्रार्थयित्वा आमुष्मिकं प्रार्थयते.

**पुनश्च भूयाद् भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु ॥**
**महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥१६॥**

**पुनः च** इति. मुक्तिस्तु न सम्भाविता, न अपेक्षिता ; राज्यरस-भक्तिरसयोः अत्यन्तवैलक्षण्याद्[1] विरुद्धधर्माश्रयत्वाच्च **भगवति रतिरेव** अस्तु, न राज्यादिः[2]. जन्म तु अवश्यम्भावि, देह-जाति-गुण-क्रियासु न कोऽपि रसः, अतो **यां यामेव सृष्टिम् उपयामि** तत्र तत्र **भगवति रतिः (भूयाद्!)** अस्तु. ननु सर्वस्यापि भगवत्त्वात् पुत्रादिषु रतिः सिद्धैव, तद् अलं प्रार्थनया इत्यतः आह **अनन्ते** इति, देश-काल-वस्त्वपरिच्छिन्ने. तादृशत्वं[3] न पुत्रादिषु. तस्याः रतेः कारणमपि प्रार्थयते **प्रसङ्गः च**

प्रकाशः

**पुनश्च** इत्यत्र. ननु प्रवृत्तिपराणां स्वर्गस्येव निवृत्तिपराणां सर्वेषां मुक्तेरेव अभीष्टत्वात् सैव अमुत्र कुतो न प्रार्थ्यते इति आकाङ्क्षायाम् आहुः **मुक्तिः** इत्यादि. अपराधित्वाद् **न सम्भाविता,** भगवदीयत्वाद् **न अपेक्षिता,** अतो न प्रार्थ्यते इति अर्थः. तर्हि भक्तिः कुतः प्रार्थ्यते इत्यतः आहुः **राज्येत्यादि. विरुद्धधर्माश्रयत्वाद्** इति. भक्तौ बन्धरूपत्वेऽपि अबन्धरूपत्वस्य तृतीयस्कन्धे व्युत्पादनाद् द्वयोः धर्मयोः तत्र सत्त्वेन तथात्वात्. तर्हि जनकादेरिव दोषाजनकं राज्यमेव कुतो न प्रार्थ्यते इति आकाङ्क्षायां कैमुतिकेन आहुः **जन्मेत्यादि.** ननु सकृदुत्पन्नायामपि रतौ कार्यसिद्धेः अव्याहतत्वाद् रतिकारणप्रार्थनस्य किं प्रयोजनम् अतः आहुः **अन्यथा** इत्यादि. **अन्यथा** इति साधनप्रार्थनाभावे. **साधनम्** इति रतिदान-वररूपं

लेखः

**पुनश्च भूयाद्** इत्यत्र आभासे **एवमैहिकं प्रार्थयित्वा** इति. राज्ञः इहलोकस्थितौ यत् प्रार्थनीयं विष्णुगाथाश्रवणं, तत् प्रार्थयित्वा इति अर्थः. व्याख्याने. रतिकारणत्वेन चिरस्थायिसाधनान्तरम् अप्रार्थितं प्रार्थयद् भगवदीयसङ्गमेव सार्वदिकं तत्त्वेन प्रर्थितम्. तत्प्रयोजनम् आहुः **अन्यथा**

१. अत्यन्तमिति क. अन्यतरेति घ-ङ. २. राज्यादीति घ. ३. एतादृशत्वमिति क-ग.

इति. अन्यथा सकृद्रतिम् उत्पाद्य कार्यार्थम् आक्षिप्तं साधनम् उपक्षीणं[१] स्यात्. नच सर्वदैव रतिः प्रार्थ्या, रतेः मनोधर्मत्वेन सर्वदा तत्स्फुरणे देहादिनिर्वाहोऽपि न स्यात्. तादृशरतौ प्रमाण-साधनत्वाभावात् च – वरस्यैव

प्रकाशः

महत्प्रसङ्गरूपं वा. **उपक्षिप्तम्** इत्यत्र 'उपक्षीणम्' इति पाठः प्रतिभाति. तथाच आक्षिप्तस्य साधनस्यैव उपक्षीणत्वे पुनः जन्मान्तरे रत्यभावाद् महदेव अनिष्टम् आपद्येत इत्यतः कारणप्रार्थनं युक्तम् इति अर्थः. ननु एवं रतेः आवश्यकत्वे सैव सर्वदा अस्तु इति प्रार्थनीयं, तथा सति सकृज्जातेनैव साधनेन सर्वदा तस्याः सिद्धिः इत्यतः आहुः **नच** इत्यादि. **अपिना** सेवानिर्वाहः सङ्ग्राह्यः. ननु "अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते, तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्" (भग.गीता ९।२२) इति भगवद्वाक्याद् भगवतैव देहादिनिर्वाहसम्भवाद् न तदनुपपत्त्या असार्वदिक-तत्प्रार्थनं युक्तम् इति चेत्, तत्र आहुः **तादृशे**त्यादि. सार्वदिकरतेः प्रमेयैकसाध्यत्वेन **प्रमाणस्य साधनत्वाभावात्**. यद्वा राजा हि भगवदनुभावानुभवात्

लेखः

इत्यादि. कारणत्व-परिच्छिन्नत्वे इति अर्थः. **उपक्षिप्तम्** इति, कार्यम् उत्पाद्य उपक्षीणम् इति अर्थः. ननु साधने उपक्षीणे पुनः रतिः प्रार्थ्या इति चेद्, अत्र आहुः **न च सर्वदैव** इति. तथाच देहनाशे रतेरपि अनिर्वाहात् किम् अनया प्रार्थनया इति भावः. यद्वा असकृद्रतौ देहाद्यनिर्वाहे को वा प्रार्थयेत् पुनः इति भावः. ननु "ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानम् अदस्तथेदम्" (भाग.पुरा. ११।१२।१२) इत्याद्युक्तिदिशा रतिसद्भावेऽपि व्रजरत्नानां यथा देहादिस्थितिः तथा अत्रापि अस्तु इत्यतः आहुः **तादृश** इति. विस्मारकं फलरूपं तादृशरतौ प्रमाणबोधित-साधनकत्वाभावाद् इति अर्थः. "नेमं विरञ्च्यः" (भाग.पुरा. १०।९।२०) इति, "स्वसाधुकृत्यं विबुधायुषापि वः" (भाग.पुरा. १०।२९।२२) इत्यादिवाक्यात् तादृशत्वं तत्रैव सिद्धं, न अन्यत्र कुत्रापि इति भावः.

१. उपक्षिप्तमिति क-ग-प्रकाशे-लेखे - सम्पा.

साधनत्वे उत्प्रेक्षायाः च प्रमाणत्वे प्रकारान्तरे च युक्तिबाधाद् – भगवत्त्वं पर्यवस्यति ; तच्च भक्तानाम् अनपेक्षितम्. रतिः च अनित्या, स्नेहत्वात्,

प्रकाशः

तत्साक्षात्कारार्थं प्रयतते. स हि बाधयोग्यव्यतिरिक्त-ज्ञानत्वेन प्रमाणं, यथा "आकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषम्" (भाग.पुरा. १०।२७।४) इति शुकस्य ज्ञानम्. तच्च कादाचित्कयैव सत्सङ्गजन्यया रत्या, नतु व्रजरत्नानामिव सार्वदिकया, तस्याः विरहसहायत्वेन तदजनकतया तत्साधनत्वाभावात्. अतो न तत्प्रार्थनम् इति अर्थः. ननु मास्तु सार्वदिकरतिप्रार्थनं, तथापि प्रतिजन्मीन-तत्साधनप्रार्थनम् अयुक्तं, त्रिशङ्कूपाख्याने त्रिशङ्कोः स्वर्गसाधनी-भूत-पुण्याभावेऽपि सकृद्दत्ताद् विश्वामित्रवरादेव फलसिद्धेः उक्तत्वाद् अत्रापि वरस्यैव विवक्षित-रतिसाधनत्वस्य शक्यवचनत्वेन ततएव नानाजन्मसु रतिसम्भवाद् इति शङ्कायाम् आहुः **वरस्य** इत्यादि. एतज्जन्मीन-**वरस्यैव** तादृशतत्**साधनत्वे** अङ्गीकृते त्रिशङ्क्वादिवद् अत्रापि फलं भविष्यति इति सम्भावनायाः **प्रमाणत्वे** अङ्गीकृते सति रत्यधिकरणस्य स्वस्य शापेन लौकिकतुल्यतया **प्रकारान्तरे** त्रिशङ्कुन्यायेन उभयाभावे **च** प्रसक्ते **युक्तिबाधाद्** उत्प्रेक्षायां प्रमाणत्वकल्पनस्य अनपेक्षिताभ्यागमस्य आपातेन त्रिशङ्क्वादि-वरन्यायबाधाद् **भगवत्त्ववरेण** सायुज्यं **पर्यवस्यति. तच्च भक्तानां** भगवदीयत्वेनैव परिसमाप्त-सर्वार्थानाम् **अनपेक्षितम्.** अतः

लेखः

ननु तत्रापि वरदानस्य साधनत्वेन श्रुतत्वात् तां युक्तिं प्रमाणत्वेन अवलम्ब्य वरएव साधनत्वेन कल्प्यताम्, अतो न प्रमाणाभावो न वा साधनाभावो वक्तुं शक्यः इत्यतः आहुः **वरस्यैव** इत्यादि. **उत्प्रेक्षायाः** इति, युक्तेः इति अर्थः. अत्र अयमाशयः — तासां हि वरदानेन या रतिः सा न लोके दृष्टान्तीकर्तुं योग्या, भगवद्धर्माणाम् ऐश्वर्यादीनामिव तद्धर्माणामपि अनन्यसिद्धत्वात्, तासां भगवत्स्वरूपाभिन्नत्वात्. अन्यथा अद्वैतहानिः प्रसज्येत, आत्मारामत्वादिकं च भगवति बाधितं स्यात्. अतः वरेण तादृशभावप्रार्थनेन (**भगवत्त्वं पर्यवस्यति!**) भगवत्समानरूपतैव भवति. **तच्च** दास्यधर्मयोग्यानां **भक्तानाम् अनपेक्षितं** च अयोग्यं च इति.

तस्य च अन्तःकरणधर्मत्वात्. न वा इच्छाविशेषो रतिः, विशेषस्य निर्वक्तुम् अशक्यत्वात्. सुखविषयिणीच्छा न रतिः, स्वर्गकामनायाः तथात्वप्रसङ्गात्,

प्रकाशः

प्रतिजन्मीन-रत्यर्थं प्रतिजन्मीनरति-कारणप्रार्थनं युक्तमेव इति अर्थः. एवं वरस्वरूप-विचारेण प्रतिजन्मीन-साधनप्रार्थनस्य युक्तत्वम् उपपाद्य रतिस्वरूप-विचारेण उपपादयन्ति **रतिः च** इत्यादि. **स्नेहत्वाद्** इति, "प्रेमा ना प्रियता हार्दं प्रेम स्नेहः" (अम.को. १।७।२७) इति कोशेन प्रियतारूपत्वात्. तथाच अन्तःकरणधर्मत्वेन सिद्धे अनित्यत्वे [१]प्रतिजन्मीन-तत्कारणप्रार्थनं युक्तम् इति अर्थः. ननु रतेः सविषयत्वेन इच्छारूपत्वात् तस्याः च अनुकूलबुद्धिवेद्याद् विषयादेव सिद्धेः तत्साधनप्रार्थनम् अनर्थकम् इति आकाङ्क्षायां रतेः स्वरूपं विवेक्तुं विकल्पयन्ति **न वा** इत्यादि. **पुत्रादिषु तदभावप्रसङ्गाद्** इति, पुत्रादिविषयिण्याः रतेः इच्छारूपत्वाभावेन रतित्वाभावप्रसङ्गाद् इति अर्थः. एतेनैव ज्ञानरूपतापि वारिता, यत्नरूपता च. अनुकूलबुद्धिवेद्यत्वेन द्वेषादिरूपतापि तथा. "प्रीणामि", "अनुरज्यामि" इति अनुव्यवसायगम्यत्वाद् अदृष्टरूपतापि निवारिता. सविषयत्वात् च न सुखरूपता.

लेखः

अतएव "न उद्धवोऽण्वपि मन्न्यूनः" (भाग.पुरा. ३।४।३१) इति, "नैवात्मा च यथा भवान्" (भाग.पुरा. ११।१४।१५) इत्यादिना साक्षाद्भगवता स्तुतैरपि श्रीमदुद्धवैः तद्भावादिकम् अप्रार्थ्यैव "आसामहो चरणरेणुजुषाम् अहं स्याम्" (भाग.पुरा. १०।४४।६२) इत्यादिना दासत्वमेव प्रार्थितम् इति भावः. एवं साधनस्वरूपविचारेण रतेः असाध्यत्वम् उपपाद्य रतिस्वरूपविचारेण तद् वदन्तः एतद्रतिं लौकिकरतेः सकाशाद् व्यवच्छेत्तुं तत्स्वरूपं तावद् आहुः **रतिश्चाऽनित्या** इति. विशिष्टनिर्वचनमेव प्रतिघ्नन्ति **सुखविषयिणी** इत्यादि. **स्वर्गकामनायाः** इति. "यन्न दुःखेन सम्भिन्नम्" (                    ) इति वाक्योक्त-सुखविशेषस्यैव स्वर्गत्वाद् इति भावः. **तदभाव** इति. पुत्रादिरतेः सुखाविषयकत्वात् तत्र रतित्वं

१. कि.पाठानुरोधात्. मुद्रितपाठस्तु प्रतिजन्मनि इति - सम्पा.

पुत्रादिषु तदभावप्रसङ्गाच्च. अतः स्नेहः पदार्थान्तरम्. स भगवन्निष्ठएव भगवद्विषयको[१] ज्ञानवद् ऐश्वर्यवद् वा भगवत्सम्बन्धात् तन्नैकट्याद् अन्यत्रापि भासते उष्णस्पर्शवत्— यथा यथा भगवन्नैकट्यं तथा तथा स्नेहातिशयः.

प्रकाशः

तदेतद् अभिसन्धाय आहुः **अतः** इत्यादि. **अतः** अनुकूलबुद्धिवेद्यत्वेऽपि सविषयत्वरूपाद् विशेषात् "प्रीणामि", "अनुरज्यामि", "स्निह्यामि" इत्यादिबुद्धि-गम्यत्वाच्च रत्याद्यपरनामा **स्नेहः पदार्थान्तरमेव** इति अर्थः. ननु* अस्तु पदार्थान्तरत्वं, तथापि प्रियत्वाऽपरपर्यायस्य तस्य निरुपधेरेव मुख्यत्वात्, तादृशस्य च तस्य मैत्रेयीब्राह्मणे "न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति" (बृहदा.उप. २।४।५) इत्यादिना आत्मधर्मत्वेनैव व्यवस्थापनाद्, भगवद्विषयकस्य सोपाधेरेव अन्तःकरणधर्मत्वम् इति आत्मविषयक-तदपेक्षया जघन्यत्वात् किं तत्प्रार्थनेन, किं वा तत्साधनप्रार्थनेन* इति आशङ्कायाम् आहुः **स** इत्यादि. तथाच यथा चतुःश्लोकीस्थं ज्ञानम् ऐश्वर्यं च भगवद्दत्तं तत्**सम्बन्धात्** चतुर्मुखे **तन्नैकट्यात्** पार्षदादिषु च **भासते**, तावतापि न तस्य भगवद्धर्मत्वहानिः, तथा स्नेहस्यापि तस्य मनोधर्मप्रतीतावपि आगन्तुकत्वेन भगवत्सम्बन्धार्थं तत्साधनप्रार्थनं युक्तं, भगवद्धर्मत्वेन अजघन्यत्वात् च तत्प्रार्थनमपि युक्तमेव इति अर्थः. ननु एवम् आगन्तुकत्वे सर्वत्र तुल्यएव स्यात्, नतु न्यूनाधिकः इत्यतः आहुः **उष्णस्पर्शवद्** इत्यादि. तथाच वह्निनैकट्ये उष्णस्पर्शस्येव तस्यापि भगवन्नैकट्यात् तथा इति अर्थः. एतदेव निगमयन्ति

लेखः

न स्याद् इति अर्थः. एतावता किं सिद्धम् इत्यतः आहुः **अतः स्नेहः पदार्थान्तरम्** इति, लौकिकस्नेहाद्[२] विलक्षणः इति अर्थः. **भगवन्निष्ठएव** इति. भगवन्निष्ठः एतत्सान्निध्याद् जीवे प्राप्तो भगवद्विषयको भवति इति अर्थः. **अन्यत्र** इति, आत्मोपयोगि देहादौ इति अर्थः. भगवत्सम्बन्धेन

१. भगवद्विषयकज्ञानवदिति ग.

२. लोके विषयकामात्मकस्य स्नेहस्यापि स्नेहत्वरूपभ्रान्त्या तद्विलक्षणः इति आशयः -सम्पा.

शारीरेऽपि आत्मनि तेन सह अतिनैकट्यात् परमस्नेहत्वम्, एवम् अध्यासेन अन्यत्र. "वाक्यान्वयाद्" (ब्रह्मसूत्र १।४।१९) इत्यत्र एतद् अस्माभिः सम्यग् विवृतम्. अतो भगवन्नैकट्यसाध्यत्वात् स्वतः तस्य असम्भवाद्

---

प्रकाशः

**शारीरे** इत्यादि. **परमस्नेहत्वम्** इति सप्तम्यर्थे बहुव्रीहिः ; परमस्नेहविषयत्वम् इति अर्थः.

ननु परमस्नेहः श्रुतौ शारीरविषयकएव मैत्रेयीब्राह्मणे सिद्धइति कथं तस्य भगवन्नैकट्यात् परमस्नेहविषयत्वम् इत्यतः आहुः **वाक्ये**त्यादि. इदम् अधिकरणं समन्वयाध्याय-चतुर्थपादे अस्ति. तत्र मैत्रेयीब्राह्मणं जीवबोधकं ब्रह्मबोधकं वा इति संशयः. तत्र* उपक्रमे अमृतत्वाय आत्मदर्शन-तत्साधनयोः उपदेशार्थं स्वप्रतीत्या पत्यादिसर्वापेक्षया प्रियत्वलिङ्गकः स्वात्मैव अभ्यस्यते, उपसंहारे च "एतावदरे खलु अमृतत्वम्" (बृहदा.उप. ४।५।१५) इत्यनेन तस्यैव ज्ञानस्य अमृतत्वं वदति, इति उपकमोपसंहाराभ्यासैः इदं जीवस्यैव बोधकम्. यत् पुनः मध्ये आत्मज्ञानादीनां सर्ववेदनरूप-फलसिद्ध्यर्थम् आत्मनः सर्वत्वम् उक्तं तत्तु अस्य सोपाधिकस्य जगत्कर्तृत्वरूपोत्कर्ष-बोधनार्थम् इति आर्द्रैन्धनाग्नि-दृष्टान्ताद् अवसीयते. एवमेव समुद्रादिदृष्टान्तैः आधारत्वं यद् उक्तं तदपि तदर्थमेव. एवं श्रुत्यन्तरे या तस्य ब्रह्मता श्राव्यते सापि उत्कर्षार्थमेव इत्यतः इदं जीवबोधकमेव* इति पूर्वः पक्षः. सिद्धान्तस्तु इदं ब्रह्मबोधकमेव. तत्र हेतुः "वाक्यान्वयाद्" इति. वाक्यानाम् अन्वयो वाक्यान्वयः, तस्मात्. अत्र उपक्रमे अमृतत्वाय आत्मदर्शनं तत्साधनानि च उपदिश्यन्ते. अमृतत्वं मोक्षः, तच्च ब्रह्मज्ञानादेव इति "तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते अयनाय" (श्वेताश्व.उप. ६।१५) इति सावधारणश्रुतौ मार्गान्तरनिषेधात् सिद्धमिति इहापि तमेव आत्मत्वेन परामृश्य दर्शनादिवाक्यानाम् अन्वयो वाच्यः, अन्यथा तद्व्याकोपापत्तेः. एवञ्च उपसंहारवाक्यमपि युज्यते. उपक्रमः च असञ्जातविरोधित्वात् प्रबलः. एवञ्च ज्ञानफलादिवाक्यान्यपि अन्वेष्यन्ति, तस्यैव सर्वत्वात् सर्वाधारत्वाच्च.

लेखः

अन्यत्र गुणाः भवन्ति इत्यत्र सूत्रं प्रमाणयन्ति **वाक्यान्वयाद्** इति. इदं

भगवद्भक्तैरेव तत्साधयितुं शक्यतइति तैः प्रसङ्गः सर्वथा भवतु इति आह **(तदाश्रयेषु महत्सु!) प्रसङ्गः च** इति. आश्रयो अतिनैकट्यसूचकः. न आश्रितमात्रेण अन्यस्य नैकट्यं सम्पादयितुं शक्यम् इति **महत्सु** इति उक्तम्. **चकारात्** तेष्वपि रतिः. एवं ससाधना भगवति रतिः प्रार्थिता. अस्याः बाधकाभावं प्रार्थयते **मैत्र्यस्तु सर्वत्र** इति, "अहम् उच्चावचैर्द्रव्यैः"

---

प्रकाशः

अन्यथा तु निःप्रयोजनम् असदुत्कर्षबोधनाद् न अन्वियुः. नच प्रियत्ववाक्याऽनन्वयः शङ्क्यः, "आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते" (तैत्ति.उप. ३।६) इत्यादिश्रुतिभिः ब्रह्मणः आनन्दरूपत्वे – भूतानां सशरीरजीवानां च तत्कार्यत्वे, "सर्व एतात्मनो व्युच्चरन्ति" (शतपथब्रा. १४।५।१।२३) इति श्रुत्या केवलानाम् अंशत्वे च सिद्धे, "एष ह्येव आनन्दयाति" (तैत्ति.उप. २।७) इति सावधारणश्रुत्या ब्रह्मणएव – आनन्दजनकत्वे च सिद्धे अन्यत्र प्रियत्वाध्यासो जीवे प्रियत्वाधिक्यं तत्सम्बन्ध-तन्नैकट्याभ्यामेव इति तेषामपि तत्रैव अन्वयः. एवञ्च अभ्यासोऽपि तस्यैव अनुगुणः. अतः साक्षात् परम्परया च सर्वेषां वाक्यानां तत्रैव अन्वयाद् इदं ब्रह्मवाक्यमेव इति. तथाच एतस्मिन् अधिकरणे प्रियत्वस्य भगवद्धर्मत्वेनैव सिद्धत्वाद् जीवे निरुपाधिप्रेमापि तन्नैकट्यादेवेति न श्रुतिविरोधः इति अर्थः.

ननु एवं सति तस्य स्वतःसिद्धत्वात् किं तत्साधनप्रार्थनेन इत्यतः आहुः **अतः** इत्यादि. **अतः** इति [१]जैवप्रियत्वापेक्षयापि अतितिरोहितत्वेन. **तद्** इति नैकट्यम्. ननु जीव-ब्रह्मणोः स्वरूपविचारे अतिनैकट्यस्यापि सिद्धत्वात् साधनप्रार्थना न युक्ता इत्यतः आहुः **आश्रयः** इत्यादि. अन्यथा स्वाप्यये जीवस्यापि तदाश्रितत्वेन स्वतएव रतिः स्यात्! अतो नैकट्यार्थं सर्वदा आश्रयो अपेक्षितइति तथा इति अर्थः. ननु तेऽपि बहवः समीपेऽपि सन्तीति किं प्रार्थनेन इत्यतः आहुः **न** इत्यादि. **आश्रितमात्रेण** इति, साधारणैः आश्रितैः ॥१६॥

---

१. जीव- इति कि.पाठे - सम्पा.

(भाग.पुरा. ३।२९।२४) इति वाक्याद् भूतग्रामावमानने[१] भगवत्तोषाभावाद् – "भक्त्यैव तुष्टिम् अभ्येति" (महाभा.ता.निर्णय १।११६) इति वाक्यात् फलप्रतिबन्धकं भूतावमाननं, स्वरूपप्रतिबन्धकं च – भगवदतोषे भक्त्यनुपपत्तेः. मैत्र्यामेव न अवमाननं भवति. साम्येऽपि तद्वदेव मानने अवमानकरणं प्रसज्येत! ननु ब्राह्मणातिक्रमस्य कृतत्वात् कथं वरो देयः? तत्र आह **नमो द्विजेभ्यः** इति, महतां प्रणिपातएव अपराधशमने हेतुः. तस्माद् निष्प्रत्यूहा ससाधना भगवति रतिः प्रार्थिता ॥१६॥

तेषां सम्मतिमुखचेष्टाम् उपलभ्य एवमेव भविष्यतीति अध्यवसायेन निश्चितः स्थितः इति आह.

---

लेखः

प्रथमाध्याय-तुरीयपादे अस्ति. "**अहम् उच्चावचैः द्रव्यैः** क्रिययोत्पन्नयानघे, नैव तुष्येऽर्चितोऽर्चायां भूतग्रामावमानिनः" इति वाक्यं तृतीये. **भक्त्यैव तुष्टिम् अभ्येति** इति वाक्यं ... . **फलप्रतिबन्धकम्** इति, भक्तिफलत्वेन उक्तो यो भगवत्तोषः तत्प्रतिबन्धकम् इति अर्थः. **स्वरूप-** इति, भक्तिस्वरूप- इति अर्थः. तद् उपपादयन्ति **भगवदतोषे** इति. **भक्त्यनुपपत्तेः** इति, भक्तित्वानुपपत्तेः इति अर्थः. "भक्त्यैव तुष्टिम् अभ्येति" इति वाक्ये सावधारणोक्त्या यदि भगवान् न तुष्येत्, न सा भक्तिः भवेद् इति वचनव्यक्तेः इति भावः. अत्र "भक्त्या तुतोषयति" (द्रष्ट. भाग.पुरा. ७।९।९) इत्यादिवाक्यानि अनुसन्धेयानि. ननु साम्यमेव कुतो न प्रार्थितं, तावतैव इष्टसिद्धेः इत्यतः आहुः **साम्येऽपि** इति. तथाच स्वयम् उद्यम्य तदकरणेऽपि कदाचिद् अन्यैः तत्करणे स्वस्यापि तत् प्रसज्येत. मैत्र्यास्तु उभयसापेक्षत्वात् परैरपि मैत्र्यनुगुणमेव कर्तव्यं सम्भवति, नतु अवमाननमपि, इति पाक्षिकदोषपरिहारार्थं तत्प्रार्थनम् इति भावः ॥१६॥

**इति** इत्यत्र आभासे **सम्मतिम्** इति. मुखं च प्रसादयुक्तां चेष्टामेव सम्मतिः इति अर्थः. व्याख्याने **पूर्ववद्** इति. "स एष एतर्हि

---

१. भूताग्रामावमानेनेति क.

॥ सूतः उवाच ॥

**इति स्म राजाऽध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ॥**
**उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः ॥१७॥**

इतीति. **स्म** इति प्रसिद्धे, ''सर्वैरेव ज्ञातम्'' एवं निश्चित्य स्थितः इति. **अध्यवसायो** निश्चयः. भूमौ सर्वत्र राक्षसानां व्याप्तत्वाद् अन्ते तदावेशो मा भवतु इति **कुशेषु** उपविष्टः. उत्तमभक्तेः देवाः अधिकारिणः इति पितृत्वव्यावृत्त्यर्थं देवत्वसिद्ध्यर्थं पूर्वाग्रेषु दर्भेषु उपविष्टः, तद् आह **प्राचीनमूलेषु** इति. **प्राचीनानि** पश्चिमभागे स्थितानि **मूलानि** येषाम्. तक्षकादिकृत-भयाभावाय आह **धीरः** इति. **उदङ्मुखो** गङ्गासम्मुखः **दक्षिणकूले** अन्तर्वेद्याम् **आस्ते.** पूर्ववद् लट्प्रयोगः. **समुद्रपत्न्याः** इति. इदानीं भगवदेकनिष्ठत्वाद् न अन्यत्र[1] दृष्टिः इति भगवच्चरणारविन्दोदकत्वं परित्यज्य भगवत्प्राप्त्यर्थं – लक्ष्मीपतेः भगवतः समुद्रे शयनात् तत्पत्न्याः दक्षिणकूलस्थितौ भगवन्तं वा समानयेद्, इमं वा तत्र नयेद्, जामातृत्वाद् विज्ञापनां वा कुर्याद् इति – भगवल्लालसत्वज्ञापनाय उक्तम्. प्राप्तराज्य-चिन्तापरित्यागाय आह **स्वसुत-न्यस्तभारः** इति. स्वसुते न्यस्तो राज्यभारो येन ॥१७॥

तदा देवैः अनुमोदितः इति आह.

---

लेखः

अध्यास्ते'' (भाग.पुरा. १।१७।४२) इतिवद् इति अर्थः. 'गङ्गा'दिपदं विहाय **समुद्रपत्न्याः** इति यद् उक्तं तत्प्रयोजनम् आहुः **इदानीम्** इत्यादि. प्रश्नसमये इति अर्थः. **परित्यज्य** इति. पादोदकत्व-धर्मस्य सर्वसाधारणत्वेन प्रकटत्वात् स्वस्य विशेषतः शीघ्रं भगवत्प्राप्त्यर्थं भगवल्लालसत्वं ज्ञापयितुं प्रकारान्तरेण गङ्गायाः भगवत्सम्बन्धित्वं स्फोरयन् **समुद्रपत्न्याः** इति उक्तम् इति अर्थः. **तत्पत्न्याः** इति, समुद्रपत्न्याः इति अर्थः. **इमम्** इति, राजानम् इति अर्थः. **जामातृत्वाद्** इति. समुद्र-जामातृत्वेन तत्पत्नी-जामातृत्वं भगवतः सुवचमेव इति भावः ॥१७॥

---

१. नात्रदृष्टिरिति क-ग.

**एवं तु तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसङ्घाः ॥**
**प्रशस्य भूमौ व्यकिरन् प्रसूनैर्मुदा मुहुर्दुन्दुभयश्च नेदुः ॥१८॥**

**एवं तु** इति. तुशब्देन तस्य सन्देहो निवारितः. **नरदेवदेव**त्वाद् इन्द्रतुल्यता. (**प्रायोपविष्टे!**) अनेनैव मार्गेण वैकुण्ठं गमिष्यतीति महाराजागमननिमित्तं वाद्यं चक्रुः. तद् आह **दिवि** एव **देवसङ्घाः प्रशस्य** "साधु कृतम्" इति उक्त्वा – देवानुमोदने कार्यसिद्धिः निश्चिता – **भूमौ** (**प्रसूनैः व्यकिरन्!**) पुष्पवृष्टिं चक्रुः. इदं शकुनम्. **मुदा** हर्षेण **दुन्दुभयो** देववाद्यानि **नेदुः** वादयामासुः, **च**काराद् अन्यान्यपि. तत्र उत्सवो जातः इति अर्थः. अनेन तस्य शापादिनापि निश्चयेन गत्यन्तरं निवारितम् ॥१८॥

महर्षीणां कृत्यम् आह

**महर्षयस्ते समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ॥**
**ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपम् ॥१९॥**

**महर्षयः** इति. **सम्यग्** (**ये!**) [१]**उपागताः** राजनिर्याणपर्यन्तं तद्धितपूरकत्वेन समागताः तेऽपि (**प्रशस्य!**) प्रशंसां कृत्वा. विप्रप्रशस्तं निरङ्गमपि साङ्गं भवति इति सूचितम्. **अनुमोदमानाः** (**ऊचुः!**) **साधु** कृतम् इति. अनेन इच्छया कृतत्वदोषो निवारितः. तेषां तथा[२] कथने हेतुम् आह **प्रजानुग्रहशीलसाराः** इति. तेषाम् ऋषीणाम् एते राजानः **प्रजाः**, तासु **अनुग्रह**रूपमेव यत् **शीलम्**, अनुग्रहहेतुभूतं वा, तदेव **सारो** येषाम्. अनेन ते यदि अनुग्रहं न कुर्युः, निःसाराएव भवेयुः इति सूचितम्. किञ्च परमभक्ते राजनि तत् कर्तव्यमेव इति अभिप्रायेण आह **यदुत्तमश्लोकगुणाभिरूपम्** इति. **उत्तमश्लोकस्य गुणेषु** श्रवणार्थम् **अभिरूपो** योग्यः. अथवा **उत्तमश्लोकगुणैः** (**अभिरूपः!**) तुल्यः ; यथा गुणश्रवणार्थं

---

प्रकाशः

**एवं तु** इत्यत्र. **निश्चयेन** इति. "यस्य स्यादद्धा न विचिकित्सास्ति" (छान्दो.उप. ३।१४।४) इति श्रुतेः तथा इति अर्थः ॥१८॥

---

१. सम्यक् समुपागता इति क-ग-घ.  २. कथाकथने इति घ.

स्थातव्यं तथा[1] एतद्दर्शनार्थमपि. प्रथमपक्षे[2] अयं मुख्यो अधिकारी इति श्रोतृत्वात् तस्य प्रशंसनं कर्तव्यम् इति अर्थः ॥१९॥

प्रशंसनमेव आहुः.

**॥ ऋषयः ऊचुः ॥**

**न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ॥**
**येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥२०॥**

**न वा** इति. हे **राजर्षिवर्य! इदं** सर्वपरित्यागेन भगवत्परत्वं **भवत्सु चित्रं न.** तत्र हेतुः **कृष्णं समनुव्रतेषु** इति – सम्बोधनेन मर्यादायाः परमसीमा सूचिता – कृष्णम् अनु व्रतं येषु इति ; यथा भगवान् सर्वं कार्यं कृत्वा प्रचलितः, तदीयैरपि तथा कर्तव्यम् इति. तत्र निदर्शनं— भवतां पितामहाः **ये** पाण्डवाः **अध्यासनं** सिंहासनं **राजकिरीटैः जुष्टं** सार्वभौमासनम् अप्रतिद्वन्द्वं **भगवत्पार्श्व**गमनेच्छया **सद्य**एव **जहुः**. तथा त्वयापि भगवत्पार्श्वे गन्तव्यम् इति अर्थः ॥२०॥

एवं तं स्तुत्वा तस्य अनुरोधमिव ज्ञापयन्तो गूढाभिसन्धानेन आहुः.

**सर्वे वयं तावदिहास्महेऽथ कलेवरं यावदसौ विहाय ॥**
**लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥२१॥**

**सर्वे वयम्** इति. अस्माभिः स्वोक्तं निर्वाह्य गन्तव्यं, तावत् स्थातव्यम् इति. तदेव आहुः **सर्व**एव **वयं यावद् अयं** भगवत्स्थानं गच्छति **तावद् इहैव आस्महे** स्थास्यामः. किं कृत्वा कुत्र गमिष्यति इति आकाङ्क्षायाम् आहुः **अथ** इति. सप्तदिनानन्तरं **कलेवरं विहाय असौ** सङ्घातपरित्यागेन एकः **परं लोकं** व्यापिवैकुण्ठं (**विरजस्कं!**) यत्र रजःसम्बन्धएव नास्ति, शुद्धसत्त्वात्मकं प्रकृतेः परं वा, **विशोकम्** अतमस्कं निरवद्यं वा सर्वथा **यास्यति.** तत्र हेतुः **भागवतेषु प्रधानः, भागवताः प्रधानं** यस्य इति वा. तावत् स्थातव्यम् इति सम्बन्धः ॥२१॥

एवं तेषाम् अनुग्रहं श्रुत्वा, बहुकालं स्थास्यन्ति इति ज्ञात्वा, तावद् मया सर्वे सन्देहाः निवारणीयाः इति तदर्थं प्रष्टुं यत् कृतवान् तद् आह.

---

१. तथैव तद्दर्शनार्थमपीति क. २. प्रथमपक्षोऽयमिति ख.

॥ सूतः उवाच ॥

**आश्रुत्य तेषां वचनं परीक्षित् समं मधुच्युद् गुरु चाव्यलीकम् ॥**
**अभाषतैतान् अभिवन्द्य युक्तं शुश्रूषमाणश्चरितानि विष्णोः ॥२२॥**

**आश्रुत्य** इति. **परीक्षित**त्वात् तदीयवचनस्य सत्यता निर्धारिता. तेषां वचसि चत्वारो गुणाः सन्ति पुरुषार्थचतुष्टयहेतवः. तत्र **समं** स्वस्य राज्ञः च तुल्यतया हितचिन्तनम्. अनेन ज्ञानरूपता (मोक्षात्मिका!) उक्ता. **मधुच्युत्** सर्वथा भगवत्समीपं यास्यति इति मधु च्योतति. अनेन कामरूपता. **गुरु** च अर्थगौरवं, "तावत् स्थास्यामः" इति, "सर्वहितं तावत् करिष्यामः" इति अर्थतुल्यता. **चकारात्** प्रशंसा च. **अव्यलीकं** निष्कपटं, "सद्यो जहुः" (श्लो. २०) इति. अनेन धर्मरूपता. एवं सर्वपुरुषार्थरूपं **तेषां वचनं (आश्रुत्य!)** श्रुत्वा **एतान् अभिवन्द्य विष्णोः चरितानि शुश्रूषमाणो (युक्तम् अभाषत!)** वक्ष्यमाणम् उक्तवान् ॥२२॥

तदेव आह.

॥ राजा उवाच ॥

**समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे ॥**
**नेहाथ वामुत्र च कश्चनार्थः ऋते परानुग्रहमात्मशीलम् ॥२३॥**

**समागताः** इति. अत्र सन्देहे न अन्यत्र गन्तव्यं यतः **सर्वतएव** यूयं **सर्वे समागताः**. प्रामाण्यं च भवत्स्वेव निर्णीतम् इति आह **वेदाः यथा** इति. **त्रिपृष्ठे** सत्यलोके **मूर्तिधराः** अधिष्ठातृदेवतारूप-विग्रहवन्तः. हेतुः च भवद्वाक्ये नास्ति इति आह **न इह** इति. **इह वा अमुत्र वा** भवतां **(ऋते!) परानुग्रह**व्यतिरेकेण **(कश्चन अर्थः!)** अन्यत् प्रयोजनं **नास्ति**. परानुग्रहोऽपि भवताम् उद्देश्यो न भवति किन्तु **(आत्मशीलं!)** स्वभावएव. अतः प्रमाणविचारेण प्रमेयविचारेण च भवद्वाक्ये शङ्कैव

---

लेखः

**समागताः** इत्यत्र. **अत्र सन्देहे** इति. भगवच्चरित्रसन्देहे तन्निवारणार्थं मया न अन्यत्र गन्तव्यम् इति अर्थः. **हेतुश्च** इति, प्रयोजनम् इति अर्थः ; साकाङ्क्षत्वम् इति यावत्. **प्रमाण** इति, वेदानां दृष्टान्तीकरणेन प्रमाणविचारः ॥२३॥

नास्ति ॥२३॥

अतः किञ्चित् पृच्छामि इति आह.

**ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इतिकृत्यतायाम् ॥**
**सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृशताभियुक्ताः ॥२४॥**

**ततः** इति. **वः** युष्मान् **पृच्छ्यं** प्रष्टव्यमेव – "नाऽपृष्टः कस्यचिद् ब्रूयाद्" (मनुस्मृ. २।११०) इति श्रु(/स्मृ!)तेः – **इमं** बुद्धिस्थं **विशेषेण पृच्छे. विश्रभ्य** भवत्सु विश्वासं कृत्वा युक्तिमपि अविचार्य. **विप्रा** इति पूर्ववत्. **इतिकृत्यतायाम्** इति = एवंप्रकारेण कर्तव्यं तद् इतिकर्तव्यं, तस्य भावः इतिकर्तव्यता, तस्यां = तन्निमित्तं कर्तव्यनिर्धारः साधनप्रकारनिर्धारः च वक्तव्यः इति भावः. तत्र कालविशेषेण कर्तव्यं पृच्छति "**सर्वात्मना** सर्वप्रकारेण नित्यतया जीवनदशायां **म्रियमाणैः च** अन्तकाले **कृत्यं** किं कर्तव्यम्?" इति. **शुद्धं** दानादीनां कर्तृशुद्ध्यभावात् कर्तव्यतासन्देहः. अनेन कालादिहेतूनां यत्र शुद्ध्यर्थं न अपेक्षा तद् वक्तव्यम् इति फलितम्. तादृशं नास्ति इति न वक्तव्यं, यतो भवन्तो **अभियुक्ताः** अतः तादृशे अर्थे **आमृशत** सर्वतः प्रमाणानि विचारयत इति अर्थः ॥२४॥

एवं पृष्टे – सर्वपरित्यागकर्तुः अपरित्यागी गुरुः न भवति इति – (**यदृच्छया!**) भगवत्प्रेरणया शुकः समागतः इति आह **तत्र अभवद्** इति.

**॥ सूतः उवाच ॥**

**तत्राभवद् भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ॥**
**अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥२५॥**

**तत्रैव अभवत्** प्रादुर्भूतः. तथा सामर्थ्ये हेतुः **भगवान्** इति. भगवत्त्वे हेतुः **व्यासपुत्रः** इति. तेषां दृष्टौ तथा भानं मा अस्तु इति अन्यथा प्रदर्शनम् आह **गाम् अटमानः** इति. पृथिवीपर्यटनं परमहंसानां धर्मः. **अनपेक्षः** इति. पर्यटनधर्मेण नहि किञ्चिद् अपेक्षते, अतो राजवद् लीलया पर्यटनम् इति अर्थः. **अलक्ष्याणि लिङ्गानि** महापुरुषचिह्नानि यस्य ; द्वात्रिंशल्लक्षणान्यपि तस्मिन् वर्तन्ते, तेषु ज्ञातेषु लोकाः राजत्वं सम्पादयेयुः! षोडशलक्षणानि राज्ञः, द्वात्रिंशल्लक्षणानि महाराजाधिराजस्य. स भगवान् ब्रह्मविद् वा भवति. तेषां फलम् आह **निजलाभतुष्टः** इति.

निजलाभः तोषः च इति फलद्वयं ; निजलाभेन तुष्टः, उभयोः हेतु-हेतुमद्भावात्[१]. अतः[२] "आत्मलाभान्न परं विद्यते" (आप.धर्मसूत्र १।८।२२।२) इति न श्रुतिविरोधः. क्रीडारूपं पर्यटनम् इति ज्ञापयन् लक्षणाऽपरिज्ञाने हेतुम् आह **वृतः च बालैः** इति. **चकारात्** स्त्रीभिः अबुधैः च. लक्षणानां परीक्षाभावाय आह **अवधूतवेषः** इति, अवधूतस्येव वेषो यस्य. देहसंस्काररहितो जडो **अवधूतः**. तत्र जडत्वांशो नास्ति इति ज्ञापयितुं **वेषपदम्** ॥२५॥

तस्य द्वात्रिंशल्लक्षणान्यपि वक्तुम् आह **तं द्व्यष्टवर्षम्** इति. तत्र कानिचिद् अन्तःस्थानि कानिचिद् बहिःस्थितानि. तत्र सर्वत्र स्थितस्य स्वेच्छया प्रादुर्भावसामर्थ्यं, षड्गुणैश्वर्यसम्पत्तिः, भगवदीयत्वं, स्वेच्छया लीलाकरणं, निरपेक्षता, तिरोभावसामर्थ्यम्, आत्मलाभः सन्तोषः च — एवम् अष्टौ गुणाः(१-८) पूर्वोक्ताः. अन्यान् आह.

**तं द्व्यष्टवर्षं सुकुमारपाद - करोरुबाह्वंसकपोलगात्रम् ॥**
**चार्वायताक्षोन्नसतुल्यकर्णं सुभ्र्वाननं कम्बुसुजातकण्ठम् ॥२६॥**
**निगूढजत्रुं पृथुतुङ्गवक्षसम् आवर्तनाभिं वलिवल्गूदरं च ॥**
**दिगम्बरं वक्त्रविकीर्णकेशं प्रलम्बबाहुं स्वमरोत्तमाभम् ॥२७॥**
**श्यामं सदापीच्यवयोऽङ्गलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ॥**
**प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥२८॥**
**स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाऽऽजहार ॥**
**ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः ॥२९॥**

**द्व्यष्टवर्षं** द्विगुणाः अष्टौ वर्षाः यस्य ; षोडशवार्षिकम् इति अर्थः.

---

लेखः

**तत्राऽभवद्** इत्यत्र. ननु अत्र **निजलाभः तोषः च** इति फलद्वयोक्तौ श्रुतेः तद्विरोधः इत्यतः आहुः **उभयोर्हेतुहेतुमद्भावाद्** इति. एवञ्च अवस्थाविशेषे फलत्वेन प्रवेशेऽपि तुष्टेः आत्मलाभहेतुत्वमेवेति न श्रुतिविरोधः इति भावः ॥२५॥

---

१. हेतुमद्भावादिति ग.   २. तत्रेति क-ग-घ.

वर्षाः हि शरीरस्य वृद्धि-क्षयहेतवः. तत्र षोडशवर्षाः केवलं वृद्धिहेतवः श्मश्रूत्पत्त्या अवसीयन्ते. "मृता वा एषा त्वगमेध्या" ( मैत्रा.संहि. ३।६।२ ) इति श्रुतेः केशानामपि तथात्वेऽपि उत्पत्तिशिष्टत्वाद् न ते मृतत्वज्ञापकाः. अतः कालगुणएव तस्य, न तत्कृतो दोषः इति, अतः उभयज्ञापनाय[१] **द्व्यष्ट**पदम्.

अग्रिमव्याप्त्यभावाय[२] सम्पन्नस्थापनाय[३] च[४] ॥(८)॥

---

प्रकाशः

**तम्** इत्यत्र. **स्मश्रूत्पत्त्यावसीयन्ते** इति, अग्रे तदुत्पत्त्या तथा निश्चीयन्ते. तत्र गमकं **मृतेति**. **मृतत्वज्ञापकाः** इति त्वङ्मृतत्वज्ञापकाः. तेन सिद्धम् आहुः **अतः** इत्यादि. अमेध्यस्पर्शाभावात् कालकृतो बलवत्त्वादिरूपो गुणएव, नतु कामवत्त्वादिरूपः कालजो दोषः तत्र इति अर्थः. **उभयज्ञापनाय** इति, गुण-दोषाभाव-रूप-गुणद्वय-ज्ञापनाय. अन्यथा 'षोडशाब्दम्' इत्येव वदेद् इति अर्थः. तयोः प्रयोजनम् आहुः **अग्रिमे**त्यादि. काम-जरादि-दोष-**व्याप्त्यभावाय** गुणसूचनं, **सम्पन्नस्य** ज्ञान-भक्त्यादि-रूपगुणस्य **स्थापनाय** दोषाभावसूचनम् इति अर्थः. अस्मिन् पक्षे **तम्** इति पदस्य विशेषार्थाभावात्

लेखः

**तं द्व्यष्टवर्षम्** इत्यत्र. **श्मश्रूत्पत्त्या** इति. षोडशवर्षाद् ऊर्ध्वं तदुत्पत्त्या तत्पूर्वकालस्य वृद्धिहेतुत्वम् अवसीयते इति. ननु किम् अत्र गमकम् इत्यतः आहुः **मृता वा** इति. **एषा** स्मश्र्वादिरूपा. **केशानामपि** इति. गुणो मूर्धन्यकेशानाम् इति अर्थः. **तथात्वेऽपि** इति, अचेतनत्वेन मृतत्ववत्त्वेऽपि इति अर्थः. **अतः** इति. **अतः** स्मश्र्वादीनाम् अभावज्ञापनात् कालकृतगुणएव, न दोषः इति अर्थः. एवञ्च दोषोत्पादककालेन अनाक्रान्तः इति भावः. **द्वयज्ञापनाय** इति, गुणो दोषाभावः च इति द्वयज्ञापनाय इति अर्थः. तदेतद् द्वयं प्रदर्शयन्ति **अग्रिमव्याप्त्यभावाय** इत्यादि. अग्रिमकालस्य व्याप्त्यभावाय इति अर्थः. **सम्पन्न-** इति, सौकुमार्य-मनोहरत्वादि-

---

१. द्वयज्ञापनाय इति पाठः लेखे - सम्पा. २. अग्रिमव्याप्त्याऽभावायेति क.

३. सम्पन्नख्यापनाय इति पाठः लेखे - सम्पा. ४. चकारो नास्ति ख-ग-घ-ङ.

भगवद्विस्मरणहेतवो वा ते, अतो बहुकालीनस्य शिष्टकालस्मरणम् (**तं!**) आश्चर्यप्रसिद्धिः[१] च इति गुणद्वयम्(९-१०). **सुकुमाराः** सुष्ठु कुत्सितं मारयन्ति इति निर्दुष्टाः सगुणाः च **पादादयः कपोलान्ता** यस्य तादृशं **गात्रं** यस्य. अनेन षड्गुणाः(११-१६). **चारु** यथा भवति तथा **आयते अक्षिणी**[२] यस्य, (**ऊन्नस!**) ऊर्ध्वा नासिका यस्य, **तुल्यौ कर्णौ** यस्य. **शोभने भ्रुवौ आनने**[३] यस्य, **कम्बुवत्** शङ्खवत् त्रिवलीयुक्तः **सुष्ठु जातः कण्ठो** यस्य —अनेन पञ्च(१७-२१). **निगूढं जत्रु** यस्य, कण्ठमालास्थि **जत्रु, पृथु तुङ्गं**[४] **वक्षो** यस्य, **आवर्ता नाभिः** यस्य, **वलिभिः वल्गु** अश्वत्थपत्रवद् **उदरं** यस्य —एते चत्वारः(२२-२५). **चकाराद्**(२६) गूढचिह्नम्[५]. एवं षड्विंशल्लक्षणानि उक्तानि.

प्रकाशः

पक्षान्तरम् आहुः **भगवदित्यादि. ते** इति अग्रिमाः वर्षाः. ताभ्यां सिद्धम् आहुः **अतः** इत्यादि. तथाच अमेध्य-त्वक्स्पर्शाभावात् **शिष्टकाले** भगवत्**स्मरणं द्व्यष्टवर्ष**पदेन सूच्यते, द्वितीयः (**आश्चर्यप्रसिद्धिः!**) **तम्** इति पदेन, प्रक्रान्तविषयत्ववत् प्रसिद्धार्थविषयत्वेऽपि बाधकाभावाद् इति. तथाच तद्-गुणद्वय-सूचनाय इदं पदद्वयम् अत्र इति अर्थः. **गूढचिह्नम्**

लेखः

सकलगुणसम्पन्नत्व-**ख्यापनाय** इति अर्थः. अस्मिन् पक्षे **तम्** इत्यस्य विशेषालाभात् प्रकारान्तरेण गुणद्वयम् आहुः **भगवद्विस्मरण** इत्यादि. **ते** इति, वृद्धिहेतुक-वर्षाद् ऊर्ध्वं ये वर्षाः ते इति अर्थः. **अतो** इति, भगवद्विस्मरणहेतुक-वर्षाऽनाक्रान्तत्वाद् इति अर्थः. **बहुकालीनस्य** इति. **बहुकालीनस्यापि** शुकस्य **शिष्टकालवत्** षोडशवार्षिकवत् **स्मरणम्** इति अर्थः. एवञ्च **आर्य** इति, **तम्** इत्यस्य प्रसिद्धार्थकत्वाङ्गीकाराद् इति भावः. **निर्दुष्टाः** इत्यादि. सुष्ठुत्वेन निर्दुष्टाः, कुमारत्वेन सगुणाः इति अर्थः. **एवं षड्विंशल्लक्षणानि** इति. गूढचिह्नैः सह तावल्लक्षणानि

१. आर्यप्रसिद्धिश्चेतीति ख-लेखे - सम्पा. २. अक्षे अक्षिणी यस्येति क-ख.

३. आ आननं यस्येति ग-घ-ङ. ४. एवं तुङ्गञ्च वक्षो यस्येति ख. ५. गूढवस्त्रमिति घ.

मध्ये तस्य लोकोपकारकं कार्यद्वयम् आह **दिगम्बरं वक्रविकीर्णकेशम्** इति. तस्य हि[१] शरीरं ब्रह्मभावाद् भगवतइव व्यापकम्. तस्य वस्त्रं दिशएव भवन्ति. लौकिकपरिधाने अन्तरा परिच्छेदो लोकपीडा च स्याद् अतो दिगम्बरत्वम्. वक्राः विकीर्णाः केशाः यस्य. ब्रह्म-शिवात्मकाः तस्य केशाः ; तत्र अनुत्पादनार्थं वक्रता, अग्रासार्थं च विकीर्णता, अन्यथा ब्रह्मभावमपि ग्रसेद् ईशः !

वक्रत्वं गुणश्च. **प्रकर्षेण लम्बौ बाहू** यस्य, आजानुबाहुम्. **स्वमरोत्तमो** भगवान् देवरूपो विष्णुः, तस्येव **आभा** कान्तिः यस्य. **श्यामं** श्यामवर्णम्. सर्वदा **अपीच्यं** स्त्रीणां हितकरं यद् **वयः** तारुण्यं, तेन **अङ्गस्य** या **लक्ष्मीः** तया **स्त्रीणां मनोज्ञं** सुखकरम्. अनेन सौन्दर्यातिशयः उक्तः. तत्र स्त्रीदृष्टेः निकषत्वात् तथा उक्तम्. **रुचिरं** च[२] **स्मितं** तेन च **स्त्रीणां मनोज्ञम्**. स्त्रियो हि द्विविधाः, चतुराः अचतुराः च ; उभयोः परिग्रहार्थे द्वयम्. एवं वक्रकेशादयः षट्[(२७-३२)].

एवं (द्वात्रिंशत्!) लक्षणसम्पन्नं दृष्ट्वा सर्वे मुनयः उत्थिताः इति आह **प्रत्युत्थिताः** इति. **स्वासनेभ्यः** तं **प्रत्युत्थिताः**, नतु अन्यथा. तत्र ज्ञानम् आह **तल्लक्षणज्ञाः** इति. उत्थाने ज्ञानस्य हेतुत्वं, ज्ञाने **मुनित्वस्य**. नतु तल्लक्षणं लौकिकप्रमाणगम्यम् इति आह **गूढं वर्चः** तेजो यस्य. एवं प्रश्नसमये स[३] समागतएव[४] इति राजा उत्थितएव स्थितः (**सः**!) 'तत्'पदेन परामृश्यते. **विष्णुरातः** इति, "एतदर्थमेव भगवता अहं रक्षितः" इति तस्य ज्ञानं सूचितम्. स च **अतिथिः** आगमने नियतकालरहितः. तस्मै किं देयम् इति आकाङ्क्षायां स आत्मानमेव

---

लेखः

उक्तानि इति अर्थः. **दिगम्बरम्** इत्यत्र **लोकपीडा च** इति. एतस्य ब्रह्मरूपत्वेन जघनोर्वादिषु लोकानां स्थितत्वात् तत्र वस्त्रावेष्टने तेषां पीडा भवेद् इति अर्थः ॥२६-२७॥

---

१. हीति नास्ति ख. २. चकारो नास्ति ग.

३. स इति नास्ति क-ग-घ. ४. समायात इतीति ग.

अर्हति इति **(आगताय!) तस्मै शिरसा सपर्याम् आजहार** शिरः तस्मै समर्पितम् इति अर्थः. ततो अन्यथाभासनार्थं परिगृहीतानां पदार्थानां त्यागं कृतवान् इति आह **ततः** इति. गुणकार्याः त्रयोऽपि **(अबुधाः स्त्रियो अर्भकाः!) निवृत्ताः. ततः सः पूजितो महासने** राजोपवेशनयोग्ये **उपविवेश** ॥२६-२९॥

ततः सर्वे ऋषयो दूरस्थिताअपि[१] तस्य परितः समीपे उपविष्टाः इति आह.

**स संवृतस्तत्र महान् महीयसां ब्रह्मर्षिराजर्षिसुरर्षिसङ्घैः ॥**
**व्यरोचताऽलं भगवान् यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः ॥३०॥**

**स संवृतः** इति. ननु सर्वैः संवृतत्वे को हेतुः? तत्र आह **महान् महीयसाम्** इति, ज्ञानिनामपि ज्ञानप्रदः इति अर्थः. तेषां तेजसा तस्य अधिकतेजस्त्वमेव जातं, नतु तत्तेजसो अभिभवः इति आह **व्यरोचत** इति. तस्य प्राकृतगुरुत्वं वारयति **अलं भगवान्** इति. **अलम्** अत्यर्थं पूर्त्यर्थं वा **भगवानेव** तद्रूपेण समागतः. तदा तस्य **(ब्रह्मर्षि-राजर्षि-सुरर्षिसङ्घैः!)** महत्त्वं सर्वजनीनं जातम् इति दृष्टान्तम् आह— **यथा** आकाशे **(इन्दुः!)** चन्द्रमाः **ग्रहैः** बुधादिभिः **ऋक्षैः** अश्विन्यादिभिः प्रकीर्णकैः **तारानिकरैः** च **(परीतः!)** व्याप्तः. दृष्टान्त-दार्ष्टान्तिकयोः तुल्यत्वार्थं त्रिविधाः उक्ताः ॥३०॥

"इदानीं प्रश्नसमयेएव समागतः[२] इति अयमेव प्रष्टव्यो, न अन्यः" इति भगवदिच्छां[३] ज्ञात्वा तं पृष्टवान् इति आह.

---

प्रकाशः

इति पुंव्यञ्जनम्. **स विष्णुरातः** इत्यत्र. **आगमने नियतकालरहितः** इति. "अनित्यं हि स्थितो यस्मात् तस्माद् अतिथिः उच्यते" (महाभा. १३।९७।१८) इति तथा इति अर्थः. **परिगृहीतानाम्** इति शुकेन परिगृहीतानाम् ॥२६-२९॥

---

१. दूरस्था अपीति ख. २. सममागत इति ख.

३. भा.पाठानुरोधात्. भगवदिच्छा इति मुद्रितपाठः -सम्पा.

**प्रशान्तमासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य ॥**
**प्रणम्य मूर्ध्नावहितः कृताञ्जलिर्नत्वा गिरा सूनृतयाऽन्वपृच्छत् ॥३१॥**

**प्रशान्तम्**[१] इति. गुरु-शिष्ययोः धर्माः उच्यन्ते **प्रशान्तादि**पदैः. तत्र चत्वारो गुरुधर्माः —

ज्ञानं (च!) ज्ञानकार्यं च अव्यग्रत्वं च साधनम् ॥

इति. प्रकृष्टशान्तिः ज्ञानकार्या. **आसीनम्** इति अव्यग्रम्. **अकुण्ठं मेधो** ज्ञानं यस्य. बुद्धेः प्राकृतत्वसम्भावनया तन्निराकरणाय **मेधश्**शब्दः प्रयुक्तः. (**मुनिं**!) मननं साधनम्. शिष्यगुणान् वक्तुं – महतः शिष्यत्वे गूढार्थकथनमपि भवति इति – नृपत्वं भागवतत्वं च आह **नृपो भागवतः** इति. ततः शिष्यस्य षड् धर्माः. तान् आह **अभ्युपेत्य** इत्यादिभिः. प्रथमतो (**अभ्युपेत्य**!) गुरोः आभिमुख्येन गमनम्. ततः कायिकः[२] (**मूर्ध्ना प्रणम्य**!) साष्टाङ्गनमस्कारः. ततः (**अवहितः**!) सावधानता. ततो विज्ञापनार्थं (**कृताञ्जलिः**!) बद्धाञ्जलित्वम्. ततो (**नत्वा**!) वाचिकनमस्कारः[३]. ततो (**सूनृतया गिरा अन्वपृच्छद्**!) मधुरया वाचा प्रश्नः इति. सत्यवाचा वा[४] ॥३१॥

प्रश्नार्थं प्रथमतः तं स्तौति.

**॥ राजा उवाच ॥**

**अहो अद्य वयं ब्रह्मन् सत्सेव्याः क्षत्रबन्धवः ॥**
**कृपयाऽतिथिरूपेण भवद्भिस्तीर्थकाः कृताः ॥३२॥**

**अहो** इति. **अहो अद्य वयम्** इति पूर्ववत्. **ब्रह्मन्** इति हेतुः.

---

प्रकाशः

**अहो** इत्यत्र. **पूर्ववद्** इति. ''अहो वयम्'' (श्लो. १३) इत्यत्र

लेखः

**अहो** इत्यत्र. **पूर्ववद्** इति. ''अहो वयं धन्यतमाः'' (श्लो. १३) इतिवत् परश्लाघार्थम् इति अर्थः. श्लाघायां हेतुः **ब्रह्मन्** इति.

---

१. प्रशान्तेतीति क-ख-घ. २. कायिकसाष्टाङ्गेत्यादिः क-ग-घ.

३. वाचनिकेति ग. ४. वेति नास्ति ख.

ब्रह्मसाक्षात्कारो[१] बहिः जातः इति आश्चर्यं, **वयं** च महान्तो जाताः इति. किञ्च **सद्भिरपि सेव्याः वयं** जाताः. अतः परम् उपदेष्टृत्वमपि भविष्यति इति अर्थः. स्वभावतस्तु **वयं क्षत्रबन्धवः** क्षत्रियाः बान्धवाः येषाम्. क्षत्रियवंशे परम् उत्पन्नाः, नतु तद्धर्मवन्तः. ते च ब्राह्मणपादशौचाद् आराद् विसृष्टाः ; सेव्यता अतिदूरे. ननु आगमनमात्रेण कथं सत्सेव्यता? तत्र आह **कृपया** इति. यथा तीर्थानां गङ्गादीनां भवत्सम्बन्धेन तीर्थत्वं स्नातृरूपेण[२] तथा **वयं** गृहस्थाः **अतिथिरूपेण कृपया** च[३] करणाभ्यां **भवद्भिः** कर्तृकैः **तीर्थकाः कृताः**. स्वार्थे **कः** ; स्वार्थो अत्र विवक्षितः इति ज्ञापनार्थः. तेन अस्मासु न औपचारिकं तीर्थत्वम् ॥३२॥

ननु स्नाने जलस्य देहसंयोगात्[४] तद्गतं पापं तद्द्वारा तेषु गच्छतीति जलस्य तीर्थत्वं भवति ; गृहस्थस्य तु कथम् आगमनमात्रेण तीर्थत्वं? तत्र आह.

**येषां संस्मरणात् पुंसां सद्यः शुद्ध्यन्ति वै गृहाः ॥**
**किं पुनर्दर्शनस्पर्श - पादशौचासनादिभिः ॥३३॥**

**येषाम्** इति. (**येषां संस्मरणात्!**) येषु गृहेषु स्थित्वा भवतां स्मरणं क्रियते तेन स्मरणेन (**पुंसां गृहाः वै सद्यः शुद्ध्यन्ति!**) सूर्येणेव सर्वेषां गृहाणाम् अशुद्धिलक्षणं तमो दूरीक्रियते. तत्र **किं पुनः** वक्तव्यं भवतां **दर्शनं** कोटिसूर्याधिकप्रकाशं ज्ञानेन्द्रियाणां सर्वशोधकं, **स्पर्शः**

---

प्रकाशः

यथा परश्लाघार्थे स्वश्लाघा तथा इति अर्थः. **उपदेष्टृत्वम्** इति, जनकादेरिव इति अर्थः ॥३२॥

**तद्गतं पापम्** इत्यादि. देहगतं पापं जलसंयोगद्वारा जले गच्छति इति अर्थः ॥३३॥

लेखः

**जातः** इति, अस्माकं जातः इति अर्थः ॥३२॥

---

१. ब्रह्मसाक्षात्कारे इति क. २. स्नानरूपेणेति ङ.

३. कृपयाऽनुकरणाभ्यामिति क-ग-घ-ङ. ४. देहस्य संयोगादिति क-ग-घ.

तु जलस्पर्शवत् साक्षात् पापहारकः, (**पादशौचं!**) चरणोदकं पुनः भगवतइव[१] अलौकिकजन्महेतुः, **आसनादयः** च पूजावयवाः सर्वपुरुषार्थसाधकाः! अतः तीर्थत्वं युक्तमेव इति अर्थः ॥३३॥

ननु अनुक्त-प्रायश्चित्तानि पापानि गच्छन्तु नाम, येषां तु प्रायश्चित्तं विहितं तानि न गच्छन्ति इति अध्यवसीयते, प्रायश्चित्तवैयर्थ्यापत्तेः, इति आशङ्क्य आह.

**सान्निध्यात् ते महायोगिन् पातकानि महान्त्यपि ॥**
**सद्यो नश्यन्ति वै पुंसां विष्णोरिव सुरेतराः ॥३४॥**
**अपि मे भगवान् प्रीतः कृष्णः पाण्डुसुतप्रियः ॥**
**पैतृष्वस्रेयप्रीत्यर्थं तद्गोत्रस्याऽऽत्तबान्धवः ॥३५॥**

**सान्निध्याद्** इति. प्रमाणबलेन हि प्रायश्चित्तानि [२]उक्तानि, अत्र प्रमेयबलम् इति आह **महायोगिन्** इति. योगो अस्य अस्ति इति योगी, योगेन स्वस्य पुरुषार्थसाधकः. महायोगी तु स्वयोगबलेन अन्येषामपि सर्वसाधकः. तत्र पापनिवृत्तिः तव आनुषङ्गिकं कार्यम् इति आह (**पुंसां!**) **महान्त्यपि पातकानि** (**ते सान्निध्यात्!**) तव सन्निधिमात्रेणैव **सद्यो** (**वै!**) **नश्यन्ति** सान्निध्यस्य आवृत्तिमपि न [३]अपेक्षन्ते, स्थितिं वा. तत्र प्रमेयबलमेव[४] दृष्टान्तयति **विष्णोरिव** इति. यथा **विष्णोः** सन्निधिमात्रेणैव (**सुरेतराः!**) सुरप्रतिस्पर्धिनोऽपि महान्तो दैत्याः **नश्यन्ति** तद्वद् इति अर्थः. किञ्च (**मे भगवान् कृष्णः!**) भगवतैव अयम् उपायः कृतः, अन्यथा ब्रह्मदण्डदग्धस्य[५] निस्तारो न भविष्यति इति. तथापि

---

लेखः

**अपि मे भगवान्** इत्यत्र. यद्यपि भगवत्त्वेन कृपाहेतुः **तथापि प्रीतः सन्नेव कृतवान्** इति अर्थः. **अनेनैव** इति, प्रीतिहेतुक-तवागमनेन

---

१. भगवतैवाऽलौकिकेत्यादि क-ग. भव इवाऽलौकिकेत्यादि घ. भवत्येवाऽलौकिकेत्यादि ङ.

२. प्रायश्चित्तानि युक्तानीति घ-ङ. ३. नोपेक्षन्त इति घ-ङ.

४. प्रमेयबलमिवेति क-ग-घ. ५. ब्रह्मदग्धस्येति क-ग-घ-ङ.

**प्रीतः**[१] सन्नेव कृतवान्, अन्येनैव[२] पापनिवृत्तेः. अन्यथा स्वकर्तव्यत्वम् आपद्येत! ननु तुभ्यं केन कर्मणा प्रीतः इति आशङ्क्य आह **पाण्डुसुतप्रियः** इति, पाण्डुसुताः प्रीतिविषयाः यस्य. ननु तावता तव किम् आगतं? तत्र आह **पैतृष्वस्रेय** इति. पितृष्वसुः पुत्राः पाण्डवाः, तेषां **प्रीत्यर्थम्**. अनेन पितुः तत्स्वसुः च प्रीतिः आक्षिप्ता भवति. **तद्गोत्रस्य** पाण्डवगोत्रस्य[३]. यद्वा **बान्धवं** बन्धुत्वं, तद् **आत्तं** स्वीकृतं येन. तत्प्रीत्यर्थं तद्वंशीयेषु हितं कृतवान् इति [४]अर्थः ॥३४-३५॥

अस्मिन् अर्थे साधकं तर्कम् आह.

**अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम् ॥**
**नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥३६॥**

**अन्यथा** इति. लोके **अव्यक्ता गतिः** यस्य. ( **नृणां**! ) स्वस्थानामपि मनुष्याणां **त्वद्दर्शनं ( कथं! )** दुर्लभं, कुतः पुनः ( **नः नितरां म्रियमाणानां**! ) मृत्युग्रस्तानाम्! येन अदृष्टेन तुच्छनरत्वं मृत्युसम्बन्धं च प्राप्ताः तदुभयनिवर्तकस्य तस्य[५] तव दर्शनं न अदृष्टसाध्यं किन्तु भगवत्साध्यमेव. उभयनिवर्तकं रूपम् आह **संसिद्धस्य वनीयसः** इति. सम्यक् सिद्धस्य = अन्यस्यापि मृत्युनिवारकस्य. यथा सम्यक् सिद्धो रसः सर्वमृत्युनिवारको भवति तथा अयमपि इति अर्थः. किञ्च वनयिता = याचयिता, वनयितृतमो वनीयान्. स्वयं तत्तद्गृहे गत्वा ''भवद्भ्यः सर्वपुरुषार्थान् दास्यामि, प्रार्थयत'' इति वदन् यो गच्छति सः तथा. तादृशस्य तव क्षुद्रनरत्वादि-निवारकस्य दर्शनं भगवत्साध्यमेव इति अर्थः ॥३६॥

अतः तद्दर्शनं दृष्टद्वारैव पुरुषार्थसाधकं भवत्विति किञ्चित् पृच्छामि इति आह.

---

लेखः

इति अर्थः. **अन्यथा** अनेकपापनिवृत्त्यभावे तदर्थं **स्वस्य** राज्ञः **कर्तव्यं** प्रायश्चित्तादि **आपद्येत** इति अर्थः ॥३५॥

---

१. प्रीतः सन्नेवमिति ख. प्राप्तः सन्नेवेति घ. २. अनेनैव इति पाठः लेखे - सम्पा.

३. पाण्डवगोत्रस्येति नास्ति घ. ४. कृतवानित्याहेति क-ग-घ-ङ. ५. तस्येति नास्ति ख.

**अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् ॥**
**पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥३७॥**
**यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो ॥**
**स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥३८॥**

**अतः** इति. ननु योगीश्वराणां विद्यमानत्वात् तान् विहाय कथं मामेव पृच्छसि इति आशङ्क्य आह **योगिनां संसिद्धिं**[१] सम्यक्सिद्धिरूपम्. यथा बहुकालयोगेन काचिद् अलौकिकी सिद्धिः भवति तथैव भवान् योगिनां जातः, तेषां सर्वपुरुषार्थदातृत्वात्. किञ्च तेषां त्वमेव **गुरुः** ज्ञानदाता. तद्द्वारा मोक्षप्रदः इति अर्थः. किञ्च तेषां त्वमेव **परमः** परो वासुदेवो मीयते अनेन इति. भक्तिदानात् श्रेष्ठो वा. एवं तत्प्रश्ने हेतुम् उक्त्वा प्रश्नम् आह **पुरुषस्य** इति. अत्र द्वादश प्रश्नाः. अधिकारिणो द्वैरूप्यात् कर्मणां पञ्चविधानां च द्वैरूप्यात् यद्यपि विंशतिभेदाः भवन्ति तथापि कर्तृभेदस्य नियतत्वाद् विपरीतपञ्चके सम्बन्धाभावाद् विशकलिततया[२]

प्रकाशः

**पुरुषस्य** इत्यत्र. अधिकारिद्वैरूप्यं स्वतन्त्र-म्रियमाणभेदेन, कर्मणां श्रोतव्यादीनां तत्तदभावभेदेन इति मूलवाक्यएव स्फुटति. **विपरीते**त्यादि.

लेखः

**पुरुषस्य** इत्यत्र. **द्वादश प्रश्नाः** इति. **पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा** इति अर्धेन विशेषतः स्वतन्त्र-म्रियमाणभेदेन कर्तृविषयकं प्रश्नद्वयम्. **यच्छ्रोतव्यम्** इति एकेन च पञ्चकर्मविषयक-पञ्चप्रश्नाः ; तेषामपि स्वतन्त्र-म्रियमाणभेदेन द्विविधत्वम् इति दशकर्मप्रश्नाः, पूर्वोक्ताः द्वयं च इति द्वादशसङ्ख्याः प्रश्नाः इति अर्थः. अधिकसङ्ख्याशङ्कां निराकुर्वन्ति **अधिकारिणो** इत्यादि. श्रोतव्यादि-पञ्चविधकर्मणामपि द्वैरूप्येण दशविधत्वे च विंशतिभेदाः इति अर्थः. **नियतत्वाद्** इति. कर्मणां कर्त्रधीनत्वात् तद्भेदकथनेनैव कर्तृभेदाः समायान्ति इति नियतत्वाद् न पृथक् निरूपणीयः इति अर्थः. अत्रैव हेत्वन्तरं **विपरीत** इति. स्वतन्त्रकर्तृसम्बन्धि-कर्मपञ्चके

१. सम्यक् सिद्धिं सिद्धिरूपमिति क-ख-ग. २. विषकलिततयेति क-ख.

प्रश्नः इति द्वादशविधत्वम्. तत्र प्रथमम् आह **इहैव** गृहस्थाश्रमे स्थितस्य जीवतः **पुरुषस्य यत् कार्यं** कृतिसाध्यं तत् कथय इति. द्वितीयम् आह **म्रियमाणस्य** इति. **म्रियमाणस्य सर्वथा** आवश्यकं **यत् कर्तव्यं** तद् आह इति. इदानीं साधारण्येन आह म्रियमाणेन जीवता वा **यच्छ्रोतव्यं** श्रोत्रेन्द्रियं कुत्र व्यापारणीयम्? अनेन ज्ञानेन्द्रियाणां बाह्यानाम् अन्येऽपि भेदाः अर्थाद् उक्ताः. (**अथ**!) इदानीं प्रक्रियान्तरेण वाङ्-मनसोः[१] मिथुनस्य कर्तव्यो (**जाप्यं**!) यो जपः स च वक्तव्यः. एवं ज्ञानेन्द्रियद्वयस्य कृत्यं पृष्ट्वा केवलकर्मेन्द्रियाणां कर्तव्यं पृच्छति **यत् कर्तव्यम्** इति. **नृभिः** इति साधारण्येन. तथा कथने सामर्थ्यं सूचयति **प्रभो** इति. एवं त्रयं वैदिकमार्गेण पृष्ट्वा भक्तिमार्गेण द्वयं पृच्छति— **स्मर्तव्यम्** आन्तरं **भजनीयं** बाह्यम्. **वा** इति अनियमे; आन्तरमपि भजनीयम्. अथवा निषेधमुखेन वक्तव्यम्, इतरनिषेधस्य शेषाभ्यनुज्ञाफलकत्वात्. अन्यथा उभयकरणं प्रसज्येत!

---

प्रकाशः

स्वतन्त्रकर्तृसम्बन्धि-कर्मपञ्चके म्रियमाण**सम्बन्धाभावो** अन्यस्य अन्यसम्बन्धि-तदभावः इति अर्थः. **विशकलिततया** इति. कर्तृभेदेन द्विधा, कर्मभेदेन दशधा इति अर्थः. **यद्वा विपर्ययम्** इत्यस्य अर्थम् आहुः **अथवा** इत्यादि. **उभयकरणम्** इति, नित्यद्वयकरणं नित्य-नैमित्तिककरणं च.

लेखः

म्रियमाणसम्बन्धाभावः, अन्यस्य अन्यसम्बन्धि-तदभावः इति अर्थः. **विशकलिततया** इति, कर्तृभेदेन द्विधा कर्मभेदेन दशधा इति अर्थः. **यद्वा विपर्ययम्** इत्यस्य अर्थम् आहुः **अथवा निषेधमुखेन** इति. ननु निषेधमुखेन निरूपणे हि निषिद्धाद् निवृत्तिमात्रलाभाद् विहिते वा कथं प्रवृत्तिः इत्यतः आहुः **इतरनिषेधस्य** इति. **शेष** इति. शेषस्य अभ्यनुज्ञा = ग्राह्यत्वेन अङ्गीकरणं, तत्फलकत्वात्. एवञ्च निषेधशेषत्वेन तल्लाभः इति अर्थः ॥३७-३८॥

---

१. क.पाठानुसारेण. वाङ्मनसस्य मिथुनस्येति मुद्रितपाठः. बाह्यमानसस्य मिथुनस्येति घ. - सम्पा.

नियमविधौ आवश्यकदैहिकानां बाधः प्रसज्येत! अतः तद्वैपरीत्येन वा वक्तव्यम् इति आह **यद्वा** इति. **विपर्ययम्** ''इदं न कर्तव्यम्'' इत्यादिरूपम् ॥३७-३८॥

ननु एकदैव किमिति पृच्छ्यते? तत्र आह.

**नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनाम् ॥**
**न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥३९॥**

**नूनम्** इति. हे **ब्रह्मन्**, क्षोभाभावाय सम्बोधनं, **गृहमेधिनां गृहेषु भगवतः** तव **अवस्थानं न लक्ष्यते**. कदाचिद् दैवगत्या भवेत् चेद् अवस्थानं तद**पि गोदोहन**मात्रम्. गौः दुह्यते यावता कालेन स कालो गोदोहनम्. **क्वचिद्** इति भिक्षोत्तरादानगृहे. यद्यपि परमहंसानां भिक्षादिनियमो नास्ति, योगिनान्तु[१] सुतरामेव, तत्रापि साक्षाद् भगवद्भावं प्राप्तस्य, तत्रापि गृहे मेधा बुद्धिः येषां केवलप्रवृत्तिस्वभावानां, तत्रापि

---

प्रकाशः

ननु नियमविध्यङ्गीकारे न उभयकरणप्रसक्तिः इति किमर्थं विपरीतकथनप्रश्नः इत्यतः आहुः **आवश्यके**त्यादि ॥३७॥

एवं श्रीवल्लभाचार्य-नखचन्द्रमरीचिभिः ॥
निरस्ते हृदयध्वान्ते विवृताद्यसुबोधिनी ॥१॥
समर्पिता तत्पदयोरेषा पुष्पाञ्जलिर्गिराम् ॥
तेन तुष्यन्तु दयया दासेऽस्मिन् सह सूनवः ॥२॥
यदत्र सदसद्वापि जीवबुद्ध्या मयोदितम् ॥
आशयाज्ञानतस्तन्मे क्षन्तव्यं दीनवत्सला ॥३॥
बद्ध्वाञ्जलिं मूर्ध्नि बुधेषु नत्वा मुहुस्तदीयेषु निवेदयामि ॥
असद्यदस्मिन् भवति क्वचित् तत् कृपापरैर्वीक्ष्य निवारणीयम् ॥४॥

॥ इति श्रीमदाचार्य-चरणकमलैकतान-श्रीपीताम्बरतनुज-
पुरुषोत्तमप्रकाशित-प्रथमस्कन्धसुबोधिनीप्रकाशे ऊनविंशाध्यायविवरणम् ॥

---

१. तुर्नास्ति क-ग-घ-ङ.

पुत्रादिगृहेष्वपि मोहाधिक्ययुक्तेषु – तिरस्कारसम्भवात्, "वानप्रस्थाश्रमपदेष्व-भीक्ष्णं भैक्ष्यम् आचरेद्" (भाग.पुरा. ११।१८।२५) इति वाक्याद् – भिक्षार्थम् आगतस्य भिक्षाऽदाने सर्वमेव सुकृतं गच्छेद् इति तच्छङ्कया कार्यव्यापृतत्वं सम्भाव्य धर्मकार्यत्वबोधनाय गोदोहनमात्रं तिष्ठेत्. अनेन अग्निहोतॄणां गृहस्थानां गृहे कदाचित् तिष्ठेद् इति उक्तं भवति ॥३९॥

एवं पृष्टे उत्तरं दातुं यत्नं कृतवान् इति आह सूतः.

**॥ सूतः उवाच ॥**

**एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा ॥**
**प्रत्यभाषत धर्मज्ञो भगवान् बादरायणिः ॥४०॥**

॥ इति श्रीभागवत-प्रथमस्कन्धे ऊनविंशाध्यायः ॥

**एवम् आभाषितः** इति. **आभाषितः** स्तुतः. **श्लक्ष्णया** स्नेहप्रकाशिकया, अवक्रया वा. **प्रत्यभाषत** प्रतिप्रश्नम्[1] उत्तरं दत्तवान्. ब्रह्मविदः तथा कथने हेतुः **धर्मज्ञः** इति, "अब्रुवन् विब्रुवन् वापि" (मनुस्मृ. ८।१३) इति निषेधज्ञः. उत्तरदानेऽपि स्वस्य कापि क्षतिः नास्ति इति ज्ञापयितुम् आह **भगवान्** इति. आवश्यकत्वाय आह **बादरायणिः** इति, अन्यथा व्यासस्य भागवतकरणं व्यर्थं स्यात्! अतः शरीरं ततः उत्पन्नम् इति तन्निष्कृत्यर्थमपि[2] उक्तवान् इति अर्थः. एवम् उत्तरावधिकृत्यं प्रथमस्कन्धे निरूपितम् इति ॥४०॥

---

१. प्रतिपन्नमिति ग-घ-ङ.   २. तन्निवृत्त्यर्थमिति क.

आद्यस्कन्धस्य विवृतिः श्रीकृष्णचरणाम्बुजे ॥
निवेदितातियत्नेन वाक्पुष्पाञ्जलिरुज्ज्वला[१] ॥(९)॥
सुज्ञेषु हस्तयुगलं पुरतो निधाय विज्ञापयामि मुरवैरिपदाब्जनिष्ठः ॥
उच्छृङ्खलापि विवृतिर्मम चिन्तनीया श्रीकृष्णपादयुगले विनिवेशितेति ! ॥(१०)॥

इति श्रीभागवतसुबोधिन्यां श्रीलक्ष्मणभट्टात्मज-श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे ऊनविंशोऽध्यायः ॥

॥ सम्पूर्णो अयं प्रथमस्कन्धः ॥

॥ श्रीकृष्णार्पणम् अस्तु ॥

---

लेखः

एवं हि कृतस्य अस्य व्याख्यानस्य ''यत्करोषि यदश्नासि'' (भग.गीता ९।२७) इति, ''कायेन वाचा'' (भाग.पुरा. ११।२।३६) इत्यादिवाक्यात् स्वीयशिक्षार्थं भगवति समर्पणम् आहुः **आद्यस्कन्धस्य** इत्यादि. एवं समर्पणम् उक्त्वा आस्तिकैः एतद्रसेच्छुभिः सर्वथा अत्र प्रवर्तितव्यम् इति आहुः **सुज्ञेषु** इति. **हस्तयुगलम्** इति, रसपरवशतया अत्यन्तकृपापूर्वोक्तिः इयम्. तेन अवश्यं द्रष्टव्या इति उक्तं भवति. **उच्छृङ्खला** इति. शब्दमर्यादायां प्राकृतयुक्त्याद्युल्लङ्घनमेव उच्छृङ्खलत्वम्. यद्वा एतेन मङ्गलान्तानि शास्त्राणि प्रथन्ते इति सिद्धान्तसंग्रहाय भगवत्स्मरणरूपं मङ्गलमपि आचरितम् इति सर्वं शोभनम् (९-१०).

॥ इति श्रीभागवतप्रथमस्कन्धसुबोधिनीलेखः सम्पूर्णः ॥

## ॥ इति ऊनविंशोऽध्यायः ॥

## ॥ समाप्तः प्रथमस्कन्धः ॥

---

१. उत्तमेति घ-ङ.

## ॥ प्रथमं परिशिष्टम् ॥

## ॥ उपन्यस्तवाक्यानां सूचिपत्रम् ॥


पृष्ठ वाक्य ग्रन्थ

४५, ३९२ अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ... आततायिनः ... जिघांसन्तं जिघांसीयात् – वसिष्ठस्मृति ३।१२.

३० अग्निर्वा अर्वा वायुः सप्तिः – तैत्तिरीयब्राह्मण १।३।६।४.

३६५ अग्निहोत्रं जुहोति – तैत्तिरीयसंहिता १।५।९।१.

२५४ अग्नेर्भस्मासि अग्नेः पुरीषमसि – मैत्रायणीसंहिता २।७।११.

१२३ अङ्गीकृता ग्लानिः न दोषाय – ...........

१५० अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलाद् – महाभारत ३।२९८।१७.

१३७ अङ्गुष्ठमात्रः पुरुषो ... प्रीणाति विश्वभुग् – महानारायणोपनिषद् १६।३.

९७ अचक्षुरन्धस्य यथा गुणीकृतः ... जनो जनस्य ... त्वं त्वव्ययं ज्ञानं – भागवतपुराण ८।२४।५०-५१.

१३० अज्ञानिनः सुरवरे समधिक्षिपन्तो – गरुडपुराण १।२२७।३५.

२६३ अण्वीं जीवकलां ध्यायेन् ... सम्पूज्य तन्मयः – भागवतपुराण ११।२७।२३-२४.

१३७ अतप्ततनूर्न न तदामोश्नुते – ऋक्संहिता ९।८३।१.

४११ अतो ह्यन्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः – भागवतपुराण ३।२२।४.

१६१ अथ ह इमम् आसन्यं प्राणम् ऊचुः – बृहदारण्यकोपनिषद् १।३।७.

२१६ अथादावुत्तरे विभागे ह्रस्वं व्यञ्जनपरः – तैत्तिरीयप्रातिशाख्य ३।१.

१४० अदृश्यत्वादिगुणको धर्मोक्तेः – ब्रह्मसूत्र १।२।२१.

८६ अद्भ्यः वा एषः ( / एषा ) प्रातः उदेति अपः सायं प्रविशति – ऐतरेयब्राह्मण ४।२०.

४१५ अनन्याश्चिन्तयन्तो मां ये जनाः ... वहाम्यहम् – भगवद्गीता ९।२२.

४३१ अनित्यं हि स्थितो यस्मात् तस्माद् अतिथिः उच्यते – महाभारत १३।९७।१८.

४ अन्ते या मतिः सा गतिः – लौकिकन्यायसाहस्री १६६.

२५९ अन्ने प्रलीयते मर्त्यम् – भागवतपुराण ११।२४।२२.

६३ अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्यः उपासते – भगवद्गीता १३।२५.

१७२, ४०० अपदोषतैव विगुणस्य गुणः – शिशुपालवध ९।१२.

६४ अपश्यत् पुरुषं पूर्णम् – भागवतपुराण १।७।४.

६३ अपि चक्रुः प्रवचनम् एकम् – भागवतपुराण १०।८४।११.

१३० अप्रमत्ता रक्षत तन्तुमेनम् – आपस्तम्बधर्मसूत्र २।६।१३।६.

३८७ अप्रतिषिद्धम् अनुमतं भवति – कौटिल्य अर्थशास्त्र १५।१८०।१८.

१६२, ४३९ अब्रुवन् विब्रुवन् वापि नरो भवति किल्बिषि – मनुस्मृति ८।१३.

१६६ अमी च त्वां सुरसङ्घा ... गृणन्ति – भगवद्गीता ११।२१.

७३ अम्भस्यपारे – महानारायणोपनिषद् १।१.

६७ अरूपवदेव हि तत्प्रधानत्वाद् – ब्रह्मसूत्र ३।२।१४.

२४३ अर्जुनस्य इमे बाणाः नेमे बाणाः शिखण्डिनः ... सेगवा इव – महाभारत ६।११९।६६.

२१९ अर्जुनेनाविताः सर्वे इन्द्रप्रस्थं गमिष्यथ – भागवतपुराण ११।३०।४८.

३७५ अर्थं बुद्ध्वा वाक्यरचना नाम – ..........
११८ अर्धो वा एषः आत्मनो यद् पत्नी – तैत्तिरीयसंहिता ६।१।८।५.
११५ अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः – बृहदारण्यकोपनिषद् २।२।३.
२८ अल भूषणपर्याप्तिवारणेषु – पाणिनिधातुपाठ भ्वा.प.से. ५१६.
२१९ अलङ्कृताः कान्तसखा वरूथशः – भागवतपुराण ४।३।१२.
४० अवस्थितेरिति काशकृत्स्नः – ब्रह्मसूत्र १।४।२२.
५५, २६४ अशनया मृत्युरेव – तैत्तिरीयब्राह्मण ३।९।१५।२
३४९ असङ्गो ह्ययं पुरुषः – बृहदारण्यकोपनिषद् ४।३।१५-१६.
२९६ असत्यम् अप्रतिष्ठं ते जगदाहुरनीश्वरम् – भगवद्गीता १६।८.
३३० असुर्यः शूद्रः – तैत्तिरीयब्राह्मण १।२।६।७.
३९८ अस्माभिर्यदनुष्ठेयं गन्धर्वैः तद् अनुष्ठितं – महाभारत ३।२४२।१५.
४२० अहमुच्चावचैर्द्रव्यैः ... भूतग्रामावमानिनः – भागवतपुराण ३।२९।२४.
३ अहो मे पश्यताऽज्ञानम् – भागवतपुराण १।८।४८.
३४, १२३ अहं भक्तपराधीनः – भागवतपुराण ९।४।६३.
१०४ अहं मनुरभवं सूर्यश्च – बृहदारण्यकोपनिषद् १।४।१०.
२६७ अक्षरधियाम् – ब्रह्मसूत्र ३।३।३३.
३३८ अक्षैः क्रीडति – ........... (श्रुति).
४१६ आकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषम् – भागवतपुराण १०।२७।४.
२२८ आकृष्यमाणे वसने द्रौपद्या ... गोविन्द द्वारकावासिन् – महाभारत २।६८।४१.
१५५ आख्यानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितं – भागवतपुराण ३।४।३५.
९१ आत्मरामः ( / आत्मकामः ) आप्तकामः – बृहदारण्यकोपनिषद् ४।३।२१.
४२७ आत्मलाभान्न परं विद्यते – आपस्तम्बधर्मसूत्र १।८।२२।२.
३७४ आत्मानं सततं रक्षेत् – मनुस्मृति ७।२१३.
७३ आत्मा वा अरे द्रष्टव्यः श्रोतव्यः – बृहदारण्यकोपनिषद् २।४।५.
६४ आत्मैव इदमग्र आसीत् पुरुषविधः – बृहदारण्यकोपनिषद् १।४।१.
३२१ आत्मैव ह्यात्मनो बन्धुः – भगवद्गीता ६।५.
१९८ आधानप्रभृति यजमानो अग्नयो भवन्ति – बोधायनश्रौतसूत्र २०।१८.
३७४ आनन्दमानन्दमयोऽवसाने – भागवतपुराण २।२।३१.
४२० आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते – तैत्तिरीयोपनिषद् ३।६.
३७६ आरण्याः पशवः कनीयांसः शुचा श्रुता – तैत्तिरीयसंहिता ५।१।४।३.
१५० आविस्तरां प्रपश्यन्ति – भागवतपुराण ११।७।२१.
२७५ आश्चर्यवत् पश्यति कश्चिदेनम् ... श्रुत्वाप्येनं वेद न चैव कश्चिद् – भगवद्गीता २।२९.
४१७ आसामहो चरणरेणुजुषामहं स्याम् – भागवतपुराण १०।४४।६२.
६७ आह च तन्मात्रम् – ब्रह्मसूत्र ३।२।१६.
१५६ आहिताग्न्यादिषु – पाणिनिसूत्र २।२।३७.
७१ आहुस्त्वामृषयः सर्वे ... देवलो व्यासः – भगवद्गीता १०।१३.
१०३ इन्द्रियैर्विषयाकृष्टैः – भागवतपुराण ४।२२।३०.

७६ इमे चान्ये च भगवन् नित्या यत्र महागुणा – भागवतपुराण १।१६।२९.
२७७ इरावती धेनुमती हि ... रोदसी विष्णुरेतः – ऋक्संहिता ७।९९।३.
४१ इहैव ( / अत्रैव ) समवनीयन्ते प्राणाः – नृसिंहोत्तरतापिन्युपनिषद् ५.
३९५ ईश्वराज्ज्ञानमन्विच्छेद् – ब्रह्मपुराण २।६९।११.
१३ ईश्वरो वा भवेत् कर्ता ... फलं स्मृतम् – महाभारत १२।३२।१२.
१५० ईक्ष् दर्शनम् – पाणिनिधातुपाठ भ्वादि.आ.से. ६११.
१५० उद्विग्नमीनयुगलं द्विजपङ्क्तिशोभिः ... सर इन्मुखं ते – भागवतपुराण ५।२।१३.
४७ ऋणानि त्रीणि अपाकृत्य मनो मोक्षे निवेशयेत् – मनुस्मृति ६।३५.
१२९ एकस्यैव ममांशस्य जीवस्यैव ... विद्यया च तथेतरः – भागवतपुराण ११।११।४.
४१९ एतावदरे खलु अमृतत्वम् – बृहदारण्यकोपनिषद् ४।५।१५.
३४ एवं योगेश्वरः कृष्णः – भागवतपुराण १०।७५।१६.
१७२ एषा वै देवमनुष्याणां शान्ता दिक् – तैत्तिरीयब्राह्मण २।१।३।५.
२५९ एष उ एव असाधु कर्म कारयति – कौषीतकिब्राह्मणोपनिषद् ३।९.
४२० एष ह्येव आनन्दयाति – तैत्तिरीयोपनिषद् २।७.
१३९ ओजःसहो बलयुतं मुख्यं तत्त्वं गदां दधद् – भागवतपुराण १२।११।१४.
३५० कलिं सभाजयन्त्यार्या – भागवतपुराण ११।५।३६.
३५३ कलौ कर्तैव लिप्यते – स्कन्दपुराण २।४।३०।७.
३५३ कलौ खलु भविष्यन्ति नारायणपरायणाः – भागवतपुराण ११।५।३८.
४४० कायेन वाचा – भागवतपुराण ११।२।३६.
३६४ कालात्मकः सोऽथ सुपर्ण आसीद् – महाभारततात्पर्यनिर्णय ३।१३.
३२२ कालात्मना भगवता शक्रदर्पं जिघांसत – भागवतपुराण १०।२१।३१.
२११ कालं कर्म स्वभावं च – भागवतपुराण २।५।२१.
९४ किमासनं ते गरुडासनाय ... वचनीयमस्ति – गरुडपुराण ३।७।३६.
१२९ कुष्ठी यावत् प्रपश्यति – ............
९८ कृतघ्ने नास्ति निष्कृतिः – महाभारत १२।२७१।११.
३५३ कृते तात्कालिकः शापः ... कलौ संवत्सरेण तु – पराशरस्मृति १।२७.
३९५ कृते पापेऽनुतापो वै ... हरिसंस्मरणं परं – ब्रह्मपुराण २२।३८.
१७० कृपणः स तु विज्ञेयो योऽनालोचितयाचकः – ...........
२५३ कृष्णो ह्यत्यक्तदेहोपि त्यक्तदेहस्य देहवत् स्वरूपसदृशाकृतिं – ब्रह्माण्डपुराण ......... .
२२० कृष्णौ यदुकुरूद्वहौ – भागवतपुराण ४।१।५९.
३५ केचिद् विलग्नाः दशनान्तरेषु – भगवद्गीता ११।२७.
३५७ को हि तद्वेद यद्यमुष्मिंल्लोके ... दिक्ष्वतीकाशान् करोति – तैत्तिरीयसंहिता ६।१।१।१.
३१८ कः क्षेमो निजपरयोः कियान् वाऽर्थः स्वपरद्रुहा धर्मेण – भागवतपुराण ६।१६।४२.
१८३ क्रीडार्थमात्मनः इदं त्रिजगत्कृतं ते ... पर ईश कुर्युः – भागवतपुराण ८।२२।२०.
५६ क्वचिद् गुणोऽपि दोषः स्याद् ... गुणः – भागवतपुराण ११।२१।१६.
१५९ गतश्रमं पृच्छेद् – .........
९३ गद व्यक्तायां वाचि – पाणिनिधातुपाठ भ्वादि.प.से. ५२.

२८१ गमश्च – पाणिनिसूत्र ३।२।४७.
४०८ ग्रहं सम्मार्ष्टि – ............
१९३ गाङ्गं करिकराद् भ्रष्टं वायुना पल्लवीकृतम् ... राघव – ..........
८१ गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ – भविष्यपुराण १।७।२०.
५५ गोविन्दभुजगुप्तायां द्वारकायां ... कृष्णोपासनलालसः – भागवतपुराण ११।२।१.
९३ गौर्वाव सर्वस्य मित्रम् – तैत्तिरीयसंहिता २।५।२।६.
३१ चश्चन्द्रदस्युशोभासु पुंसि पक्षे समुच्चये ... उत्तरेषु व्यवस्थितः – एकाक्षरकोश ....... .
९७ छागो वा मन्त्रवर्णाद् – जैमिनिपूर्वमीमांसासूत्र ६।८।३१.
६४ जन्माद्यस्य यतः – ब्रह्मसूत्र १।१।२.
३५९ जीवो जीवं विहाय माम् – भागवतपुराण ११।२५।३५.
३६१ ज्ञानं यतः प्रतिनिवृत्तः – स्कन्दपुराण १।२।२०.
९४ ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् – भग.गीता १८।५५.
१३९ तत्करोति तदाचष्टे – पाणिनिसूत्र काशिकावृत्ति ३।१।२६.
११३ तत्तेजो विद्धि मामकं – भगवद्गीता १५।१२.
७९ तत्त्वमसि – छान्दोग्योपनिषद् ६।८।७.
४०५ तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः – ब्रह्मसूत्र ३।१।१.
२६६ तन्मायाफलरूपेण – भागवतपुराण ११।२४।३.
११६ तपस्विनो दानपराः – भागवतपुराण २।४।१७.
४१९ तमेव विदित्वा अतिमृत्युमेति ... अयनाय – श्वेताश्वतरोपनिषद् ६।१५.
३७१ तया विना क्व देवत्वम् – विष्णुपुराण १।९।१२०, पद्मपुराण ६।७१।३२३.
११२ तया विभ्रंशितज्ञानाः – भागवतपुराण ३।४।१.
४० तस्मात् सर्वएव मन्यते मां प्रत्युदगाद् – तैत्तिरीयसंहिता ६।५।४।२.
३५१ तस्यर्ते यः क्षणो नीतः – भागवतपुराण २।३।१७.
७२ तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् – श्वेताश्वतरोपनिषद् ४।१०.
१७३ तस्यैव हेतोः प्रयतेत कोविदः न लभ्यते यद् भ्रमताम् उपर्यधः – भागवतपुराण १।५।१८.
६० ताड्यमानसु भेरीषु – महाभारत ७।८८।१.
४१५ ता नाविदन् मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदं – भागवतपुराण ११।१२।१२.
१७८ तिलैर्विष्णुर्गवा रुद्रो ... सत्पात्रेषु समर्पणाद् – ............
१९४ तृतीया च होश्छन्दसि – पाणिनिसूत्र २।३।३.
३७९ तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ... कदाचन – पञ्चतन्त्रम् १।१८२.
३५० त्रेतायुगसमः कालो वर्तते – भागवतपुराण ५।१७।१२.
९९ त्वमर्कदृक् सर्वदृशां समीक्षणो ... स्वगतिं बुभुत्सताम् – भागवतपुराण ८।२४।५०.
२५३ त्वं कालमल इत्युक्तो मले शुद्धिर्न विद्यते – ब्रह्मवैवर्तपुराण काशीमाहात्म्य ......
२६७ दण्डा वाग्देहचेतसाम् – भागवतपुराण ११।१८।१७.
१०४ दश वै पशोः प्राणाः – तैत्तिरीयसंहिता ६।३।७५.
११३ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग् भवेत् – भागवतपुराण १२।४।२४.
२६१ दूतीरेव त्वं मनसो असि – तैत्तिरीयसंहिता २।५।११।५.

३२८ देवस्य सवितुः प्रातः – तैत्तिरीयब्राह्मण १।५।३।१.
१३६, १३७ देवाः वै राजन्याद् जायमानाद् ... यं कामयेत् – तैत्तिरीयसंहिता २।४।१३।१.
१४२ देवाश्च पितरश्चेहागतिच्छत सुप्रतिष्ठता वरदा भवत – ..........
१४४ दैवबलं बलम् – भागवतपुराण ९।६।२९.
१७० दैवादपेतम् उत दैववशादुपेतम् – भागवतपुराण ११।१३।३६.
७ दौष्यन्तिः अत्यगान् मायाम् – भागवतपुराण ९।२०।२७.
३६ दंशस्तु वनमक्षिका – अमरकोश २।५।२६.
९६, ४०२ द्वा सुपर्णा सयुजा सखाया ... अनश्नन्नन्यः अभिचाकशीति – मुण्डकोपनिषद् ३।१।१.
१६९ द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् – मनुस्मृति ३।१४४.
१७१ द्वौ सम्मताविह मृत्यू दुरापौ – भागवतपुराण ६।१०।३३.
२७६ धन्वन्निव प्रपा असि – ऋक्संहिता १०।४।१.
९८ धर्मः क्षरति कीर्तनात् – .......... .
२६ न घटत उद्भव – भागवतपुराण १०।८४।३१.
४१२ न तस्य तत्त्वग्रहणाय साक्षात् ... स्वयं स्याद् – भागवतपुराण ५।११।३.
९८ न ते माम् अङ्ग जानन्ति – भागवतपुराण ११।२१।२८.
१६९ न द्विषतोऽन्नमश्नीयाद् द्विषन्तं नैव भोजयेद् – महाभारत ५।९१।२७.
४१५ न पारयेहं ... स्वसाधुकृत्यं विबुधायुषापि वः – भागवतपुराण १०।२९।२२.
३८७ न ब्रह्मदण्डदग्धस्य – भागवतपुराण ३।१४।४२.
९४ नमो नम इत्येतावत् सदुपशिक्षितम् – भागवतपुराण ५।३।४.
४१८ न वा अरे पत्युः कामाय ... पतिः प्रियो भवति – बृहदारण्यकोपनिषद् २।४।५.
३९१ न वै शिशूनां गुणदोषयोः पदम् – भागवतपुराण ७।५।४९.
२९५ न सत्तन्नासदुच्यते – भगवद्गीता १३।१२.
३१४, ३२६ न हिंस्यात् सर्वभूतानि – ............ (श्रुति).
४७, १४४ नाऽपुत्रस्य लोकोस्ति इति तत्सर्वे पशवो विदुः – ऐतरेयब्राह्मण ७।१३.
४२६ नापृष्टः कस्यचिद् ब्रूयाद् – मनुस्मृति २।११०.
२७५ नारायणपराः विप्राः धर्मं गुह्यं परं विदुः – भागवतपुराण ७।११।४.
४८, ९९ नारायणपराः सर्वे न कुतश्चन बिभ्यति – भागवतपुराण ६।१७।२८.
३८८ नाविष्णुः पृथिवीपतिः – देवीभागवत ६।१०।२४.
६५ नासदासीन्नो सदासीत् तदानीम् – ऋक्संहिता १०।१२९।१.
९७, ९८ नाहमिज्याप्रजातिभ्यां ... गुरुशुश्रूषया यथा – भागवतपुराण १०।७७।३४.
६८ नित्योऽनित्यानाम् – कठोपनिषद् २।२।१३.
२५४ नित्यं शलाका स्त्रियाम् – पाणिनिलिंगानुशासनम् ३४.
४१५ नेमं विरञ्च्यो न भवो – भागवतपुराण १०।९।२०.
४१७ नैवात्मा च यथा भवान् – भागवतपुराण ११।१४।१५.
४१७ नोद्धवोऽण्वपि मन्न्यूनः – भागवतपुराण ३।४।३१.
१८४ पञ्चभिः सह गन्तव्यं ... न दुःखं पञ्चभिः सह – सुभाषितरत्नमाला ३।८४.
११८ पत्युर्नोयज्ञसंयोगे – पाणिनिसूत्र ४।१।३३.

२४, ७१, ११२, ११४ पराञ्चि खानि व्यतृणत् ... कश्चिद् धीरः ... अमृतत्वमिच्छन्
— कठोपनिषद् २।१।१.

३५ पार्थव्याजाह्वय- — भागवतपुराण २।७।३५.

३६ पार्थस्तु विष्टभ्यबलेन पादौ ... अभिद्रवन्तम् — महाभारत ६।५९।१०१.

३८१ पापात् मरणम् — ...........

३४० पाक्षिकोऽपि दोषः परिहरणीयः — ......... (न्याय).

२८९ पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थम् — तैत्तिरीयसंहिता १।८।५।१.

३०० पुनश्च पद्माद् उत्पन्ना आदित्योऽभूद् यदा हरिः — विष्णुपुराण १।९।१४३.

५२ पुमान् स्त्रिया — पाणिनिसूत्र १।२।६७.

३२० पुरुषत्वे च मां धीराः साङ्ख्ययोगविशारदाः ... सर्वशक्त्युपबृंहितं — भागवतपुराण ११।७।२१.

६९ पुरुषस्तदुपादानम् आत्मानं लीलयाऽसृजद् — भागवतपुराण ३।१०।११.

३७४ पुरुषस्याखिलार्थदः — भागवतपुराण ९।९।२८.

६४ पुरुषो ह वै नारायणो अकामयत — नारायणाथर्वोपनिषद् १.

६४ पूर्वमेवाहम् इहासमिति तत् पुरुषस्य पुरुषत्वम् — तैत्तिरीय आरण्यक १।२३।४.

६७ पूर्ववद् वा — ब्रह्मसूत्र ३।२।२९.

३५६ प्रउगं शंसति — द्रष्ट. शाबरभाष्य २।१।१३.

६७ प्रकाशवच्च अवैयर्थ्याद् — ब्रह्मसूत्र ३।२।१५.

६७ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ... त्वहम् — भागवतपुराण ११।२४।१९.

१४४ प्रजामनु प्रजायसे तदुते मर्त्यामृतम् — तैत्तिरीयब्राह्मण १।५।५।६.

३६३ प्रचोदिता येन — भागवतपुराण २।४।२२.

२६२ प्रजापते आशया वै श्राम्यसि — तैत्तिरीयब्राह्मण ३।१२।२।३.

३२१ प्रबुद्धकर्मा दैवेन — भागवतपुराण ३।६।४.

७३ प्रयोजनम् अनुद्दिश्य न मन्दोऽपि प्रवर्तते — लौकिकन्यायसाहस्री ३५९.

१९८ प्रविशेद् वा हुताशनम् — निर्णयसिन्धु ३ उत्तरार्ध। विधवाधर्माः.

२६३ प्राणो वै ग्रहः सोऽपानेन अतिग्रहेण गृहीतो ... जिघ्रति — शतपथब्राह्मण १४।६।२।२.

४०२ प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपि — विश्वकोश ... . द्रष्ट. भट्टिकाव्य ७।७३.

१३८ प्रियः स्त्रीणामपीच्य — ...........

४१७ प्रेमा ना प्रियता हार्दं प्रेम स्नेहः — अमरकोश १।७।२७.

९८, ३३५ फलमतः उपपत्तेः — ब्रह्मसूत्र ३।२।३८.

६८१ बहुलं छन्दसि — पाणिनिसूत्र ७।३।९७.

२४९ बुद्धिर्विज्ञानरूपिणी — भागवतपुराण २।१०।३३.

३६० ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति — भगवद्गीता १८।५४.

१६६ ब्रह्मविद इव सौम्य ते मुखं भाति, को नु त्वानुशशास — छान्दोग्योपनिषद् ४।१४।२.

२५०, ३७८ ब्रह्म वेद ब्रह्मैव भवति — मुण्डकोपनिषद् ३।२।९.

३३८ ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः — मनुस्मृति ११।५४.

३४६ ब्रह्मेति परमात्मेति भगवान् इति शब्द्यते — तत्त्वार्थदीपनिबन्ध १।६.

२९ ब्राह्मणोऽस्य मुखमासीद् ... पद्भ्यां शूद्रो अजायते — ऋक्संहि. १०।९०।१२.

३८६ ब्राह्मणाः क्षमयार्हणतां गताः – भागवतपुराण ९।१५।३९.
३६७ ब्राह्मण्यां क्षत्रियात् सूतः – याज्ञवल्क्यस्मृति १।४।९३.
३९७ भक्तोऽपि भगवद्द्रोहमाचरन्नरकं व्रजेद् – ..........
४२१ भक्त्या तुतोषयति भवान् गजयूथपायः – द्रष्ट. भागवतपुराण ७।९।९.
७३ भक्त्या मामभिजानाति – भग.गीता १८।५५.
४२१ भक्त्यैव तुष्टिमभ्येति – महाभारततात्पर्यनिर्णय १।११६.
२९ भद्रपूजापदानि मे – भागवतपुराण ११।११।४२.
१७३ भयं प्रमत्तस्य वनेष्वपि स्याद् – भागवतपुराण ५।१।१७.
४२, १९८ भस्मान्तम् इदं शरीरम् – ईशावास्योपनिषद् १।१७.
४०० भूतेष्टकाः उपदधाति ... अत्र वै मृत्युर्जायते ... सर्वे ह्यस्य मृत्यवो वेष्टा ... वा
– तैत्तिरीयसंहिता ५।६।३।१.
११७ भूमौ च ते भुवनमङ्गलदिग्वितानां ... पुनाति विश्वं – भागवतपुराण १०।६७।४४.
३५१ भूः कालभर्जितभगापि यदङ्घ्रिपद्म ... नोऽखिलार्थान् – भागवतपुराण १०।७९।३०.
२५६ भ्रातॄणाम् एकजातानाम् – मनुस्मृति ९।१८२.
३३ मत्तः परतरं नान्यद् किञ्चिदस्ति – भगवद्गीता ७।७.
३३ मत्तः सर्वं प्रवर्तते – भगवद्गीता १०।८.
३३, २५९ मत्तः स्मृतिर्ज्ञानमपोहनं च – भगवद्गीता १५।१५.
३७४ मद्भक्ता यान्ति मामपि – भगवद्गीता ७।२३.
१९३ मया निष्पादितं ह्यत्र देवकार्यमशेषतः – भागवतपुराण ११।७।२.
२३५ मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् – भगवद्गीता ११।३३.
६३१ माण्डव्यशापाद् भगवान् प्रजा ... सत्यवतीसुतात् – भागवतपुराण ३।५।२०.
२७९ मातरम् अभिगच्छन्ति – ........... (श्रुति).
२७६ मातुलस्य सुतामूढ्वा मातृगोत्रां ... चान्द्रायणं चरेद् – स्कन्दपुराण ३।२।२१।१९.
२७६ मातुलस्येव योषा भागः – ऋक्संहिता २।१४।६.
३२५ मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् – भागवतपुराण ११।२२।४.
२३५, २९७ मायेत्यसुराः – मुद्गलोप. २।३.
१७७ मित्रस्य चर्षणी धृतः – तैत्तिरीयसंहिता ३।४।११।५.
३६० मुक्तानामपि सिद्धानां – भागवतपुराण ६।१४।५.
२९ मुखमग्निरिद्ध – भागवतपुराण २।१।२९.
२६० मुख्या नाम पुरस्ताद् ... रसज्ञविपणान्वितः – भागवतपुराण ४।२५।४९.
२६९ मुख्ये शास्त्रार्थसम्भवः – ........... (न्याय).
४२८ मृता वा एषा त्वगमेध्या – मैत्रायणीसंहिता ३।६।२.
२८२ मृत्यवे वा एष नीयते यत् पशुः – तैत्तिरीयसंहिता ६।३।८।१.
२६४ मृत्युर्यस्योपसेचनम् – कठोपनिषद् १।२।२५.
३६६ मैवमेवाधमस्यापि ... क्वचित् तरति कश्चन – भागवतपुराण १०।३५।५.
३९५ मोक्षम् इच्छेद् जनार्दनात् – मत्स्यपुराण ६८।४१.
७३ य एनं विदुः अमृताः ते भवन्ति – श्वेताश्वतरोपनिषद् ४।२०.

३७२ यच्छौचनिःसृत- – भागवतपुराण ३।८।२२.
१५२, ३३४ यज्ञेन यज्ञम् अयजन्त देवाः – तैत्तिरीय आरण्यक ३।१२।७.
२९७ यतो वा इमानि भूतानि जायन्ते – तैत्तिरीयोपनिषद् ३।१।१.
३५९ यतो वाचो निवर्तन्ते – तैत्तिरीयोपनिषद् २।९।१.
४४० यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् – भगवद्गीता ९।२७.
२६९ यत्कर्मभिर्यत्तपसा – भागवतपुराण ११।२०।३२.
३३, ७६ यदा यदा हि धर्मस्य ग्लानिर्भवति – भगवद्गीता ४।७.
३७४ यदा यस्यानुगृह्णाति ... स जहाति ... वेदे च परिनिष्ठिताम् – भागवतपुराण ४।२९।४६.
५५ यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुत ... भयं भवति – तैत्तिरीय आरण्यक ८।७.
३१ यदिदं किञ्च जगत्सर्वं प्राण एजति ... अमृतास्ते भवन्ति – कठोपनिषद् २।३।२.
२४५ यदि पूर्वस्यामाहुत्यां हुतायां यजमानो म्रियेत ... गमयेत् – आपस्तम्बश्रौतसूत्र ९।११।१८.
३१ यदि प्रयास्यन् – भागवतपुराण २।२।२२.
१४२ यदेव विद्यया करोति – छान्दोग्योपनिषद् १।१।१०.
४०९ यद्यदाचरति श्रेष्ठः – भगवद्गीता ३।२१.
२२६ यद्यद् विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा – भगवद्गीता १०।४१.
३४८ यद्धि मनसा ध्यायति तद्वाचा वदति – तैत्तिरीयसंहिता ६।१।७।४.
३५८, ४१७ यन्न दुःखेन सम्भिन्नं न च ग्रस्तम् – ...........
७० यन्नामभिर्ध्यायति धीरपार्थैः – भागवतपुराण २।२।२.
३७७ यमश्च नियमश्चैव तथासनमीष्यते ... योगेऽङ्गानि तपोधन – ...........
१९१ यरोनुनासिको वा – पाणिनिसूत्र ८।४।४५.
२७५, ४१० यस्त्विच्छया कृतो धर्मः – भागवतपुराण ७।१५।१४.
६५, ३७२ यस्मात् क्षरमतीतोऽहम् अक्षरादपि चोत्तमः ... पुरुषोत्तमः – भगवद्गीता १५।१८.
६३, १५६ यस्मिन् विदिते ( / विज्ञाते ) सर्वमिदं विदितं ( / विज्ञातं ) भवति – शाण्डिल्योपनिषद् २।२.
१५५ यस्य ज्ञानोपदेशाय – भागवतपुराण ३।५।२१.
३४ यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः – कठोपनिषद् १।२।२५.
३६१ यस्य स्मृत्या च नामोक्त्या ... न्यूनं सम्पूर्णतां याति – नारदपुराण १।१७।१०८.
४२३ यस्य स्यादद्धा न विचिकित्सास्ति – छान्दोग्योपनिषद् ३।१४।४.
१० यस्यामतं तस्य मतं ... विज्ञातम् अविजानतां – केनोपनिषद् २।३.
१०५ यस्यामलं दिवि यशः प्रथितं रसायाः – भागवतपुराण १०।६७।४४.
१५१ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ... अतनोत् – भागवतपुराण १।८।६.
२२९ या त्वरा द्रौपदीत्राणे ... क्व गता हरेः – जगन्नाथस्तोत्र ४.
८९ या प्रापणे – पाणिनिधातुपाठ अदादि.प.से. १०७४.
११८ यास्ते शीलमनुव्रता – भागवतपुराण ३।१४।१३.
३०६ युवैषतोत्स्रष्टुमहो सहासुभिः – भागवतपुराण १।४।११.
२१८ ये देवा यज्ञहनः ... इत्याह इमानेव लोकांस्तीर्त्वा ... सुवर्गं लोकमेति
– तैत्तिरीयसंहिता ३।५।४।३.
१००, ११०, ११७ ये यथा मां प्रपद्यन्ते – भग.गीता ४।११.

३२८ ये वै चत्वारः स्तोमाः कृतं ... कलिः सः – तैत्तिरीयब्राह्मण १।५।११।१.
३ यः तान् द्वेष्टि स मां द्वेष्टि – महाभारत ५।९१।२८.
७५ रजस्तमश्चाभिभूय सत्त्वं भवति – भगवद्गीता १४।१०.
२९ रविमध्ये स्थितः सोमः ... अन्तःस्थितोऽच्युतः – मैत्रायण्युपनिषद् ६।३८.
१४ राधा वैशाखमासि स्याद् ... चित्रभेदे च धन्विनाम् – विश्वकोश .... .
६६ रेतोधा आसन् – ऋक्संहिता १०।१२९।५.
१६८ रोगी चिरप्रवासी परान्नभोजी ... अस्य विश्रामः – शार्ङ्गधरपद्धतिः २५१४.
२८२ रौद्रं गवि – तैत्तिरीयब्राह्मण २।१।८।१.
२५, १२८ लोकवत् तु लीला कैवल्यम् – ब्रह्मसूत्र २।१।३३.
३४० लोके व्यवायामिषमद्यसेवा – भागवतपुराण ११।५।११.
३६१ वयं तु न वितृप्यामः ... स्वादु स्वादु पदे पदे – भागवतपुराण १।१।१९.
३४१ वर्तमानसामीप्ये वर्तमानवद् वा – पाणिनिसूत्र ३।३।१३१.
२५० वलक्षो धवलो अर्जुनः – अग्निपुराण ३६०।५३.
१८० वष्टि भागुरिरल्लोपम् – पाणिनिसूत्र २।४।८२ काशिकावृत्ति.
२९ वह्निमध्ये स्मरेद् रूपं ... ध्यानमङ्गलं – भागवतपुराण ११।१४।३७.
२०९ वा उपसर्जनस्य – पाणिनिसूत्र ६।३।८२.
४१९ वाक्यान्वयाद् – ब्रह्मसूत्र १।४।१९.
१४३ वाग्वा एषा यत् सोमक्रयणी चिदसि – तैत्तिरीयसंहिता ६।१।७।२.
२६० वाग्वायोः – तैत्तिरीय आरण्यक ३।९।१.
२५९ वाचं यच्छ मनो यच्छ ... अध्वना – भागवतपुराण ११।१६।४२.
३७४ वायव्यं श्वेतमालभेत – तैत्तिरीयसंहिता २।१।१।१.
१०४ वायुकोटिमहाबलः – पुरुषोत्तमसहस्रनाम ४।५१.
४३९ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेद् – भागवतपुराण ११।१८।२५.
२७ वासश्छन्दोमयं पीतं – भागवतपुराण १२।११।११.
३३ वासांसि जीर्णानि यथा विहाय – भगवद्गीता २।२२.
१८० विकलश्च न वदेत् – ...........(स्मृति).
१२९ विद्याविद्ये मम तनू – भागवतपुराण ११।११।३.
३६४ विनिर्धूताशेषमनोमलः ... यत्पादमूले कृतकेतनः पुमान् ... प्रपद्यते – भागवतपुराण ४।२१।३२.
१७५ विप्रस्य वै सन्न्यसतो – भागवतपुराण ११।१८।१४.
१६८ विमुञ्चेद् मुच्यमानेषु – भागवतपुराण ७।१४।४.
१६४ विवस्वानर्यमा पूषा – भागवतपुराण ६।६।३९.
१६१ विशेषतश्चेद् आज्ञा स्याद् – विवेकधैर्याश्रय ३.
२८२ विश्वसृजः प्रथमा – तैत्तिरीयब्राह्मण ३।१२।९।७.
९१ विषयाः विनिवर्तन्ते ... परं दृष्ट्वा निवर्तते – भगवद्गीता २।५९.
१६४ विष्णुतत्त्वं परिज्ञाय एकं वानेकभेदगं ... उपसन्नतान् – नारदपञ्चरात्र जयासंहिता १६।९-१०.
५० विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः – पद्मपुराण ६।२२९।५९.
८८ विष्णोर्मुखोत्थानिलपूरितस्य यस्य ध्वनिर्दानवदर्पहन्ता – विष्णुपञ्चायुधस्तोत्र २.

७३ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे – शतपथब्राह्मण ३।७।१।१७.
६१ विष्णोः पदे परमे मध्व उत्स – ऋक्संहिता १।१५४।५.
८२ वृको हर्षो अनिलो गृध्रो … आत्मजासूचिः – भागवतपुराण १०।५८।१६.
१९७ वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं – श्वेताश्वतरोपनिषद् ३।९.
१३२ वेत्थ यथा पञ्चम्याम् आहुतौ … गर्भः सम्भवति – छान्दोग्योपनिषद् ५।२।३-१०.
३१ वेदान् कृत्वा स तुरगांश्चतुरश्वो महेश्वरः – महाभारत द्रोणपर्व …. .
३६२ वेदः शिवः शिवो वेदः वेदाभ्यासी सदाशिवः … द्विजः किमु – शिवपुराण ……..
३४८ व्यवहारः सन्निपातो … सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः – भागवतपुराण ११।२५।६.
३५ व्यालम्बिपीतान्तपटः – महाभारत ६।५९।९१.
१५० शब्दादेव प्रमितः – ब्रह्मसूत्र १।३।२४.
३४७ शमो दमस्तितिक्षेक्षा तपः सत्यं … अनुद्यमः – भागवतपुराण ११।२५।२-४.
३७४ शरीरमाद्यं खलु धर्मसाधनम् – कुमारसम्भवम् ५।३३.
३४५ शापो मेऽनुग्रहायैव – भागवतपुराण १०।३१।१४.
३३७ शास्त्रफलं प्रयोक्तरि – जैमिनिपूर्वमीमांसासूत्र ३।७।१८.
३८८ शुनि चैव श्वपाके च पण्डिताः समदर्शिनः – भगवद्गीता ५।१८.
७३ शृण्वन्ति गायन्ति – भागवतपुराण १।८।३५.
३९९ शेषे षष्ठी – पाणिनिसूत्र २।३।५०.
२६ श्यामाच्छबलं प्रपद्य – छान्दोग्योपनिषद् ८।१३।१.
१२९, २७७ श्रिया पुष्ट्या गिरा कान्त्या … मायया च निषेवितं – भागवतपुराण १०।३६।५५.
२७६ श्रेयः प्रजापालनमेव राज्ञः – भागवतपुराण ४।२०।१४.
२५९ श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति – भगवद्गीता ४।२६.
३४६ सएव कदाचिद् जगदुद्धारार्थम् … 'कृष्ण'पदवाच्यः – तत्त्वार्थदीपनिबन्ध १।१ प्रकाश.
१३ सतां हि सन्देहपदे … प्रमाणम् अन्तःकरणप्रवृत्तयः – अभिज्ञानशाकुन्तलम् १।२०.
३१४ सत्यं च ब्रह्मचर्यं चाहिंसां च यत्नेन परिरक्षेद् – आरुणि उपनिषद् ३.
२८८, ३२५ सत्यं दया तपो दानम् … तुरीया शोचः ह्रीयते – भागवतपुराण १२।३।१८-२०.
१६२ सत्यं ब्रूयात् प्रियं ब्रूयात् … धर्मः सनातनः – मनुस्मृति ४।१३८.
६५, ६६ सदेव सौम्येदमग्र आसीद् एकमेवाद्वितीयम् – छान्दोग्योपनिषद् ६।२।१.
३८५ सप्त वै शीर्षण्याः प्राणाः – तैत्तिरीयसंहिता ५।३।२।५.
७४ सभाजयन्ते मम पौरुषाणि – भागवतपुराण ३।२५।३४.
३२८ समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि – तैत्तिरीयब्राह्मण १।५।३।४.
२६२ स यथा शकुनिः सूत्रेण प्रबद्धो … सौम्य मनः – छान्दोग्योपनिषद् ६।८।२.
२३५, ३८८ सर्गे तपोहमृषयो … स्थाने … अन्ते … पुरुशक्तिभाजः – भागवतपुराण २।७।३९.
६८, ४२० सर्वएव आत्मानो ( / एतात्मनो ) व्युच्चरन्ति – शतपथब्राह्मण १४।५।१।२३.
७४ सर्वत्र प्रसिद्धोपदेशाद् – ब्रह्मसूत्र १।२।१.
६९ सर्वयोनिषु कौन्तेय मूर्तयः … बीजप्रदः पिता – भगवद्गीता १४।४.
७४ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषाद् – ब्रह्मसूत्र ३।३।१.
२१५ सर्वम् … इष्टं दत्तं … वृङ्क्ते – आपस्तम्बधर्मसूत्र १।१।३।२५-२६.

२९३ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा – भागवतपुराण ११।२०।३३.
२८३ सर्वासां वा एते प्रजानां ... किम् एते सत्रिणः – तैत्तिरीयसंहिता ७।२।९।३.
२८३ सर्वे सर्वाभ्यएव देवताभ्यः ... यः सत्रायागुरते – तैत्तिरीयब्राह्मण १।४।७।७.
१ साधयित्वा आजातशत्रोः – भागवतपुराण १।८।५.
३२२ सुखं दुःखमयं क्षेमं कर्मणैवाभिपद्यते – भगवद्गीता १०।४.
८० सुपां सुलुग् – पाणिनिसूत्र ७।१।३९.
२१५ सुप् सुपा – पाणिनिसूत्र २।१।४.
३२ सेनयोरुभयोर्मध्ये रथं स्थापय – भगवद्गीता १।२१.
३६४ सोऽध्वनः पारम् आप्नोति तद्विष्णोः परमं पदं – कठोपनिषद् १।३।९.
३५५ सोऽहं वः श्रावयिष्यामि – भागवतपुराण १।३।४५.
३२२ स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते – भागवतपुराण १०।२१।१६.
२ स्वमायया आवृणोद् गर्भं – भागवतपुराण १।८।१३.
१८ स्वयम्भूर्नारदः शम्भुः ... वैयासकिर्वयम् – भागवतपुराण ६।३।२०.
३४० स्वैरं चरन्ति मुनयः – भागवतपुराण १०।३०।३५.
१७५ हत्वा तु क्षत्रियो विप्रं ... लक्ष्यं शस्त्रभृतां वा स्यात् ... अवाकृशिरः – प्रायश्चित्तमयूख महापापप्रायश्चित्त.
१६० हरन्त्यघं तेऽङ्गसङ्गात् तेष्वास्ते ह्यघभिद् हरिः – भागवतपुराण ९।९।६.
३८३ क्षत्रात् परं नास्ति तस्माद् ब्राह्मणः क्षत्रियम् अधस्ताद् उपास्ते – बृहदारण्यकोपनिषद् १।४।११.
५५ क्षुत् खलु वै मनुष्यस्य भ्रातृव्यः – तैत्तिरीयसंहिता २।४।१२।६.

*

# ॥ प्रथमं परिशिष्टम् ॥

## । श्रीसुबोधिनीकारिकार्धसूचिः ।


| कारिका | पृष्ठ |
|---|---|
| अग्निभावेऽपि काष्ठेन | २५४ |
| अग्रिमव्याप्त्यभावाय | ४२८ |
| अतएवेष्टवर्गेच्छा | १७६ |
| अतश्चतुर्दशे हेतुं | २०० |
| अतोऽधिकारसिद्ध्यर्थं | २७५ |
| अतो निश्चिन्ततासिद्ध्यै | १५४ |
| अतः कृष्णपरं चित्तं | ४४ |
| अतः पुत्रान् समुत्पाद्य | २७४ |
| अतः शङ्खनिनादेन | ८८ |
| अतः सान्त्वनमग्रे च | ३०५ |
| अथाध्यायद्वयेनास्य | ३४४ |
| अधिकारस्य सम्प्राप्त्या | २७३ |
| अधिष्ठाने बहिश्चोर्ध्वम् | १०३ |
| अधुना पूर्णगुणता | ३९४ |
| अधुना श्रोतृदेहस्य | १३२ |
| अनुग्रहो निग्रहश्च | २७५ |
| अमुक्तपितृका मुक्तिं | १५४ |
| अवञ्चयदिति ह्येकं | २२५ |
| आगत्य नमनं यत्तु | ६ |
| आधिदैविकरक्षार्थं | २७४ |
| आधिदैविकरूपाणां | २७४ |
| आधिदैविकसौख्यं हि | ४८ |
| आध्यात्मिकं च तद्राज्ये | ४८ |
| आनर्ताख्यं तत्प्रवेशः | ८८ |
| इति दर्शयितुं भीष्म- | ४ |
| इति स्तुतिस्तथाप्यस्य | ४ |
| उपचारेषु सर्वेषु | ६१ |
| एकोनविंशे वैराग्यात् | ३९४ |
| एतदर्थं हि भगवान् | ३९५ |
| एनं दृष्ट्वैव राजापि | २१८ |
| एवम् एकाग्रसिद्ध्यर्थं | १३२ |
| एवं कौरवभक्तानां | ८७ |
| एवं चतुर्दशश्लोकैः | २२५ |
| एवं चतुर्दशे हेतुं | २१८ |
| एवं द्वादशधा कृष्णः | २२५ |
| एवं भागवतश्रोतुः | १५३ |
| एवं हि धृतराष्ट्रस्य | २०० |
| ऐहिकस्यापि बन्धस्य | २७३ |
| ऐहिकामुष्मिकफले | १ |
| ऐहिके सर्वसौख्यं तु | ४४ |
| कलिदोषाच्च तेनात्र | २७३ |
| कलिः कालमलं सर्वं | २५३ |
| कलेः स्थानप्रदानाद्धि | ३८० |
| कारणं करणञ्चैव | २३६ |
| कालस्याकारणत्वाय | ५१ |
| कृतकार्यः शास्त्ररीत्या | २१८ |
| कृतं भूमेस्तु हेतूनां | ३०७ |
| कृषिर्भूवाचकः शब्दो | ३५७ |
| कृष्णमाहात्म्यविज्ञानं | २३६ |
| कृष्णाधीनं सुखं यस्य | ४४ |
| कृष्णेच्छातस्तदित्युक्त्वा | ८७ |
| कृष्णैकतानचित्तत्वं | ५० |
| गान्धार्याः उत्तरायाश्च | ५२ |
| गुणस्वभावभेदेन | २२४ |
| गुणैस्तु नवधा योगात् | २२४ |
| गुरुणैव स्वरूपाप्ति- | ३९५ |
| ज्ञानिनो देहनाशाय | ३४५ |
| ज्ञाने तुल्येऽपि देवर्षेः | ३९५ |
| ज्ञानं च ज्ञानकार्यं च | ४३२ |
| ततो द्वयेनेन्द्रियाणां | १५४ |
| ततोऽध्यायद्वयेनैव | १५३ |
| ततो भवति पुष्टोऽपि | १५४ |
| ततो वैराग्यसत्सङ्गौ | १५४ |
| ततः सप्तदशे धर्म- | ३०५ |
| तत्र पृष्टार्थसन्देहे | ३९४ |

तथा भागवतज्ञाने १३२
तदा भागवतश्रोतुः १
तन्न स्याद् भूतले कृष्णे २००
तस्य चिह्नं सितच्छत्रम् ६१
तस्याप्युद्धारकः कृष्णो ४
तादृशं फलवन्नान्यद् ३४५
तामसाः दोषनिर्हारात् ८
तावद्भिरेव स्वज्ञातैः २२५
तेषां नेष्टो ब्रह्मभावः २००
दारौ तु न तथा २५४
दुःखिते नगरे कृष्णो ८८
दूरान्मङ्गलमेतद्धि ८८
दोषाभावेन सहितं २३६
द्वात्रिंशल्लक्षणोपेतः ३९५
द्वारका जलदुर्गं हि ८८
द्वारकास्थितभक्तानाम् ८७
धृतराष्ट्रे तथा बन्धो १७६
नवमे स्वस्य भिन्नत्वं ३
निरन्तरस्थितिर्या तु ५१
निरूपिता ततो मध्ये २
निरूप्यतेऽन्यथा स्वस्य २७४
निरूप्यं प्रथमं तत्र ४४
नैश्चिन्त्यसिद्धये विष्णोः ४४
पञ्चदशे महाराजः २१८
पाण्डवानाम् अतो द्वाभ्यां २००
पाण्डवानां यदूनां च ४४
पारलौकिकबन्धस्य २७३
पिता पितामहश्चैको १५३
पिता सम्बन्धिनश्चैव १०८
पुरस्कृतोऽघमुत्सृज्य ४
पुरुषत्रयमुक्तिर्हि १५३
प्रथमं मारणे भीतिः ३०५
प्रथमं षोडशाध्याये २७३
प्रपितामहमुक्तिर्हि १५३
प्रमादेऽपीश्वरेच्छातो ३९४
प्रवेशे च प्रविष्टस्य ८७
प्राकृतानामिव स्नेहः ८७
प्रेमोपकारज्ञानानि २१८
बहुत्वाद् गणनाभावात् ५१
बीजसंस्कारसहितः १३३
बीजस्वभावक्षेत्राणां ११
बीजाधानोत्तरं रक्षा ३९५
भक्तोऽपि भगवद्द्रोहं ४
भगवच्चरितस्यापि २७४
भगवद्गमनं तस्माद् २००
भार्गवस्यापि रामस्य ३९५
भार्याभ्रातृभिरत्रैव २१८
भीतस्य स्थानदानं च ३०५
भूधर्मरक्षा सर्वापि २७४
मुक्तिर्निरूपिता पूर्वम् २७३
मुनयो भगवद्भक्त- ३९४
मूर्तीभूतास्त्रयो राज्ञे ३०६
मूलनिर्हरणं तस्मात् २७४
मोहाभावः स्वतो नास्ति १७६
यतो निवर्तते तत्र २५३
यथा भर्ता तथा पुत्रो ५२
यथा वेदान्तविज्ञाने १३२
यशःकर्मसमाजश्री- ३९४
यादवेभ्यस्तथोत्कर्षः ३४५
यावत् कस्यापि हृदयं १७६
युधिष्ठिरादिमोहस्य १७६
यो वदेत् तस्य सन्दर्शः २००
राज्यं वंशो भ्रातरश्च १६५
राज्ञो मोहप्रसङ्गाय ४
लोकप्रतीत्या कृष्णस्य १
विपरीतत्वमापन्नः ६
विवेकस्थापनायैव ३०६
विषयेषु च वैतृष्ण्यं १३५

| | |
|---|---|
| विस्तारोक्त्यै तयोः श्रद्धा | ३४४ |
| वृथैव जीवनं लोके | ५० |
| वेषान्तरेऽपि तत्पीडा- | ३०६ |
| वैराग्यस्य प्रकर्षेण | ३९५ |
| वैषम्यम् अवतारे तु | १९ |
| शङ्खनादस्तथा स्निग्ध- | ८७ |
| शापस्तु हरिणा प्रोक्तः | ३४५ |
| शापात् प्रायस्ततो राज्ये | ३४४ |
| श्रीमद्भागवतश्रोतुः | २ |
| श्रोतुञ्च भावितज्ज्ञानाद् | ३९४ |
| सङ्क्षेपकथनं पूर्वं | ३४४ |
| सदानन्दश्च भगवान् | ३५७ |
| सनिमित्तां मुक्तिमाह | १५३ |
| सन्धानं वस्तुभूतस्य | ३०७ |
| समासव्यासकथनाद् | २२ |
| सम्भावनाया हेतुत्वं | २०० |
| सर्वदोषनिवृत्तिस्तु | ३९४ |
| सर्वलक्षणसम्पन्नः | १३३ |
| सर्वसामर्थ्यसम्बोधो | ३०६ |
| सर्वेष्टापूरणं चैव | २ |
| सर्वैः सह नमस्कारः | ७ |
| सात्त्विकाः प्रथमं प्रोक्ताः | ८ |
| सुखं दुःखं च लभते | ११ |
| सुन्दरं भगवद्योग्यं | १०३ |
| स्थित्वा शोकापनोदे तु | ५१ |
| स्नेहस्ततः कृतार्थत्वम् | ५१ |
| स्वकृतत्वज्ञापनाय | २३६ |
| स्वच्छन्दमृत्योस्तच्छान्त्यै | ४ |
| स्वधर्मविष्णुभक्तिभ्यां | १३५ |
| स्वभावतः स्थापितोऽपि | २७४ |
| स्वरूपेण प्रमाणेन | १९ |
| हस्तिनिर्मिते पुरे | ५० |
| हृदा बन्धनसद्भावाद् | १७६ |


*

# । मूलश्लोकार्धसूचिः ।


| श्लोक | पृष्ठ |
|---|---|
| अ-औ | |
| अकरोः सचिवं दूतं | १८ |
| अक्रूरश्चोग्रसेनश्च | १०७ |
| अग्निर्निसृष्टो दत्तश्च | १६९ |
| अग्रे गुणेभ्यो जगदात्मनि | ६३ |
| अग्रेचरो मम विभो | २३८ |
| अङ्गुष्ठमात्रममलं | १३७ |
| अजातशत्रावभवन् | ४८ |
| अजातशत्रुं प्रत्यूचे | १८० |
| अजातशत्रुः कृतमैत्रो | १७७ |
| अजातशत्रुः पृतनां | ८३ |
| अजानतामिवान्योन्यं | २४६ |
| अत एनं वधिष्यामि | ३१३ |
| अतः पृच्छामि संसिद्धिं | ४३६ |
| अत्यक्रामदविज्ञातः | १६४ |
| अत्रानुरूपं राजर्षे | ३२२ |
| अत्रिर्वसिष्ठश्च्यवनः | ४०९ |
| अथ दूरागतान् शौरिः | ८४ |
| अथवा देवमायायाः | ३२५ |
| अथवाऽस्य पदाम्भोज- | २८० |
| अथाजगाम भगवान् | १८१ |
| अथापि यत्पादनखावसृष्टं | ३७२ |
| अथाबभाषे भगवान् | १८१ |
| अथाविशत् स्वभवनं | ११८ |
| अथैतानि न सेवेत | ३४० |
| अथोदीचीं दिशं यातु | १७२ |
| अथो विहायेमममुञ्च | ४०१ |
| अधर्मांशैस्त्रयो भग्नाः | ३२५ |
| अधिक्रमन्त्यङ्घ्रिभिः | २१३ |
| अधिजह्रुर्मुदं राज्ञः | १३५ |
| अधोवदनम् अब्बिन्दून् | २०७ |
| अद्यैव राज्यं बलमृद्धकोशं | ३९९ |
| अध्वन्युरुक्रमपरिग्रहं | २४२ |

| | |
|---|---|
| अनन्यपुरुषश्रीभिः | २०७ |
| अनवेक्षमाणो निरगाद् | २६७ |
| अनागस्स्विह भूतेषु | ३१६ |
| अनामरूपात्मनि रूपनामनी | ६९ |
| अनुग्रहाद् भगवतः | ३४६ |
| अनुवर्तिताः स्विद्यशसा | १४५ |
| अन्तरोऽनन्तरो भाति | १९० |
| अन्तर्हितस्य स्मरती | २९० |
| अन्यथा तेऽव्यक्तगतेः | ४३५ |
| अन्याश्च जामयः पाण्डोः | १५७ |
| अन्ये च कार्ष्णिप्रवराः | २०८ |
| अन्ये च देवर्षिब्रह्मर्षिवर्याः | ४०९ |
| अन्ये च मुनयो ब्रह्मन् | ८ |
| अन्येऽपि चाहममुनैव | २३० |
| अन्योन्यमासीत् सञ्जल्पः | ६२ |
| अन्वगच्छन् रथैर्विप्राः | ५ |
| अपापेषु स्वभृत्येषु | ३९१ |
| अपि देवर्षिणादिष्टः | २०४ |
| अपि नः सुहृदस्तात | १६१ |
| अपि मय्यकृतप्रज्ञे | १७९ |
| अपि मे भगवान् प्रीतः | ४३४ |
| अपि स्मरथ नो युष्मत् | १५९ |
| अपि स्मरन्ति कुशलं | २०९ |
| अपि स्वस्त्यासते सर्वे | २०९ |
| अपि स्वित् पर्यभुङ्क्थाः | २१६ |
| अपीच्यदर्शनं श्यामं | १३७ |
| अपीपलन्महाराजः | १३५ |
| अपृच्छद् विविधान् धर्मान् | २१ |
| अप्येष वंश्यान् राजर्षीन् | १४५ |
| अप्रतर्क्यादनिर्वाच्याद् | ३२२ |
| अप्रमत्तः प्रमत्तेषु | ३५४ |
| अप्रमाणविदो भर्तुः | १३० |
| अबिभ्रदर्यमा दण्डं | १६३ |
| अब्भक्षः उपशान्तात्मा | १९४ |
| अब्रह्मण्याः नृपव्याजाः | ३२९ |
| अभाषतैतान् अभिवन्द्य | ४२५ |
| अभिसङ्गम्य विधिवत् | १५७ |
| अभूतपूर्वः सहसा | ३७९ |
| अभ्याचष्टानुरागाश्रैः | ११ |
| अम्बा च हतपुत्रार्ता | १७७, १८१ |
| अरक्षतां व्यसनतः | १७९ |
| अरक्ष्यमाणाः स्त्रियः उर्वि | २८९ |
| अर्हणमुपपेद ईक्षणीयो | ३९ |
| अलङ्कृतां पूर्णकुम्भैः | १०७ |
| अलब्धतृणभूम्यादिः | ३७९ |
| अलब्धमानोऽवज्ञातः | २१४ |
| अलक्ष्यलिङ्गो निजलाभतुष्टो | ४२६ |
| अलक्ष्यमाणे नरदेवनाम्नि | ३८८ |
| अवज्ञातमिवात्मानं | ३७९ |
| अवापुर्दुरवापां ते | २७० |
| अविज्ञातगतिर्जह्यात् | १७० |
| अश्रूयन्ताऽऽशिषः सत्याः | ६२ |
| अश्वत्थाम्नोपसृष्टेन | १३३ |
| असृग्वर्षन्ति जलदाः | २०५ |
| अस्त्रतेजः स्वगदया | १३७ |
| अस्यानुभावं भगवान् | १७ |
| अहस्तानि सहस्तानां | १८९ |
| अहो अद्य वयं ब्रह्मन् | ४३२ |
| अहो अधर्मः पालानां | ३८१ |
| अहो अलं श्लाध्यतमं | ७७ |
| अहो कष्टमहोऽन्याय्यं | ११ |
| अहो नृलोके पीयेत | २८३ |
| अहो बत स्वर्यशस- | ७८ |
| अहो बतांहो महदज्ञ | ३८६ |
| अहो मयाऽमीवमनार्य- | ३९६ |
| अहो महीयसी जन्तोः | १६९ |
| अहो वयं जन्मभृतो | ३६६ |
| अहो वयं धन्यतमाः | ४११ |
| अहो सनाथाः भवता | ९८ |
| अहो सुरादीन् हृतयज्ञ- | २८९ |
| अहं हि पृष्टोऽर्यमणो | ३७५ |
| आख्याहि वृष भद्रं वः | ३१५ |
| आख्याह्यनन्ताचरितो- | ३६५ |
| आजहाराश्वमेधांस्त्रीन् | २७८ |

आत्मतुल्यबलैर्गुप्तां १०३
आत्मन्यात्मानमावेश्य ४१
आत्मवैरूप्यकर्तारं ३१५
आत्मा च जरया ग्रस्तः १६८
आत्मानञ्च परित्रातं २८६
आत्मानञ्चानुशोचामि २९४
आत्मारामं पूर्णकामं ८९
आत्मेश्वरमचक्षाणो १७९
आत्मौपम्येन मनुजं १२४
आनर्तान् भार्गवोपागात् ८५
आनर्तान् स उपव्रज्य ८८
आपाययति गोविन्द- ३५७
आपूर्यमाणः पितृभिः १५१
आमन्त्र्य चाभ्यनुज्ञातः ५०
आरुरोह रथं कैश्चित् ५०
आलक्षये भवतीमन्तराधिं २८९
आशीर्भिर्युज्यमानोऽन्यैः ११०
आशंसमानः शमलं १७९
आश्रयः सर्वभूतानां १४६
आश्रुत्य तेषां वचनं ४२५
आश्वास्य चाश्वपाकेभ्यो ११०
आसते कुशलं कच्चिद् २०८
आसते सस्नुषाः क्षेमं २०८
आसन् सपत्नविजयो २०४
आस्तेऽधुना स राजर्षिः ३४२
आस्ते यदुकुलाम्भोधौ २११
आहर्तास्मि भुजं साक्षाद् ३१६
आहर्त्तैषोऽश्वमेधानां १४६
इच्छया क्रीडितुः स्यातां १८४
इतस्ततो वाशनपानवास- २९०
इति चिन्तयतस्तस्य २०७
इति चोदीरिता वाचः १०२
इति धर्मं महीं चैव ३३०
इति पुत्रकृताघेन ३९२
इति भीतः प्रजाद्रोहात् ४
इति मतिरुपकल्पिता २५
इति राज्ञे उपादिश्य १४८
इतोऽर्वाक् प्रायशः कालः १७२
इति लङ्घितमर्यादं ३८५
इति व्यवच्छिद्य स पाण्डवेयः ४०८
इति स्म राजाऽध्यवसाय- ४२२
इत्थम्भूतानुभावोऽयं ३४२
इत्युक्तो धर्मराजेन १६१
इत्युक्त्वाऽथाऽऽरुहत् स्वर्गं १९९
इत्युक्त्वा रोषताम्राक्षो ३८४
इदानीं धर्म पादस्ते ३२७
इदं ममाचक्ष्व तवाधिमूलं २९१
इमे चान्ये च भगवन् २९२
इमे जनपदाः ग्रामाः २०६
इयञ्च भूर्भगवता ३२९
इहोपहूतो भगवान् २८०
उक्थेन रहितो ह्येष २२४
उत्तरायाः हतो गर्भः १३३
उत्तस्थुराराात् सहसा ११९
उत्सृज्य सर्वतः सङ्गं ३४७
उदङ्मुखो दक्षिणकूल ४२२
उदीचीं प्रविवेशाशां २६७
उद्दामभावपिशुना- १२३
उद्धवः सात्यकिश्चैव ६१
उद्यानोपवनारामैः १०५
उन्मील्य शनकैर्नेत्रे ३८६
उपवर्णितमेतद् वः ३५४
उर्वक्षिबाहवो वामाः २०४
उषित्वा हास्तिनपुरे ५०
ऊचुः प्रजानुग्रहशीलसाराः ४२३
एकदा धनुरुद्यम्य ३७६
एकान्तभक्त्या भगवति २५१
एतदर्थं हि भगवान् २८३
एतदीशनमीशस्य १२७
एतद् वः पाण्डवेयानां ३१८
एतानि पञ्च स्थानानि ३३८
एतावताऽलं ननु सूचितेन ३७०
एताः परं स्त्रीत्वं ८१
एवमाभाषितः पृष्टः ४३९

| | | | |
|---|---|---|---|
| एवं कृष्णसखः कृष्णो | २१९ | कस्य हेतोर्निजग्राह | २८० |
| एवं गृहेषु सक्तानां | १६४ | कक्षीवान् गौतमोऽत्रिश्च | ८ |
| एवं चिन्तयतो जिष्णोः | २४८ | कामान् अमोघान् स्थिर- | ३३४ |
| एवं तु तस्मिन् नरदेवदेवे | ४२३ | कामं ववर्ष पर्जन्यः | ४८ |
| एवं धर्मे प्रवदति | ३२३ | कालकर्मगुणाधीनो | १८८ |
| एवं नृपाणां क्षितिभार- | १२२ | कालकर्मतमोरुद्धं | २५० |
| एवं बलिष्ठैर्यदुभिः | २४७ | कालरूपोऽवतीर्णो | १९२ |
| एवं राजा विदुरेण | १७४ | कालस्य च गतिं | २०१ |
| एवंविधा गदन्तीनां | ८३ | कालेन वा ते बलिनां | २९१ |
| एष किं निभृताशेष- | ३८० | का वा सहेत विरहं | ३०३ |
| एष दाता शरण्यश्च | १४५ | किमन्यैरसदालापैः | २८० |
| एष राज्ञः परो धर्मो | ३१३ | किं तु बालेषु शूरेण | ३५४ |
| एष वै भगवान् साक्षाद् | १७ | किं तेऽकामाः सुरस्यार्हाः | १३५ |
| एष ह्यस्मिन् प्रजातन्तौ | १४२ | किं पुनर्दर्शनस्पर्श- | ४३३ |
| औत्तरेयेण दत्तानि | ३३८ | किं क्षत्रबन्धून् कलिना | २९० |
| क-घ | | किम्पुरुषादीनि सर्वाणि | २८५ |
| कच्चित् तेनामयं तात | २१४ | कीर्त्यमानं यशो यस्य | ५३ |
| कच्चित् त्वं नागमोऽगम्यां | २१५ | कुतः पुनर्गृणतो नाम | ३६८ |
| कच्चित् त्वं ब्राह्मणं बालं | २१५ | कुमतिमहरद् आत्मविद्यया | ३२ |
| कच्चित् पुरे सुधर्मायां | २१० | कुरुजाङ्गलपाञ्चालान् | ८५ |
| कच्चित् प्रेष्ठतमेनाऽथ | २१७ | कुशलान्याशु सिद्ध्यन्ति | ३५२ |
| कच्चिदानर्तपुर्यां नः | २०८ | कृच्छ्रेण संस्तभ्य शुचः | २२१ |
| कच्चिदास्ते सुखं रामो | २०८ | कृतमनुकृतवत्यः उन्मदान्धाः | ३८ |
| कच्चिद् भद्रेऽनामयं | २८९ | कृपयाऽतिथिरूपेण | ४३२ |
| कच्चिद् राजाऽऽहुको | २०८ | कृपया स्नेहवैक्लव्यात् | १७९ |
| कच्चिन्नाभिहतोऽभावैः | २१४ | कृष्णाङ्घ्रिसेवामधिमन्यमानः | ४०१ |
| कच्चित्कालमथावात्सीत् | १६३ | कृष्णादेशेन तच्चित्तः | २७१ |
| कण्टकं कण्टकेनैव | २५२ | कृष्णे एवं भगवति | ४१ |
| कथमन्यांस्तु गोपायेत् | १८८ | कृष्णे गते भगवति | ३८४ |
| कथं त्वनाथाः कृपणाः | १८७ | कृष्णे लसत्पीतपटे | २३ |
| कया वृत्त्याः वर्तितं | १५९ | कृष्णोऽस्त्री गाण्डीवं चापं | १४ |
| कर्णधार इवापारे | १८१ | कृष्णं च तत्प्रभावज्ञः | ९ |
| कर्मण्यस्मिन्ननाश्वासे | ३५७ | केचिद् विकल्पवसनाः | ३१९ |
| कलिनाऽधर्ममित्रेण | २६८ | केन वापकृतं सर्वं | ३८६ |
| कस्त्वं कृष्णे गते दूरं | ३१० | को नाम तृप्येद् रसवित् | ३६० |
| कलेवरं हास्यति स्वं | १९७ | कोऽवृश्चत् तव पादांस्त्रीन् | ३१४ |
| कस्त्वं मच्छरणे लोके | ३१० | कौरवेन्द्रपुरस्त्रीणां | ६२ |

कौशिक्याप उपस्पृश्य ३८४
क्रीडन्ति परमानन्दं २१२
गजाह्वये महाराजः ३४२
गतस्वार्थमिमं देहं १७०
गताः सप्ताधुना मासाः २०३
गम्भीररयोऽनिरुद्धो २०८
गान्धारी द्रौपदी ब्रह्मन् १५७
गान्धारी धृतराष्ट्रश्च ५१
गान्धार्याश्च महाबाहो १८०
गाम्भीर्यं स्थैर्यमास्तिक्यं २९२
गायन्तश्चोत्तमश्लोक- १०९
गावल्गणे क्व नस्तातो १७७
गाञ्च धर्मदुघां दीनां ३०७
गीतं भगवता ज्ञानं २५०
गुणकर्माश्रयाः पुम्भिः ३५५
गृहं प्रविष्टो गुरुवन्दनाय १७७
गोपुरद्वारमार्गेषु १०५

च-ज

चकार राज्यं धर्मेण ४३
चतुर्भिर्वर्तसे येन २९१
चार्वायताक्षोन्नसतुल्य- ४२७
चित्रध्वजपताकाग्रैः १०५
चीरवासा निराहारो २६६
चेतसो वचसश्चापि ३२५
छित्वा स्वेषु स्नेहपाशान् १७४
जज्ञे वंशधरः पाण्डोः १४१
जनमेजयादींश्चतुरः २७६
जनेऽनागस्यघं युञ्जन् ३१६
जनः सद्यो वियुज्येत १६७
जम्बूद्वीपाधिपत्यं च १३५
जलाशयमचक्षाणः ३७६
जलौकसां जले यद्वन् २४७
जातकं कारयामास १४१
जातैकभक्तिर्गोविन्दे १५७
जिज्ञासितात्मयाथात्म्यो १४८
जितासनो जितश्वासः १९५
जिह्मप्रायं व्यवसितं २०१
जीवितुं नार्हथ क्लिष्टं ११
जुगुप्सितं कर्म किञ्चित् २१६
ज्ञातुं च पुण्यश्लोकस्य २०१, २०३
ज्ञात्वागाद्धास्तिनपुरं १५६
ज्ञानेन वैयासकिशब्दितेन ३६४
ज्ञानं विरक्तिरैश्वर्यं २९२

त-न

ततश्च वः पृच्छ्यमिमं ४२६
ततस्ते कृष्णहृदयाः ४२
ततो निवृत्ताः ह्यबुधाः ४२७
ततोऽनृतं मदः कामो ३३८
ततोऽभ्येत्याश्रमं बालो ३८५
ततो युधिष्ठिरो गत्वा ४२
ततोऽर्थकामाभिनिवेशिता- ३८९
ततो विनशनं प्रागाद् ४
ततः परीक्षिद् द्विजवर्य- २७५
ततः सर्वगुणोदर्के १४१
तत् कथ्यतां महाभाग २८०
तत्कृतं मतिवैषम्यं १९
तत्तथाऽभ्यर्थितस्तस्मै ३३७
तत्पादमूलं शिरसा ३३१
तत्र गोमिथुनं राजा ३०७
तत्र तत्र ह तत्रत्यैः ८६
तत्र तत्रोपशृण्वानः २८६
तत्र दुन्दुभयो नेदुः ४२
तत्र ब्रह्मर्षयः सर्वे ७
तत्र सञ्जयमासीनं १७७
तत्राब्दकोटिप्रतिमः १०१
तत्राभवद् भगवान् व्यासपुत्रो ४२६
तत्रैव मे विहरतो २३१
तत्रोपजग्मुर्भुवनं पुनाना ४०९
तत्रोपनीतबलयोः ८९
तथाप्येकान्तभक्तेषु १९
तथैवानुचराः शौरेः २०८
तदद्य नः पापमुपैति ३८९
तदभिप्रेतमालक्ष्य १५१
तदस्तु कामं ह्यघनिष्कृताय ३९७

| | |
|---|---|
| तदा ते भ्रातरः सर्वे | ५ |
| तदार्यधर्मश्च विलीयते | ३८९ |
| तदाहरेवाप्रतिबुद्ध- | २५४ |
| तदा हि चौरप्रचुरो | ३८८ |
| तदिदं भगवान् राजन् | १९० |
| तदिदं श्रोतुमिच्छामि | १३४ |
| तदोपसंहृत्य गिरः | २३ |
| तदैवेहानुवृत्तोऽयं | ३५१ |
| तद्ध्यानोद्रिक्तया भक्त्या | २७० |
| तद् भिन्नसेतूनद्याहं | ३८४ |
| तद् वै धनुस्त इषवः | २४३ |
| तन्नो भवान् वै भगवत्- | ३६३ |
| तन्नः परं पुण्यमसंवृतार्थं | ३६५ |
| तन्मे धर्मभृतां श्रेष्ठ | ३३६ |
| तप शौचं दया सत्यं | ३२५ |
| तमयं मन्यते लोको | १२४ |
| तमात्मजैर्दृष्टिभिः | ११९ |
| तमिममहमजं शरीरभाजां | ३९ |
| तमुद्यतासिम् आहेदं | ३३६ |
| तमुपश्रुत्य निनदं | ८९ |
| तमूचुर्ब्राह्मणास्तुष्टाः | १४२ |
| तयोरेवं कथयतोः | ३०४ |
| तस्माज्जह्यङ्ग वैक्लव्यं | १८७ |
| तस्मादिदं दैवतन्त्रं | १५ |
| तस्मान्नाम्ना विष्णुरातः | १४२ |
| तस्मिन्नारायणपदे | २७० |
| तस्मिन्न्यस्तधियः पार्थाः | ५३ |
| तस्य जन्म महाबुद्धेः | १३४ |
| तस्य निर्हरणादीनि | ४२ |
| तस्य पुत्रोऽतितेजस्वी | ३८१ |
| तस्य प्रीतमना राजा | १४१ |
| तस्य मत्तस्य नश्यन्ति | ३१३ |
| तस्यानुविहितोऽनाथाः | १५ |
| तस्यान्तरायो मैवाभूः | १९७ |
| तस्यापि तव देहोऽयं | १७० |
| तस्याहमब्जकुलिशा- | ३०० |
| तस्यैव मेऽघस्य परावरेशो | ४१२ |
| तस्यैवं वर्तमानस्य | २८७ |
| तक्षकादात्मनो मृत्युं | १४८ |
| तानार्षेयप्रवरान् समेतान् | ४०९ |
| तान् समेतान् महाभाग | ९ |
| तावत्कलिर्न प्रभवेत् | ३४९ |
| तावद्यूयमवेक्षध्वं | १९३ |
| ताः पुत्रमङ्कमारोप्य | ११८ |
| तितिक्षुर्वसुधेवासौ | १४५ |
| तिरस्कृताः विप्रलब्धाः | ३९१ |
| तीर्थानि क्षेत्रमुख्यानि | १५९ |
| तीर्थीकुर्वन्ति तीर्थानि | १६० |
| तुलयाम लवेनापि | ३५८ |
| तुष्टुवुर्मुनयो हृष्टाः | ४२ |
| तेजो हृतं खलु मया | २२६ |
| तेन सम्भृतसम्भारो | १५१ |
| तेनाऽऽहृताः प्रमथनाथ- | २२७ |
| तेनाहं गुणपात्रेण | २९३ |
| तेभ्यः परमसंहृष्टः | २८६ |
| ते साधु कृतसर्वार्थाः | २६९ |
| तोयनीव्याः पतिं भूमेः | २५६ |
| तं जिघांसुमभिप्रेत्य | ३३१ |
| तं जिघृक्षत्यधर्मोऽयं | ३२७ |
| तं द्व्यष्टवर्षं सुकुमार- | ४२७ |
| तं पादयोर्निपतितं | २०७ |
| तं बन्धुमागतं दृष्ट्वा | १५७ |
| तं भुक्तवन्तं विश्रान्तं | १५९ |
| तं मेनिरेऽबलाः मूढाः | १३० |
| तं मोपयान्तं प्रतियन्तु | ४१३ |
| त्यजन् कलेवरं योगी | २० |
| त्रित्वे हुत्वा च पञ्चत्वं | २६० |
| त्रिभुवनकमनं तमालवर्णं | २६ |
| त्रीनत्यरोचमुपलभ्य | ३०० |
| त्वं वा मृणालधवलः | ३११ |
| त्वं सद्गुरुर्नः परमञ्च | ९५ |
| त्वां दुःस्थमूनपदं | ३०२ |
| त्वां वर्तमानं नरदेव- | ३३३ |
| दण्डहस्तञ्च वृषलं | ३०७ |

| | | | |
|---|---|---|---|
| ददर्श घोररूपाणि | २०१ | धुन्धुर्याऽऽनकघण्टाद्याः | ६० |
| ददर्श पुरुषं कञ्चिद् | १३६ | धूम्राः दिशः परिधयः | २०५ |
| ददर्श मुनिमासीनं | ३७७ | धृतरथचरणोऽभ्ययाद् | ३४ |
| दध्मौ दरवरं तेषां | ८८ | धृतराष्ट्रो युयुत्सुश्च | १५७ |
| दध्यौ मुकुन्दाङ्घ्रिं | ४०८ | धृतराष्ट्रः सह भ्रात्रा | १९३ |
| दर्शनस्पर्शनालाप- | ५७ | धृत्या बलिसमः कृष्णे | १४६ |
| दर्शयन्नात्मनो रूपं | २६६ | ध्रुवं ततो मे कृतदेवहेलनाद् | ३९७ |
| दहत्वभद्रस्य पुनर्न मे | ३९९ | ध्वस्तमायागुणोदर्को | १९६ |
| दह्यमानेऽग्निभिर्देहे | १९७ | न कश्चिन्म्रियते तावद् | २८३ |
| दक्षिणेन हिमवतः | १९३ | न जातु कौरवेन्द्राणां | ३१२ |
| दाध्मायमानः करकञ्जसम्पुटे | ८८ | न ज्वलत्यग्निराज्येन | २०६ |
| दानधर्मान् राजधर्मान् | २२ | नटनर्तकगन्धर्वाः | १०९ |
| दारुणान् शंसतोऽदूराद् | २०४ | नताः स्म ते नाथ | ९४ |
| दिगम्बरं वक्रविकीर्णकेशं | ४२७ | न ते गुडाकेशयशोधराणां | ३३२ |
| दुर्बलान् बलिनो राजन् | २४७ | न दत्तं युक्तमर्थिभ्यः | २१४ |
| दृष्टाः श्रुताः वा यदवः | १६१ | नद्यो नदाश्च क्षुभिताः | २०५ |
| दृष्ट्वा निपतितं भूमौ | ६ | नद्यः समुद्राः गिरयः | ४८ |
| देवर्षिर्नारदः साक्षाद् | १७ | नन्वप्रियं दुर्विषहं | १६२ |
| देवानृषीन् पितॄन् साधून् | २९४ | न पिबन्ति स्तनं वत्साः | २०६ |
| देशकालार्थयुक्तानि | २४८ | नभः पतन्त्यात्मसमं | ३७५ |
| दैवतानि रुदन्तीव | २०६ | न युज्यते सदात्मस्थैः | १२७ |
| दैवमन्ये परे कर्म | ३१९ | नरदेवोऽसि वेषेण | ३१० |
| दैवेनाप्रतिघातेन | १४२ | नर्माण्युदाररुचिरस्मित- | २४० |
| दौष्कुल्यमाधिं विधुनोति | ३६६ | न लक्ष्यते ह्यवस्थानं | ४३८ |
| द्रौपदी च तदाज्ञाय | २७१ | न वयं क्लेशबीजानि | ३१९ |
| द्यूतं पानं स्त्रियः सूना | ३३७ | न वर्तितव्यं तदधर्मबन्धो | ३३४ |
| द्वारि द्वारि गृहाणां च | १०७ | न वर्तितव्यं भवता | ३३२ |
| द्विजोपसृष्टः कुहकः | ४१३ | न वा इदं राजर्षिवर्य | ४२४ |
| धत्ते भगं सत्यमृतं | ७४ | न वितृप्यन्ति हि दृशः | ११२ |
| धनं प्रहीणमाजह्रुः | १५१ | न वै नृभिर्नरदेवं | ३८८ |
| धन्विनामग्रणीरेष | १४५ | न व्यथन्ति न हृष्यन्ति | ३९३ |
| धर्मपालो नरपतिः | ३९० | न सम्मुमोहोरुभयाद् | ३४६ |
| धर्मार्थकाममोक्षांश्च | २२ | न सेहिरे विमुह्यन्तो | ५२ |
| धर्मं प्रवदतस्तस्य | २३ | न ह्यस्य कर्हिचिद् राजन् | १४ |
| धर्मं ब्रवीषि धर्मज्ञ | ३२४ | नातिदूरे किलाश्चर्यं | २८७ |
| धर्मः पदैकेन चलन् | २८८ | नाधयो व्याधयः क्लेशाः | ४८ |
| धक्ष्यति स्म कुलाङ्गारं | ३८५ | नानाख्यानेतिहासेषु | २२ |

| | | | |
|---|---|---|---|
| नानाशङ्कास्पदं रूपं | २१९ | नृदेवचिह्नधृक् शूद्रः | २८० |
| नानुद्वेष्टि कलिं सम्राट् | ३५२ | नृपमग्रजमित्याह | २२२ |
| नानुरूपानुरूपाश्च | ६२ | नृपलिङ्गधरं शूद्रं | २७८ |
| नान्तं गुणानामगुणस्य | ३६० | नेहाथ वामुत्र च कश्चनार्थः | ४२५ |
| नायाति कस्य वा हेतोः | २०३ | नोत्तमश्लोकवार्तानां | ३४७ |
| नावेदयेत् सकरुणो | १६२ | न्यरुन्धन्नुद्गलद्बाष्पं | ५९ |
| नाऽस्य तत्प्रतिकुर्वन्ति | ३९१ | **प-म** | |
| नाहं वेद गतिं पित्रोः | १८१ | पतितं पादयोर्वीरः | ३३१ |
| नाहं वेदात्मवसितं | १८० | पतिं प्रयान्तं सुबलस्य | १७५ |
| निगूढजत्रुं पृथुतुङ्गवक्षसं | ४२७ | पत्न्यः पतिं प्रोष्य | ११८ |
| निग्रहीता कलेरेषः | १४६ | पत्न्यास्तवाधिमख- | २२८ |
| निजग्राहौजसा वीरः | २७८ | पदे पदे का विरमेत | १२१ |
| नितरां म्रियमाणानां | ४३५ | पप्रच्छ रथमारूढः | ३१० |
| नित्यं निरीक्षमाणानां | ११२ | परस्परं घ्नन्ति शपन्ति | ३८९ |
| निद्रया ह्रियते नक्तं | २८४ | पराजितो वाऽथ भवान् | २१५ |
| निधनञ्च यथैवासीत् | १३४ | परायणं क्षेममिहेच्छतां | ९४ |
| निमित्तान्यत्यरिष्टानि | २०१ | पराशरो गाधिसुतो | ४०९ |
| निरीक्षणेनाभिनन्दन् | ८३ | परिभ्रमन्तमुल्काभां | १३७ |
| निरुद्धमप्यास्रवद् | ११९ | परीक्षितैवमादिष्टः | ३३६ |
| निर्घातश्च महांस्तात | २०५ | परीक्षिन्नाम राजर्षिः | ३०४ |
| निर्जित्य सङ्ख्ये त्रिदशान् | २१३ | परेभ्यः शङ्कितः स्नेहात् | ८३ |
| निर्ममो निरहङ्कारः | २५८ | परैत्यनिच्छतो जीर्णो | १७० |
| निर्यात्यगारान्माऽभद्रं | ५९ | परोक्षेण समुन्नद्ध- | २२१ |
| निर्वेदमूलो द्विजशापरूपो | ४१२ | पर्वतो नारदो धौम्यो | ८ |
| निवर्तिताखिलाहारः | १९६ | पश्यन्ति नित्यं यदनुग्रहे- | ७८ |
| निवृत्तसर्वेन्द्रियवृत्ति- | २४ | पश्यन्ति भक्त्युत्कलिता- | ७० |
| निवेशयित्वा निजराज्ये | ४६ | पश्योत्पातान् नरव्याघ्र | २०४ |
| निशम्य प्रेष्ठमायान्तं | १०७ | पाण्डुपुत्रान् उपासीनान् | ११ |
| निशम्य भगवन्मार्गं | २५१ | पादैर्न्यूनं शोचसि मैकपादं | २८९ |
| निशम्य भीष्मोक्तम् | ४७ | पापीयसीं नृणां वार्तां | २०१ |
| निशम्य वार्तामनतिप्रियां | २८४ | पापं कृतं तद् भगवन् | ३९१ |
| निशम्य शप्तमतदर्हं | ३८६ | पार्थ प्रजाविता साक्षाद् | १४५ |
| निशातमाददे खड्गं | ३३० | पितरं वीक्ष्य दुःखार्तो | ३८५ |
| निस्पृहः सर्वकामेभ्यः | १३५ | पितरं सर्वसुहृदं | ८९ |
| निष्पादितं देवकार्यं | १९३ | पितरं सान्त्वयामास | ४२ |
| नूनं भगवतो ब्रह्मन् | ४३८ | पितर्युपरते पाण्डौ | १७९ |
| नूनं व्रतस्नानहुतादि- | ८० | पितामहसमः साम्ये | १४५ |

| | |
|---|---|
| पितामहेनोपन्यस्तं | ३४१ |
| पितृभ्रातृसुहृत्पुत्राः | १६८ |
| पितृमातृसुहृद्भ्रातृ- | २०१ |
| पित्रा चानुमतो राजा | ४३ |
| पिबन्ति याः सख्यधरामृतं | ८० |
| पिशङ्गवासा वनमालया | ११६ |
| पुनश्च भूयाद् भगवति | ४१४ |
| पुनश्च याचमानाय | ३३८ |
| पुनाति लोकान् उभयत्र | ४०३ |
| पुरुषस्येह यत्कार्यं | ४३६ |
| पुरुषस्वभावविहितान् | २२ |
| पुरुषं तं विजानीमो | ३१९ |
| पूजयामास धर्मज्ञो | ९ |
| पूर्वदृष्टमनुध्यायन् | १४९ |
| पृच्छति स्म सुहृन्मध्ये | २०७ |
| पृच्छति स्माश्रुवदनां | २८८ |
| पृथाप्युपश्रुत्य धनञ्जयोदितं | २५१ |
| पैतृष्वस्रेयप्रीत्यर्थं | ४३४ |
| प्रगीयमानञ्च यशः | २८६ |
| प्रणम्य मूर्ध्नावहितः | ४३२ |
| प्रणेमुः पाण्डवाः भीष्मं | ६ |
| प्रतिक्रिया न यस्येह | १६७ |
| प्रतिदृशमिव नैकधा | ३९ |
| प्रतिरुद्धेन्द्रियप्राण- | ३७७ |
| प्रतिसन्दधे आश्वास्य | ३४१ |
| प्रत्यभाषत धर्मज्ञो | ४३९ |
| प्रत्याहृतं पुरु धनञ्च | २३७ |
| प्रत्युज्जग्मुः प्रहर्षेण | १५७ |
| प्रत्युज्जग्मुः रथैः ब्रह्मन् | १०७ |
| प्रत्युत्थायाभिवाद्याह | १८१ |
| प्रत्युत्थितास्ते मुनयः | ४२७ |
| प्रत्युद्ययुः प्रजाः सर्वाः | ८९ |
| प्रत्युलूकश्च कुह्वानैः | २०५ |
| प्रद्युम्नश्चारुदेष्णश्च | १०७ |
| प्रद्युम्नसाम्बाम्ब- | ८१ |
| प्रद्युम्नः सर्ववृष्णीनां | २०८ |
| प्रपत्स्यत उपश्रुत्य | १४८ |
| प्रविष्टस्तु गृहं पित्रोः | ११७ |
| प्रशस्य भूमौ व्यकिरन् | ४२३ |
| प्रशान्तमासीनमकुण्ठमेधसं | ४३२ |
| प्रश्रयावनतो राजा | १५९ |
| प्रसन्नहासारुणलोचनो- | २० |
| प्रसभमभिससार मद्वधार्थं | ३६ |
| प्रहर्षवेगोच्छ्वसित- | १०७ |
| प्रह्वाभिवादनाश्लेष- | ११० |
| प्रागल्भ्यं प्रश्रयः शीलं | २९२ |
| प्राजापत्यां निरूप्येष्टिं | २५६ |
| प्रादात् स्वन्नञ्च विप्रेभ्यः | १४२ |
| प्रायशः साधवो लोके | ३९३ |
| प्रायेण तीर्थाभिगमापदेशैः | ४०९ |
| प्रायेणैतद् भगवतः | २४६ |
| प्रार्थ्याः महत्त्वमिच्छद्भिः | २९२ |
| प्रासादशिखरारूढाः | ६० |
| प्रासादाः यत्र पत्नीनां | ११८ |
| प्रीत्युत्फुल्लमुखाः | ८९ |
| प्रेमस्मितस्निग्ध- | ९८ |
| फलन्त्योषधयः सर्वाः | ४८ |
| फल्गूनि तत्र महतां | १८९ |
| बहिःस्थिता पतिं साध्वी | १९७ |
| बाहवो लोकपालानां | ११५ |
| बृहदश्वो भरद्वाजः | ८ |
| ब्रह्मकोपोत्थिताद् यस्तु | ३४६ |
| ब्रह्मण्यात्मानमाधारे | १९५ |
| ब्रह्मण्यः सत्यसन्धश्च | १४५ |
| ब्रह्मादयो बहुतिथं | २९४ |
| ब्रह्मावर्ते यत्र यजन्ति | ३३४ |
| ब्रह्मावर्तं कुरुक्षेत्रं | ८५ |
| ब्राह्मणैः क्षत्रबन्धुर्हि | ३८३ |
| ब्राह्मणं प्रत्यभूद् ब्रह्मन् | ३७९ |
| ब्रूहि नः श्रद्दधानानां | १३४ |
| भक्त्या निर्मथिताशेष- | २४९ |
| भक्त्यावेश्य मनो यस्मिन् | २० |
| भगवति रतिरस्तु मे | ३७ |
| भगवत्सङ्गिसङ्गस्य | ३५८ |

| | |
|---|---|
| भगवानपि गोविन्दो | २१० |
| भगवानपि विप्रर्षे | ५ |
| भगवांस्तत्र बन्धूनां | १०९ |
| भद्राश्वं केतुमालं च | २८५ |
| भवद्विधाः भागवताः | १६० |
| भवान् हि वेद तत्सर्वं | २९१ |
| भवाय नस्त्वं भव | ९५ |
| भविष्यन्ति न सन्देहो | १४२ |
| भीमेनावर्जितं पिण्डं | १६९ |
| भूतलेऽनुपतन्त्यस्मिन् | ३१२ |
| भूभारः क्षपितो येन | २५२ |
| भ्रष्टश्रियो निरानन्दाः | २०६ |
| भ्रातुर्ज्येष्ठस्य श्रेयस्कृत् | १६३ |
| भ्रातृभिर्लोकपालाभैः | १६४ |
| मङ्गलाय च लोकानां | २११ |
| मथुरायां तथा वज्रं | २५६ |
| मधुभोजदशार्हार्ह- | १०३, २०८ |
| मनसा धारयामासुः | २६९ |
| मन्दस्य मन्दप्रज्ञस्य | २८४ |
| मन्ये एतैर्महोत्पातैः | २०७ |
| मम निशितशरैर्विभिद्यमान- | ३० |
| मरुधन्वम् अतिक्रम्य | ८५ |
| महत्सु यां यामुपयामि | ४१४ |
| महर्षयस्ते समुपागताः | ४२३ |
| महाधनानि वासांसि | २८६ |
| महीपतिस्त्वथ तत्कर्म | ३९६ |
| मा कञ्चन शुचो राजन् | १८२ |
| मातुर्गर्भगतो वीरः | १३६ |
| मातुलः सानुजः कच्चित् | २०८ |
| मा भूवंस्त्वादृशाः राष्ट्रे | ३१४ |
| मामङ्ग सारमेयोऽयं | २०५ |
| मा रोदीरम्ब भद्रं ते | ३१२ |
| मा सौरभेयानुशुचो | ३१२ |
| मिथो निघ्नन्ति भूतानि | २४६ |
| मिषतो दशमास्यस्य | १४० |
| मुनिगणनृपवर्यसङ्कुले | ३९ |
| मुमुचुः प्रेमबाष्पौघं | १५७ |
| मृगानुगतः श्रान्तः | ३७६ |
| मृगेन्द्र इव विक्रान्तो | १४५ |
| मृत्यावपानं सोत्सर्गं | २६० |
| मृत्युदूतः कपोतोऽयं | २०५ |
| मृदङ्गशङ्खभेर्यश्च | ६० |
| मृषासमाधिराहोस्वित् | ३८० |
| मेघगम्भीरया वाचा | ३१० |
| मेधातिथिर्देवल आर्ष्टिषेणो | ४०९ |
| मैत्रेयः और्वः कवषः | ४०९ |
| मोहयन् मायया लोकं | १७ |
| **य-व** | |
| य एक ईशो जगदात्म- | ७२ |
| यच्छ्रोतव्यमथो जाप्यं | ४३६ |
| यत्तेजसाऽथ भगवान् | २३० |
| यत्तेजसा दुर्विषहेण | ३८८ |
| यत्तेजसा नृपशिरो- | २२७ |
| यत्त्वं शंससि कृष्णस्य | ३५६ |
| यत्पादशुश्रूषण- | २१३ |
| यत्र क्व चाऽथ वत्स्यामि | ३३६ |
| यत्र धर्मसुतो राजा | १४ |
| यत्रानुरक्ताः सहसैव धीराः | ३७३ |
| यत्रैव नियतो वत्स्ये | ३३६ |
| यत्सन्निधावहमु | २२७ |
| यत्संश्रयाद् द्रुपदगेहं | २२५ |
| यथा क्रीडोपस्कराणां | १८४ |
| यथा गावो नसि प्रोताः | १८४ |
| यथानुभूतं क्रमशो | १६१ |
| यथा मत्स्यादिरूपाणि | २५२ |
| यथाविध्युपसङ्गम्य | १०९ |
| यथा हि सूत्यामभिजात- | २७५ |
| यदधर्मकृतः स्थानं | ३२४ |
| यदात्मनोऽङ्गमाक्रीडं | २०४ |
| यदा परीक्षित् कुरुजाङ्गले | २८४ |
| यदा मुकुन्दो भगवान् | २५४ |
| यदा ह्यधर्मेण तमोधियो | ७४ |
| यदून् यदुभिरन्योन्यं | २४७ |
| यदेष पुंसामृषभः | ७७ |

यद्बान्धवः कुरुबलाब्धिं २३७
यद्बाहुदण्डगुप्तायां २१२
यद्बाहुदण्डाभ्युदया- २१३
यद्यप्यसौ पार्श्वगतो १२०
यद्वाम्ब ते भूरिभरावतार- २९०
यद्विजिज्ञासया युक्ता १४
यन्मन्यसे ध्रुवं लोकं १८६
यन्मेऽसूंस्त्यजतः साक्षात् १९
ययाऽहरद् भुवो भारं २५२
यर्ह्यम्बुजाक्षाऽपससार १०१
यशो वितनिता स्वानां १४५
यस्मान्नः सम्पदो राष्ट्रं २०४
यस्मिन्नहनि यर्ह्येव ३५१
यस्मिन् हरिर्भगवान् ३३४
यस्य पालयतः क्षोणीं ३४२
यस्य राष्ट्रे प्रजाः सर्वाः ३१३
यस्य क्षणवियोगेन २२४
यक्ष्यमाणोऽश्वमेधेन १५१
यावतः कृतवान् प्रश्नान् १५७
यावदीशो महान् उर्व्याम् ३४९
यावद्दधार शूद्रत्वं १६३
या वै लसच्छ्रीतुलसीविमिश्र- ४०३
यासां गृहात् पुष्करलोचनः ८१
याः याः कथाः भगवतः ३५५
युधि तुरगरजो- ३०
युधिष्ठिरस्तत्परिसर्पणं २५५
युधिष्ठिरस्तदाकर्ण्य २१
युधिष्ठिरो लब्धराज्यो १६४
युधिष्ठिरो वचस्तस्य १९९
युधिष्ठिरः कारयित्वा ४२
युष्मत्कृते बहून् क्लेशान् १२
येऽध्यासनं राजकिरीट- ४२४
येन चैवाभिपन्नोऽयं १६७
येन मेऽपहृतं तेजो २२३
येषां गुणगणैः कृष्णो ३१८
येषां संस्मरणात् पुंसां ४३३
योऽनन्तशक्तिर्भगवान् ३६८
यो नो जुगोप वनमेत्य २२९
यो भीष्मकर्णगुरुशल्य- २३८
यो योगिनश्छन्दमृत्योः २३
यो वै द्रौण्यस्त्रविप्लुष्टो ३४६
यो वै ममातिभरं ३०२
यं मन्यसे मातुलेयं १८
यः श्रद्धयैतद् भगवत् २७२
यः स्वकात् परतो वापि १७१
याः वीर्यशुल्केन हृताः ८१
रत्नदण्डं गुडाकेशः ६१
रन्तिदेव इवोदारो १४६
राजन् निर्गम्यतां शीघ्रं १६५
राजमार्गं गते कृष्णे १११
राजर्षयश्च तत्रासन् ७
राजर्षीणां जनयिता १४६
राजा तमर्हयाञ्चक्रे १५७
राजालब्धधनो दध्यौ १५१
राजंस्त्वयानुपृष्टानां २४६
राज्ञाऽघं प्रापितं तातं ३८१
राज्ञां कुलं ब्राह्मणपादशौचाद् ४११
राज्ञो हि परमो धर्मः ३१७
राज्ञः प्रत्यागमद् ब्रह्मन् २०७
रातो वोऽनुग्रहार्थाय १४२
रुदन्त्यश्रुमुखाः गावो २०६
रेमे स्त्रीरत्नकूटस्थो १२३
लब्धा सभा मयकृता २२७
लब्धोपचितयः सर्वे १४८
ललितगतिविलासवल्गुहास- ३८
लसत्कुण्डलनिर्भात- १०९
लक्षये तत्र तत्रापि ३३६
लीनप्रकृतिनैर्गुण्याद् २५०
लोकं परं विरजस्कं ४२४
लोभाद्यधर्मप्रकृतिं २०१
लोभोऽनृतं चौर्यमनार्यं ३३३
वञ्चितोऽहं महाराज २२३
वपुरलककुलावृताननाब्जं २६
ववन्दे शिरसा सप्त ११७

| | | | |
|---|---|---|---|
| ववृषुः कुसुमैः कृष्णे | ६० | विशेषतो धर्मशीलो | ३४० |
| वसिष्ठः इन्द्रप्रमद- | ८ | विशोको ब्रह्मसम्पत्त्या | २५० |
| वाक्तन्त्यां नामभिः | १८४ | विसृज्य तत्र तत्सर्वं | २५८ |
| वाचं जुहाव मनसि | २६० | विसृज्य पुत्रं पप्रच्छ | ३८६ |
| वाचं देवीं ब्रह्मकुले | २९० | वीक्षन्तः स्नेहसम्बद्धाः | ५७ |
| वाजिमेधैस्त्रिभिर्भीतो | १५१ | वृकोदरश्च धौम्यश्च | ५२ |
| वायुर्वाति खरस्पर्शो | २०५ | वृतो रथाश्वद्विपपत्ति- | २८५ |
| वारणेन्द्रं पुरस्कृत्य | १०७ | वृषरूपेण किं कश्चिद् | ३११ |
| वारमुख्याश्च शतशो | १०९ | वृषस्य नष्टांस्त्रीन् पादान् | ३४१ |
| वारुणीं मदिरां पीत्वा | २४६ | वृषं मृणालधवलं | ३०७ |
| वासुदेवकथोपेतं | ३५४ | वेपथुश्चापि हृदयः | २०४ |
| वासुदेवाङ्घ्र्यनुध्यान- | २४९ | वेपमानं पदैकेन | ३०७ |
| वासुदेवे भगवति | २७१ | वैयासकेर्जहौ शिष्यो | ३४७ |
| वाहांश्च पुरुषव्याघ्र | २०५ | वैराग्यरागोपाधिभ्याम् | २२ |
| विकीर्यमाणः कुसुमैः | ६१ | वंशाङ्कुरं वंशदवाग्नि- | ४६ |
| विजयरथकुटुम्ब आत्ततोत्रे | ३७ | व्यतीताः कतिचिन्मासाः | २०१ |
| विज्ञानात्मनि संयोज्य | १९५ | व्यरोचताऽलं भगवान् | ४३१ |
| विज्ञापयामास विविक्तचेता | ४१० | व्यवहितपृतनामुखं निरीक्ष्य | ३२ |
| विदुरस्तदभिप्रेत्य | १६५ | व्रजन्ति तत्पारमहंस्यं | ३७३ |
| विदुरस्तीर्थयात्रायां | १५६ | **श-क्ष** | |
| विदुरस्तु तदाश्चर्यं | १९८ | शङ्खतूर्यनिनादेन | १०७ |
| विदुरोऽपि परित्यज्य | २७१ | शमो दमस्तपस्साम्यं | २९२ |
| विधमन्तं सन्निकर्षे | १३७ | शय्यासनाटनविकत्थन- | २४१ |
| विधाय वैरं श्वसनो | १२२ | शरणोपसृतं सत्त्वं | २१५ |
| विधूतकल्मषाः स्थानं | २७० | शरण्यो नावधीच्छ्लोक्यः | ३३१ |
| विधूय तदमेयात्मा | १४० | शशास गाम् इन्द्र इव | ४७ |
| विनिर्गच्छन् धनुःकोट्या | ३८० | शशंसुः साधवो राज्ञां | ४२ |
| विपद्गणाद् विषाग्न्यादेः | १५९ | शस्ताः कुर्वन्ति मां सव्यं | २०५ |
| विप्रकीर्णजटाच्छन्नं | ३७७ | शाकान्नमुष्टिमुपयुज्य | २२९ |
| विप्रशापविमूढानां | २४६ | शारद्वतं गुरुं कृत्वा | २७८ |
| विभाव्य लोभानृतजिह्म- | २५५ | शासतोऽन्यान् यथाशास्त्रं | ३१७ |
| विभुं तमेवानुध्यायन् | २१९ | शितविशिखहतो विशीर्ण- | ३६ |
| विमृज्य पाणिनाश्रूणि | १८० | शिवैषोद्यन्तमादित्यं | २०५ |
| विलोक्योद्विग्नहृदयो | २०७ | शिष्यैरुपेताः आजग्मुः | ८ |
| विवत्सां साश्रुवदनां | ३०७ | शून्योऽसि रहितोऽनित्यं | २१७ |
| विशुद्धया धारणया | २४ | शूरो मातामहः कच्चित् | २०८ |
| विशुष्यत्तालुरुदकं | ३७९ | शृणोत्यलं स्वस्त्ययनं | २७२ |

शृण्वानोऽनुग्रहं दृष्ट्या १०२
शोकेन शुष्यद्वदन- २१९
शोचत्यश्रुकला साध्वी ३२९
शोचामि रहितं लोकं २९३
शोच्योऽस्यशोच्यान् रहसि ३१०
श्यामं सदापीच्यवयो- ४२७
श्रियो निवासो यस्योरः ११५
श्रीमद्दीर्घचतुर्बाहुं १३७
श्रीमद्भिस्तत्पदन्यासैः ३२९
स उच्चकासे धवलोदरो ८८
स उत्तरस्य तनयां २७६
स एव नरलोकेऽस्मिन् १२३
स एव भगवान् कालः १६७
स एव भूयो निजवीर्य- ६९
स एष एतर्ह्यध्यास्ते ३४१
स एष लोके विख्यातः १४९
स कथं तद्गृहे द्वाःस्थः ३८३
स चिन्तयन्नित्थमथ ४००
स तु ब्रह्मऋषेरंसे ३८०
स तैर्व्यरोचत नृपः ५
स देवदेवो भगवान् २०
स राजपुत्रो ववृधे १५१
सर्वे वयं तावदिहास्महे ४२४
स वा अद्यतनाद् राजन् १९७
स वा अयं सख्यनुगीत- ७२
स वा आङ्गिरसो ब्रह्मन् ३८६
स विष्णुरातोऽतिथये ४२७
स वै अयं यत्पदं ७०
स वै किलाऽयं पुरुषः ६३
स वै महाभागवतः ३६४
स साधु मेने न चिरेण ४००
स संवृतस्तत्र महान् ४३१
स स्वपौत्रं विनयिनं २५६
सख्युः सखेव पितृवत् २४१
सख्यं मैत्रीं सौहृदञ्च २२२
सञ्जल्पितानि नरदेव २४०
सत्यं शौचं दया क्षान्तिः २९२
सत्सङ्गान्मुक्तदुःसङ्गो ५३
सद्यो नश्यन्ति वै पुंसां ४३४
सन्निवर्त्य दृढं स्निग्धान् ८४
सपदि सखिवचो निशम्य ३२
सपालो यद्वशे लोको १२
सप्त स्वसारस्तत्पत्न्यो २०८
सप्तानां प्रीतये नाम्ना १९४
समागताः सर्वतएव ४२५
समाहितेन मनसा ३२३
सम्पदः क्रतवो विप्राः १३५
सम्पद्यमानमाज्ञाय ४१
सम्प्रस्थिते द्वारकायां २०१
सम्प्रेषितो द्वारकायां २०३
सम्मार्जितमहामार्ग- १०६
सम्मुह्य चापमजहात् १२३
सर्वथा न हि शोच्यास्ते १८६
सर्वमात्मन्यजुहवीद् २६०
सर्वर्तुसर्वविभव- १०५
सर्वसद्गुणमाहात्म्यः १४६
सर्वात्मना म्रियमाणैः ४२६
सर्वात्मनः समदृशो १९
सर्वे तमनु निर्जग्मुः २६८
सर्वे तेऽनिमिषैर्नेत्रैः ५७
सर्वे बभूवुस्ते तूष्णीं ४१
सर्वं कालकृतं मन्ये १२
सर्वं क्षणेन तदभूद् २४३
स संयुनक्ति भूतानि १८२
सहानुजैः प्रत्यवरुद्धभोजनः ४५
सान्निध्यात् ते महायोगिन् ४३४
सायं भेजे दिशं पश्चाद् ८६
सारथ्यपारषद- २८७
सा श्रीः स्ववासमरविन्द- २९४
साक्षान्महाभागवतो ३९०
सिक्तां गन्धजलैरुप्तां १०६
सितातपत्रव्यजनैः ११६
सितातपत्रं जग्राह ६१
सिषिचुः स्म व्रजान् गावः ४८

सुखोपविष्टेष्वथ तेषु भूयः ४१०
सुनन्दनन्दशीर्षण्याः २०९
सुभद्रा द्रौपदी कुन्ती ५१
सुसङ्कुलैर्भूतगणैः २०५
सुषेणश्चारुदेष्णश्च २०८
सुहृदां च विशोकाय ५०
सूत जीव समाः सौम्य ३५६
सूर्यं हतप्रभं पश्य २०५
सेन्द्राः श्रिताः यदनुभावितं २३२
सेशं पुनात्यन्यतमो मुकुन्दात् ३७२
सोऽयमद्य महाराज १९२
सोऽहं नृपेन्द्र रहितः २४२
सौत्ये वृतः कुमतिना २३९
सौहार्देनातिगाढेन २४९
संस्थितेऽधिरथे पाण्डौ १२
संभ्रान्तवाहमरयो २३९
स्त्रीधर्मान् भगवद्धर्मान् २२
स्थानत्रयात् परं प्राप्तं ३७७
स्थितवति परसैनिका- ३२
स्थैर्यं स मानम् अहरन् ३०३
स्नात्वाऽनुसवनं तस्मिन् १९४
स्निग्धेषु पाण्डुषु जगत्- २८७
स्नेहञ्च वृष्णिपार्थानां २८६
स्पृष्टं विकीर्य पदयोः २२८
स्मर्तव्यं भजनीयं वा ४३६
स्यात् सम्भ्रमोऽन्तकालेऽपि ३४७
स्रोतोभिः सप्तभिर्यत्र १९४
स्वनिगममपहाय मत्प्रतिज्ञाम् ३४
स्वयञ्च गुरुभिर्विप्रैः ११०
स्वयं विप्रकृतो राज्ञा ३९२
स्वलङ्कृतं श्यामतुरङ्ग- २८५
स्वसुखमुपगते क्वचिद् २५
स्वातन्त्र्यं कौशलं कान्तिः २९२
स्वामिन्यघं यद् दासानां ३८१
स्वःपथाय मतिं चक्रे २५१
हत्वा स्वरिक्थस्पृध ४५
हर्म्याण्यारुरुहुर्विप्राः १११
हरन्ति स्मरतश्चित्तं २४८
हरिभावनया ध्वस्त- १९५
हरेरुदाराचरितं विशुद्धं ३६३
हर्षविह्वलितात्मानः ११८
हर्षशोकयुतस्तस्माद् १९८
हित्वेतरान् प्रार्थयतो ३७०
हित्वेदं नृप गङ्गायां १४८
हिमालयं न्यस्तदण्ड- १७५
हिरण्यं गां महीं ग्रामान् १४२
हुताश इव दुर्धर्षः १४५
हतं क्षेत्रं धनं येषां १६९
हृदि कृत्वा हरिं गेहात् १७१
हृदि ब्रह्म परं ध्यायन् २६७
हृदिस्थं पूजयामास ९
हृदीकः ससुतोऽक्रूरो २०८
क्षतजाक्षं गदापाणिं १३७
क्षुत्तृट्श्रमयुतो दीनो ३९०
क्षुद्रायुषां नृणामङ्ग २८०

✲

## ॥ श्रीमदाचार्यवाङ्मौक्तिकानि ॥

१. भगवदिच्छा सा कार्यैकोन्नेया, न कार्यात् पूर्वम् अवगन्तुं शक्या.

२. अवाङ्मनोगोचरे युक्तिः न प्रवर्तते.

३. आज्ञाकरणेन स्वधर्मेण च भगवान् परितुष्यति इति मर्यादा.

४. सगुणकर्मणा बन्धः, निर्गुणकर्मणा मोक्षः.

५. कृष्णाधीनं सुखं यस्य स सुखी इति निगद्यते.

६. वृथैव जीवनं लोके भक्तिज्ञानोत्सवैः विना, कृष्णैकतानचित्तत्वं मुक्तेरप्यधिकं मतम्.

७. उपदिष्टेऽपि ज्ञाने अन्तर्यामितया भगवत्स्फूर्तौ अपि यो रसः सत्सङ्गाद् उत्पद्यते बहिर्भगवत्सम्बन्धेन वा स न ज्ञानादिभिः भवति, मानस-दैहिकस्त्रीसम्बन्धयोः वैलक्षण्यात्. तस्माद् भिन्नतया बहिःस्थित एव विषयो रसजनकः. अतएव योगिनोऽपि कृष्णाख्ये वस्तुनि प्रकटीभूते समाधिं परित्यज्य तदेव पश्यन्ति, अन्यदा तु समाधिः.

८. उत्सवे स्त्रीणां दर्शनं वर्णनीयम्.

९. आत्मत्वेन उपदिष्टो भगवान् सवासनं प्रकृतिकार्यं नाशयति.

१०. यशस्तु भक्तिप्रतिपादकः पुष्टिधर्मः.

११. अन्ये हि स्त्रीणां भर्तारः, पुरुषोत्तमस्तु पुंसाम्. तथाच जगति सर्वे स्त्रीसहिताः पुरुषा एतस्य भवन्ति.

१२. गोधूलिकायां नगरप्रवेशः कर्तव्यः.

१३. भगवदनुवृत्तिव्यतिरेकेण कृतेन अन्येन धर्मादिना न कृतित्वं भवति.

१४. नित्योत्सवत्वाद् भगवतो न भगवद्दर्शनस्य धारावाहिकज्ञानत्वं, प्रतिक्षणम् अलौकिकार्थबोधात्. पूर्व-पूर्वदर्शनस्य रुच्युत्पादकत्वमेव, न विषयत्वं, भगवतो विषयत्वाभावात्. रुचिस्तु विषयसामर्थ्याद् औषधवत्. अतएव न कदापि तृप्तिः भगवद्दर्शने.

१५. भगवच्छास्त्रेणैव भगवान् विज्ञेयः नतु अवस्थाविशेषेण क्रियामात्रेण.

१६. भक्तानाम् अल्पचिन्तामपि भगवान् न सहते.

१७. भगवदाज्ञायामेव तीर्थाटनं कर्तव्यम्, अन्यथा भगवतः प्रयासजननात् न कर्तव्यम्.

१८. सर्वं पृष्टमेव वक्तव्यं नतु अप्रियम्.

१९. राजानो हि कालस्य शीघ्रं भक्ष्याः, राज्येन अधर्मबाहुल्यात्.

२०. भगवता हि सर्वोऽपि पदार्थः क्रियते नियम्यते च. स न कस्यचिद्

द्विष्ट इष्टो वा. स स्वार्थं परार्थं वा करोति. तत्र परार्थकरणे हितमेव करोति इति नियमः. स्वार्थकरणेऽपि स्वलीलासिद्धये करोति. तत्र परार्थपक्षे भगवता तस्य हिते क्रियमाणे स्वयं चेत् शोचेत् तदा निषिद्धं, भगवतश्च कोपो भवेत्. भगवल्लीलायां तु सुतरामेव क्रोधो अनौचित्यं च. स्वस्यापि ममतास्पददूरीकरणे पूर्वोक्त एव न्यायः.

२१. वैषम्य-नैर्घृण्ये भगवतो न स्तः, स्वात्मानमेव करोति इति.

२२. श्वशुरगृहे मानाभावो अन्तस्तापहेतुः, अवज्ञा च सुतराम्. श्वशुरगृहे बहुकालवासे अवज्ञा भवति.

२३. एवं गुप्ततयाऽपि (भगवान्) सर्वदा सर्वं कार्यं करोति.

२४. महान् साधनैः करोति, महत्तरस्तु आज्ञया, विभुः इच्छया.

२५. शुद्धे हि अन्तःकरणे प्रमाणेनोत्पादितं ज्ञानम् आत्मावरणं दूरीकरोति.

२६. शोको हि विषयाप्राप्त्या इति ब्रह्मत्वेन सर्वविषयप्राप्तौ सत्यां शोकाभावः.

२७. प्रातःकाले भगवद्गमनम् इति सम्प्रदायविदः. तदैव प्रातःकाले कलिः प्रवृत्तः.

२८. चतुर्णां पुरुषार्थानां स्वसाधनसाध्यता इव भगवत्सेवासाध्यतापि अस्ति. तत्रापि भगवत्सेवया साधिता निष्प्रत्यूहम् उत्तमा भवन्ति.

२९. मातुलकन्यापरिणयनं लोके विहितं स्मृतौ निषिद्धम्. अतः केवलं धर्मार्थं तादृशो विवाहो न कर्तव्यः. लौकिकबलशौर्याद्यपेक्षायां तु कर्तव्य एव.

३०. पुरुषसुखं ब्रह्मसुखम् अर्थसुखं च ददाति इति म-क-रं-दः. ... स भगवच्चरणारविन्दैकनिष्ठः प्रेमसेवायाम् आविर्भावस्वरूपो भक्तैकभोग्यो विशेषतो निर्वचनाशक्यः, यदर्थं सर्वोऽपि भक्तिमार्गः शास्त्रं च. तदास्वादनयुक्तानां कथया शास्त्रार्थपरिज्ञानं भवति.

३१. तस्या (लक्ष्म्या) अपि दुर्लभः चरणः. सेवार्थमेव चरणप्राप्तिस्तु सुतरां दुर्लभा. ... शतांशेनापि अन्यासक्तौ चरणसेवा दुर्लभा.

३२. भगवच्चरणे कमलाकृतिरेखा एकदेशस्य कमलत्वसम्पादिकाः सन्ति. तेन मकरन्दरूपामृतं तत्र फलं नियतम् अस्ति इति सूचितम्. तत्र अधिकारिणो दुर्लभाः सर्वथा दोषरहिताः. तत् सङ्घाते विद्यमानानाम् असम्भावितम्. तदर्थं भगवच्चरणारविन्दे एव वज्राकारा रेखा वर्तते पापपर्वतानां छेदिका. अतः तत्सेवायां प्रथमतः सर्वपापक्षयः. किञ्च मनोनैश्चल्ये सर्वम् एतत् सम्भवति. योगादिना च तत्साधने बहिर्मुखता स्यात्. अतो भगवच्चरणारविन्दे एव सेवकानां मनोवशीकरणार्थम् अंकुशाकारा रेखा वर्तते. अतो भगवच्चरणारविन्द-माहात्म्यादेव तत्सेवकानां ततो मनो न गच्छति. नापि मार्गविरोधेन. ननु

एतत्सर्वं भजनान्तरं भवति, भजने प्रवृत्तिरेव दुर्लभा, काल-कर्म-स्वभावेभ्यो भयसम्भवात् सर्वदा जीवानां भीतत्वात् न क्वापि स्वास्थ्यम् इति आशङ्क्य भगवच्चरणारविन्दे एव अभयपताकालक्षणा रेखा वर्तते, अत्र आगमनमात्रेण न कुतश्चिद् भयम् इति सूचिका.

३३. कलिः भूमिवधाय तिष्ठति, पाषण्डमार्गैश्च धर्मं व्यथयति.

३४. कलिनिग्रहो बहिर्मुखेन कर्तुम् अशक्यः, अभगवदीयेन वा.

३५. अपरिच्छिन्नः कालः ; तस्य कृतादिपदप्रयोगो अवच्छेदेन वक्तव्यः. तत्र स्वस्य स्वावच्छेदकत्वाभावाद् अन्यस्य अभावाद् धर्माधर्मावच्छेदकत्वेन कृतादिपदप्रयोगः. तत्र केवलधर्मावच्छेदकं कृतं, केवलाधर्मावच्छेदकः कलिः, भागशः उभयावच्छेदकं त्रेता, समशः उभयावच्छेदकं द्वापरम्.

३६. अधर्मे निवार्ये दण्ड्ये वा अपकारं करिष्यति (कलिः), अतएव इदानीं (कलौ) पाषण्डिनां निराकरणे निराकर्तुः भयम्.

३७. चतुर्विधो अधर्मः— ब्रह्महत्या, सुरापानं, स्तेयं, गुर्वङ्गनागमः. स्तेये द्यूतं प्रविष्टम्. ... कलिना स एव गृहीतो य एतानि करोति.

३८. अनृतरूपं द्यूतं, मदरूपं पानं, कामरूपाः स्त्रियो, रजः क्रोधः तद्रूपा हिंसा, सुवर्णं वैररूपम्. ... अनृतादिरूपाणि एतानि न सेवेत प्रमादादपि. पदार्थाग्रहेण सेवमाने कदाचित् कलिस्थानमपि सेवेत, ततो महान् अनर्थो भवेत्. तस्माद् एतानि पञ्चापि दूरत एव परिहरणीयानि कलिस्थानशङ्कया.

३९. यद्यपि अन्तकाले देहेन्द्रियान्तःकरणानां वैक्लव्यं सम्भवति तथापि (उत्तमश्लोकवार्तानां तत्कथामृतं जुषतां) तेषां कालस्य न अन्तकत्वम् अन्तकसम्बन्धित्वं वा, अमृतपानेन नित्यत्वात्.

४०. कृते तात्क्षणिकः पापः, त्रेतायां द्वादशेऽहनि, द्वापरे मासमात्रेण, कलौ संवत्सरेण तत् ; तद्वैपरीत्येन च धर्मसिद्धिः.

४१. अयं (कलिः) तु वृकरूपः. स रात्रौ शयानान् अरक्षितान् बालानेव गृह्णाति, न व्याघ्रवत् सर्वभक्षकः.

४२. आत्मस्वरूपज्ञानं भगवत्स्वरूपज्ञानं च न उपदेशसापेक्षं, प्रमाण-वस्तु-परतन्त्रत्वात्. परं प्रमाण-वस्तुनोः आवरणं दूरीकर्तव्यम्. तत्र प्रमाणावरणं दूरीकृतमिव, रजस्तमसोः अपगमेन सत्त्वप्राकट्यात्. जीवात्मावरणं माया, भगवदावरणं भगवदिच्छा. तत्र जीवावरणं भक्तिसहित-ज्ञानेन अपगच्छति. भगवन्माहात्म्यज्ञानपूर्वक-भगवद्विषयक-परमप्रेम्णा भगवत्सेवायां भगवदावरणम् अपगच्छति. तदा निर्मलदृष्टेः सवितृ-प्रकाश-साक्षात्कारइव भगवत्-स्व-रूपयोः मनसा साक्षात्कारो भवति.

४३. लौकिक-वैदिकमार्गापेक्षया पुष्टिमार्गः उत्कृष्टः.

४४. कथारसस्तु अतृप्तिहेतुः लोकेऽपि सिद्धः. ... अत्र निवृत्तिः केवलं रसाज्ञानादेव, न अन्यतः.

४५. स्वभावतो माहात्म्यानि वक्तुम् अशक्यानि एव, सूचनं परं कर्तव्यम्. अन्यथा महाराजाधिराजस्य स्वरूपं स्पष्टतया कथितम् अपराधाय भवति.

४६. सा (लक्ष्मीः) हि सर्वोत्तमा यदि स्वतः स्थातुं शक्नुयात्, किमर्थं भजेत? भोगार्थं वा यदि तदा प्रार्थयतो अन्यानपि विहाय अनभीप्सुं कथं भजेत? तत्रापि अनभीप्सोः अङ्घ्रिरेणुं कथं भजेत? अतो अङ्घ्रिरेणोः अपि सा हीना ; तदपेक्षया च अन्ये. तस्मात् माहात्म्यनिरूपणं न कर्तव्यम्. न हि ''सर्षपात् मेरुः महान्'' इति कश्चिद् वदति.

४७. यथा नखोदकम् अन्यदीयं सर्वार्थनाशकं तदेव भगवदीयं सर्वपुरुषार्थसाधकं तथा अन्यत्र अनुरागः आत्मनाशको भगवति स्वल्पोऽपि रागः सर्वपुरुषार्थसाधकः. अनुरागः एव असहायः साधनम् अपेक्षितं, साध्यं फलं च साधयति इति अर्थः. रागो हि अन्तःकरणधर्मः. स स्ववर्गं पुष्णाति नतु स्ववर्गं नाशयति. भगवत्सम्बन्धं तु प्राप्य भगवता संस्कृतः स्ववर्गं सर्वमेव नाशयति. यतो यदेव बाधकं संसारहेतुभूतं तदेव स्ववर्गं सर्वं नाशयित्वा भगवत्पदं प्रापयति इति उपलक्षणत्वाद् रागस्य न द्वेषादिभिः व्यभिचारः.

४८. पूर्वकाण्डे धर्मः प्रतिपाद्यः, उत्तरकाण्डे ज्ञानसाध्योपरतिः अविद्यायाः. एतद्द्वयम् अनुरागस्य स्वाभाविको धर्मः, यथा जलस्य रसः. अतो भक्ति-धर्म-प्रतिपादकत्वात् सर्ववेदानां न भक्तौ वेदविरोधः शङ्कनीयः. ... अतः सहजत्वाद् भक्तं प्रति विधिशक्तिरेव कुण्ठिता नतु विरोधः.

४९. भक्तद्रोहे भगवान् क्रुध्यति, तेन सर्वनाशो भविष्यति.

५०. कृते पापे अनुतापो वै यस्य पुंसः प्रजायते, प्रायश्चित्तं स्मृतं तस्य हरिसंस्मरणं परम्.

५१. महतां हि फलप्राप्तौ स्पृहाभाव एव विलम्बहेतुः.

५२. अनन्या भक्तिः पुरुषार्थसाधिका.

५३. भक्तचरणोदक-शरणागतिः न भगवन्मार्गविरोधिनी.

५४. योगो अस्य अस्ति इति योगी, योगेन स्वस्य पुरुषार्थसाधकः. महायोगी तु स्वयोगबलेन अन्येषामपि सर्वसाधकः.

* * *

(सौजन्य - सुबोधरत्नाकर).

# ॥ द्वितीयं परिशिष्टम् ॥

## ॥ श्रीलालूभट्टानां तृतीयस्कन्धटिप्पणी ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

तृतीयस्कन्धे द्वितीयाध्याये कारिकासु **मात्राणामेव** इति. पूर्वाध्याये गन्धादिसंस्कारः उक्तः परं भूतप्राधान्येन ; अत्र तस्यैव प्राधान्यमिति **एव**कारः. **मुख्याधिकारिणः** इति. **क्रिया** षड्भिः श्लोकैः, **ज्ञानं** सप्तविंशतिभिः. तत्र निरूपितं प्रमेयं ज्ञातमेव उपयुज्यते इति भावः. एवं **भेदतः अलौकिकचरित्रेण** सिद्ध**माहात्म्यं विषयो** विषयसंस्कारकम् इति अर्थः (का. १-२).

तद् विशदयन्ति **क्रिया तु** इति. **षड्भिः** इत्यस्य पूर्वेण अन्वयः ; **षड्भिः निरूप्यते** इति अर्थः. तत्र हेतुः **मनसा** इति. **यतोः** हेतोः **मनसा** सहितैः **इन्द्रियैः** तानि **कर्माणि षड्** भवन्ति अतः इति अर्थः (का. ३).

ननु षट्कर्मनिरूपणे भगवत्येव क्रिया इति न सिद्धम् इत्यतः आहुः **षड्गुणैश्वर्य-** इति. षड्गुणे यद् ऐश्वर्यं तद् अस्ति यत्र इति विग्रहः. तथा गुणत्वेन एते निरूपिताः ; गुणी भगवानेव तेन निरूपितो जातः इति भावः. **तत्त्वतः** इति, यथार्थज्ञानतः इति अर्थः. इति समुदितसङ्ख्यातात्पर्यं ; त्रयस्त्रिंशच्छ्लोकैः त्रयस्त्रिंशद्देवाः निरूपिताः इति अर्थः (का. ४-५).

**स मुहूर्तम्** इत्यत्र. **कलारूपः** इति. ज्ञानकलारूपत्वं "न उद्धवो अण्वपि मन्न्यूनः" (भाग.पुरा. ३।४।३१) इत्यत्र वक्ष्यते. **पादान्तिकम्** इति. मोक्षकारण-बीजरूप-स्वरूपस्थापनं वक्ष्यते तत् पादान्तिकम् इति अर्थः. **विषयोऽपि** इति. कृष्णाङ्घ्र्यानन्दो विषयो, नतु स्त्र्यानन्दो **भक्तानां** प्रेमभक्तियुक्तानाम् इति अर्थः ॥४॥

**शनकैः** इत्यत्र. **व्यापिवैकुण्ठे** इति, मोक्षकारण-बीजरूप-स्थाने इति अर्थः. यत्र भगवान् तिष्ठति तदेव व्यापिवैकुण्ठम् इति भावः ॥६॥

**कृष्णद्युमणि** इत्यत्र. **पृथिवीम्** इति, आधिभौतिकीम् इति अर्थः. **अबहिर्मुखान्** इति एवकारशेषः. पूर्वम् उभयानपि प्रकाशितवान्, अधुना

तानेव प्रकाशयितुम् इति अर्थः. **अमुक्तानाम् अभक्तानाञ्च** इति. ये मुक्ताः स्वान्तःस्थिताः लीलार्थं सृष्टाः, ये च नित्यलीलास्थाः भक्ताः तदुभयव्यतिरिक्तानाम् इति अर्थः ॥७॥

**इङ्गितज्ञाः** इत्यत्र. **कारणभूतदेहे** इति. मानुषादीनां सर्वेषामेव तत्तदाकृतिरूपाः देहाः सन्ति यन्निवेशनेन ते ते तत्तद्रूपाः जायन्ते. मानुषाणां तादृशदेहे स्थितम् इति अर्थः ॥९॥

**प्रदर्श्य** इत्यत्र. **अन्यथाबुद्धि-** इति, मानुषबुद्धिसम्भवाद् इति अर्थः. **धर्मद्वारा** इति, सौन्दर्यद्वारा इति अर्थः. **दृष्टिसु** इति, उपलक्षणेन ज्ञानेन्द्रियेषु इति अर्थः. **रूपान्तरेण** इति, सृष्टिकारणरूपेण मोक्षकारणरूपेण च इति अर्थः. इदं चतुर्थाध्याये स्फुटं भविष्यति ॥११॥

**तद्रूपम्** इति, आधिभौतिकदृष्टिप्रवेशयोग्यम् इति अर्थः. **यद् मर्त्य** इत्यत्र. **मर्त्यानाम्** इति. स्वरूपक्लेशव्यतिरेकेण मनोहरचेष्टारूप-**लीलाधारत्वं मर्त्यानां** देहानां **नास्ति**. **अमर्त्येषु** व्यापिवैकुण्ठस्थितेषु रूपेषु मर्त्यलीला न भवन्ति. अतो मर्त्यसम्बन्धिनी लीलारूपा न इति उभयविधक्रीडौपयिकं रूपान्तरं स्वीकर्तव्यम् इति शेषः. **तथापि** इति, रूपान्तरग्रहणेऽपि इति अर्थः. **एतद्रूपे** इति, मानुषभावापन्ने अक्षरे **भगवतः** तदन्तःस्थितस्य पुरुषोत्तमस्य **अतिप्रीतिः** इति अर्थः. **प्राणादपि** इति. बलधर्मकत्वकथनात् **प्राण**पदेन योगमाया ; ततो**ऽपि अधिका** प्रीतिः इति अर्थः ॥१२॥

**यद्धर्मसूनोः** इत्यत्र. **सर्वेऽपि** इति. एकत्र प्रविष्टा दृष्टिः अन्यं न विषयीकरोति ; भगवति प्रवेशे तु स्वरूपलाभात् प्राबल्येन सर्वमेव जानाति इति भावः. अतएव "यस्मिन् विदिते सर्वम् इदं विदितं भवति" (शाण्डिल्योप. २।२) इति श्रुतिः. **येऽपि** इति. भगवदीयाः विषयाः अपि फलतः कल्याणजनकाः, स्वरूपतस्तु अनुपदोक्त-नाशजनकाएव इति अर्थः. **तदेव अयनम्** इति. एतेषाम् अक्षरमेव अयनं, ततएव सर्वेषां व्युच्चरणाद् इति भावः. अयं दृष्टिप्रवेशः आत्मत्वेन उक्तः. विषयत्वपक्षम् आहुः **सजातीये** इति ॥१३॥

**यस्यानुराग** इत्यत्र. **आनन्दप्रधानाः** इति, बहिः आनन्दाः इति अर्थः. इदम् अष्टमाध्याये "सोन्तःशरीरेऽर्पितभूतसूक्ष्मः" (भाग.पुरा. ३।८।११) इति श्लोके व्युत्पाद्यं "पुरुषस्य सद् बाह्यं, मध्ये ज्ञानम्, आनन्दस्तु अन्तः ;

स्त्रियास्तु विपरीतम्'' (तत्रत्य सुबो.) इति. **आनन्दार्थम्** इति, भोगार्थम् इति अर्थः. **आनन्दसाधने** इति. भोगासम्भवेऽपि सुन्दरं पुरुषं दृष्टुं यतन्ते इति अर्थः. यद्यपि अयं न्यायः पुरुषेष्वपि तथापि अत्र भगवतः पुरुषत्वात् स्त्रीदृष्टेरेव निकषत्वम् उच्यते इति भावः. **सख्यपर्यन्ते** इति. आत्मनिवेदनव्युदासो अनेन उक्तः. **गोकुलस्त्रियः** इति, आधिभौतिक्यः इति अर्थः. **कामसाधकत्वाभावम्** इति, रासस्य इति शेषः. मुख्यासु ''रासक्रीडाम् अनुव्रतैः'' (भाग.पुरा. १०।३०।२) इति 'क्रीडा'पदेन ये अर्थाः तत्साधको अयं रासो न, स्वरूपानन्दानुभवो अत्र न इति ॥१४॥

**वसुदेवस्य** इत्यत्र. **गन्धः** इति. **भगवतः स्थानम्** अवस्थितिः **गन्धः** गन्धसंस्कारकं निरूप्यते. स्थितिः भूमौ इति भूमिसम्बन्धिनी लीला तद्गुणगन्धसंस्कारिका भवति इति भावः. ततः श्लोकद्वयेन उक्ता **बालकैः क्रीडा रसः** रससंस्कारिका इति अर्थः. तत्र ''यमुनोपवने'' (श्लो. २७) इति उक्तत्वाद् इयं लीला जलसंस्कारिका ॥२५॥

...त्वेन उक्तम् इत्यतः आहुः **अजेनापि** इति. **इदं च न** इति, **च न** इति अव्ययम्. **अनुषङ्गात्** पूर्वश्लोकोक्तं हेतुत्रयमपि एकं प्रयोजनं भवति, एवं **हेतुद्वयम्** इति अर्थः ॥२६॥

**पूर्वोक्त-** इति. पूर्वश्लोकोक्तं प्रयोजनत्रयं क्रमेण प्रद्युम्न-सङ्कर्षणानिरुद्धकार्यम्. व्रजे स्थितत्वात् तत्त्रयसम्पादनं भगवता न कृतमिति न अत्र तत्तद्व्यूहपुरस्कारेण क्रीडा उच्यते किन्तु भयनिवृत्तिरूपस्य एकस्य प्रयोजनस्य साधितत्वाद् वासुदेवपुरस्कारेण क्रीडा उच्यते. सा च भक्तिमार्गीय-मोक्षदानं ; तदैव भयनिवृत्तिः, ''न बिभेति कुतश्चन'' (तैत्ति.उप. २।९।१) इति श्रुतेः इति भावः. तच्च रूपं **शिरोभूतं** व्यूहेषु मुख्यम् इति अर्थः. **परीतः** इत्यत्र. **स्कन्धार्थत्वेन** इति. स्कन्धार्थः सर्गः, तद्विचारेण इदं श्लोकद्वयम् उक्तम्. ''गन्धो भगवतः स्थानम्'' (सुबो.का. ७) इति उक्तप्रकारेण वक्त्रनिष्ठ-रससंस्कारक-लीलानिरूपकम् इति अर्थः. **प्रकरणार्थत्वेन** इति. प्रकरणार्थः प्राणनिरूपणं, तद्विचारेण श्रोत्रनिरूपकम् इति अर्थः. **क्रिययैव** इति. **चारयन्** इति ''चर गति-भक्षणयोः'' (पाणि.धा.पा.भ्वा.प.से.५६०). गतिपक्षे वायुसम्बन्धिनी क्रिया उक्ता, भक्षणपक्षे प्राणसम्बन्धिनी क्रिया उक्ता

इति अर्थः. स्थानस्य अन्तरिक्षत्वकथनात् लीलायाः प्राणरूपत्वकथनाच्च इति भावः. **बाधाभावाय** इति. यमुना यमभगिनी अतः तदुपवने यमो बाधकान् दूरीकरिष्यति इति भावः ॥२७॥

* *

**तृतीयाध्याये** कारिकासु **तथा सर्गम्** इति. **तथा** संस्काररूपः **सर्गम् इन्द्रियाणां** येन तत् **मध्यचरितम्** एकादशवर्षोत्तरम् आसुरव्यामोहात् (च!) पूर्वं यत् चरितं तद् इति अर्थः. **अधिकारस्य** इति. संस्कारे जाते अधिकारः पुष्टो भवति इति भावः (का. १).

**तासु अपत्यानि** इत्यत्र. **तासाम्** इति. अधिकरणत्वेन प्राप्तं तत्तुल्यापत्यजननम् **आत्मतुल्यानि** इति पदेन निवारितम् इति अर्थः. इदं विवृण्वन्ति **तथा सति** इति. अधिकरणत्वे सति इति अर्थः. **शरीरतः** इति. एतेषां पञ्चानां **तत्सर्वधर्मतः** इत्यनेन अन्वयः. **प्रकृतेः** इति. ''अहं बहुरूपा भवेयम्'' इत्याकारिका प्रकृतेः विबुभूषा पुत्रनिष्ठ-दशत्वसङ्ख्यायां करणम् इति अर्थः. बहुत्वे विबुभूषा करणं, दशत्वं विधिपरिपालनार्थम् इति विभेदः. **सा हि** इति. तत्र पुरुषः एकः, भोगोऽपि एकवारं, कार्यं महत्तत्त्वाख्यमपि एकमेव. अत्र पुरुषो भगवान् बहुरूपः, भोगोऽपि पुनः पुनः, पुत्राश्च दश इति अर्थः. पूर्वं सकृद्भोगे हेतुम् आहुः **प्रयोजनाभावाद्** इति. ननु विबुभूषा प्रकृतिनिष्ठा पुत्रनिष्ठ-दशत्वसङ्ख्यायां कथं करणं, व्यधिकरणत्वाद् इत्यतः आहुः **यागवद्** इति. यागः एतद्देहनिष्ठो देहान्तरभोग्य-स्वर्गे करणं ; तथा अत्रापि इति अर्थः. दृष्टान्तं विशदयन्तो – यथा तत्र लिङ्गदेहस्य एकत्वेन सन्ततेः अविच्छेदात् समाधानं तथा अत्रापि पुत्रदेहानां मातृदेह-सन्ततिरूपत्वात् तथा इति भावेन – आहुः **भगवदिच्छया** इति. भगवत्कामेन इति अर्थः. अनुत्कटत्वाय **इच्छा**पदम्. **बहुधा** इति, स्वयमेव तावद्रूपा भवति इति अर्थः. **साङ्ख्यवद्** इति. इन्द्रियाणि आत्मसम्बन्धादेव कार्यक्षमाणि भवन्ति इति साङ्ख्यप्रकरणे वक्ष्यते ''वह्निः वाचा मुखं भेजे'' (भाग.पुरा. ३।२६।६३) इत्यादिना. तथा भक्तानाम् इन्द्रियप्रवृत्तिः भगवत्सम्बन्धेन इति अर्थः. उपलक्षणेन दशस्वपि इन्द्रियेषु एषा व्यवस्था इति सूचनाय कार्ये दशसङ्ख्या इति आहुः **दश** इति. **ते हि** इति. एवं प्रवृत्ताः इन्द्रियादयः सङ्घातान्तरं न

उत्पादयन्ति ; अयमेव अन्तिमसङ्घातो भवति इति अर्थः. भगवता भोगस्य स्वरूपम् आहुः **भोगश्च** इति. **तत्रापि** इति. अन्यनिष्ठापि विबुभूषैव कारणं, नतु बुभुक्षा इति अर्थः ॥९॥

**कामलीलाम् उपपाद्य** इति, "समाहुताः भीष्मककन्यया" (श्लो. ३) इत्यादि सप्तभिः इति शेषः. सप्तभिः कामनिरूपणे हेतुम् आहुः **कामजनकानि** इति. इमानि **बहिरिन्द्रियाणि चत्वारि**, मनो-बुद्धिरहङ्कारश्च इति त्रीणि अन्तः —एवं कामजनकानि सप्त. अतः तथा श्लोकसङ्ख्या इति सङ्ख्यातात्पर्यम्. अस्मिन् श्लोके कामरक्षा निरूप्यते इति सङ्गत्यर्थम् आहुः **रक्ष्यते च** इति. क्रोधनिरूपणं मुख्यम्, इदं गौणम् इति **च**कारः. **क्रोधांशैः** इति. मुचुकुन्दादिषु आविष्टत्वेन वक्ष्यमाणो भगवदंशोऽपि क्रोधलीलासाधकत्वात् क्रोधांशः इति भावः. **संवत्सरः** प्रजापतिः ब्रह्मा, **रुद्रो** रुद्रएव, **पालको** विष्णुः. **सूर्य**पदेन ब्राह्मणाः, "सैषा त्रय्येव विद्या तपति" (शतपथब्रा. १०।५।२।२) इति श्रुतेः सूर्यस्य त्रयीरूपत्वाद् ब्राह्मणानां च त्रयीधारकत्वाद् इति भावः. क्रोधांशत्वाय कालात्मकत्वं निरूपयितुं **संवत्सर-सूर्य**पदे. एवं चत्वारः कामरक्षकाः. अत्र त्रीन् निवार्य भगवानेव भक्तानां कामरक्षकः इति वक्ष्यते. क्रोधलीलायाः सप्तभिः निरूपणे हेतुम् आहुः **काम-** इति. समत्वज्ञापनार्थम् इति अर्थः. ननु क्रोधलीलायां तु षडेव श्लोकाः इत्यतः आहुः **यल्लोभे** इति. यस्मात् लोभलीलायां **गुणसङ्ख्याः** षट्सङ्ख्याकाः ते श्लोकाः उक्ताः. तथाच तत्रत्यं पूर्वश्लोकम् आदाय सप्तसङ्ख्या पूरणीया इति भावः. **निवृत्तिः** इति. तदनन्तरं सप्तभिः श्लोकैः निवृत्तिलीला इति अर्थः. **ततः** इति ल्यब्लोपे पञ्चमी. तत्सर्वम् आदाय एतन्**मध्य**एव **चतुर्मूर्तेः** लीला **निरूपिताः** इति अर्थः. **तृतीया** इति. लोभलीला वासुदेवलीला इति अर्थः. निवृत्तिलीला सङ्कर्षणस्य इति तदाभासे वक्ष्यन्ति. तथाच पूर्वम् अष्टसु श्लोकेषु ततः सप्तसु च लीले अनिरुद्ध-प्रद्युम्नयोः इति ज्ञेयम्. **प्रद्युम्नादेः** इत्यत्र क्रमो न विवक्षितः. इदं प्राधान्येन प्रकारबोधनार्थम् उच्यते, वस्तुतस्तु सर्वं सर्वत्र इति भावः. कामलीलायां धर्म्याः विवाहाः निरूपिताः, भोगश्च न भोगेच्छया इत्यादि निरूपितम्, अतो अनिरुद्धलीला सा इति युक्तम्. क्रोधलीला कथं प्रद्युम्नस्य इत्यतः आहुः **सर्व** इति. **सर्वेषां** यादवानां पाण्डवानां **परिपालनार्थं**

**मारयति** अतो वंशसम्बन्धात् प्रद्युम्नलीला इति अर्थः. एतदर्थम् एतान् **प्रथमं मारयति इति** हेतोः **तत्र** चतुर्व्यूहेषु **प्रथमं** प्रद्युम्नं क्रोधलीलायाम् **आह** इति अन्वयः. **लौकिकादि-** इति. **लौकिकप्रकारेण ब्राह्मणान् प्रपन्नः** कालयवनः, वैदिकप्रकारेण **ब्राह्मणं प्रपन्नो** मागधः, भक्त्या **शिवं प्रपन्नः** शाल्वः. **त्रिमूर्तिः** इति, ब्राह्मणादि-त्रिमूर्तिरपि इति अर्थः ; "येऽपि अन्यदेवताभक्ताः" (भग.गीता ९।२३) इति वाक्याद् इति भावः. **त्रिविध-** इति, एतद् विक्षेप्य **कामनियन्ता** इति अर्थः. पूर्वश्लोकोक्तस्य इन्द्रियस्य देवता इयं निरूपिता इति ज्ञेयम् ॥१०॥

**अथ** इत्यत्र. पूर्वश्लोकद्वयार्थम् आहुः **भक्तानामेव** इति. **देहजः** इति. उन्मत्ताः स्वरूपतोऽपि स्थिताः भाररूपाः इति तद्देहजो भारः इति अर्थः. **नखरूपैः** इति. बाहुरूप-क्षत्रियवंशान्ते जातत्वाद् इति भावः. **पूर्वस्पर्श-** इति. नखस्पर्शतः कण्डूया महती जायते इति लोकसिद्धम्. **कृमिकीटकरूपाम्** इति, अन्तःस्थितैतद्द्वयनिरूपिताम् इति अर्थः. **तन्नाशेन** इति, एतद्द्वयरूप-यादवनाशेन इति अर्थः. **देवेन्द्र** इति, हस्तदेवता निरूपिता इति भावः ॥१२॥

**सकर्ण** इत्यत्र. **'येषाम्' इति** इति. पूर्वश्लोकोक्तस्य 'येषाम्' इत्यस्य इदं विशेषणम् इति अर्थः. **अनुचरसहितः** इति. **सानुचरम्** इत्यादि-विशेषणत्रयं **पश्यन्** इत्यस्य कर्म इति अर्थः. विशेषणैः विशेष्यलाभः. **भगवदीयानाम्** इति. कण्डूयायां नखस्पर्शे सुखं जायते, तथा अत्र निवर्तकैरेव भारजननाद् न जातम् इति **न ननन्द** इति उक्तम्. **ज्ञानहेतुः** इति, त्वाचप्रत्यक्षं भवति इति अर्थः ॥१३॥

**कियान्** इत्यत्र. **वायुः अत्र** इति. यदूनां बलाधिष्ठाता वायुः, सच त्वगिन्द्रियदेवता. अतो भगवत्सम्बन्धिस्पर्श-बुद्ध्यर्थं प्रतिपक्षान् दूरीकरोति. एतादृशस्य बलस्य निवारणे हेतुम् आहुः **तत्र** इति. असंस्कारे **परिच्छिन्नतुल्यतया ज्ञानं** भवति, संस्कारे पूर्णत्वेन ज्ञानं भवति —**इति**प्रकारकः **स्पर्शदेवतानिर्णयो** वर्तते. अतः संस्कारस्य आवश्यकत्वबोधनाय तादृशज्ञानवतां निवारणम् इति अर्थः ॥१४॥

**मिथो यद् एषाम्** इत्यत्र. **तुल्यत्वाच्च** इति. **एकेन** मुख्येन केनचिद्

यादवेन सर्वेषां नाशनं **न** भवति, **तुल्यत्वाद्** इति अर्थः. **स्वसङ्गे** इति, स्वस्य सङ्गे प्रभासे समागतान् इति अर्थः. एते आधिभौतिकाः इति ज्ञेयम्. **तुल्यता** इति. स्वयं मानुषभावं त्यक्तवान्, ते च तथा कृताः इति तुल्यता इति अर्थः. **माययैव** इति. माया कालादीन् आश्रित्य तथा करोति इति अग्रिमाध्याये विशदं भविष्यति. **तथावस्था** इति, मत्ततावस्था इति अर्थः. **मुक्तौ** इति, एकादशस्कन्धे इति अर्थः. **सर्वत्र** इति. मुक्त्यन्ते तान् उक्त्वा मुक्तानाम् आश्रयः कृष्णः इति तदग्रे आश्रयलीला निरूपितवान्. तेन **सर्वत्र** आधुनिकेष्वपि **(तान्!)** तल्लीलास्थान् **विना** तत्र **आश्रयः** शरणमार्गो **निरूपयितुं** साधयितुं **न शक्यः,** किन्तु तल्लीलास्थेष्वेव आधिभौतिकेषु अग्रिमाध्याये वक्ष्यमाणेन प्रकारेण भगवता सृष्टेषु कालादिभिः कृतनिरोधात् तेषु गुरुद्वारा मोक्षकारण-बीजस्वरूपसम्बन्धे आश्रयः साधयितुं शक्यः **इति सूचितम्** इति अर्थः. अतएव नवरत्नटीकायां "ननु इदमपि न स्वशक्यम्" (नवरत्नविवृ. ९) इति आशङ्क्य "'यमेवैष वृणुते' (कठोप. १।२।२३, मुण्डकोप. ३।२।३) इति श्रुतेः 'मे मतिः इत्येव'" (तत्रैव) इत्यनेन वृतानामेव शरणसिद्धिः उक्ता. पञ्चमाध्यायोक्त-सृष्टिस्थेषु मध्ये 'यम् एषः' एतल्लीलाकर्ता स्वलीलायां 'वृणुते तेन लभ्यः' इति श्रुतौ अर्थः. 'शक्य'पदेन एतावत्त्वाभावे प्रवाहरीत्या मार्गे समागमनेऽपि अशक्यत्वाद् आश्रयः सिद्धो न भवति इति सूचितम्. **विसर्गः** इति, इति निसरणोपायत्वाद् इति भावः ॥१५॥

**तथात्वख्यापनाय** इति. अहितप्रतिभाने निरुपधित्वं भक्तेः सिद्ध्यति. तथाच हितकर्तृत्वज्ञानोपाधिराहित्येन निरुपधित्व-ख्यापनाय इति अर्थः. आपाततः एव तथा, वस्तुतस्तु हितमेव इति आहुः **दश** इति. **नित्यवद्** नित्यलीलास्थानामिव एतेषां सर्गादिक्रमेण अन्ततो **दशलीलाभ्योऽपि परे व्यापिवैकुण्ठे स्थितिः** भविष्यति इति अर्थः. **नित्यवद्** इति कथनाद् ईषन्न्यूनतापि ; आध्यात्मिकत्वम् इति अर्थः. अग्रिमश्लोकाभासं वदन्तः आहुः **रूपान्तरेण** इति. **स्वामिनः** स्वस्य **सेवकस्य** युधिष्ठिरादेः **रूपान्तरेण** सेवकत्वं स्वामित्वं च सम्पाद्य **भजनं** हितार्थं सेवकस्य इति शेषः. सारथ्यादिना भक्तवश्यत्वज्ञानेन पुरुषोत्तमत्वज्ञानं भवति इति भावः. विरुद्धज्ञानं तु अन्येषां, नतु भक्तानां भवति इति

आहुः **स्वामित्वम्** इति. **सेवको** भक्तः लीलायां भगवता स्थापितं **स्वामित्वं हन्ति** न मन्यते. **तथा परः** स्वामी भगवान् **सेवकत्वं हन्ति** न मन्यते. **अन्यथा** विरुद्धज्ञाने **ससाधनः** साधनं लीला तत्सहितो **भक्तिमार्गः सफलो न स्यात्** तत्फलं मुक्त्यादिकं न भवेद् इति अर्थः. तथा सति लीला न सिद्ध्यति इति आशङ्क्य विभागम् आहुः **सेवा** इति. **स्वामी विरसः सेवादशायां** सेवकनाट्यं न कुर्यात् तदा **सिद्धेः अभावो** यत्र तत्त्वं लीलायाः स्यात्. **पश्चात्** फलदशायामपि **चेत् सेवक**नाट्यं कुर्यात् तदा भक्तस्य **फलं** स्वस्य **ईशत्वं च न भवेद्** इति अर्थः. सिद्धम् आहुः **यावत्साधनम्** इति. अतः इति शेषः. अतो हेतोः **यावत्साधनं** लीलासिद्धिपर्यन्तम् **आत्मानं** तथा **कृत्वा अन्ते** फलार्थं **पूर्वभावस्य नाशं कुरुते** इति अर्थः. प्रकृते तेन सिद्धम् आहुः **अतः** इति. **अभिप्रेतान्** राज्यादि**विषयान् स्वान्** युधिष्ठिरादीन् **भोजयति ;** स्वयं सेवकनाट्यं करोति इति अर्थः. **न अन्यथा** विरुद्धज्ञानं तेषां न भवति इति अर्थः ॥१६॥

**उत्तरायाम्** इत्यत्र. **पूर्वदेहे** इति, पितृदेहे इति अर्थः ॥१७॥

**भगवानपि** इत्यस्य अन्ते **स्वार्थं कृतसृष्टिम्** इति, आध्यात्मिकीं सृष्टिम् इति अर्थः. **साक्षित्वे** इति, आधिभौतिकसृष्टौ साक्षित्वमात्रम् इति अर्थः. **सर्गभेदे** इति, आध्यात्मिकाधिभौतिकयोः सर्गयोः भेदे साङ्ख्यास्थितिः हेतुः इति अर्थः. **भगवान् भुङ्क्ते** इति, आध्यात्मिकीं सृष्टिम् इति शेषः. **जीवोऽपि भुङ्क्ते** इति, आधिभौतिकीं सृष्टिम् इति शेषः. **घ्राणम्** इति. अत्र रमणं द्विधा उक्तं, घ्राणमपि द्विद्वारम् इति भावः ॥१९॥

**द्वितीये** इति. भोगो बहिः रमणं ; तत्र त्रिविधाएव उक्ताः इति पुरुषरूपएव तत्, पुरुषोत्तमरमणम् अन्तः इति विभागः. **इमं लोकम्** इत्यत्र. आत्मना रमणं = व्यापिवैकुण्ठस्थितैः सह लीला इति आशयेन आहुः **रात्र्या** इति. मूले **स्निग्ध** इति चरणत्रयोक्तैः त्रिभिः करणैः **इमम्** इति अर्धोक्तान् त्रीन् **रमयन् क्षणदया दत्तक्षणः** सन् **श्रीनिकेतेन आत्मना रेमे , स्त्रीक्षणसौहृदः च रेमे** इति अन्वयः. आत्मना रमणं केवलस्य लीला. केवलता तु लीलात्मिकैव इति "साक्षी चेता केवलो निर्गुणश्च" ( श्वेताश्व.उप. ६।११ ) इति श्रुतिव्याख्याने भाष्ये निरूपितम् इति भावः. एतदाशयेनैव मूले **श्रीनिकेतेन** इति विशेषणं

**च**कारश्च. इदं सर्वं मनसि कृत्य आहुः **वैकुण्ठ** इति. भगवान् कदाचित् स्वस्मिन् रमते, कदाचित् प्रपञ्चे इति निबन्धे तृतीयस्कन्धे च निरूपितम्. तथाच प्रपञ्चाभावदशायां भगवान् व्यापिवैकुण्ठसुखम् अनुभवति. तथा अस्मिन् रूपे अवतीर्णोऽपि रात्र्यां स्वरूपे स्थितो रमते, स्त्रीसुखे च रमते इति अर्थः. केवलता लीलात्मिका इति **रमते** इति उक्तम्. तथाच निबन्धे, तृतीयस्कन्धे, अन्यत्रापि यत्र आत्मरमणम् उच्यते तत्र एवमेव ज्ञेयम्. अतएव प्रपञ्चाभावदशायामपि श्रुतीनां तथा दर्शनं, "तस्माद् एकाकी न रमते" (बृहदा.उप. १।४।३) इति श्रुतेः अविरोधः च. अत्र अयं भावः— अस्मिन् रूपे मानुषतुल्यतास्वीकारात् तन्न्यायेन अवस्थात्रयमपि वाच्यम्. तत्र जाग्रदवस्था **रमयन्** इत्यन्तेन उक्ता. अवस्थाद्वयं लोकन्यायेन रात्रौ वाच्यम्. तत्र **आत्मना रेमे** इत्यनेन सुषुप्तिः उक्ता. तस्यां हि सर्वेऽपि अन्तरेव स्वानन्दम् अनुभवन्ति, तथा अयमपि अस्मिन् रूपे स्थितः तदन्तरेव रमते इति अर्थः. मानुषभावस्य प्रदर्शनमात्रार्थत्वात् स्वप्ननिरूपणम् अनतिप्रयोजनम् इति तत्स्थाने किञ्चित् साम्येन स्त्रीसुखमेव उक्तम् इति ॥२०-२१॥

**दैवाधीनेषु** इत्यस्य आभासे. **तत्र** इति. **लौकिकेषु** स्त्री-पुत्रादिभोगेषु **अनिष्टज्ञानं शास्त्रतो** भवति. **विहितेषु** स्वर्गादिभोगेषु तथा **ज्ञानं** "इदमपि नश्वरम्" इति **परमार्थ**ज्ञाने भवति. रागस्तु लौकिकत्वेन शास्त्र-परमार्थज्ञानतः प्रबलः. अतो अनिष्टज्ञानस्य रागस्य च **तुल्यबलत्वाभावाद् अकार्यताज्ञानमेव लोके निवर्तकम्** इति अर्थः. **कैमुतिकन्यायेन** इति. स्वाधीनकामवतो भगवतोऽपि वैराग्यं जातं तत्र दैवाधीनकामवतो वैराग्ये किं वक्तव्यम् इति अर्थः ॥२३॥

**ततः कतिपयैः** इत्यत्र. **रागाभावद्वयस्य** इति, अन्तर्बहिर्वैराग्यस्य इति अर्थः. **तत्र** इति, परित्यागेषु मध्ये इति अर्थः. **मनुष्यभावम्** इति, आधिभौतिकेषु आवेशेन जातं मनुष्यत्वम् इति अर्थः ॥२५॥

**अन्नं चोरुरसम्** इत्यत्र. **शिष्टेषु** इति. अन्तिमेषु षट्सु श्लोकषु शिष्टानि चक्षुःश्रोत्ररसनानि सदेवानि उन्नेयानि इति शेषः. अध्यायान्ते **एतद्रूपाणि** इति. एतद् रूपं येषां (तानि!) संस्कृतानि **इन्द्रियाणि सर्गार्थम्** अलौकिकदेहोत्पादनार्थम् **अन्यं न गृह्णन्ति.** भगवतैव तेषाम् अलौकिकदेहः सम्पादनीयो, नतु पञ्चाग्निविद्यायामिव आहुतिदेवापेक्षा इति अर्थः. **हेतवश्च**

इति. इन्द्रियसर्गे प्रद्युम्नादयो हेतवश्च उक्ताः. तत्र प्रकारः **जन्मे**त्यादि चतुर्णां कार्यम्. इन्द्रियाणि अलौकिकानि जायन्ते, तत्र **हेतुः** धर्मः —इदं द्वयं प्रद्युम्नानिरुद्धकार्यम्. **स्वेन** रूपेण मोक्षदाता वासुदेवः. **भावः** सत्ता स्वरूपेण अवस्थितिः,प्रलयः इति यावद्, इदं सङ्कर्षणकार्यम् ॥२८॥

* * *

चतुर्थेऽध्याये कारिकासु **भगवता** इति. **भगवता** सम्पादिता **बुद्धिः अधिकारार्थं पञ्चधा उच्यते.** बुद्धिसर्गः तृतीये इन्द्रियसर्गे निरूपितः ; चतुर्थे अध्याये भगवता सम्पादिता बुद्धिः श्रोतृ-वक्त्रोः अधिकारसिद्ध्यर्थम् संशयादि-पञ्चप्रकारैः कर्तव्याकर्तव्यभेदेन विचार्यते इति अर्थः. अयमपि एकः संस्कारएव इति भावः. पञ्चधा कथने हेतुम् आहुः **पञ्चपर्वा-** इति. सा बुद्धिः यतः संशयादि-पञ्चपर्वा अतो **अत्र पञ्चधा सम्प्रोक्ता** इति अर्थः. **स्वरूपञ्च** इति. द्वितीयाध्याये "यन्मर्त्यलीलौपयिकम्" (भाग.पुरा. ३।२।१२) इत्यादिना उद्धवेन भगवत्**स्वरूपं** निरूपितं, तृतीये **गुणाः** उक्ताः, **अत्र** चतुर्थे भगवता भागवतोपदेशेन स्वस्मिन् सम्पादितं **फलं** निश्चयबुद्धिरूपं **निरूप्यते.** एतत्सम्पादने प्रयोजनम् आहुः **एतादृशे** इति. **यतो** हेतोः **एतादृशे** स्वरूप-गुण-ज्ञातरि निश्चयबुद्धिमति **पुरुषे भगवान्** मोक्षकारण-बीजरूपः **आविशेद्** अतः इति अर्थः. मोक्षकारण-बीजरूपत्वं वक्तुं भगवत्पदं, सर्वकारणबीजरूपस्तु ऐश्वर्यादीन् इदं स्थापितवान् इति वक्ष्यति. एतन्निरूपणेन विदुरे अधिकारसम्पादनप्रयोजनम् आहुः **तदैव** इति. भगवदर्थसृष्टिस्थाः महत्तत्त्वादयो अधिकारे सम्पन्नएव **यथा** यथावद् **बुध्यन्ते अतो भगवतः** सम्बन्धिनि **सर्गे** विदुरस्य भगवदर्थक-सर्गश्रवणे **अयम्** अधिकारसर्गो **हेतुः निरूपितः** इति अर्थः (का. १-३).

**अथ** इत्यत्र. **साधनम्** इति, इङ्गित-ज्ञानादि इति अर्थः. **यदि बुद्धिः** इति, द्वितीयाध्याये "लोकलोचनम्" (भाग.पुरा. ३।२।११) इति विशेषणे विवृतं ज्ञानम् इति अर्थः. **तदा** इति, साधनवैयर्थ्ये इति अर्थः. **तस्माद् एवम्** इति, ज्ञाननाशक-निषिद्धकालादि-सम्बन्धो न कर्तव्यः इति अर्थः. **अतोऽत्र** इति. भगवन्तं साक्षात्कुर्वतामपि यादवानां स्मृत्यात्मिका बुद्धिः विपरीतैव जाताः **अतः** पूर्वचरितस्मरणरूपायाः **स्मृतेः अत्र** भागवत**शास्त्रे अप्रामाण्यम्**

इति अर्थः. अतएव “वेदाः श्रीकृष्णवाक्यानि” (त.दी.नि. १।७) इति प्रमाणगणनायां स्मृतयो न गणिताः. **अपकर्षवाक्यैः** इति, अपकर्षबोधकैः वाक्यैः तदर्थभूतं मर्मरूपम् अपकर्षम् उक्तवन्तः इति अर्थः. ननु ज्ञानं तृतीयक्षणे स्वयमेव नश्यति, तत्र मदिरायाः का हेतुता इति आशङ्क्य तत्सर्वं विवृण्वन्ति **ज्ञानं च** इति. **स्थिरं, त्रिक्षणावस्थायि**त्वनियमो **न** इति अर्थः. **घ्राणेन** इति. यथा घ्राणेन गन्धस्य ग्रहणे गन्धः स्फुरति तथा **मनसा** ज्ञानस्य **ग्रहणे** ज्ञानं स्फुरति, “एतज्ज्ञानवान् अहम्” इति अनुव्यवसायो भवति इति अर्थः. एतेन इन्द्रियैरेव विषयैः सह ज्ञानमपि गृह्यते इत्यादि मतानि अपास्तानि. **त्रिविधम्** इति, “कैवल्यं सात्त्विकं ज्ञानम्” (भाग.पुरा. ११।२५।२४) इति वाक्याद् इति भावः. **तदेव** इति, अनुव्यवसायात्मकमेव इति अर्थः. **आश्रयरूपम्** इति, “येन स्वरोचिषा” (भाग.पुरा. २।५।११) इति ब्रह्मणा उक्तम् इति अर्थः. **तदपि** इति, भगवद्गुणभूतं ज्ञानम् इति अर्थः. **चित्ताश्रितम्** इति. चित्तस्य अन्यदा लीनत्वात् तज्जन्यज्ञानं ‘चित्ताश्रितम्’ इति उच्यते. तदेव जागरणदशायाम् आत्मानं भगवन्तं बहिः चेत् पश्येत् तदा तज्जं ज्ञानं सविषयत्वाद् बुद्ध्याश्रयमपि भवति. अतएव अग्रे तथा वक्ष्यते इति भावः. **पूर्वोक्त-** इति, हसित-भाषितादि-व्यवधाने इति अर्थः. **सामान्यतो नाशः** इति. “प्रदर्श्यातप्ततपसाम्” (भाग.पुरा. ३।२।११) इति श्लोकोक्तम् आदानम् इति अर्थः. **तत्र हेतुः** इति, नित्यलीलास्थैः सह जायमानं हसित-भाषितादिकं जवनिकावशाद् एतद्विषयकं न भवति इति अर्थः. **अंशतः** इति, एतस्यैव विवरणं **स्वरूपतः** इत्यादि त्रयम् इति मातृ-मेयभेदेन त्रिविधांशतः इति अर्थः. **गुण**पदेन विषयो ज्ञेयः. **स्वरूपतो** नाशे सूक्ष्मरूपेण स्थितस्य अज्ञानं, **स्थानतो** नाशे विपरीतज्ञानं – यथा प्रत्यनीकत्वज्ञानं यादवानां, दैत्यानां च शत्रुत्वेन ज्ञानं – विषयतो नाशे विषयस्य स्वरूपस्यैव तिरोभावः इति विभेदः. **येषु** इति. यतः इयं मर्यादा अतो बुद्ध्याश्रितम् इदं ज्ञानं बुद्धावेव नश्यति, ब्रह्मबोधने आविर्भविष्यति इति भावः. इदमेव “संसारदुःखस्य निवृत्तिः ब्रह्मबोधनम्” (सिद्धा.मुक्ता. २) इत्यारभ्य “तथा कृष्णं परं ब्रह्म स्वस्मिन् ज्ञानी प्रपश्यति” (सिद्धा.मुक्ता. १४) इत्यन्तेन सिद्धान्तमुक्तावल्यां विवृतम्. **तद्विषय-** इति. स्मृतिविषयः प्रद्युम्नादिः, तत्सम्बन्धीनि इति अर्थः.

**विषयाश्रयाधारम्** इति, वाक्यस्य विषयभूतश्च आश्रयः प्रद्युम्नादिः आधारो यस्य इति अर्थः ॥१॥

**साधनसाध्यभावेन** इति. साधनं मर्मस्पर्शः साध्यं मर्दनम् इति साधन-साध्यभेदेन स्मृतिरेव श्लोकद्वयार्थः. **भगवान्** इत्यत्र. **अनैश्वर्य-** इति. अत्र हेतुः भगवत्त्वम् इति अर्थः. **स्वस्य** इति. तथाच मोहिकायाः मायायाः इदं कार्यम् इति भावः. **उत्तरत्र साधनम्** इति. ऐश्वर्यादीनां वेदे स्वरूपस्य विष्णोः स्थापने मायागत्यवलोकनं **साधनं** हेतुः इति अर्थः. इदम् अवलोकनं स्मृतिरूपम्. यादवेभ्यइव मर्त्यलीलौपयिक-स्वरूपादपि तिरोभावस्य वक्तव्यत्वाद् अत्रापि स्मृतिः वाच्या. तथाच अत्रापि श्लोके साधन-साध्यभेदेन स्मृतिः उक्ता इति श्लोकत्रयार्थः स्मृतिः इति पूर्वोक्तं सिद्धम् इति ज्ञेयम्. **तदर्थं प्रवृत्तः** इति, मर्त्यलीलार्थं तल्लीलौपयिके स्वरूपे अग्निवद् आविर्भूतः इति अर्थः. इदं पूर्वं विवृतम्. **स्वात्मानम्** इति, स्वकीयः आत्मा ऐश्वर्यादिगुणाः इति अर्थः. **बीजात्मकम्** इति, वनस्पत्यादि-रूपसृष्टिबीजं सदंशः इति अर्थः ; वेदः सदंशस्तु नामसृष्टिबीजम् इति विभेदः. सदंशे स्थापनाद् अतः परं मूर्तौ आविर्भविष्यति इति भावः. **विष्णौ** स्थापनाद् निर्गुणभक्तिमार्गीयैरपि वैष्णवधर्मानुसरणं कर्तव्यम् इति च सूच्यते. **आश्रयाभावेन** इति. स्वरूपं, गुणाः, देहस्थानीय-मर्त्याकारम् अक्षरञ्च इति त्रयं मिलितम् अनैश्वर्यस्य आश्रयः ; त्रयाणां विभागे आश्रयाभावः इति अर्थः. **ऐश्वर्येण** इति, अनैश्वर्यनिराकरणेन इति अर्थः. **बीजे प्रविशति** यथा येन प्रकारेण **एतदर्थं** तत्प्रकारकथनार्थं **कथिता** इति पूर्वेण अन्वयः. **माहात्म्यम्** इत्यादिना अध्यायचतुष्टयार्थः उक्तः. **स्वरूपं** भूतसंस्कारकम् इति अर्थः. **विषयः, इन्द्रियाणि, बुद्धिः** इत्यत्रापि तत्तत्संस्कारकम् इति अर्थः. **अतः** इति. अनैश्वर्यतिरोभावो वैष्णवैः भवति इति उक्तम्. इमाभ्यां विग्रहाभ्यां वृक्षाणां भगवदीयानां च 'वैष्णव'पदवाच्यत्वाद् एकत्र इदम् **उपपाद्य** द्वितीये इदम् **उपपादयितुं पूर्वमेव उद्धवं विचारितवान्** इति अन्वयः. **वृक्षमूले उपविश्य** इत्यस्यैव विवरणं **सृष्टिकारणबीजम् उपपाद्य** इति. **सृष्टेः कारणं बीजं** सूक्ष्मं विष्णुरूपम् **उपपाद्य** सृष्टिसमर्थं कृत्वा, तत्र रूपं स्थापयित्वा इति अर्थः. एवं कृते सदंशाः एतेषां देहेन्द्रियादयो अन्तःस्थित-तत्स्वरूपाएव सृष्टाः भवन्ति इति भावः. **मोक्षेत्यत्रापि मोक्षस्य**

**कारणबीजं** भगवदीयम् **उपपादयितुं** मोक्षदानसमर्थं कर्तुं तत्र स्वरूपं स्थापयितुम् इति अर्थः. **भगवान्** इत्यस्य **वैष्णवम् उद्धवं पूर्वमेव विचारितवान्** इति अन्वयः. किं विचारितवान् इति उक्ते **स्वयम्** इति आरभ्य **उपपादयितुम्** इत्यन्तेन तद् उक्तम्. **अतः** इत्यस्य **स्वयम्** इत्यादिना अन्वयः. **प्रथमा** इति, सर्गः इति अर्थः. **अन्तिमा** इति, मुक्तिः इति अर्थः. आश्रयस्तु स्वरूपमेव इति भावः. अयं विभागः आधिभौतिकेषु ; आध्यात्मिकेषु तु सर्वाः लीलाः भगवतैव कर्तव्याः इति ज्ञेयम् ।।३।।

**सप्ताङ्गानि** इति, शिक्षादीनि षडङ्गानि मीमांसा च इति. एतैरेव वेदार्थनिश्चयो भवति. **अनेन** इति, सप्ताङ्गैः निश्चितेन वेदेन, द्वादशात्मकेन स्वरूपेण च इति अर्थः. **मुक्तौ तु** इति. मुक्तिस्तु आध्यात्मिकानां, तत्र इदं किञ्चिद् वक्तव्यं न भवति इति अर्थः. **बीजाद्** इति, **फले विस्तारो बीजाद्** हेतोः भवति, यादृशं बीजं तादृशं फलम् इति. अतो महती आध्यात्मिकानां फले वक्तव्ये इदम् आधिभौतिकानां मोक्षबीजं वक्तव्यं न भवति इति अर्थः. **अतः** इत्यस्य **भगवदुक्तम्** इत्यनेन अन्वयः. **अतो** हेतोः **प्रथमम्** एवं **भगवदुक्तं** तद् **आह** इति अन्वयः. **सर्वैश्वर्यदानेन** इति, मोक्षकारणबीजस्य ऐश्वर्यादिविशिष्टत्वाद् इति भावः. **विपरीतेन** इति. बदरीप्रेषणेन एवंविधम् आर्तिदूरीकरणं न सम्भवति अतएव मोक्षकारण-बीजोपपादनार्थं प्रभासगमनाशयो ज्ञायते इति भावः. **अन्यत्तु** इति, आधिभौतिकम् इति अर्थः ।।४।।

**अद्राक्षम्** इत्यत्र. **तदा** इति, अनैश्वर्यतिरोभावे सति इति अर्थः. इदम् अनैश्वर्यं पदार्थरूपं, नतु अभावरूपम् इति ज्ञेयम्. **एतान्येव** इति. प्रथमाध्यायचरणद्वये **षोडशाधिकरण्या प्रतिपादितान्येव** अत्र गुणोपसंहारार्थे उक्तानि इति शेषः. **सर्वार्थस्य** इति. सर्वेषाम् अर्थो मोक्षो यस्मात् ; मोक्षकारण-बीजोपपादनार्थं स्थितस्य इति अर्थः. **इति 'अद्राक्षम्'** इति. **अद्राक्षम्** इत्यादिना एतावान् अर्थः उक्तः. तत्र हेतुः **ब्रह्मे**ति. **कार्याभावाद्** इति, सर्गार्थं बीजे स्वरूपस्थापनमात्रम् उक्तं, नतु किञ्चित् कार्यम्, अतः उपविष्टएव तथा करोति इति अर्थः. कार्यरहितः उपविष्टो भवति इति लोके सिद्धम् इति भावः. **अनेन** इति, उपविष्टः उपसंहृतावयवो भवति अतः तथा इति अर्थः. तेजःश्यामतां संस्थातविशेषं (?) च सूर्यमण्डले तमसि लोकेषु च

स्थापितवान् इति एकादशस्कन्धे वक्ष्यते, अतो अत्र **लोकेषु** इति उक्तम्. **विचारयन्** इत्यन्तेन **विचिन्वन्** इति पदस्य विवरणम् ; अग्रिमवाक्यं भिन्नम् इति ज्ञेयम्. **प्रपञ्चयज्ञ-** इति. "ददर्श तत्र अखिलसात्वतां पतिम्" (भाग.पुरा. २।९।१४) इति चत्वारोऽपि अर्थाः उक्ताः इति भावः. सात्वत्पतित्वेन सौभाग्यम् उक्तं, तेष्वेव सौन्दर्यप्रकटनाद् इति भावः. **हेतुवादाः विरोधाश्च** इति, अनाश्रितत्वेन सर्ववादानवसरत्व-कथनाद् इति भावः. **ब्रह्म-शिवौ** इति. तत्तत्कार्यकर्तृत्वात् तत्तत्त्वम् उच्यते. एतेषाम् उत्पत्ति-स्थिति-प्रलयकर्ता भगवान्, नतु सर्गमात्रकर्ता इति अर्थः ॥६॥

**श्यामावदातम्** इत्यत्र. **सदृशवद्** इति मत्वन्तं ; तत्सदृशं यत् श्यामत्वं तद्युक्तः इति अर्थः. **संस्कृत-** इति, कर्मभिः संस्कृताम् इति अर्थः. रजोऽभावाद् उत्पादकाभावः इति भावः. **अनेन** इति. अत्र मुक्तिविवेचनेन वेदात्मकत्वं सूचितं ; वेदेनैव मुक्तिः भवति इति भावः. तेन मनोमयत्वम् उक्तं, "तस्य यजुरेव शिरः" (तैत्ति.उप. २।३) इत्यादिना वेदात्मकत्वकथनात्. उपलक्षणेन चतूरूपत्वमपि ज्ञेयम्. तथाच न केवलम् आनन्दमयएव किन्तु एतेषाम् अन्नमयादिचतूरूपोऽपि इति भावः. **ज्ञान-** इति. चक्षुः हि वृत्त्या अन्यत्र गच्छति. तथाच इदं शक्तिद्वयम् अन्यत्र गच्छति, तेन समानैश्वर्यं भवति इति भावः. **लोचने** इति सप्तम्यन्तं, पूर्वोक्तं प्रथमा-द्विवचनान्तं ज्ञेयम्. **तथात्वाद्** इति, समीपासाधारणधर्मत्वाद् इति अर्थः. **अनेन** इति. ज्ञानात्मकलोचने तद्वत्त्वकथनेन ज्ञानक्रियारूपस्यैव तस्य अत्र प्रसिद्धिः उक्ता इति अर्थः. **उभयोः** इति पार्श्वयोः इति शेषः. परोक्षवादेन अर्थम् आहुः **अत्र** इति. अस्मिन् अर्थे (**विदितं**=!) विदितेन प्राप्यं विदितसम्बन्धी इति अर्थः. अर्शआद्यच्. **दोर्भिः चतुर्भिः** इति पदद्वयेऽपि प्राप्यम् इति शेषः. **काल-** इति. अस्मिन् पक्षे वेः कालस्य दितं येन इति विग्रहः. प्रत्यक्षेण अर्थम् आहुः **प्रकट-** इति. **तेन च विदितम्** इति. अत्रापि **विदित**पदं पूर्ववदेव. एतद्विशेषणोक्तसाधनैः सिद्धं यद् ज्ञानं तेन प्राप्यम् इति अर्थः इति आशयेन आहुः **अनेन** इति आरभ्य **-साधनानि** इत्यन्तेन. **अनेन** इति, अनेन विशेषणेन सिद्धे ब्रह्मभावेऽपि इति अर्थः. **'पीतम्' इति** इति. पा पाने. पीतं पानम्, आत्यन्तिकप्रलयः इति यावत्. अहन्ताममताभावएव सः इति भावः. इदमेव

"संसारदुःख"पदव्याख्याने (सिद्धा.मुक्ता. २) "अहंताममतात्मकः संसारो, नतु प्रपञ्चात्मकः, तस्य ब्रह्मात्मकत्वाद्" (विवृति) इति सिद्धान्तमुक्तावलीटीकायाम् उक्तम्. एतेन साङ्ख्यम् उक्तम्. योगम् आहुः **'कौशम्' इति** इति. एताभ्यां सिद्ध्यति तद् आहुः **'अम्बरम्' इति** इति. जाग्रत-स्वप्न-सुषुप्तिपरित्यागेन निर्लेपता, चेतसो विषयपरित्यागेन तत्कृत-क्षोभाभावः इति अर्थः. इदमेव एकादशस्कन्धे हंसवाक्ये निरूपितं "मयि तुर्ये स्थितो जह्यात् त्यागः तद्गुणचेतसाम्" (भाग.पुरा. ११।१३।२८) इत्यन्तेन. एकस्मिन् विशेषणे त्रयाणां निवेशने तात्पर्यम् आहुः **एकमेव एतद्** इति ॥७॥

**वामे ऊरौ** इत्यत्र. **दक्षिणम्** इति. अस्मिन् पक्षे **अधिश्रित्य** इत्यपि पदं समासएव अन्तर्भूतं स्थितम् इति अर्थाद् इति तु उभयत्रापि समम्. **प्रतिच्छायरूपाः** इति, **ऊरु**पदेन स्वजनितपुत्रसदृशाः इति अर्थः. **चातुर्यम्** इत्यादिभिः **दक्षिण**पदस्य अर्थत्रयम् उक्तम्. **पाषण्डाभावो** वाममार्गाभावः ; दक्षिणमार्गाः इति अर्थः. **सकुटुम्बस्य** इति, स्त्री-पुत्रादेः ऊरुसम्बन्धित्वाद् इति भावः. अस्मिन् अर्थे वामे ऊरौ च तथा इति अर्थः. **ऊरु**पदं तदूरुसम्बन्धिपरम्. **शारीरकादीनि** इति. स्वदेहमिव सर्वाणि भूतानि पश्येद्, आत्मनः पुत्रवत् पश्येत्, तैः एषाम् अन्तरं कियद् इति च इति अर्थः. **निवारितानि** इति. पूर्वोक्तस्य **अपाश्रित**पदस्य अर्थो अत्रापि अनुवर्तनीयः. अपाश्रिताः निवारिताः एते येन इति अर्थः. परोक्षवादत्वाद् एवं कथनं, यथा उपहूते उपहोता इति. पक्षान्तरम् आहुः **अस भुवि** इति. पूर्वत्रापि पक्षे पदानाम् अर्थाः एतएव ; तत्र निवारणम् उक्तम् अत्र ग्रहणम् उच्यते इति विभेदः. "अप्यक्षरवर्णसामान्यात् निर्ब्रूयाद्" (निरुक्त २।१) इति न्यायेन एकैकाक्षरम् आदाय तथारूपसिद्धिः, यथा छान्दोग्ये 'सत्य'पदनिरुक्तिः. ग्रहणपक्षे अर्शआद्यजन्तम्. एतेषाम् एतत्त्रयकर्ता स्वयमेव, नतु कर्म-कालौ इति भावः. स्नानादिना क्लेशसहनं तपस्या इति ज्ञेयम्. पक्षान्तरेण पदार्थान् आहुः **प्रपञ्च-** इति. उत्पत्तित्वात् प्रपञ्चः पूर्वपदार्थः. सः ब्रह्मत्वेन ज्ञातो ज्ञानसाधनमेव. **कर्म** चित्तशोधकत्वेन तथा. **ज्ञान**पदेन "अमानित्वम् अदम्भित्वम्" (भाग.पुरा. ११।११।४०) इत्यादिना उक्तानि साधनानि. एतानि **ज्ञानसाधनानि गृहीतानि** इति लिङ्गविपरिणामेन पूर्वेण अन्वयः. **कर्माणि च** इति, इदं द्वितीयाबहुवचनान्तम्.

**अनेन** इति, फलत्यागकथनेन इति अर्थः. **नित्यानि** इति **निषिद्धानि** इति पूर्वेणैव अन्वयः. **योगेन** इति. कर्तव्याः ज्ञान-क्रिया-भक्तयः क्रमेण उक्ताः ॥८॥

**एवम् उद्धवोक्तेऽपि** इति. कल्पान्तरे उद्धवाद् आश्रयलीलाश्रवणेन कृतार्थता = प्रेम भवति, ततो मुक्तिः उक्त-भागवतश्रवणफलं भवति इति अर्थः. मैत्रेयोक्ते यथा दशलीलानियमाभावः एवम् उद्धवोक्तेऽपि इति अंशे दृष्टान्तः. **आश्रयरूपा** इति. सर्वार्थे भगवानेव आश्रयणीयः इति दशलीलानामपि सूक्ष्मं रूपं सर्वत्र अनुस्यूतम् इति अर्थः. विसर्गे धर्मादिसिद्धिः भगवदाश्रयेणैव उक्ता. एवम् अन्यत्रापि उक्तम्. तथाच दशमी लीला दशानामपि सूक्ष्मं रूपम्, आम्रादिवृक्षाणां फलमिव बीजभूतं फलभूतञ्च रूपम् इति अर्थः ॥९॥

**तस्यानुरक्तस्य** इत्यत्र. **ननु** इति. **दयोपदेशयोः गोप्यत्वाद् द्वयोः** श्रोत्रोः अन्योन्यं जात्यादिभिः **भिन्नप्रकारयोः** सतोः **उपदेशो न हि** भवति इति अर्थः. स्वरूप-गुणाभ्यां समानत्वं **तस्यानुरक्तस्य** इत्यनेन **मुनेः** इत्यनेन च उक्तम्. अनुरक्तत्वेन प्रसिद्धो मैत्रेयः, उद्धवोऽपि तथा. मैत्रेयो मुनित्वाद् अन्यत्र न वक्ष्यति, उद्धवोऽपि मन्त्रित्वात् तथा इति. उद्धवः क्षत्रियो, मैत्रेयो द्विजः इति जात्यादेः भेदः ; तस्य समाधानम् आहुः **कृपा-** इति. **मुकुन्दः** इति पदेन सूचिता **कृपा हेतुः** इति अन्वयः. **स हि** इति. मोक्षदानसमये पूर्वावस्थायाः त्याजनीयत्वाद् जात्यादिधर्मनाशकः इति अर्थः ॥१०॥

**वेदाहम्** इत्यस्य आभासम् आहुः **पूर्वम्** इति. **भगवन्तमेव** इति लीलाविशिष्टं, नतु केवलम् इति अर्थः. **साधनानि** इति. "गच्छ उद्धव मया आदिष्टः" (भाग.पुरा. ११।२९।४१) इति आरभ्य "मद्धर्म निरतो भव" (भाग.पुरा. ११।२९।४४) इत्यन्तेन उक्तानि गतित्रयातिव्रजनसाधनानि इति अर्थः. **तदेतच्च** इति. गतित्रयातिव्रजन-साधनसिद्ध्यर्थं बदरिकाप्रेषणं श्रीभागवतकथनं च **अन्यार्थम्**. कल्पान्तरे अन्येषाम् उद्धवोक्तश्रवणे प्रेमसिद्ध्या केवलप्राप्तिः, तव तु गतित्रयातिव्रजनम् अनपेक्ष्य लीलाविशिष्टप्राप्तिरेव इति भावः. भागवतकथनस्य अन्यार्थत्वं "मद्रूपो भूत्वा मद्रूपं जगत् ज्ञानेन करिष्यसि" (सुबो. श्लो. १२) इत्यादिना वक्ष्यन्ति. तत्साहचर्येण बदरिकाप्रेषणस्यापि अन्यार्थत्वं सिद्ध्यति इति आशयेन उक्तम् **अस्मिन् दत्ते**

इति. इदमेव विवृण्वन्ति **अहमिव** इति. तथाधिकारिणां श्रवणेनैव तथा, अन्येषां तु साधनैः गतित्रयातिव्रजने तथासिद्ध्या तथा इति द्वयमपि अधिकारिभेदेन अन्यार्थम् इति भावः. व्याख्याने **कथं दास्यसि** इति. अतो अन्यत् किञ्चिद् दास्यसि इति शेषः ॥११॥

**पुरा मया** इत्यस्य आभासे. **मद्रूपम्** इति, मदाविष्टम् इति अर्थः ॥१३॥

**को नु ईश** इत्यत्र. **तत्तु** इति. चरणं प्राप्य तु दुग्धपानेन तुल्यं सेवते. यथा तत्र फलान्तरानभिलाषः तथा अत्रापि इति तुल्यता. **निर्धारवचनम्** इति. **चतुर्ष्वपि** इति सप्तम्या निर्धारार्थकत्वम् इति भावः ॥१५॥

**इत्यावेदितहार्दाय** इत्यत्र. **अन्यथा** इति. स्व-परव्यवहारोपयोगित्वाभावे **केवलो निर्देशः** "इदं तद्" इति कथनमात्रं **व्यर्थः** विरुद्धार्थः **स्यात्** "वेदाहम्" (श्लो. ११) इत्यत्र भागवतकथनस्य अन्यार्थत्वं व्युत्पादितं तेन सह विरोधः स्याद् इति अर्थः. **व्यवहर्तव्यम्** इति. स्वरूपतो वक्तव्यं, नतु तन्मन्त्रोपदेशसामर्थ्यम् इति अर्थः. तत्तु भगवत्येव इति आशयेन **भगवति स्थितमेव** इति उक्तम्. **यथा ब्रह्मणे** इति. ब्रह्मणे दत्तं, परं तस्य क्रियाप्रधानत्वात् पूजाप्रतिपादकं वैखानसं तन्त्रम् उपदिष्टवान् इति भावः. **आश्रयरूपा** इति. सर्वार्थे भगवानेव आश्रयणीयः इति भगवतः आश्रयत्वेन स्थितिरूपा. इदमेव सर्वासां लीलानां सूक्ष्मं रूपं सर्वासु अनुस्यूतम् ॥१९॥

**स एवम्** इत्यत्र. **शारीरादि-** इति. "शारीरो जीवो देहादिः वा 'आत्म'पदार्थः" इति पक्षाः इति अर्थः. **सहजो भावः** इति. **तस्य** आत्मनः **सहजो भावः** स्वो महिमा, सर्वात्मभावः इति यावत्. तथाच मूले **तत्त्व**पदेन षष्ठीसमासः— **तत्त्व**सम्बन्धी तत्त्वस्फोरकः **आत्मविबोधमार्गः ;** यस्मिन् आत्मविबोधमार्गे इदम् आत्मनः तत्त्वं स्फुरति सः इति अर्थः. **आत्म**पदं भगवद्वाचकम्. भगवतः आश्रयत्वेन भावने सर्वात्मभावरूप-तत्त्वस्फूर्त्या पूर्वोक्ताः सर्वे सन्देहाः निवर्तन्ते, "भक्त्या माम् अभिजानाति" (भग.गीता १८।५५) इति वाक्याद् इति भावः ॥२०॥

**सोहम्** इत्यत्र. **द्वारिकापेक्षयापि** इति. मोक्षस्य द्वारं द्वारिका, इदन्तु बस्य = मोक्षस्य दर्येव इति भावः. अतएव कर्मधारयम् आहुः **बदर्येव आश्रमम्**

इति ॥२१॥

**यत्र** इत्यत्र. **चकाराद् भगवान्** इति अस्ति इति शेषः. **च**काराद् भगवत्त्वेनापि सत्ता उक्ता इति अर्थः. मूले **यत्र भगवान् नारायणः** सन् **देवः, नरः** सन् **ऋषिः** अस्ति इति अन्वयः. तौ **तेपाते** इति उत्तरार्धे अन्वयः ॥२२॥

**इति उद्धवाद्** इत्यस्य आभासे. **अप्रयोजकत्वाद्** इति, शोकरूप-विरुद्धफलसाधकत्वाद् इति अर्थः. **तद् वदन्नेव** इति, विपर्ययरूपं बुद्ध्यवस्थानं वदन् इति अर्थः. पूर्वार्धे तु **सुहृदां दुःसहं वधम्** इत्यनेन विपर्ययरूपं ज्ञानम् उक्तम्, उत्तरार्धे **ज्ञानेन** इति पदोक्तेन ज्ञानेन तत्कार्यं शोकस्य त्यागः उक्तः. व्याख्याने **स्वाधिकार-** इति. **बुध**पदेन तादृशप्रश्नाधिकारः प्रथमश्लोके उक्तः, प्रश्न**वक्ता** विदुरः इति द्वितीये, **वाच्यं** तृतीये इति विभागः. एतस्य सन्देहत्वोपपादनाय एतदङ्गत्वेन चतुर्थः श्लोकः इति आहुः **सन्देहस्य** इति. **पदार्थस्य** इति. उद्धवेन ज्ञानाकथनाद् इयं बुद्धिः निश्चयस्वरूपा न जाता इति अर्थः. **उपाय-** इति. मैत्रेयो वदिष्यति इति उपायो निर्धारितः इति पक्षे सिद्धे तु उपायनिर्धाररहितः केवलः संशयो विरुद्धफलस्य शोकस्य साधको अतो हेतोः **साधनस्य** उपायस्य मैत्रेयसंराधरूपस्य **निश्चयः आत्मनि** यस्य तादृशसंशयो अत्र प्रकरणे **निरूप्यते** इति अर्थः ॥२३॥

**निधनम्** इत्यस्य आभासे. **मायां च** इति, स्वापम् इति अर्थः. व्याख्याने **विपर्ययः** इति. **प्रश्ने विपर्ययः** उक्तः, **सिद्धान्तगोपने माया** स्वापः उक्तः. स्वापे यथार्थगोपनं भवति इति भावः. गोपने हेतुम् आहुः **सिद्धान्त-** इति. कथितेऽपि सिद्धान्ते मायायाः सम्बन्धिनी विपर्यय**बुद्धिः पर्यवसानगा** नष्टैव भवति, ननु निश्चयो भवति. अतः सिद्धान्तो गोपितः इति अर्थः ॥२८॥

* * * *

पञ्चमेऽध्याये कारिकासु **पुरुषत्वाय** इति. **कृष्णस्य पुरुषत्वाय कृष्णस्य** सम्बन्धी हर्यर्थकः **सर्गः** उच्यते इति अन्वयः. एतत्सृष्टिस्थायामेव पुरि कृष्णः शयितुम् अर्हति, अतः तत्र शयनात् कृष्णस्य पुरुषत्वं सेत्स्यति इति अर्थः. अस्मिन् विराजि पुरुषोत्तमस्य आवेशो अग्रिमाध्याये वक्ष्यते "इति

तासां स्वशक्तीनाम्'' (भाग.पुरा. ३।६।१) इत्यनेन. तथाच अस्मिन् सर्गे कृष्णएव पुरुषो जातः इति भावः (का. १).

**भूतानि** इति, जातत्वम् आदाय महदादीनि सर्वाण्येव 'भूत'पदवाच्यानि इति अर्थः. **वेदे** इति. **अस्य** पुरुषोत्तमस्य **पञ्चभिः** अन्नमयत्वादिप्रकारैः **पुरुषत्वकथा उदिता** इति अर्थः. **तएव** इति. अन्नमयादयएव **बहुधा** शिरआदिभेदेन **व्यस्ताः** सन्तः सर्वे पदार्थाः जाताः, **तस्मात्** सर्वाण्येव **तत्त्वानि** तस्य भावो धर्मः तद्रूपत्वात् सर्वमेव जगत् 'तत्त्व'पदवाच्यम् इति अर्थः (का. ३ १/२).

अग्रिमेऽध्याये मात्रानिरूपणम् इति आहुः **भोगः** इति. तदग्रिमाध्यायार्थम् आहुः **नाना-** इति. शास्त्रैरेव सन्देह-निश्चयौ. **भगवतः** इति सम्बन्धे षष्ठी. **मनः** शास्त्रपर्यालोचनपरमेव भगवदीयसृष्टिस्थं मनः इति अर्थः. **तेनैव** इति, शास्त्रविहितविषयएव प्रवृत्तानि भगवदीयसृष्टिस्थानि इन्द्रियाणि इति अर्थः. **बुद्धिः भगवतः** इत्यत्रापि सम्बन्धषष्ठी. बुद्धेः देवो ब्रह्मा. भगवदीयसृष्टिस्था बुद्धिः देवरूपैव इति तदध्याये "तस्मिन् स्वयं वेदमयः" (भाग.पुरा. ३।८।१५) इत्यनेन ब्रह्मा निरूप्यते, तदग्रिमश्लोके तत्कार्यं च निरूप्यते इति अर्थः (का. ५ १/२).

अग्रिमप्रकरणार्थम् आहुः **स्तुति-** इति. **कार्याणाम्** इति सम्बन्धषष्ठी. ब्रह्मस्तुतिप्रसादादेव कार्यसृष्टिस्थानि भूतानि, तद्धेतुकत्वाद् इति भावः. दशमाध्यायार्थम् आहुः **ततः** इति. **मात्रा एव** इति, **शरीराण्येव मात्रा** इति योज्यम्. **हरेः यथा** इति. यथा हरेः शरीरमेव मात्रात्वेन तत्प्रकरणे निरूपितं तथा अत्रापि एतच्छरीराण्येव मात्रा इति अर्थः (का. ६ १/२).

एकादशाध्यायार्थम् आहुः **कालएव** इति. कार्येन्द्रियाणां कालत्वम् उपपादयन्ति **तत्रासक्तः** इति. द्वादशाध्यायार्थम् आहुः **बुद्धिः** इति. **तेषां** कार्याणां **बुद्धिः** एते त्रयः इति अर्थः. एतेषां बुद्धित्वम् उपपादयन्ति **तत्रोक्तैरेव** इति (का. ८).

**कार्योपयोगि-** इति. भगवत्कार्योपयोगीनि भगवदीयसृष्टिस्थानि यानि तत्त्वानि तेषाम् इति अर्थः (का. ९).

**क्रीडन् विधत्ते** इत्यत्र. **चरितेन कृत्वैव** इति. **चरितेन** भक्षणेन **अमृतानि**

पुरुषश्चेत् तानि भक्षयति = तद्विषयकम् इन्द्रियव्यापारं करोति तदा न मृतं यैः तादृशानि भवन्ति इति अर्थः. **अमृत**पदस्य अर्थान्तरम् आहुः **उत्पन्नान्येव** इति. तदा न मृतं( / मृत्युः ?) येषाम् इति विग्रहः. **इति** हेतोः **श्रवणादि** इति अन्वयः. कर्मणां दर्शनादिसर्व-**प्रयत्नविषयत्वेन** हेतुना **तेषां** प्रयत्नवतां पुरुषाणाम् **अमृत**पद-पूर्वव्युत्पत्त्या **नित्यत्वे** सिद्धे द्वितीयव्युत्पत्त्या तान्यपि **उत्पन्नान्येव नित्यानि इति** हेतोः **श्रवणादिविषयाणां** कर्मणामपि **नित्यत्वाद्** इति अर्थः. **तदवतारत्वेन** इति, **तत्** रूपम् इति अर्थः ॥७॥

**येन प्रजानाम्** इत्यत्र. **'च'काराद्** इति. **नारायणादि**-पदत्रयोक्तं हेतुत्रयमपि विशेषतः प्रष्टव्यमेव अस्ति इति अर्थः. **अन्यथा** इति, श्रोतुः स्वतएव हेतुज्ञाने इति अर्थः. **वक्तव्यं स्याद्** इति पाठे उत्तरमात्रमेव वक्तव्यं स्याद्, नतु हेतुपूर्वकम् इति अर्थः ॥९॥

**कः तृप्नुयाद्** इत्यत्र. **भगवद्गुणास्तु** इति. एते वक्ष्यमाणप्रकारेण **चतूरूपाणि** यानि अभिधानानि तद्विषयाः इति शेषः ॥११॥

**स विश्वजन्मस्थिति** इत्यत्र. **कृतावतारः** इति, कृतः समष्टौ अवतारो अवतरणं येन इति अर्थः. एतेन एतत्सृष्टौ व्यष्टिष्वपि तथैव व्यवस्था इति सूचितम् इति आशयेन आहुः **व्यष्टीनां वा** इति. एतस्य उत्तरं "कालवृत्त्या तु मायायाम्" (श्लो. २६) इत्यनेन वक्ष्यते. तत्र कालवृत्तिरपि उक्ता इति आशङ्का-समाधाने आहुः **ननु** इति आरभ्य **न दोषाय** इत्यन्तम्. अतएव नवरत्नटीकायां "प्रारब्धभोजनार्थं प्रभुः चेद् विलम्बते" (नवरत्नविवृति १) इति प्रभोरेव स्वातन्त्र्यम् उक्तम् ॥१६॥

**अथ ते** इत्यत्र. **केवल-** इति. "एतस्माद् आत्मनः आकाशः सम्भूतः" (तैत्ति.उप. २।१) इत्यादिप्रकारेण भगवतएव सर्वम् इति वेदएव, अत्र तु योगमायोपबृंहितत्वात् "मायायां वीर्यम् आधत्ते" (श्लो. २६) इति वक्ष्यते इति आहुः **तथापि** इति. **साधनभूता** इति, सामर्थ्यरूपा इति अर्थः. "पूर्ववद् वा" (ब्रह्मसूत्र ३।२।२९) इति न्यायेन इति भावः. **बुद्ध्यन्तर-** इति. बुद्ध्यन्तरविस्मरणेन स्नेहः स्थिरो भवति इति भावः. माहात्म्यज्ञानयुक्त-स्नेहएव 'भक्ति'पदार्थः इति आशयेन भक्तिः भवति इति. **सर्वदोषाभावः** इति. "ब्रह्मन् कथं भगवतः" (भाग.पुरा. ३।७।२) इत्यादिना प्रष्टव्याः दोषाः

कर्तृत्वे आपद्यन्ते, तदभावः, लीलयैव कर्तृत्वाद् इति अर्थः. एतावन्मात्रेण अबोधे पुनः प्रश्नः कृतः इति ज्ञेयम्. **उपायेन** इति. **उपायो** योगमाया, तया **लीला** उपबृंहिता **सम्बद्धा इति** हेतोः **सा** लीला **न अपगच्छति** प्रयोजनं साधयत्येव इति अर्थः. **अन्यथा** इति, तत्सहभावाभावे इति अर्थः ॥२२॥

**भगवान् एक आस** इत्यत्र. **इदं सर्वं जगद्** इति व्यष्टिरूप-मूलभूतः चिद्रूपो वक्ष्यते. तदेव पूर्वम् आस इति अर्थः. **किन्तु एकस्मिन्नेव** इति. **भगवान् एक आस** इति श्लोकोक्त-भगवद्रूपएव इति अर्थः. **तदानीन्तनानाम्** इति. पूर्वं तु जीवाः अध्यासेन स्वस्य देहादित्वं मानितवन्तः इति सद्रूपाएव इति भावः. **तत्रैव अस्य** इति. सच्चिदंशौ विश्वम्. तत्र सदंशो अधिकः चित्स्वपि विद्यमानः ; तस्य व्यष्टिरूपस्य मूलभूतचिद्रूपएव लयः इति अर्थः. **अन्यथा** इति. सत्प्रधानत्वाभावे **काठिन्यं** संहतावयवत्वं **न स्यात्,** चितः विरलावयवत्वात्. काठिन्याभावे स्वरूपैक्यमेव स्याद्, नतु पूर्वोक्तो लवणदृष्टान्तको भेदः इति भावः. तर्हि सदंशे लयो अस्तु इति आशङ्क्य तत्रापि इदमेव दूषणम् इति आहुः **सति** इति. विरलावयवो हि यत्र गच्छति तत्र स्वरूपैक्यं प्राप्नोति इति भावः. **स्वस्मिन् सम्पाद्य** इति, मूलभूत-चिद्रूपजीवान् संस्थाप्य इति अर्थः. **तत्रैव** इति, मूलभूत-चिद्रूपएव इति अर्थः. **अनेन** इति. सत्प्राधान्यात् काठिन्येन **तस्य अस्पर्शो** लवणवद् भिन्नरसत्वम् इति अर्थः. **विभुत्व-** इति, **विभुत्वं हेतुः** यस्य इति अर्थः. **आत्मेच्छायाः** इति. जीवानाम् इच्छास्तु लीनाः, भगवदिच्छायाएव **सर्व**जीवेषु **अनुगमाद्** इति अर्थः ॥२३॥

**स वा एषः तदा** इत्यत्र. **औपाधिक-** इति. एतेषाम् उपाध्यभावे सति एतएव न भवन्ति इति अर्थः ॥२४॥

**सा वा एतस्य** इत्यस्य आभासे. **आत्मासत्त्व-** इति. "आत्मानम् असन्तं मेने" (श्लो. २४) इति पदत्रयेण आत्मा असत्त्वं ज्ञानं च उक्तं, तानि इति अर्थः. व्याख्याने **त्रितयात्मकं वा** इति. अस्मिन् पक्षे सच्च असच्च आत्मा च सदसदात्मानः, स्वार्थे कः, सदसदात्मिका. **सवर्ण-** इति. अणिपरे "यस्य इति च" (पाणि.सू. ६।४।१४८) इत्यनेन आकारलोपो

न, किन्तु सवर्णे दीर्घः. तथा सति अदन्तत्वाभावात् **न ङीप्** इति अर्थः. **अनुद्धृतसारया** इति. सदसदात्मिकायां सारः सत्त्वं, तम् उद्धृत्य अलौकिकमेव जगत् कृतवान्. **अनुद्धृतसारया इदं जगदेव** यौगिकार्थम् आदाय उत्पत्त्यादि-भावविकारयुक्तं सदसद्रूपमेव **निर्ममे** इति अर्थः. तत्र सारांशैः असारांशैः च तथा-तथाविधस्य व्यवहारो ज्ञेयः. **यस्य भावरूपा** इति. ''भगवान् एक आस'' (श्लो. २३) इत्यत्र उक्तस्य भगवतो मूलभूत-चिद्रूपस्य जीवभावापन्नस्य धर्मरूपा इयं शक्तिः, कर्तृत्वं तु पुरुषोत्तमस्य इति अर्थः. तथाच अत्र **विभु**पदेन पुरुषो, नतु ''भगवान् एक'' (श्लो. २३) इत्यत्र उक्तो भगवान् इति ज्ञेयम्. **जीवार्थत्वाद्** इति. **भगवत्कर्तृके** उभयविधेऽपि **जगति जीवानां** भक्तिमार्गीयमोक्षदानम् **अर्थः** प्रयोजनं यस्य तत्त्वम् इति अर्थः. ''ज्ञानेन मोक्षो देयः'' इति यदा विचारयति तदा अक्षरं चतुर्मूर्तीं करोति इति निबन्धे निरूपितम्. अस्मिन् जगति रूप-नामसम्पादनेन जीवानां भक्त्या मोक्षो भवति. इदं प्रथमस्कन्ध-दशमाध्याये ''सएव भूयो निजवीर्यचोदिताम्'' (भाग.पुरा. १।१०।२१) इति श्लोके सुबोधिन्यां स्फुटम् ॥२५॥

**कालवृत्त्या** इत्यस्य आभासे **सामान्यतः** इति. ''यया इदं निर्ममे'' (श्लो. २५) इत्यनेन सामान्यतः उक्तमेव इति अर्थः. व्याख्याने **कालः तत्र** इति. ''पूर्ववद् वा'' (ब्रह्मसूत्र ३।२।२९) इति न्याये शक्तिरूपेण पूर्वम् उद्गमात् सामर्थ्यरूपः कालः इति अग्रिमाध्याये वक्ष्यते ॥२६॥

उक्तानि आत्मा-ऽसत्त्व-ज्ञानानि क्रमेण रजस्तमःसत्त्वानि ज्ञेयानि. गुणात्मकत्वे प्रकृतित्वमेव सम्पन्नम् अतो **अव्यक्ताद्** इति मूले उक्तम्. **जीवधर्माद्** इति. जीवस्य धर्मः शक्तिः माया इति अर्थः. माया मातृस्थानीया, भगवदंशः पुरुषः पितृस्थानीयः इति अर्थः. ननु एवं तु चेतनसृष्टिः जायते, महत्तत्त्वं तु सदंशाऽचेतनसृष्टिहेतुः इत्यतः आहुः **सङ्घातोत्पत्तिः** इति. **अत्र** सृष्टौ अचेतनं सर्वं चेतनाश्रितम् अतः सर्वमेव सङ्घातरूपम्. अतएव ''मदब्रवीद्'' (?) (                    ) इत्यादि वाक्यानि इति भावः. लयोऽपि जीवाश्रितस्यैव जगतः उक्तः इति आहुः **सङ्घातएव च** इति ॥२७॥

**महत्तत्त्वाद्** इत्यत्र. **पूर्ववद्** इति पूर्वयोरिव. यथा मायायां महत्तत्त्वे

च त्रिगुणतः त्रैविध्यम् अस्ति तथा अस्मिन्नपि इति अर्थः ॥२९॥

**तैजसानि** इत्यत्र. **पूर्वम् उक्तैव** इति, द्वितीयस्कन्धे उक्ता इति अर्थः ॥३१॥

**एते देवाः** इत्यत्र. **देहवचनादिकम्** इति. चेतनत्वेऽपि हस्ते पादादिप्रकारक-देहाभावात् प्राञ्जलित्वं स्तुतिः च न सम्भवति, अतः इदं विचार्यते इति अर्थः. **प्रतिरूपतया** इति. येषां येषां भागानाम् अंशाः एते निर्गताः तत्र सर्वत्रैव कारणस्य भगवतः **प्रतिरूपाः** कारणरूपाः हस्तादयो वर्तन्ते. अन्यथा कार्ये हस्तादयो न भवेयुः इति युक्तः. कारणे भगवति हस्तादिसत्त्वे प्रमाणाकाङ्क्षायां **सर्वतः पाणिपादत्वाद्** इति उक्तम्. ते कार्यरूपाः न भवन्ति इति **कारणप्रतिरूप-** इति उक्तम्. **शरीरन्तु** इति, हस्त-पाद्यवयव-व्यावृत्त्यर्थं **तु**शब्दः. समाधानान्तरमपि आहुः **अभिमानिनोऽपि** इति. **चिदंशाः देवविशेषाः अभिमानिनोऽपि** एतेषां सन्ति इति अर्थः. तथाच "अभिमानिव्यपदेशस्तु" (ब्रह्मसूत्र २।१।५) इति न्यायेन तद्धस्तादिभिः व्यवहारः इति भावः. **अतएव** इति, स्वेषु हस्ताद्यभावादेव इति अर्थः. अयं पक्षो वैदिको न इति आहुः **वेदे तु** इति. तत्र तु समष्ट्युत्पत्त्यनन्तरं सर्वे जाताः निरूपिताः. "द्वया ह" (बृहदा.उप. १।३।१) इत्यत्रापि इन्द्रियाणि सन्ति इति निरूपितम् ; अभिमानिनस्तु न उक्ताः. अतः पूर्वोक्तमेव समाधानं तत्र ज्ञेयम् इति अर्थः. **तेषामपि** इति. वेदोक्तेन्द्रियाणामपि भगवदंशत्वमेव रूपम्. तेऽपि भगवदंशाः इति **यदंशाः एते** इत्यादिना उक्तमेव समाधानं तत्रापि ज्ञेयम् इति अर्थः. तथाच "अभिमानिव्यपदेशस्तु" (ब्रह्मसूत्र २।१।५) इति सूत्रोक्तं समाधानं पूर्वपक्षिमतेनैव इति ज्ञेयम्. **आधिदैविकत्वाद्** इति. आधिदैविकाएव नियामकः, नतु तत्तदभिमानिनो भिन्नाः भिन्नाः सन्ति इति पक्षे इति अर्थः. **अन्यथा** इति, प्रतिव्यक्तिभिन्नानां नियामकत्वपक्षे इति अर्थः. **विसर्गे** इति. चतुर्थस्कन्धे पुरञ्जनप्रसङ्गे "आसीत् पुरञ्जनो नाम राजा" (भाग.पुरा. ४।२५।१०) इत्यादिषु जीवस्य भ्रमणादिकं निरूपितं तत्रापि इदमेव समाधानम् इति अर्थः ॥३७॥

**सृष्टौ तु** इति. **सृष्टिसाधकं भक्त्यादेः रूपं निरूप्यते** इति अर्थः. **सर्व-** इति. सर्वासु लीलासु भक्त्यादित्रयं तिष्ठति इति बोधनार्थं प्रथमलीलायां

तद् उच्यते इति अर्थः. **भगवत्कार्य-** इति. सृष्टिहेतुकं त्रितयं कामादिविशिष्टं निरूपितं, **भगवत्कार्यसिद्ध्यर्थं** तु **कामादिरहितमेव** त्रयं तथा निरूप्यते इति अर्थः. **साधकम्** इति. कामादिविशिष्टं भक्त्यादेः रूपं भगवत्कार्यस्य **साधकं न इति** हेतोः **अग्रे** उपोद्धातप्रकरणे भगवदर्थक-सर्गविवक्षायां काम-क्रोध-लोभविशिष्टानां कर्म-ज्ञान-भक्तीनां **नाशः उच्यते** इति अर्थः (का. १२-१४) ॥३८॥

॥ एतावत्येव उपलब्धा ॥

( अप्रकाशित ).

